This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

Ind L 350.2

Bd. Nov. 1884.

SIGILL : COLL : HARVARD : CANTAB : NOV : ANGL : 1650.
CHRISTO ET ECCLESIAE

FROM THE BRIGHT LEGACY.

Received 11 Sept 1884

Descendants of Henry Bright, jr., who died at Watertown, Mass., in 1686, are entitled to hold scholarships in Harvard College, established in 1880 under the will of

JONATHAN BROWN BRIGHT

of Waltham, Mass., with one half the income of this Legacy. Such descendants failing, other persons are eligible to the scholarships. The will requires that this announcement shall be made in every book added to the Library under its provisions.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Vol. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

IX 160
I Nd L 330.2 Minckfund.

Digitized by Google

INDEX TO VOLUME II. NEW SERIES.

ÁNANDAVṚINDÁVANA-CHAMPÚ, 20, 84, 148, 212, 275, 340, 407, 468, 530, 597, 661, 725.

GAṆARATNÁVALÍ BY BHAṬṬA YAJNEŚVARA, 192.

KÁŚIKÁ, 1, 65, 129, 193, 257, 321, 385, 449, 513, 577, 641, 705.

MÁNAVÍYAJNÁNAVISHAYAKAŚÁSTRÁVATÁRA, A TRANSLATION OF THE THIRD BOOK OF LOCKE'S ESSAY CONCERNING HUMAN UNDERSTANDING, 54, 102, 166, 230, 359.

NYÁYADARŚANA, TRANSLATED INTO ENGLISH, 60, 109, 311, 363. 552

SANSKRITASAMAJÁBHIDHASABHÁVṚITTÁNTA-VARṆANA, 238, 293.

SARVADARŚANA-SANGRAHA, TRANSLATED INTO ENGLISH, 174, 381, 497, 562, 614, 691.

Digitized by Google

Digitized by Google

VIII, 357
SEP 11 1884
Minot Fund.

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. I JUNE 1st 1877. Vol. 2.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

षष्ठाध्यायस्य चतुर्थः पादः ।

हुझल्भ्यो हेर्धिः ॥ १०१ ॥

हु इत्येतस्माद् झलन्तेभ्यश्चोत्तरस्य हलादेर्हेः स्थाने धिरादेशो भवति । जुहुधि । झलन्तेभ्यः । भिन्धि । छिन्धि । हुझल्भ्य इति किम् । क्रीणीहि । प्रीणीहि । हेरिति किम् । जुहुतात् । हलीत्येव । रुदिहि । स्वपिहि । इह जुहुतात्, भिन्तात् त्वमिति परत्वात् तातङि कृते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति पुनर्धिभावो न भवति । भिन्द्धि छिन्द्धीत्यत्र परत्वाद् धिभावे कृते पुनः प्रसङ्गविज्ञानाद्[illegible] क्रियते ॥

श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥ १०२ ॥

श्रु शृणु पॄ कृ वृ इत्येतेभ्य उत्तरस्य हेर्धिरादेशो भवति छन्दसि विषये । श्रुधी हवमिन्द्र । शृणुधी गिरः । पूर्धि । उरुणस्कृधि । अपावृधि । शृणुधीत्यत्र धिभावविधानसामर्थ्यादुतश्च प्रत्ययादिति हेर्लुग्न भवति । अन्येषामपि दृश्यत इति दीर्घत्वम् । पूर्धीत्यत्र व्यत्ययो बहुलमिति शप् । तस्य बहुलं छन्दसीति लुक् ॥

अङितश्च ॥ १०३ ॥

अङितश्च हेर्धिरादेशो भवति । छन्दसीति पित्त्वेनास्याङित्त्वम् । सोम रारन्धि । अस्मभ्यं तद्धर्यश्व प्रयन्धि । युयोध्यस्मज्जुहुराणमेनः । अङित इति किम् । हव्यं प्रीणीहि । रारन्धीति रमेर्व्यत्ययेन परस्मैपदम् । शपः श्लुः । अभ्यासदीर्घत्वं छान्दसत्वात् । मलोपाभावश्च अङित्त्वादेव । प्रयन्धीति यमेः शपो लुक् । युयोधीति यौतेः शपः श्लुः ॥

चिणो लुक् ॥ १०४ ॥

चिण उत्तरस्य प्रत्ययस्य लुग्भवति । अकारि । अहारि । अलावि ।

अपाचि । अकारितराम्, अहारितमामित्यत्र तलोपस्यासिद्धत्वात् तरप्त-मपोर्न लुग्भवति, चिणो लुगित्येतद्विषयभेदाद्विद्यते ॥

अतो हेः ॥ १०५ ॥

अकारान्तादङ्गादुत्तरस्य हेर्लुग्भवति । पच । पठ । गच्छ । धाव । अत इति किम् । युहि । रुहि । तपरकरणं किम् । लुनीहि । पुनीहि । ईत्वस्यासिद्धत्वादाकार एव भवति ॥

उतश्च प्रत्ययादसंयोगपूर्वात् ॥ १०६ ॥

उकारो यो ऽसंयोगपूर्वस्तदन्तात्प्रत्ययादुत्तरस्य हेर्लुग्भवति । चिनु । सुनु । कुरु । उत इति किम् । लुनीहि । पुनीहि । प्रत्ययादिति किम् । रुहि । युहि । असंयोगपूर्वादिति किम् । प्राप्नुहि । राध्नुहि । तक्ष्णुहि ॥ उतश्च प्रत्ययाच्छन्दो वा वचनम् ॥ * ॥ उतश्च प्रत्ययादित्यत्र छन्दसि वेति वक्तव्यम् । आतनुहि यातुधानान् । धिनुहि यज्ञपतिम् । तेन मा भागिनं कृणुहि ॥

लोपश्चास्यान्यतरस्यां म्वोः ॥ १०७ ॥

योऽयमुकारो ऽसंयोगपूर्वस्तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो भवति वकारमकारादौ प्रत्यये परतः । सुन्वः । सुनुवः । सुन्मः । सुनुमः । तन्वः । तनुवः । तन्मः । तनुमः । प्रत्ययस्येत्येव । युवः । युमः । असंयोगपूर्वस्येत्येव । शक्नुवः । शक्नुमः । लुगिति वर्तमाने लोपग्रहणमन्त्यलोपार्थम् ॥

नित्यं करोतेः ॥ १०८ ॥

करोतेरुत्तरस्य उकारप्रत्ययस्य वकारमकारादौ प्रत्यये परतो नित्यं लोपो भवति । कुर्वः । कुर्मः । उकारलोपस्य दीर्घविधौ अस्था-निवद्भावाद् हलि चेति दीर्घत्वं प्राप्तं न भकुर्छुरामिति प्रतिषिध्यते ॥

ये च ॥ १०९ ॥

यकारादौ च प्रत्यये परतः करोतेरुत्तरस्योकारप्रत्ययस्य नित्यं लोपो भवति । कुर्यात् । कुर्याताम् । कुर्युः ॥

Digitized by Google

अत उत्सार्वधातुके ॥ ११० ॥

उकारप्रत्ययान्तस्य करोतेरकारस्य स्थाने उकार आदेशो भवति । सार्वधातुके क्ङिति परतः । कुरुतः । कुर्वन्ति । सार्वधातुकग्रहणं किम् । भूतपूर्वेपि सार्वधातुके यथा स्यात् । कुरु । तपरकरणं लघूपधस्य गुणनिवृत्त्यर्थम् । क्ङितीत्येव । करोति । करोषि । करोमि ॥

श्नसोरल्लोपः ॥ १११ ॥

श्नस्यास्तेश्चाकारस्य लोपो भवति सार्वधातुके क्ङिति परतः । रुन्धः । रुन्धन्ति । भिन्तः । भिन्दन्ति । अस्तेः । स्तः । सन्ति । क्ङितीत्येव । भिनत्ति । अस्ति । श्नसोरिति पररूपं शकन्ध्वादिषु द्रष्टव्यम् ॥

श्नाभ्यस्तयोरातः ॥ ११२ ॥

श्ना इत्येतस्याभ्यस्तानां चाङ्गानामाकारस्य लोपो भवति सार्वधातुके क्ङिति परतः । लुनते । लुनताम् । अलुनत * । अभ्यस्तानाम् । मिमते । मिमताम् । अमिमत । संजिहते । संजिहताम् । समजिहत । श्नाभ्यस्तयोरिति किम् । यान्ति । वान्ति । आत इति किम् । बिभ्रति । क्ङितीत्येव । अलुनात् । अजहात् ॥

ई हल्यघोः ॥ ११३ ॥

श्नान्तानामङ्गानामभ्यस्तानां च घुवर्जितानामात ईकारादेशो भवति हलादौ सार्वधातुके क्ङिति परतः । लुनीतः । पुनीतः । लुनीथः । पुनीथः । लुनीते । पुनीते । अभ्यस्तानाम् । मिमीते । मिमीषे । मिमीध्वे । संजिहीते । संजिहीषे । संजिहीध्वे । हलीति किम् । लुनन्ति । मिमते । अघोरिति किम् । दत्तः । धत्तः । क्ङितीत्येव । लुनाति । जहाति ॥

इद्दरिद्रस्य ॥ ११४ ॥

दरिद्रातेर्हलादौ सार्वधातुके क्ङिति परत इकारादेशो भवति । दरिद्रितः । दरिद्रिथः । दरिद्रिवः । दरिद्रिमः । हलीत्येव । दरिद्रति ।

---

* पुनते । पुनताम् । अपुनत । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

क्ङितीत्येव । दरिद्राति ॥ दरिद्रातेरार्धधातुके लोपो वक्तव्यः ॥ * ॥ सिद्धश्च प्रत्ययविधौ भवतीति वक्तव्यम् ॥ * ॥ दरिद्रातीति दरिद्रः । आकारान्तलक्षणो णप्रत्ययो न भवति । पचादित्वादजेव भवति ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥

अद्यतन्यां * वेति वक्तव्यम् ॥ * ॥ अदरिद्रीत् । अदरिद्रासीत् । दरिद्रस्येति निर्देशे छान्दसं ह्रस्वत्वं द्रष्टव्यम् ॥

भियो ऽन्यतरस्याम् ॥ ११५ ॥

भी इत्येतस्याङ्गस्यान्यतरस्यामिकारादेशो भवति हलादौ क्ङिति सार्वधातुके परतः। बिभितः । बिभीतः । बिभिथः । बिभीथः । बिभिवः । बिभीवः । बिभिमः । बिभीमः । हलीत्येव । बिभ्यति । क्ङितीत्येव । बिभेति । सार्वधातुक इत्येव । भीयते † ॥

जहातेश्च ॥ ११६ ॥

जहातेश्च इकारादेशो भवति अन्यतरस्यां हलादौ क्ङिति सार्वधातुके परतः । जहितः । जहीतः । जहिथः । जहीथः । हलादावित्येव । जहति । क्ङितीत्येव । जहाति । सार्वधातुक इत्येव । हीयते । जेहीयते ‡ । पृथग्योगकरणमुत्तरार्थम् ॥

आ च हौ ॥ ११७ ॥

जहातेराकारश्चान्तादेशो भवति इकारश्चान्यतरस्यां हौ परतः । जहाहि । जहिहि । जहीहि ॥

लोपो यि ॥ ११८ ॥

---

* लुङ एषा पूर्वाचार्यसंज्ञा ॥

† हलीत्येवेत्यारभ्य भीयत इत्यन्तं बहुषु पुस्तकेषु नास्ति । युक्तं चैतत्, पदमञ्जर्यां हलादौ क्ङिति सार्वधातुक इत्येतेषां नात्रोपयोग इत्युक्तत्वात् ।

‡ सार्वधातुक इत्येव हीयते जेहीयते इत्येतत्पुस्तकेषु बहुषु नास्ति । पदमञ्जर्यां नास्योपयोग इत्युक्ततयेदमेव युक्तम् ।

लोपो भवति जहातेर्यकारादौ क्ङिति सार्वधातुके परतः । जह्यात् । जह्याताम् । जह्युः ॥

घ्वसोरेद्धावभ्यासलोपश्च ॥ ११९ ॥

घुसंज्ञकानामङ्गानामस्तेश्च एकारादेशो भवति हौ परतो ऽभ्यासलोपश्च । देहि । धेहि । अस्तेः । श्नसोरल्लोप इत्यकारलोपः । एधि । शिदयं लोपस्तेन सर्वस्याभ्यासस्य भवति ॥

अत एकहल्मध्ये ऽनादेशादेर्लिटि ॥ १२० ॥

लिटि परत आदेश आदिर्यस्याङ्गस्य नास्ति तस्य एकहल्मध्ये असहाययोर्हलोर्मध्ये यो ऽकारस्तस्य एकारादेशो भवति अभ्यासलोपश्च लिटि क्ङिति परतः । रेणतुः । रेणुः । येमतुः । येमुः । पेचतुः । पेचुः । देभतुः । देभुः । अत इति किम् । दिदिवतुः । दिदिवुः । तपरकरणं किम् । ररासे । ररासाते । ररासिरे । एकहल्मध्य इति किम् । ररक्षतुः । ररक्षुः * । तत्सरतुः । तत्सरुः । अनादेशादेरिति किम् । चकणतुः । चकणुः । जगणतुः । बभणतुः । जगणुः । बभणुः । लिटि आदेशविशेषणं किम् । इहापि यथा स्यात् । नेमतुः । नेमुः । सेहे । सेहाते । सेहिरे । अनैमित्तिके नत्वसत्वे तदादिर्लिट्यादेशादिर्न भवति । इहाभ्यासजश्त्वचर्त्वयोरसिद्धत्वं नास्ति । तेन तदादिरप्यादेशादिर्भवति । तथा च फलिभजोरेत्वं विधीयते । रूपाभेदे त्वादेशादिर्नाश्रीयत इति शसिदद्योः प्रतिषेधवचनं ज्ञापकम् । अन्यथा हि पेचतुः पेचुः, देभतुः देभुरित्येवमादीनामपि प्रकृतिजश्चरादीनामेत्वं न स्यात् । क्ङितीत्येव । अहं पपच । अहं पपठ ॥ दम्भेरेत्वं वक्तव्यम् ॥ * ॥ देभतुः । देभुः । नलोपस्यासिद्धत्वाच्च प्राप्नोति ॥ नशिमन्योरलिट्येत्वं वक्तव्यम् ॥ * ॥ अनेशम् । मेनका । अनेशमिति नशेर्लुङि पुषादित्वादङ् । मेनकेति मनेराशिषि चेति वुन् । विपकादिषु प्रक्षेपादित्वं न क्रियते ॥ छन्दस्यमिपचोरप्यलिटि एत्वं वक्तव्यम् ॥ * ॥ व्येमानम् । अमेर्विपूर्वस्य चानशि मुक् न क्रियते ।

* इदमयुक्तं संयोगात्परत्वेन लिटः कित्त्वाभावात् ॥

Digitized by Google

लिङि पेचिरन्। पेचिरचित्येतस्य छान्दसं ह्रस्वत्वम् ॥ यजिवप्योश्च ॥ * ॥ आयेजे । आवेपे । यजेर्वपेश्च नहि इटि छन्दस्यपि दृश्यते इत्यनन्नादे-रप्याद्यागमः ॥

थलि च सेटि ॥ १२१ ॥

थलि च सेटि परतो ऽनादेशादेरङ्गस्य एकहल्मध्यगतस्यातः स्थाने एकार आदेशो भवति अभ्यासलोपश्च । पेचिथ । शेकिथ । सेटीति किम् । पपक्थ । चग्रहणं विस्पष्टार्थम् । अक्टिदर्थमेतद्वचनमित्य-न्यस्येटो ऽसंभवात् । अत इत्येव । दिदेविथ । एकहल्मध्यगतस्येत्येव । ततविथ । ररचिथ । अनादेशादेरित्येव । चकणिथ । बभणिथ ॥

तृफलभजत्रपश्च ॥ १२२ ॥

तृ फल भज त्रप इत्येतेषामङ्गानामत एकारादेशो भवति, अभ्या-सलोपश्च लिटि क्ङिति परतः थलि च सेटि । तेरतुः । तेरुः । तेरिथ । फेलतुः । फेलुः । फेलिथ । भेजतुः । भेजुः । भेजिथ । त्रेपे । त्रेपाते । त्रेपिरे । तरते-र्गुणार्थं वचनम् । फलिभजोरादेशाद्यर्थम् । त्रपेरनेकहल्मध्यार्थम् ॥ श्रन्थे-श्चेति वक्तव्यम् ॥ * ॥ श्रेथतुः श्रेथुः ॥

राधो हिंसायाम् ॥ १२३ ॥

राधो हिंसायामर्थे ऽवर्णस्य एकार आदेशो भवति, अभ्यासलो-पश्च लिटि क्ङिति परतः थलि च सेटि । अपरेधतुः । अपरेधुः । अपरे-धिथ । हिंसायामिति किम् । रराधतुः । रराधुः । रराधिथ । अत इत्ये-तद्विहोपस्थितं तपरत्वकृतमपास्य कालविशेषमसंभवादवर्णमात्रं प्रतिपा-दयति । अथ वा इनाभ्यस्तयोरात इत्यनुवर्ततइति व्याख्येयम् । एकहल्मध्ये वा यः स स्थानी भविष्यति ॥

वा जॄभ्रमुत्रसाम् ॥ १२४ ॥

जॄ भ्रमु त्रस इत्येतेषामङ्गानामतः स्थाने वा एकार आदेशो भवति अभ्यासलोपश्च लिटि क्ङिति परतस्थलि च सेटि । जेरतुः । जेरुः ।

जेरिथ । जजरतुः । जजरुः । जजरिथ । भ्रेमतुः । भ्रेमुः । भ्रेमिथ । बभ्रमतुः । बभ्रमुः । बभ्रमिथ । त्रेसतुः । त्रेसुः । त्रेसिथ । तत्रसतुः । तत्रसुः । तत्रसिथ ॥

फणां च सप्तानाम् ॥ १२५ ॥

फणादीनां सप्तानां धातूनामवर्णस्य स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि क्ङिति परत,स्थलि च सेटि। फेणतुः। फेणुः। फेणिथ । पफणतुः । पफणुः । पफणिथ । रेजतुः । रेजुः । रेजिथ । रराजतुः । रराजुः । रराजिथ । भ्रेजे । भ्रेजाते । भ्रेजिरे । बभ्राजे । बभ्राजाते । बभ्राजिरे । भ्रेशे । भ्रेशाते । भ्रेशिरे । बभ्राशे । बभ्राशाते । बभ्राशिरे । भ्लेशे । भ्लेशाते । भ्लेशिरे । बभ्लाशे । बभ्लाशाते । बभ्लाशिरे । स्येमतुः । स्येमुः । स्येमिथ। सस्यमतुः । सस्यमुः । सस्यमिथ । स्वेनतुः । स्वेनुः। स्वेनिथ। सस्वनतुः । सस्वनुः । सस्वनिथ । सप्तानामिति किम् । दध्वनतुः । दध्वनुः । दध्वनिथ ॥

न शसदद्वादिगुणानाम् ॥ १२६ ॥

शस दद इत्येतयोर्वकारादीनां च धातूनां गुण इत्येवमभिनिर्वृत्तस्य च योऽकारस्तस्य स्थाने एकारादेशो न भवति, अभ्यासलोपश्च । विशशसतुः । विशशसुः । विशशसिथ । ददद्रे । दददाते । दददिरे । वादीनाम् । ववमतुः । ववमुः । ववमिथ । गुणस्य । विशशरतुः । विशशरुः । विशशरिथ । लुलविथ । पुपविथ । गुणशब्दाभिनिर्वृत्तस्यार्शब्दस्योकारस्य चायमकार इति एत्वं प्रतिषिध्यते ॥

अर्वणस्त्रसावनञः ॥ १२७ ॥

अर्वन्नित्येतस्याङ्गस्य तृ इत्ययमादेशो भवति, सुश्चेत्ततः परो न भवति । स च नञ उत्तरो न भवति। अर्वन्तौ । अर्वन्तः । अर्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्याम् । अर्वद्भिः । अर्वतो । आर्वतम् । असाविति किम् । अर्वा । अनञ इति किम् । अनर्वाणौ । अनर्वाणः । अनर्वाणं वृषभं मन्द्रजिह्वम् ॥

मघवा बहुलम् ॥ १२८ ॥

मघवन्नित्येतस्याङ्गस्य बहुलं तृ इत्ययमादेशो भवति । मघवान् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवती । माघवतम् । न च भवति । मघवा । मघवानौ । मघवानः । मघवानम् । मघवानौ । मघोनः । मघोना । मघवभ्याम् । मघवभिः । मघोनी । माघवनम् ॥

भस्य ॥ १२९ ॥

भस्येत्ययमधिकार, आ अध्यायपरिसमाप्तेः यदित ऊर्ध्वमनुक्रमिष्यामो भस्येत्येवं तद्वेदितव्यम् । वक्ष्यति । पादः पत् । द्विपदः पश्य । द्विपदा कृतम् । भस्येति किम् । द्विपादौ । द्विपादः ॥

पादः पत् ॥ १३० ॥

पादिति पादशब्दो लुप्ताकारो गृह्यते । तदन्तस्याङ्गस्य भस्य पदित्ययमादेशो भवति । स च निर्दिश्यमानस्यादेशा भवन्तीति पाच्छब्दस्यैव भवति, न तदन्तस्य सर्वस्य । द्विपदः पश्य । द्विपदा । द्विपदे । द्विपदिकां ददाति । त्रिपदिकां ददाति । वैयाघ्रपद्यः ॥

वसोः संप्रसारणम् ॥ १३१ ॥

वस्वन्तस्य भस्य संप्रसारणं भवति । विदुषः पश्य । विदुषा । विदुषे । पेचुषः पश्य । पेचुषा । पेचुषे । ययुषः पश्य । आतो लोपे कर्तव्ये वसुसंप्रसारणस्य ब्याश्रयत्वादसिद्धत्वं न भवति ॥ वसुसंप्रसारणे क्वसोरपि ग्रहणमिष्यते ॥

वाह ऊठ् ॥ १३२ ॥

वाह इत्येवमन्तस्य भस्य ऊठ् इत्येतत्संप्रसारणं भवति । प्रष्ठौहः । प्रष्ठौहा । प्रष्ठौहे । दित्यौहः । दित्यौहा । दित्यौहे । एत्येधत्यूठ्सु इति वृद्धिः । अथ किमर्थमूठ् क्रियते । संप्रसारणमेव कृते गुणे च वृद्धिरेचीति वृद्धा सत्यां सिद्धं रूपं भवति प्रष्ठौह इति अनकारान्ते चोपपदे वहेर्ण्विर्न दृश्यते । ज्ञापकार्थम् । एतज् ज्ञापयति भवत्येषा परिभाषा

सिद्धं बहिरङ्गमन्तरङ्ग इति । तस्यां हि सत्यां बहिरङ्गस्य संप्रसारणस्यासिद्धत्वाद् अन्तरङ्गो गुणो न स्यात् ॥

श्वयुवमघोनामतद्धिते ॥ १३३ ॥

श्वन् युवन् मघवन् इत्येतेषामङ्गानामतद्धिते प्रत्यये परतः संप्रसारणं भवति । शुनः । शुना । शुने । यूनः । यूना । यूने । मघोनः । मघोना । मघोने । अतद्धित इति किम् । शौवनं मांसम् । यौवनं वर्त्तते । माघवनः स्थालीपाकः । शुनो विकारे प्राणिरजतादिभ्योऽञ्, द्वारादित्वादैजागमः ॥ श्वादीनामेतत्संप्रसारणं नकारान्तानामिष्यते ॥ इह न भवति । युवतीः पश्य । मघवतः । मघवता । मघवते । तदर्थमुत्तरत्र योगविभागं कुर्वन्ति । अल्लोपः । अनः । अन इत्युभयोः शेष इति ॥

अल्लोपोऽनः ॥ १३४ ॥

अनित्येवमन्तस्य भस्य अकारलोपो भवति । राज्ञः पश्य । राज्ञा । राज्ञे । तक्ष्णः पश्य । तक्ष्णा । तक्ष्णे ॥ अनो नकारान्तस्यायं लोप इष्यते ॥ इह न भवति । राजकीयमिति ॥

षपूर्वहन्धृतराज्ञामणि ॥ १३५ ॥

षकारपूर्वो योऽन् हनो धृतराज्ञश्च तस्याकारलोपो भवति अणि परतः । औक्ष्णः । ताक्ष्णः । भ्रौणघ्नः * । धार्तराज्ञः । षपूर्वहन्धृतराज्ञामिति किम् । सामनः । वैमनः । अणीति प्रकृतिभावेनाल्लोपटिलोपावुभावपि न भवतः । अणीति किम् । ताक्षण्यः ॥

विभाषा ङिश्योः ॥ १३६ ॥

ङौ परतः शीशब्दे च अनो विभाषा अकारलोपो भवति । राज्ञि । राजनि । साम्नि । सामनि । साम्नी । सामनी ॥

न संयोगाद्वमन्तात् ॥ १३७ ॥

वकारमकारान्तात्संयोगादुत्तरस्यानोऽकारस्य लोपो न भवति ।

---

* वार्त्रघ्न इत्यधिकं पुस्तकान्तरे ।

पर्वणा । पर्वणे । अथर्वणा । अथर्वणे † । संयोगादिति किम् । प्रतिदीव्ना । प्रतिदीव्ने । साम्ना । साम्ने । वमन्तादिति किम् । तक्ष्णा । तक्ष्णे ॥

अचः ॥ १३८ ॥

अच इत्ययमञ्चतिर्लुप्तनकारो गृह्यते । तदन्तस्य भस्य अकारस्य लोपो भवति । दधीचः पश्य । दधीचा । दधीचे । मधूचः पश्य । मधूचा । मधूचे ॥

उद ईत् ॥ १३९ ॥

उद उत्तरस्याच ईकारादेशो भवति । उदीचः । उदीचा । उदीचे ॥

आतो धातोः ॥ १४० ॥

आकारान्तस्य धातोर्भस्य लोपो भवति । कीलालपः पश्य । कीलालपा । कीलालपे । शुभंयः पश्य । शुभंया । शुभंये । आत इति किम् । निया । निये । धातोरिति किम् । खट्वाः पश्य । मालाः पश्य । आत इति योगविभागः । तेन क्त्वो ल्यप् इलः श्नः शानज्झिति सिद्धं भवति ॥

मन्त्रेष्वाङ्यादेरात्मनः ॥ १४१ ॥

मन्त्रेषु आङि परत आत्मन आदेर्लोपो भवति । त्मना देवेभ्यः । त्मना सोमेषु । मन्त्रेष्विति किम् । आत्मना कृतम् । आङीति किम् । यदात्मनस्तन्वो वरिष्ठा ॥ आङोऽन्यत्रापि छन्दसि लोपो दृश्यते ॥ * ॥ त्मन्यासमञ्जत मह्यम् ॥

ति विंशतेर्डिति ॥ १४२ ॥

भस्य विंशतेस्तिशब्दस्य डिति प्रत्यये परतो लोपो भवति । विंशत्या क्रीतः । विंशकः । विंशं शतम् । विंशतेः पूरणो विंशः । एकविंशः । डितीति किम् । विंशत्या ॥

---

* चर्मणा । चर्मणे । इत्यधिकमन्यस्मिन्पुस्तके ।

Digitized by Google

टेः ॥ १४३ ॥

टिसंज्ञकस्य डिति प्रत्यये परतो लोपो भवति। कुमुद्वान्। नड्वान्। वेतस्वान्। उपसरजो, मन्दुरजः। त्रिंशता क्रीतः। त्रिंशकः। डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् टिलोपो भवति॥

नस्तद्धिते ॥ १४४ ॥

नकारान्तस्य भस्य टेर्लोपो भवति तद्धिते परतः। आग्निशर्म्मिः। औडुलोमिः। बाह्वादित्वादिञ्प्रत्ययः। न इति किम्। सात्वतः। तद्धितइति किम्। शर्म्मणा। शर्म्मणे॥ नान्तस्य टिलोपे सब्रह्मचारिपीठसर्प्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानं कर्त्तव्यम्॥ * ॥ अत्र ये इनन्तास्तेषामिनण्यनपत्यइति प्रकृतिभावः प्राप्तः, ये त्वन्नन्तास्तेषामणीति। सब्रह्मचारिण इमे साब्रह्मचाराः। पीठसर्पिणः। पैठसर्पाः। कलापिना प्रोक्तमधीयते, कालापाः। कुथुमिनः, कौथुमाः। तैतिलिजाजलिनामाचार्यौ तत्कृतो ग्रन्थ उपचारात् तैतिलिजाजलिशब्दाभ्यामभिधीयते। तं ग्रन्थमधीयते। तैतिलाः। जाजलाः। शौनिकेष्वर्थेषु वृद्धत्वाच्च छः प्राप्नोति। एवं लाङ्गलाः। शैलालाः। शिखण्डिनः, शैखण्डाः। सूकरसद्मनः, सौकरसद्माः। सुपर्वणः, सौपर्वाः॥ अश्मनो विकारउपसंख्यानम्॥ * ॥ अश्मनो विकार, आश्मः। आश्मनोऽन्यः॥ चर्मणः कोशउपसंख्यानम्॥ * ॥ चार्मः कोशः। चार्म्मणोऽन्यः॥ शुनः संकोचउपसंख्यानम्॥ * ॥ शौवः संकोचः। शौवनोऽन्यः॥ अव्ययानां च सायंप्रातिकाद्यर्थमुपसंख्यानम्॥ * ॥ के पुनः सायंप्रातिकादयः। येषामव्ययानामविहितष्टिलोपः प्रयोगे च दृश्यते ते सायंप्रातिकप्रकारा ग्रहीतव्याः। सायंप्रातर्भवः, सायंप्रातिकः। पौनःपुनिकः। बाह्यः। कौतस्कुतः। कालाट्ठञिति ठञ्प्रत्ययः॥ ट्युट्युलौ तु नेष्येते॥ आरातीयः। शाश्वतिकः। शाश्वत इत्येवमादिषु न दृश्यते टिलोपः॥

अह्नष्टखोरेव ॥ १४५ ॥

अहन्नित्येतस्य टखोरेव परतष्टिलोपो भवति। द्वे अहनी समाहृते,

Digitized by Google

द्व्यहः । त्र्यहः । द्वे अहनी अधीष्टो भृतो भूतो भावी वा द्व्यहीनः । त्र्यहीनः । अह्नां समूहः क्रतुः, अहीनः ॥ अह्नः समूहे खो वक्तव्यः ॥ * ॥ सिद्धे सत्यारम्भो नियमार्थः । इह मा भूत् । अह्ना निर्वृत्तमाह्निकम् । एवकारकरणं विस्पष्टार्थम् । अह्न एव टखोरित्येवं नियमो न भविष्यति, आत्माध्वानौ खे इति प्रकृतिभावविधानात् ॥

ओर्गुणः ॥ १४६ ॥

उवर्णान्तस्य भस्य गुणो भवति तद्धिते परतः । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्प्पासः । कमण्डलव्या मृत्तिका । परशव्यमयः । औपगवः । कापटवः । ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यात् । तेन स्वायंभुव इति सिद्धं भवति ॥

ढे लोपो ऽकद्र्वाः ॥ १४७ ॥

ढे परत उवर्णान्तस्य भस्याकद्र्वा लोपो भवति । कामण्डलेयः । शैतिबाहेयः । जाम्बेयः । माद्रबाहेयः । अकद्र्वा इति किम् । काद्रवेयो मन्त्रमपश्यत् ॥

यस्येति च ॥ १४८ ॥

इवर्णान्तस्यावर्णान्तस्य च भस्य ईकारे परे तद्धिते च लोपो भवति । इवर्णान्तस्य ईकारे । दाची । प्लाक्षी । सखी । सवर्णदीर्घत्वे हि सत्यतिसखेरागच्छतीत्यत्र एकादेशस्यान्तवत्त्वादसखीति घिसंज्ञायाः प्रतिषेधः स्यात् । इवर्णान्तस्य तद्धिते । दुलि । दौलेयः । बलि । बालेयः । अत्रि । आत्रेयः । अवर्णान्तस्य ईकारे । कुमारी । गौरी । शार्ङ्गरवी । अवर्णान्तस्य तद्धिते । दाक्षिः । प्लाक्षिः । चौडिः । बालाकिः । सौमित्रिः ॥ यस्येत्योङः श्यां प्रतिषेधो वक्तव्यः ॥ * ॥ काण्डे । कुड्ये । सौर्ये हिमवतः शृङ्गे । ओङः शीभावे कृते यस्येति चेति सूर्यतिष्यागस्त्यमत्स्यानां य उपधाया इति च लोपः प्राप्नोति ॥ इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन ॥ * ॥ वत्सान्प्रीणाति, वत्सप्रीः । तस्यापत्यं, वात्सप्रेयः । चतुष्पाद्भ्यो ढञ् इति ढञ् प्रत्ययः । लेखाभ्रूः शुभ्रादिः । तस्या अपत्यं लैखाभ्रेयः ॥

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ १४९ ॥

सूर्य तिष्य अगस्त्य मत्स्य इत्येतेषां यकारस्य उपधाया भस्य लोपो भवति ईति परतस्तद्धिते च । सूर्येणैकदिक् । सौरी । बलाका । अणि यो यस्येति लोपस्तस्यासिद्धत्वं नास्ति आश्रयत्वात् । ईकारे तु यस्तस्यासिद्धत्वाद् उपधायकारो भस्याणन्तस्य सूर्यस्य संबन्धीति लुप्यते । तिष्य । तैषमहः । तैषी रात्रिः । अगस्त्यस्यापत्यं स्त्री ऋषित्वादणि कृते आगस्ती । आगस्तीयः । मत्स्य । गौरादित्वान् ङीष् । मत्सी । उपधाया इति किम् । मत्स्यचरी । यग्रहणमुत्तरार्थम् । विषयपरिगणनमत्र कर्त्तव्यम् ॥ मत्स्यस्य ङ्यामिति वक्तव्यम् ॥ * ॥ इह मा भूत् । मत्स्यस्येदं मांसं मात्स्यम् ॥ सूर्यागस्त्ययोश्छे च ङ्यां च ॥ * ॥ सौरीयः । सौरी । आगस्तीयः । आगस्ती । इह मा भूत् । सौर्यं चरुं निर्वपेत् । आगस्त्यः ॥ तिष्यपुष्ययोर्नक्षत्राणि ॥ * ॥ तिष्येण नक्षत्रेण युक्तः कालः । तैषः । पौषः ॥ अन्तिकस्य तसि कादिलोप आद्युदात्तत्वं च ॥ * ॥ अन्तिकशब्दस्य तसिप्रत्यये परतः ककारादिशब्दस्य लोपो वक्तव्य, आद्युदात्तत्वं च । अन्तितो न दूरात् ॥ तमे तादेश्च ॥ * ॥ तमप्रत्यये अन्तिकशब्दस्य तकारादेः ककारादेश्च लोपो वक्तव्यः । तत्र तादिलोपे अन्तमः । कादिलोपे अन्तितमः ॥ कादिलोपे बहुलमिति वक्तव्यम् ॥ * ॥ अन्यत्रापि हि दृश्यते । अन्तिके सीदतीति । अन्तिषत् । पूर्वपदादिति षत्वम् ॥ ये च ॥ * ॥ अन्तियः ॥

हलस्तद्धितस्य ॥ १५० ॥

हल उत्तरस्य तद्धितयकारस्य उपधाया ईति परतो लोपो भवति । गार्गी । वात्सी । हल इति किम् । कारिकेयी । तद्धितस्येति किम् । वैश्यस्य भार्या वैश्यी ॥

आपत्यस्य च तद्धितेऽनाति ॥ १५१ ॥

आपत्ययकारस्य हल उत्तरस्य तद्धिते अनाकारादौ यलोपो भवति । गर्गाणां समूहो गार्गकम् । वात्सकम् । आपत्यस्येति किम् । सांकाश्यकः । काम्पिल्यकः । तद्धितग्रहणमीत्यनापत्यस्यापि लोपार्थम् । सौमी इष्टिः ।

प्नातीति कित् । गार्ग्यायणः । वात्स्यायनः । हल इत्येव । कारिकेयस्यापत्यं, कारिकेयिः ॥

क्यच्व्योश्च ॥ १५२ ॥

क्य च्वि इत्येतयोश्च परत आपत्ययकारस्य हल उत्तरस्य लोपो भवति । वात्सीयति । गार्गीयति । वात्सीयते । गार्गीयते । च्वौ । गार्गीभूतः । वात्सीभूतः । आपत्यस्येत्येव । सांकाश्यायते । सांकाश्यीभूतः । हल इत्येव । कारिकेयीयति । कारिकेयीभूतः ॥

बिल्वकादिभ्यश्छस्य लुक् ॥ १५३ ॥

नडादिषु बिल्वादयः पठ्यन्ते । नडादीनां कुक्चेति कृतकुगागमा बिल्वकादयो भवन्ति । तेभ्य उत्तरस्य छस्य भस्य तद्धिते परतो लुग् भवति । बिल्वा यस्यां सन्ति बिल्वकीया, तस्यां भवाः । बैल्वकाः । वेणुकीयाः । वैणुकाः । वेत्रकीयाः । वैत्रकाः । वेतसकीयाः । वैतसकाः । तृणकीयाः । तार्णकाः । इक्षुकीयाः । ऐक्षुकाः । काष्ठकीयाः । काष्ठकाः । कपोतकीयाः । कापोतकाः ॥ कुञ्चा ह्रस्वत्वं च ॥ कुञ्चकीयाः । क्रौञ्चकाः । छग्रहणं किम् । छमात्रस्य लुग्यथा स्यात् कुको निवृत्तिर्मा भूदिति । अन्यथा हि संनियोगशिष्टानामन्यतरापाये उभयोरप्यभाव इति कुगपि निवर्त्तेत । लुग्ग्रहणं सर्वलोपो यथा स्याद् यकारमात्रस्य मा भूत् ॥

तुरिष्ठेमेयस्सु ॥ १५४ ॥

इष्ठन् इमनिच् ईयसुन् इत्येतेषु परतः तृशब्दस्य लोपो भवति । आसुतिं करिष्ठः । विजयिष्ठः । वहिष्ठः । दोहीयसी धेनुः । सर्वस्य तृशब्दस्य लोपार्थं वचनम् । अन्त्यस्य हि टेरित्येव सिद्धः । लुगित्येतदत्र नानुवर्त्तते । तथाहि सति नलुमताङ्गस्येति प्रतिषेधाद् गुणो न स्यात् । इमनिज्ग्रहणमुत्तरार्थम् । इतरौ तु तुश्छन्दसीति भवतः ॥

टेः ॥ १५५ ॥

भस्य टेर्लोपो भवति इष्ठेमेयस्सु परतः । पटु । पटिष्ठः । पटिमा । पटीयान् । लघु । लघिष्ठः । लघिमा । लघीयान् ॥ णाविष्ठवत्प्रा-

तिपदिकस्य कार्यं भवतीति वक्तव्यम् ॥ * ॥ किं प्रयोजनम् । पुंवद्भाव-
रभावटिलोपयणादिपरार्थम् । पुंवद्भावः । एनीमाचष्टे, एतयति । श्येत-
यति । तसिलादिष्वाकृत्वसुच इति इष्ठे पुंवद्भाव उक्तः । रभावः । पृथु-
माचष्टे, प्रथयति । म्रदयति । टिलोपः । पटुमाचष्टे पटयति । लघयति ।
यणादिपरम् । स्थूलमाचष्टे, स्थवयति * । भारद्वाजीयास्तु पठन्ति ।
णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरविन्मतोर्लुक्कन-
र्थमिति । स्रग्विणमाचष्टे, स्रजयति । वसुमन्तमाचष्टे, वसयति । युवान-
माचष्टे, यवयति । कनयति । एतदुभयमप्युदाहरणमात्रं न परिगणनम् ।
प्रादयोपि ह्यीष्यन्ते । प्रियमाचष्टे, प्रापयति ॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य गुणः ॥ १५६ ॥

स्थूल दूर युव ह्रस्व क्षिप्र क्षुद्र इत्येतेषां यणादिपरं लुप्यते इष्ठे-
मेयस्सु परतः, पूर्वस्य च गुणो भवति । स्थूल । स्थविष्ठः । स्थवीयान् ।
दूर । दविष्ठः । दवीयान् । युवन् । यविष्ठः । यवीयान् । ह्रस्व । ह्रसि-
ष्ठः । ह्रसीयान् । ह्रसिमा । क्षिप्र । क्षेपिष्ठः । क्षेपीयान् । क्षेपिमा ।
ह्रस्वक्षिप्रक्षुद्रशब्दाः पृथ्वादिषु पठ्यन्ते । क्षुद्र । क्षोदिष्ठः । क्षोदीयान् ।
क्षोदिमा । परग्रहणं किम् । यविष्ठः । यवीयान् । ह्रसिष्ठः । ह्रसीयान् ।
इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत् । पूर्वग्रहणं विस्पष्टार्थम् ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः ॥ १५७ ॥

प्रिय स्थिर स्फिर उरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारक इत्येतेषां
प्र स्थ स्फ वर् बंहि गर् वर्षि त्रप् द्राघि वृन्द इत्येते यथासंख्यमादेशा
भवन्ति इष्ठेमेयस्सु परतः । प्रिय । प्रेष्ठः । प्रेमा । प्रेयान् । स्थिर । स्थेष्ठः ।
स्थेयान् । स्थेमा । स्फिर । स्फेष्ठः । स्फेयान् । उरु । वरिष्ठः । वरिमा ।
वरीयान् । बहुल । बंहिष्ठः । बंहीयान् । बंहिमा । गुरु । गरिष्ठः ।
गरीयान् । गरिमा । वृद्ध । वर्षिष्ठः । वर्षीयान् । तृप्र । त्रपिष्ठः । त्रपी-

* दवयतीत्यधिकं पुस्तकान्तरे ।

यान् । दीर्घ । द्राघिष्ठः । द्राघीयान् । द्राघिमा । वृन्दारक । वृन्दिष्ठः । वृन्दीयान् । प्रियोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते । तेनान्येषामिमनिज् न भवतीति नोदाह्रियते ॥

बहोर्लोपो भू च बहोः ॥ १५८ ॥

बहोरुत्तरेषामिष्ठेमेयसां लोपो भवति तस्य च बहोः स्थाने भू इत्ययमादेशो भवति । भूयान् । भूमा । बहुशब्दः पृथ्वादिषु पठ्यते । बहोरिति पुनर्वचनं स्थानित्वप्रतिपत्त्यर्थम् । अन्यथा हि प्रत्ययानामेव भूभावः स्यात् ॥

इष्ठस्य यिट् च ॥ १५९ ॥

बहोरुत्तरस्य इष्ठस्य यिडागमो भवति बहोश्च भूरादेशो भवति । भूयिष्ठः । लोपापवादो यिडागमः तस्मिन्निकार उच्चारणार्थः ॥

ज्यादादीयसः ॥ १६० ॥

ज्यादुत्तरस्य ईयस आकार आदेशो भवति । ज्यायान् । लोपस्य यिटा व्यवहितत्वादादित्युच्यते । लोपे हि सति [illegible]इति दीर्घत्वेन ज्यायानिति सिध्यति ॥

र ऋतो हलादेर्लघोः ॥ १६१ ॥

रशब्द आदेशो भवति ऋकारस्य हलादेर्लघोरिष्ठेमेयस्सु परतः । प्रथिष्ठः । प्रथीयान् । प्रथिमा । म्रदिष्ठः । म्रदीयान् । म्रदिमा । ऋत इति किम् । पटिष्ठः । पटिमा । पटीयान् । हलादेरिति किम् । ऋजिष्ठः । ऋजिमा । ऋजीयान् । लघोरिति किम् । कृष्णिष्ठः । कृष्णीयान् । कृष्णिमा । परिगणनमत्र कर्त्तव्यम् ॥

पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत् ॥

तत इह न भवति । कृतमाचष्टे, कृतयति । मातरमाचष्टे, मातयति । भ्रातयति ॥

विभाषर्जोश्छन्दसि ॥ १६२ ॥

ऋजु इत्येतस्य ऋतः स्थाने विभाषा रेफ आदेशो भवति इष्ठेमेयस्सु परतश्छन्दसि विषये। रजिष्ठमेति पन्थानम्। त्वमृजिष्ठः॥

प्रकृत्यैकाच् ॥ १६३ ॥

एकाच् यद्भसञ्ज्ञकं तदिष्ठेमेयस्सु परतः प्रकृत्या भवति। स्रग्विन्नित्येतस्य विन्नन्तस्य स्रजिष्ठः। स्रजीयान्। स्रजयति। स्रुग्वदित्येतस्य मत्वन्तस्य स्रुचिष्ठः। स्रुचीयान्। स्रुचयति। एकाजिति किम्। वसुमदित्येतस्य वसिष्ठः॥ प्रकृत्याऽके राजन्यमनुष्ययुवानः॥ * ॥ अके प्रत्यये परतो राजन्य मनुष्य युवन्नित्येते प्रकृत्या भवन्ति। राजन्यानां समूहो, राजन्यकम्। मनुष्याणां समूहो, मानुष्यकम्। आपत्यस्य च तद्धितेनातीति यलोपः प्रकृतिभावेन न भवति। यूनो भावः, यौवनिका। मनोज्ञादित्वाद् वुञ्। तत्र नस्तद्धित इति टिलोपो न भवति॥

इनण्यनपत्ये ॥ १६४ ॥

इन्नन्तमनपत्यार्थेऽणि परतः प्रकृत्या भवति। सांकूटिनम्। सांराविणम्। सांमार्जिनम्। अभिविधौ भाव इनुण्। अणिनुण इत्यण्। * स्रग्विण इदं, स्राग्विणम्। अणीति किम्। दण्डिनां समूहो, दाण्डम्। अनुदात्तादेरञित्यञ्प्रत्ययः। अनपत्य इति किम्। मेधाविनोऽपत्यं, मैधावः॥

गाथिविदथिकेशिगणिपणिनश्च ॥ १६५ ॥

गाथिन् विदथिन् केशिन् गणिन् पणिन् इत्येते चाणि प्रकृत्या भवन्ति। गाथिनोऽपत्यं, गाथिनः। वैदथिनः। कैशिनः। गाणिनः। पाणिनः। अपत्यार्थोऽयमारम्भः॥

संयोगादिश्च ॥ १६६ ॥

संयोगादिश्च इन्नणि प्रकृत्या भवति। शङ्खिनोऽपत्यं, शाङ्खिनः। माद्रिणः। वाज्रिणः॥

* अभिविधावित्यारभ्य इत्यण् इत्यन्तः पाठो बहुत्र नास्ति।

अन् ॥ १६७ ॥

अवन्तमपि प्रकृत्या भवति अपत्ये चानपत्ये च। सामानः। वैमनः। सौत्वनः। जैत्वनः ॥

ये चाभावकर्मणोः ॥ १६८ ॥

यकारादौ च तद्धिते ऽभावकर्मणोरर्थयोरन् प्रकृत्या भवति। सामसु साधुः, सामन्यः। ब्रह्मण्यः। अभावकर्मणोरिति किम्। राज्ञो भावः कर्म्म वा, राज्यम्। राजचिति पुरोहितादिषु पठ्यते। ततोयं यक् प्रत्ययः ॥

आत्माध्वानौ खे ॥ १६९ ॥

आत्मन् अध्वन् इत्येतौ खे परतः प्रकृत्या भवतः। आत्मने हित, आत्मनीनः। अध्वानमलङ्गामी, अध्वनीनः। खइति किम्। प्रत्यात्मम्। प्राध्वम्। प्रत्यात्ममित्यव्ययीभावे ऽनश्चेति समासान्तष्टच्प्रत्ययः। प्राध्वमित्युपसर्गादध्वन इति अच्प्रत्ययः ॥

न मपूर्वो ऽपत्ये ऽवर्म्मणः ॥ १७० ॥

मपूर्वो ऽन् अवर्म्मणोपि परतो ऽपत्येर्थे न प्रकृत्या भवति। सुषाम्णो ऽपत्यं, सौषामः। चान्द्रसामः। मपूर्व इति किम्। सौत्वनः। अपत्यइति किम्। चर्म्मणा परिवृतो रथः, चार्म्मणः। अवर्म्मण इति किम्। चक्रवर्म्मणो ऽपत्यं, चाक्रवर्म्मणः ॥ मपूर्वप्रतिषेधे वा हितनाम्न इति वक्तव्यम् ॥ * ॥ हितनाम्नोपत्यं, हैतनामः। हैतनामनः ॥

ब्राह्मो जातौ ॥ १७१ ॥

योगविभागोत्र क्रियते। ब्राह्म इत्येतदपत्याधिकारेपि सामर्थ्यादपत्यादन्यत्रापि टिलोपार्थं निपात्यते। ब्राह्मो गर्भः। ब्राह्ममस्त्रम्। ब्राह्मं हविः। ततो जातौ। अपत्यइत्येव। अपत्ये जातावपि ब्रह्मणष्टिलोपो न भवति। ब्रह्मणोपत्यं, ब्राह्मणः। अपत्यइत्येव। ब्राह्मी चौषधिः ॥

कार्म्मस्ताच्छील्ये ॥ १७२ ॥

कार्म्म इति ताच्छील्ये टिलोपो निपात्यते। कर्म्मशीलः, कार्म्मः।

शीलं छत्रादिभ्यो ण इति णप्रत्ययः । यद्येवं, किमर्थमिदं, नस्तद्धित इत्येव टिलोपः सिद्धः । सत्यमेतत् । ज्ञापकार्थं तु । एतज् ज्ञापयति ताच्छीलिके णे ऽण्कृतानि भवन्तीति । तेन चौरी तापसीति णान्तादपीकारः सिद्धो भवति । ताच्छील्य इति किम् । कर्म्मणा इदं, कार्म्मणम् ॥

औक्षमनपत्ये ॥ १७३ ॥

औक्षमित्यनपत्येऽणि टिलोपो निपात्यते । औक्षं पदम् । अनपत्य इति किम् । उक्ष्णो ऽपत्य,मौक्ष्णः । अपूर्वहन्धृतराज्ञामणि इत्यलोपः ॥

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ १७४ ॥

दाण्डिनायन हास्तिनायन आथर्वणिक जैह्माशिनेय वासिनायनि भ्रौणहत्य धैवत्य सारव ऐक्ष्वाक मैत्रेय हिरण्मय इत्येतानि निपात्यन्ते । दण्डिन् हस्तिन् इत्येतौ नडादिषु पठ्येते, तयोरायने परतः प्रकृतिभावो निपात्यते । केषां चित्तु हस्तिन्निति नडादिषु न पठ्यते । तेषामत एव निपातनात् फगपि भवति । दण्डिनोऽपत्यं, दाण्डिनायनः । हस्तिनोऽपत्यं, हास्तिनायनः । अथर्वन्निति वसन्तादिषु पठ्यते । अथर्वणा प्रोक्तो ग्रन्थोऽपि उपचाराद् अथर्वन्नित्युच्यते । तमधीते यः स, आथर्वणिकः । इके प्रकृतिभावो निपात्यते । जिह्माशिन्निति शुभ्रादिषु पठ्यते । तस्य ढके परतः प्रकृतिभावो निपात्यते । जिह्माशिनो ऽपत्यं जैह्माशिनेयः । वासिनो ऽपत्यम्, उदीचां वृद्धादगोत्रादिति फिञ् । तत्र प्रकृतिभावो निपात्यते । वासिनायनिः । भ्रूणहन् धीवन् इत्येतयोः ष्यञि तपरस्तकारादेशो निपात्यते । भ्रूणघ्नो भावः, भ्रौणहत्यम् । धीव्नो भावो धैवत्यम् । हनस्तोऽचिण्णलोरिति यत्तत्वं तद्धातुप्रत्यय एवेति भ्रौणघ्नो वार्त्रघ्न इत्यत्र न भवत्यतो भ्रौणहत्ये तत्त्वं निपात्यते । सारव इति सरयू इत्येतस्य अणि परतो ऽयूशब्दलोपो निपात्यते । सरय्वां भवं, सारवमुदकम् । ऐक्ष्वाक इति स्वरसर्वनाम्ना एकश्रुत्या पठ्यते । ततोऽयमाद्युदात्तोऽन्तोदात्तश्च निपात्यते । इक्ष्वाकोरपत्यं, जनपदशब्दात्क्षत्रियादञित्यञ्, तत्र उकारलोपो निपात्यते ।

ऐक्ष्वाकः । इक्ष्वाकुषु जनपदेषु भवः कोपधादणित्यण् । ऐक्ष्वाकः । मैत्रेय इति मित्रयुशब्दो गृष्ट्यादिषु पठ्यते, ततो ढञि कृते यादेरियादेशा-पवादो युशब्दलोपो निपात्यते। मित्रयोरपत्यं, मैत्रेयः। अथ किमर्थं मित्र-युशब्दो बिदादिष्वेव न पठ्यते तत्राञि कृते यादेरिति इयादेशेनैव सिद्धमेवं, च लोपार्थं निपातनं कर्त्तव्यं न भवति, यस्कादिषु च बहुषु लुगर्थः पाठो न कर्त्तव्यो भवति, मित्रयव इत्यञ इत्येव हि लुकः सिद्धत्वात्। नैतदस्ति । मित्रयूणां संघ इत्यत्र गोत्रचरणाद्वुञं बाधित्वा मैत्रयकः संघ इत्यत्र संघाङ्कलक्षणेष्वञ्यञिञामणित्यण् प्राप्नोति । हिरण्मयमिति हिरण्यस्य मयटि यादिलोपो निपात्यते, हिरण्यस्य विकारः, हिरण्मयः ॥

ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि ॥ १७५ ॥

ऋत्व्य वास्त्व्य वास्त्व माध्वी हिरण्यय इत्येतानि निपात्यन्ते छन्दसि विषये । ऋतु वास्तु इत्येतयोर्यति यणादेशो निपात्यते ऋतौ भवम्, ऋत्व्यम् । वास्तौ भवं, वास्त्व्यम् । वस्तुशब्दस्याणि यणादेशो निपात्यते वस्तुनि भवो वास्त्वः। मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते । माध्वीर्नः सन्त्वोषधीः । हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते । हिरण्ययम् ॥

इत्युपाध्यायश्रीवामनकृतायां काशिकायां षष्ठस्याध्यायस्य चतुर्थः पादः ॥ समाप्तश्चायं षष्ठोऽध्यायः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ चतुर्दशस्तबकारम्भः ॥

एवं चागामिनीर्यामिनीर्यापयिष्यथ प्रमदा मदासङ्गेनेति कृष्णेन दत्ताश्वासाश्वासादितभूरिसंकल्पाः कल्पायुतमिव क्षणमपि मन्यमा-नाः कुमार्योऽपि साध्वसाध्वसा एव यदि समुपसेदुस्तदा कांञ्चन

* संधिः प्राग्वत् ।

काञ्चनलतोद्यानपरम्परां परां जंगमामिव मन्वाना वनदेवता अपि ता अपि वीक्ष्य विसिष्मियिरे ॥ ६३ ॥

हे प्रमदा मदासङ्गेन मम सम्यक् सङ्गेनेति वस्त्राहरणदिने दत्त आश्वासो याभ्यस्ताः । कांचन कांचिदपूर्वामित्यर्थः, काञ्चनमयीनां लतानामुद्यानस्य परम्परां संततिं परामुत्कृष्टाम् । ता अपि कुमारीरपि, राधाद्या व्यूढास्तु वीक्ष्य किमुतेत्यर्थः ॥ ९३ ॥

प्रणयादरादराः पूर्ववद्वसन्तमहा महानुरूपवेषादिभिरभूषयन्नपि च ॥ ६४ ॥

प्रणयेन· अदराः· अनल्प आदरो यासु ताः ॥ ९४ ॥

यथा ।

कचौघे पुंनागं बकुलमुकुलानि भ्रमरके-
ष्वशोकं सीमन्ते श्रवसि सहकारस्य कलिकाः ।
स्तनाग्रे वासन्तीकुसुमदलमालेति कुसुमैः
स्वयं वृन्दा राधां सपदि मुमुदेऽलंकृतवती ॥ ६५ ॥

भ्रमरकेषु ललाटलम्बालकेषु ॥ ९५ ॥

तथान्याश्चान्यासां मधुमदमहोत्साहमहिम-
प्रमुह्यच्चित्तानामहमहमिकासत्वरहृदः ।
प्रसूनालंकारै रुचिररचनैः प्रत्यवयवं
विलासैः सौरभ्यप्रणयिभिरलंचक्रुरभितः ॥ ६६ ॥

अन्या वृन्दानुवर्तिन्यो वनदेवता अन्यासां चन्द्रावल्यादीनां प्रत्यवयवमलंचक्रुरित्यन्वयः कीदृश्यः, अहमहमिकया·इयमहमेनामलंकरोम्यथवा·अहमेवैनामलंकरोमि न त्वमित्येवंरूपया सत्वरं भूषयितुं त्वरायुक्तं हृन्मनो यासां ताः । "अहमहमिका तु सा स्यात् परस्परं यो भवत्यहंकार" इत्यमरः ॥ ९६ ॥

किंच

Digitized by Google

रत्नालंकरणानि काञ्चनमयीः शाटीश्च कुर्पासक-
श्रेणीश्चातिविचित्रिताः सुमृदुलाश्चीनोत्तरासङ्गिनीः ।
ताम्बूलान्यनुलेपनानि विविधाः पौष्पीः स्रजो गन्धिनीः
स्वच्छन्दं सुषुवुः सकल्पलतिकाः कल्पद्रुमाः सर्वतः ॥ ६७ ॥

कुर्पासकश्रेणीः कञ्चुलिकाततीः । कीदृशीः, चीनोत्तरासङ्गिनीः· चीनोत्तरासङ्गाः सूक्ष्मोत्तरीयाणि तद्वतीः । गन्धिनीः प्रशस्तगन्धवतीरिति स्रजो विशेषणम् ॥ ९७ ॥

किंच ।

बाष्पच्छेद्यसदच्छजातुषपुटीगर्भेषु संपूरितां
नानावर्णविलासचूर्णपटलीं पङ्कञ्च कास्तूरिकम् ।
पौष्पं कार्मुकमायुधं च विविधं नानाविधान् कन्दुकान्
रत्नानां जलयन्त्रकाणि सुषुवुः कल्पद्रुमाणां गणाः ॥ ६८ ॥

जातुषपुट्यः· जतुविकारसंपुटाः । "त्रपुजतुनोः षुक् च" इति षुगणो ॥ ९८ ॥

किंच ।

मातङ्गी नाम संगीतकनिगमकलाकौशलाचार्यवर्या
नानावीणाप्रवीणाः प्रणयिसहचरीः सङ्गिनीः संविधाय ।
मूर्तं रागं वसन्तं सरिगमपधनीन् मूर्तिभाजः स्वरांश्च
स्त्रीवेशेन श्रुतीश्च प्रकटमुपचिताः कुर्वती प्रादुरासीत् ॥ ६९ ॥

सरीति षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादान् स्वरान् सप्त श्रुतीर्द्वाविंशतिं संगीताधिष्ठात्री देवतेव मातङ्गीनाम्नी सती प्रादुरासीदिति किंनरलोकत इव गानप्रसिद्धिमवकलयितुमिव वृन्देच्छया कल्पवृक्षद्वारैवेति तदानींतनी प्रतीतिस्तासाम् ॥ ९९ ॥

प्रादुर्भूय सा भूयसादरेण दरेण च वराङ्गीनां प्रवरां वराम्बु-

तमुखीं वार्षभानवीमभितोऽभितोषवशंवदा वदान्यश्रीर्यं ह्यवतस्थे तदा वृन्दाभ्यभाषत ॥ १०० ॥

सा मातङ्गी भूयसा आदरेण दरेण संकोचेन च यत्न्यवतस्थे । वदान्यश्रीर्वद्वानां वाग्मिनीनां श्रेष्ठापि ॥ १०० ॥

श्रूयतामयि गुणमयि गुणकृतावधाना बधानाशु विस्रम्भम् ॥ १०१ ॥

गुणे गानशिल्पमये कृतम् अवधानं यया तथा भूता सती आशुं विस्रम्भं विश्वासं बधान, कुर्वित्यर्थः ॥ १०१ ॥

इयं मातङ्गी नाम संगीतनिगमगमकचातुरीतुरीयाचार्या चार्या-यास्तवभवत्या भवत्यानन्ददायिनि वसन्तोत्सवकौतुके को तु के न रज्यन्तीति कृत्वा संगीतसामग्रीमग्रीयामादाय भवतीमुपरञ्जयि-तुमागता ॥ १०२ ॥

संगीतस्य तन्निगमस्य गमकानां च, यद्वा संगीतस्य निगमनं यत-स्तेषां गमकानां या चातुरी तया तुरीया चतुर्थी, मुख्यामुख्यतरामुख्यत-मातोऽप्यतिश्रेष्ठा इत्यर्थः । आचार्या च किंनरीणाम्, अध्यापिका चेत्यर्थः । आर्यायाः पूज्यायास्तत्रभवत्या वसन्तोत्सवकौतुके भवति उ-त्पद्यमाने । अग्रीयां श्रेष्ठाम् ॥ १०२ ॥

इमाश्चास्याः सहचर्यो विविधवीणाप्रवीणाः प्रवरगुणभाजः ।

अयं तु ।

केशौघे विरचितशेखरः शिखण्डैः

पुष्णानः परभृतमाम्रकोरकेण ।

श्यामत्नः प्रकृतित एव मेघनीलः

स्त्रीवेशस्तव निकटे वसन्तरागः ॥ १०३ ॥

परभृतं कोकिलम् ॥ १०३ ॥

अथ तं प्रति प्रतिपन्नकौतुका कृष्णाकारतयारतया दिदृक्षयाक्षया-नन्दा सरसमृजुनापाङ्गेनेव किंचिद्वीक्षयामास यदि वार्षभानवी ॥ १०४ ॥

आरतयेति द्विहृतयेत्यस्य विशेषणम् ॥ १०४ ॥

नवीनपरिगृहीतनारीवेष: स च वसन्तरागोऽन्तरागोचरं कर्मापि कृतार्थभावमात्मनो मन्यते स्म ॥ ६०५ ॥

अन्तरागोचरम्· अन्तःकरणानामप्यविषयम् ॥ १०५ ॥

सा च मातङ्गी मातङ्गीव ललितगतिराह १०६ ॥

ललिता गतिः पादन्यासः संगीतविन्यासभेदश्च यस्याः सा ॥ १०६ ॥

अवधेहि वधेऽहिभोगस्य कुतुकिन: कृष्णस्य दयितेऽयि ते चरणपरिचरणपरिचर्याय समुपससाद ।

सरिगमपधनीनां मण्डलीयं स्वराणां
तव चरणसमीपे योषिदाकारचारुः ।
श्रुतिपरिषदपीयं विंशतिर्याद्वियुक्ता
नहि दधति विभक्तिं किंनरीणां च कण्ठे ॥ १०७ ॥

हे कृष्णस्य दयिते प्रिये राधे । तस्य कीदृशस्य, अहिभोगस्य कालियनागफणस्य वधे नाट्यमिषेण हिंसने कुतुकिनः, "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययो" रित्यमरः, तेन तद्दयितात्वात् तवापि नाट्यन्नता महतीति भावः । अयि· इति संबोधने । ते तव· इयं स्वराणां मण्डली समुपससाद, तथा· इयं श्रुतिपरिषदपि, या द्वियुक्ता विंशतिः श्रुतयः किंनरीणां च किंनरीणामपि कण्ठे विभक्तिं विभागं न दधति, न प्राप्नुवन्तीत्यर्थः ॥ १०७ ॥.

तदा तदाकलय्य रसवशतो विशतो विचित्रभावे मनसो मुदर्थमुदर्थचमत्कारं किमपि ललिता ललिताक्षरमभाषत ॥ १०८ ॥

मनसो मुदर्थमानन्दार्थम् । कीदृशस्य, चित्रभावे विशतः प्रविशतः । उदर्थः· उत्कृष्टप्रयोजनकः· चमत्कारो यत्र तद्यथा स्यात् तथा ॥ १०८ ॥

अयि संगीतदेवि किं न रराज किंनरराजवधूगणः कण्ठेन श्रुतीर्विभाजयितुम् ॥ १०९ ॥

किंनरराजस्य वधूगणाः कण्ठेन श्रुतीर्विभाजयितुं किं कथं न रराज न राजते स्म, न समर्थं इत्यर्थः, तेन स्वेषां तत्सामर्थ्यं द्योतितम् ॥ १०९ ॥

तां प्रति प्रतिजगाद मातङ्गी अयि ।

"कफादिदूषिते कण्ठे तासां व्यक्तिर्न जायते ।

अतो वीणाद्वयं वक्ष्ये चलं चाचलमेव च ॥

इति । हे परमे परमेष्ठिनेव चलाचलवीणे कृते, चलवीणायां द्वाविंशतिरेव श्रुतयो निबद्धाः, अचलवीणायां सप्तैव स्वराः ॥ ११० ॥

तासां श्रुतीनाम् ॥ ११० ॥

किंबहुना पश्यन्तु श्यन्तु च संदेहं सर्वोपरीक्षया परीक्षया. एता एताकाराश्चतस्रः खचस्य षड्जस्य श्रुतयः सुश्रुतयः सुदुर्विभाव्याः कण्ठस्य ॥ १११ ॥

पश्यन्तु तत्रभवन्त्यः सर्वासां श्रुतीनाम्• उपरि• अग्रे• ईक्षया दृष्ट्वा एताश्चतस्रः षड्जस्य श्रुतयः संदेहं श्यन्तु छिदन्तु । कीदृश्यः, एताकाराः शबलवर्णाः, "शबलैताश्च कर्बुरे" इत्यमरः सुश्रुतयः सुश्रव्याः ॥ १११ ॥

इति चतुःश्रुतिभास्वरं स्वरं षड्जमालपन्त्यां तत्र तद्ध्वनि ध्वनिता सा षड्जस्य वनिताकारा तनुरतनुरम्या स्वयमेव ॥ ११२ ॥

अस्य• एता इत्यङ्गुल्या• एव तं ताश्च दर्शयित्वा• आलपन्त्यां सत्यां तत्रालापे तद्ध्वनि कण्ठवर्त्मनि षड्जस्य तनुः स्वरूपं स्वयमेव ध्वनिता, निजलक्षणोपलब्धेः सापि ध्वनति स्मेत्यर्थः । वनिताकारा स्त्रीरूपा योषिदाकारचारुरित्युपक्रान्तत्वात् ॥ ११२ ॥

तस्य चतसृणां श्रुतीनां स्वस्वभागं भागं कण्ठेन विधातुं धातुं च समारब्धवत्यां सत्यां सविशेषं नैकापि तासां तनुः संवादवती बभूव ॥ ११३ ॥

ततश्च तस्य षड्जस्य चतसृणां श्रुतीनां स्वं स्वं भागं कण्ठेनैव भागं भायुक्तं विधातुं कर्तुं धातुं च सम्यगारब्धवत्यां सत्यां तासां श्रुती-

नाम्· एकापि तनुः· एकमपि स्वरूपं सविशेषं यथा स्यात् तथा न संवाद्वती बभूव, निजलक्षणानुपलब्ध्यैनानुध्वनति स्मेत्यर्थः, तेन कण्ठे स्वरा एव· उत्पद्यन्ते न श्रुतय इति दर्शितम् ॥ ११३ ॥

यदा तु सा संगीतप्रवीणा वीणायां चलायामेव षड्जस्य चतस्रः श्रुतीर्यथार्थविक्रमेण क्रमेण तन्त्रीषु वादयामास तदा दयामासत दाक्षिण्येनेव ताः श्रुतयः श्रुतय इव यतो यथार्थवादिन्य एवासन् ॥ ११४ ॥

दयामासत स्वरूपोपलम्भाद्नुध्वननेन दयामकुर्वन्नित्यर्थः । "ऋषयः सत्रमासतेतिवत् । यद्वा दयां प्रति· आसत कर्तुं स्थिता इत्यर्थः । श्रुतय इव वेदा इव । यतः· यां वीणां प्राप्य ॥ ११४ ॥

एवं सति चमत्कारकारणे तस्मिन् संगीतविद्याविनोदे संगीतविद्या विनोदेन कापि राधायाः सहचरी चरीकरीति स्म परिहासमिव ॥ ११५ ॥

संगीतविद्येति कर्तृपदं, विनोदेन विशिष्टनोदेन प्रेरणयेत्यर्थः, संबन्धानुक्तिः प्रेरणास्यान्यालक्षितत्वबोधिका, परीहासमिति सौहार्दसूचनार्थम्, इवेति पराभवदाने तात्पर्यात् ॥ ११५ ॥

अयि संगीतदेवते तदेतत्ते परमकौशलं यदयमेकः स्वरो विकस्वरोऽविकलश्चतुर्धा विभज्य तन्त्रीषु विशकलितः कलितः, नैकापि श्रुतिर्निषादस्पर्शिनी न कापि ऋषभस्पर्शिनी ॥ ११६ ॥

एकः स्वरः षड्जाख्यः । चतुर्धेति, चतसृणां श्रुतीनां प्रत्येकं योगात् । विशकलितोऽखण्डितः । कलितो निर्दिष्ट उद्गीतो वा ॥ ११६ ॥

किंतु स्वरपरिचयः स्वरपरिचयवतां दुर्लभ एव ॥ ११७ ॥

स्वराणां परिचयः । स्वः स्वर्गे अपरिचयवतां मर्त्यानामित्यर्थः । अत्र षष्ठी स्वरसंबन्धापेक्षया ॥ ११७ ॥

अपि त्वियमस्या वार्षभानव्या नव्या कापि सखी सुललिता ललिता नाम कण्ठेनैव विभाजयितुं समर्था भवति, भवति चेत् कुतुकं तदादिश दिशमसौ दर्शयतु स्वकौशलस्य लक्ष्यमाणतायाः ॥ ११८ ॥

तदा॰ आदिश॰ आज्ञापय, स्वकौशलस्य या लक्ष्यमाणता तस्या दिशम्॰ असौ ललिता दर्शयतु । आदिशेति गौरवप्रदानं स्वेषां शालीनताव्यञ्जनाय ॥ ११८ ॥

कस्य स्वरस्य काः श्रुतय इत्यपरिचितानामपि चितानामपि चेत्तत्र सर्वासामासामासाधारण्येनैव द्वाविंशतिक एव गणःपरिचाययितुं शक्यः कण्ठोन्नीतश्रुतिप्रतिश्रुतिप्रतिपत्त्येति, एवं सति वनदेवतास्तामूचुः, अयि संगीतविद्ये संगीतविद्येयमनया देव्या चतुर्मुखमुखनिर्गतेव व्याख्याता ख्याता चेयं वो विरञ्चिप्रपञ्चत एव हि बहिरिति तदुभयमेव निरवद्यम् ॥ ११६ ॥

सैव कीदृशी दिगित्यपेक्षायामाह॰ एकत्र स्वरे चितानां छन्नानामप्यासां श्रुतीनाम्॰ आसाधारण्येनैव असाधारणानां भाव आसाधारण्यं तेनैव ॥ ११९ ॥

अथ मातङ्गीस्तोभजनितबाधा राधारालीकृतचिल्लीलता चिल्लीलतापरमा परमाप यदि खेदं तदा स्वयमुवाच वाचमयथामतिके संगीतविद्ये भवती निजगाद यदशक्यं देवतानां तानांशकरणं श्रुतीनां श्रुतीनां भिन्नार्थकरणमिति तत् किं मानवानां नवानां प्रयवसाध्यम् ॥ १२० ॥

मातङ्ग्या स्तोभेन मानदस्वाभाव्यात् कारण्येन जनिता बाधा पीडा यस्याः सा । स्वसख्यौ संगीतविद्यां प्रति॰ अरालीकृता कुटिलीकृता चिल्लीलता यया सा । चिल्लीलता चिन्मयलीलत्वं तेन परमा, सर्वसुखदेत्यर्थः । हे॰ अयथामतिके मिथ्याबुद्धिके देवतानामपि यदशक्यम् । श्रुतीनां तानैः कण्ठे सोपैरेवांशकरणं भागकरणम् ॥ १२० ॥

तदलीकथादिनि विरम रमयापि नैतत् कर्तुं शक्यते किं पुनर्ललितया, तदपि दयितसंगीते संगीतेन तोषयितुमर्हति तत्रभवती भवती स्वाधीनवनदेवतावृन्दां वृन्दाम् ॥ १२१ ॥

दयितं संगीतं यस्या हे तथाभूते मातङ्गि तव संगीतं ममातिरोचकमिति संमानप्रयोजनको भावः १२१ ॥

वृन्दाह न यावत् श्रीकृष्णो नवसन्तं वसन्तं गायन्निह विहरति रतिमान् न तावद्वसन्तो गेयस्तदपरोऽपरोऽङ्गीक्रियतां रागो रागोदयेनेति रसाब्धिवेलावली वेलावलीरागो गातुमारभ्यत तयाततया कौतुकेन केनचिदेव देवतया मातङ्ग्या ॥ १२२ ॥

नवश्चासौ संश्चेति स तथा तं रसाब्धेर्वेलावली जलराशितुल्यः, "वेला स्यात् तीरनीरयो"रित्यमरः, वेलावलीरागो विलावल इति पाश्चात्येषु ख्यातः, तया मातङ्ग्या गातुम् आरभ्यत । कीदृश्या, केनचिदेव कौतुकेन आततया परिपूर्णया ॥ १२२ ॥

तदनु तदनुगानकारिणीनां गणो विपञ्चीपञ्चीभूतासु महतीमहतीव्रकविलासिकालासिकान्तकच्छपीकच्छपीवरस्वरमण्डलिकासु वीणासु प्रवीणासु प्रपञ्चयामास रञ्जितश्रुति श्रुतिजातं पञ्चविधमप्येकमिव ॥ १२३ ॥

तदनु तदनन्तरं तस्या मातङ्ग्या अनुगानकारिणीनां गणो विपञ्च्या पञ्चीभूतासु विस्तृतीभूतासु महत्यादिषु वीणासु वीणापञ्चविधत्वात् पञ्चविधमपि श्रुतिजातम् एकमिव प्रपञ्चयामास । रञ्जिते श्रुती कर्णौ येन तद्यथा स्यात् तथा । महतीमहे च उत्सवे तीव्रा कविलासिका च लासिनी कान्ता कच्छपी च कच्छः पीवरो यस्याः सा स्वरमण्डलिका च तास्तथा तासु ॥ १२३ ॥

तासां तथाविधस्वरसमुत्कण्ठकण्ठतन्त्रीसमुद्गतो मुद्गतोत्कर्षकारी का रीतीः प्रमोदस्य न जनयामास स किल निनादः ॥ १२४ ॥

स निनादः प्रमोदस्य· आनन्दस्य का रीतीर्न जनयामास, अपितु सर्वा एव । कीदृशः, तथाविधे स्वरे सम्यगुत्कण्ठा यस्य स कण्ठश्च तन्वी च ताभ्यां समुद्गतः समुत्थितः । मुद्गतमानन्दनिष्ठमुत्कर्षं कर्तुं शीलमस्य सः ॥ १२४ ॥

एवं च तत्रावहितासु हि तासु राधाप्रभृतिषु वृन्दादिषु वनदेवतासु तासु च दूरादेव देवलोकस्य चमत्कारी कश्चन ॥ १२५ ॥

तत्र निनादे· अवहितासु कृताकधानासु ॥ १२५ ॥

वीणावेणुमृदङ्गकांस्यपणवैः प्रत्येकसंदर्शना-
देव व्यक्ततमैः समानमुखरैरुद्भ्रान्त एकः स्वनः ।
आमोदी समभागपिष्ट इव नो भेदक्षमः कर्णयोः
सर्वाङ्गीणकयक्षकर्दम इवानन्दैककन्दोऽभवत् ॥ १२६ ॥

वीणादिभिर्मिलित्वा· एक एव स्वनः· आनन्दैककन्दः सुखैकमूलोऽभवत् । कीदृशैः, प्रत्येकम्· इयं वीणा· अयं वेणुरयं मृदङ्ग इत्येवं दर्शनादेव व्यक्ततमैः, श्रवणात् तु विभक्तुमशक्यैरित्यर्थः । आमोदी व्यापकः । सर्वाङ्गीणं सर्वाङ्गकसुखं यतस्तादृशो यक्षकर्दम इव· "तत् सर्वादे" रित्यादिना खः ॥

"कुङ्कुमागरुकस्तूरीकर्पूरं चन्दनं तथा ।
महासुगन्धिरित्युक्तो नामतो यक्षकर्दम"
इति धन्वन्तरिः ॥ १२६ ॥

तन्निशमनेन शमनेन कर्णयोः कलयता लयतालादियुतेऽपि मातङ्गीसंगीतरसेऽपि ताः सावहेला हेलालोलमानसा मुग्ध इव समुत्कर्णाः कर्णायतलोचना लोचनाञ्चलचञ्चलचञ्चलतया परितः परिपश्यन्ति स्म ॥ १२७ ॥

तन्निशमनेन तच्छ्रवणेन हेतुना । कीदृशेन, कर्णयोः शं सुखम्· अनेन स्वनेन कलयता कुर्वता । सावहेलाः सावज्ञाः । हेला भावविशे-

वल्लया लोलमानसाः । लोचनाञ्चलानां चञ्चलचटुलतया, चञ्चलतया चटुलतया चेत्यर्थः, "चटुलः सुन्दरे चले" इति धरणिः ॥ १२७ ॥

ततस्तत्रैवाध्वनि ध्वनितेन वसन्तरागेणान्तरागेणायमपि मूर्तो योषिदाकारतो रतो वसन्तरागो ध्वनति स्म ॥ १२८ ॥

अन्तरागेण तन्मध्यगेन ॥ १२८ ॥

ततश्च तेनानुमातामितानन्दनन्दकिशोरवसन्तोत्सवागमनमननुभूतभूतलप्रमोदं निर्णीय वनदेवतानिभाल्यभाल्यवगाढगाढमाधुर्यधुर्यतनवो नवोल्लासेनारादालोक्य कृष्णां निर्वर्णयन्ति स्म ॥ १२९ ॥

न॰ अनुभूतो भूतले प्रमोदो यस्य तत् । वनदेवताभिरेव निभाल्या निभालयितुं शक्या या भाली शोभाश्रेणी तया॰ अवगाढं कृतावगाढं गाढं निविडं यन्माधुर्यं तस्य धुर्यास्तनवो यासां ताः ॥ १२९ ॥

अयि वार्षभानवि न विना कृष्णोत्सवेनैतादृशो दृशोरानन्दः संपद्यतेऽद्य ते स एव हृदयाधीशो धीशोभिनाभिनायकेन केनचिदानन्दगुरुणा गुरुणा सुरभिकालागमेन संपादितसमुल्लासो मुल्लासोचितवेषभूषः समधुमदमदनः सह सहचरगणेन भगणेन भगवानिन्दुरिव संपाद्यमानवसन्तोत्सवः ॥ १३० ॥

अद्य ते तव स एव हृदयाधीशः । कीदृशः, सुरभिकालागमेन संपादितसम्यगुल्लासः । तेन कीदृशेन, धियं शोभयितुं शीलं यस्य तेन अभिनायकेन॰अभिनयकर्त्रा, विदग्धनटेनेत्यर्थः । आनन्द एव गुरुरुपाध्यायस्तेन सह वर्तमानेनेत्यर्थः स्वयमपि गुरुणा श्रेष्ठेन । मुल्लास॰ आनन्दप्रकाशस्तदुचितवेषभूषः । मधुना वसन्तेन मदो यस्य स चासौ मदनश्चेति तेन सह वर्तमानः । भगवान् श्रीयुक्तः, 'भगं श्रीकाममाहात्म्ये' त्यमरः ॥ १३० ॥

सवहुतरखेलनसामग्रीकमग्रीकरणायेव परमाप्रमोदस्य सुसज्जोऽसुसज्जोषाय योषाणामयमयमुज्जिहीते ह्री ते सौभाग्यसंपदो महिमा हि मादृशा किं वर्णनीयः ॥ १३१ ॥

Digitized by Google

सबहुतरेति क्रियाविशेषणम् । परमप्रमोदस्य· अङ्गीकरणाय प्रधानीकरणार्थम् । तेनापि किं फलमत आह, येषाणां स्त्रीणाम्· असुभिः प्राणैः सञ्जीव उत्तमा सेवा तदर्थम् । येषाः स्वप्राणानपि प्रदाय मां सेवन्तामित्येवमर्थमित्यर्थः । अयमयमिति हर्षेण द्विरुक्तम् । ही विस्मये । ते तव ॥ १३१ ॥

पश्य पश्य ।

एकेनैव शिखण्डकेन चलता रोलम्बसंभाषिणा
पुंनागस्तबकेन चाहणरजःपूरेण चालंकृतम् ।
तिर्यङ्न्यासविशेषशोभमलिकप्रान्तावलम्बालसं
शुभ्रोष्णीषमनीषदुज्ज्वलमतिश्लक्ष्णं शिरस्यादधत् ॥ १३२ ॥

रोलम्बसंभाषिणा भ्रमरझङ्कारवता । अनीषदुज्ज्वलमिति, अग्रभागेऽरुणचूर्णधूसरितत्वात् ॥ १३२ ॥

किंच ।

वल्गद्वल्गुमणीन्द्रकुण्डलधुरा दीर्घीकृतच्छिद्रयो
र्बिभ्रत् तत्क्षणभुग्नचूतमुकुलं श्रीकर्णयोरेकतः ।
गण्डे तत्प्रतिबिम्बभाजि मधुरां कांचित् त्विषो मञ्जरीं
ग्रीवासीम्नि विलासबद्धचिकुरस्तोमेऽतिमुक्तस्रजम् ॥ १३३ ॥

चूतमुकुलमित्यश्लीलत्वमक्षरपरिवृत्त्या पाठात् सोढव्यम्, "मुकुलितपुन्नागचूते," "मुकुलप्रसूतिश्चूतानां सखि शिखरिणीय"मित्यादिमहाकविप्रयोगात् । अतिमुक्तस्रजं माधवीपुष्पमालाम् ॥ १३३ ॥

किंच ।

लीलाङ्गीकृतपीतकञ्चुकपरिप्रोदञ्चितालंकृति-
स्वञ्चत्काञ्चितटीनटीं मणिमयीं कर्पूरधानीं दधत् ।

दोलत्सारसनाग्रचुम्बनलसज्जङ्घातलः किङ्किणी-

रम्भोद्यत्स्फुटिकः* पदाम्बुजलसच्छिञ्जानमञ्जीरकः ॥ १३४ ॥

चञ्चन्त्यां काञ्चितत्र्यां नटौ चञ्चलाम् । दोलता सारसनस्या-ग्रेण लम्बमानपट्टसूत्रस्तबकेन चुम्बनाल्लसत्· विराजमानं जङ्घातलं यस्य सः ॥ १३४

अपिच ।

वेणुं वामकरेण दक्षिणकरेणान्दोलयन् कन्दुकं

सैन्दूरं न विदूरयन् वदनतो रागं वसन्ताभिधम् ।

उद्गीते सुबलादिभिः प्रियसखैः श्रीमूर्धनिर्धूनने

नास्वादं प्रथयन् मदालसलसद्घूर्णायमानेक्षणः ॥ १३५ ॥

सैन्दूरमरुणचूर्णकल्पितम्, "सिन्दूरं रक्तचूर्णके" इति मेदिनी ॥ १३५ ॥

पार्श्वद्वये प्रियसखद्वयदीयमानं

ताम्बूलिकादलपुटं पुरटप्रकाशि ।

स्निग्धेन शोणरदनच्छदनद्वयेन

लीलाक्रमादुभयतः कुतुकेन गृह्णन् ॥ १३६ ॥

पुरटप्रकाशि कनकवत् प्रकाशधारि ॥ १३६ ॥

परंच ।

उद्धूनितैस्तत इतः पटवासपूरै-

र्बालारुणाकृतिभिरुद्भटगन्धवद्भिः ।

अत्यन्तलाघवतया नभसि भ्रमद्भि-

रप्राप्तमौलितिलकालकपक्ष्मलक्ष्मीः ॥ १३७ ॥

पटवासपूरैर्वसन्तखेलाचूर्णपटलैः, बालारुणाकृतिभिः· उदितसूर्य-वद्वर्णैः । अत्यन्तं लाघवं येषां तेषां भावस्तत्ता तया ॥ १३७ ॥

*—स्फटिकः, इति पा· ।

Digitized by Google

अपिच ।

गायन्तो मृदुचर्चरीं द्विपदिकां ग्रामैस्त्रिभिः सप्तभि
र्निर्मिश्रश्रुतिभिः स्वरैरुपचिते रागे वसन्ताभिधे ।
अन्योन्यं कुतुकेन केनचिदमी घ्नन्तो मुहुः कन्दुकैः
सिन्दूरैरभितोऽभितः सहचराः खेलन्ति नृत्यन्ति च ॥ १३८ ॥

त्रिभिर्ग्रामैः षड्जमध्यमगान्धाराख्यैः । निर्मिश्राः श्रुतयः प्रत्येकमेव येषां तैः स्वरैः सरिगमपधनिभिः ॥ १३८ ॥

तदाकलितं ललितं लसत्तरमेतदतिरुचिरं रुचिकरं जातमचेतनानामपि यदिमं विलासलालसं लसन्तमालोक्य वनलता अप्यनेकविधं भावमाविष्कुर्वन्ति ॥ १३९ ॥

तत् गानमाकलितं श्रुतं सत् अचेतनानामपि रुचिकरं जातम् ॥ १३९ ॥

पश्यत पश्यत ।

आमन्दचन्दनसमीरगुरूपदेशात्
प्रत्यग्रपल्लवकराभिनयं दधत्यः ।
गीतेन भृङ्गमिथुनप्रकरस्य वल्ल्यः
कृष्णावलोकनमुदा सरसं नटन्ति ॥ १४० ॥

कृष्णावलोकनमुदा कृष्णकर्तृकावलोकनेन मुद्-हर्षस्तया. इति कृष्णस्य सभ्यत्वम् ॥ १४० ॥

तत्रैव काचित् ।

संत्रासं नवदलपाणिकम्पितेन
प्रोत्साहं कुसुममयेन सुस्मितेन ।
रोषं च भ्रमरघटाकटाक्षपाते-
रासन्ने मधुमथने करोति वल्ली ॥ १४१ ॥

मधुमथने श्रीकृष्णे स्तबकग्रहणार्थमासन्ने सति काचिद्वल्ली कुट्टमितभाववतीति भावः ॥ १४१ ॥

Digitized by Google

अन्याचेयम् ।

एकेनानिलचपलेन पत्त्रहस्ते-
नारौत्सीत् स्तबकपयोधरं परेण ।
आक्षेपं न न न न नेति चञ्चुलालि-
भ्रूभङ्ग्या व्यथित हरिं विलोक्य वल्ली ॥
एहीत्याह्वयत इवापरेण कांचित्
सव्रीडा कुसुममयं स्मितं व्यधत्त ॥ १४२ ॥

स्तबकमेव पयोधरं स्तनम्· एकेन वामेन पत्त्ररूपहस्तेन· अरौत्सीत्· आवृतवती ।

एहीति· अपरेण दक्षिणेन पत्त्रहस्तेन कृष्णचाञ्चल्यदृष्ट्या स्वसाहाय्यार्थं कांचित् सखीमाह्वयत इव, व्यधत्त तिरोऽधत्त, विहृतनामायं भावः, तल्लक्षणं यथा, "ह्रीमानेर्ष्यादिभिर्यत्र नोच्यते स्वविवक्षितम् । व्यज्यते चेष्टयैवेदं विहृतं तद् विदुर्बुधाः । इति ॥ १४२ ॥

तदपि सचेतनानां क्व नाम धीरता धीररतास्तु ॥ १४३ ॥

धीरता धैर्यं, धिया बुद्ध्या रता संसक्ता क्वास्तु, न क्वापीत्यर्थः ॥ १४३ ॥

तदा तदाकलय्य मन्दमधुरमधुरम्यस्मितमुवाच वृषभानुनन्दिनीङ्गितज्ञा श्यामा श्यामामृतकरादेव ते वनदेवतेऽवनमानन्दस्य तदेतस्यैव खेलनं सुखेऽलनं सुष्ठु क्रियतां किमस्माकमुत्तम्भनेन, यच्चेत्थमात्थ मान्यथा तद्भवितुमर्हति ॥ १४४ ॥

हे वनदेवते वनाधिष्ठात्रि वृन्दे श्यामामृतकरात्· श्यामचन्द्रात्· श्लेषभङ्ग्या श्यामस्य कृष्णस्य· अमृततुल्यहस्तात् ते तवानन्दस्यावनं पालनम्, तत् तस्मात्· एतस्यैव खेलनं सुष्ठु क्रियताम् । कीदृशम्, अलनं परिपूरकम्, "अल भूषणपर्याप्त्यादिषु" 'नन्द्यादिः" । यत्· इत्थम्· अन्यथा तत्· मा भवितुमर्हति ॥ १४४ ॥

किंतु कौतुकलो भवति भवति ह्रीदृशं कुलजाकुलजातिकृत-ह्रीवाटिकाकवाटिकाकठोरत्वं यदेषा खरतरतथाविधोत्कण्ठाकुठारे-णापि छेत्तुं न शक्यते ॥ १४५ ॥

कुलजानां कुलस्य जातिकृता स्वभावसिद्धा या ह्रीवाटिकायाः कवाटिका तस्याः कठोरत्वं हि· ईदृशं भवति । यद्यस्मादेषा कवा-टिका ॥ १४५ ॥

या समीहितमपि हितमपिधत्ते धत्ते च हृद्व्यथां कामपि ॥ १४६ ॥

या हृदो मनसो व्यथां कामपि· अनिर्वाच्यां धत्ते धारयति, तथापि हितमपि समीहितं वाञ्छितम्· अपिधत्ते· आवृणोत्येव, नतु प्रकाशयतीत्यर्थः ॥ १४६ ॥

तेनाधुना साधुनासाधारणेन धैर्येणेव यदूह्यते तदेव निरवद्य-मद्यमहोत्सववासरे ॥ १४७ ॥

अद्य तदेव निरवद्यं निर्दूषणम् ॥ १४७ ॥

विशिष्टा शिष्टाचारपरिप्राप्ता रचितदोर्भंगापचितिरपचितिरनङ्गस्य विधातव्येति व्येति न मनोरथोऽस्माकम् ॥ १४८ ॥

किंच, अद्य· अनङ्गस्य कन्दर्पस्य· अपचितिः पूजा विधातव्या· इति मनोरथोऽस्माकं व्येति न विगतो भवति । "पूजा नमस्यापचिति"-रित्यमरः । कीदृशी, रचिता दोर्भंगस्य· अपचितिः क्षयो यया सेति प्रयोजनमुक्तम् ।

तेन तत्संपादनायानायासलभ्यमानकुसुमचयावचयावसरेण वर्त-माना निरीक्षामहे महेन महितं सकलकलाकलापे हे शुभंयुवरा युवराजं व्रजराजस्य ॥ १४९ ॥

तेन तस्या अपचितेः संपादनाय· अनायासेनैव लभ्यमानानां कुसुमचयानाम्· अवचयावसरे वर्तमानाः सत्यो वयं व्रजराजस्य युवराजं निरीक्षामहे, हे शुभंयुवराः परमशुभवत्यः ॥ १४९ ॥

सरसमतो रसमतोचितमस्या वचनमाकलय्य पुनरपि वृन्दा वृन्दावनदेवी श्रीराधामुवाच ॥ १५० ॥

अत एतदनन्तरं रसैमतं संमतम्· उचितं योग्यम्· अस्या वचनं सरसं यथा स्यादेवमाकलय्य श्रुत्वा ॥ १५० ॥

भवतु नाम नामरूपाकृतिकृतिनीनां भवतीनामिदमेव सैाशी-ल्यं तथापि मातङ्गीगीतसंगीतसहकारा सहकाराटवीमध्यमध्यवस्याय चन्द्रावली बलीयसा महोत्सवानुसारेण कुतूहलहलहलापुर:सरं पुर:सरन्ती त्वदीया च सखी चारुचन्द्रा रुचन्द्रायतु मादृशां दृशां सफलयतु च वसन्तरागस्य स्वरश्रुतीनां मूर्तिमत्तां मत्तां च प्रमोद-रभसादरभसा मातङ्गीम् ॥ १५१ ॥

नामादिभि: कृतिनीनां योग्यानाम्, "कृती स्यात् पण्डिते योग्ये" इति मेदिनी । तथापि चन्द्रावली त्वदीया च सखी चारुचन्द्रा सहका-राटवी· आम्रवणं तन्मध्यम्· अध्यवस्याय मादृशां दृशां दृष्टीनां रुचं द्रावयतु । कथंभूता, मातङ्ग्या गीतं यत् संगीतं तेन सहकार: सहव्या पारो यस्या: सा पुर:सरन्ती· अग्रगामिनी प्रमोदस्य गानानन्दस्य रभसात् वेगात्· मत्तां मातङ्गीं सफलयतु सार्थकयतु, स्वयं तु· अरभसा, साव धानेत्यर्थ: ॥ १५१ ॥

इति वनदेवतावचसा च सा सचारुचन्द्रा चन्द्रावली विवि-धवीणाप्रवीणा प्रकटितवसन्तसंततसंतन्यमानश्रुतिश्रुतिसुखदं गाय-न्त्या संगीतदेवतया· आद्रियमाणा ॥ १५२ ॥

चारुचन्द्रया सह चन्द्रावली सहकाराटवीं गत्वा यदि वसन्तक्री· डाम्· आरेभे तदा राधा तस्मिन्नेव देशे· अतिमुक्तवाटिकायां विललासे-त्यन्वय: । प्रकटिताभिर्वसन्ते संततं संतन्यमानाभि: श्रुतिभि: श्रुतिसुखदं कर्णसुखदायि यथा स्यात् तथा गायन्त्या संगीतदेवतया मातङ्ग्या· आद्रि-यमाणा ॥ १५२ ॥

कल्पद्रुतो तोद्रुदीर्णमहोत्सवक्रीडनकनककमनीयबालाहस्ता-हस्तामोदमोदनविलासधूलीधूलीलया मणिखचितसुखचितसुमञ्जुलञ्जु-लयन्त्रभरनिर्भृतजगुडजगुडकस्तूरिकाघनसारगन्धसारगन्धसारद्रवद्र-वखेलया च ॥ १५३ ॥

कल्पद्रुतः कल्पवृक्षात् द्रुतमेव उदीर्णा उद्गता चासौ महोत्सवे क्रीडनं यतः सा च कनककमनीया च कनकोत्तमवर्णा च बालाहस्तावत् उदितसूर्यवदहस्ता च आमोदेन सौगन्ध्येन मोदनी हर्षकरी च या विला-सधूली तस्या धूः कम्पनं प्रचलनं तद्रूपया लीलया । मणिभिः खचितं च तत् सुखानां चितं समूहो यत्र तच्च सुमञ्जुलं च यत् जलयन्त्रं तत्र भरेणातिशयेन निर्भृतस्य जगुडजगुडस्य कुङ्कुमगोलकस्य कस्तूरिकाघनसार-गन्धसाराणां मृगमदकर्पूरचन्दनानां च ये गन्धेन सारा द्रवास्तेषां द्रवणं वेपथुवशात् प्रचलनं तद्रूपया खेलया च । “गुडः स्याद्गोलके हस्तिसंना-हेगुडविकारयो”रिति मेदिनी ॥ १५३ ॥

संगीततालसमं गमनमेव नटयन्तीभिर्नयन्तीभिः प्रमोदस्य परां कोटिं कोटिं च स्वर्वाणिनीनां तिरस्कुर्वतीभिः सहचरीभिः सह सहर्षमारेभे मारेभेन प्रेरिता यदि वसन्तक्रीडाम् ॥ ॥ १५४ ॥

गमनमेव खेलोपयोगि द्रुतमध्यमन्दभेदैः स्वाभाविकं नटयन्तीभि-र्नटनं कुर्वतीभिः । संगीततालसमं यथा स्यादिति, तादृशगमनानुसारेणै-वोचिततालप्रयोगं तदनुकूलमेव संगीतं च कुर्वतीभिरित्यर्थः । अत एवा-तिवैषम्येऽप्यतिकौशलात् स्वर्वाणिनीनां स्वर्गनर्तकीनां कोटिमपि तिर-स्कुर्वतीभिः । “वाणिन्यौ नर्तकीमत्ते” इत्यमरः ॥ १५४ ॥

तदा सरसमधुमधुरस्मितं विस्मितं विरचय्य मनो मनोज्ञच-रिता श्रीराधा च कियतीभिः सखीभिरुभयतोऽभयतोषतो विलोक-यन्ती कृतकुसुमावचयव्यपदेशे देशे तस्मिन्नेव विललास १५५ ॥

मनो विस्मितं विस्मययुक्तं विरचय्य कृत्वा उभयतः श्रीकृष्णस्य

ग्रानादिकमेकतश्चन्द्रावल्याश्चान्यतो विलोकयन्ती । ग्रभयं विजातीयदुःप्रवेशवनमध्यस्थत्वान्निःशङ्कत्वं तच्च तोष ग्रानन्दश्च ताभ्याम्॥ १५५ ॥

एवं सति तं देशमेव खेलनानुक्रमेण क्रमेण समनुसरत्सु सरत्सुखसंदोहदोहनपरेषु व्रजराजयुवराजयुवसहचरेषु पुरःसरेण वटुना-वटुनाटितरम्यहारेण कौतुकारोहसमानेन हसमानेन दिशि विदिशि वितीर्णनयनेन ॥ १५६ ॥

क्रमेण चरणविन्यासेन, "क्रमः शक्तौ परीपाट्यां क्रमं चलनकम्पयो"रिति विश्वः, सरतां प्रसरतां सुखसमूहानां दोहनपरेषु प्रपूरकेषु सत्सु, पुरःसरेण सता कुसुमासवेन वटुना कोऽपि नादः शुश्रुवे । कथंभूतेन, ग्रवटौ घाटायां नाटितः॰ भण्डनृत्यभङ्ग्या स्कन्धग्रीवोच्चालनेन नर्तितो रम्यहारो येन तेन । कौतुकस्य॰ ग्रारोहेण हेतुना समानेन सगर्वेण ॥ १५६ ॥

दूरत एव महोत्सवप्रवृत्तचारुचन्द्राचन्द्रावलीप्रभृतिकलसंगीतसङ्गी तरलतरललितवलयलयप्रियंकरकरतालिकालिकान्तः सकलकलाकलापविदग्धमुग्धमुरजमृदङ्गवीणासंवादिवादित्रविलासिकालासकाचरणसंचरणसंचलन्मणिमञ्जीरनिक्कणसनाथः कोऽपि नादः शुश्रुवे ॥ १५७ ॥

नादः कथंभूतः, तरलतराणां ललितवलयानां लयेन परस्परं संश्लेषेण प्रियंकराभिः करतालिकाश्रेणिभिः कान्तो रम्यः । सकलानां समस्तानां कलानां कलापे समूहे विदग्धाश्च ताः॰ मुग्धानां मनोहराणां मुरजादीनां संवादित्रं संमेलकं यद्वादित्रं वाद्यं तत्र विलासिकाश्चेति ताश्च लासिका नर्तक्यश्च तासां द्वयीषां चरणसंचरणैः सम्यक् तालानुसारेण चलतां मणिमञ्जीराणां निक्कणेन सनाथः ॥ १५७ ॥

---

* परसवर्णः प्राग्वत् ।

Digitized by Google

श्रुत्वा च त्वाचमुद्धर्षमभिनीय समुत्कः समुत्कः प्रियवयस्यं श्रीकृष्णमुवाच ॥ १५८ ॥

त्वाचं त्वग्भवं रोमाञ्चरूपमित्यर्थः । समुत्कः द्रष्टुं समुत्कण्ठः समुत्कः सहर्षः ॥ १५८ ॥

प्रियवयस्य किमयमयतेऽस्माकमेव संप्रति प्रतिश्रुति श्रुतिनिकरोऽतिनिकरोति वा कोऽप्यपरोऽपरोक्ष एव केषांचन महोत्सवसङ्गी संगीतककलकलः ॥ १५९ ॥

प्रतिश्रुति प्रतिकर्णम्· अस्माकमेव संगीतस्य श्रुतिनिकरः श्रुतिसमूहः· अयते प्रत्यागच्छति कोऽप्यपरो वा· अपरोक्षः प्रत्यक्ष एव सन्· अतिनिकरोति, अस्मन्महोत्सवकालमतिक्रम्य तिरस्करोतीत्यर्थः, "निकारः स्यात् परिभव" इति धरणिः ॥ १५९ ॥

तदवगन्तुमर्हमर्हतमैरेतदिति निगदितेन तेन किशोरवरमुकुटमणिना मणिनानालंकारधारिणा स पुनरयमवादि ॥ १६० ॥

तत् तस्मात्· एतत्· अस्मदतिक्रामकं गीतम्· अवगन्तुं ज्ञातुम्· अर्हतमैरस्माभिरर्हम्· उचितम् ॥ १६० ॥

वादित्रध्वनिरयमन्यदीय एव तन्निभालय भालय कुतोऽद्यातोद्यान्तरध्वनिरयं रयं रयं गतः ॥ १६१ ॥

हे भालय कान्त्यालय कुतः स्थानादद्य· अयम्· आतोद्यान्तरध्वनिर्वाद्यान्तरशब्दः रयं रयं गतः· वेगयुक्तं लयं साम्यं प्राप्तः । "लयस्तु त्रिविधः प्रोक्तो द्रुतो मध्यो विलम्बित" इति गीतप्रकाशः ॥ १६१ ॥

इति निगदितेन वटुनातिपटुनातिपरमोल्लासेन सत्वरमुपगम्यातिरमणीया रमणीमणीसभासभाजिता जिताब्धितनया नयार्जवजवाजवाहवकरवरणपल्लवाग्रमवधूत्य माधवीकुसुममवचिन्वती न्वतीन्द्रिया भुवनमवतीर्णा वसन्तलक्ष्मीरिव प्रथमतो वार्षभानवी ददृशे ॥ १६२ ॥

इति निगदितेन वटुना सत्वरमुपगम्य वार्षभानवी ददृशे। सभाजिता स्तुता, जिताब्धितनया सौन्दर्येण विजितलक्ष्मीका, नयस्यनीतेरार्जवस्य ऋजुत्वस्य जवो वेगो यस्यां सा, अतीन्द्रिया॰ अमूर्तापि वसन्तलक्ष्मीर्भुवनमवतीर्णा, मूर्तिमतीवेत्यर्थः ॥ १६२ ॥

तदव्यवहिता हिताचरणशालिनी ललिता ललिताकारा श्यामा च तददूरे महामहानन्दपरवशाश्चारुचन्द्राचन्द्रावलीप्रभृतयश्च ॥१६३॥

तददूरे सहकारवाटिकायां चन्द्रावलीप्रभृतयश्च ददृशिरे॰ इति वचनविपरिणामेनानुषङ्गः ॥ १६३ ॥

दृष्ट्वा च स तरसाह साहसिके ललिते किमितिमितिमदेनोन्नतिमदेनोऽन्वतिविधीयते ॥ १६४ ॥

स कुसुमासव आह हे ललिते किं किमर्थम्॰ इतिमितिना॰ एतत्परिमाणकेन मदेन गर्वेण॰ उन्नतिमत्॰ आधिक्ययुक्तम्॰ एनोऽपराधः॰ अनु सह॰ अतिविधीयते॰ अतिशयेन क्रियते, "अनु हीने सहार्थे" चेति विश्वः। अत्र तिमदेनो तिमदेनो॰ इति चतुर्भिर्वर्णैरेकवर्णव्यवधानेन यमकं ज्ञेयम् ॥ १६४

यदद्य नववसन्तमहे महेच्छस्य मम वयस्यस्य वयस्यस्य नवातिमुक्तस्य कुसुमं न केनापि गृहीतं ही तं तस्यातिप्रियमतिमुक्तं मुक्तं पल्लवैः कुसुमैरपि कुर्वन्ति भवत्यो दर्पवत्यो दर्पकदर्पकलाहारिण्यो न जानीथ मद्वयस्यस्य भुजभुजगभोगदर्पं तदिदानीमेव ज्ञास्यथ ॥१६५॥

मम वयस्यस्य तस्य तं प्रसिद्धमतिमुक्तं पल्लवैः कुसुमैरपि मुक्तं रहितं भवत्यः कुर्वन्ति, ही विस्मये, अस्य नवातिमुक्तस्य वयसि केनापि कुसुमं न गृहीतम्, नवातिमुक्तस्येति, नवत्वादतिशयेनैव पुष्पानवचयादस्माभिरपि त्यक्तस्येति श्लेषार्थः, दर्पकस्य कन्दर्पस्यापि दर्पकलाहारिण्यः ॥ १६६ ॥

तदहमितो गत्वा निवेदयामीति सत्वरं श्रीकृष्णमुपसृत्य वयस्य संप्रति प्रतिपन्नः किल वसन्तमहो महोदयस्य भवतः ॥

यत: ।

वसन्तलक्ष्मी: स्वयमेव मूर्ता
विभूतिभि: स्वाभिरिवाङ्गनाभि: ।
इतो न दूरे विविधैर्विलासै-
र्मूर्तं वसन्तोत्सवमातनोति ॥

तथाहि ।

आतोद्यं क्वानुमोद्यं भवतु भुवि तथा सा च संगीतभङ्गी
स्व:संगीतोद्गुराणामपि नहि विषय: कोऽपरस्तां तनोतु ।
सामग्री या च या चोत्सवरभसविधेर्नास्ति सा ब्रह्मशिल्पे-
ऽनल्पे कल्पेत लोक: कथमहह महत् कौतुकं दृष्टमासीत् ॥ १६० ॥

तां संगीतभङ्गीम् । अनल्पे प्रचुरेऽपि ब्रह्मशिल्पे सा सामग्री नास्ति । अतस्तत्र लोक: कथं कल्पेत, तां संपादयितुं कथं समर्थ: स्यादित्यर्थ: ॥ १६७ ॥

तत्र तु व्रजराजकुमारस्य सा रम्यतमा तादृशी महती महत्तीव्रता ॥ १६८ ॥

तत्र तु महस्य· उत्सवस्य तीव्रता सा तादृशी रम्यतमा ॥ १६८ ॥

सखाय ऊचुरयि कुसुमासव मा सबहुमानं परपक्षं स्तुहि
वस्तु हि बहुमतं स्वमतमेव तत् त्वमधुना मधुना मत्तोऽसि ॥ १६६ ॥

सबहुमानं यथा स्यात् तथा परपक्षं मा स्तुहि, मधुना माध्वीकेन स्त्रैवादुसन्तेन नर्मभङ्ग्या मद्येन च ॥ १६९ ॥

स ऊचे नहि कुसुमासव: स्वयं माद्यति मादयत्येव सर्वान्. तथापि नाहं सुकुसुमासवो यं पीत्वैव माद्यन्ति मम तुशब्देनैव सर्वे मत्ता भवन्ति ॥ १७० ॥

कुसुमस्यासवो मधु, मम शब्देनैवेति, वाङ्मात्रेणैव युष्माद्दृशान् भ्रामयतुं शक्नोमीति भावः ॥ १७० ॥

श्रीकृष्ण आह साधु वयस्य साधु, साधुना महोत्सवस्थली पुनरपि वाचोभवता भवता द्रष्टुमर्हा पश्चादस्माभिश्च ॥ १७१ ॥

साधुना भवता ॥ १७१ ॥

इति तेन सरसमुदितो मुदितो वटुः पुनरसको रसकौतुकी तं देशमासाद्य साटोपं दुर्ललिते ललितेऽपसर सरसीरुहाननिदेशतो देशतो हि तावदस्मादस्माकमतिमुक्तकुसुमं मापहर हरसि चेत् प्रतिफलं लप्स्यसे। साह साहसिक वटो कपटपटो जल्पन्निदमवद्यवद्यासि किमिति निजसौजन्यम् ॥ १७२ ॥

हे वटो कपटपटो इति, कपटपाटवेनैव त्वया वटुत्वं साधितमिति भावः तेन तुभ्यं गालिप्रदानमपि नानुचितमिति द्योतितम् इदमवद्यं निन्द्यं जल्पन् निजसौजन्यं किमिति· अवद्यसि खण्डयसि, स्वदौर्जन्यमेवास्मन्मुखत आख्यापयसीति भावः ॥ १७२ ॥

शिष्टपरम्परापरागता रागतारतम्येनाद्यानवद्या नववसन्तोत्सववासरे वासरेशतनयाकूलेऽनुकूलेऽनुरक्ता रक्ताशोकमूले मदनमर्चयति वधूततिरिति रीतिरिति रीणधुरीणतया स्वयमेव कुसुमावचयनाय नायकमणीसदृक्षयाक्षयाभिजनयानया नयासन्नसकलगुणया प्रियसख्या सख्यातिकया कयाचन राधाभिख्यया सह समागता वयं कथमुन्मत्त वृथाच प्रलपसि ॥ १७३ ॥

रागस्यासक्तेस्तारतम्येन· आद्या· अनवद्या· अनिन्द्या वधूततिर्मदनमर्चयतीति रीतिः शिष्टपरम्परापरागतेत्यन्वयः, इति हेतोः· रीणा वरिता या धुरीणता प्रभुता तया, रागोत्कण्ठाविज्ञप्रभुतामप्यनादृत्येत्यर्थः, नायकमणी हारमध्यगरत्नं तत्तुल्यया, अक्षयोऽभिजनः कुलं यस्यास्तया; महाकुलवत्या· इत्यर्थः ॥ १७३ ॥

स आह रे हरेरपरः कोऽन्यो मदनो मदनोदनो यः सकला-
नामुन्मादको मुन्मादकोमलश्च ॥ १०४ ॥

मदनोदनो गर्वखण्डनः, सकलानां सर्वेषां किंतु· उन्मादयतीति स इति मदनशब्दवाच्यः स एवेत्यर्थः, स्वयं तु मुद्· हर्षः· मादो मत्तता ताभ्यामपि कोमलः ॥ १०४ ॥

तस्मिन् साक्षाद्वर्तिन्यसाक्षाद्वर्तिन्यहो मदने वः पूजारतिः
किमिति भवत्य एवोन्मत्ता मत्तावच्छृणुत ॥ १०५ ॥

तस्मिन् हरौ भगवति साक्षाद्वर्तिनि सति, असाक्षाद्वर्तिनि परोक्षे मदने। मत्तावत्· मत्तस्तावत् ॥ १०५ ॥

अयमहं महं वः कारयिष्यामि स्वस्तिवाचनपूर्वकमपूर्वकम-
नीयं पुरोहिततया पुरो हिततया तदित इत इत तस्यैव समी-
पम् ॥ १०६ ॥

महं पूजामुत्सवं वा, पुरोहिततया पौरोहित्येन, पुरो हिततया पुरोऽग्रे हितरूपत्वेन, यद्वा हीति पृथक् पदं, ततया विस्तृतया, इत इत इति तद्वर्त्मोपदेशः, इत गच्छत ॥ १०६ ॥

श्रीराधाह पूजार्होऽयं वटुः पटुः परं ललिते तदादिश चारुच-
न्द्राचन्द्रावल्यो भद्रेयायं पुरोहितः पुरोहिततया पूज्यतामिति। तदु-
क्ताभ्यां ताभ्यां महामहान्धाभ्यां प्रसभमाकृष्य विविधवर्णचूर्णचूर्णन-
गन्धोदकोक्षणक्षणपराभूतो भूतोत्तम इव यदा विदधे तदासौ चुक्रोश
क्रोशगामिना स्वरेण ॥ १०७ ॥

विविधवर्णैश्चूर्णैश्चूर्णनं सर्वाङ्गलेपनं तच्च गन्धोदकेरुक्षणं सेचनं च ताभ्यां क्षणं व्याप्य पराभूतः ॥ १०७ ॥

* मत् तावत्· इत्येवं मुद्रणीये पदविभागाभावो यमकस्य लिपितोऽपि प्रदर्शनार्थः।

उन्मत्ताभिर्वसन्तोत्सवरभसमदैर्गाढुहां कन्यकाभिः
चोदैः सिन्दूरकाश्मीरकमलयरुहां हा धिगन्धीकृतोऽस्मि ।
चाक्षं गन्धाम्बुसेकैरजनि तत इतो धावितुं नास्मि शक्तो
व्यापद्येऽहं वयस्य प्रियसख्मव मां मास्त्विह ब्रह्महत्या॥१७८॥

धावितुं पलायितुं, व्यापद्ये· अहं म्रिये ॥ १७८ ॥

तदा तदारादाकर्ण्य तदाक्रन्दितं दितं च प्रतिभाप्रतिभानं च विदित्वा कुसुमासवस्य कुतुकसरलाभिरबलाभिरहो कौतुकमिति त्वरया रयारूढरागैः सह सहचरैः कुतूहलहलहलापुरःसरं पुरःसरंहाः समुपससाद ॥ १७९ ॥

तदाक्रन्दितं तस्यातिक्रन्दनम्· अबलाभिरेव दितं खण्डितं विदित्वा, अहो कौतुकमिति ब्रुवन्नित्यर्थः, सरंहाः सवेगः ॥ १७९ ॥

स सादरदरव्रीडमालोक्यमानो मानोन्नताभिरपि ताभिः सुभगतमो गतमोदमिवावलोक्य वटुमपटुमपरितुष्टमना इव कृतकृतकसंरम्भं व्याजहार विहारविशेषेण ॥ १८० ॥

ततश्च स श्रीकृष्णो मानोन्नताभिरपि गर्वाधिकाभिरपि सादरदरव्रीडं यथा स्यात् तथा· आलोक्यमानः, तत्र महाराजनन्दनन्दनत्वादादरः, तत्प्रियसखावमाननाद्भयं, कन्दर्पाद्वैधकवेशत्वेन लज्जेति, अत एव सुभगतमः । वटुम्· अपटुं चेष्टनासमर्थमालक्ष्य ॥ १८० ॥

हंहो कथमयं निरागा रागान्धाभिर्भवतीभिरुपालब्धो लब्धोत्तरापमानो मम ममतापात्रं वटुः, तदपराधपराधमतामतानि प्रतिफलानि सह्यन्तामिति सहचरानवलोकयति स्म ॥ १८१ ॥

निरागा निरपराधः, अपराध एव परो मुख्यो यस्यां सा·अधमता तस्यां मतानि संमतानि, उचितानीत्यर्थः ॥ १८१ ॥

Digitized by Google

ततश्च ।

सहचरकरदत्तैः कन्दुकैः कौङ्कुरातैः
सकलकुलवधूनामेष वित्तोभि वक्षः ।
यदकृत कृतहस्तो योगपद्येन सद्य-
स्तदमरवरनार्यः साधुवादैः पुपूजुः ॥ १८२ ॥

कौङ्कुरातैरशोकपुष्पोद्भवैर्वृत्तः कुचयोर्मध्यप्रदेशं वित्तोभि विशिष्ट-शोभायुक्तं यत्‌· अकृत· अकार्षीत् । कृतहस्तो युद्धकुशलः, "कृतहस्तः सुप्रयोगे विशिख" इत्यमरः ॥ १८२ ॥

तथा सति द्वयोरेव सेनयोरमयोरनयोपरमेणेव ।

शोणश्लक्ष्णाहणसुरभिभिर्धूलिभिर्धूलिभिश्च
क्रीडायुद्धं समजनि महत् कन्दुकैः कन्दुकैश्च ।
अङ्गान्मुक्तैः कुसुमधनुषो वारुणास्त्रैरिवाराद्
काश्मीरीयैरतिसुरभिभिर्वारिभिर्वारिभिश्च ॥ १८३ ॥

अनयोर्द्वयोरेव सेनयोः· अनयोपरमेण· अनीतिराहित्येन। शोणाह-णयोः किंचिच्छ्यामलिममिश्रणामिश्रणत्वेन भेदः, धूलिभिर्धूलिभिरित्यादि वीप्सा, अङ्गान्मुक्तैर्जलयन्त्रोन्मुक्तैः, "अङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बु-यन्त्रके·" इति मेदिनी ॥ १८३ ॥

ततस्तु ततस्तुतिभिः सुरवधूभिरुभयबलसाम्यमालोकयन्तीभिः क्रियमाणे साधुवादे सति ॥ १८४ ॥

तता विस्तृता स्तुतिर्यासां ताभिः ॥ १८४ ॥

अभयमुभयसेनाचारिभिर्धूयमानैः
समजनि पटवासैरन्धकारोऽतिगाढः ।
अतनुत हरिरस्मिन् साहसं तीव्रमेको
न्यविशत परचक्रं यन्मनोज्ञेन नुन्नः ॥ १८५ ॥

ऽभयं निःशङ्कं यथा स्यात् तथा धूयमानैः क्षिप्यमाणैः पटवासैर्गन्धचूर्णैः, उभयसेनाव्यापिभिः ॥ १८५ ॥

ततश्च ।

न पतति लघुभावाद् घूर्णति व्योम्नि तस्मिन्
रजसि तमसि गाढं जायमाने मुहूर्तम् ।
न परिचयमवापत् क्वापि कस्यापि कश्चित्
तदनु स परचक्रे कृष्णवेणुर्व्यराणीत् ॥ १८६ ॥

कस्यापि जनस्य परिचयं कश्चिदपि जनो न॰ अवापत्॰न प्राप्तवान्, तदनु तदनन्तरमेव ॥ १८६ ॥

अथ यदि परचक्रे विक्रमी कृष्णवेणुः
सुरतसमरभेरीभावमाविश्चकार ।
दिशि विदिशि तदासीदङ्गनापाङ्गभङ्गी-
सशिखविशिखपातो यौगपद्येन जातः ॥ १८७ ॥

तदा च॰ अङ्गनानाम्॰ अपाङ्गभङ्ग्य एव सशिखविशिखाः सायकास्तेषां पातो जात आसीत्, कृष्णोपरीत्यर्थात् ॥ १८७ ॥

अथैवं मुहुरजनि रजनिरया इव स लीलारणो रणोद्धुर एकस्तदा हि तदाहितदाक्षिण्यः ॥ १८८ ॥

रणोद्धुरो युद्धचण्डः, तत्र युद्धे॰ आहितम्॰ अर्पितं दाक्षिण्यं स्वातन्त्र्यं येन सः,"दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिष्वि"ति मेदिनी ॥ १८८ ॥

संप्रस्वापनसंज्ञमायुधमिव भ्रूचापमारोपयन्
लीलालोलकटाक्षमक्षिविषयं कुर्वन् समस्ताङ्गनाः ।
अस्ताङ्गं विनिमीलिताक्षमलसेनोज्जृम्भमाणाननं
कूजत्कण्ठतटं चलाधरपुटं चक्रे प्रघुम्न इव ॥ १८९ ॥

लीलया लोलं कटाक्षमेव संप्रस्थापनसंज्ञम् । आयुधं शरं भ्रूरेव चापस्तम्· आरोपयत्· आरोहयत् । अस्ताङ्कमित्यादीनि क्रियाविशेषणानि· अनङ्गविक्रियाभरजस्य मदस्यानुभावाः ॥ १८९ ॥

एवं सति तथाविधा विधातव्यशून्याः स्वसेना निरीक्ष्य ।

तथाविधपराक्रमं क्रमत एत्य चन्द्रावली
निपात्य पुङ्खवीचिकां नयनकोणनाराचिकाम् ।
निबध्य निबिडं भुजाभुजगपाशबन्धेन तं
चमूरुनयनाचमूपतिरमूमुहन्मोहनम् ॥ १९० ॥

पुङ्खवीचिकां बहुतरपुङ्खयुक्तां नाराचिकां क्षुद्रशरम् । अमूमुहत्· मोहयामास ॥ १९० ॥

ततश्च क्षणत एव प्रतिबुध्य ।

तिमिरमिदमनल्पं नैव यावन्मुरारी-
दतिलघु लघुहस्तस्तावदेवैकवीरः ।
व्यतनुत तनुमध्याव्यूहमालोड्यमानं
मदकलकलभेन्द्रः पद्मिनीनामिवौघम् ॥

तथा सति ।

विरते च परागजान्धकारे रागजान्धकारे तु वलमाने ।

छिन्नानां मृगलोचनाचयचमूमानद्विपानामिव
क्षोणी सा क्षतजैरभूदरुणिता स्निग्धारुणैः पांशुभिः ।
भृङ्गघ्रातमदैरिवास मलिना कस्तूरिकाकर्दमै-
राकीर्णाजनि कीकशैरिव परिभ्रष्टैर्मणीशङ्कुकैः ॥ १९१ ॥

क्षतजैः शोणितैः । आस बभूव, 'लावण्यमुत्पाद्य इवास यत्न" इत्यादिदर्शनादनुप्रयोगादन्यत्राप्यस्तेर्भूभावं केचिदिच्छन्तीति धातुप्रदीपः । यद्वा· "अस गतिदीप्त्यादानेष्व"त्यस्य रूपमनेकार्थत्वात् सत्तायां वृत्तेः । कीकशैरस्थिभिः । अत्र क्षतजादीनामश्लीलत्वं नाशङ्क्यं, तेषां प्राशिनिष्ठ-

तथैव तथात्वव्यवहारात्, न तूपमोत्प्रेक्षादौ, समुद्रान्तसुधांशुरित्यादिभूरिप्रयोगात् ॥ १९१ ॥

अथ तथाविधविविधविकारविकलां तां वधूसेनामवेक्ष्य सुखजलधिजलधिया वटुना ह्री ह्रीति भुजावुद्यम्य नटता. अटता च कृष्णसमीपं किंचिदवादि ॥ १९२ ॥

अटता च गच्छता च ॥ १९२ ॥

साधु वयस्य साधु* वयस्यस्मदीये नेतादृशं सुखमनुभूतमनुभूतलम् ॥ १९३ ॥

अनुभूतलं भूतलं लक्ष्यीकृत्य. अस्मदीये वयसि बाल्यादौ. एतादृशं सुखं नानुभूतम् ॥ १९३ ॥

यदमूभिर्निर्वंशिकाभिर्वंशिकाभिरतपायोस्तव सहचरोऽहं रोहं प्रापितोऽस्मि दुरवस्थायाः संप्रति तथैव दुरवस्थितिस्थितिभाजः पश्यामि ॥ १९४ ॥

निर्वंशिकाभिरिति विदूषकत्वात् स्वावमाननमनुस्मृत्याभिशापात्मकगालिप्रदानं, श्लेषेण वंशीरहिताभिः, रोहम् उद्गमम् ॥ १९४ ॥

तथाहि ।

छिन्नाः कञ्चुलिकाः प्रयत्नगुम्फिता त्रुटिता च हारावली
सामग्र्योऽपि मधूत्सवस्य परितो भ्रष्टा लुठन्ति क्षितौ ।
धम्मिल्लालकभालगण्डयुगदृग्वक्षांसि शोणान्यहो
चूर्णैः किंशुकपाटलैर्निजकृतेः संप्राप्तमाभिः फलम् ॥ १९५ ॥

किंशुकपाटलैः किंशुकवर्णैः श्वेतरक्तवर्णैश्च, तथापि शोणानीति शोणिम्ना पीतिमश्वेतिम्नोर्यासंभवात् ॥ १९५ ॥

---

* मध्ये साधु पदं पुस्तकान्तरे नासीत् ।

Digitized by Google

किंतु वयस्य इमाः खलु महाचतुरा हा चतुराननसृष्टिबहिरेव हि रेजिरे ॥ १६६ ॥

रेजिरे इति वर्तमानतायामपि भूतत्वपरोक्षत्वारोपो न केवलमधुनैव (?) एवासां पराक्रम इति बुबोधयिषया, सा च स्वातिभयमूलैव ॥ १९६ ॥

तद्यावत् पुनरपि संभूय भूयसीभिरपराभिः पराभिर्वृषभानुतनूजादिभिर्भवन्तं विजेतुं नोत्सहन्ते हन्तेदानीमेव तावदपसरामः, बद्धवैरा वै रागेण किं न कुर्वन्ति ॥ १६७ ॥

संभूय मिलित्वा । अपसरामः पलायामहे, रागेण कोपेन किं न कुर्वन्ति, अपितु मर्यादामप्यतिक्रामन्त एवेत्यर्थः । त्वामवलीलयैव जित्वा मत्पैशुन्यमनुस्मृत्य न जाने मम कंचन दण्डं ब्रह्महत्यामेव वा करिष्यन्तीति भावः ॥ १९७ ॥

सखायः एवं सहासं निजगदुर्निजगद्दुर्मुखतादोषेणायं भीत एवाधिकोऽधिकोपतया भयं तीव्रश्च भवति, तदयमाश्वास्यतां सखे सखेदोऽयं यथा न भवति ॥ १६८ ॥

निजगा निजगता या दुर्मुखता स्वाभाविकमेव निरुपधि मौखर्यं तद्दोषेण भीत इवायम्, अधिकोपतया कोपाधिक्येन तीव्रश्च भवति, वनितारत्यात् क्षणेनैव भयं क्षणेनैव साहसं, किंनिदानं वा दैन्यत्रासादि किंनिदानकं वा गर्वकोपादि स्यादिति न विद्म इति भावः ॥ १९८ ॥

स आह कुसुमासव यतस्ते भयं तामधुना साधुनासाध्वसेन मां दर्शय मयि सति किं ते भयमिति निगदितो दितोरुभयो भयोत्कटः साटोपमयेसरो भवन्नित इत इत इत्यालपन्ननिमुक्तवाटिकापरिसरं परिसरन्तीं ललिताद्विभिरालिमालाभिः कुसुममवचिन्वतीं त्वं तीन्द्रियरूपां तां दर्शयामास ॥ १६९ ॥

दितोरुभयः खण्डितबहुभयः, ततश्च भया कान्त्या उत्कटः ॥ १९९ ॥

Digitized by Google

तस्मिन्नेव रसमये समये ।

आलीनां कुटिलकटाक्षबाणलक्ष्-
राविद्धो हरिरसृजत् कटाक्षबाणम् ।
राधाया उरसि निपत्य स्रो कथंचित्
स व्रीडाकवचविभेदमेव तेने ॥

तदनु ।

व्यतनुत वृषभानुनन्दनी यं
तनुतरकज्जलकालकूटदिग्धम् ।
स हसितनिशितः कटाक्षबाणो
हरिहृदयं विदयं विनिर्बिभेद ॥ २०० ॥

तदन्विति, कृष्णकटाक्षानन्तरमपि राधाकटाक्षोद्गमो व्रीडाकवच-भेदाद्वसन्तोत्सवे ऽत्रोपयोगात् तनुतरेणात्यल्पेन कज्जलरूपकालकूटेन दिग्धमुपचितं यं व्यतनुत स कटाक्षबाणः, हसितेन निशितस्तीक्ष्णः ॥ २०० ॥

तदा तद्वाघातेन विमूढमूढरभसतया तमालोक्य सरसतरं सतरङ्ग इव वटुराबभाषे ॥ २०१ ॥

विमूढं तं सखायम्· आलोक्य, ऊढरभसतया वेगयुक्तः सन्नित्यर्थः, सरसतरं सातिविक्रमम्, सतरङ्ग इति, ग्रीवाभुजादिकं मुहुश्चालयन्नित्यर्थः ॥ २०१ ॥

वयस्य एष ते सहायतमोऽहं मोहं मा गा इति केलिकन्दुकान् ग्राहयित्वा विद्रावय वयस्येता यस्येतादृशः पार्ष्णिग्राहकोऽहं हन्त तस्य किमशक्यमिति निगदति ॥ २०२ ॥

इति निगदति सति वटौ ॥ २०२ ॥

लीलालसं मुकुलिताक्षमरालितभ्रू-
भङ्गारिकन्दुकमुदस्य कराम्बुकोशम् ।

केनाप्यलक्षितमथो वृषभानुपुत्री
सिन्दूरकन्दुकमुरस्यकिरन्मुरारेः ॥ २०३ ॥

तत्कन्दुकनिक्षेपे माध्य्य्यमवधार्य तत्र निजातिलाघवं दर्शयन्ती श्रीराधिकैव प्रथमं कन्दुकं व्यनुदवित्याह लीलेति । क्रियाविशेषणद्वयम् । केनाप्यलक्षितमित्यन्यालक्षितत्वेऽपि तस्य मोहं प्राप्तवतापि श्रीकृष्णेन लक्षितत्वं निभृतमेवावश्यं मन्तव्यम्, लीलालसमित्यादीनामन्यथा तद्वना-स्वात्मत्वेन नातिसार्थकत्वमेवेति ॥ २०३ ॥

तेन च तदासौ प्रबोधितोऽधितोषसुप्तः केशरिकिशोर इवाति-कुपितोऽपि तोषकरः सखीनां करकमलगृहीतकन्दुको राधामनुधाव-न्नथ ललितयोचे ॥ २०४ ॥

तेनासौ प्रबोधित इवेत्यचेतनकौतुकार्थं स्वस्य तथाभूतत्वेन प्राप-कमेव । अधितोषेणाधिकसुखेन सुप्तः केशरिकिशोर इवेति स्वप्रहारका-भिमुखधावनस्वभावत्वधर्मेणापि । सखीनां कुसुमासवादीनां ललिता-दीनां च ॥ २०४ ॥

अये तवोरसि रसिकया कया कृतः सिन्दूरस्य कन्दुकनिक्षेपो निक्षेपो निजानुरागस्येव, का जानाति नातिमुग्धेन भूयतामनुभूयता-मनुपरोधिनीं वृथास्मत्सखीमुपधावसि । तथापि धावन्नेव सकौतु-कम् ॥ २०५ ॥

त्वं चेज्जानासि तां दर्शयेत्यत ऊचे का जानातीति । मुग्धस्व-विचारात् त्वं सदा भवस्येव, किंत्वतिमुग्धेन मा भूयताम् । तदप्यस्यै-र्यमालोक्य पुनरूचे, अनुभूयतामनुभवोऽपि क्रियताम्,अवधीयतामि-त्यर्थः ॥ २०५ ॥

आलीनां वलये निलीयवसतिं श्यामां कलाकौतुकात्
स्मेरापाङ्गतरङ्गितङ्गितदृशा संदर्शितां राधया ।

Digitized by Google

तस्या एव मधूत्सवस्य विभवैर्गन्धोद्धधूलीमुखै-
स्तामुच्चैः स लिलेप भालकवरीगण्डेषु वक्षस्यपि ॥ २०६ ॥

निलीय श्रीराधयैव सह तस्य द्वन्द्वयुद्धरीत्या कौतुकदर्शनार्थं निहुत्य वसतिर्यस्यास्ताम्। संदर्शितां राधयेति, स्वरमणेन तेन सह प्रथमं तामेव खेलयित्वा तत एव स्वयं खेलितुमिच्छन्त्येति भावः। ततश्च निलीयवसतिमिति लीनत्वमेवापराधलक्षणमिति ज्ञापितं च। स्मेरस्यापाङ्गस्य तरङ्गिणी तरङ्गयुक्ता तङ्गिता श्यामायष्ट्या स्खलनवती च या रुक् कान्तिस्तया, "तमि स्खलनक्रमगतिषु" ॥ २०६ ॥

समन्यायमवलोक्य तदा तदाली वकुलमालाकुलमालापमाविश्चकार· अहो ते वेदग्धी वे दग्धीकरोतीव नो हृदयम् ॥ १०० ॥

आकुलं यथा स्यात् तथा वै निश्चितं दग्धीकरोति, परमविदग्धस्य चतुर्वसिंहस्यापितवैदग्ध्यं मेराध्यमभूदिति हृदयानुतापाय· एवास्माकमिति भावः ॥ २०७ ॥

यतः कन्दुकमुक्ता*वत्· मुक्तावत् किरति हसितदीधितिं सितदीधितिं विडम्बयन्तीव मुखमण्डलेन तामपहाय निरागसं रागसंबाधबाध पिच्छापीड पीडयसि मे सखीम् ॥ २०८ ॥

कन्दुकं मुञ्चतीति कन्दुकमुक्। सितदीधितिं चन्द्रम्। रागेण मात्सर्येण संबाधा व्याप्ता या बाधा व्यथा तया विशिष्टः सन्, श्लेषभङ्ग्या रागेणानुरागेण। ततश्च कर्तृकर्मणोर्द्वयोरपि वैशिष्ट्यं युक्तम् ॥ २०८ ॥

इति वचनतात्पर्यपर्यवसानेन सानेन साराधिकां राधिकां यदि सूचयति स्म तदा तदालापेन जातकौतूहलो राधाभिमुखीभूय भूयसा रागेण ॥ २०६ ॥

सा वकुलमाला। साराधिकां बलाधिकाम्। वचनतात्पर्यस्य यत् पर्यवसानं तेनैव। तच्च ललिताादिष्वपि हसितदीधितिं किरन्तीषु ता-

* मुक्ता तावत् इति छेदः, योगस्तु समानाकारतानुभवाय।

मपहायेति त्यागस्य प्राप्तिसापेक्षत्वात् प्राप्तेश्च राधायामेव पूर्वमसत्त्वात्
तस्यामेव संभावितम्। एतच्च श्रवणेच्छौ श्यामामेवानिसृष्टयितुं तत्सौ-
हार्दानुरूपमेव सख्या भाषितम् ॥ २०९ ॥

प्रकटय बलं गर्वितयेहि क्षिप क्षिप कन्दुका-
निति सरभसं स्मित्वा बोद्व्योपसर्पति माधवे।
परिवृणुत भो निष्प्रत्यूहं घ्नत घ्नत चेकटे-
त्यथ कलकलः पद्माक्षीणां पिकेष्विव गुह्यकृतः॥

तथा सति स तिलकायमानो रसिकसभानां सभानां नववधूनां
वृन्देन बन्दीकृत इव यदा समजनिष्ट ॥ २१० ॥

सभानां सकान्तीनाम् ॥ २१० ॥

तदा।

आकीर्णः कतिभिर्विलासरजसां पूरैः पराभिर्हतः
पौष्पैः कन्दुकसंचयैश्च कतिभिर्माणिक्यमकुस्तैः।
सिक्तः कुङ्कुमचन्दनादिसलिलैरप्येक एव स्वयं
श्रीगोपेन्द्रसुतः सलीलमसकृद्विद्रावयामास ताः ॥ २११ ॥

असकृदिति, विद्रुत्यापि मुहुर्मुहुरावृत्तवतीः ॥ २११ ॥

ततश्च।

मधुमहमहसेव द्रावितायां त्रपायां
सहजमदनुरागावेगकन्दलचिताः।
पुनरपि युगपत् ताः साहसेनातिभूम्ना
प्रियमथ परिवव्रुश्चन्द्रिकावत् पयोदम् ॥ २१२ ॥

अतिभूम्नेति साहसे हेतुः ॥ २१२ ॥

ततश्च।

मातङ्गीप्रमुखा मया: सरभसं वीणादिनानाविध-
ध्वानध्मातहरिन्मुखा व्यरचयद्गानं वसन्तोचितम्।

रोलम्बाश्च पिकाश्च चित्रविहगाश्चान्ये कलं तुष्टुवु-
र्नृत्यद्व्रातगुरूपदेशवशतो लास्यं व्यधुर्वीरुधः ॥ २१३ ॥

ध्यानैर्ध्मातानि प्रतिध्वनियुक्तीकृतानि हरितां मुखानि येन सः ॥ २१३ ॥

परतश्च ।

नानायन्त्रमवादयन्त कतिचित् केचिद्वसन्तं जगुः
केचिद्वन्धरजांसि कन्दुकचयानन्योन्यमाचिक्षिपुः ।
श्रीकृष्णानुचरोत्करेषु तु बलश्रेष्ठेषु दृष्टान्तरो
हासैकप्रणयी वटुः पटुरटन्नुल्लासनृत्यं व्यधात् ॥ २१४ ॥

श्रीकृष्णानुचरोत्करेषु मध्ये केचिन्नानायन्त्रमवादयन्तेत्यादि ॥ २१४ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य दशमः परिच्छेदः ॥

॥ शब्दानां दुष्प्रयोगविषये ॥

१ ॥ शब्दानां दुष्प्रयोगः ॥—अपि च भाषासु स्वाभावसिद्धाद्गूढत्ववैसंकुल्यापरपर्यायात् शब्दानां प्रयोगे ऽत्यन्तमपरिहार्याद्दूषणत्वाख्याद्दोषादन्ये ऽपि बहवो बुद्धिपूर्वमनुष्ठिता दोषा उपेताश्च सन्ति, यैर्मनुष्या भाषाप्रकारे भ्रान्ता भूत्वा तेषां लिङ्गानामर्थं स्वाभाविकस्थित्यपेक्षया ऽधिकमव्यक्ततरं कल्पयन्ति ॥

२ ॥ प्रथमं विज्ञानशून्या व्यक्तविज्ञानरहिता वा शब्दाः ॥—प्रथमं तावदस्मिन् दोषप्रकारे मुख्यः सुबोध्यश्च विविक्तविज्ञानरहितानां शब्दानां प्रयोगरूपो दुष्प्रयोगो ऽथवा बोध्यार्थशून्यपदप्रयोगरूपो ऽस्ति । ते चेमे द्विधा ।

Digitized by Google

(१) परीक्षायां क्रियमाणायां सर्वासु भाषासु के चन शब्दा वाक्ये उचिते च प्रयोगे न कान्यपि सुस्पष्टासंदिग्धविज्ञानानि बोधयन्तीत्युपलप्स्यत इति सर्वेणापि ज्ञातुं शक्यत एव । शास्त्रिणो धर्मशास्त्रिणश्च भूयिष्ठानिमान् शब्दान् प्राचारयन् । यतस्तेषां निर्मातारः प्रचारयितारो वा साधारणबोधातिगं विलक्षणं कं चन पदार्थमुद्दिश्य विलक्षणमतविशेषस्य परिपोषणाय वा स्वप्रतिज्ञाया दोषविशेषस्य गोपनाय वा प्रायशो नवीनान् शब्दान् रचयन्त्येव येषु परीक्ष्यमाणेषु न्यायतोऽर्थशून्याः शब्दा इति कथयितुं शक्यते । तेषां प्राथमिककल्पनासमये तद्बोध्यविज्ञानसमुदायस्य नियतत्वाभावेन साधु परीक्षितेषु तेषु शब्दार्थानानुकूल्यस्य चोपलब्ध्या वा यदि समपक्षीयैर्लौकिकप्रयोगे चाभ्यन्तरेऽपि व्यवहृताः शब्दा वस्तुतः कानि विज्ञानानि बोधयन्तीति परीक्षायां बुद्धिमपरिश्राम्यैव तत्तच्छास्त्रिमण्डलस्य भक्तमण्डलस्य वा विवेचकत्वेन तैरविचिन्त्य पुनः पुनरुदीर्णाः प्रायोऽर्थशून्यध्वनिरूपा एव भवन्ति । सर्वेषां मनुष्याणां संवादाध्ययनयोरीदृशाः शब्दाः पर्याप्ता उपलप्स्यन्ते अथ चैतेभ्योऽप्यधिकेदृशशब्दसंग्रहचिकीर्षायामेवंजातीयकशब्दकल्पनापरिवृढाः शास्त्रिणोऽध्यात्मशास्त्रपण्डिता अर्वाचीना विवादशीला बाह्यप्रपञ्चविचारका धर्मशास्त्रिणश्च प्रकृतविषयोदाहरणैः संतोषयितुं प्रभवन्तीति तानि नेह मया प्रदर्श्यन्ते ॥

३ ॥ (२) अन्ये च पदबोध्यानि सुस्पष्टान्यसंदिग्धानि विज्ञानानि येषामर्थो न भवन्ति तथाविधशब्दनिर्माणे न्यूनावधाना इतोऽप्यधिकं दुष्प्रयोगं विस्तारयन्ति । सर्वथा सुस्पष्टार्थमन्तरैव भाषाया औचित्येन येषां परमोपयोगीनि विज्ञानानि बोध्यतया व्यवस्थाप्यन्ते तथाविधानसह्योपेक्षया चिरपरिचितानिव ते प्रयुञ्जते । बुद्धिर्यशो द्रव्येत्यादयः शब्दाः सर्वैरेव मनुष्यैः पुनः पुनरुदीर्यन्ते परं तु तैः पदैः किं बुबोधयिषितमिति पृष्टे सति बहवस्तूष्णीं भवेयुर्न जानीयुश्च किमुत्तरणीयमिति । स्पष्टं चैतत् ते तानि पदानि समभ्यस्य स्मरणाय जिह्वाग्रगतानि कुर्वतेऽपि तैः पदैः परान्प्रति बोधनीयानि विज्ञानानि नियतानि स्वात्मसु नावधारयन्ति ॥

४ ॥ तत्तत्पदबोध्यविज्ञानानि पूर्वमनवधार्यैव तेषां पदानामभ्यासेन तावत् पदानां दुष्प्रयोगो भवति ॥—मनुष्या आन्दोलनकस्थित्यवस्थामारभ्यैव तत्पदबोध्यमिश्रविज्ञानानि तद्बोध्यतया कल्पितेषु पदार्थेषूपलभ्यमानानि वा मिश्रविज्ञानानि पूर्वमपरिकल्प्यैव सुलभावधारणीयानि पदान्यभ्यस्यन्ति, तथा कर्तुमभ्यस्ताश्च ते प्रायो यावज्जीवं तथैवानुतिष्ठन्ति । किं च स्वात्मसु नियतविज्ञानानामावश्यकस्य व्यवस्थापनस्य क्लेशमकृत्वैव सुपरिचितानामस्थिराणां विसंकुलानां च विज्ञानानां बोधाय परैः प्रयुज्यमानैः पदैरेव संतुष्यन्तस्तेषां पदानि सर्वदैकरूपमेवार्थं बोधयन्तीतीव मन्यमानास्तान्येव पदानि प्रयुञ्जते । यद्यपि यत्र मनुष्या एतस्य बोध्यत्वमावश्यकं मन्वते तत्र लौकिकव्यवहारे ऽस्योपायं परिकल्पयन्ति ततश्च तदानीमपि तानि लिङ्गानि विरचयन्ति तथापि तेषां शब्दानामिदं स्वार्थबोधकत्वं तेषां स्वमतानां स्वाभिमतविषयाणां वा साधनाय हेतूपन्यासकरणावसरे तेषां संवादं भूयोभिरर्थशून्यैः पदैर्भूयसा वाग्जालेन च प्रपूरयति, विशेषतश्च धर्म्माधर्म्मविषयेषु यत्र प्रायः शब्दाः स्वैरिकं बहुविज्ञानसमुदायं बोधयन्ति न पुनः स्थिरं नियतं स्वभावसिद्धं विज्ञानसमुदायम् । तेषां च प्रायः शब्दा एव विचार्यन्ते, यन्ततो ऽत्यन्तगूढानियततत्तच्छब्दबोध्यानि विज्ञानानि । मनुष्याः स्वसमीपवर्तिजनव्यवहारगोचराणि पदान्याददते । तत एव च ते तत्पदबोध्यार्थपरिचयशून्या न प्रतीयन्ते नियतार्थविशेषविषये स्वमनांस्यपरिश्रमय्य भूयो भूयः प्रयुञ्जते च । किं च ते ऽस्मात् प्रकृतेतरविषये एतत्फलं लभन्ते । यथैवंविधेषु संवादेषु ते विरलमेवोचितवादिनो भवन्ति तथैव ते भ्रान्ता इति तान् प्रति बोधयितुं शक्यते । नियतज्ञानाभाववत्पुरुषभ्रमापाकरणप्रयत्नस्य नियतनिवासाभाववतः पुंसो निवासाधिष्ठापनप्रयासस्येव विफलत्वात् । मन्ये एतदित्थमेव स्यात् । सर्वोपि स्वस्मिन् परेषु चेतदित्थमेव भवेच्च वेति ज्ञातुं शक्नोति ॥

५ ॥ तेषामस्थिरप्रयोगाच्च ॥—द्वितीयतः शब्दानां प्रयोगो ऽस्थिरत्वमपि तेषामन्यो महान् दुष्प्रयोगः । कस्मिंश्चिद्विवादविषये लिखिते

वादो विरलमेव तत्रोपलभ्यते यच्च सावधानतया पठिते सति तस्मिन् संवादे प्रधानसाधनीयार्थप्रतिपादका अपि तएव शब्दाः कदाचिदेकविधसूक्ष्मविज्ञानसमुदायबोधाय प्रयुज्यन्ते कदा चिच्चान्यादृशस्यैव समुदायस्य बोधाय । अयं च भाषाया महान् दुष्प्रयोगो भवति । न स्वाभाविकेनार्थेन किं तु स्वैरिककल्पनया परान् प्रति ज्ञापनाय शब्दानां स्वीयविज्ञानविवक्षया विवक्षितत्वेन यदा कदाचिदेकस्य कदा चिच्चापरस्य वस्तुनो बोधाय शब्दाः प्रयुज्यन्ते तदा कलं दुष्प्रयोगश्चेति तु सुस्पष्टम् । एतस्य बुद्धिपूर्वमनुष्ठानं तु महामोहात्मकमेव महत्तरदुर्विनयरूपमेव वा भवितुमर्हति । किं च परेण सह संभाषणे तर्कोपन्यासे वा तावतैव सुस्पष्टभावेन मनुष्याः सूक्ष्मविज्ञानानां भिन्नभिन्नसमुदायस्य बोधाय शब्दान् प्रयोक्तुमर्हन्ति यावता सुस्पष्टभावेन ते परिगणनसमये संख्यावाचकान् शब्दान् यथा षिशब्दं कदाचित् त्रयाणां कदा चिच्चतुर्णां कदाचिदष्टानां वा बोधाय प्रयोक्तुं शक्नुवन्ति । यदि मनुष्याः संख्याविषये ऽप्येवमेव कुर्युस्तर्हि कस्तैः सह व्यवहरेत् । यो व्यवहारे सांसारिककार्ये चैवं भाषेत, सप्तपदं च स्वप्रयोजनानुसारेण कदा चित् सप्तानां कदा चिच्च नवानां बोधाय प्रयुञ्जीत स सर्वमूर्खो धूर्तो वा ऽवश्यं तदानीमभिधीयेत । किं चैवमपि तर्केषु शास्त्रीयसंवादेषु चैवंविधमेव कर्म चातुर्यं पाण्डित्यं चेति व्यवह्रियते । मह्यं त्वेवं प्रतिभाति । आदानप्रदानव्यवहारे मिथ्यागणनमपेक्ष्य सार्वजनिकव्यवहारे प्रचरितानां सर्वेषां शब्दानामर्थस्य विपर्यासे महद्दौरात्म्यम् । केवलं द्रव्यमपेक्ष्यान्येषां विषयाणांभूयिष्ठत्वात् ॥

६ ॥ (३) विपरीतप्रयोगजन्यगूढतया च ॥—तृतीयतश्चापरो भाषाया दुष्प्रयोगः प्राचीनानां पदानां लक्षणमप्रदर्श्य नवीनेष्वप्रायिकेष्वर्थेषु प्रयोगात् तथैव लक्षणं विना नवीनामनेकार्थानां च पदानां व्यवहाराद्वा जायमानेन गूढत्वेन प्रायिकार्थवैसंकुल्यसंपादकेन नवीनप्राचीनशब्दानां संमिश्रणेन वा जायते । यद्यपि अनेन प्रकारेणारिस्तुतिलाचार्यस्य शास्त्रं प्रधानतममस्ति तथापि अन्येषां शास्त्राणि नैतद्दोषविनिर्मुक्तानि सन्ति । मानवीयज्ञानापूर्णताकृतदोषलेशशून्यास्तु तेषां मध्ये विरला एव

सन्ति । पदानां गूढतया शब्दानामर्थस्य विसंकुलतया लौकिकजनदृष्टि-बन्धेनेव स्वपक्षदौर्बल्यस्य प्रच्छादनाय तेषां बुद्धिपुरःसरं प्रवृत्तत्वात् । लोकव्यवहारे भौतिकं द्रव्यं विस्तारश्चेति पदद्वयप्रतिपाद्ये विभिन्ने द्वे विज्ञाने भवत इति तु किंचिद्विचारशीलस्य सर्वस्यापि स्फुटमस्ति । यतस्तयोः पदयोरर्थो वस्तुत एकरूपो ऽभविष्यत् तर्हि भौतिकद्रव्यस्य विस्तार इतिवद् विस्तारस्य भौतिकं द्रव्यमिति कथनमपि सुबोधमुचितं चाभविष्यत्। किं चैवमपि तयोरर्थवैसंकुल्यस्यावश्यकत्वं मन्यते जनाः । विद्वज्जनपरिगृहीतन्यायशास्त्रविचारशास्त्राभ्याममयं दुष्प्रयोगः शब्दार्थवैसंकुल्यदोषश्च प्रख्यापितौ । श्लाघनीयं विवादशास्त्रं भाषायाःस्वभावसिद्धमपूर्णत्वमत्यन्तमवर्धयत् । वस्तूनां तत्त्वज्ञानयोराविष्कारमपेक्ष्य शब्दार्थवैसंकुल्यस्यैव बहुशो ऽनुष्ठीयमानत्वात् । यश्चैवंविधशास्त्रीयग्रन्थान् द्रक्ष्यति स लौकिकसंवादीयशब्दानपेक्ष्य शास्त्रीयशब्दान् अधिकतरं गूढाननियतान् अनिश्चितार्थानुपलप्स्यते ॥

७ ॥ न्याये वादे च बहुश एतत्संभवति ॥ — यत्र मनुष्याणां पाण्डित्यं विवादचातुर्येण श्लाघ्यते तत्रापरिहार्योयं दोषः । यदि च विख्यातिपारितोषिकयोः प्रायशः पदानां सूक्ष्मतरपरिशुद्धिमाश्रितानीमानि फलानि भवेयुस्तर्हि नेदमाश्चर्यमावहेद् यद् बुद्धिमान् मनुष्य, एवमनुष्ठाय, कस्याश्चिन्मीमांसायाः परिरक्षणे विरोधितर्कवादे वा किमपि कदा चिदपि अनुपलब्धमपेक्षितं वा नास्तीतीव शब्दानामर्थं विसंकुलयेदन्तर्भावयेत्सूक्ष्मतरमितिव्यवहरेच्चेति । विजयनिर्णयस्यान्तिमशब्दवादिताधीनत्वाच्च पुनस्तत्त्वपक्षपातिताधीनत्वात् ॥

८ ॥ एतस्य सूक्ष्मतापदेन व्यवहारस्य हेतुं निरूपयति ॥—इत्थं तं निरुपयुक्तं ज्ञानमार्गस्य साक्षात्प्रतिबन्धकमप्येतच्चातुर्यमद्यापि सूक्ष्मता याथार्थ्यमिति सर्वजनश्लाघ्यपदाभ्यां व्यवह्रियते । स्तूयते प्रोत्स.ह्यते च विद्वद्भिः पण्डितवर्गैः । किं च नैतच्चित्रम् । यतः प्राचीना वादिनो वैतण्डिकाश्च ल्युशियन्प्रभृतयः शास्त्रिणो ऽन्येपि प्राचीना विद्वज्जनाः स्वीयसर्वज्ञतायशो लक्ष्यीकृत्य भूयांसो ऽलब्धतादृशयशसोपि सर्वज्ञंमन्याः

स्वीयज्ञानं विस्मयावहेनानिर्वचनीयेन विसंकुलशब्दजालेन प्रच्छाद्य परेषां सुबोधशब्दैः श्लाघ्यतां संपादयन्ति । श्रोतारो न किमपि बुध्यन्तीति कृत्वा तेषु ते शब्दा आश्चर्यमावहन्ति । सर्वेष्वितिहासेष्वेतदुक्तं भवति । शास्त्रपारावारीणाः पण्डिताः स्वसमीपवर्तिसाधारणजनमपेक्ष्य न बुद्धिमत्ता नाप्युपयोगिन इति ते सांसारिकं स्वघटितसमाजस्योपकारकं च कृत्यं विरलमेव साधयन्ति । केवलं तत्तत्कृच्छ्रवाच्यनवीनवस्तुनिर्माणमहत्त्वैव नवीनान् शब्दान्निर्माय प्राचीनशब्दानामर्थं निगूह्य विसंकुलय्य च यदि किमपि वस्तु मनुष्यजीवनोपयोगि श्लाघापारितोषिकयोग्यं च स्यात् तर्हि तत्र सर्वाणि वस्तूनि विवादगोचराणि मीमांसागोचराणि च कुर्वन्ति ॥

९ ॥ इदं पाण्डित्यं विरलमेव समाजस्योपकरोति ॥—यतो विदुषां वादिनां सर्वेषां पण्डितानां सत्त्वे ऽपि संसारिकराष्ट्रेषु शान्तिरौदार्यं प्रजारक्षणं चाविद्वज्जनायत्तमेवासीत् । अथास्तिभ्यो ऽविद्वद्भ्य एव चोपयोगिविद्यानां परिष्कारोऽप्युपलब्ध आसीत् । एवमपीदं कृत्रिममज्ञानं पाण्डित्यकृतमनर्थजल्पनं च गतेष्वेषु शतकेषु राज्ये ऽधिकारे च लौकिकानामज्ञानिनां च शब्दप्रयोगेण प्रह्लादनाद् अथवा दुर्बोधशब्दघटिते वादजाले ऽलसानामज्ञानां च प्रवर्तनात् सततं तस्मिन्नेव चक्रव्यूहे परिभ्रमणाच्च सुलभतरं प्रकारान्तरमलभमानानां पुरुषाणां कृत्रिमेण संतोषेण बहुशः प्रचारं नीयते । किं च संदिग्धार्थकैः पूर्वमप्रदर्शितार्थकैर्गूढार्थकैश्च शब्दसैनिकैः परितः परिरक्षणं विहायान्य उपायः कोऽपि बाधितानां विलक्षणानां च मतानां परिरक्षणस्य स्वीकारस्य च साधको नास्ति । अस्ति चायं लुण्ठकानां गूढनिवासा इव शृगालविवराणीव वा वादिनां शरणं न पुनर्युद्धशालिनां वीराणां दुर्गाणीव । यतस्तेषां बलवत्तया दार्ढ्येन वा नास्ति दुष्प्रापता ऽपितु घनगुल्मकण्टकादिपिहितभावेन काननानामिव । अतास्तिकस्य सर्वैरेव मनुष्यैरपरिग्राह्यतया गूढत्वं विहाय बाधितमतपरिरक्षोपायान्तरस्यासंभवात् ॥

१० ॥ नाशयन्त्यपि ज्ञानसंभाषणयोः साधनानि ॥—अयमज्ञानगोपनपकारो बुद्धिमतामपि यथार्थज्ञानावगमशिल्पं च संसारे प्रचरितं स्तो विसंकुले चातितरां भवतः पण्डितंमन्यानाम्। यतः सुबोधा बुद्धिमन्तो मनुष्या विद्यया योग्यतया च तथाविधसूक्ष्मविचारशीलतामनापन्नाः सुबोधं परस्परं भाषितुं शक्नुवन्ति शब्दानां साधुप्रयोगेण च भाषणफलमपि साधयितुं शक्नुवन्ति। परं तु यद्यपि लौकिकाः पुरुषाः श्वेतकृष्णादिशब्दान् साध्ववगच्छन्ति तैः शब्दैर्बोधितानि विज्ञानानि च सततमवधारयन्ति तथापि हिममस्ति कृष्णमिति साधनाय प्रवृत्ताः सूक्ष्मबुद्धयः पण्डिता उपलभ्यन्ते। ते श्वेतमस्तिकृष्णमितिसाधयन्तीतियावत्। यदा च ते परमचातुर्येण सौक्ष्म्येण च केवलं पदानामर्थं विसंकुलयन्ति ततश्च वास्तविकदोषेण यावद्व्यवहारासाधिका भाषास्ति ततोपि न्यूनतरव्यवहारसाधकतां भाषायाः साधयन्ति। अपण्डितास्त्वेतत्फलं नाप्नुवन्ति ॥

शेषमग्रे

THE

NYÁYADARSÁNA.

WITH THE COMMENTARY BY VÁTSYÁYANA.

An Instrument of knowledge is said to be effectual, because, when an object is known by means of an instrument of knowledge, [one's] effort [about the object] becomes fruitful. Nothing is

अथ न्यायदर्शनवात्स्यायनभाष्यम्।

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्। प्रमाणमन्तरेण नार्थप्रतिपत्तिः। नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः। समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा।

known without an instrument of knowledge; nor can [one's] effort [for an object] be fruitful, unless the object be known. A knower, indeed, having known an object by means of an instrument of knowledge wishes either to obtain or to quit it. The effort of one actuated by a wish either to obtain or to quit an object is called Pravritti or mental effort. The state of [one's] effort being attended by its consequence, is said to be Sámarthya or fruitfulness of the effort. One, who wishes and makes an effort either to take or to quit an object, either obtains or gives it up. The object may be either happiness or means of happiness, or pain or means of pain. But these objects of the instruments of knowledge are innumerable on account of the infinite number of living creatures. When an instrument of knowledge is effectual or fruitful, Pramátá or the knower, Prameya or the object known, and Pramiti or the correct notion are said to be fruitful; for if any one of these be wanting, no object can be proved to be existing. He, who being actuated by the wish either to obtain or to quit an object makes an effort, is called Pramátá or one knowing truly; the means by which one perceives an object is called Pramáṇa or instrument of knowledge; what is perceived is styled Prameya or the object known; the knowledge of an object is entitled Pramiti or correct notion. On the aggregate of these four, the real nature of an object depends. What is meant by the real nature [of an object]? Both, the

---

अर्थस्तु सुखं सुखहेतुः दुःखं दुःखहेतुश्च, सोऽयं प्रमाणार्थोऽपरिसंख्येयः प्राणभृद्भेदस्यापरिसंख्येयत्वात्। अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति, कस्मात् अन्यतमापायेऽर्थस्यानुपपत्तेः। तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता। स येनार्थं प्रमिणोति तत् प्रमाणम्। योऽर्थः प्रतीयते तत् प्रमेयम्। यदर्थविज्ञानं सा प्रमितिः। चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते। किं पुनस्तत्त्वम्? सतश्च सद्भावोऽसतश्चासद्भावः। सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति, असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। कथमुत्तरस्य

existence of what is existent, and the non-existence of what is not existent. Existence known as such in accordance with the fact is said to be the real nature [of what is existent]; non-existence known as such in accordance with the fact is said to be the real nature [of what is not existent]. How is the latter [the non-existent] known by means of the instruments of knowledge? Because, while the existent is perceived, the thing non-existing is not perceived, just as by means of a lamp. To explain, as that which is not seen, while the visible objects are seen by means of the light of a showing lamp, is said to be not existing there; were it existing, it would be seen, like the visible; but it is not perceived, therefore, it is not existing. In the same manner, that which is not perceived, while an existing object is perceived by means of an instrument of knowledge, is said to be not existing. Were it existing, it would have been perceived like the other one; but it is not perceived, it is not, therefore, existing. An Instrument of knowledge, therefore. while discovering what is existent, also informs us of what is not existing. The existent will he shown to be sixteenfold.

1. APHORISM.

Beatitude is attained by means of true knowledge of (1) proofs or instruments of knowledge, [Pramáṇa], (2) the objects [Prameya], (3) doubt [Sanśaya], (4) the motives [Prayojana], (5) popular data [Dṛishṭánta], (6) established truths [Siddhánta], (7)

प्रमाणेनोपलब्धिरिति, सत्यप्युपलभ्यमाने तदनुपलब्धेः प्रदीपवत् । यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति । एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति । तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति । सच्च खलु षोडशधा व्यूढमुपदेक्ष्यते तासां खल्वासां सद्विधानाम् ॥

सू० प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥

Digitized by Google

members [of syllogism] [avayava], (8) reasoning [Tarka], (9) determination [Nirṇaya], (10) debate [Váda], (11) wrangling [Jalpa], (12) cavilling [Vitaṇḍá], (13) fallacies [Hetvábhása] (14) fraud (chhala), (15) futile arguments [Játi], (16) predicament of rebuke [Nigrahasthána].

COMMENTARY.

So many are the existent objects [the categories]. These are here enunciated for the sake of their true knowledge. It should be known that they are enunciated to exhaust the whole matter of the Nyáya philosophy. Beatitude is certainly attained by true knowledge of the objects soul and so forth. This very thing is repeated in the next aphorism. That which is to be abandoned [heya], its cause, its entire annihilation and its method attainable, having thoroughly known these four points of philosophy one attains Beatitude.

[It may be here objected that] it is useless to enunciate [among the forementioned categories] Doubt [Sanśaya] and so forth, as separate categories; for Doubt [Sanśaya] and so forth, being, according to the possibility, included, either in the instruments of knowledge [Pramáṇa] or in the objects [Prameya], are not different from them:—It is true, [but it is said that] these four*

* The four Vidyás are thus given: 1. Trayí, the triple veda; 2. Ánvíkshikí, logic and metaphysics; 3. Daṇḍanítí, the science of government? 4. Vártá, practical arts, such as agriculture, commerce, medicine, &c. See Sukraníti ch. 1. Śloka 64 onwards.

भा॰ निर्देशे यथावचनं विग्रहः । चार्थे द्वन्द्वः समासः । प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी, तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ । एतावन्तो विद्यमानार्थाः । एषामविपरीतज्ञानार्थमिहोपदेशः, सोऽयमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः । आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः । तच्चैतदुत्तरसूत्रेणानूद्यत इति । हेयं तस्य निर्वर्तकं हानमात्यन्तिकं तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि सम्यग् बुद्ध्वा निःश्रेयसमधिगच्छति ।

Vidyás or sciences with their different methods are mentioned for the benefit of living beings; the fourth of which [Vidyás] is this Ánvíkshikí or Nyáyavidyá, the science including logic and metaphysics, its particular subjects being the categories doubt and so forth. This [Nyáyavidyá] would be the same with Adhyátmavidyá or the science of soul, just as the Upanishads, in case they [Doubt and so forth] were not separately enunciated; therefore, it has been set down as a separate science together with the categories, doubt and so forth. Now, Nyáya or a logical argument takes place neither for an unknown object, nor for what is decided, it takes place only for what is uncertain. So it is said: "Determination is the settling of a matter by dealing with both sides of the question, after having been in doubt:" The word Vimarśa [in the aphorism] means doubt; the two sides of a question give rise to a Nyáya or syllogism; Arthávadhárana means settling the truth of a matter. Doubt, therefore, consisting only in the sense of uncertainty of the mind about an object, and consequently being included in the category of the objects [Prameya] is enunciated as a separate category for the said reason.

KEŚAVA ŚÁSTRÍ.

(To be continued.)

तत्र संशयादीनां पृथग्वचनमनर्थकम् संशयादयो यथासंभवं प्रमा-
णेषु प्रमेयेषुचान्तर्भवन्तो न व्यतिरिच्यन्तइति, सत्यमेतत् इमास्तु चतस्रो-
विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमा-
न्वीक्षिकी न्यायविद्या । तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः । तेषां
पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः । तस्मात्
संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते । तत्र नानुपलब्धे न निर्णीतेऽर्थे
न्यायः प्रवर्तते किं तर्हि संशयितेऽर्थे, यथोक्तं "विमृश्य पक्षप्रतिपक्षाभ्यामर्-
थावधारणं निर्णय इति," विमर्शः संशयः । पक्षप्रतिपक्षौन्यायप्रवृत्तिः ।
अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति । सचायं किंस्विदिति वस्तुविमर्श-
मात्रमनवधारणं ज्ञानं संशयः प्रमेयेन्तर्भवन्नेवमर्थं पृथगुच्यते ।

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. II. JULY 2ND 1877. VOL. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

काशिकायाः

सप्तमाध्यायस्य प्रथमः पादः ।

युवोरनाकौ ॥ १ ॥

यु वु इत्येतयोरुत्सृष्टविशेषणयोरनुनासिकयोः प्रत्यययोर्ग्रहणं, तयोः स्थाने यथासङ्ख्यमन अक इत्येतावादेशौ भवतः । योरनः । वोरकः । नन्द्यादिभ्यो ल्युः । नन्दनः । रमणः । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् । सायंतनः । चिरंतनः । ण्वुल्तृचौ । कारकः । हारकः । वासुदेवार्जुनाभ्यां वुन् । वासुदेवकः । अर्जुनकः । अनुनासिकयोरिति किम् । ऊर्णाया युस् । ऊर्णायुः । भुजिमृङ्भ्यां युक्त्युकौ । भुज्युर्मृत्युरिति । एवमादीनां हि यणोऽनुनासिकत्वं न प्रतिज्ञायते, प्रतिज्ञानुनासिक्याः पाणिनीयाः । युवोरिति निर्देशाद् द्वन्द्वैकवद्भावपक्षे ऽनित्यमागमशासनमिति नुम् न क्रियते । नपुंसकलिङ्गता वा लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति न भवति । इतरेतरयोगपक्षे तु छान्दसो वर्णलोपो द्रष्टव्यः ॥

युवोश्चेद् द्वित्वनिर्देशो द्वित्वे यणतु प्रसज्यते ।
अथ चेदेकवद्भावः कथं पुंवद्भवेदयम् ॥
द्वित्वे नैर्गमिको लोप एकत्वे नुमनित्यता ।
अशिष्यत्वाद्धि लिङ्गस्य पुंस्त्वं वेह समाश्रितम् ॥

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ २ ॥

आयन् एय् ईन् ईय् इय् इत्येते आदेशा भवन्ति यथासंख्यं फ ढ ख छ घ इत्येतेषां प्रत्ययादीनाम् । फ इत्येतस्यायनादेशो भवति । नडादिभ्यः फक् । नाडायनः । चारायणः । ढस्य एयादेशो भवति । स्त्रीभ्यो ढक् । सौपर्णेयः । वैनतेयः । खस्य ईनादेशो भवति । कुलात्खः । आढ्यकुलीनः । श्रोत्रियकुलीनः । छस्य ईयादेशो भवति । वृद्धाच्छः । गार्गीयः । वात्सीयः । घ इत्येतस्येयादेशो भवति । क्षत्राद्घः । क्षत्रियः । प्रत्ययग्रहणं किम् ।

Digitized by Google

फक्कति । ढौकते । खनति । छिनत्ति । घूर्णते । आदिग्रहणं किम् । ऊरुदघ्नम् । जानुदघ्नम् । एते आयनादयः प्रत्ययोपदेशकालएव भवन्ति । कृतेष्वेतेषु प्रत्ययाद्युदात्तत्वं भवति । तथा च घच्छौ चेति घचश्छित्करणमर्थवद्भवति । शङ्खः । षण्ढः *, इत्येवमादीनां हि उणादयो बहुलमिति बहुलवचनादादेशा न भवन्ति । छतेरीयङिति वा वचनं ज्ञापकं धातुप्रत्ययानामादेशाभावस्य † । एजेः खश् पदरुजविशस्पृशो घञित्येवमादिषु तु इत्संज्ञया भवितव्यम् । तद्धितेषु हि खकारघकारयोरादेशवचनमवकाशवदितीत्संज्ञां बाधितुं नोत्सहते । आयनीनोर्नकारस्येत्संज्ञायां प्राप्तायां प्रतिविधातव्यं नित्कार्यं हि संभवति ॥

झोऽन्तः ॥ ३ ॥

प्रत्ययग्रहणमनुवर्त्तते, आदिग्रहणं निवृत्तम् । प्रत्ययावयवस्य झस्य अन्त इत्ययमादेशो भवति । कुर्वन्ति । सुन्वन्ति । चिन्वन्ति । अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै । जृविशिभ्यां झच् । जरन्तो, वेशन्तः । प्रत्ययस्येत्येव । उज्झिता । उज्झितुम् । उज्झितव्यम् । अस्मिन्नप्यन्तादेशे कृते प्रत्ययाद्युदात्तत्वं भवति । तथा च झचश्चित्करणमर्थवद्भवति ॥

अदभ्यस्तात् ॥ ४ ॥

अभ्यस्तादङ्गादुत्तरस्य झकारस्य अदित्ययमादेशो भवति । ददति । ददतु । दधति । दधतु । जक्षति । जक्षतु । जाग्रति । जाग्रतु । अन्तादेशापवादोयं जुसादेशेन तु बाध्यते । अददुः । अदधुः ‡ । अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवति ॥

आत्मनेपदेष्वनतः ॥ ५ ॥

आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गादुत्तरस्यादित्ययमादेशो भवति । चिन्वते । चिन्वताम् । अचिन्वत । लुनते । लुनताम् ।

---

* शमेः खः षणो ढः शङ्खः षण्ढः, इति पाठः पुस्तकान्तरे ।

† धातुविहितप्रत्ययानामादेशा न भवन्तीति कुत्र चित्पाठः ।

‡ अजक्षुरजागरुरित्यधिकं पुस्तकान्तरे ।

त्वलुनत। आत्मनेपदेष्विति किम्। चिन्वन्ति। लुनन्ति। अनत इति किम्। च्यवन्ते। प्लवन्ते। नित्यत्वादत्र विकरणे कृते झोऽन्तादेशेन भवितव्यमित्यदादेशो न भवति। अनकारान्तेनाङ्गेन झकारविशेषणं किम्। इह मा भूत्। अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्ते॥

शीङो रुट्॥ ६॥

शीङोऽङ्गादुत्तरस्य झादेशस्यातो रुडागमो भवति। शेरते। शेरताम्। अशेरत। रुडयं परादिः क्रियते। स यदि झकारस्यैव स्याददादेशो न स्यादित्यत एवायमादेशस्यागमो विधीयते। सानुबन्धग्रहणमयङ्लुगर्थम्। तेनेह न भवति। व्यतिशेश्यते॥

वेत्तेर्विभाषा॥ ७॥

वेत्तेरङ्गादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति। संविदते। संविद्रते। संविद्रताम्। संविदताम्। समविदत। समविद्रत। वेत्तेरिति लुग्विकरणस्यैवं ग्रहणम्। इह मा भूत्। विन्ते। विन्दाते। विन्दते इति॥

बहुलं छन्दसि॥ ८॥

छन्दसि विषये बहुलं रुडागमो भवति। देवा अदुह्र। गन्धर्वाप्सरसो अदुह्र। दुहेर्लङि झकारस्यादादेशे कृते रुट्। लोपस्त आत्मनेपदेष्विति तकारलोपः। न च भवति। अदुहत। बहुलवचनादन्यत्रापि भवति। अदृश्रमस्य केतवः। ऋदृशोऽङि गुण इत्येतदपि बहुलवचनादेवात्र न भवति॥

अतो भिस ऐस्॥ ९॥

अकारान्तादङ्गादुत्तरस्य भिस ऐसित्ययमादेशो भवति। वृक्षैः। प्लक्षैः। अतिजरसैः। जरामतिक्रान्तैरिति विगृह्य समासे कृते ह्रस्वत्वे च भिस ऐसादेशो भवति। एकदेशविकृतमनन्यवद्भवतीति जरशब्दस्य जरसादेशः। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषेयम-

Digitized by Google

नित्यार्थं कष्टाय क्रमणायेति निर्देशात् । अत इति किम् । अग्निभिः । वायुभिः । तपरकरणं किम् । खट्वाभिः । मालाभिः ॥

एत्वं भिसि परत्वाच्चेदत ऐस्न भविष्यति ।
कृतेप्येत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति ॥

अत इत्यधिकारो जसः शीति यावत् ॥

बहुलं छन्दसि ॥ १० ॥

छन्दसि विषये बहुलमैसादेशो भवति । अत इत्युक्तमनतोपि भवति नद्यैरिति । अतो न भवति । देवेभिः सर्वेभिः प्रोक्तमिति ॥

नेदमदसोरकोः ॥ ११ ॥

इदम् अदस् इत्येतयोरककारयोर्भिस ऐस न भवति । एभिः । अमीभिः । अकोरिति किम् । इमकैः । अमुकैः । अकोरित्येतदेव प्रतिषेधवचनं ज्ञापकं तन्मध्यपतितस्तद्ग्रहणेन गृह्यतइति । इदमदसोः कादिति नोक्तं, विपरीतोपि नियमः संभाव्येत इदमदसोरेव कादिति । ततश्चेह न स्यात् । सर्वकैः । विश्वकैः । इह च स्यादेव । एभिः । अमीभिः । प्रतिषेधकरणं विपरीतनियमनिवृत्त्यर्थम् * ॥

टाङसिङसामिनात्स्याः ॥ १२ ॥

अकारान्तादङ्गादुत्तरेषां टाङसिङसाम् इन आत् स्य इत्येते आदेशा भवन्ति यथासंख्यम् । टा इत्येतस्येनादेशो भवति । वृक्षेण । प्लक्षेण । ङसीत्येतस्य आत् । वृक्षात् । प्लक्षात् । ङसित्येतस्य स्यादेशो भवति । वृक्षस्य । प्लक्षस्य । अत इति किम् । सख्या । पत्या । अतिजरसिन अतिजरसादिति केचिदिच्छन्ति । यथा तु भाष्ये तथा नैतदिष्यतइति लक्ष्यते ॥

ङेर्यः ॥ १३ ॥

ङेरिति चतुर्थ्येकवचनस्य ग्रहणम् । अकारान्तादङ्गादुत्तरस्य ङे इत्येतस्य य इत्ययमादेशो भवति । वृक्षाय । प्लक्षाय । अत इत्येव । सख्ये । पत्ये ।

* ततश्चेहेत्यारभ्य निवृत्त्यर्थमित्यन्तः पाठः क्वचित्पुस्तके नास्ति ।

संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषेयमनित्या तेन दीर्घो भवति ॥

सर्वनाम्नः स्मै ॥ १४ ॥

अकारान्तात्सर्वनाम्न उत्तरस्य ङेः स्मै इत्ययमादेशो भवति । सर्वस्मै । विश्वस्मै । यस्मै । कस्मै । तस्मै । अत इत्येव । भवते । अ-योऽत्रास्मै इत्यन्वादेशे ऽशादेशे एकादेशः प्राप्नोति तत्रान्तरङ्गत्वादेका-देशात्पूर्वं स्मैभावः क्रियते पश्चादेकादेश इति ॥

ङसिङ्योः स्मात्स्मिनौ ॥ १५ ॥

ङसि ङि इत्येतयोरकारान्तात्सर्वनाम्न उत्तरयोः स्मात् स्मिन् इत्येतावादेशौ भवतः । ङसीत्येतस्य स्मात् । सर्वस्मात् । विश्वस्मात् । यस्मात् । तस्मात् । कस्मात् । ङेरित्येतस्य स्मिन् । सर्वस्मिन् । विश्व-स्मिन् । यस्मिन् । तस्मिन् । अन्यस्मिन् । अत इत्येव । भवतः । भवति । सर्वनाम्न इत्येव । वृक्षात् । वृक्षे ॥

पूर्वादिभ्यो नवभ्यो वा ॥ १६ ॥

पूर्वादिभ्यो नवभ्यः सर्वनाम्न उत्तरयोर्ङसिङ्योः स्मात् स्मिन् इत्ये-तावादेशौ वा भवतः । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । परस्मा-त् । परात् । परस्मिन् । परे । अवरस्मात् । अवरात् । अवरस्मिन् । अ-वरे । दक्षिणस्मात् । दक्षिणात् । दक्षिणस्मिन् । दक्षिणे । उत्तरस्मात् । उत्तरात् । उत्तरस्मिन् । उत्तरे । अपरस्मात् । अपरात् । अपरस्मिन् । अपरे । अधरस्मात् । अधरात् । अधरस्मिन् । अधरे । स्वस्मात् । स्वात् । स्वस्मिन् । स्वे । अन्तरस्मात् । अन्तरात् । अन्तरस्मिन् । अन्तरे । नवभ्य इति किम् । त्यस्मात् । त्यस्मिन् ॥

जसः शी ॥ १७ ॥

अकारान्तात्सर्वनाम्न उत्तरस्य जसः शीत्ययमादेशो भवति । सर्वे । विश्वे । ये । के । ते । दीर्घोच्चारणमुत्तरार्थम् । त्रपुणी । जतुनी ॥

औङ आपः ॥ १८ ॥

आबन्तादङ्गादुत्तरस्यौङः शीत्ययमादेशो भवति । खट्वे तिष्ठतः । खट्वे पश्य । बहुराजे । कारीषगन्ध्ये । ङकारः सामान्यग्रहणार्थः । औटोपि ग्रहणं यथा स्यात् ।

औकारोयं शीविधौ ङित्गृहीतो
ङित्त्वास्माकं नास्ति कोयं प्रकारः ।
सामान्यार्थस्तस्य चासंजनेस्मि-
न्ङित्कार्यं ते स्यां प्रसक्तं स दोषः ॥
ङित्त्वे विद्यादुर्णनिर्देशमात्रं
वर्णो यस्यात्तच्च विद्यात्तदादौ ।
वर्णश्चायं तेन ङित्त्वेप्यदोषो
निर्देशोयं पूर्वसूत्रेण वा स्यात् ॥

नपुंसकाच्च ॥ १९ ॥

नपुंसकादङ्गादुत्तरस्य औङः शी इत्ययमादेशो भवति । कुण्डे तिष्ठतः । कुण्डे पश्य । यस्येति लोपः प्राप्नः ॥ स्यां प्रतिषेधो वक्तव्यः ॥ * ॥ इति न भवति । दधिनी । मधुनी । त्रपुणी । जतुनी ॥

जश्शसोः शिः ॥ २० ॥

नपुंसकादङ्गादुत्तरयोर्जश्शसोः शि इत्ययमादेशो भवति । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य । दधीनि । मधूनि । त्रपूणि । जतूनि । जसा सहचरितस्य शसो ग्रहणादिह न भवति । कुण्डशो ददाति । वनशः प्रविशन्तीति ॥

अष्टाभ्य औश् ॥ २१ ॥

अष्टाभ्य इति कृताकारोष्टशब्दो गृह्यते । तस्मादुत्तरयोर्जश्शसोरौशित्ययमादेशो भवति । अष्टौ तिष्ठन्ति । अष्टौ पश्य । कृताकारस्य ग्रहणं किम् । अष्ट तिष्ठन्ति । अष्ट पश्य । एतदेव कृतात्वस्य ग्रहणं ज्ञापकमष्टन आ विभक्तावित्यात्वविकल्पस्य । षड्भ्यो लुगित्यस्यायमपवादो ना-

प्राप्ते तस्मिन्निदमारभ्यते । यस्तु सुपो धातुप्रातिपदिकयोरिति तस्मिन्प्राप्ते चाप्राप्ते चेति स न बाध्यते । अष्टपुत्रः । अष्टभार्य, इति । तदन्तग्रहणमत्रेष्यते । परमाष्टौ । उत्तमाष्टौ । प्रियाष्टान इत्यत्रास्वस्याभावादौश्त्वं न भवति ॥

षड्भ्यो लुक् ॥ २२ ॥

षट्संज्ञकेभ्य उत्तरयोर्जश्शसोर्लुग्भवति । षट् तिष्ठन्ति । षट् पश्य । पञ्च । सप्त । नव । दश । षट्प्रधानात्तदन्तादपि भवति । परमषट् । उत्तमषट् । यत्र तूपसर्जनं षट् ततो न भवति । प्रियषषः, प्रियपञ्चान इति ॥

स्वमोर्नपुंसकात् ॥ २३ ॥

सु अम् इत्येतयोर्नपुंसकादुत्तरयोर्लुग्भवति । दधि तिष्ठति । दधि पश्य । मधु तिष्ठति । मधु पश्य । त्रपु । जतु । तद्ब्राह्मणकुलमित्यत्र लुका त्यदाद्यत्वं बाध्यते पूर्वविप्रतिषेधेन नित्यत्वाद्वा । लुको हि निमित्तमतोमिति लक्षणान्तरेण निहन्यते न पुनस्त्यदाद्यत्वेनैव, यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं भवति ॥

अतोऽम् ॥ २४ ॥

अकारान्तान्नपुंसकादुत्तरयोः स्वमोरमित्ययमादेशो भवति । कुण्डं तिष्ठति । कुण्डं पश्य । वनम् । पीठम् । मकारः कस्मान्न क्रियते । दीर्घत्वं प्राप्नोति ॥

अद्ड् डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥

डतरादिभ्यः परयोः स्वमोरद्ड् इत्ययमादेशो भवति । कतरत्तिष्ठति । कतरत्पश्य । कतमत्तिष्ठति । कतमत्पश्य । इतरत् । अन्यतरत् । अन्यत् । पञ्चभ्य इति किम् । नेमं तिष्ठति । नेमं पश्य । डित्करणं किम् । कतरात्तिष्ठतीत्यत्र पूर्वसवर्णदीर्घो मा भूत् । इह तु कतरत्पश्येति स्थानिवद्भावादमि पूर्वत्वेनापि सिद्ध्यति । एवं तर्हि तकारादेश एव कस्मान्न विधीयते, हे कतरदिति संबुद्धेर्लोपो मा भूत् ।

अपृक्तश्चेदमो दोषो निवृत्ते इतरादिषु ।
अद्ड्डिस्वाद्दुतरादीनां न लोपो नापि दीर्घता ॥

नेतराच्छन्दसि ॥ २६ ॥

इतरशब्दादुत्तरयोः स्वमोश्छन्दसि विषये अद्ड्डादेशो न भवति । इतरमितरमण्डमजायत । वार्त्रघ्नमितरम् । छन्दसीति किम् । इतरत्काष्ठम् । इतरत्कुड्यम् । अतोमित्यस्मादनन्तरमितराच्छन्दसीति वक्तव्यं नेतराच्छन्दसीति वचनं योगविभागार्थम् ॥ एकतरात्तु सर्वत्र छन्दसि भाषायां प्रतिषेध इष्यते ॥ एकतरं तिष्ठति । एकतरं पश्येति ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥

युष्मदस्मदित्येताभ्यामुत्तरस्य ङसोऽशित्ययमादेशो भवति । तव स्वम् । मम स्वम् । शित्करणं सर्वादेशार्थम् । अन्यथा ह्यादेशव्यपदेशप्रकृत्यर्थमादेरेव स्यात् ततश्च योचीत्येतच्च स्यात् ॥

ङे प्रथमयोरम् ॥ २८ ॥

ङे इत्यविभक्तिको निर्देशः । ङे इत्येतस्य प्रथमयोश्च विभक्त्योः प्रथमाद्वितीययोर्युष्मदस्मद्भ्यामुत्तरयोरमित्ययमादेशो भवति । तुभ्यं दीयते । मह्यं दीयते । प्रथमयोः । त्वम् । अहम् । युवाम् । आवाम् । यूयम् । वयम् । त्वाम् । माम् । युवाम् । आवाम् ॥

शसो न ॥ २९ ॥

युष्मदस्मद्भ्यामुत्तरस्य शसो नकारादेशो भवति । युष्मान् ब्राह्मणान् । अस्मान् । ब्राह्मणान् । युष्मान् ब्राह्मणीः । अस्मान् ब्राह्मणीः । युष्मान् कुलानि । अस्मान्कुलानि * ॥

भ्यसो भ्यम् ॥ ३० ॥

युष्मदस्मद्भ्यामुत्तरस्य भ्यसो भ्यमित्ययमादेशो भवति । युष्मभ्यं दीयते । अस्मभ्यं दीयते । भ्यमादेशे कृते शेषे लोपे च बहुवचने झल्ये-

* तस्माच्छसो नः पुंसीति सिद्धे स्त्रीनपुंसकार्थं वचनम् । अलिङ्गे वा युष्मदस्मदी । इत्यधिकं पुस्तकान्तरे ।

दित्येत्वं प्राप्नोति । तवद्भवत्तु पुनर्वृत्ताववधिर्निष्ठितस्येति न भवति । के चित्पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं कुर्वन्ति । येषां तु शेषे लोपष्टिलोपस्तेषामभ्यमादेश एव । उदात्तनिवृत्तिस्वरश्चादेरेव भवति ॥

पञ्चम्या अत् ॥ ३१ ॥

पञ्चम्या भ्यसो युष्मदस्मद्भ्यामुत्तरस्य अदित्ययमादेशो भवति । युष्मद्गच्छन्ति । अस्मद्गच्छन्ति ॥

एकवचनस्य च ॥ ३२ ॥

पञ्चम्या एकवचनस्य युष्मदस्मद्भ्यामुत्तरस्यादित्ययमादेशो भवति । त्वद्गच्छन्ति । मद्गच्छन्ति ॥

साम आकम् ॥ ३३ ॥

साम इति षष्ठीबहुवचनमागतसुट्कं गृह्यते । तस्य युष्मदस्मद्भ्यामुत्तरस्याकमित्ययमादेशो भवति । युष्माकम् । अस्माकम् । अथ किमर्थमागतसुट्को गृह्यते । नह्यादेशविधानकाले सुड्विद्यते । तस्यैव तु भाविनः सुटो निवृत्त्यर्थम् । आदेशे कृते हि शेषे लोपे युष्मदस्मदोरकारान्तत्वात्सुट् प्राप्नोति । स स्थानिन्यन्तर्भूतत्वान्निवर्तते । दीर्घोच्चारणं सवर्णदीर्घार्थम् । अकमि तु सति ह्रस्वकरणे तद्विधानसामर्थ्यादेव सवर्णदीर्घत्वं न प्राप्नोति । तत्सामर्थ्यमेत्वं प्रति भविष्यतीति । अकारकरणमेत्वनिवृत्त्यर्थमिति । अतो गुणे पररूपत्वं स्यात् ॥

आत औ णलः ॥ ३४ ॥

आकारान्ताद्धातोरुत्तरस्य णल औकारादेशो भवति । पपौ । तस्थौ । जग्लौ । मम्लौ । अचोत्वमेकादेशः स्थानिवद्भावो द्विर्वचनमित्यनेन क्रमेण कार्याणि क्रियन्ते । एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वादेकादेश इति ॥

तुह्योस्तातङाशिष्यन्यतरस्याम् ॥ ३५ ॥

तु हि इत्येतयोराशिषि विषये तातङादेशो भवत्यन्यतरस्याम् । जीवताद्भवान् । जीवतात्त्वम् । जीवतु भवान् । जीव त्वम् । ङित्करणं

गुणावृद्धिप्रतिषेधार्थमिति सर्वादेशस्तातङ् भवति । ङित्त्वाच्चास्य स्थानिवद्भावाद्ङित्त्वं प्राप्नोति तन्निवर्त्तते, ङिच्च पिच्च भवति । तेन ब्रुव ईडिति ब्रूतादुवानितोण न भवति । आशिषीति किम् । ग्रामं गच्छतु भवान् । गच्छ त्वम् ।

नातङि ङित्त्वं संक्रमकृत्स्यादन्त्यविधिश्चेत्तच्च तथा न ।
हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह ॥
तातङो ङित्त्वसामर्थ्याच्चायमन्त्यविधिः स्मृतः ।
न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः ॥

विदेः शतुर्वसुः ॥ ३६ ॥

विद ज्ञानइत्येतस्माद्धातोरुत्तरस्य शतुर्वसुरादेशो भवति । विद्वान् । विद्वांसौ । विद्वांसः । स्थानिवद्भावादुगित्कार्ये सिद्धे वसोरुकारकरणं वसोः संप्रसारणमित्यत्र क्वसोरपि सामान्यग्रहणार्थम् । एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येत्येतदपि न भवति । तथा सत्युकारकरणमनर्थकं स्यात् । अन्यतरस्यांग्रहणं के चिदनुवर्त्तयन्ति । विदन् । विदन्तौ । विदन्तः ॥

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ३७ ॥

समासेऽनञ्पूर्वे क्त्वा इत्येतस्य ल्यबित्ययमादेशो भवति । प्रकृत्य । प्रहृत्य । पार्श्वतःकृत्य । नानाकृत्य । द्विधाकृत्य । समासइति किम् । कृत्वा । हृत्वा । अनञ्पूर्वइति किम् । अकृत्वा । अहृत्वा । परमकृत्वा । उत्तमकृत्वा । अनञिति हि नञो ऽन्यदनञ् नञ्सदृशमव्ययं परिगृह्यते । तेन नञ् अनव्ययं चानञ् न भवति । स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल्ल्यबादेशो न भवति । अथ वा समासइति निर्द्धारणे सप्तमी । तेन क्त्वान्तः समास एव परिगृह्यते । स च येन विधिस्तदन्तस्येत्यनेन तदन्तविधिना, न तु कृद्ग्रहणे गतिकारकपूर्वस्यापीति । तथा चानञ्पूर्वइत्युच्यते । गतिकारकपूर्वस्यैव तु ग्रहणे सति नञ्पूर्वस्य प्रसङ्ग एव नास्ति । नञ्न गतिर्न च कारकमिति । प्रधाय प्रस्थायेत्यादिषु हिप्रभृतीनन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधतएवेति ज्ञापितम् ॥

Digitized by Google

क्त्वापि छन्दसि ॥ ३८ ॥

समासे ऽनञ्पूर्वे क्त्वा इत्येतस्य क्त्वा इत्ययमादेशो भवति अपिशब्दाल्ल्यबपि भवति छन्दसि विषये । कृष्णं वासो यजमानं परिधापयित्वा । प्रत्यञ्चमर्कं प्रत्यर्थयित्वा । ल्यबपि भवति । उद्धृत्य जुहोति । वा छन्दसीति नोक्तं सर्वोपाधिव्यभिचारार्थम् । तेनासमासे ल्यब्भवति । अर्च्य तान् देवान् गतः । छन्दोधिकार आज्जसेरसुगिति यावत् * ॥

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ३९ ॥

छन्दसि विषये सुपां स्थाने सु लुक् पूर्वसवर्ण आ आत् शे या डा ड्या याच् आल् इत्येते आदेशा भवन्ति । सु । अनृक्षरा ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते ॥ सुपां सुपो भवन्तीति वक्तव्यम् ॥ * ॥ धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते ॥ तिङां तिङो भवन्तीति वक्तव्यम् ॥ * ॥ चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । लुक् । आर्द्रे चर्मन् । लोहिते चर्मन् । चर्मणीति प्राप्ते । हविर्द्धाने † यत्सुन्वन्ति तत्सामिधेनीरन्वाह । यस्मिन्सुन्वन्ति तस्मिन्सामिधेनीरिति प्राप्ते । पूर्वसवर्णः । धीती । मती । सुष्टुती । धीत्या मत्या सुष्टुत्या इति प्राप्ते । आ । उभा यन्तारौ । उभौ यन्तारौ इति प्राप्ते । आत् । न ताद्ब्राह्मणाद् निन्दामि । न तान् ब्राह्मणानिति प्राप्ते । शे । न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती । यूयं वयमिति प्राप्ते । यूयादेशो वयादेशश्च छान्दसत्वान्न भवति । या । उरुया । धृष्णुया । उरुणा धृष्णुनेति प्राप्ते । डा । नाभा पृथिव्याम् । नाभौ पृथिव्यामिति प्राप्ते । ड्या । अनुष्ट्या च्यावयतात् । अनुष्टुभेति प्राप्ते । याच् । साधुया । साध्विति सोर्लुकि प्राप्ते । आल् । वसन्ता यजेत । वसन्तइति प्राप्ते ॥ इयाडियाजीकाराणामुपसंख्यानम् ॥ * ॥ इया । उर्विया परिधानम् । दार्विया । उरुणा दारुणेति प्राप्ते । डियाच् । सुक्षेत्रिया । सुगात्रिया । सुक्षेत्रिणा सुगात्रिणेति

* वा छन्दसीत्यारभ्य यावदित्यन्तः पाठः कुत्र चित्पुस्तके ऽस्ति ।

† हविर्धानायेति पाठान्तरम् ।

प्राप्ते । ईकारः । दृतिं न शुष्कं सरसी शयानम् । सरसि शयानमिति प्राप्ते ॥ आङ्याजयारामुपसंख्यानम् ॥ * ॥ आङ् । प्रबाहवा । प्रबाहुनेति प्राप्ते । अयाच् । स्वप्नया सच सेवनम् । स्वप्नेनेति प्राप्ते । अयार् । सिन्धुमिव नावया । नावेति प्राप्ते * ॥

अमो मश् ॥ ४० ॥

अम् इति मिबादेशो गृह्यते । तस्य छन्दसि विषये मशादेशो भवति । वधीं वृत्रम् । क्रमीं वृक्षस्य शाखाम् † । लुङि बहुलं छन्दस्यमाङ्योगेपीत्यडागमाभावः । शित्करणं सर्वादेशार्थम् । मकारस्यापि हि मकारवचनमनुस्वारनिवृत्त्यर्थं स्यात् ॥

लोपस्त आत्मनेपदेषु ॥ ४१ ॥

आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति । देवा अदुह्र । गन्धर्वाप्सरसो अदुह्र । अदुह्रतेति प्राप्ते । दुहामश्विभ्यां पयो अघ्न्येयम् । दुग्धामिति प्राप्ते । दक्षिणतः शये । शेतइति प्राप्ते । अपीत्यधिकाराच भवति । नत्र आत्मानमनृतं कुरुते । आत्मनेपदेष्विति किम् । वत्सं दुहन्ति कलशं चतुर्बिलम् ॥

ध्वमो ध्वात् ॥ ४२ ॥

छन्दसि विषये ध्वमो ध्वादित्ययमादेशो भवति । अन्तरेवोष्माणं वारयध्वात् । वारयध्वमिति प्राप्ते ॥

यजध्वैनमिति च ॥ ४३ ॥

यजध्वमित्येतस्य एनमित्येतस्मिन्परतो मकारलोपो निपात्यते वकारस्य च यकारश्छन्दसि विषये । यजध्वैनं प्रियमेधाः । यजध्वमेनमिति प्राप्ते ॥

---

* अयारिति रेफ उपोत्तमं रितीत्युपोत्तमस्योदात्तार्थः । अधिकोयं पाठ एकस्मिन् पुस्तके ।

† अवधिषमक्रमिषमिति प्राप्ते । इत्यधिकं पुस्तकान्तरे ।

तस्य तात् ॥ ४४ ॥

तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने तादित्ययमादेशो भवति । गात्रंगात्रमस्या नूनं कृणुतात् । कृणुतेति प्राप्ते । ऊवध्ये गोहं पार्थिवं खनतात् । खनतेति प्राप्ते । अस्मारथः संसृजतात् । संसृजतेति प्राप्ते । सूर्ये चक्षुर्गमयतात् । गमयतेति प्राप्ते ॥

तप्तनप्तनथनाश्च ॥ ४५ ॥

तस्येति वर्त्तते । छन्दसि विषये तस्य स्थाने तप् तनप् तन थन इत्येते आदेशा भवन्ति । तप् । शृणोत यावाणः । शृणुतेति प्राप्ते । सुनोत । सुनुतेति प्राप्ते । तनप् । संवरत्रा दधातन । धत्तेति प्राप्ते । तन । जुजुष्टन । जुषतेति प्राप्ते । छान्दसत्वात् श्लुः । थन । यदिष्ठन । यदिच्छतेति प्राप्ते । पित्करणमङित्त्वार्थम् ॥

इदन्तो मसि ॥ ४६ ॥

छन्दसि विषये मसित्ययं शब्द इकारान्तो भवति । मसः सकारान्तस्य इकारागमो भवति स च तस्यान्तो भवति, तद्ग्रहणेन गृह्यत इत्यर्थः । पुनस्त्वां दीपयामसि । दीपयाम इति प्राप्ते । शलभं भञ्जयामसि । भञ्जयाम इति प्राप्ते । त्वयि रात्रिं वासयामसि । वासयाम इति प्राप्ते ॥

क्त्वो यक् ॥ ४७ ॥

क्त्वा इत्येतस्य यगागमो भवति छन्दसि विषये । दत्वाय सविता धियः । दत्वेति प्राप्ते । क्त्वापिच्छन्दसीत्यस्यानन्तरमिदं कस्मान्नोच्यते । समासइति तत्रानुवर्त्तते ॥

इष्ट्वीनमिति च ॥ ४८ ॥

इष्ट्वीनमित्ययं शब्दो निपात्यते छन्दसि विषये । यजेः क्त्वाप्रत्ययान्तस्य ईनमादेशोऽन्त्यस्य निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा देवानिति प्राप्ते ॥ पीत्वीनमित्यपीष्यते ॥ चकारस्यानुक्तसमुच्चयार्थत्वात्सिद्धम् ॥

स्नात्व्यादयश्च ॥ ४९ ॥

Digitized by Google

स्नात्वी इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये। स्नात्वी मलादिव। स्नात्वेति प्राप्ते। पीत्वी सोमस्य वावृधे। पीत्वेति प्राप्ते। प्रकारार्थोयमादिशब्दः ॥

आज्जसेरसुक् ॥ ५० ॥

अवर्णान्तादङ्गादुत्तरस्य जसेरसुगागमो भवति छन्दसि विषये। ब्राह्मणासः पितरः सोम्यासः। ब्राह्मणाः सोम्या इति प्राप्ते। ये पूर्वासो यउपरास इत्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानाच्छीभावः प्राप्तः। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न भवति ॥

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ५१ ॥

छन्दसीत्यतः प्रभृति निवृत्तम्। अश्व क्षीर वृष लवण इत्येतेषामङ्गानामात्मप्रीतिविषये क्यचि परतो ऽसुगागमो भवति। अश्वस्यति वडवा। क्षीरस्यति माणवकः। वृषस्यति गौः। लवणस्यत्युष्ट्रः। आत्मप्रीताविति किम्। अश्वीयति। क्षीरीयति। वृषीयति। लवणीयति ॥ अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् ॥ * ॥ क्षीरलवणयोर्लालसायामिति वक्तव्यम् ॥ * ॥ तृष्णातिरेको लालसा। अन्यत्रात्मप्रीतावपि न भवति। अपर आह ॥ सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः ॥ * ॥ दध्यस्यति, मध्वस्यति, इत्येवमाद्यर्थम्। अपर आह ॥ सुग्वक्तव्यः ॥ * ॥ दधिस्यति, मधुस्यति, इत्येवमाद्यर्थम् ॥

आमि सर्वनाम्नः सुट् ॥ ५२ ॥

आदिति वर्त्तते। अवर्णात्सर्वनाम्न उत्तरस्यामः सुडागमो भवति। सर्वेषाम्। विश्वेषाम्। येषाम्। तेषाम्। सर्वासाम्। यासाम्। तासाम्। आदित्येव। भवताम्। आमीति षष्ठीबहुवचनं गृह्यते, न ङेराम् नद्याम्नीभ्य इति, तस्य हि परत्वाड्याडयाट्स्याटो भवन्ति। यश्च ग्रामामुः, आमश्च लिटि न तौ सर्वनाम्नः स्तः। सानुबन्धकाविति वा न गृह्येते। आमीति सप्तमीनिर्देश उत्तरार्थः। इह तु सर्वनाम्न इति पञ्चमीनिर्देशात्तस्मादित्युत्तरस्येति षष्ठीप्रकॢप्तिर्भविष्यति ॥

Digitized by Google

त्रेस्त्रयः ॥ ५३ ॥

त्रि इत्येतस्य आमि परे त्रय इत्ययमादेशो भवति । त्रयाणाम् ॥ त्रीणामित्यपि छन्दसीष्यते ॥ त्रीणामपि समुद्राणामिति ॥

ह्रस्वनद्यापो नुट् ॥ ५४ ॥

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चोत्तरस्यामो नुडागमो भवति । ह्रस्वान्तात्तावत् । वृक्षाणाम् । प्लक्षाणाम् । अग्नीनाम् । वायूनाम् । कर्तॄणाम् । * नद्यन्तात् । कुमारीणाम् । किशोरीणाम् । गौरीणाम् । शार्ङ्गरवीणाम् । लक्ष्मीणाम् । ब्रह्मबन्धूनाम् । वीरबन्धूनाम् । आबन्तात् । खट्वानाम् । मालानाम् । बहुराजानाम् । कारीषगन्ध्यानाम् ॥

षट्चतुर्भ्यश्च ॥ ५५ ॥

षट्संज्ञकेभ्यश्चतुःशब्दाच्चोत्तरस्यामो नुडागमो भवति । षण्णाम् । पञ्चानाम् । सप्तानाम् । नवानाम् । दशानाम् । चतुर्णाम् । रेफान्तायाः संख्यायाः षट्संज्ञा न विहिता । षड्भ्यो लुगिति लुग् मा भूत् । बहुवचननिर्देशादत्र संख्याप्रधानस्य ग्रहणं भवति । परमषण्णाम् । परमपञ्चानाम् । परमसप्तानाम् । परमचतुर्णाम् । उपसर्जनीभूतायास्तु संख्याया न भवति । प्रियषषाम् । प्रियपञ्चाम् । प्रियचतुरामिति ॥

श्रीग्रामण्योश्छन्दसि ॥ ५६ ॥

श्री ग्रामणी इत्येतयोश्छन्दसि विषये आमो नुडागमो भवति । श्रीणामुदारो धरुणो रयीणाम् । अप्यत्र सूतग्रामणीनाम् । श्रीशब्दस्य वामीति विकल्पेन नदीसंज्ञा तत्र नित्यार्थं वचनम् । सूतग्रामणीनामिति यदा सूताश्च ते ग्रामण्यश्च सूतग्रामण्यो भवन्ति तदर्थमिदं वचनम् । यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि । सूतग्रामणि च सूतग्रामणि च सूतग्रामणि चेति सूतग्रामणीनामिति, तदा ह्रस्वादित्येव सिद्धम् ॥

गोः पादान्ते ॥ ५७ ॥

गो इत्येतस्मादृक्पादान्ते वर्त्तमानादुत्तरस्यामो नुडागमो भवति ।

* कर्तृणामित्यपि बहुषु पुस्तकेष्वस्ति ।

Digitized by Google

विद्माहि त्वा सत्पतिं शूरगोनाम् । पादान्तइति किम् । गवां गोत्रमुदसृजो यदङ्गिरः । सर्वे विधयश्छन्दसि विकल्प्यन्तइति पादान्तेपि क्वचिन्न भवति । हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥

इदितो नुम् धातोः ॥ ५८ ॥

इदितो धातोर्नुमागमो भवति । कुडि । कुण्डिता । कुण्डितुम् । कुण्डितव्यम् । हुडि । हुण्डिता । हुण्डितुम् । हुण्डितव्यम् । कुण्डा । हुण्डा । इदित इति किम् । पचति । पठति । अयं धातूपदेशावस्थायामेव नुमागमो भवति, कुण्डा हुण्डेति गुरोश्च हल इत्यकारप्रत्ययो यथा स्यात् । तथाहि धिन्विकृण्व्योर चेति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणम् । धातुग्रहणं चेह क्रियते धातूपदेशकालएव नुमागमो यथा स्यादित्येवमर्थम् । तासिसिचोरिदित्कार्यं नास्तीत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते । अमंस्तेत्येवमादौ हि हनः सिजिति कित्त्वविधानसामर्थ्याचकारलोपो न भवति । मन्तेत्यत्राप्यसिद्धवदत्राभादिति टिलोपस्यासिद्धत्वान्नलोपो न भवति इह कस्मान्न भवति । भेत्ता छेत्तेति । इरितां समुदायस्येत्संज्ञेतीदित्त्वं नास्ति । अवयवशो पीत्संज्ञायां सत्यां गोः पादान्तइतोन्तग्रहणमनुवर्त्तयितव्यम् । तेनान्तेदितो धातवो गृह्यन्ते ॥

शे मुचादीनाम् ॥ ५९ ॥

शे प्रत्यये परतो मुचादीनां नुमागमो भवति । मुच्लृ । मुञ्चति । लुप्लृ । लुम्पति । विद्लृ । विन्दति । लिपि । लिम्पति । सिच् । सिञ्चति । कृती । कृन्तति । खिद । खिन्दति । पिश । पिंशति । शे इति किम् । मोक्ता । मोक्तुम् । मोक्तव्यम् । मुचादीनामिति किम् । तुदति । नुदति ॥ शे तृम्फादीनामुपसंख्यानं कर्त्तव्यम् ॥ * ॥ के पुनस्तृम्फादयः । तृफ तृम्फ तृप्तौ । दृफ दृम्फ उत्क्लेशे । गुफ गुम्फ ग्रन्थे । उभ उम्भ पूरणे । शुभ शुम्भ शोभार्थे, इत्यत्र ये सानुषङ्गास्तृम्फादय,स्तेषामनिदितां हल उपधायाः क्ङितीत्यनुनासिकलोपे कृते नुम्विधीयते । स च विधानसामर्थ्यान्न लुप्यते । तृम्फति । दृम्फति । गुम्फति । उम्भति । शुम्भति । ये तु निरनुषङ्गास्तेषां तृफति दृफति गुफति उभति शुभतीत्येवं भवति ॥

Digitized by Google

मस्जिनशोर्झलि ॥ ६० ॥

मस्जि नशि इत्येतयोरङ्गयोर्झलादौ प्रत्यये नुमागमो भवति । मङ्क्ता । मङ्क्तुम् । मङ्क्तव्यम् । नंष्टा । नंष्टुम् । नंष्टव्यम् । झलीति किम् । मज्जनम् । नशिता ॥ मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गादिलोपार्थम् ॥ मग्नः । मग्नवान् ॥

रधिजभोरचि ॥ ६१ ॥

रधि जभि इत्येतयोरजादौ प्रत्यये नुमागमो भवति । रन्धयति । रन्धकः । साधुरन्धी । रन्धो वर्त्तते । जम्भयति । जम्भकः । साधुजम्भी । जम्भंजम्भम् । जम्भो वर्त्तते । परापि सती वृद्धिर्नुमा बाध्यते नित्यत्वात् । अचीति किम् । रद्धा । जभ्यम् ॥

नेट्यलिटि रधेः ॥ ६२ ॥

इडादावलिटि प्रत्यये परे रधेर्नुमागमो न भवति । रधिता । रधितुम् । रधितव्यम् । इटीति किम् । रन्धनम् । रन्धकः । अलिटीति किम् । ररन्धिव । ररन्धिम । नुमि कृते संयोगान्तत्वादसंयोगाल्लिट्कविति कित्त्वं नास्तीति नलोपो न भवति । अथ क्वसौ कथं भवितव्यं, रेधिवानिति । कथमेत्वाभ्यासलोपयोः कृतयोरिडागमः क्रियते ततो नुमागमस्तस्योपदेशिकत्वाश्रयो लोपः । अथ इटि लिटीत्येवं नियमः कस्मान्न क्रियते लिट्येवेटि नान्यत्रेति । विपरीतमप्यवधारणं संभाव्यते इट्येव लिटि नान्यत्रेति । तथा हि सति ररन्धेत्यत्र न स्यात्, रधितेत्यत्र च स्यादेव ॥

रभेरशब्लिटोः ॥ ६३ ॥

रभेरङ्गस्य शब्लिड्वर्जिते ऽजादौ प्रत्यये परतो नुमागमो भवति । आरम्भयति । आरम्भकः । साध्वारम्भी । आरम्भमारम्भम् । आरम्भो वर्त्तते । अशब्लिटोरिति किम् । आरभते । आरेभे । अचीत्येव । आरब्धा ॥

लभेश्च ॥ ६४ ॥

लभेश्चाजादौ प्रत्यये शब्लिड्वर्जिते नुमागमो भवति । लम्भयति ।

Digitized by Google

लम्भकः । साधुलम्भी । लम्भंलम्भम् । लम्भो वर्त्तते । अशब्लिटोरित्येव । लभते । लेभे । अचीत्येव । लब्धा । लभेश्च पृथग्योगकरणमुत्तरार्थम् ॥

आङो यि ॥ ६५ ॥

आङ उत्तरस्य लभेर्यकारादिप्रत्ययविषये नुमागमो भवति । आलम्भ्या गौः । आलम्भ्या वडवा । प्राक्प्रत्ययोत्पत्तेर्नुमि कृते विहतमदुपधत्वमिति ऋहलोर्ण्यदिति ण्यत्प्रत्ययस्तत्र कृदुत्तरपदप्रकृतिस्वरत्वेनान्तस्वरत्वेनान्तस्वरितत्वं भवति । यति तु पुनरुत्तरपदाद्युदात्तत्वं स्यात् । आङ इति किम् । लभ्यः * । कथमग्निष्टोम आलभ्य इति । सर्वे विधयश्छन्दसि विकल्प्यन्ते । अथ वा आलभ्य इत्यत्र नुमि कृते ऽनुषङ्गलोपः क्रियते ॥

उपात्प्रशंसायाम् ॥ ६६ ॥

उपादुत्तरस्य लभेः प्रशंसायां गम्यमानायां यकारादिप्रत्ययविषये नुमागमो भवति । उपलम्भ्या भवता विद्या । उपलम्भ्यानि धनानि । ण्यत्प्रत्ययान्तत्वादन्तस्वरितत्वमेव । प्रशंसायामिति किम् । उपलभ्यमस्माद्वृषलात्किं चित् । पोरदुपधत्वाद्यत्प्रत्ययान्तमिदम् ॥

उपसर्गात्खल्घञोः ॥ ६७ ॥

उपसर्गादुत्तरस्य लभेः खल्घञोः परतो नुमागमो भवति । ईषत्प्रलम्भः । सुप्रलम्भः । दुष्प्रलम्भः । घञि । प्रलम्भो, विप्रलम्भः । सिद्धे सत्यारम्भो नियमार्थः । उपसर्गादेव लभेः खल्घञोः परतो नुमागमो भवति, नान्यत्र । ईषल्लभः । लाभो वर्त्तते ॥

न सुदुर्भ्यां केवलाभ्याम् ॥ ६८ ॥

सु दुरित्येताभ्यां केवलाभ्यामन्योपसर्गरहिताभ्यामुपसृष्टस्य लभेः खल्घञोः परतो नुमागमो भवति । सुलभम् । दुर्लभम् । घञि । सुलाभो दुर्लाभः । केवलाभ्यामिति किम् । सुप्रलम्भः । दुष्प्रलम्भः । सुदुर्भ्यामिति

* अदुपधत्वाद्यत्प्रत्ययान्तमेतत् । यीति किम् । आलब्धा । इत्यधिकमेकस्मिन्पुस्तके ।

तृतीयां मत्वा केवलग्रहणं क्रियते । पञ्चम्यां हि व्यवहितत्वादेवाप्रसङ्गः । अतिसुलभमित्यत्र कर्मप्रवचनीयत्वादतेः केवल एव सुशब्द उपसर्ग इति भवति प्रतिषेधः । यदा त्वतिशब्दो न कर्मप्रवचनीयस्तदा नुम्भवत्येवा-तिसुलम्भ इति । पञ्चमीनिर्देशपक्षेप्येवमर्थं केवलग्रहणं कर्त्तव्यम् ॥

विभाषा चिण्णमुलोः ॥ ६९ ॥

चिण् णमुल् इत्येतयोर्विभाषा लभेर्नुम्भवति । अलाभि । अलम्भि । लाभम् २ । लम्भम् २ । व्यवस्थितविभाषा चेयं, तेनानुपसृष्टस्य विकल्प, उपसृष्टस्य नित्यं नुम्भवति । प्रालम्भि । प्रलम्भम् ॥

उगिदचां सर्वनामस्थानेऽधातोः ॥ ७० ॥

उगितामङ्गानां धातुवर्जितानामञ्चतेश्च सर्वनामस्थाने परतो नुमागमो भवति । भवत् । भवान् । भवन्तौ । भवन्तः । श्रेयसुन् । श्रेयान् । श्रेयांसौ । श्रेयांसः । शतृ । पचन् । पचन्तौ । पचन्तः । अञ्चतेः । प्राङ् । प्राञ्चौ । प्राञ्चः । उगिदचामिति किम् । दृषत् । दृषदौ । दृषदः । सर्वनामस्थानइति किम् । भवतः पश्य । श्रेयसः पश्य । अञ्च-तिग्रहणं नियमार्थम्, अञ्चतेरेव धातोरन्यस्य मा भूत् । उखास्रत् । पर्णध्वत् । अधातोरिति किम् । अधातुभूतपूर्वस्य यथा स्यात् । गोमन्तमि-च्छति गोमत्यति, गोमत्यतेरप्रत्ययः, गोमान् । अत्र हि धातुत्वादञ्च-तिग्रहणाच्च स्यात् ॥

युजेरसमासे ॥ ७१ ॥

युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति । युङ् । युञ्जौ । युञ्जः । असमासइति किम् । अश्वयुक् । अश्वयुजौ । अश्वयुजः । युजे-रितीकारनिर्देशाद् युज समाधावित्यस्य ग्रहणं न भवति । युजमापन्ना ऋषयः ॥

नपुंसकस्य झलचः ॥ ७२ ॥

नपुंसकस्य झलन्तस्याजन्तस्य च सर्वनामस्थाने परतो नुमागमो भवति । उदश्वित्न्ति । शकृन्ति । यशांसि । पयांसि । अजन्तस्य । कु-

कुण्डानि। वनानि। त्रपूणि। जतूनि। नपुंसकस्येति किम्। अग्निचिद्ब्राह्मणः। झलच इति किम्। बहुपुरि। बहुधुरि। विमलदिवि। चत्वारि। अहानि। उगितो झलन्तस्य नपुंसकस्य परत्वादनेनैव नुम्भवति। श्रेयांसि भूयांसि कुर्वन्ति। ऊर्जन्ति ब्राह्मणकुलानि॥ बहूर्जि प्रतिषेधो वक्तव्यः॥ * ॥ बहूर्जि ब्राह्मणकुलानि॥ अन्त्यात्पूर्वं नुममेकइच्छन्ति॥ बहूर्ञ्जि ब्राह्मणकुलानि॥

इकोऽचि विभक्तौ॥ ७३॥

इगन्तस्य नपुंसकस्याङ्गस्याजादौ विभक्तौ नुमागमो भवति। त्रपुणी। जतुनी। तुम्बुरुणी। त्रपुणे। जतुने। तुम्बुरुणे। इक इति किम्। कुण्डे। पीठे। अज्ग्रहणमुत्तरार्थम्। यद्येवं, तत्रैव कर्त्तव्यम्। इह तु करणे एतत्प्रयोजनं हे त्रपो इत्यत्र नुम् मा भूदिति, न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः स्यात्। ननु च न लुमताङ्गस्येति प्रत्ययलक्षणे प्रतिषिद्धे विभक्तिरेव नास्ति। एतदेवाज्ग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधोऽत्र न भवतीति। तथा च संबुद्धिगुणः क्रियते। विभक्ताविति किम्। तौम्बुरवं चूर्णम्।

इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम्।
स्वरो वै श्रूयमाणोऽपि लुप्ते किं न भविष्यति॥
रायात्वं तिसृभावश्च व्यवधानादुमा अपि।
नुड् वाच्य उत्तरार्थं तु इह किं चित्रपो इति॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य॥

॥ चतुर्दशस्तबकावशेषः॥

एवं सति मदकलकलविङ्कीकुलकलकमनीयझङ्कारिकङ्कणमुखरकरकमलमुन्नीय भुजमृणालदण्डमुद्दन्तमुद्दण्डितहृदयाभिरबलाभिरभिरम्यमभितोऽभितोऽभिहन्यमानः प्रणयितमाबलाबलात्कारसुखचमत्कारकारणकरणकलहे पराजयं जयं मन्यमानो मानोचितं चरितं

नाचरन्निव साचहित्थमित्थमिन्दुमुखो बिम्लानिमिवाभिनयन् यदि ववमुपरतपरतरप्रभावो बभूव ॥ २१५ ॥

मदकलानां मत्तानां कलविङ्कीनां चटकस्त्रीणां कुलस्य कलात्॰ मधुरास्फुटध्वनितोऽपि कमनीयझङ्कारवता कङ्कणेन मुखरं करकमलम्॰ उपोय॰ उत्थाप्य । कथंभूतम्, भुज एव मृणालदण्डो यस्य तत् । अभि-रम्यं यथा स्यात् तथा हन्यमानः सन्, प्रशंसितमा या॰ प्रबला तत्कर्तृको बलात्कार एव सुखचमत्कारस्य कारणं यत्र तथाभूते रणकलहे पराजय-मेव जयं मन्यमान इति, स्वपराजये सत्येव तद्बलात्कारसोऽलभ्यात्, अत एव मानोचितमहंकारयोग्यं चरितं पूर्ववद् बलात्कारं न कुर्वन् । साव-हित्थमिति निजासामर्थ्यज्ञापनम्, बिम्लानिमिति विशिष्टा स्वम्लानिरेव बहुखेलनश्रमोद्भूता तत्र हेतुरिति ज्ञापयितुमित्यर्थः । सर्वेषामेव कृत्रिम-त्वात्॰ इवकारः ॥ २१५ ॥

तदा ।

काचिद्दुंशीमपहृतवती कापि पानीययन्त्रं
काचित् पौष्पं धनुरनुपमं बाणजालं च काचित् ।
अप्यन्यस्यां कुतुककलया मण्डनान्याहरन्त्यां
भ्रूभङ्गेन स्मितसुरुचिना राधिका बाधिकासीत् ॥ २१६ ॥

भ्रूभङ्गेनेति, मण्डनोत्तारणनिषेधकं स्वभ्रूभङ्गं श्रीकृष्णं दर्शयित्वा तस्मै महापराजयदुःखदानार्थमिव स्वकाठिण्यं व्यञ्जयति स्म ॥ २१६ ॥

ततस्तु ।

स्वाञ्चलेन घुसृणादिकपङ्कान्
स्वेदवारि च शनैः व्यपयन्त्या ।
यत् पपे मधुरिमास्य दृशा त-
द्बोरपानमिव जातममुष्याः ॥ २१७ ॥

स्वाञ्चलेनेत्यादि, स्वेन पराजिते प्रतियोद्धरि स्वयमेव कृपया तत्संधुक्षणमयपरिचरणादिकं तस्यैवातिलज्जाविडम्बनकरमिति प्रकटार्थो व्यञ्जितः, वस्त्वर्थश्च तन्निषेधो निःशङ्कतया स्वमनोरथसाफल्यसंपादनमेव । भूते भविष्यति वा रणे योधानां मध्वादिपानं वीरपानम् ॥ २१७ ॥

पुनश्च ।

आकृष्य सख्याः करपद्मकोशात्
ताम्बूलवीटीः स्वयमाशयन्ती ।
भ्रूभङ्गिसङ्गीङ्गितविस्मया तं
सा श्यामयावीविजदात्मनाथम् ॥ २१८ ॥

अवीविजत्, वीजनं कारयामास ॥ २१८ ॥

एतस्मिन्नेवावसरे स रेणुरूषिततिरश्चीनीकृतावटु वटुरवलोक्य विरचितोत्साहसाहसिक्यमुच्चैःस्वरं जगर्ज गर्जदम्बुवाह इव ॥ २१९ ॥

स वटुः । रेणिवति क्रियाविशेषणम् । विरचित उत्साहो यत्र तथाभूतं साहसिक्यं सहसा प्रवर्तनं यत्र तद्यथा स्यात् तथा ॥ २१९ ॥

हो हो जितमस्माभिर्यदियं सर्वोत्तमानन्तमाहात्म्या भो वयस्यवृषभा वृषभानुसुता सुतानितगर्वापि पराजिता राजितारं विजयमहसा महसालसं प्रियवयस्यमस्माकं स्माकम्पितानुगृहीतदास्यरसेव सेवते ॥ २२० ॥

भो वयस्यवृषभा हे सखिश्रेष्ठाः सुबलादयः । विजयतेजसा राजितारं दीप्तिमन्तम् । महासः निजोत्सवात् सालसं "स्वप्नेऽपि पश्यमी," तं प्राप्येत्यर्थः । स्मेत्यवधारणे, अकम्पिता निश्चला एव सतीत्यर्थः ॥ २२० ॥

किमतः परं कौतुकम्, उचितमेवेतत्, यस्य मया धौवचिवता वताङ्गीक्रियते तस्य कथं पराजयो राजयो हि जयसंपदामेवेति परमतृप्तः सुखभुजा भुजावुद्यम्य नरीनृत्यते स्म ॥ २२१ ॥

धीसचिवता मन्त्रित्वम् । वत हर्षे । राजयः श्रेणयः । सुखस्य भुक् भोगस्तया, सुखानुभवेन हेतुनेत्यर्थः ॥ २२१ ॥

तस्य तया प्रतिभयोभयोरेव पक्षयोरक्षयो रभसः समजनि ॥ २२२ ॥

तया प्रतिभया, भयाडवबुल्गननटनादिमय्या । उभयोरेव पक्षयोः । रभसो हर्षः ॥ २२२ ॥

समजनितसंतोषया देव्यापि वार्षभानव्या नव्या हारयष्टिः प्रसादीचक्रे ॥ २२३ ॥

सममन्यूनं यथा स्यात् तथा जनितहर्षया ॥ २२३ ॥

इत्येवं चिरविहरणरणपरिश्रमालसलसद्वसाद्दसादरसेव्यमानवपुषां तेषां तासां च माधुरीधुरीणतात्कालिकरुचिररुचिरसतरङ्गमालोक्य वनदेवता देवता च सा मातङ्गी संगीतस्य सात्मश्लाघमुल्लाघमुल्लाघवाभावतो भावतोऽपि सहत्वादुत्सवविराममेवाभिराममेवाभिरुचितं मन्यन्ते स्म ॥ २२४ ॥

माधुरीधुरीणश्च तात्कालिकस्तत्कालभवश्च रुचिरा रुचिः प्रीतिर्यतः स च यो रसतरङ्गस्तं तेषां तासां चालोक्य· उत्कृष्टो यो लाघवस्याभावः परमश्रेष्ठ्यं ततो हेतोः· तस्यामेव शोभायां पर्यवसानाकाङ्क्षया· इत्यर्थः· सहत्वाद् भावतः प्रेमतश्च परिश्रमदर्शनाच्चेत्यर्थः· वनदेवता वृन्दाख्या: संगीतस्य देवता मातङ्गी च· उत्सवस्य विराममेव· अभिराममेव रम्यमेवाभिरुचितं मन्यन्ते स्म । उल्लाघं निरामयं, निर्विघ्नमित्यर्थः, रसतरङ्गस्य विरामस्य वा विशेषणम् ॥ २२४ ॥

विश्रान्ते च तस्मिन् वसन्तोत्सवे स वेणुपाणिः सह सहचरैर्मिलितोऽलितोषझङ्कारमुखरवनमालो वनमालोतमच्छायामवलम्ब्य नवमधुमहामहानन्दभरोद्गारपरिमलेन विरचयन्नितरेतरतरलिमानमानन्द ॥ २२५ ॥

अलीनां तेषां झङ्कारेण हर्षशब्देन मुखरा वनमाला यस्य सः, वनमालेयं नव्या, तदाकल्पनिर्माणसमये श्रीराधयैव स्वहस्तेनार्पिता ज्ञेया, पूर्वस्याः खेलनवेगच्छिन्नभिन्नत्वात् । नवमधोर्नव्यवसन्तस्य महामहो महानुत्सवस्तत्रानन्दभरस्य खेलापरिपाटीजनितस्य· उद्गारस्तत्तदनुकथनं स एव परिमलस्तेन· इतरेतरस्य तरलिमानं गाम्भीर्यरक्षणासामर्थ्यं विरचयन् सर्वानानन्द· आनन्दं प्राप ॥ २२५ ॥

सा च सकला सकलाभीरकिशोरीशोरीकृतखेलनविरामा रामानुजसङ्गसंगतपरमानन्दनन्दथुमालिमालिकाभिः सह सहर्षमनुभवन्ती स्वरमणरमणमाकन्दमाकन्दकन्दलितवासन्तीमण्डपकृतविश्रामा मातङ्गीवर्गमाहूय सबहुमानमानम्य पारितोषिकतोषिकमनीयमनसं कारयित्वा विसर्जयामास ॥ २२६ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे वसन्तोत्सवो नाम चतुर्दशः स्तबकः ॥ १४ ॥ :: :: ॥

सकलानामाभीरकिशोरीणाम्· ईशा श्रीराधापि सा रामानुजस्य सङ्गेन संगतस्य परमानन्दस्य नन्दथुं समृद्धिम्· अनुभवन्ती तत्तत्खेलाकौतुकोद्गारेणास्वादयन्ती स्वरमणस्य श्रीकृष्णस्य रमणमा विहारसंपत्तिः सैव कं सुखं तद्ददातीति स चासौ माकन्देन कन्दलितश्च यो वासन्तीमण्डपस्तत्रैव कृतो विश्रामो यया सा । तेन वनदेवतोपनीतविविधमधुरफलभोजनानन्तरं सुप्तेषु निजसहचरगणेषु तत्र आगतस्य कृष्णस्य तया सह नियतविहारोऽपि व्यञ्जितः ॥ २२६ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तन्यां चतुर्दशस्तबकसंगमनम् ॥ १४ ॥ :: :: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकारम्भः ॥

इत्येवंविधेन विविधेन विलासेनानाविलासेनानाविष्कृतवैमुख्येन मुख्येन वृन्दावनान्तरङ्गिणा रङ्गिणामग्रणी रसवामूढानूढादिभिराभी रराजाभीरराजात्मजोऽयं तिथीः कतिथीः कलानिधिरिव ताराभिराभिराम्येण ॥ १ ॥

देवेन्द्रपर्वमदखण्डनकृद्गिरीन्द्रपर्वातिगर्वभरतः कृतगोष्ठरक्षः ।
सिद्धैर्नुतः स्वजनविस्मयभृत् सुरेशैः स्तुत्वाभ्यषिच्यत स पञ्चदशे गवेन्द्रः ॥

आभीरराजात्मजः कतिथीः कियतीनां वसन्तोत्सवसंबन्धिनीनां पूर्णीस्तिथीर्व्याप्य ताराभिः सह कलानिधिरिव आभिरूढानूढादिभिः सुन्दरीभिः रराज राजते स्म । आदिशब्दात् तत्तत्परिवाराणां स्वनर्मसखानामपि ग्रहणम् । अनाविलासेन अनाविलो निर्मलः आसः शोभा यतस्तेन, "आस दीप्तौ" । अत एव न आविष्कृतं वैमुख्यमलंबुद्धिर्यत्र तेन । वृन्दावनान्तर्वृन्दावनमध्ये अङ्गिना उपयुक्तबहुङ्गसहितेन । अभिरामस्य भाव आभिराम्यम् ॥ १ ॥

वासरे तु सह सहचरसमुदयेन स मुदयेन गोत्रा गोचारणकौतुकेन कुमारयामास मारयामास च कदाचिदमरद्विषो विद्विषोपमान् ॥ २ ॥

गोचारणमेव कौतुकं तेन, गोत्रा गां पृथिवीमञ्चता, रसेनानुरागेण, मुदाम् आनन्दानाम् अयः प्राप्तिर्यत्र तेन । विद्विषोपमान् विदां विदुषां विषोपमान् ॥ २

ततः परमनिर्वृतानेकदानेकदाक्षिण्यदयावतो यावतो बल्लवान् बल्लवराजमुख्यानभिमुख्यानभिशतमखमखमखण्डसमारम्भानरं भानवतो नवतोषाननेकप्रकारां सामग्रीमग्रीयामाहरतो विलोक्य वयोवृद्धावृद्धानादाय कृतसभं सभङ्गि पितरमुवाच श्रीकृष्णः ॥ ३ ॥

एकदा· एकस्मिन् समये वल्लवराजमुखात् यावतो वल्लवान्· अभिशतमखमखं शतमखस्य· इन्द्रस्य मखं यज्ञं लक्षीकृत्य· अखण्डसमारम्भात्· अभिमुखान् स्वसंमुखानवलोक्य श्रीकृष्णः सभङ्गि यथा स्यात् तथा पितरम्· उवाच । कथंभूतान्, परमेनिर्वृतान्· अतिहृष्टान्, ननु प्रतापादाविव तत्र यन्त्रितानित्यर्थः । अनेकदाचिग्ययदयावतः· बहुतरसारल्येन कृपालून्, सर्वजनसुखवासार्थमिति भावः । अरम्· अतिशयेन भानं दीप्तिस्तद्वतः । यतो नवतोषान्· उत्सवागमनहेतुकेन नवीनहर्षेणापि युक्तान् । अग्रीयां श्रेष्ठाम् । पितरं कथंभूतं, वयोवृद्धो·वृद्धान् समृद्धान् जनानादाय कृता सभा येन तम् ॥ ३ ॥

आर्यपादाः किंनामायं महो महोदारः कास्य वा देवता . वतास्य को वाचार्यो वाचार्योऽस्य कं वा विधिमधिमन्यध्वे किंप्रयोजनोऽयं जनो यन्त्रित इव सर्वतो धावति मेधावति मे हृदये किमपि न प्रतिभाति प्रतिभातिरेको हि वर्षीयसामेव ॥ ४ ॥

महोदारो महामहिमवान् । वाचा· आर्यः प्रमाणवचनकः । मे मम मेधावति मेधायुक्ते हृदये । ननु “परेङ्गितज्ञानफला हि बुद्धय” इत्युक्त्वाचिन्नबुद्धिप्रतिभयैव ज्ञायतां त्वद्बुद्धेः किं दुष्प्रवेशमित्यत आह, प्रतिभाया अतिरेक उद्रेको वर्षीयसां वयोऽधिकानाम् ॥ ४ ॥

यदि बालतया मयीदमप्रकाशनार्हं नार्हन्तु तदा प्रकाशयितुम्, उत चेदुपैति कथ्यतां कथ्यतां तदाकरः ॥ ५ ॥

कथ्यतां कथनार्हत्वं चेत्· उपैति, तदा कथ्यतामुच्यतां तस्याकरः कारणम् ॥ ५ ॥

गुप्ता हि वार्ता सुहृदि हृदि च दुरपनोदा नोदासीने विपक्षेऽपक्षेपणीया भवति ॥ ६ ॥

ननु बालत्वेऽपि महाबुद्धिमत्त्वान्नास्ति ते बालत्वदोषः किंत्वतिरहस्यैवेयं वार्तेति चेत्, सत्यं, गुप्तापि वार्ता हृदि मनसि सुहृदि च

दुरपनोदा· अपह्नोतुमशक्या· अनौचित्यादेव, श्लेषेण सुहृदो हृदयादप्यन्तरङ्गत्वमानीतं, किंतु· उदासीने विपक्षे च न· अपक्षेपणीया प्रक्षेप्तुमयोग्या, मयि तु सुहृत्त्वेन तत्प्रकाशनं युक्तमेवेति भावः ॥ ६ ॥

इति विरतवचनरचने च नेदीयसि च सिचयासनमध्यासीने च तनये नयेन सादरदरहसितसितदशनमहोमहोल्लासेन पेयूषपीयूषपीनधौतमिव श्मश्रुभरं जनयन् नयन्नपि तमङ्कमनङ्कमिव सुधाकरं वसुधाकरम्बितमथाभीरराजो रराजोपक्रम्य वचनरचनाम् ॥ ७ ॥

तनये श्रीकृष्णे· इति विरतवचनरचने सति· आभीरराजो वचनरचनाम्· उपक्रम्य· आरभ्य रराज । तनये कथंभूते, प्रथमं नेदीयसि निकटवर्तिनि, ततः सिचयासनं वस्त्रासनमध्यासीने च । स्वयं च कथंभूतः, सादरम्· अहो प्रश्नमाधुर्यमिति कृतादरं यद्धसितं तत्प्रकाशितः सितदशनस्य तयोर्महसां ज्योतिषां महोल्लासेन पेयूषो नवदुग्धं स एव पीयूषममृतं तेन पीनं पुष्टं यथा स्यात् तथा धौतं क्षालितमिव श्मश्रुभरं जनयन्, स्वभावतस्तिलतण्डुलितमपि श्मश्रुभरं हसनदशनकान्त्या सर्वशुक्लमिव कुर्वन्नित्यर्थः,“पेयूषोऽभिनवं पय” इत्यमरः । तं तनयमपि· अङ्कं स्वोत्सङ्गं प्रति नयन्, अनङ्कं निष्कलङ्कं वसुधाकरम्बितं भूमौ मिलितं सुधाकरं चन्द्रमिव ॥ ७ ॥

तात सातत्यतन्यमानमान एष नः कुले निराकुले निराविलः परंपरापरायत्त आचार आचारणादिपरिगीतः समुन्मीलति ॥ ८ ।

सातत्येन तन्यमानो मान आदरो यस्य सः ॥ ८ ॥

यदस्माकं हि गोधनं धनं तच्च घासग्रासमात्रजीवनं स च घासोऽनघासो न भवति विना वृष्टिं सा च दुर्बला बलाहकानन्तरेण ते च नात्मवशाः पुरंदरदरतः ॥ ९ ॥

घासस्य तृणस्य ग्रासो भक्षणं तन्मात्रमेव जीवनं यस्य तत् । अनघो निर्व्यसनो निर्विघ्न आसः स्थितिर्यस्य तथाभूतो न भवति ।

"अंहो दुःखव्यसनेष्वघम्," "आस उपवेशने" "वस दीप्तौ वा घञन्तः"। सा च वृष्टिः। वलाहकान् मेघान्। पुरंदरदरतः• इन्द्रभयात्॥ ९॥

अतस्तदीयं महमहमुपपादयन्नस्मि, अनेनसानेन साधुनाधुना विधीयमानेन महेन प्रीतिसुमनसा सुमनसामधिपेन तेन प्रतिवर्षं वर्षं सुरीत्या संपाद्यते॥ १०॥

अनेनसा• एनो ऽपराधस्तद्रहितेन• अनेन महेन यागोत्सवेन। सुमनसां देवानामधिपेन• इन्द्रेण॥ १०॥

तथा संप्रति संप्रतिपत्तिकारिणा भवितव्यं रीतिरीदृश्येव तेषां मानवतां मानवतां गतस्य समाराधनप्रिया न प्रियाय मन्यन्ते स्वर्गीयगीयमानमपि सुधादिकं ते॥ ११॥

संप्रत्यधुनापि संप्रतिपत्तिकारिणा• अस्मद्योगक्षेमसंपादकेन• इन्द्रेण। नन्वमृतभुजां देवानां युष्मद्दीयमाने हविषि का प्रीतिः स्यात् तत्राह। मानवतां संमानदायिनां तेषामीदृश्येव रीतिर्यत्• मानवतां गतस्य मनुष्यत्वं प्राप्तस्य सम्यगाराधनं प्रियं येषां ते। स्वर्गीयैः स्वर्गसंबन्धिभिर्जनैर्गीयमानं स्तूयमानमपि॥ ११॥

स्वसंपदापदारोहणपरापि समाराधिताधितानवं नवं नवमीहते हि देवता• अनाराधिताधितादवस्थ्यमेव॥ १२॥

ननु देवा अपि• असुराद्युपद्रववशाद्दुःखसुखमया मनुष्यवदेव लक्षिताः, सत्यं, स्वस्याः संपद आपदश्च कदाचिद्दिष्टवशादारोहणपरापि समाराधिता सती• आधेर्मनः पीडायास्तानवं सौख्यम्• आराधकजनस्य• ईहते चेष्टते, कुरुत इत्यर्थः। तच्च नवं नवं यथा स्यात् तथेति, तच्च कदाचिदपि नोद्विजत इत्यर्थः। अनाराधिता तु सती• आधेस्तादवस्थ्यमेव,ईहते• इत्यस्यैवानुषङ्गः॥ १२॥

अथ तदाकर्णनकर्णनवकषायतायतापि न केनापि यथा यथार्थभावेन लक्ष्यते तथा कृतावहित्थमित्थमिदमतिमधुमधुरतरतरङ्गि-

तस्मितविस्मितविविधजनमनोमनोज्ञतमं किमपि संमोहजनकं जनकं यदवादीदवादीव मीमांसावादं सविवादं स विधाय तदतिचित्रम् ॥ १३ ॥

अथ तद्वचनाकर्णनेन कर्णयोर्नेत्रा कषायता गर्वव्रत इन्द्रस्यादृश्यत्व-बार्सहिष्णुतया कालुष्यं सा॰ आयतापि प्रचुरापि यथा केनापि न लक्ष्यते तथा जनकं प्रत्यवादीव यदवादीत्॰ उक्तवान्॰ तत्॰ अतिचित्रम्, तथा आवहित्थमिति गाम्भीर्येणासूयालक्षणाच्छादनात्। तदेवाह, अतिशयेन मधुरोऽपि मधुरतरं च तत् तरङ्गितम्॰ आवृत्तिप्रत्यावृत्तिभ्यां तरङ्गसदृशं च यत् स्मितं तेन विस्मितानां विविधजनानां मनसो मनोज्ञतमम्॰ अतिरोचकम्। सविवादं विवादसहितं कृत्वा, वाद्यन्तरपराभवार्थम्। स श्रीकृष्णः।

ऐश्वर्यशक्त्या सहसा निवेदितो निजप्रभुः स्वावसरप्रवीणया ।
चिकित्सितुं दुर्मतिशक्रदुर्मदं परामर्शाथ स गोपशर्मदः ॥
जनको नु ममापि देवतां भजते यच्चरलोलतावशात् ।
तदिहाप्यभिमन्यते मदान्मघवा यत् तदिहास्मि शास्मि तम् ॥
इति ॥ १३ ॥

तथाहि ।

अहो अहोनाथसदृशामीदृशामीशतुल्यानां वः खलु सुखलु सुबहुलमविचारि चारित्र्यम् ॥ १४

अहोनाथसदृशां सूर्यतुल्यानामिति स्वत एवातिप्रतापवत्त्वम्॰ ईश-तुल्यानामित्यन्यदुर्बोधत्वं च सूचितम्। तथापि सुखस्य लूश्छेदनं यत-स्तत्॰ अविचारि न विचारयुक्तम् ॥ १४ ॥

यतः कर्मणैव जन्तव उत्पद्यन्ते विपद्यन्ते विद्यन्ते च। यो हि यदा यदाचरति कर्म तदेव देवता देवतान्तरं नाम नामनन्ति सन्तः ॥ १५ ॥

उत्पद्यन्त इत्यादिना॰ उत्पत्तिप्रलयस्थितयः सर्वेषां कर्माधीना एवेति ॥ १५ ॥

ईहितमहिताहितातिरिक्तफलदानासमर्थमर्थयन्तां के नाम देव-
तान्तरं तान्तरंहसो हि कर्मातिरिक्तां देवतां मन्यन्ते ॥ १६ ॥

ईहिताभ्यां कृताभ्यां हिताहिताभ्यां सुकृतदुष्कृताभ्यामतिरिक्तस्य
फलस्य दानेऽसमर्थं देवतान्तरं के जना प्रर्थयन्तां स्वाभीष्टं याचन्ताम्, न
केऽपीत्यर्थः । तान्तम्· अयतं रंहो बुद्धिव्यापारादीनां वेगो येषां त
एव ॥ १६ ॥

नाप्यन्तर्यामी यामीरयति क्रियां तामेव करोति जन्तुः, वस्तु-
तस्तु तथाविध एव कश्चित् स्वभावो हि स्वभावो हिताहिताचरण-
प्रवर्तकः किं तथान्तर्यामियामिकतया ॥ १७ ॥

कर्मणो ऽन्तर्यामिपारवश्यमिति मतं निरस्यन्नाह नान्तर्यामीति ।
यां क्रियाम्· ईरयति प्रेरयति । कश्चिदिति, तथाविधकर्मभिरेवाभिव्य-
ञ्जितः स्वभावो निसर्गः स्वस्यैव भां कान्तिम्· अवतीति सः । अत
एवान्तर्यामिणो यामिकतया नियामकत्वेन किम् ॥ १७ ॥

नहीश्वर एव जगदुत्पादयति विपादयति विधिच्य पालयति,
अपितु तस्योत्पादकविपादकविपालकानि रजस्तमःसत्त्वानि, तेन
रजोघना घनाः स्वभावत एव त एवमभिवर्षन्ति ॥ १८ ॥

तस्य जगतः । रजोघना रजसा निविडाः । जन्तूनामुत्पत्त्यदृष्टव-
शादेव वर्षन्ति ॥ १८ ॥

न च तत्र घनागमे भुवनमुचि नमुचिसूदनो नाम देवता प्रेरिका
या खल्वाराधिताधितानवं करोति ॥ १९ ॥

न च तत्तद्देशाध्यक्षकृताराधनसंतुष्टस्येन्द्रस्य प्रेरणावशादेव मेघाः
प्रावृषि वर्षन्तीत्याह नचेति । घनागमे वर्षासमये । भुवनस्य जलस्य
मुक्· मोचनं यत्र तस्मिन् । नमुचिसूदन इन्द्रः ॥ १९ ॥

'किममी धराधरा वा किमेते वा नदीना न दीनास्तदाराधनं चक्रुः
कथमेतेष्वेते ते वर्षन्ति तदलमप्रस्तुतेन यतमखमखकरणेन ॥ २० ॥

Digitized by Google

नदीनाम्· इना ईश्वराः समुद्रा एते किं तस्याराधनं चक्रुः, अपितु नैवेत्यर्थः । यतो न दीनाः· न जलदारिद्र्यवन्तः ॥ २० ॥

किंच ।

ब्राह्मणा ब्रह्मणा व्रतिनो राजन्या राजन्यायेन शोभिनो विशो विशोभन्ते कृष्यादिभिरवरवर्णा वरवर्णानां सेवया राजन्ते· इति चतुर्वर्णावस्थावस्थानव्यवस्थायां कृषिगोरक्षवाणिज्यकुसीदविशां विशां चतुष्टयी वृत्तिवृत्तिः ॥ २१ ॥

तर्हि किं प्रस्तुतमित्यपेक्षायां निजविहितधर्मानुष्ठानमेव दीपकरीत्या· अप्रस्तुतोपन्यासेनाह ब्राह्मणा इति । ब्रह्मणा वेदेन । अवरवर्णाः शूद्राः । चतुर्णां वर्णानाम्· अवस्था स्वभावस्तस्या अवस्थानेन स्थित्या या व्यवस्था तस्यां, कृष्यादिषु विशन्ति· इति क्विप्, तेषाम् । तत्र कुसीदं वृद्धिजीविका । वृत्तीनां कृष्यादिजीविकानां वृत्तिः सत्ता ॥ २१ ॥

तत्रास्माकं गोरक्षणपक्षपरता, नेदानीं न च पुरा पुरावनिसर्गा निसर्गावगाहिनी गिरिवनचरता ॥ २२ ॥

अस्माकं नेदानीं नापि पुरा पुरस्य· अवनेः शालिक्षेत्रादेर्वा सर्गा निश्चयाः सृष्टयो वा । तर्हि किं तत्राह, निसर्गावगाहिनी स्वाभाविकी गिरौ गिरौ वने वने चरन्तीति तेषां भावस्तत्ता । सैवास्माकं सदेत्यर्थः ॥ २२ ॥

चरतामिह नो हन्त किमनया शतक्रतुक्रतुकल्पनयानयारब्धया ॥ २३ ॥

अत एव· इह व्रजभुवि चरतां नेकत्र सदा स्थायिनां नोऽस्माकम्· अनया किम्, न किंचिदपि प्रयोजनमित्यर्थः । कीदृश्या, अनयेन· अनीत्यैव· आरब्धया ॥ २३ ॥

विस्रब्धया विस्रस्तविपदा मम गिरा गिरावस्मिन् न केवलं नाम्नैव गोवर्धने गोवर्धनेऽर्थतोऽपि संमानमानयद्भिरनेनैव शतमन्यु-

मन्युसंभारेण निपुणमहो महोऽस्य गिरिवरस्य विधीयतामतोभवद्भि-
र्भवद्भिः ॥ २४ ॥

तर्हि किं यागार्थकत्वेनोपकल्पितानां तत्तद्द्रव्याणां पुनरादानं युक्तं, नहि नहि तैरेव युक्तवतुरूपं यागान्तरं क्रियतामित्याह, विस्रब्धया विश्वस्तया विस्रस्ता ध्वस्ता विपद्वया तया मम गिरा· अस्मिन् गिरौ निपुणं संमानमाबयद्भिर्भवद्भिः· अस्य गिरिवरस्य महो विधीयतां अतम-न्योरिन्द्रस्य मन्युसंभारेण यागोपकरणवृन्देन । "मन्युर्दैन्ये क्रतौ क्रुधी"-त्यमरः ॥ २४ ॥

सकला एव गावो दुह्यन्तामुह्यन्तामुदाराः पयोभाराः पयोभाराः परमान्नादीनि पच्यन्तां रच्यन्तां रम्याणि शष्कुल्यादीनि कुल्यादीनि विधीयन्तां घृतमधुपानकादीनाम् ॥ २५ ॥

कुल्यादीनि कुल्यावापीसरांसि, "कुल्याल्पा कृत्रिमा सरिद्"-त्यमरः ॥ २५ ॥

मथितोदधिदधिमहोदधिनवनवनीतासितसिताशिखरिशिखरि-णीरसालारसालाद्यववन्तः सन्तु दिगन्ता गन्तारश्च सर्वे निमन्त्रयन्तु वसुधासुरान् ॥ २६ ॥

मथितानामुदधिश्च दध्नां महोदधिश्च नवानि नवनीतानि च सितसितानां श्वेतशर्कराणां शिखरी च शिखरिणीनां रसालानां रसाला-द्यवं च· अपर्याप्तत्वादुदध्यादिवत् कथयितुमशक्तेः· तद्वन्तो दिगन्ताः सन्तु। गन्तारो धावका यतस्तत एव वसुधासुरान् विप्रान् निमन्त्रयन्तु ॥ २६ ॥

सुधासुरान् सुरानुपहसन्तु ते चादन्तो दन्तोत्थकिरणकन्दली-भिः स्निग्धानना न नाकपृष्ठमपि गरिष्ठं जानन्तु ॥ २७ ॥

ते च विप्रा अदन्तो भुञ्जानाः सन्तः सुधाः सुष्ठु दधातीति ता-दृशानपि सुरान्· उपहसन्तु ॥ २७ ॥

ऋत्विजश्चाहूयन्तां हूयन्तां चानला न लाघवेन दीयन्तां तेभ्यो धेनुर्दक्षिणा दक्षिणाशया ब्राह्मणभोजनाय भो जना यतन्ताम् ॥ २८ ॥

दक्षिणाशयाः सरलान्तःकरणा जना ब्राह्मणभोजनाय ब्राह्मणान् भोजयितुं यतन्ताम् । भो इत्यवधापनार्थम् ॥ २८ ॥

मुद्गा मुद्गादिसूपसूपचितनानाविधसौरभरभसव्यञ्जननिकरकरम्बितमिष्टमिष्टपिष्टकरसनिरपायपायसकुण्डकुण्डलितमामोदनमोदनकूटं विरचय्य पाद्यादिभिर्यथाचारैरुपचारैरुपकल्पयन्तु गिरीन्द्रस्य पूजनम् ॥ २९ ॥

दक्षिणाभोजनाद्युल्लेखेन ब्राह्मणान् स्वपक्षीकृत्य सर्वजनप्रसादनगर्भा पर्वतपूजां विदधान आह, मुद्गाः प्राप्तहर्षा विप्रा ओदनकूटं विरचय्य गिरीन्द्रस्य पूजनमुपकल्पयन्तु । ओदनकूटं कीदृशम्· मुद्गादिसूपैः सुष्ठु· उपचिताश्च नानाविधस्य सौरभस्य रभसं वेगं व्यञ्जयन्तीति ते च ये व्यञ्जननिकरास्तैः करम्बितम् । इष्टाः परिणामेऽपि सुखदा मिष्टाः पिष्टकाश्च रसैर्निरपायानि पायसकुण्डानि च तैः कुण्डलितं वलयितम् ॥ २९ ॥

अन्नं जनमाश्वपाकमाश्वपाकमापतितं च पूर्णभोजनं प्रदीयतामित्येवंभूतेज्याविधौ सति ॥ ३० ॥

आश्वपाकं श्वपचपर्यन्तम्, आश्वपाकं शुनः कुक्कुरस्य पाको बालकस्तत्पर्यन्तं, "पोतः पाकोऽर्भको डिम्भ" इत्यमरः । आपतितं, सर्वतः सुलभत्वेन समाकीर्णमिव यथा स्यात् तथेत्यर्थः ॥ ३० ॥

भेरीझांकृतिभिर्विशृङ्खलतमैः प्रेङ्खोलशङ्खस्वने-
र्नन्दद्दुन्दुभिदुंकृतैस्तत इतो निष्पक्वठक्कारवैः ।
विद्वद्वेदविदामुदारमधुरैर्वेदप्रगानोत्सवै-
र्नान्दीभिः सह वेदिनां कलकलो दिक्चक्रमाक्राम्यतु ॥ ३१ ॥

सह मिलितीभूय ॥ ३१ ॥

ततश्च ।

दिव्यालंकृतिभंकृतिश्रुतिसुखैर्दिव्याम्बराडम्बरैः
पुम्भिः स्तम्भितदैवतैर्वरवधूवृन्दैश्च मन्दस्मितैः ।
वीणावेणुमृदङ्गमङ्गलरवव्यासङ्गिसंगीतके
नृत्यन्नर्तकनर्तकीगणयुतैर्यानप्रयाणोत्सवैः ॥
पूजां विधाय विधिवद्विदुषो द्विजाग्र्या-
नग्रे विधाय च निधीनधिमङ्गलानाम् ।
सर्वे सुपर्वमदमोदपराः परार्ध-
स्पर्धाः परिभ्रमत पर्वणि पर्वतेन्द्रम् ॥ ३२ ॥

अधिमङ्गलानां निधीन् निधिरूपान् द्विजाग्र्यान् परार्धैः परार्धप्रमाणजीवितैर्देवैरपि सह स्पर्धन्ते इति तथाभूताः ॥ ३२ ॥

नचैवं मनसि विचार्यमभिलषितप्रदावस्थावरः स्थावरः कथमयमास्थाकरो भविष्यति ॥ ३३ ॥

अभिलषितप्रदस्य वाञ्छितदातुरवस्थायां वरः पर्वतश्रेष्ठः स्थावरः पर्वत आस्थाया आकरः कथं भविष्यति ॥ ३३ ॥

द्वितीय इव गिरीशोऽयमाशु माशुद्धः सर्वार्थसिद्धिसमर्थनसमर्थनयो भविष्यति ॥ ३४ ॥

माशुद्धः शोभया निर्मलः, सर्वार्थसिद्धेः सम्यगर्थनं प्रार्थनं प्रति समर्थो दानशक्तो नयो नीतिर्यस्य सः ॥ ३४ ॥

किं बहुना, कथितोऽयं मम समीहितो हितोऽतिपन्थाः, यदि रोचते तात तदानेनैव गम्यताम् ॥ ३५ ॥

अतिपन्थाः सत्पथः ॥ ३५ ॥

इति विरते तद्वचनोपक्रमे क्रमेण सर्व एव तच्छुद्धधिरे दधिरे च मनोरथसिद्धेरावश्यकत्वम् ।

Digitized by Google

आचार्यतामुपगतेन तदध्वरस्य
कृष्णेन संजनयता शतमन्युमन्युम् ।
उत्कण्ठया परमयैव तदानुपूर्व्या
सर्वं तदोपनतमेव चकार सर्वः ॥ ३६ ॥

कृष्णेनेति हेतौ तृतीया सहार्थे वा ॥ ३६ ॥

शब्दान्तरं हरति मङ्गलतूर्यघोषे
वेदध्वनिध्वनिपरेषु च दिङ्मुखेषु ।
तेषामहो गिरिमहोल्लसितान्तराणा-
मानन्दकन्दलित एव बभूव कालः ॥
उत्कण्ठमानकलकण्ठगणः पुरन्ध्री-
नीरन्ध्रमङ्गलतरङ्गितगानघोषः ।
कर्णान्तिकोपनत एव हि कर्णभाजां
कर्णेन्द्रियस्य फलमुल्ललयांचकार ॥ ३७ ॥

उत्कण्ठमानः· तादृशस्वरशिताये सोत्कण्ठः कलकण्ठानां कोकिलानामपि गणो यत्र सः ॥ ३७ ॥

ततश्च ।

गावश्च रत्नमयकिङ्किणिजालमाला-
चीनांशुलप्रचलमौक्तिकमालिकाभिः ।
भूषां दधुः किमपि काञ्चनशृङ्गकोपैः
स्वस्वप्रसूपरिचये मुमुहुश्च वत्साः ॥ ३८ ॥

मुमुहुश्चेति चकारस्त्वर्थे ऽप्यर्थे वा, वत्सास्तु वत्सा अपि· इति वा । ते लालनार्थं मुहुरागतानां स्वस्वप्रसूनां महद्भूषितानाम् ।
वत्साः सशङ्का गलशृङ्गपृष्ठन्यस्तेक्षणा दुद्रुवुरेव मुग्धाः ॥ ३८ ॥

एवं प्रवृत्ते गिरिमहे महेच्छेन व्रजपुरपुरंदरेण गिरिपुरतः पुरतः समानीतं पूजोपहारं प्रतिपाद्य पाद्यप्रभृतिभिरर्चनं कारयता रयतानितं तुलितगिरिसंप्रतिपन्नकूटमन्नकूटमतिकुतुकेन केन च न संपादयांबभूवे भूवेपथुजनकमिव ॥ ३६ ॥

पुरतः पुरात् । रयतानितं वेगेनैव विस्तारितम् । तुलित उपमितो गिरिर्येन तत्, गिरिसदृशमित्यर्थः । सम्यक् प्रतिपन्नानि कूटानि शृङ्गाणि यस्य तत् ॥ ३९ ॥

मध्ये कर्पूरगौरं शिखरमिव गिरेः शुद्धमन्नस्य कूटं
तद्गात्रे गण्डशैला इव विविधरुचः पिष्टकानां समूहाः ।
मूले प्रत्यन्तशैला इव दधिपयसां पायसानां च कुम्भा-
स्तन्मूले व्यञ्जनाल्यः सुरभितररसाः सूपमुख्याः सरस्यः ॥ ४० ॥

विविधरुच इति, कुङ्कुमादिरसाक्तत्वात् ॥ ४० ॥

कर्पूरैलालवङ्गादिभिरतिसुरभि घ्राणसंतर्पणेन
प्राज्येनाज्येन सिक्तं द्रुतकनकपयःसिक्तकेलासकल्पम् ।
नानापुष्पैः फलैश्च प्रचितमित इतस्तन्निरीक्ष्यान्नकूटं
गोपेन्द्रो भूधरेन्द्रोचितमिदमिति स प्रीयमाणस्तदासीत् ॥ ४१ ॥

अतिसुरभि· अतिसुगन्धं, घ्राणसंतर्पणेन सुगन्धिना ॥ ४१ ॥

अथ तथाविधविविधविचित्रमन्नकूटं कूटं सुमेरोरिव निरीक्ष्य सविस्मितस्मितवदनो हरिरयं रयं प्रमोदस्य प्राप्तः सपरिजनजनकप्रत्ययं प्रत्ययन्वितकौतुकः पर्वतोपरि परिकल्प्य वपुरपरं तपस्तपनसहस्रसहस्रस्तमहःपूरमिव रमिवर्गशेखरः प्रखरः प्रमुदितमना मनागवलोक्य निजगाद ॥ ४२ ॥

परं प्रतिपक्षरूपमिन्द्रं तापयतीति सः । तपनसहस्रस्यापि सहसां ते·

जसां स्रस्तं स्रंसनं यतस्तथाभूतो मद्दः पूरो यस्य तम्। पूर्वत्र सशब्दे॰ "शर्परि वे"ति द्वित्वम्, उत्तरत्र "वा शरी"ति सत्वम्। रमितवर्गशेखरो रञ्जकवृन्दमुख्यः॥ ४२॥

हंहो पूज्यपादा विलोकयत यतमानानां शुभवतां भवतां शुचितराः श्रद्धाबद्धा बहुविधा निरपचितीरपचितीरादातुमनुग्रहग्रह-गृहीत इव मूर्तोऽयमुज्जजृम्भे धराधराणां धुरंधरो गोवर्धनः॥ ४३॥

यतमानानां यत्नवताम्॰ अपचितीः पूजाः। कीदृशीः, निरपचितीः॰ अपचयशून्याः शुचितरा अतिशुद्धाः॰ श्रद्धया बद्धा आवृताः॥ ४३॥

पश्यत पश्यत।

स्फारस्फीतगभीरकन्दरमुखो धत्ते मुखं चन्द्रवद्
वृत्तप्रायभुजोऽप्ययं भुजयुगप्रद्योतिरत्नाङ्गदः।
ग्रावाङ्गोऽपि सुकोमलानि मधुराण्यङ्गीकरोत्यङ्का-
न्यस्य स्थावरविग्रहोपरि परिस्पन्दी चरो विग्रहः॥ ४४॥

विरोधालंकारं युञ्जानो रूपद्वयं वर्णयति। स्फारैर्विस्तारैः स्फीताः पुष्टा गभीराः कन्दरा एव मुखानि यस्य सोऽपि॥ ४४॥

किंच।

मरकतशिलापट्टश्लाघ्यं प्रकाण्डमुरःस्थलं
शिखरसुषमाक्रान्ता दन्तावली विलसत्यसौ।
दशनवसनस्याभा धातुप्ररोहविडम्बिनी
क्षितिधरपतेर्मूर्तिद्वन्द्वं परस्परसोपमम्॥ ४५॥

शिखरं माणिक्यमिव, पक्षे शङ्खमिव, सुषमया कान्त्या परस्पर-सोपममिति। उरःस्थलमिव मरकतशिलेत्येवम्॥ ४५॥

किंच।

कलयत भवद्वत्स्युद्रेकाद्धभुत्सुरिव स्वयं
समखिवलयं दोर्दण्डाग्रं प्रसारयति द्रुतम्।

अयमयमहो कामः सिद्धो बभूव भवादृशां
नमत नमतेत्युक्त्वा कृष्णः स्वयं च ननाम तम् ॥

अथ सर्वे मूर्धनि बद्धाञ्जलयो जलयोनिमिव ज्वलन्तं तमवलोक्य नमो नमो नम इति विपुलपुलकाकुलाः कुलाबलाबलयश्च कुलवृद्धाश्च भक्तिश्रद्धावन्तो धावन्तो मेधावन्तो निजभाग्यमनुवर्णयन्तोऽयं तोषवन्तो मूर्तिमन्तमिव मेनिरे ॥ ४६ ॥

जलयोनिं वह्निम् । अयं शुभावहविधिं मूर्तिमन्तमिव मेनिरे ।

धनजनसुतगोभूसौभगायुष्यवृष्य-
चनिलघुनिजगेहानीलनैवेद्यहस्ताः ।
यदखिलकुलवृद्धास्तत्कृपापाङ्गभङ्ग्या
व्यतरदथ वधूभ्यः स्वप्रसादामृतं सः ॥
स्वनयनकरणेनाश्वासंज्ञयैवाह राधां
त्वमिह मदुपकण्ठे वाञ्छितार्थं लभेथाः ।
प्रतिदिनमिति तस्यां तत्प्रसादातिरेकं
ददृशुरथ जरत्यस्तुष्टुवुस्तां जनाश्च ॥ ४६ ॥

देवानामध्वन्यध्वन्यतिशयो ध्वनिरासीदभिवाद्यानां वाद्यानां स्थाने ॥ ४० ॥

अध्वन्यध्वनि· अभिवाद्यानां नमस्कार्याणां देवानां देवप्रतिमानां स्थाने वाद्यानाम्· अतिशयो ध्वनिरासीदिति संबन्धः ॥ ४० ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य दशमः परिच्छेदः ॥

११ ॥ अक्षराणां ध्वनेर्व्यामिश्रणाय उपयुज्यन्ते ॥—यथा कश्चन पुरुषो ज्ञाताक्षराणामर्थस्य विनिमयं कर्तुं समर्थः शास्त्रीयसूक्ष्मकल्पनया

चापठितान् जडान् लौकिकांश्च पुरुषान् प्रत्यन्ततरामाश्चर्यमावहन् अहं वकारस्य स्थाने ऽकारं डकारं चेकारस्य स्थाने स्थापयितुं शक्नोमीति स्वीये ग्रन्थे प्रदर्शयितुं समर्थश्च स्वपाठान् प्रति अत्यन्तमाश्चर्यमुपयोगं च कुर्यात् तथैवेमे पण्डिता बुद्धिमतो मनुष्यान् शिक्षयन्तः स्वजीवनसाफल्यं कुर्वन्ति । वागिन्द्रियचालनविशेषाभिव्यङ्ग्यवर्णविशेषलिङ्गस्य अशब्दस्य स्थाने तस्यैवेन्द्रियस्य चालनविधान्तरेणाभिव्यज्यमानस्य शब्दविशेषस्य बोधनायानुमतस्याकाररूपस्याक्षरस्य व्यवस्थापनमिव कस्य चित्प्रत्ययस्याङ्गविज्ञानज्ञापकतया ऽनुमतस्य कृष्णशब्दस्य तद्विरुद्धविज्ञानविशेषान्तरबोधाय प्रयोगस्यापि निरर्थकत्वात् ॥

१२ ॥ एषा च विद्या धर्मं न्यायं च विसंकुलयति ॥ —नाप्येष दोषः केवलं तर्कशास्त्रीयेषु कौतुकैकफलेषु वा सूक्ष्मविचारेषु विरमति किं तु मनुष्याणां जीवनेषु समाजेषु चोपसंक्रामति। दिव्यानि दण्डनीतिसंबद्धानि च तत्त्वानि मूढानि विसंकुलानि च कुर्वन् मनुष्याणां प्रवृत्तौ व्यामोहमव्यवस्थामनिश्चयं चोत्पादयति। धर्मदण्डनीत्योर्द्विविधान् महतो विधीन् यद्यपि न सर्वथा विनाशयति तथापि भूयस इमान् निरुपयुक्तान् करोति। ऐश्वरेषु मानवीयेषु विधिषु भूयसां विवादानां टीकानां च कृते तदर्थेष्वधिकसंदेहजननात् तात्पर्ये ऽधिकं श्रमस्य संपादनाच्च कोऽन्य उपयोगः संभवति । शब्दानामधिकं दुर्बोधनं पाठकानां चाधिकं श्रमं च संपादयन्त्यां गूढत्वानिश्चयाभ्यामृते ऽमीषामत्यन्तसूक्ष्मविचाराणां विविधानां विलक्षणभेदानां च किं फलम्? । कथमन्यथा राजकुमाराणां भाषया लेखो वा तेषां नित्यव्यवहारेष्वाज्ञासु च भृत्यैः सौकर्येणावधार्यते, प्रजासु दण्डनीतौ च न तथेत्युपपद्यते । किं चैतावता पूर्वोक्तादेतदुक्तं भवति । साधारणबुद्धिमान् मनुष्यः स्वपठितं नीतिविधिं मूलग्रन्थं वा तावत्सम्यगवच्छति यावत्स तेषां व्याख्यानायापेक्षितेन कालेन तान् शब्दान् सर्वथार्थशून्यान् स्वाभीष्टार्थप्रतिपादकान् वा कुर्वाणेन व्याख्यात्रा समाजेन वा सह न संगतो भवति ॥

१३ ॥ किं चैषा पाण्डित्यपदव्यवहारं नार्हति ॥— आसां जीविकानां फलेन कोप्येतत्फलमुपलब्धवान् न वेतीह न परीक्षयामि । वस्तुतत्त्वपरीक्षकाणामवश्यकरणीये प्रवृत्तिमतां न पुनर्वस्तुविषयकवादमात्रेण शब्दानामितस्ततः संक्षोभनेन वा स्वजीवनानि हापयतां मनुष्याणां कृते एतत्करणं साधु न वेति तु विचारणीयम् । साक्षात्स्फुटानां शब्दानां प्रयोगः सामाजिकव्यवहारसिद्धये ज्ञानपरिष्काराय चास्माभिरुपलब्धा भाषा तत्त्वस्य प्रच्छादनाय जनानां धर्मेष्वविश्वासाय, भ्रमसंवर्धनाय धर्मनीत्योर्दुर्बोधतासंपादनाय च न कर्तुमुचिताविति न साधु । अथ वा अन्ततो यद्येवमेवाभविष्यत्तर्हि इत्थं करणं ज्ञानं विद्या वा नाभविष्यत् ॥

१४ ॥ (४) तेषां वस्तुत्वेन ग्रहणम् ॥—अयमप्यपरो दोषो यत्तेषां वस्तुत्वेन ग्रहणम् । यद्यप्ययं दोषः किं चित् किं चित् पदसामान्यमुपसंक्रामति तथापि विशेषतो द्रव्यवाचकान्येव दूषयति । ये स्वीयान्भूयिष्ठान् विमर्शान् कस्मिंश्चिदेकस्मिन्नेव विषये निरुध्य कस्याश्चित्स्वपरिगृहीतकल्पनाया निर्दोषत्वे दृढं विश्वसन्ति ते पुरुषा बाहुल्येनैतद्दोषभाजनानि भवन्ति । ततश्च ते तज्जातीयार्थबोधकपदानि तथा वस्तुस्वभावस्यानुकूलानि सन्ति येन तेषां वास्तविकीं सत्तामेवानुकुर्वन्तीति व्यवस्थापनाय प्रयतन्ते । अरिस्तुतिलाचार्यस्य शास्त्रं को नाम नाधीतवान्? को वा तानि दश नामानि न विचारयति स्म यैः पदार्था यथार्थवस्तुस्वभावानुरूप्यसंपत्तये दशधा विभज्यन्ते? कोस्ति तच्छास्त्रमण्डलान्तर्गतो यो द्रव्याकारा महीरुहगतो ऽध्यात्मवायुः सर्वथा रिक्तस्थलस्याभाव इत्यादयो वास्तविकाः पदार्थाः सन्तीति न विचारितवान्? पठनारम्भत एव मनुष्यैरिमानि वाक्यान्यभ्यस्यन्ते उपलभ्यते च स्वांशिक्षकाणां तच्छास्त्राणां चैतदाश्रितमेव गुरुत्वम् । अत एव च पदानि स्वाभाविकवस्त्वनुसारीणि भूत्वा वस्तुतो विद्यमानवस्तूनां प्रतिनिधिरूपाणि सन्तीति मतं न ते जहति । यथा प्लेटोमहाशयानुयायिनस्तावत् साधारणजीववादं व्यवस्थापयन्ति, एपिक्युरस्भट्टानुयायिनः पदार्थस्य स्थित्यवस्थायामपि

Digitized by Google

परमाणूनां गतिं व्यवस्थापयितुं प्रयतन्ते । परैरेवोध्यं भिन्नं भिन्नं पदवर्गं स्वस्वशास्त्रेष्वप्रयुञ्जानाः शास्त्रिणो विरलतराः सन्ति । एवमपीयं दुर्बलबुद्धीनां मनुष्याणामज्ञानस्य भ्रमस्य च प्रच्छादनायोपयुज्यमाना दुर्बोधभाषा एकजातीयपुरुषेषु परिचितव्यवहारेणार्थवत्पदघटिता भाषादीनां प्रधानतर्माशः प्रतीयते । यदि च तन्मतानुसारेण वायवीयं यानमाकाशीयं च यानमितिशब्दौ कुत्रापि साधारणजनपरिगृहीतावभविष्यतां तर्हि वक्केवारिस्तुतिलाचार्यानुयायिप्रभृतीनां द्रव्यादीनि पुराप्रयावद्भवद्भूतानि तथैव तावपि शब्दौ तादृशवस्तूनां सद्भावव्यवस्थापनोपयिकं संस्कारं मनुष्यात्मसु दृढं जनयेताम् ॥

१५ ॥ द्रव्यमुदाह्रियते ॥ —वस्तुत्वेन परिगृहीतानि पदानि कियद् बुद्धिं भ्रामयन्तीति शास्त्रीयग्रन्थानामवधानपूर्वकमध्ययनमनल्पं प्रकाशयेत् । शब्देष्वीदृशो दुष्प्रयोगः किंचिदेवाशङ्क्यते इत्यपि तत एव ज्ञायेत । अत्र सुपरिचितमेकमेवोदाहरणं प्रदर्श्यते । मूलद्रव्यमिति पदं पिण्डपदवाच्यविज्ञानाद्विभिन्नं विज्ञानं बोधयतीत्यस्य सुप्रसिद्धतया संसारे पिण्डाद्भिन्नं वस्तुसत् तादृशं किमपि वस्त्वस्तीतीव मन्यमानाः कथं बहवो मूलद्रव्यविषये विवदन्ते । तत्पदवाच्यविज्ञानयोर्वस्तुत ऐकरूप्ये तु सर्वेषु स्थलेषु ते पदे परस्परार्थतात्पर्येण विनिमातुं शक्येताम् । वयं तु मन्यामहे सर्वेषां पिण्डानामेकविधं द्रव्यमिति कथनस्यौचित्येऽपि सर्वेषां मूलद्रव्याणामेकः पिण्ड इति कथयितुं न शक्यते । एकः पिण्डः पिण्डान्तरात्स्थूलतर इति साधु व्यवह्रियते ऽथापि एकं मूलद्रव्यं मूलद्रव्यान्तरात्स्थूलतर इति कथनं न साम्प्रतं नापि केन चित् कदा चिदपि प्रयुज्यते । एवं सति कस्मादेतत् । पिण्डमूलद्रव्ययोः परस्पराधीनसत्ताकतया वस्तुतो ऽभेदे ऽपि मूलद्रव्यपदं पिण्डपदं च विभिन्नएव विज्ञाने बोधयतः । ययोर्मध्ये मूलद्रव्यं नास्त्यवयवी किंतु शरीरस्यावयव इति यावत् । यतः पिण्डपदं घनं विस्तारशालि साकारं च द्रव्यं बोधयति मूलद्रव्यं तु तस्यांशिकं विसंकुलं विज्ञानम् । मूलद्रव्यपदं शरीरस्याकारविस्तारावबोध्यैव

घनत्वं स्थिरांशं च बोधयतीति मे प्रतिभाति। अत एव च मूलद्रव्यविषये सर्वदैकरूप्यमेव निगद्यत इति प्रवादः। एतस्य वस्तुतः सर्वदैकाकारैकजातीयघनद्रव्यविज्ञानमात्रात्मकत्वात्। एतस्य मूलद्रव्यविज्ञानात्मकत्वाद् यद्यप्याकारविस्तारयोर्वैविध्यस्य संभवेन शरीराणां भेदं कल्पयामो वदामश्चाथापि घनत्वभेदादधिकं कमपि मूलद्रव्यभेदं न कुत्रापि कल्पयामो वदामो वा। परं तु घनताया आकारविस्ताराभ्यामृते ऽवस्थानस्यासंभवात् याथार्थ्येन कस्य चित्सद्वस्तुनो नामतया मूलद्रव्यपदस्य ग्रहणं मूलधातुविषये शास्त्रिणां मनःसूपस्थितान् तदन्येषु च वर्णितान् गूढानबोध्यान् संवादान् वादांश्च जनयति। इदं चापूर्णत्वं दुष्प्रयोगो वा कियद्भिर्भूयिष्ठैरन्यैः पदैः संबध्येतेति विचारणीयमवशिष्यते। मन्ये एतत्कथयितुमर्हामि, यद् यदि पदानि वस्तुतो यद्बोधकानि सन्ति तद्बोधायैव प्रयुज्येरन्, अस्मद्विज्ञानलिङ्गतयैव न पुनः सद्वस्तुज्ञापकतयेति यावत्, तर्हि संसारे विवादा अत्यन्तं विरलतराः स्युः। यतो यदा धात्वादिपदविषये किंचित् तर्क्यते तदा संसारे वस्तुनो विद्यमानस्य वस्तुनो यथार्थानुरूपं भवति न वेति तत्पदबोध्यविज्ञानविषये एव वस्तुतस्तर्क्यते। किंच यदि मनुष्याः स्वोच्चरितपदबोध्यविज्ञानान्येव तात्पर्यगोचराणि कुर्युस्तर्हि तत्त्वमस्तीत्यस्य साधने भ्रमो विवादो वा ऽर्धोऽपि न स्यात्॥

१६॥ एतच्च भ्रमान् स्थिरान् करोति॥—परं तु यत्किमपि शब्दानामस्माद्भ्रमाज्जायमानमसौकर्यं वस्तुतत्त्वासंबद्धज्ञानान्युत्पादयता दैनंदिनेन सुपरिचितेन च व्यवहारेण जायते। पिता पाठकः प्यारिस्नः मरीयो धर्मप्रवक्ता ऽन्योऽपि वा एवंविधाः पण्डिता यान् शब्दान् प्रायुञ्जत ते न किमपि प्राकृतिकं सद्वस्तु बोधितवन्त इति विचारो दुष्करः। स च विचारो लघिष्ठकारणानामेकतमो येन मनुष्यास्तत्त्वैकफलेषु शास्त्रीयमतेष्वपि स्वीयान् भ्रमान् कष्टेन परिहरन्ति। शब्दानां चिरंतनव्यवहारेण तदात्मसु बद्धमूलतया तत्संबद्धानि मिथ्याज्ञानानि परिहर्तुं न शक्यन्ते इति नाश्चर्यमावहति॥

१७ ॥ (५) पदानि यानर्थान्बोधयितुं न शक्नुवन्ति तदर्थपरतया व्यवस्थापनम् ॥—अपरो ऽपि पञ्चमः शब्दानां दुष्प्रयोगः स्वेन कथमपि बोधयितुमशक्यानां वस्तूनां प्रातिनिध्येन व्यवस्थापनम् । येषां शाब्द-स्वरूपाण्येव केवलमस्माभिर्ज्ञायन्ते तादृशद्रव्याणां साधारणनामानि यदा वाक्येषु प्रयुज्यन्ते तद्विषये किमपि विधीयते निषिध्यते च तदा प्रायशो वयं कल्पयामो यत्तानि द्रव्यजातिविशेषस्यार्थं स्वरूपं बोधयितुं प्रयोक्तव्यानि । यतो यदा मनुष्यः स्वर्णमस्त्याघातवर्द्धनीयमिति कथयति तदा स यत्किमपि स्वर्णमित्यभिधीयते तदस्त्याघातवर्द्धनीयमित्येतावन्मात्रतात्पर्येण न तद्वाक्यं प्रयुङ्क्ते ऽपि तु यत्स्वर्णस्यार्थस्वरूपवत् तदस्त्याघातवर्द्धनीयमिति । तथा चैतदुक्तं भवति । आघातवर्धनीयता स्वर्णस्यार्थस्वरूपेणाविनाभूता तदधीना चेति । परं तु तदार्थं स्वरूपं किंरूपमस्तीत्यस्य मनुष्यैरज्ञातत्वादात्मगत आघातवर्द्धनीयतायाः संबन्धो वस्तुतः स्वाज्ञातस्वरूपेण सह नास्ति, अपि तु तदर्थे प्रयुक्तेन स्वर्णपदेनैव । इत्थं च मनुष्यस्य साधु लक्षणं विवेकवत्प्राणीति न पुनः पक्षहीनो द्विपाद्विस्तृतनख इति यदा ऽस्माभिरभिधीयते तदा वयं तस्मिन्स्थले मनुष्यपदं कस्याश्चिद्विशेषजातेरार्थस्वरूपस्य बोधाय प्रयुक्तं बोधयेच्च विवेकवत्प्राणीत्येतदार्थं स्वरूपं द्विपात्पक्षहीनविस्तृतनख इत्येतदार्थस्वरूपतः साधुतरं वर्णितमिति । कथमन्यथा मनुष्यपदं स्वाभिप्रेतविज्ञानातिरिक्तार्थे ऽप्रयुज्य स्वबोध्यातिरिक्तार्थमपि तत्पदं बोधयेदिति कल्पनामकृत्वा च यथा ऽरिस्तुतिलाचार्यो यद्बोधाय मनुष्यपदं प्रायुङ्क्त तन्मिश्रविज्ञानं परस्परसंयुक्तशरीरविज्ञानतर्कशक्तिविज्ञानघटितमरचयत् तथैवौचित्येन प्ले-टोमहाशयो ऽपि मनुष्यपदं यत्किंचिदाकारविशेषप्रभृतिबाह्यगुणैः शरीरान्तराद्भिद्यमानेन शरीरविज्ञानेनैव घटितस्य मिश्रविज्ञानस्यैव बोधाय प्रयोक्तुं ना ऽशक्नोत् ॥

१८ ॥ तथाहि । द्रव्याणामार्थस्वरूपस्य बोधाय पदानां प्रयोगः ॥—सत्यं चैतद् यदि द्रव्याणामार्थस्वरूपाणि तत्तत्पदबोध्यस्वात्मगतविज्ञानात्मकानि स्युस्तर्हि द्रव्यनामानि अधिकतरमुपयोगीनि तद्घटितवा-

क्यानि वा ऽधिकतरं नियतानि रचितानि स्युः । तेषामार्थस्वरूपाणामभावेनैव शब्दास्तद्विषयके संवादे तेषां ज्ञानं निश्चयं चाल्पिष्ठमेव जनयतः । अतश्च मनो यावच्छक्यैतद्दोषपरिहाराय तेषां शब्दानां तादृशार्थस्वरूपवद्वस्तुबोधकतां कल्पयति तेन च मन्ये तत्समीपतरवस्तुबोधकता संपद्यते । यतो यद्यपि मनुष्यपदं स्वर्णपदं वा वस्तुतः केवलं द्रव्यजातिविशेषैः सह समाविष्टानां धर्माणां मिश्रविज्ञानमेव बोधयति तथापि सर्वोऽपि तयोः शब्दयोः प्रयोगे यदधीनास्ते गुणाः सन्ति तादृशार्थस्वरूपवद्वस्तुबोधाय तौ द्वावपि प्रयुज्येते इति कल्पयति । अनेन चास्माकं शब्दानां दोषस्य ह्रासो नैव भवति प्रत्युत यदा तेन पदेन कथमपि बोधयितुमशक्यस्य कस्य चिद्वस्तुनो बोधाय तानि प्रयोक्तुमिच्छामस्तदा सुस्पष्टेन दुष्प्रयोगेण स दोषो ऽस्माभिर्वर्ध्यते ॥

१९ ॥ अतश्च वयं सर्वविधं परिवर्तनं विज्ञानानामेव कल्पयामो न तु विशेषजातीनाम् ॥—मिश्रभावेषु मिश्रविज्ञानघटकानां विज्ञानानां मध्ये एकस्यापि परित्यागे विपर्यये वा कुतो वस्त्वन्तरं जात्यन्तरं तद्भवितुमर्हतीत्यत्र हेतुरस्माद्भिहितो भवति । स्फुटं चैतत् क्रीडायुद्धे ऽकृतिपूर्विकाहत्या आकस्मिकोमनुष्यघातो मनुष्यहत्या पितृहत्यादिषु । अत्र कारणं तत्पदबोध्यविज्ञानस्यार्थशाब्दोभयरूपता तस्य नाम्नस्तत्स्वरूपातिरिक्तेन केनाप्यन्यस्वरूपेण सहासंबन्धश्च । द्रव्येषु तु नैवम् । यद्यपि स्वर्णपदवाच्ये स्वीयमिश्रविज्ञाने एक यत्किंचिद् योजयति परश्च परित्यजति यदि पर आदत्ते पूर्वस्त्यजति, तथापि मनुष्याः प्रायश एतच्च विचारयन्ति, अत एव विशेषजातयो जात्यन्तररूपेण परिणमन्ते । यतः प्रयोक्तारः स्वात्मसु तावाम विचिन्त्य तेषां धर्माणामाश्रयेण सद्वस्तुनो ऽपरिवर्तनीयेनार्थस्वरूपेणेदं संबद्धमस्तीति कदा चिदेव कल्पयन्ति । यः स्वर्णमिश्रविज्ञाने तद्घटकतया पूर्वमकल्पितं स्थिरत्वं द्रवद्रव्यविशेषसंयोगेन द्रवभावं च योजयति, स तस्या विशेषजातेः परिवर्तनं न कल्पयति किं तु स्वीयपूर्वमिश्रविज्ञानघटकैः शुद्धविज्ञानैः सह वस्तुतः सर्वदा संबद्धस्य शुद्धविज्ञानान्तरस्य योजनेन पूर्वगृहीतविज्ञानस्य पूर्णतां कल्पयति ।

Digitized by Google

स्वानवधारितविज्ञानकवस्तुना सहायं पदस्य संबन्धः किमपि साहाय्यमकृत्वा केवलमधिकं शङ्का उद्भावयति । यतो ऽनेन द्रव्यविशेषजातीनामार्थस्वरूपेण सह संबन्धेन स्वर्णपदं शुद्धविज्ञानानां न्यूनाधिकसमुदायबोधकतया सभ्यसंवादे तादृशद्रव्यविशेषजातिबोधनेन साधु कार्यं निर्वहेत्तत् यदा तद्द्रव्यं स्वयमेव नष्टं विपर्यस्तं वा भवति तदा तत्पदस्य सर्वथा ऽविज्ञातयत्किंचिद्विज्ञानतात्पर्येण प्रयोगात् तत एव च वस्तुमात्रबोधनासामर्थ्येन सर्वथा निरर्थकमेव संपद्यते । यतः कामं सर्वत्रैकरूपेण चिन्तयितुं शक्यत्वे ऽपि साधुविचारिते सति यद्यपि संवादे विवशा भूत्वा पदमेव तत्तद्वस्तुनः प्रातिनिध्येन प्रयुञ्ज्महे ऽथापि द्रव्यखण्डविषयकतद्बोधकनामविषयकश्च तर्को ऽत्यन्तं विभिन्नप्रकारक एव प्रत्येयते इति ॥

॥ शेषोग्रे भविता ॥

THE

NYÁYADARSÁNA.

WITH THE COMMENTARY BY VÁTSYÁYANA.

Continued from page 64.

Now about the motives. What actuates one to make efforts is called the motive [Prayojana]. In all living beings, in all works, and all sciences there is present an object wishing to obtain or to shun which one sets out to work; even Nyáya is dependent upon such an object. Now what is [meant by the word] Nyáya? Nyáya signifies the investigation of an object by means of the proofs or

---

अथ न्यायदर्शनवात्स्यायनभाष्यम् ।

अथ प्रयोजनम् । येन प्रयुक्तः प्रवर्त्तते तत् प्रयोजनम् । यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्व्वाणि कर्म्माणि सर्व्वाश्च विद्या व्याप्ताः, तदाश्रयश्च न्यायः प्रवर्त्तते, कः पुन-

instruments of knowledge. It is an inference dependent upon perception and authoritative assertion. Such an inference is called Anvíkshá or the reviewing of what has already been viewed by means of perception and testimony. Nyáyavidyá or the science of Nyáya, as proceeding by Anvíkshá or review, is called Ánvíkshikí or the science of review. Whereas the inference not agreeing with perception and testimony is [said to be not a Nyáya but] only a semblance of a Nyáya or Nyáyábhása. Among the arguments of this kind the debate (Váda) and wrangling [Jalpa] possess a motive. But cavilling is to be examined. One using Vitaṇḍá or cavilling is called Vaitaṇḍika or a caviller. If he, when asked for his motive, should admit it to be such and such a doctrine or such and such an opinion, he would lose the quality of being a caviller; if he, on the other hand, should not admit it, it would be proved that he is neither a man of the world nor a man of science. And if he should state his motive to be only to declare what is contradictory to the opinion of his adversary, even then the matter would not be different. For, in case he really believes and understands what he makes known to others, he loses the character of being a caviller; if he, on the contrary, does not believe it, his assertion that his motive is to state objections to the opinion of his

---

रयं न्यायः । प्रमाणैरर्थपरीक्षणंन्यायः प्रत्यक्षागमाश्रितमनुमानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् । यत् पुनरनुमानं प्रत्यक्षागमविरुद्धंन्यायाभासः स इति ॥ तत्र वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते वितण्डया प्रवर्त्तमानो वैतण्डिकः । सप्रयोजनमनुयुक्तो यदि प्रतिपद्यते सोऽस्य पक्षः सोऽस्य सिद्धान्त इति वैतण्डिकत्वं जहाति । अथ न प्रतिपद्यते नायं लौकिको न परीक्षक इत्यापद्यते । अथापि परपक्षप्रतिषेधज्ञापनं प्रयोजनं ब्रवीति, एतदपि तादृगेव । यो ज्ञापयति यो जानाति यच्च ज्ञाप्यते एतच्च प्रतिपद्यते यदि, तदा वैतण्डिकत्वं जहाति । अथ न प्रतिपद्यते, परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति ।

Digitized by Google

adversary, would be without sense; for cavilling is a number of assertions which do not establish any opinion. If he believes what is conveyed by his assertions, it would be considered as his opinion established by himself; if he, on the other hand, does not believe it, the assertions would be a mere meaningless prating, and consequently destitute of the character of cavilling. So much for cavilling.

Now for the popular datum [Drishṭánta]. It is the perceptible object regarding which the perception of the ordinary observers is not obstructed or impeded. It is separately enunciated, though included in the category of the objects, as it forms the condition of inference and testimony. These can take place only when there is some popular datum, and they do not take place, when there is none. Even the syllogism, proceeds supported by it [the popular datum]. To oppose one's adversary's opinion by disagreeing with the popular data would be blamable. One can prove one's own opinion by agreeing with the popular data. But an atheist admitting the popular data will lose the character of being an atheist; if on the other hand he does not admit them, what arguments will he have for refuting his adversary? By the predescribed popular data, it can be said that "the

---

वाक्यसमूहश्च स्थापनाहीनो वितण्डा, तस्य यद्यभिधेयं प्रतिपद्यते सोऽस्य पक्षः स्थापनीयो भवति । अथ न प्रतिपद्यते प्रलापमात्रमनर्थकं भवति वितण्डात्वं निवर्त्तत इति । अथ दृष्टान्तः । प्रत्यक्षविषयोऽर्थः । यत्र लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते स च प्रमेयं तस्य पृथग्वचनञ्च तदाश्रयावनुमानागमौ । तस्मिन् सति स्यातामनुमानागमावसति च न स्याताम् । तदाश्रया च न्यायप्रवृत्तिः । दृष्टान्तविरोधेन च परपक्षप्रतिषेधो वचनीयो भवति दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति, नास्तिकश्चन दृष्टान्तमभ्युपगच्छन्नास्तिकत्वं जहाति अनभ्युपगच्छन् किंसाधनः परमुपालभेतेति निरुक्तेन दृष्टान्तेन शक्यमभिधातुम् "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणं तद्विपरीता द्विपरीतमिति" अस्त्ययमित्य-

example [Udáharaṇa] is a popular datum [Drishṭánta] known to be possessed of the character of what is to be established [Sádhya] from its being of the same nature as it [Sádhya];" or else, "the example [Udáharaṇa] is a popular datum [Drishṭánta] known not to possess the character of what is to be established [Sádhya], from its being of a nature quite opposite to that of the Sádhya.

That which is generally admitted as existing, is called the established truth [Siddhánta]. It is one of the objects of legitimate knowledge [Prameya]. The reason, why it is separately enunciated, is that the variety of the established truths gives rise to debate [Váda] wrangling [Jalpa] and cavilling [Vitaṇḍá], which cannot take place if there be no established truths.

The aggregate of words [or propositions] by which the demonstration of what is to be proved, is fully accomplished, has five members which are called thus with regard to the aggregate. The five members constitute a group of the proofs [Pramáṇa]: The proposition [Pratijñá] is an authoritative assertion [A'gama], the reason [Hetu] is an inference, the example [Udáharaṇa] is a perception, the application [Upanayana] is the recognition of similarity, the conclusion [Nigamana] is the displaying of the force of all the members to determine a certain object. Such is the great

---

नुज्ञायमानोऽर्थः सिद्धान्तः, स च प्रमेयं, तस्य पृथग्वचनम्, सत्सु सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्त्तन्ते नातोऽन्यथेति साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते। तेषु प्रमाणसमवायः, आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षं, उपनयनमुपमानम्, सर्व्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति सोऽयं परमो न्याय इति एतेन वादजल्पवितण्डाः प्रवर्त्तन्ते नातोन्यथेति तदाश्रया च तत्त्वव्यवस्था। ते चैतेऽवयवाः शब्दविशेषाः सन्तः प्रमेयेन्तर्भूता एवमर्थम् पृथगुच्यन्त इति। तर्को न प्रमाणसङ्गृहीतो न प्रमाणान्तरम् प्रमाणानामनुग्राहकस्तत्वज्ञानाय कल्पते[1], तस्योदाहरणं

---

1. कल्पते instead of कल्प्यते which is the reading found in the edition of the Bibliotheca Indica.

Nyáya or Syllogism. By means of this only, the debate [Váda] wrangling [Jalpa] and cavilling [Vitaṇḍá] are carried on, and not in any other way. Moreover, the establishment of a truth is dependent upon it [Nyáya]. Its five members though included in the category of the objects, as being only different sorts of assertion, are separately enunciated for the said reason.

The reasoning [Tarka] is neither included in any of the instruments of knowledge [Pramáṇa], nor is it a different species of them; but as being subservient to the instruments of knowledge, it succeeds in establishing a truth. Take for example the following question: Does birth originate from a produced cause (i. e. a cause dependent on our activity viz. our actions during a former life) or from a non-produced cause (a cause not dependent on our activity f. i. the will of god) or is it the offspring of mere chance? In a doubtful case like this, the reasoning [Tarka] takes place on the evidence of the proofs. To explain: In the first place, if it be held that birth is caused by some produced cause, the cessation of birth can be effected by the annihilation of its cause.

किमिदं जन्म कृतकेन हेतुना निर्वर्त्स्यते[1] आहोस्विदकृतकेन अथाकस्मिकमिति एवमविज्ञातेऽर्थे कारणोपपत्त्या ऊहः प्रवर्त्तते यदि कृतकेन हेतुना निर्वर्त्स्यते[1] हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः । अथाकृतकेन हेतुना ततो हेतूच्छेदस्याशक्यत्वादनुपपन्नोऽयं जन्मोच्छेदः । अथाकस्मिकमतोऽकस्मान्निर्वर्त्यमानं[2] न पुनर्निर्वर्त्स्यतीति निवृत्तिकारणं नोपपद्यते तेन जन्मानुच्छेद इति । एतस्मिंस्तर्कविषये कर्म्मनिमित्तं जन्मेति प्रमाणानि वर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्वज्ञानविषयस्य विभागात्तत्त्वज्ञानाय कल्पते[3] तर्क इति । सोऽयमित्थंभूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय वाऽर्थस्य

---

1. निर्वर्त्यते instead of निवर्त्यते B. I.

2. निर्वर्त्यमानं instead of निर्वर्त्स्यमानं B. I.

3. कल्पते instead of कल्प्यते B. I.

Digitized by Google

In the second place, if birth is said to be produced from an unproduced cause, the cessation of it cannot be accomplished, the destruction of the cause being quite impracticable. In the third place, if it be causeless, no cause of its cessation is possible; for it is not probable that what now takes place will not do so in the future; and consequently there will be no determined cessation of birth. But in this case, the reasoning [Tarka] favours the authorities stating that birth is caused by the actions [done in a former life]. As the reasoning distinguishes the true object from what is not true, it is said to succeed in establishing the truth. The reasoning of such a description as that mentioned above, when possessed of proofs, tends in a debate either to prove or disprove an object; and for this purpose it is separately enunciated, though included in the category of the objects.—Determination [Nirṇaya] is the knowledge of the truth resulting from the proofs or the instruments of knowledge. In it terminates the debate [Váda]. The wrangling [Jalpa] and cavilling [Vitaṇḍá] are said to support it [the determination]. These two, i. e. reasoning and determination, carry on the daily business of man. For this reason, the determination [Nirṇaya] though included in the objects, is separately enunciated.

The debate [Váda] which is a collection of assertions or speeches proceeding from many speakers, tending to prove opposite

---

भवतीत्येवमर्थम्पृथगुच्यते प्रमेयान्तर्भूतोपीति, निर्णयस्तत्वज्ञानम् प्रमाणानां फलम्, तदवसानो वादः, तस्य पालनार्थं जल्पवितण्डे, तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थम् पृथगुद्दिष्ट इति । वादः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम्, उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति तद्विशेषौ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम् । निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति, जल्पवितण्डयोस्तु निग्रहस्थानानीति छलजाति-

opinions and terminating in the establishment of one of the two opinions is separately enunciated for the sake of information. For, if we are informed about it, it enables us to arrive in our discussions at the knowledge of truth. It has been said, that wrangling and cavilling which are different kinds of debate, are used for the purpose of defending or supporting one's certainty of truth.—The fallacies [Hetvábhása] are enunciated separately from the predicaments of rebuke [Nigrahasthána], for the former are often started in debate [Váda], while the predicaments of rebuke are made use of in wrangling and cavilling; therefore deception [chhala] futile arguments [Játi] and predicaments of rebuke are separately enunciated for the sake of information. When the nature of deception, futile arguments and predicaments of rebuke is well known to us, we can avoid them in our own arguments and detect them in those of our adversaries. We can easily refute the futile arguments started by our opponents as well as we can make use of them ourselves. Thus Ánvíkshikí or the science of review being divided into the categories of instruments of knowledge and so forth is said to be "in the department of learning as a lamp to all the sciences, a plan for all the actions and a support to all the religious duties." The meaning of the phrase 'Tattvajńána,' or knowledge of the truth which is required for the sake of the attainment of the highest

---

निग्रहस्थानानाम् पृथगुद्देश उपलक्षणार्थं इति । उपलक्षितानां स्ववाक्ये परिवर्जनम् । छलजातिनिग्रहस्थानानाम् परवाक्ये पर्य्यनुयोगः । जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयञ्च सुकरः प्रयोग इति । सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना "प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम् आश्रयः सर्व्वधर्म्माणां विद्योद्देशे प्रकीर्त्तिता" तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम् । इहत्वध्यात्मविद्यायामात्मादितत्त्वज्ञानम् । निःश्रेयसाधिगमोऽपवर्गप्राप्तिः । तत् खलु निःश्रेयसं किन्तत्त्वज्ञानानन्तरमेव भवति नेत्युच्यते किन्तर्हि तत्त्वज्ञानात् ॥ १ ॥

good, is to be understood according to the nature of the science. In this science, that is, the science of mind, knowledge of truth signifies the true knowledge of the soul and so forth; the attainment of the highest good means the attainment of beatitude. But now the question arises: is the highest good attained immediately after one has acquired the knowledge of truth? We answer: No.—How then?

2. APHORISM.

When (from the knowledge of truth) successive annihilation of pain, birth, activity, fault and false notions (beginning with the last member of the series) takes place, there ensues the annihilation of the member immediately preceding (in the series) and from this results emancipation.

2. COMMENTARY.

There is a variety of false notions concerning the objects, from the soul to beatitude; as for example, to consider the soul as not existing, the non-soul as the soul, misery as happiness, the transient as everlasting, the unsupporting as supporting, the fearful as fearless, the disgusting as agreeable, that which is to be

---

सू॰ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ २ ॥

भा॰ तत्रात्माद्यपवर्गपर्य्यन्तप्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्त्तते आत्मनि तावन्नास्तीति अनात्मन्यात्मेति दुःखे सुखमिति अनित्ये नित्यमिति अत्राणे त्राणमिति सभये निर्भयमिति जुगुप्सितेऽभिमतमिति हातव्येऽप्रतिहातव्यमिति प्रवृत्तौ नास्ति कर्म्म, नास्ति कर्म्मफलमिति दोषेषु नायं दोषनिमित्तः संसार इति प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा यः प्रेयात् प्रेत्य च भवेदिति । अनिमित्तं जन्म । अनिमित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावोऽनन्तश्चेति नैमित्तिकः सन्

relinquished as not to be relinquished; the activity as bereft of actions and fruits from them; this worldly existence though full of vices as not causing them [vices]; there is no mind or soul transmigrating that dies to be born again; mortal life is causeless, so is the cessation of it; the transmigration of the soul has a beginning but no end and it is produced by some cause, itself not being the cause of any action. The state of being dead and that of being born, which are accompanied respectively by the destruction and restoration of the continuous connection of the body, senses, intellection and feelings, are without the soul. Beatitude is something terrible. It is the cessation of all actions and much good is lost in beatitude which is destitute of all things. How, therefore, could a wise man be pleased with such beatitude which is a mere unconscious state [of mind] deprived of all feelings of pleasure. From such false notions liking for pleasant things and dislike of unpleasant things is produced. By the influence of love and hatred the vices of calumny, jealousy, fraud, avarice and so forth are produced. Being actuated by these vices, one commits, with the body, murders, theft and illicit carnal intercourse; utters with the tongue false, harsh piercing and irrelevant language; with the mind, hates other people, covets their riches, and embraces atheism. Such is the sinful activity which is leading to irreligiousness. Whereas the

---

कर्मनिमित्तः प्रेत्यभाव इति । देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति । अपवर्गो भीष्मः । स खल्वयं सर्वकार्योपरमः सर्वविप्रयोगेऽपवर्गे बहु च भद्रकं लुप्यत इति कथं बुद्धिमान् सर्वसुखोच्छेदमचैतन्यममुमपवर्गं रोचयेदिति । एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराच्चासूयेर्ष्यामायालोभादयो दोषा भवन्ति । दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति । वाचाऽनृतपरुषसूचनासम्बद्धानि मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यञ्चेति । सेयं पापात्मिका प्रवृत्तिरधर्माय । अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्च । वाचा सत्यं

Digitized by Google

pious activity is leading to acts of virtue and religion; such as, with the body, donation, protection and service; with the tongue speaking true, advantageous and agreeable language and reading the Vedas; with the mind, kindness, contentedness and faith. Here, by the word "activity" [Pravṛitti] are meant religion [Dharma] and irreligion [Adharma], although they really are the means of it only; just in the same manner as food is said to be the vital airs [Práṇa] of living beings, although it is only the means of [supporting] the vital airs. Such activity is the cause of birth or mortal life, either noble or ignoble. Birth is defined as the manifestation of body, senses and intellection, all of them being combined. Where there is birth there is pain, which is felt as disagreeable, it being distress, anguish or misery. Worldly existence [Sansára] is nothing but the uninterrupted existence of all these phenomena, of which the false notion is the first and pain, the last. When by means of knowledge of the truth, the false notion is removed, then the vices depart; on the removal of the vices, activity ceases; on the departure of activity, birth is stopped; on the cessation of birth, misery is annihilated; on the annihilation of misery the final or perfect beatitude or the highest good ensues. Now the knowledge of truth is explained by the contrary of the false notions: as, for

---

हितं प्रियं स्वाध्यायञ्चेति । मनसा दयामस्पृहां श्रद्धाञ्चेति सेयं धर्म्माय । अत्र प्रवृत्तिसाधनौ धर्म्माधर्म्मौ प्रवृत्तिशब्देनोक्तौ । यथाऽन्नसाधनाः प्राणाः । "अन्नं वै प्राणिनः प्राणा इति" । सेयं कुत्सितस्याभिपूजितस्य च जन्मनः कारणम्, जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः । तस्मिन् सति दुःखम्, तत्पुनः प्रतिकूलवेदनीयम् बाधना पीडा ताप इति । इमे मिथ्याज्ञानादयो दुःखान्ता धर्म्मा अविच्छेदेनैव प्रवर्त्तमानाः संसार इति । यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयन्ति दोषापाये प्रवृत्तिरपैति प्रवृत्त्यपाये जन्मापैति जन्मापाये दुःखमपैति दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेय-

instance, to understand that the soul is existing, that the non-soul is different from the soul and that all other things, namely, misery, the transient, the unsupporting, the fearful, the disgusting and the relinquishable, are just so as they really are; that activity is possessed of actions and fruits of them. Again, that the worldly existence [Saṅsára] is caused by the vices, which are found in the world; that the soul or the animal soul undergoes the state of transmigration, that is, is born again after having been dead; that the mortal life, as well as its cessation, has its cause; that the transmigration of the soul has no beginning, but terminates in beatitude, and being produced by some cause is itself the cause of [one's] activity; that transmigration, though belonging to the soul, consists of successive destruction and restoration of the continuous connection between the body, senses, intellection and feelings; that beatitude is peace and is quite destitute of all things and actions; that by means of it all pain and all dreadful sin is removed. How should a wise man, therefore, not like beatitude which eradicates all misery, being itself quite free from every feeling of pain. As food mixed with intoxicating liquor or poison is unacceptable, just so is happiness mixed with pain.

This science [Nyáyavidyá] proceeds by three different ways, namely by enunciation, definition and examination. Enunciation is

---

र्गमिति । तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम्, आत्मनि तावदस्तीति अनात्मन्यनात्मेति एवं दुःखेऽनित्येऽत्राणे संभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम्, प्रवृत्तौ अस्ति कर्म्म अस्ति कर्म्मफलमिति दोषेषु दोषनिमित्तोऽयं संसार इति । प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्त्व आत्मा वा यः प्रेत्य भवेदिति । निमित्तवज्जन्म निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावोऽपवर्गान्त इति नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्तत इति । अपवर्गः शान्तः खल्वयं सर्व्वविप्रयोगः सर्व्वोपरमोऽपवर्गः । बहु च कृच्छ्रं घोरं पापकं लुप्यत इति

the mere enumeration of the categories by their names. Definition is that character belonging to one of the enunciated objects, which distinguishes it from all the other objects not possessing that character. Examination is the investigation undertaken in order to ascertain, by means of the proofs whether the definition or character of an object agrees with it (the defined object) or not. In this work, the definitions of some categories are given after their divisions are shown; as the definition of the proofs [Pramáṇa] and those of the objects [Prameya]; and sometimes, after the definitions of some are given, their divisions are shown, as in the case of fraud [chhala]; "Fraud is to contradict another's assertion by making use of its (unintentional) ambiguity. It is of three kinds." Now the author gives the division of what has been enunciated i. e. the proofs [Pramáṇa].

3. APHORISM.

Perception [Pratyaksha] inference [Anumána] comparison or knowledge of resemblance [Upamána] and words or testimony [Śabda] are the instruments of knowledge or proofs [Pramáṇa].

3. COMMENTARY.

The word Pratyaksha [in the text] signifies the abiding of the senses in objects. The word 'abiding' means either the

---

कथं बुद्धिमान् सर्व्वदुःखोच्छेदं सर्व्वदुःखासंविदपवर्गं न रोचयेदिति । कल्पया मधुविषपृक्तान्नमनादेयमिति एवं सुखं दुःखानुषक्तमनादेयमिति । त्रिविधाचास्य शास्त्रस्य प्रवृत्तिः । उद्देशो लक्षणं परीक्षा चेति, तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः, तत्रोद्दिष्टस्याऽतत्त्वव्यवच्छेदकोधर्म्मो लक्षणम् । लक्षितस्य तथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा, तत्रोद्दिष्टस्य प्रविभक्तस्य लक्षणमुच्यते यथा प्रमाणानां प्रमेयस्य च, उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् तत् त्रिविधमिति । अथोद्दिष्टस्य विभागवचनम् ॥

connection of an organ of sense with its object, or the cognition itself [produced from the contact]. Whenever the connection [of the senses with their objects] takes place, right notion follows; and when we have the right notion there arises within us either a desire to possess (the object) or a desire to shun it or a feeling of indifference.—Inference [Anumána] means to know something through the knowledge of a sign.—

Comparison [Upamána] means the knowledge of resemblance; as, we know that just as the cow is so is the Gavaya. Resemblance is a common property [of things].—By words or testimony [Śabda] we mean significant words. It must be understood that proofs [Pramáṇa] are called the instruments of knowledge on account of the literal sense of the word Pramáṇa, namely, that by which something is known. In like manner, all the words indicating the particular kinds of proofs [Pramáṇas] are explained in the same way as the term Pramáṇa. Now, do the proofs [Pramáṇas] promiscuously show us the same objects; or do they discriminately have their proper or separate objects? Both of these cases are observed. As for instance, we know the soul

सू० प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

भा० अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः फलम्। अनुमानम्। मितेन लिङ्गेनार्थस्य पश्चान्मानमनुमानम्। उपमानं सारूप्यज्ञानम्[1] यथा गौरेवं गवय इति, सारूप्यन्तु[2] सामान्ययोगः। शब्दः, शब्द्यतेऽनेनार्थ इत्यभिधीयते ज्ञाप्यते। उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद्बोद्धव्यम्, प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दस्तद्विशेषसमाख्याया अपि[3] तथैव

1. V. L. सामीप्यज्ञानं.
2. V. L. सामीप्यन्तु.
3. V. L. °समाख्यास्वपि.

as existing either from the words or testimony of trustworthy people or from the inference which we draw from the signs of the soul, namely, desire, aversion, volition, pleasure, pain and cognition. Moreover, the soul is directly perceived by a sage by means of his religious meditation during which his mind (manas) is united with his soul (átman). Another example is the following: we know from testimony that there is a fire in a certain place; stepping on towards the place, we can conclude that there is a fire, from the sight of the smoke; having got quite close to it we can directly perceive it. Now in order to exemplify the case where the different proofs do not apply to the same object, we quote the following injunction: one wishing to attain paradise should offer the Agnihotra-sacrifice. Here an ordinary man does not know what paradise is either by inference or by perception. On hearing thunder we know the cause of the sound only by inference, for it is known neither by perception nor by testimony. To have a cognition of our own hand which we directly perceive we need neither inference nor testimony. Amongst all the instruments of right notion, perception is the most important. Thus a person who receives information about an object which he desires to know, from the testimony of a truthful man, wants at first to know the same

---

व्याख्यानम् । किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते अथ प्रमेयं व्यवतिष्ठन्त इत्युभयथा दर्शनम् । अस्त्यात्मेत्याप्तोपदेशात् प्रतीयते तत्रानुमानमिच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति । प्रत्यक्षं युञ्जानस्य योगसमाधिजमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति, अग्निराप्तोपदेशात् प्रतीयते अत्राग्निरिति, प्रत्यासीदता धूमदर्शनेनानुमीयते । प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते, व्यवस्था पुनरग्निहोत्रं जुहुयात् स्वर्गकाम इति । लौकिकस्य स्वर्गे न लिङ्गदर्शनं न प्रत्यक्षम् । स्तनयित्नुशब्दे श्रूयमाणे शब्दहेतोरनुमानम् तत्र न प्रत्यक्षं नागमः, पाणौ प्रत्यक्षत उपलभ्यमाने नानुमानं नागम इति । साचेयं प्रमितिः प्रत्यक्षपरा, जिज्ञासि-

Digitized by Google

[object] through the inference drawn from the sight of its sign. And then, even after the object has been inferred from the appearance of its sign, yet he desires to perceive it directly, and when the object is directly perceived, his desire to know it ceases. Regarding the example of the fire mentioned above there is a multitude of proofs promiscuously informing the knower of the object in question. Non-promiscuity [asaṅkara] is discriminateness [Vyavasthá].

(Here ends the "trisútríbháshyam" the commentary on the first three sútras).

Now the author proceeds to give the definition of the means of knowledge which have been distinguished in the preceding aphorism.

4. APHORISM.

The not erroneous and determinate knowledge unrepresentable by words and produced from the contact of the organs of sense with the objects is called Perception [Pratyaksha].

COMMENTARY.

That knowledge which is produced from the contact of an organ of sense with its object is called perception. Now, is not

---

तमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते । लिङ्गदर्शनानुमितञ्च प्रत्यक्षतो दिदृक्षते, प्रत्यक्षत उपलब्धेऽर्थे जिज्ञासा निवर्त्तते । पूर्वोक्तमुदाहरणम् अग्निरिति प्रमातुः प्रमातव्येऽर्थे प्रमाणानां सङ्करोऽभिसंप्लवः । असङ्करो व्यवस्थेति । इति त्रिसूत्रीभाष्यम् ॥ ३ ॥

अथ विभक्तानां लक्षणवचनमिति ॥

सू॰ इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकम् प्रत्यक्षम् ४ ॥

भा॰ इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यत् ज्ञानं तत् प्रत्यक्षम् । न तर्हीदानीमिदं भवति आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रि-

Digitized by Google

perception produced in that way that the soul is joined with the internal sensory, [Manas] this with the sense and this with the object? [Yes], but the given definition is not intended to show the full extent of the cause of perception, but only to specify that part of its cause which is particular to it; and consequently the remaining part of it which is common to the knowledge from inference and so forth, is not denied (by this definition) to perception. [It may be urged that] the contact of mind with the senses may be given as the special cause of perception. We answer, that such cannot be the case; for the contact of mind not varying with varying perception is nothing but a cause common to all sorts of perception. As many objects as there are [in the world] so many are the words of designation, by which the objects are known; and from the knowledge of these objects all the worldly business becomes possible. Now, such knowledge produced from the contact of a sense with its object is f. i. the knowledge of colour or of taste. The words "colour" and "taste" are the designations of some objects, and according to these designations of objects the cognitions of them are named. So it is said, 'one knows colour, one knows taste.' Since knowledge conveyed by words of designation would be verbal knowledge [Sábda], that is knowledge produced from hearing the words, therefore the author says in the text that knowledge originating from perception is unrepresentable by words [Avyapadeśya].

यमर्थेनेति, नेदं कारणावधारणमेतावत् प्रत्यक्षे कारणमिति किन्तु विशिष्टकारणवचनमिति यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते, यत्तु समानमनुमानादिज्ञानस्य न तन्निवर्त्यत इति । मनसस्तर्हीन्द्रियेण संयोगो वक्तव्यः । भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त इति । यावदर्थं वै नामधेयशब्दास्तैरर्थसंप्रत्ययः अर्थसम्प्रत्ययाच्च व्यवहारः । तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नमर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति, रूपरसशब्दाश्च विषयनामधेयम् । तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते रस इति जानीते नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दम्

Digitized by Google

The relation between an object and its designation, that is, the fact that such and such an object has such and such a designation being known or not known, man can know the object, and after having known the relation between it and its name he can express his notion of the object by its designation. When we perceive an object, the knowledge proceeding from the act of perceiving it cannot be distinguished from our previons knowledge of the same object; the one being quite equal to the other, though differing from it in kind or nature.

F. i. the cognition of fire resulting from inference and the cognition of fire resulting from perception are equal both being cognitions of the same object; at the same time they are different by resulting from different mental processes.

Nor have we any other appellation expressive of the knowledge, whereby we may expressly communicate it to others; since the communication of knowledge is impossible if it should not be expressed. Therefore knowledge is expressed by the word of appellation of the object perceived; that word being joined with the particle 'Iti' [meaning consisting of]. As for instance 'Rúpam iti jñánam' that is, knowledge consisting of the idea of

---

प्रसज्यते अतश्चाद्दाव्यपदेश्यमिति । यदिदमनुपयुक्ते शब्दार्थसम्बन्धेऽर्थज्ञानं तन्नामधेयशब्देन व्यपदिश्यते, गृहीतेपि च शब्दार्थसम्बन्धेऽस्यार्थस्याऽयं शब्दो नामधेयमिति, यदा तु सोऽर्थो गृह्यते तदा तत् पूर्व्वस्मादर्थज्ञानान्न विशिष्यते तदर्थविज्ञानं तादृगेव भवति तस्य त्वर्थज्ञानस्यान्यः समाख्याशब्दो नास्ति येन प्रतीयमानं व्यवहाराय कल्पेत[1] न चाप्रतीयमानेन व्यवहारः। तस्माज्ज्ञेयस्यार्थस्य[2] संज्ञाशब्देनेतिकरणयुक्तेन निर्द्दिश्यते रूपमिति ज्ञानं रस इति ज्ञानमिति तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते व्यवहारकालेतु व्याप्रियते, तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति । ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्द-

---

1. कल्पेत instead of कल्प्येत B. I.

2. तस्माज्ज्ञेयस्यार्थस्य instead of तस्याज्ञेयस्यार्थस्य· B. I.

Digitized by Google

colour; 'Rasa iti jñánam' that is, knowledge consisting of the idea of taste, and so forth.

The word of designation of an object is not employed during the act of perceiving it; it is employed only when perception of an object is to be communicated to others. Therefore, knowledge of an object produced from the contact of a sense with the object, differs from the knowledge conveyed by words. But now somebody might object: When, in summer, solar rays coming into contact with the vapours floating on the earth, meet the eye of a man, a long way off, then he forms the idea of water, produced from the contact of the sense with the object, and this knowledge may be considered 'perception.' (In order to prevent such objections) the text adds the word "not erroneous." To perceive what is not is erroneous perception; and to perceive what is, is not erroneous perception.

A person perceiving a distant object with the eye is not able to determine whether it is a column of smoke or one of dust, and this indeterminate knowledge produced from the contact of the sense with the object may be considered perception; therefore (in order to prevent this assumption) the text adds the word 'determinate.' It must not be understood that indetermi-

---

माना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते तच्च प्रत्यक्षम् प्रसज्यतइत्यत आह अव्यभिचारीति । यदतस्मिंस्तदिति तद्व्यभिचारि, यत्तु तस्मिंस्तदिति तदव्यभिचारी प्रत्यक्षमिति । दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा, रेणुरिति वा तदेतदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानम् प्रत्यक्षम् प्रसज्यतइत्यत आह व्यवसायात्मकमिति, न चैतन्मन्तव्यम्[1] आत्ममनःसन्निकर्षजमेवानवधारणज्ञानमिति । चक्षुषा ह्ययमर्थं पश्यन्नावधारयति । यथा चेन्द्रियेणो-

---

1. नचैतन्मन्तव्यं instead of नत्वेतन्मन्तव्यं. B. I.

nate knowledge is possible only from the contact of the soul with the mental sensory [Manas]; for one perceiving an object with the eye cannot determine it, therefore one apprehends, with the mental sensory what one has perceived with the organ of sense. Sometimes one cannot ascertain an object by means of the mental sensory as well as the senses. Such special kind of indetermination or the mere mental deliberation, characterised by the indeterminatedness of an object, both by an organ of sense and by the mental sensory, is doubt [Sanśaya] which is not possible before the said indetermination takes place. Always in perception the perceiver first determines and then redetermines an object of sense by means of an organ of sense and the mental sensory respectively; inasmuch as the redetermination is impossible with those persons who have lost all the organs of sense. It may be objected that the soul, pleasure and so forth, are generally received as objects of perception, but the given definition of perception does not comprise the knowledge of them, their knowledge being produced from no contact of sense with objects. We answer that the mental sensory is nothing but one of the organs of sense, and its separate enunciation is owing to the difference of its characters. For the ordinary organs of sense are material and confined to certain classes of object; the nature of their being

---

पलब्धमर्थं मनसोपलभते । एवमिन्द्रियेणानवधारयन् मनसा नावधारयति यच्चैतदिन्द्रियानवधारणपूर्व्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयोन पूर्वमिति सर्व्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः पश्चात् मनसाऽनुव्यवसायः उपहतेन्द्रियाणामनुव्यवसायाऽभावादिति । आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यम् अनिन्द्रियार्थसन्निकर्षजं हि तदिति, इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो

the organs of sense rests on their possession of peculiar qualities. Whereas the mental sensory is immaterial and takes every thing as its object; nor does the nature of its being an organ of sense rest on its possession of peculiar qualities. It will be noticed in the sequel that, an object being in contact with an organ of sense, the presence of the mental sensory to one object together with its absence from another object is the reason why cognitions more than one do not take place simultaneously in the human mind. The mental sensory being one of the organs of sense, no other definition of perception [for the sake of the soul and so forth] is required. The fact that it is one of the organs of sense is supported by the authority of other sciences. For it is a general rule of science that a doctrine of one science, which is not in conflict with the rules of some other science is to be considered valid in the other science too. So much for perception.

KESAVA ŚASTRI.

(To be continued).

धर्म्मभेदात् । भौतिकानीन्द्रियाणि नियतविषयाणि । सगुणानाञ्चैषामि-
न्द्रियभाव इति । मनस्त्वभौतिकं सर्व्वविषयञ्च नास्य सगुणस्येन्द्रियभाव
इति सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपज्ज्ञानानुत्प-
त्तिकारणं वक्ष्याम इति । मनसश्चेन्द्रियभावाच्च वाच्यं लक्षणान्तरमिति ।
तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति परमतमप्रतिषिद्धमनुमतमिति
हि तन्त्रयुक्तिः ॥ व्याख्यातम् प्रत्यक्षम् ॥

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3. AUGUST 1st 1877. Vol. II.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.
1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

सप्तमाध्यायस्य प्रथमः पादः ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥

तृतीयादिषु विभक्तिष्वजादिषु भाषितपुंस्कं नपुंसकलिङ्गमिगन्तं गालवस्याचार्यस्य मतेन पुंवद्भवति । यथा पुंसि ह्रस्वनुमौ न भवतस्तद्वदत्रापि न भवत इत्यर्थः । ग्रामणीर्ब्राह्मणः । ग्रामणि ब्राह्मणकुलम् । ग्रामण्या ब्राह्मणकुलेन । ग्रामणिना ब्राह्मणकुलेन । ग्रामण्ये ब्राह्मणकुलाय । ग्रामणिने ब्राह्मणकुलाय । ग्रामण्यो ब्राह्मणकुलात् । ग्रामणिनो ब्राह्मणकुलात् । ग्रामण्यो ब्राह्मणकुलस्य । ग्रामणिनो ब्राह्मणकुलस्य । ग्रामण्योर्ब्राह्मणकुलयोः । ग्रामणिनोर्ब्राह्मणकुलयोः । ग्रामण्यां ब्राह्मणकुलानाम् । नुमचि रेति पूर्वविप्रतिषेधेन नुट् । ग्रामणीनां ब्राह्मणकुलानाम् । ग्रामण्यां ब्राह्मणकुले । ग्रामणिनि ब्राह्मणकुले । शुचिर्ब्राह्मणः । शुचि ब्राह्मणकुलम् । शुचिना ब्राह्मणकुलेन २ । शुचये ब्राह्मणकुलाय । शुचिने ब्राह्मणकुलाय । शुचेर्ब्राह्मणकुलात् । शुचिनो ब्राह्मणकुलात् । शुचेर्ब्राह्मणकुलस्य । शुचिनो ब्राह्मणकुलस्य । शुच्योर्ब्राह्मणकुलयोः । शुचिनोर्ब्राह्मणकुलयोः । शुचौ ब्राह्मणकुले । शुचिनि ब्राह्मणकुले । तृतीयादिष्विति किम् । ग्रामणिनी ब्राह्मणकुले । शुचिनी ब्राह्मणकुले । भाषितपुंस्कमिति किम् । त्रपुणे । जतुने । इह कस्मान्न भवति । पीलुवृक्षः, पीलु फलं, पीलुने फलायेति । समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते तस्य पुंवद्भावः । इह तु वृक्षाकृतिः प्रवृत्तिनिमित्तं पुंसि शब्दस्य । फलाकृतिर्नपुंसके । तदेतदेवं कथं भवति भाषितपुंस्कमिति । भाषितः पुमान्यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते । तद्योगादभिधेयमपि यद् नपुंसकं तदपि भाषितपुंस्कम् । तस्य प्रतिपादकं यच्छब्दरूपं तदपि भाषितपुंस्कमिति । इक इत्येव । कीलालपा ब्राह्म-

यः । कीलालपं ब्राह्मणकुलम् । कीलालपेन ब्राह्मणकुलेन । अचीत्येव । ग्रामणीभ्यां ब्राह्मणकुलाभ्याम् ॥

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ ७५ ॥

अस्थि दधि सक्थि अक्षि इत्येतेषां नपुंसकानां तृतीयादिष्वजादिषु विभक्तिषु परतो ऽनङित्ययमादेशो भवति, स चोदात्तो भवति । अस्थ्ना । अस्थ्ने । दध्ना । दध्ने । सक्थ्ना । सक्थ्ने । अक्ष्णा । अक्ष्णे । अस्थ्यादय आद्युदात्तास्तेषामनङादेशः स्थानिवद्भावादनुदात्तः स्यादित्युदात्तवचनम् । तत्र भसंज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता भवति ॥ एतैरस्थ्यादिभिर्नपुंसकैरनपुंसकस्याप्यङ्गस्य तदन्तग्रहणमिष्यते ॥ प्रियास्थ्ना ब्राह्मणेन । प्रियदध्ना * । तृतीयादिष्विति किम् । अस्थिनी । दधिनी । अचीत्येव । अस्थिभ्याम् । दधिभ्याम् ॥

छन्दस्यपि दृश्यते ॥ ७६ ॥

अस्थिदधिसक्थ्यक्ष्णामनङ् छन्दस्यपि दृश्यते । यत्र विहितस्ततोन्यत्रापि दृश्यते । अचीत्युक्तमनजादावपि दृश्यते । इन्द्रो दधीचो अस्थभिः । भद्रं पश्येमाक्षभिः । तृतीयादिष्वित्युक्तमतृतीयादिषु दृश्यते । अस्थान्युत्कृत्य जुहोति । विभक्तावित्युक्तमविभक्तावपि दृश्यते । अक्षण्वता लाङ्गलेन । अस्थन्वन्तं यदनस्था बिभर्ति ॥

ई च द्विवचने ॥ ७७ ॥

द्विवचने परतश्छन्दसि विषये ऽस्थ्यादीनामीकारादेशो भवति, स चोदात्तः । अक्षी ते इन्द्रपिङ्गले कपेरिव । अक्षीभ्यां ते नासिकाभ्याम् । अक्षी इत्यत्र नुम्परत्वादीकारेण बाध्यते । तत्र कृते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति पुनर्नुम्न क्रियते ॥

नाभ्यस्ताच्छतुः ॥ ७८ ॥

अभ्यस्तादङ्गादुत्तरस्य शतुर्नुम्न भवति । ददत् । ददतौ । ददतः ।

* प्रियास्थ्ने । प्रियदध्ने । प्रियसक्थ्ना । प्रियसक्थ्ने । प्रियाक्ष्णा । प्रियाक्ष्णे । एतान्युदाहरणान्यधिकान्येकस्मिन् पुस्तके ।

दधत् । दधतौ । दधतः । जक्षत् । जक्षतौ । जक्षतः । जाग्रत् । जाग्रतौ । जाग्रतः । शतुरनन्तर ईकारो न विहित इति व्यवहितस्यापि नुमः प्रतिषेधो विज्ञायते ॥

वा नपुंसकस्य ॥ ७९ ॥

अभ्यस्तादङ्गादुत्तरो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य वा नुमागमो भवति । ददति ददन्ति कुलानि । दधति दधन्ति कुलानि । जक्षति जक्षन्ति कुलानि । जाग्रति जाग्रन्ति कुलानि ॥

आच्छीनद्योर्नुम् ॥ ८० ॥

अवर्णान्तादङ्गादुत्तरस्य शतुर्वा नुमागमो भवति शीनद्योः परतः । तुदती कुले । तुदन्ती कुले । तुदन्ती ब्राह्मणी । तुदती ब्राह्मणी । याती कुले । यान्ती कुले । याती ब्राह्मणी । यान्ती ब्राह्मणी । करिष्यती कुले । करिष्यन्ती कुले । करिष्यती ब्राह्मणी । करिष्यन्ती ब्राह्मणी । अत्रान्तरङ्गत्वादेकादेशे कृते व्यपवर्गाभावादवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुम् । उभयत आश्रये नान्तादिवदित्यन्तादिवद्भावोपि नास्ति । भूतपूर्वगत्याश्रयणे वा ऽदती घ्नतीत्येवमादिष्वतिप्रसङ्ग इति । अत्र समाधिं केचिदाहुः । शतुरवयवे शतृशब्दो वर्त्तते । अवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति *। अपरे पुनराहुः । आदित्येतेन शीनद्यावेव विशेष्येते । अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ तयोः परतः शत्रन्तस्य नुम्भवतीति । तत्र येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति तकारेणैव व्यवधानमाश्रयिष्यते । आदिरिति किम् । कुर्वती । सुन्वती । शीनद्योरिति किम् । तुदताम् । नुदताम् ॥

शप्श्यनोर्नित्यम् ॥ ८१ ॥

शप् श्यन् इत्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति । पचन्ती कुले । पचन्ती ब्राह्मणी । दीव्यन्ती कुले । दीव्यन्ती ब्राह्मणी ।

---

* यथा ग्रामो दग्ध इति ग्रामैकदेशे ग्रामशब्दो निर्दिश्यत इत्यधिकमेकस्मिन्पुस्तके ।

सीव्यन्ती कुले । सीव्यन्ती ब्राह्मणी । नित्यग्रहणं वेत्यस्याधिकारस्य निवृत्त्यर्थम् । इहारम्भसामर्थ्यान्नित्यमुत्तरत्र विकल्प एवेत्याशङ्क्येत ॥

सावनडुहः ॥ ८२ ॥

सौ परतो ऽनडुहोऽङ्गस्य नुमागमो भवति । अनड्वान् । हे अनड्वन् । अत्र के चिदादित्यधिकारादाममोः कृतयोर्नुमं कुर्वन्ति । तेन नुमामामागमौ न बाध्येते, आममभ्यां च नुमिति । अपरे तु सत्यपि सामान्यविशेषत्वे आममोर्नुमश्च समावेशमिच्छन्ति न बाध्यबाधकभावं, यथा चिचीषत्यादिषु दीर्घत्वद्विर्वचनयोरिति ॥

दृक्स्ववस्स्वतवसां छन्दसि ॥ ८३ ॥

दृक् स्ववस् स्वतवस् इत्येतेषां सौ परतो नुमागमो भवति छन्दसि विषये । ईदृङ् । तादृङ् । यादृङ् । सदृङ् । स्ववान् । स्वतवान्पायुरग्ने ॥

दिव औत् ॥ ८४ ॥

दिवित्येतस्य सौ परतो औदित्ययमादेशो भवति । द्यौः । दिविति प्रातिपदिकमस्ति निरनुबन्धकम् । धातुस्तु सानुबन्धकः स इह न गृह्यते । अक्षद्यूः ॥

पथिमथ्यृभुक्षामात् ॥ ८५ ॥

पथिन् मथिन् ऋभुक्षिन् इत्येतेषामङ्गानां सौ परत आकार आदेशो भवति । पन्थाः । मन्थाः । ऋभुक्षाः । स्थानिन्यनुनासिके ऽपि आकारो ऽननुनासिको न भवति । भाव्यमानेन सवर्णानां ग्रहणं न भवतीति * शुद्धो ऽयमुच्चार्यते ॥

इतोत्सर्वनामस्थाने ॥ ८६ ॥

पथ्यादीनामिकारस्य स्थाने आकारादेशो भवति । सर्वनामस्थाने परतः । पन्थाः । पन्थानौ । पन्थानः । मन्थाः । मन्थानौ । मन्थानः । मन्थानम् । मन्थानौ । पन्थानम् । पन्थानौ । ऋभुक्षाः । ऋभुक्षाणौ ।

* भाव्यमानो ऽण् सवर्णान् न गृह्णातीति पा० २ ।

ऋभुक्षाणः । ऋभुक्षाणम् । ऋभुक्षाणौ । भादिति वर्तमाने पुनरनुवचनं णपूर्वार्थम् । ऋभुक्षणमित्यत्र वा षपूर्वस्य निगमइति दीर्घविकल्पः ॥

थो न्थः ॥ ८७ ॥

पथिमथोस्थकारस्य स्थाने न्थ इत्ययमादेशो भवति सर्वनामस्थाने परतः । पन्थाः । पन्थानौ । पन्थानः । मन्थाः । मन्थानौ । मन्थानः ॥

भस्य टेर्लोपः ॥ ८८ ॥

पथ्यादीनां भसंज्ञकानां टेर्लोपो भवति । पथः । पथा । पथे । मथः । मथा । मथे । ऋभुक्षः । ऋभुक्षा । ऋभुक्षे । सर्वनामस्थानइत्यनुवर्तमानमपि विरोधादिह न संबध्यते ॥

पुंसोऽसुङ् ॥ ८९ ॥

पुंस इत्येतस्य सर्वनामस्थाने परतोऽसुङित्ययमादेशो भवति । पुमान् । पुमांसौ । पुमांसः * । इह परमपुमानिति प्रागेव विभक्त्युत्पत्तेः समासान्तोदात्तत्वमुत्पत्तायां विभक्तौ असुङित्यनिष्टः स्वरः प्राप्नोति । तदर्थमसुङ्युपदेशिवद्वचनं कर्तव्यम् । तेन परमपुमानित्यन्तोदात्तो भवति । पुमानित्ययं पुनराद्युदात्त एव ॥

गोतो णित् ॥ ९० ॥

गोशब्दात्परं सर्वनामस्थानं णिद्भवति । णित्कार्याणि तत्र भवन्तीत्यर्थः । गौः । गावौ । गावः । तपरकरणं किम् । चित्रगुः । शबलगुः । कथं हे चित्रगो हे शबलगव † इति, सकृत्प्रवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति संबुद्धिलक्षणेोर्गुणे कृते णित्त्वं न भवति । अथ वा गोत इति संबन्धलक्षणा षष्ठी । गोतः संबन्धि यत्सर्वनामस्थानमिति । यच्च तदर्थस्यैकत्वादिषु सर्वनामस्थानं तद्गोः सर्वनामस्थानमित्युच्यते । चित्रगुशब्दात्तु सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादीनाह । तपरकरणं तु निर्देशार्थमेव । के चिदोतो णिदिति पठन्ति । द्योशब्दादपि विध्यते तदर्थम् । द्यौः । द्यावौ ।

* सर्वनामस्थान इत्येव । पुंसः पश्येत्यधिकमेकस्मिन्पुस्तके ।

† हे चित्रगव इति पा० ग ।

भावः । गोत इत्येव तपरकरणनिर्देशादोकारान्तोपलक्षणं द्रष्टव्यम् । वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम् ॥

णलुत्तमो वा ॥ ९१ ॥

उत्तमो णल्वा णिद् भवति । णित्कार्यं तत्र वा भवतीत्यर्थः । अहं चकर । अहं चकार । अहं पपच । अहं पपाच ॥

सख्युरसंबुद्धौ ॥ ९२ ॥

असंबुद्धौ यः सखिशब्दः तस्मात्परं सर्वनामस्थानं णिद्भवति । सखायौ । सखायः । असंबुद्धाविति किम् । हे सखे ॥

अनङ् सौ ॥ ९३ ॥

सखिशब्दस्य सौ परतो ऽनङित्ययमादेशो भवति स चेत्सुशब्दः संबुद्धिर्न भवति । सखा । असंबुद्धाविति किम् । हे सखे ॥

ऋदुशनस्पुरुदंशोनेहसां च ॥ ९४ ॥

ऋकारान्तानामङ्गानामुशनस् पुरुदंशस् अनेहस् इत्येतेषां चासंबुद्धौ सौ परतो ऽनङादेशो भवति । कर्ता । हर्ता । माता । पिता । भ्राता । उशना । पुरुदंशा । अनेहा । असंबुद्धावित्येव । हे कर्तः । हे मातः । हे पितः । हे पुरुदंशः । हे अनेहः । हे उशनः ॥ उशनसः संबुद्धावपि पक्षे ऽनङ् इष्यते ॥ हे उशनन् ॥ न ङिसंबुद्ध्योरिति नलोपप्रतिषेधोपि पक्ष इष्यते ॥ हे उशन । तथा चोक्तम् ।

संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यंदिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥
इति । तपरकरणमसन्देहार्थम् ॥

तृज्वत्क्रोष्टुः ॥ ९५ ॥

क्रोष्टुशब्दस्तुन्प्रत्ययान्तः संज्ञाशब्दः सर्वनामस्थाने ऽसंबुद्धौ परतः तृज्वद्भवति । तृजन्तस्य यद्रूपं तदस्य भवतीत्यर्थः । रूपातिदेशोयम् । प्रत्यासत्तेश्च क्रुशेरेव तृजन्तस्य यद्रूपं तदतिदिश्यते । तच्च क्रोष्टृ इत्ये-

Digitized by Google

तदन्तोदात्तम् । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । सर्वनामस्थान इत्येव । क्रोष्टून् । असंबुद्धावित्येव । हे क्रोष्टो ॥

स्त्रियां च ॥ ९६ ॥

असर्वनामस्थानार्थमारम्भः । स्त्रियां च क्रोष्टुशब्दस्य तृज्वद्भवति । क्रोष्ट्री । क्रोष्ट्रीभ्याम् । क्रोष्ट्रीभिः । क्रोष्टुशब्दं के चिद्गौरादिषु पठन्ति । ते ङीषि प्रत्यये तृज्वद्भावं कुर्वन्ति । तेषां पञ्चभिः क्रोष्ट्रीभिः क्रीतैः पञ्चक्रोष्टृभीरथैरिति स्त्रीशब्दस्य * लुकि कृते न सिध्यति । तत्र प्रतिविधेयम् । ये तु गौरादिषु न पठन्ति । तेषां स्त्रियामित्यर्थनिर्देशः, स्त्रियां वर्तमानः क्रोष्टुशब्दः तृज्वद्भवति । कृते ऽतिदेशे ऋन्नेभ्यो ङीबिति ङीप्प्रत्ययः । तत्रोदात्तयणो हल्पूर्वादित्यन्तोदात्त एव क्रोष्ट्रीशब्दो भवति ॥

विभाषा तृतीयादिष्वचि ॥ ९७ ॥

तृतीयादिषु विभक्तिष्वजादिषु क्रोष्टुर्विभाषा तृज्वद्भवति । क्रोष्ट्रा । क्रोष्टुना । क्रोष्ट्रे । क्रोष्टवे । क्रोष्टुः । क्रोष्टोः । क्रोष्टरि । क्रोष्टौ । क्रोष्ट्रोः । क्रोष्ट्वोः । तृतीयादिष्विति किम् । क्रोष्टून् । अचीति किम् । क्रोष्टुभ्याम् । क्रोष्टुभिः ॥ तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्नुटौ भवतः ॥ * ॥ प्रियक्रोष्टवे ऽरण्याय । प्रियक्रोष्टुने वृषलाय । नुट् । क्रोष्टूनाम् ॥

चतुरनडुहोरामुदात्तः ॥ ९८ ॥

चतुर् अनडुह् इत्येतयोः सर्वनामस्थाने परत आमागमो भवति, स चोदात्तः । चत्वारः । अनड्वान् । अनड्वाहौ । अनड्वाहः । अनड्वाहम् ॥ तदन्तविधिरत्रेष्यते ॥ प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः । प्रियानड्वान् । प्रियानड्वाहौ । प्रियानड्वाहः ॥ अनडुहः स्त्रियां वेति वक्तव्यम् ॥ * ॥ अनडुही । अनड्वाही । गौरादिपाठात्सिद्धम् ॥

अम्संबुद्धौ ॥ ९९ ॥

संबुद्धौ परतश्चतुरनडुहोरमागमो भवति । पूर्वस्यायमपवादः । हे प्रियचत्वः । हे प्रियानड्वन् ॥

* स्त्रीप्रत्ययस्येति पा० २

ॠत इद्धातोः ॥ १०० ॥

ॠकारान्तस्य धातोरङ्गस्य इकारादेशो भवति। किरति। गिरति। आस्तीर्णम्। विस्तीर्णम्। धातोरिति किम्। पितॄणाम्। मातॄणाम्॥ लाक्षणिकस्याप्यत्र ग्रहणमिष्यते॥ चिकीर्षतीत्यत्रापि यथा स्यादिति धातुग्रहणं क्रियते * ॥

उपधायाश्च ॥ १०१ ॥

उपधायाश्च ॠकारस्य इकारादेशो भवति। कीर्तयति। कीर्तयतः। कीर्तयन्ति॥

उदोष्ठ्यपूर्वस्य ॥ १०२ ॥

ओष्ठ्यः पूर्वो यस्माद् ॠकारादसावोष्ठ्यपूर्वस्तदन्तस्य धातोरङ्गस्य उकारादेशो भवति। पूर्ताः पिण्डाः। पुपूर्षति। मुमूर्षति। दन्त्योष्ठ्यपूर्वोऽप्योष्ठ्यपूर्वो भवतीत्यत्रापि भवति। वुवूर्षति ऋत्विजम्। प्रावुवूर्षति कम्बलम्। ओष्ठ्योऽत्र प्रत्यासत्तेरङ्गावयव एव गृह्यते। तेन ॠ गतावित्यस्य संपूर्वस्य समीर्णमिति भवति† ॥ इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन ॥ * ॥ आस्तरणम्। आस्तारकः। निपरणम्। निपारकः। निगरणम्। निगारकः॥

बहुलं छन्दसि ॥ १०३ ॥

छन्दसि विषये ॠकारान्तस्य धातोरङ्गस्य बहुलमुकारादेशो भवति। ओष्ठ्यपूर्वस्येत्युक्तमनोष्ठ्यपूर्वस्यापि भवति। मित्रावरुणौ ततुरिः। दूरे ह्यध्वा जगुरिः। ओष्ठ्यपूर्वस्यापि न भवति। पप्रितमम्। क्व चिद् भवति पपुरिः॥

॥ इति काशिकायां वृत्तौ सप्तमाध्यायस्य प्रथमः पादः ॥

---

* तपरकरणमसंदेहार्थमित्यधिकमेकस्मिन्पुस्तके ।

† तेनेह न भवति । समीर्णमिति । ॠ गतावित्यस्य संपूर्वस्य यद्यपि समो मकार ओष्ठ्यः पूर्वोऽस्ति तथाप्यङ्गावयवो न भवतीति समीर्णमित्यत्र न भवतीति पाठान्तरमेकस्मिन् पुस्तके ।

Digitized by Google

सप्तमाध्यायस्य द्वितीयः पादः ।

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥

परस्मैपदे परे सिचि परत इगन्तस्याङ्गस्य वृद्धिर्भवति । अचैषीत् । अनैषीत् । अलावीत् । अपाठीत् । अकार्षीत् । अहार्षीत् । अन्तरङ्गमपि गुणमेषा वृद्धिर्वचनाद्बाधते । न्यनुवीद् न्यधुवीद् इत्यत्र कुटादित्वाद् ङित्वे सति प्रतिषिद्धायां वृद्धावुवङादेशः क्रियते । परस्मैपदेष्विति किम् । अच्योष्ट । अप्लोष्ट ॥

अतो ल्रान्तस्य ॥ २ ॥

रेफलकारौ यावतः समीपौ तदन्तस्याङ्गस्य अत एव स्थाने वृद्धिर्भवति । क्षर । अक्षारीत् । त्सर । अत्सारीत् । ज्वल । अज्वालीत् । ह्मल । अह्मालीत् । अतो हलादेर्लघोरिति विकल्पस्यायमपवादः । अत इति किम् । न्यखोरीत् । न्यमीलीत् । ल्रान्तस्येति किम् । मा भवानशीत् । मा भवानटीत् । अन्तग्रहणं किम् । अवभीत् । अश्वल्लीत् । अत्र यौ रेफलकारावङ्गस्यान्तौ न तावतः समीपौ ॥

वदव्रजहलन्तस्याचः ॥ ३ ॥

वदव्रजोर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्भवति सिचि परस्मैपदे परतः । अवादीत् । अव्राजीत् । विकल्पबाधनार्थं वदिव्रजिग्रहणम् । हलन्तानाम् । अपाक्षीत् । अभैत्सीत् । अच्छैत्सीत् । अरौत्सीत् । अत्र योगविभागे सति हलन्तग्रहणमन्तरेणापि सिध्यति । कथं, वदिव्रज्योरित्यत्र प्रथमयोगे अत इति स्थानी अनुवर्त्तते । ततोऽचश्च इति सूत्रं तत्राङ्गेनाज्विशेष्यते । अङ्गस्याचः सिचि परतो वृद्धिर्भवति । तदेतद्धल्ग्रहणं हल्समुदायपरिग्रहार्थम् । इहापि स्यात् । अराङ्क्षीत् । अभाङ्क्षीत् । अन्यथा हि येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधाने स्यादनेकेन हला न स्यात् । उदवोढामुदवोढमित्यत्र वहेः सिचि ढत्वसलोपादीनां पूर्वत्रासिद्धमित्यसिद्धत्वात्पूर्वं हलन्तलक्षणा

Digitized by Google

वृद्धिः क्रियते पश्चाद् ठलोपनिमित्तमोत्वम्। तत्र कृते पुनर्वृद्धिर्न भवति, कृतत्वात्। यत्र त्वकृता वृद्धिरोकारस्यैव तत्र भवति। सोढामित्यस्यापत्यं सौढामित्रिरिति॥

नेटि॥ ४॥

इडादौ सिचि हलन्तस्याङ्गस्य वृद्धिर्न भवति। अदेवीत्। असेवीत्। अकोषीत्। अमोषीत्। हलन्तस्येत्येव। अलावीत्। ननु च एतदप्यन्तरङ्गत्वाद्गुणावादेशयोः कृतयोर्हलन्तं भवति। नैतदेवम्। अन्तरङ्गमपि गुणं वचनारम्भसामर्थ्यात्सिचि वृद्धिर्बाधत इत्युक्तम्॥

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्॥ ५॥

हकारान्तानां मकारान्तानां यकारान्तानामङ्गानां क्षण श्वस जागृ णि श्वि इत्येतेषामेदितां च इडादौ सिचि परस्मैपदे परतो वृद्धिर्न भवति। ग्रह। अग्रहीत्। स्यम। अस्यमीत्। व्यय। अव्ययीत्। टुवम्। अवमीत्। क्षण। अक्षणीत्। श्वस्। अश्वसीत्। जागृ। अजागरीत्। णि। ऊनयीत्। ऐलयीत्। श्वि। अश्वयीत्। एदिताम्। रगे। अरगीत्। कखे। अकखीत्। ह्म्यन्तक्षणश्वसामेदितां च अतो हलादेर्लघोरिति विकल्पे प्राप्ते प्रतिषेधः। जागृणिश्वीनां तु सिचि वृद्धिः प्राप्ता, सा च नेटीति न प्रतिषिध्यते। न चान्तरङ्गत्वादत्र पूर्वं गुणो भवति सिचि वृद्धेरनवकाशत्वात्। यदि पूर्वं गुणः स्यादिह णिश्विग्रहणमनर्थकं स्यात्। गुणायादेशयोः कृतयोर्यकारान्तत्वादेव प्रतिषेधस्य सिद्धत्वात्। तस्मादिदमेव णिश्विग्रहणं ज्ञापकं न सिच्यन्तरङ्गमस्तीति। अथ जागृग्रहणं किमर्थम्। जाग्रोऽविचिण्णल्ङित्सु इति जागर्त्तेर्गुणो वृद्धेरपवादो विधीयते। स यथा अचो ञ्णितीति वृद्धिं बाधते, तथा सिचि वृद्धिमपि बाधिष्यते। नैतदस्ति। कृते गुणे ऽतो ल्रान्तस्येति या वृद्धिः प्राप्नोति सा प्रतिषिध्यते। अथ गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्बाध्यते। यथा जागरयतीत्यत्रात उपधाया इत्यपि वृद्धिर्न भवति। तथा चिण्णलोः प्रतिषेधोऽर्थवान्भवति इति शक्यमिह जागृग्रहणमकर्त्तुम्। तत्तु क्रियते विस्पष्टार्थम्॥

Digitized by Google

ऊर्णोतेर्विभाषा ॥ ६ ॥

ऊर्णोतेरिडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्नभवति । प्रौर्णावीत् । प्रौर्णवीत् । विभाषोर्णोरित्यङित्त्वपक्षे वृद्धिविकल्पोयम् । ङित्त्वपक्षे तु गुणवृद्ध्योरभावे उवङ् भवति । प्रौर्णुवीत् ॥

अतो हलादेर्लघोः ॥ ७ ॥

हलादेरङ्गस्य लघोरकारस्य इडादौ सिचि परस्मैपदपरे परतो विभाषा वृद्धिर्न भवति । अकणीत् । अकाणीत् । अरणीत् । अराणीत् । अत इति किम् । अदेवीत् । असेवीत् । न्यकुटीत् न्यपुटीत् इत्यत्रात इत्यस्मिन्नसति स्थानिनिर्द्देशार्थमत इत्येतदनुवर्त्तयितव्यम् । तत्र अन्त्यलक्षणा वृद्धिरिग्लक्षणा न भवतीति क्ङिति चेति प्रतिषेधो न स्यात् । हलादेरिति किम् । मा भवानशीत् । मा भवानटीत् । लघोरिति किम् । अतक्षीत् । अरक्षीत् । अथेह कस्मान्न भवति अचकासीदिति । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति हला व्यवधानमाश्रितं न पुनरचापि व्यवधानमिति वृद्धिर्न भवति । अथ पुनरेकेन वर्णेन व्यवधानमाश्रीयते न पुनरनेकेनेति कल्पने शक्यमकर्त्तुं लघोरिति, अतक्षीदित्यत्रानेकेन व्यवधानमिति न भविष्यति, तत्क्रियते विस्पष्टार्थम् । इटीत्येव । अपाक्षीत् ॥

नेड्वशि कृति ॥ ८ ॥

वशादौ कृति प्रत्यये परत इडागमो न भवति । वरमनादौ प्रयोजनम् । ईशिता । ईशितुम् । ईश्वरः । दीपिता । दीपितुम् । दीप्रः । भसिता । भसितुम् । भस्म । याचिता । याचितुम् । याच्ञा । वरमनादौ इत्युदाहरणप्रदर्शनार्थम् । न परिगणनम् । तेन समन्तात् इत्येवमादावपि हि प्रतिषेधो भवति । अथ तत्रोणादयो बहुलमिति समाधीयते । संभवोदाहरणप्रदर्शनमेतत् । कृतीति किम् । रुदिव । रुदिम ॥

तितुत्रतथसिसुसरकसेषु च ॥ ९ ॥

ति तु त्र त थ सि सु सर कस इत्येतेषु कृत्सु इडागमो न भवति ।

तीति क्तिन्क्तिचोः सामान्यग्रहणम् । क्तिच् । तनिता । तनितुम् । तन्तिः । क्तिन् । दीपिता । दीपितुम् । दीप्तिः । तु ॥ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥ सचिता । सचितुम् । सिक्तुः । त्र । दाम्नीशसयुयुजेति ष्ट्रन् । पतिता । पतितुम् । पत्त्रं वाहनम् । उष्ट्रादिष्वपि सर्वधातुभ्यः ष्ट्रन् । तनिता । तनितुम् । तन्त्रम् । त ॥ हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् ॥ हसिता । हसितुम् । हस्तः । लविता । लवितुम् । लोतः । पविता । पवितुम् । पोतः । धूर्विता । धूर्वितुम् । धूर्त्तः ॥ औणादिकस्यैव तशब्दस्य ग्रहणमिष्यते न पुनः क्तस्य ॥ हसितमित्येव हि तत्र भवति । थ । हनिकुषिनीरमिकाशिभ्यः क्थन् । कोषिता । कोषितुम् । कुष्ठम् । काशिता । काशितुम् । काष्ठम् । सि । उषिशुषिकुषिभ्यः क्सिः । कोषिता । कोषितुम् । कुक्षिः ॥ सुक् च इषेः ॥ एषिता । एषितुम् । इक्षुः । सर ॥ अशेः क्सरन् ॥ अशिता । अशितुम् । अक्षरम् । क ॥ इणभीकापाशल्यतिमर्चिभ्यः कन् ॥ शलिता । शलितुम् । शल्कः । स ॥ वृतृवदिहनिकमिकषियुमुचिभ्यः सः ॥ वदिता । वदितुम् । वत्सः ॥ तितुत्रेष्वग्रहादीनामिति वक्तव्यम् ॥ * ॥ ग्रहादयो ग्रहप्रकाराः । येषामिट् क्तिनि दृश्यते । विगृहीतिः । उपस्निहितिः । निकुचितिः । निपठितिः । कृतीत्येव । रोदिति । स्वपिति ॥

एकाच उपदेशे ऽनुदात्तात् ॥ १० ॥

उपदेशे य एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति । प्रकृत्याश्रयो ऽयं प्रतिषेधः । के पुनरुपदेशेनुदात्ता, ये तथा पठ्यन्ते । त एव विस्पष्टार्थमनिट्कारिकासु प्रविभक्ताः प्रदर्श्यन्ते ।

अनिट्स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः ।
अदन्तमृदन्तमृतां च वृञ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि ॥
गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवन्तथोर्णोतिमथो युणुक्ष्णवः ।
इति स्वरान्ता निपुणं समुच्चितास्ततो हलन्तानपि सन्निबोधत ॥

द्वये एव धातवः स्वरान्ता व्यञ्जनान्ताश्च । तत्र सर्वे स्वरान्ता

एकाचो ऽनुदात्ता अदन्तादीन्वर्जयित्वा । दाता । नेता । चेता । स्तोता । कर्त्ता । हर्त्ता । अदन्तादय उदात्ताः । अवधिष्ट । अदन्तम् । तरिता । तरीता । वृतां च वृङ्वृञोः । निर्वरिता । निर्वरीता । प्रवरिता । प्रवरीता । श्विडीङ्विवर्णेष्वथ शीङ्श्रियावपि । श्वयिता । उड्डयिता । शयिता । श्रयिता । गणस्थमूदन्तम् । लविता । पविता । उतां च क्ष्णुवो रुवन्तयोर्णौतिमयो युणुक्ष्णवः । रविता । प्रस्नविता । क्षविता । प्रोर्णुविता । वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनमित्यतिदेशादेकाच्त्वमूर्णोतेरस्तीति उदात्त उपदिश्यते । यविता । नविता । क्ष्णविता ।

इति स्वरान्ता निपुणं समुच्चितास्ततो हलन्तानपि सन्निबोधत ।
शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी ॥

घसिः प्रकृत्यन्तरमस्ति । घस्ता । वसिः प्रसारणी । वस्ता । प्रसारणीति किम् । वसिता वस्त्राणाम् । वसनिवास इत्यस्य यजादित्वात्संप्रसारणं विहितं, न तु वस आच्छादन इत्यस्य ।

रभिस्तु भान्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरः ।

आरब्धा । यब्धा । लब्धा ।

यमिर्यमन्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः ।
नमिश्चतुर्थो हनिरेव पञ्चमो गमिश्च षष्ठः प्रतिषेधवाचिनाम् ॥

यन्ता । रन्ता । तन्ता । मन्ता । श्यनीति किम् । मनुतेर्मनितेत्येव भवति । नन्ता । हन्ता । गन्ता ।

दिहिर्दुहिर्मेहतिरोहती वहिर्नहिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमे ऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्त्तिताः ॥

देग्धा । दोग्धा । मेढा । वोढा । रोढा । नद्धा । दग्धा । लेढा । मुक्तसंशया इति किम् । तत्रान्तरे चत्वारो ऽपरे पठ्यन्ते । स्निहिमुहिरिहिलुहय,स्तत्र स्नेहेरिड्विकल्पस्तकारादौ । मुहेरपि रधादौ । तेन तौ ससंशयौ सविकल्पौ । इतरौ तु धातुषु न पठ्येते । केश्चिदभ्युपगम्येते इति स्वरूपेणैव ससंशयौ ॥

दिशिं दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम्।
लिशं च शान्तानिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान्॥

देष्टा। द्रष्टा। दंष्टा। आम्रष्टा। आमर्ष्टा। स्प्रष्टा। स्पर्ष्टा। ऋदुपधानामुदात्तोपदेशानां मृजिदृशी वर्जयित्वा अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति रमागमविकल्पः। रेष्टा। रोष्टा। क्रोष्टा। प्रवेष्टा। लेष्टा।

रुधिः सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यति बुध्यती व्यधिः।
इमे तु धान्ता दश येऽनिटो मतास्ततः परं सिध्यतिरेव नेतरे॥

रोद्धा। राद्धा। योद्धा। बंद्धा। साद्धा। क्रोद्धा। क्षोद्धा। शोद्धा। योद्धा व्यद्धा। सेद्धा। बुध्यतिसिध्यत्योः श्यना निर्देशादन्यविकरणयोर्बुधिसिध्योरिड्भवत्येव। बोधिता। सेधिता। निष्ठायामपि प्रतिषेधाभावात् बुधितं सिधितमित्येव भवति।

शिषिं पिषिं शुष्यतिपुष्यती त्विषिं विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम्।
इमान्दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान्कृषिकर्षती तथा॥

शेष्टा। पेष्टा। शोष्टा। पोष्टा। त्वेष्टा। वेष्टा। श्लेष्टा। तोष्टा। दोष्टा। द्वेष्टा। आक्रष्टा। आकर्ष्टा। कृषेस्तौदादिकस्य भौवादिकस्य कृषिकर्षती इति निर्देशः।

तपिं तिपिं चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम्।
स्वरेण नीचेन शपिं क्षुपिं क्षिपिं प्रतीहि पान्तान्पठितांस्त्रयोदश॥

तप्ता। तेप्ता। आप्ता। वप्ता। स्वप्ता। लेप्ता। लोप्ता। तृप्यतिदृप्यत्योरनुदात्तत्वममागमार्थमेव। इट् च तयोरधादिपाठाद्विकल्पेन भवति। त्रप्ता। तर्प्ता। तर्पिता। द्रप्ता। दर्प्ता। दर्पिता। तुदादिषु तु यौ तृपिदृपी तावुदात्तावेव। स्रप्ता। सर्प्ता। शप्ता। क्षेप्ता। क्षेप्ता॥

अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन्
शदिं सदिं स्विद्यतिपद्यती खिदिम्।
तुदिं नुदिं विद्यतिविन्त इत्यपि
प्रतीहि दान्तान्दश पञ्च चानिटः॥

घस्ता । हन्ता । स्कन्ता । भेत्ता । छेत्ता । तोत्ता । शत्ता । सत्ता । स्वेत्ता । स्विद्यतीति श्यना निर्द्देशोऽसिष्विदा इत्यस्य निवृत्त्यर्थः । उदात्त इवायम् । पत्ता । खेत्ता । तोत्ता । नोत्ता । वेत्ता । विद्यतिविन्त इत्यपि श्यना श्नमा च निर्द्देशोऽन्यविकरणनिवृत्त्यर्थः । वेत्तिविन्दती उदात्तावेव । वेदिता विद्यानाम् । वेदिता धनस्य ॥

पचिं वचिं विचिरिचिरञ्जिपृच्छतीन्
निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ।
त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन्
भुजिं स्वजिं सृजिमृजी विद्ध्यनिट्स्वरान् ॥

पक्ता । वक्ता । विवेक्ता । रेक्ता । रङ्क्ता । प्रष्टा । निर्णेक्ता । सेक्ता । मोक्ता । भक्ता । भङ्क्ता । भ्रष्टा । भर्ष्टा । त्यक्ता । यष्टा । योक्ता । रोक्ता । सङ्क्ता । मङ्क्ता । भोक्ता । परिष्वक्ता । स्रष्टा । मार्ष्टा । मृजिरयमूदित्पठ्यते । ततोऽस्य विकल्पेनेटा भवितव्यम् । मार्ष्टा, मार्जिता इति । आगमोऽप्यस्य न दृश्यते । तदस्य पाठस्य प्रयोजनं चिन्त्यम् । केचिदस्य स्थाने विजिं पठन्ति । सृजिं विजिं विद्ध्यनिट्स्वरानिति । निजादिषु यो विजिरसावनिडिष्यते । तथा च ग्रन्थान्तरे * निजिविजिष्वञ्जिवर्जमित्युक्तम् । एकाच इति किम् । अवधीत् । वृद्धिनिवृत्त्यर्थमदन्तो वधिरुपदिश्यते । उपदेशग्रहणं किम् । इह हि यथा स्यात् लविष्यति पविष्यति । इह च मा भूत् । कर्त्ता कटान्कर्तुमिति ॥

श्र्युकः किति ॥ ११ ॥

श्रि इत्येतस्योगन्तानां च किति प्रत्यये परत इडागमो न भवति । श्रित्वा । श्रितः । श्रितवान् । उगन्तानां च । युत्वा । युतः । युतवान् । लूत्वा । लूनः । लूनवान् । वृत्वा । वृतः । वृतवान् । तीर्त्वा । तीर्णः । तीर्णवान् । श्र्युक इति किम् । विदितः । कितीति किम् । श्रयिता । श्रयितुम् । श्रयितव्यम् । केचिदत्र द्विककारनिर्द्देशेन गकारप्रश्लेषं वर्णयन्ति ।

* तन्त्रान्तरे पा० २ ।

भूष्णुरित्येवं यथा स्यात् । सौत्रत्वाच्च निर्दृशस्य श्युकः किर्तीत्यत्र षत्वस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतं विसर्जनीयश्च कृत इति । ग्लाजिस्थश्च ग्स्नुरित्यत्र स्था ग्ला इत्याकारप्रश्लेषेण स्थाग्लोः सिद्धत्वाच्च किं चिदेतत् । उपदेशइत्येव । तीर्त्वा इत्यत्रापि यथा स्यात् । इत्वे हि कृते रपरत्वे च न स्यात् । मा भूदेवम् । इट् सनि वेति विकल्पे विहिते यस्य विभाषेति निष्ठायां प्रतिषेधो भविष्यति । कस्य पुनः सा विभाषा, ऋतः, यद्येवमित्वे कृते नायमृकारान्तो भविष्यति । स्थानिवद्भावाद्भविष्यति । अनल्विधौ स्थानिवद्भावः । अल्विधिश्चायम् । तस्मादनुवर्त्तयितव्यमुपदेश इति । तथा च सति जागरितः, जागरितवानित्यत्रापि प्राप्नोति, तदर्थमेकाच इत्यनुवर्त्तयितव्यम् । ऊर्णोतेस्तु ।

वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

प्रोर्णुतः । प्रोर्णुतवान् ॥

सनि ग्रहगुहोश्च ॥ १२ ॥

ग्रह गुह इत्येतयोरुगन्तानां च सनि प्रत्यये परत इडागमो न भवति । जिघृक्षति । जुघुक्षति । उगन्तानां च । रुरूषति । लुलूषति । सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति विकल्पविधानात् श्रयतेरत्र नानुक्रम्यते । ग्रहेर्नित्यं प्राप्तः । गुहेरूदित्वाद्विकल्पः ॥

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥

कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेषां लिटि प्रत्यये इडागमो न भवति । कृ । चकृव । चकृम । सृ । ससृव । ससृम । भृ । बभृव । बभृम । वृञ् । ववृव । ववृम । वृङ् । ववृवहे । ववृमहे । स्तु । तुष्टुव । तुष्टुम । द्रु । दुद्रुव । दुद्रुम । स्तु । तुष्टुव । तुष्टुम । श्रु । शुश्रुव । शुश्रुम । सिद्धे सत्यारम्भो नियमार्थः । क्रादय एव लिट्यनिटस्ततोऽन्ये सेट इति । बिभिदिव । बिभिदिम । लुलुविव । लुलुविम । अनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः । वृञ्वृङोस्तु प्रत्ययाश्रयस्तदुभयस्याप्ययं नियमः ।

वृञो हि थलि ववर्थेति निपातनाद्व्यवस्था, स्तुद्रुस्रुश्रुवां तु ऋतो भारद्वाज-स्येत्यस्मादपि नियमाद् य इट् प्राप्नोति सोपि नेष्यते । तुष्टोथ । दुद्रोथ । सुस्रोथ । शुश्रोथ ॥ कृञोऽसुट इति वक्तव्यम् ॥ * ॥ ससुट्कस्य इडागमो यथा स्यात् । संचस्करिव । संचस्करिम ॥ ऋतो भारद्वाजस्ये-त्येतदप्यसुट एवेष्यते ॥ संचस्करिथ ॥

श्वीदितो निष्ठायाम् ॥ १४ ॥

श्वयतेरीदितश्च निष्ठायामिडागमो न भवति । शूनः । शून-वान् । ईदितः । ओलजी । लग्नः । लग्नवान् । ओविजी । उद्विग्नः । उद्विग्नवान् । ओदितश्चेति निष्ठातकारस्य नकारः । दीपी । दीप्तः । दीप्तवान् । डीङस्त्वोदितां मध्ये पाठो ज्ञापको निष्ठायामनिट्त्वस्य । स हि नत्वार्थो, नत्वं च निष्ठातो ऽनन्तरस्य विधीयते । उड्डीनः । उड्डीनवान् । निष्ठायामित्यधिकार आर्द्धधातुकस्येड्वलादेरिति यावत् ॥

यस्य विभाषा ॥ १५ ॥

यस्य धातोर्विभाषा क्वचिदिडुक्तस्तस्य निष्ठायां परत इडागमो न भवति । वक्ष्यति । स्वरतिसूतिसूयतिधूञूदितो वा । विधूतः । विधूतवान् । गुहू । गूढः । गूढवान् । उदितो वा । वृद्धः । वृद्धवान् । तनिपतिदरिद्राणामुपसंख्यानमिति पतेर्विभाषितेट्कस्यापि द्वितीयाश्रिता-तीतपतितेति निपातनादिडागमः ॥

आदितश्च ॥ १६ ॥

आदितश्च धातोर्निष्ठायामिडागमो न भवति । ञिमिदा । मिन्नः । मिन्नवान् । ञिक्ष्विदा । क्ष्विण्णः । क्ष्विण्णवान् । ञिष्विदा । स्विन्नः । स्विन्नवान् । चकारोनुक्तसमुच्चयार्थः । आश्वस्तः । वान्तः । योगविभागकरणं किम् । आदितश्च विभाषा भावादिकर्म्मणोरित्येवं पठितव्यम् । अन्यत्र हि भावादिकर्म्मभ्यां यस्य विभाषेति प्रतिषेधो भविष्यति । ज्ञापनार्थमेतत् । ज्ञापयति । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति, तेन विभाषा गमहनविदविशामित्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञापनार्थस्य प्रतिषेधो न भवति । विविदितः । विविदितवान् ॥

विभाषा भावादिकर्म्मणोः ॥ १७ ॥

भावे आदिकर्म्मणि च आदितो धातोर्विभाषा निष्ठायामिडागमो न भवति । मिन्नमनेन । मेदितमनेन । प्रमिन्नः । प्रमेदितः ॥ सौनागाः कर्म्मणि निष्ठायां शकेरिटमिच्छन्ति विकल्पेन ॥ शकितो घटः कर्त्तुम् । शक्तो घटः कर्तुम् । भावे न भवत्येव । शक्तमनेन । आस्यतेर्भावे । असितमनेन । आदिकर्मणि च न भवत्येव । अस्तः काण्डः ।

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ १८ ॥

क्षुब्ध स्वान्त ध्वान्त लग्न म्लिष्ट विरिब्ध फाण्ट बाढ इत्येते निपात्यन्ते यथासंख्यं मन्थ मनस्तमः सक्ताविस्पष्ट स्वरानायास भृश इत्येतेष्वर्थेषु । क्षुब्ध इति भवति मन्थाभिधानं चेत्। क्षुब्धो मन्थः । क्षुभितमन्यत्। क्षुभितं मन्थेन क्षुब्धो गिरिः, नदीत्येवमादावुपमानाद्भविष्यति । स्वान्तमिति मनोभिधानं चेत् । स्वनितमन्यत्, स्वनितो मृदङ्गः । स्वनितं मनसा । ध्वान्तमिति भवति तमोभिधानं चेत् । ध्वनितमन्यत् । ध्वनितो मृदङ्गः । ध्वनितं मनसा । लग्नमिति भवति सक्तं चेत् । लगितमन्यत् । म्लिष्टमिति भवति । अविस्पष्टं चेत् । म्लेच्छितमन्यत् । इत्वमप्येकारस्य निपातनादेव । विरिब्धमिति स्वरश्चेत् । विरेभितमन्यत् । रेभृ शब्द इत्यस्यैतन्निपातनम् । अन्ये तु विरिभितमन्यदिति पठन्ति । रिभिं सौत्रं धातुं पठन्ति । ते विरिभितमिति प्रत्युदाहरन्ति । फाण्टमिति भवत्यनायासश्चेत् । फाणितमन्यत् । यदशृतमपिष्टं च कषायमुदकसंपर्कमात्राद् विभक्तरसमौषधद्रव्यं तत्फाण्टम् । तदल्पप्रयत्नसाध्यत्वादनायासेन लक्ष्यते । बाढमिति भवति भृशं चेत् । बाहितमन्यत् । बाहृ प्रयत्न इत्यस्य धातोरेतन्निपातनम् । अतिशयश्च भृशमिहोच्यते ॥

धृषिशसी वैयात्ये ॥ १९ ॥

वियातस्य भावो वैयात्यम् । प्रागल्भ्यमविनीतता । तत्र धृष शस

त्येतयोर्निष्ठायामिडागमो न भवति । धृष्टोयम् । विशस्तोयम् । धृषे-रादितश्चेति प्रतिषेधः सिद्ध एव यसेरप्युदितो वा यस्य विभाषेति, निय-मार्थं वचनम् । धृषिशस्योर्वैयात्ये एवेड् न भवति भावादिकर्म्मणोरपि वैयात्ये धृषिर्नास्ति । धृष्टः । विशस्तः । वैयात्यइति किम् । धर्षितः । विशसितः ॥

दृढस्थूलबलयोः ॥ २० ॥

दृढ इति निपात्यते स्थूले बलवति चार्थे । दृढः स्थूलः । दृढो बलवान् । किमत्र निपात्यते । दृंहेः क्तप्रत्यये इडभावः । हकारनकारयो-र्लोपः । परस्य ढत्वम् । अथ दृहिः प्रकृत्यन्तरमस्ति । तत्राप्येतदेव सर्वं नलोपवर्ज्जम् । नकारस्याभावात् । हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्य-र्थम् । ढलोपे हि सति तस्य पूर्वत्रासिद्धत्वाद् द्रढिमा द्रढीयान् द्रढयतीत्यत्र र ऋतो हलादेर्लघोरिति न स्यात् । इह च परिद्रढय्य गत इति ल्यपि लघुपूर्वादिति णेरयादेशो न स्यात् । इह च परिवृढस्यापत्यं पारिवृढी कन्येति गुरूपोत्तमलक्षणः ष्यङ् च प्रसज्येत । स्थूलबलयोरिति किम् । दृंहितम् । दृहितम् ॥

प्रभौ परिवृढः ॥ २१ ॥

परिवृढ इति निपात्यते प्रभुश्चेद्भवति । परिवृढः कुटुम्बी । पूर्वेण तुल्यमेतत् । वृंहेर्निपातनम् । वृहिश्च यदि प्रकृत्यन्तरमस्ति तस्यापि तदेव सर्वं हलोपनिपातनस्य च तदेव प्रयोजनम् । परिव्रढयति । परिव्र-ढय्य गतः । पारिवृढी कन्येति । परिवृढमाचष्ट इति विगृह्य वृढशब्दादेव णिजुत्पद्यते । संग्रामयतेरेव सोपसर्गाण्णिजुत्पत्तिरिष्यते नान्यस्मादिति । तथा सति परिव्रढयतीति तिङ्ङतिङ इति निघातः । परिव्रढय्येत्यत्र परिशब्दस्य क्त्वाप्रत्ययान्तेन समासे सति ल्यबादेशः सिद्धो भवति । प्रभाविति किम् । परिवृंहितम् । परिवृहितम् ॥

कृच्छ्रगहनयोः कषः ॥ २२ ॥

कृच्छ्र गहन इत्येतयोरर्थयोः कषेर्धातोर्निष्ठायामिडागमो न भवति । कष्टोग्निः । कष्टं व्याकरणम् । ततोपि कष्टतराणि सामानि ।

कृच्छ्रं दुःखं तत्कारणमप्यभ्यादिकं कृच्छ्रमित्युच्यते । गहने । कष्टानि वनानि । कष्टाः पर्वताः । कृच्छ्रगहनयोरिति किम् । कषितं सुवर्णम् ॥

घुषिरविशब्दने ॥ २३ ॥

घुषेर्धातोरविशब्दनेऽर्थे निष्ठायामिडागमो न भवति । घुष्टा रज्जुः । घुष्टौ पादौ । अविशब्दनइति किम् । अवघुषितं वाक्यमाह । विशब्दनं प्रतिज्ञानम् । घुषिरशब्दार्थइति भ्वादिषु पठ्यते । घुषिरविशब्दनइति चुरादिषु तयोरिह सामान्येन ग्रहणम् । विशब्दनप्रतिषेधश्च ज्ञापकश्चुरादिणिजो विशब्दनार्थस्यानित्य इति, तेनायमपि प्रयोग उपपन्नो भवति । महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवा इति । स्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः ॥

अर्दः संनिविभ्यः ॥ २४ ॥

सं नि वि इत्येतेभ्य उत्तरस्यार्देर्निष्ठायामिडागमो न भवति । समर्णः । न्यर्णः । व्यर्णः । अर्देरिति किम् । समेधितः । संनिविभ्य इति किम् । अर्दितः ॥

अभेश्चाविदूर्ये ॥ २५ ॥

अभिशब्दादुत्तरस्यार्देराविदूर्येऽर्थे निष्ठायामिडागमो न भवति । अभ्यर्णा सेना । अभ्यर्णा शरत् । आविदूर्यइति किम् । अभ्यर्दितो वृषलः । शीतेन पीडित इत्यर्थः । विदूरं विप्रकृष्टं ततोऽन्यदविदूरं, तस्य भाव आविदूर्यम् । एतस्मादेव निपातनाच्च नञ्पूर्वात्तत्पुरुषादित्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकावशेषः ॥

स्थाने स्थाने च वाचिन्यो वाचिन्यो ननृतुस्तरामधिकमधिकमनीयतमं च जगुश्च किंपुरुषाः किंपुरुषास्त एवेति न निश्चेतुं

अन्याः कतिचन संगीतचणाश्च नानाविधे तत्र कौतुके कौतुकेना-त्मानं विसस्मरुः ॥ ४८ ॥

स्थाने स्थाने प्रतिस्थलमेव वादिन्यो नर्तक्यो ननृतुस्तराम् । वादिन्यः• मत्ताः सत्य इत्यर्थः । "वादिन्यौ नर्तकीमत्ते" इत्यमरः ॥ ४८ ॥

अभितोऽभितोऽपेक्षा च सर्वेषामहो महोत्सवस्य महिमायं गिरि-वरस्य रस्यतमः ॥ ४६ ॥

गिरिवरस्य यो महोत्सवस्तस्यायं महिमा रस्यतमः प्रशस्यनुमो-दनादत्यास्वाद्यः ॥ ४९ ॥

यदयं स्वानुरूपं रूपं समास्थाय समास्थायतं व्रजपुरपुरंदरस्य समर्हणं समग्रहीत् ॥ ५० ॥

सम्यगास्थया विश्वासेन• आयतं समर्हणम् ॥ ५० ॥

इति जनरवो नरबोधदुर्गमो दुर्गमोचनायेव बभूव भूवलयस्य ॥ ५१ ॥

जनरवः परंपरया सर्वदेशगतः सन्, दुर्गमोचनायेव भूतः कीर्ति-तश्च संसारादिदुःखनाशार्थमेवाभूत् ॥ ५१ ॥

तदनु दनुजदमनजनकेन निर्वाहिते हिते महीधरमहे कृत-भोजनेषु जनेषु च संतर्पितेषु गीतवादित्रादिजीवेषु जीवेषु चाश्वपा-कपाकपतितादिषु दिव्याम्बरवरमणिमयालङ्कारकारणमोक्षर्यपर्याकुलि-तदिग्वलयं सलयं सरसममी पर्वतपर्वतरलाः पर्वत एव प्रदक्षिणं कर्तुमारेभिरे ॥ ५२ ॥

पाका बालकाः ॥ ५२ ॥

तद्यथा ।

जयेशाव्ययजायत्सुपटिमपटहप्रौढभांकारिभेरी-
ढक्काढक्कारहिक्कामुखरितककुभो वादकाः संप्रतीयुः ।
पश्चाद्गाश्चालयन्तो मणिकनकचिताः कुङ्कुमैरङ्किताङ्गी-
राभीरा वीतभीकाः करकृतलगुडा आगुडाक्तप्रतीकाः ॥ ५३ ॥

भव्ययं यथा स्यात् तथा जायत् प्रकाशमानः शोभनः पटिमा वादनचातुर्यं यत्र तथाभूतः पटहश्च प्रौढभांकारिणी भेरी च ढक्कानां ढक्काश्च त एव हिक्कास्ताभिर्मुखरिता इव ककुभो दिशो यैस्ते ॥ ५३ ॥

किंच ।

वीणावेणुप्रवीणा मृदुमधुरकलोत्तानगानावधाना:
पश्चात् पश्चात् प्रनृत्यप्रमुदितमनसो वादका नर्तकाश्च ।
तत्पश्चात् स्वर्णकर्णीरथसमशकटीगर्भनिर्भातवासा
गोप्यो गोप्यानि गोपेश्वरसुतचरितान्युद्गिरा प्राद्गिरन्त्य: ॥ ५४ ॥

स्वर्णस्य कनकस्य कर्णीरथो विमानं तत्समास्तत्तुल्याः शकट्यस्तासां गर्भे निर्भातः प्रदीप्तो वासो यासां ता गोप्यः, संप्रतीयुरिति पूर्वस्यानुषङ्गः ॥ ५४ ॥

किंच ।

प्रत्यूहव्यूहहारी हरिरिह विहरन् सुप्रशस्यैर्वयस्यैः
सार्धं श्रद्धानुबद्धात्मभिरभि रभसारब्धहासोपहासैः ।
पश्चादाभीरराजप्रभृतिरतिमुदामोदिमन्दारदामो-
द्दामाम्नातोहवचाः स्मितसुरसमुखो मुख्य आभीरवर्गः ॥ ५५ ॥

प्रत्यूहो विघ्नः । अभि निःशङ्कमेव । अतिमुदा· अत्यानन्देन । प्रतीयायेति वचनविपरिणामेनात्रानुषङ्गः । आमोदिनीभिर्मन्दारदामभिरुद्दामं स्वच्छन्दं यथा स्यात् तथा· आम्नातानि· आच्छन्नानि· उह्यन्ति बृहन्ति वचांसि यस्य तथाभूतः सन् ॥ ५५ ॥

इत्येवं यथाविधिविहितविप्रदक्षिणं प्रदक्षिणं गिरेरथ तथा विधाय तथाविधाय प्रमोदाय प्रमोदायस्थलमनाकलयन्तो लयं तोष एव ते जग्मुः ॥ ५६ ॥

विधिमनतिक्रम्य विहिता विप्रेभ्यो दक्षिणा यत्र तत् प्रदक्षिणं विधाय कृत्वा तथाविधाय प्रमोदाय तादृशमानन्दं निवासयितुं प्रमायाः

प्रमाणस्य॰ उत्कर्षेण॰ आयो वृद्धिर्यत्र तथाभूतं स्थलम्॰ अनाकलयन्तः॰ अपश्यन्तः॰ आत्मनामल्पप्रमाणत्वात् तस्य तु प्रमोदस्यातिबृहत्त्वात् तोषे तस्मिन् प्रमोद एव लयं श्लेषं जग्मुः प्रापुः, तमानन्दमात्मसु वासयितुमशक्ता आनन्द एव तस्मिन्नात्मनो वासयामासुरित्यर्थः। अत्रोद्देश्यप्रतिनिर्द्देश्यतया प्रमोदे॰ इति वक्तव्ये तोषे॰ इत्युक्तिर्यमकानुरोधात् ॥ ५६ ॥

ततश्च परेद्यवि द्यवि भुवि प्रथमानमानमहत्या महत्या मुदैवानकादिशब्दमनिवार्यैव तेनैव क्रमेण भाविन्यां भाविन्यां यमयमभगिनीप्रियायामद्वितीयायां द्वितीयायां यमुनास्नानार्थं तत्तटमेव सर्वे समाजग्मुः ॥ ५० ॥

ततः परेद्यवि भाविन्यां तत्परद्दिने भविष्यन्त्यां भाविन्यां कान्तिरचिण्यां यमश्च यमभगिनी यमुना च तयोः प्रियायां द्वितीयायां प्रातर्यमुनास्नानार्थं प्रतिपद्येव सायं समाजग्मुः। द्यवि भुवि स्वर्गे मर्त्यलोके च प्रथमानो मान आदरो यस्य तं शब्दम्॰ महत्या प्रतिघाताभावेनैवानिवार्य ॥ ५७ ॥

विभातायां च तस्यां क्षणदायां क्षणदायां विशिष्टशिष्टसमाचारलब्धे भ्रातृद्वितीयानिमन्त्रणे मन्त्रणेन चतुरया रयादेवोपनन्दात्मजयात्मजयाय सदा मोदरस्य दामोदरस्य भ्रातुर्निमन्त्रणं यदाकारि ॥ ५८ ॥

उपनन्दात्मजया यदि भ्रातुर्निमन्त्रणमकारि तदा तया परिवेष्यमाणमोदनपानादिकं भुञ्जानः श्रीकृष्णो हसता माणवकेन जगद इत्यन्वयः। निमन्त्रणे विषये यन्मन्त्रणं योग्यविवेचनशक्तिस्तेन हेतुना चतुरया॰ उपनन्दात्मजया सुनन्दया। भ्रातुः कथंभूतस्य, आत्मजयार्थं सदा॰ एव मोदरस्य हर्षयुक्तस्य हर्षदायिनो वा ॥ ५८ ॥

तदा स च सचराचरजगन्मनोरञ्जनोऽरञ्जनोचितभगिनीवा-

* –रं जनो–इति मुद्रणीये परसवर्णः प्राप्नुत्।

त्सल्यानुरोधेन विरोधेन विरहितं हितं समुपचितचित्तद्रवोदयया दयया शरीरिण्येव तया परिवेष्यमाणमिष्यमाणमिष्टपिष्टकादिकमति-सुरसबहुरसबहुविधमामोदनमोदनपानादिकं सहचरैर्हासरसपटुनाव-टुना चलितैः सह कुतूहलिना हलिना च सुरसं भुञ्जानो हसता सता तेनैव माणवकेन नवकेन मदनविनोदेन जगदे जगदेकमोहनः श्रीकृष्णः ॥ ५८ ॥

अरं क्षिप्रमेव सम्यगुपचितश्चित्तद्रवस्य· उदयो यस्यास्तया, इष्टा-न्यनपकारीणि पिष्टकादीनि यत्र तत्, अतिसुरसं च तद्· बहुभी रसैर्ब-हुविधं चेति तत्, मदनविनोदेन वचोविलासेन ॥ ५९ ॥

हन्त हन्तरघस्य वयस्य दुर्मेधसा वेधसा वेह सकला एव तिथयोऽतिथयो भ्रातृद्वितीयात्वेन न कृताः कथं वा हे श्रीवत्सर वत्सरदिनसंख्यासंख्याताः स्वसारोदयाः स्वसारो दयाः शरीरिण्य इव नाभवन् भवतः ॥ ६० ॥

भ्रातृद्वितीयात्वेन· अतिथयः· नित्यमागमनपराः । श्रीवत्सर हे श्रीवत्साख्यसल्लक्षणयुक्त, इदमप्येकं मद्भाग्यमुत्तमलक्षणं कथं तव नाभू-दिति भावः । यद्वा श्रीः संपत्तिस्तद्युक्तं वत्सं वक्षो रातीति, एवापि संपत्तिस्तवोचितैवेति भावः । स्वेषां सारः श्रेष्ठ उदयः सुखभोजनात्मको याभ्यस्ताः, स्वसारो भगिन्यः ॥ ६० ॥

* यद्युभयोः कतरदेकतरदेव समभविष्यदभविष्यदतिकौतुकं तदेव नः ॥ ६१ ॥

नह्यीदृशं पर्वतपर्वतरले गतेऽहनि च निचयीभूतेऽन्नपानेमया भो जनप्रिय भोजनप्रियतमेन भुक्तं यथाद्येति तदुपहासहासरसव-

* व्याख्याकृतैतद् वाक्यं परित्यक्तमिति टीकाक्रमे मूलानुरोधिसंख्याप्रदर्शना-भावोऽवसेयः ।

घसा च सानन्दमभ्यवजहार जहार च सकलजनमनो मनोज्ञचरितः स घोषराजयुवराजः ॥ ६२ ॥

भो हे जनप्रिय, जनसंघट्ट एव प्रीयसे न पुनरेकान्ते मिष्टद्रव्यभक्षसुखपरिपाटीं जानासीति भावः । तदुपहासस्य हासः प्रकाशस्तेन सरसवचसा ॥ ६२ ॥

अथ परस्परादरपरा परार्ध्यमणिकनकालंकारसिचयचयव्यावदायी समजनि जनितकौतुका जनिमतामतानवेनेव ॥ ६३ ॥

व्यावदायी परस्परदानम् । जनिमतां जन्मवताम् अतानवेनेव बाहुल्येनेव जनितं कौतुकं यया सा ॥ ६३ ॥

एवं समाप्ते भ्रातृद्वितीयामहे या महेन्द्रस्य मखभङ्गापीडा पीडाजनि तदुपशमकृते कृतेयं तस्य या कुरीतिरीतिकरी साधुना साधुना मतेन वर्ण्यते ॥ ६४ ॥

मखभङ्ग एव आपीडः शेखरो यस्याः सा पीडा । ईतिरतिवृष्टितस्करादि उपद्रवः ॥ ६४ ॥

तथाहि स्थितोऽधिसुरसभं रसभङ्गविमना विहते निजमखे सखेदं खे दंदह्यमान इव पुरंदरोऽदरोऽदरोदितमनस्तापरुषा परुषाक्षरमजल्पत् ॥ ६५ ॥

अदरो निर्भयः, अत एव अदरोदितेन अनल्पोद्गमेन मनस्तापेन या रुट् क्रोधस्तया ॥ ६५ ॥

अहो चित्रमहो महो मे पातितः पाल्यमानपशुभिः पशुभिः शिशुवाचाशु ॥ ६६ ॥

पाल्यमानपशुभिर्गोपैः पशुभिः पशुतुल्यैः आशु शीघ्रं शिशुवाचा मे महः पातितः । वस्तुतस्तु पशुभिरपि पाल्यमानमपेक्ष्यमाणं पशु दर्शनं येषां तैः, "अव्ययं पशु दर्शने" इति मेदिनी ॥ ६६ ॥

वाचामधीशापि यस्य मे वास्तवं स्तवं कुरुते तत्र मद्रुपासापासनाकारमागो मा गोपा गणयन्ति स्म यन्ति स्म केवलं बलं मदान्धतायाः ॥ ६७ ॥

वाचामधीशापि सरस्वत्यपि । तत्र मयि· आगोऽपराधं गोपा मा गणयन्ति स्म । आगः कथंभूतं, मदुपासनाया अपासना त्यागस्तदाकारम् । मदान्धताया मदान्धत्वस्यैव बलं यन्ति स्म प्राप्तवन्तः । वस्तुतस्तु मे वाचाम्· अधीशापि मम दुर्मतेरपि सरस्वती यस्य शिशोर्वास्तवं स्तवं कुरुते तत्र तस्मिन् श्रीकृष्णे सति, किंच मम· आ सम्यक् प्रकारेण· अन्धता एव यास्ता बलं यन्ति स्म प्रापुः, तत्र श्रीकृष्णे मम त्वन्नस्वान्येव वर्धन्त इत्यर्थः ॥ ६७ ॥

भद्रं भो भद्रमाभीरा भीराहित्येन कथं सन्ति संतिग्ममतयो भवन्तः ॥ ६८ ॥

एवं पक्षवल्लानैरप्यशान्तो बुद्ध्या· अभिमुखीकृत्य सतर्जनमाह भद्रमिति । भीराहित्येन निर्भयत्वेन संतिग्ममतयः सम्यक्कटुबुद्धयः । वस्तुतस्तु भीराहित्ये सति भवन्तः सुतीक्ष्णमतयः कथं न सन्ति, अपितु सन्त्येव, अत्र पक्षे भद्रं भो भद्रमित्युल्लासे ॥ ६८ ॥

कथं बालो वा लोलमतिरयं तिरयंस्त्वादृशामघं शतमन्युमन्युतो युष्मानायुष्मानासादयतु प्रियं प्रियंभावुको भावुकोदयेन कथं भवतु वः पश्यामि ॥ ६९ ॥

लोलमतिरयं बालः कृष्णः शतमन्युमन्युतो हेतोस्त्वादृशामघमपराधं तिरयन् दूरीकुर्वन् स्वयं वा· आयुष्मान् सन् कथं युष्मान् प्रियम्· आसादयतु प्रापयतु, कथं वा वो युष्माकं भावुकोदयेन मङ्गलोदयेन हेतुना प्रियंभावुको भवतु, तदहं पश्यामि । वस्तुतस्तु· अलोलमतिरतिधीरस्त्वादृशां त्वद्विधानामन्येषामप्यघं व्यसनं तिरयन् सन् भावुकोदये सति कथं न प्रियम्· आसादयतु, कथं वा न प्रियंभावुको भवत्विति,नेत्यस्य· उभयत्रापि संबन्धः ॥ ६९ ॥

इति प्रतिघाप्रतिघातभग्नमना मनाग् विचिन्त्य महाकल्पकल्पनकारिणो महापघनान् घनान् क्रोधनिर्बन्धतो बन्धतो मोचयित्वा रचयित्वारमतिश्लाघया बलमानमाननाभाजनान् कृतसभाजनान् कृतसदयावलोकान् संवर्तकादीनुवाच ॥ ७० ॥

प्रतिघायाः क्रोधस्य प्रतिघातेन भग्नं मनो यस्य सः, "प्रतिघा रुट्क्रुधौ स्त्रियां" इत्यमरः, महाकल्पस्य महाप्रलयस्य कल्पनकारिणो निर्माणसमर्थान् महापघनान् बृहच्छरीरान्· अतिश्लाघया यूयं महाबलिन एव मम परमसहाया इत्येवं प्रोत्साहनेन बलमानमाननाया अत्यादरस्य भाजनान्· अरं शीघ्रमेव रचयित्वा·उवाच । कृतं सभाजनं भवत्किंकरा एव वयमाज्ञानुवर्तिन इत्येवमिन्द्रस्तुतिर्यैस्तान् ॥ ७० ॥

हंहो रंहोरञ्जिता जिताखिलासारकृतः सारकृतः खलु भवतां मदो मदोजसां वर्धकः ॥ ७१ ॥

जितमखिलं यैस्तथाभूतान्· आसारान् धारासंपातान् कुर्वन्तीति ते । सारकृतो मदः· बलजनितो गर्वः ॥ ७१ ॥

यन्मया निगद्यतेऽद्य तेन भवन्तो भवन्तो मत्प्रियाय कृतार्थयन्तु माम् ॥ ७२ ॥

भवन्तो यूयं, मत्प्रियाय मत्प्रीत्यर्थं भवन्तो वर्तमानाः ॥ ७२ ॥

मास्तु विलम्बो निराविलं वो निरासकत्वमस्ति जगतः किमेकस्य प्रदेशस्य तदधुना धुनाना इव भुवनकोशं व्रजनगरनाशाय वर्षन्तु ॥ ७३ ॥

वो युष्माकं निराविलं यथा तथा जगतो विश्वस्यापि निरासकत्वं संहारकत्वम्· अस्ति, तादृशी योग्यता वर्तत इत्यर्थः ॥ ७३ ॥

इत्येवमुक्तो मुक्तो बन्धनतो नतोऽतितरां संवर्तको नाम गणः प्रचक्रमे क्रमेण स्वदर्पमुपपादयितुम् ॥ ७४ ॥

अतितरां नतः कृतप्रणामः ॥ ७४ ॥

Digitized by Google

प्रथमतः कापि कादम्बिनी गगनसरसः शैवालावली बलीयसीव किरणमालिमालिन्यमासादयामास ॥ ७५ ॥

कादम्बिनी मेघमाला ॥ ७५ ॥

क्षणमात्रतो रसातलतलत उत्थिता वलमानमाननागनागरीनिःश्वासधूमधोरणीव दिग्वलयमन्धकारितं चकार कापि घनश्रेणी ॥ ७६ ॥

मानः परिमाणं गर्वो वा ॥ ७६ ॥

तदविलम्बतः केदारदारणखेलापरिणतदिक्करिकरिणीगणा इव युगपदेव देववर्त्म रुरुधुरुद्धुराः केचिदम्भोदा दम्भोदात्ताः ॥ ७७ ॥

केदारः पर्वतविशेषः । देववर्त्म आकाशम् । दम्भेन उदात्ता उद्गृहीताः ॥ ७७ ॥

तदनु शतकोटिकोटिभिरनुपपन्नतयाक्षततया कायव्यूहमिवारचयन् मैनाको नाकोपरि परिभ्रमन्निव कोऽपि घनगणो घनत्वमाससाद ॥ ७८ ॥

शतकोटिकोटिभिर्वज्राग्रैः । अक्षततयेति अनुपपन्नतयेत्यस्य विशेषणम् । अनुपपन्नता तस्य अक्षतता संपूर्णैव, न त्वेकांशेनेत्यर्थः ॥ ७८ ॥

तत्समकालमेव लोकालोकाचल इव खरशिखरशिखाभिरभित एव युगपदूर्ध्वमूर्ध्वमूर्जस्वलतया वर्धमानाभिरितरेतरेण परित एव समासक्ताभिर्ज्योतिश्चक्रं निर्वाप्य बहिर्लोकमिवान्तरं लोकमपि तमोमयं कुर्वाणः कश्चन धाराधाराणां निकायोऽतिकायोऽतितरामासीत् ॥ ७९ ॥

खराभिः शिखरशिखाभिः शृङ्गाग्रैः ऊर्ध्वमूर्ध्वं व्याप्य ॥ ७९ ॥

एवं सति स तिमिरसंघातः खरतरपरपरशुच्छेद्योऽपि यदि नाभूत् तदा तमोभूरिव भूरि वर्धिष्णुतमा भुवनत्रयीयमासीत् ॥ ८० ॥

परपरशुनापि छेत्तुमशक्य इति कविप्रौढोक्तिरतिनैविड्यतात्पर्या । तमोभूरन्धकारस्वामिका भूमिः ॥ ८० ॥

इदमसीममसीमयमिव जगदण्डभाण्डं च ॥ ८१ ॥

असीममसीमयमिवेति, वस्त्वन्तरस्यापि कालिमापादकत्वांशेनो-त्प्रेक्षा ॥ ८१ ॥

तथापि व्रजपुरपुरंदरनन्दनचरणनखसुधाकिरणकिरणकन्दलीद-लितमिव व्रजपुरं प्रति प्रतिकूलं तथा नासीत् ॥ ८२ ॥

सुधाकिरणश्चन्द्रः ॥ ८२ ॥

एवं द्रव्यमिव दशमं*न्दश मन्दीकृत्य दिशो भृशमन्धतमम-समन्धतमसकलजनमिव जगत् कुर्वाणमिव मुहूर्तं यदि समव-र्तत ॥ ८३ ॥

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभ्यो नवभ्यो द्रव्येभ्योऽति-रिक्तम्· अन्धतमसं नाम दशममिव द्रव्यं दश दिशो मन्दीकृत्य· अन्धतमाः सकला एव जना यत्र तथाभूतं जगत् कुर्वाणमिव ॥ ८३ ॥

तदा तदाकस्मिकमिव घुणविद्धादिवोपरितनजगदण्डकटाहाद् गलतामावरणवारां वारान्तरानुत्पन्नं विन्दुजालं महीमहीनकर्दमां चक्रे ॥ ८४ ॥

तत् प्रसिद्धम्· आवरणवाराम्· अण्डकटाहबहिःस्थितजलानामिव विन्दुजालं कर्तृ· आकस्मिकमकस्मादुद्भूतमिव, किंच वारान्तरेऽनुत्पन्नम्, अहीनकर्दमां संपूर्णकर्दमयुक्तां महीं चक्रे ॥ ८४ ॥

समनन्तरमनन्तरयास्त एव विन्दवो विन्दुतामपहाय गगनम-हान्यग्रोधस्य न्यग्रोधस्यदा महावरोहाकारा धाराभावमापेदिरे ॥ ८५ ॥

अनन्तरयाः· अनन्तवेगाः, गगनमेव महान् न्यग्रोधो वटस्तस्य महान्तः· अवरोहाः शाखाशिखास्तदाकाराः, न्यञ्चो न्यग्भूता रोधस्यदा आवरणवेगा येषां ते ॥ ८५ ॥

*—न्दशेति परसवर्णः प्राप्नुवत् ।

एवं सति ।

वत्सानाच्छाद्य सास्नावलयवलनया द्राघयन्त्यः शिरोधीन्
मूर्धानं नम्रयन्त्यः कुटिलितनयना निश्चला लम्बिलूमाः ।
धारापाताभिघातक्षुभितपृथुतरोत्कम्पभूयिष्ठपृष्ठाः
कातर्येणोत्तमाणाः शरणमुपययुर्धेनवः कृष्णमेव ॥ ८६ ॥

सास्नाभिर्गलकम्बलैर्वलयवलनया मण्डलीकरणेन वत्सानाच्छाद्य । शिरोधीन् ग्रीवाः । कुटिलितनयना इति, आसारसंमर्दभीत्या नेत्रयोर्मुद्रणात् बहिर्दर्शनार्थं च किंचिदुन्मीलनाच्च । लम्बिलूमाः लम्बमानपुच्छाः ॥ ८६ ॥

किंच ।

आविद्धः शृङ्गकोटावतिपृथुनि ककुन्मण्डले गण्डशैले
संशीर्यन् जर्जरत्वं प्रगत इत इतः शीकराकारमाप्तः ।
भग्नः पृष्ठे गरिष्ठे स्फटिकमणिशिलापेशले हन्त वारां
धारापातः प्रकोपं रुजमपि विदधे धावतां पुंगवानाम् ॥ ८७ ॥

पुंगवानां शृङ्गककुत्पृष्ठपतितानासारान् यथास्वरूपोदयं वर्णयति· आविद्ध इति । प्रकोपं युयुत्साभिप्रायेण क्रोधम् । रुजम्· अत्याघातवशात् पीडाम् ॥ ८७ ॥

अथ तरुणतरो विलक्षणलक्षणतो रम्भास्तम्भास्तरुणतरा इव स्थूलभावलभा वर्षीयसीर्धाराः सुदुर्वारा वारामवलोक्य सर्व एव सातङ्कं त*ङ्कंचनाकालकल्पकल्पमाशु मन्यमाना वलमानावलभावा व्रजपुरजना जनानन्दकरं श्रीकृष्णमुपसंगम्य गम्यमानखेदातिशयं निवेदयांचक्रुः ॥ ८८ ॥

तरुणतरा अतिपुष्टा रम्भाणां स्तम्भा इव स्थूलभावं स्थौल्यं लभन्त

* तङ्कमित्यत्र परसवर्णः प्राप्तः ।

इति ता॰ वारां धाराः । तम्॰ अकाले॰ असमयेऽपि कल्पः कल्पनं यस्य तादृशं कल्पं प्रलयम् । बलमानोऽबलभाव आवल्य येषां ते ॥ ८८ ॥

भो भोः कृष्ण महाबाहो महाबाहो नः खलु विशंकटं संकटं संवचार ॥ ८६ ॥

हे महाव हे॰ उत्सवरचक, सदा सुखदायिनि त्वयि तिष्ठति कथमेतद्दुःखमिति भावः । अहो॰ आश्चर्यम् । नोऽस्माकम् । विशंकटं बृहत् ॥ ८९ ॥

तदिदं गोकुलमात्मनाथमात्मनाथ मा विलम्बेन प्रतिपालयितुमर्हसि ॥ ६० ॥

आत्मनाथं त्वन्नाथकम्, आत्मना स्वयमेव, यद्वा॰ आत्मना सह, अथ॰ अनन्तरमेव, मा विलम्बेन॰ अविलम्बेन ॥ ९० ॥

पश्य पश्य ।

इयं विद्युद्वीथीकुपितफणिजिह्वेव वलते
शिलासारः सारं हरति पुरवाटीविटपिनाम् ।
अयं मेघज्योतिर्व्यतिकर उदीर्णोऽधिसलिलं
ज्वलत्युच्चैरौर्वानल इव समुद्रोदरचरः ॥ ६१ ॥

शिलानाम्॰ आसारः संपातः, मेघज्योतिषां वज्राग्नीनां व्यतिकरो व्यतिषङ्गः ॥ ९१ ॥

किंच ।

यथोर्ध्वं स्फायन्ते पुरुपरुषगर्जं जलमुचः
क्रमस्थूणास्थौल्यं तिरयति च धाराततिरियम् ।
अयं क्षोणीनत्युन्नतिपरिचयच्छित् परमपा-
मपारो व्यापारः प्रलयजलधित्वं प्रथयते ॥ ६२ ॥

यथा स्फायन्ते वर्धन्ते तथैवेयं धाराततिः स्थूणास्थौल्यं स्तम्भस्य

स्थूलतामपि तिरयति तिरस्करोति । अप्यर्थे चकारः, ततश्च क्षोण्याः पृथिव्या नत्युन्नत्योः निम्नत्वोन्नतत्वयोः परिचयं छिनत्तीति तथाभूतोऽपां जलानां व्यापारोऽपारः ॥ ९२ ॥

परितश्च पश्य ।

निषण्णानुत्सङ्गे खरतरशिलापातविकलान्
स्वतन्वा संछाद्य व्यथितवपुषो वत्सनिचयान् ।
दवाग्नेः संघाताः सपदि सलिलात् पाहि न इति
प्रतीच्छन्ते बाष्पाकुलचलदृशस्त्वां सुरभयः ॥ ६३ ॥

कृपां जनयितुं धेनूनां दुरवस्थां तर्जन्या दर्शयन्त्याहुः निषण्णानिति ॥ ९३ ॥

अन्यतश्च पश्य ।

घूर्णायित्वा महति ककुदि क्षोणिपृष्ठं गते द्रा-
गोघे मुक्ताव्यतिकर इव स्थूलवर्षोपलानाम् ।
मेघान् क्रोधोन्नमितशिरसो भीममुद्वीक्षमाणा
धारापातप्लुतमुखदृशो यान्ति कष्टं महोक्षाः ॥ ६४ ॥

प्रियाणां पुंगवानामोजःपरिभवं तच्चरितेन दर्शयन्त्यस्त्राणे सत्वरमेव समुत्साहयन्त्याहुः । घूर्णायित्वा घूर्णानीवाचर्य, घूर्णितीभूयेति यावत्, स्थूलवर्षोपलानाम् ओघे समूहे क्षोणिपृष्ठं गते सति, महोक्षा महावृषाः ॥ ९४ ॥

किंच ।

अनल्पः कल्पान्तक्षमतममहावर्षणतनू-
रनर्थानां सार्थो दुरुपशम एष व्यजनि नः ।
परित्राता नान्यस्त्वदपर इति त्वामिह वयं
प्रपन्ना व्यापन्नानहह निजलोकान् न कुरु नः ॥ ६५ ॥

कल्पान्ते महाप्रलये तमतममतिसमर्थं यन्महानर्थं तस्य तनूर्मूर्तिरूपः अनर्थानां सार्थः समूहः। नोऽस्मात् प्रपञ्चात् व्यापञ्चात् न कुरु। अत्र प्रत्युपद्रवसमयमेव सर्वव्रजवासिनां "नारायणसमो गुणै"-रिति "य एतस्मिन् महाभाग" इति "अराजके रक्ष्यमाणा" इत्यादिसर्वगर्गवाक्यानां सहसा स्मरणात् तत्प्रपत्तिर्नासंगतेति ॥ ९५ ॥

इत्याकर्णयन्नाकर्णयन्नयनप्रान्तो विलोकयन्नपि धेनूनामनूनामम्लानिं शतमन्युमन्युजन्यमिदमिति विचारयन् मधुमधुरमकम्पानुकम्पानुचर्या गिरा मा भैष्ट भो मा भैष्ट त्रुद्रो हि त्रुद्रोहिबाधोदय इवायमुपद्रव इत्याश्वास्य ॥ ९६ ॥

इत्याकर्णयन् मा भैष्ट मा भैष्टेत्याश्वास्य लीलाविशेषं तन्वानो यदा गोवर्धनमुद्दिधीर्षुरभवत् तदैवास्य कृष्णस्य करोदरे गोवर्धनो लोकेन व्यालोकीत्यन्वयः। आकर्णा कर्णपर्यन्तं यत् गच्छन् नयनप्रान्तो यस्य सः। म्लानिं कथंभूतां, न ऊनाम् अनूनां, संपूर्णामेवेत्यर्थः। इवम् अतिवर्षणम्। अकम्पा निश्चला या अनुकम्पा सैव अनुचरी यस्यास्तया गिरा, तद्वागधीनैव कृपाशक्तिस्तामाश्रित्य प्रवर्तितया इत्यर्थः। यद्वा प्रथममनुकम्पा तदनुचरी तदनुगामिनी च या गीस्तया। हि निश्चितं त्रुद्रोऽयमुपद्रवः त्रुधो बुभुक्षाया द्रोही द्रोहकरो बाधोदयः पीडोद्गम इव, अल्पप्रयोगमात्रेणैव सुचिकित्स्य इति भावः ॥ ९६ ॥

संकल्पकल्पनमात्रादेव तमनर्थमनर्थकत्वमापादयितुं समर्थोऽपि भजतामाकल्पमाकल्पमिव वाङ्मनसयोः सुरकिंनरनरनिकरेण गास्यमानममरपरिवृढमदालीलाविशेषं लीलाविशेषं कुसुमसुमधुरया तन्वा तन्वानोऽकृतपरिकरबन्धोऽवहेलावहे लावण्यसरसि स रसिकशेखरःसुस्नात इव ॥ ९७ ॥

लीलाविशेषं तन्वानो विस्तारयितुम्। कथंभूतं, भजतां जनानाम् आकल्पं कल्पपर्यन्तं वाङ्मनसयोराकल्पं भूषणमिव कीर्तनीयत्व

चिन्तनीयस्वाभ्याम् । किंच· अमरपरिवृढस्य· इन्द्रस्य महालीनां महश्रेणीनां लावो छेदी शेषो यस्य तम् । अवहेला· इन्द्रं प्रत्यवज्ञा तां वहति व्यनक्तीति तथाभूते लाववयमरासि ॥ ९७ ॥

कृत्वाकं कुतुकेन बालक इव स्तम्बेरमः स्तम्बवत्
श्रीगोवर्धनमुद्दिधीर्षुरभवच्चित्तेन कृष्णो यदा ।
तह्यैवास्य करोदरे चटचटाध्वानध्वनत्कन्दरा-
सुप्तोद्बुद्धकिशोरकेशरिसभो व्यालोकि लोकेन सः ॥ ९८ ॥

स्तम्बेरमो हस्ती । स्तम्बवत्, गुच्छमिवेत्यर्थः । बालकस्य कृत्वाकोद्धरणे एव बलं पर्याप्तमित्यपर्याप्तबलेन स्तम्बेरमेण सह पुनरुपमानम् । यदैव चित्तेनोद्दिधीर्षुरभवत् तदैव तस्य करोदरे लोकेन स व्यालोकि, इति संकल्पसमकालमेव तादृशव्यापारोदयात् तत्रानायासः सूचितः । चित्तेनेति, केवलेन मनसैव न तु स्वकरेणापीति दिधीर्षाया अपि सामान्यतः प्रथमावस्थैव· उक्ता, मनसा पाटलिपुत्रं प्रथमं जिगमिषतीतिवत् । कीदृशः सन् व्यालोकि, चटचटाध्वानेन ध्वनन्तीषु कन्दरासु सुप्ता एवोद्बुद्धा स्वापावस्थतयैव सहसोच्छलनात् प्राप्तजागरा किशोरकेशरिणां सभा बलिष्ठसिंहश्रेणी यत्र सः ॥ ९८ ॥

ततश्च ।

धातुर्ध्यानप्रतानक्षपणपणपटुः प्रोढनागेन्द्रनारी-
क्रीडामाध्वीकपानोत्सवनवरभसास्वादबाधप्रगल्भः ।
दिङ्मातङ्गेन्द्रदानद्रवणविघटनस्तत्समुल्लासनोत्थो
भ्राम्यन् ब्रह्माण्डभाण्डोदरमधि न ममौ कोऽपि कोपी प्रणादः ॥ ९९ ॥

चटचटाध्वानमेव सविशेषं वर्णयति धातुरिति । क्रमेणोर्ध्वाधोमध्यलोकव्याप्तिः । ध्यानप्रतानस्य क्षपणं दूरीकरणमेव पणस्तत्सिद्धौ चतुरः । आस्वादस्य बाधे प्रतिबन्धे प्रगल्भः । दानस्य द्रवणं स्रवणं तद् विघटयति

दूरीकरोतीति सः । तत्समुल्लाससमेतस्थः पर्वतोत्क्षेपेण जनितः । अयाणा-मप्येषामन्यावधानासंभवेऽपि सहसा आसोदयसूचनात् प्रणादस्य जाति-प्रमाणाभ्यामतिशयः सूचितः ॥ ९९ ॥

किंच ।

ओजःकण्डूललीलालसकरकमलेनालमुल्लास्यमान-
स्याद्रेर्हासप्रकाशप्रसर इव समाम्नातहर्षप्रकर्षः ।
उल्लासावेगविघ्नच्छितिरुहविततेर्वृन्ततो विच्युतानां
पुष्पाणां वर्षमासीदधिधरणि यशःपातवद्गुह्यपाणेः ॥ १०० ॥

वर्षं वर्षणम्, "वृष्टिर्वर्ष"मित्यमरः । तदेवोत्प्रेक्षते । ओजसो बलस्य कण्डूला स्वानुरूपपात्राभावादृष्ट्या कण्डूवती या लीला तया लसति शोभत इति तेन करकमलेन· उत्थाप्यमानस्याद्रेः स्वप्रभुपराक्रमदृष्ट्येव हासप्रकाशस्य प्रसरः प्रसरणं स इव सम्यगाम्नातोऽभ्यस्तस्तत्कारणभूतो हर्षप्रकर्षो यत्र सः, बहुहर्षजनित एवायं हास इत्यर्थः ।

किंच हासोऽयं स्वगोत्रशत्रुमिन्द्रं प्रत्यवज्ञार्थे प्रयुक्त इत्युत्प्रेक्षान्तरं सूचयन् पुष्पाणां धरणौ पतनलिङ्गवशात् पुनरुत्प्रेक्षते यशःपातवदि-ति ॥ १०० ॥

किंच ।

ऊर्ध्वोर्ध्वं वर्धमानैः खरतरशिखरैश्छिन्नभिन्नाभ्रपङ्क्ति-
स्तस्य क्षोणीरुहौघैः परिभवितुमिव प्रोद्ययौ नन्दनद्रून् ।
सिंहैर्दन्तावलेन्द्रभ्रमकुपितसमेदोरुणं दारयद्भि-
स्तीक्ष्णाभुग्नैर्नखाग्रैर्जलधरपटली सर्वतः संप्रसस्रे ॥ १०१ ॥

तस्य गोवर्धनस्य क्षोणीरुहौघैः प्रोत्क्रये प्रोदगम्यत । नन्दनद्रून् नन्दनवनवृक्षान् । दन्तावलो हस्ती । जलधरपटली दारयद्भिः सद्भिः सिंहैः सर्वतः समन्तात् संप्रसस्रे प्रोद्गम्यते स्म ॥ १०१ ॥

उदस्ते कृष्णेनावरकरतलेनाचलपता-
वहो कोऽयं व्योम स्थगयति किमेतत् कथमिति ।
चकम्पे कैलासः समजनि सुमेरुः पुरुभयो
ममज्जोच्चैर्गङ्गापयसि चकितो दिग्गजगणः ॥ १०२ ॥

अवरकरस्य वामहस्तस्य तलेन· उदस्ते· उत्क्षिप्ते सति ॥ १०२ ॥

किंच ।

जलासारैर्विष्वक्स्रुतिभिरथ मुक्ताफरचये-
र्मुरारातेः श्रीदामरकतमणीदण्डरुचिरम् ।
अभेद्यं दम्भोलेरपि पवनवेगैश्च न धुतं
महारत्नच्छत्रं समजनि गिरिर्गोकुलजुषाम् ॥ १०३ ॥

विष्वक् समन्ततः स्रुतिः चरणं येषां तैः । दम्भोलेर्वज्रस्यापि ॥ १०३ ॥

एवं नाम वामकरकमलेनोल्लास्य निजगिरिवरं निजगिरि वरं विश्वासमासादयन्नुवाच वाचस्पतिभिरप्ययमनिर्वचनीयचारुचरितः ॥ १०४ ॥

निजगिरि निजवाक्ये वरं विश्वासम्· आसादयन् प्रापयितुम् ॥ १०४ ॥

मातर्मा तरलं मनः कुरु पितर्मा चिन्तनीयं त्वया
संदेहं सुहृदो न धत्त पतिता नायं गिरिर्मत्करात् ।
साक्षादेव विलोकितं तनुमता येनाचेनं स्वीकृतं
तस्य व्योम्नि कृतावलम्बनतया किं दुष्करावस्थितिः ॥ १०५ ॥

तरलं शङ्काचपलम् । न पतिता न पतिष्यति ॥ १०५ ॥

किंच ।

आकारेण महानयं गिरितया यद्यप्ययं स्थावरो
देवत्वात् सहजादलौकिकतया तर्कस्य नो गोचरः ।
पश्यायं लघिमास्य येन हि मयाप्युल्लासितो लीलया
तत्राहं तु निमित्तमात्रमहह स्वेच्छामयोऽयं गिरिः ॥ १०६ ॥

येन लघिम्ना हेतुना, मयापि शिशुनापि ॥ १०६ ॥

ततः ।

अस्याधः प्रविशन्तु सन्तु सुखिनः स्वं स्वं गृहीत्वा व्रजं
स्वच्छन्दं निवसन्तु गोपनगरान्नेदं विलं भिद्यते ।
कल्पान्ते जगतां जना हि वपुषा नारायणस्योदरे
सूक्ष्मेणेव वसन्ति तच्च नतरामेतादृशं कौतुकम् ॥ १०७ ॥

गोपनगराच्च भिद्यते ततो न भिन्नं, तत्तुल्यमेवेत्यर्थः ॥ १०७ ॥

किंच ।

उल्लासक्रमवेगतः समुदितैः सारैर्मृदां संचयैः
प्राकाराभतया स्थितैस्तत इतो नास्मिन्नपामागमः ।
स्वेच्छाकाननचारतोऽपि सुखिभिर्वृन्दैर्गवां भूयतां
स्वस्वावासविलासवासरभसो विस्मर्यतां बन्धुभिः ॥ १०८ ॥

सारैर्दृढैरासारैः, भेत्तुमशक्यैरित्यर्थः ॥ १०८ ॥

इति धराधराधिपभृता भृतोऽमृतरसेनेव व्याहारो हारोपमो यदि सपदि स परिशशाम तदा तदाश्वस्तहृदः सुहृदः सुतकलत्र-धनगोधनगोष्ठसहिताः सपुरोधसोऽरोधसोष्यमाणसुखा निःषमपर-मपरभागतः गतः भूधरवरस्य रवरस्यमाविविशुः ॥ १०९ ॥

धराधराणां पर्वतानामधिपं प्रभुं श्रीगोवर्धनं बिभर्तीति तेन भृतः पुष्टः । हारोपम इति, हृदये सादरधारणात् परिशशाम परिशान्तः, विरत इत्यर्थः । अरोधमवारितं यथा स्यात् तथा सोष्यमाणानि सुखानि येषां ते । निःषमेण निस्तुलेन परमपरभागेन अतिशोभया ऋतं दीप्तम्, "ऋतमुञ्छशिले जले । क्लीबं सत्ये च दीप्ते स्यात्", इति मेदिनी । रवेण कोलाहलेन रस्यं रसनीयं यथा स्यात् तथा विविशुः ॥ १०९ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य दशमः परिच्छेदः ॥

२० ॥ प्राकृतिककार्याणां सर्वदा नैयत्यस्य कल्पना ऽस्य दुष्प्रयोगस्य हेतुः ॥—मन्ये विशेषजातीनामार्थस्वरूपाणां प्रातिनिध्येन पदानां प्रयोगस्य विशेषतः प्रतिबन्धकं प्रकृतिः साधारणानामबोध्यायां प्रत्येकस्यां व्यक्तौ वास्तवैकरूपाभ्यन्तरावयवसंस्थानस्य रचनया सर्वस्या अपि तत्तद्विशेषजातेः परिच्छेदं करोति तत्तत्कार्याणि च नियतान्येव करोतीति पूर्वं वर्णितं कल्पनमेवास्ति । परं तु यस्तेषां भिन्नान् भिन्नान् धर्मान् परीक्षते स एकपदवाच्या अनेकव्यक्तयः स्वीयाभ्यन्तरसंस्थित्या पृथङ्नामविशेषवाच्यव्यक्तिभ्य इव परस्परं भिद्यन्ते इति न कदापि संदिह्यात् । परं तु एकरूपं यथार्थमाभ्यन्तरं चावयवसंस्थानमेकरूपविशेषनाम्ना सह सर्वदा संगतमितीदं कल्पनं पदानां प्रयोगकालिकवक्त्रवधारितमिश्रविज्ञानातिरिक्ताबोधकत्वेऽपि तदार्थस्वरूपप्रातिनिध्येन तेषां नाम्नां प्रयोगाय मनुष्यान् प्रवर्तयति । इत्थं चैकमर्थं बोधयन्ति पदानि यद्यपरत्रार्थे प्रयुक्तानि स्युस्तर्हि एवं विधेषु प्रयोगेष्ववश्यं मनुष्यसंवादेषु महान्तं संदेहमुत्पादयन्ति. विशेषतश्च ये वस्तूनां तत्तद्विशेषजातीनां पृथग्भावस्य नियमनस्य च दृढसाधनतया परिकल्पितानां वास्तविकाकाराणां सिद्धान्तं व्यवस्थापयन्ति तेषामप्यनिश्चयं जनयन्ति ॥

२१ ॥ अयं दुष्प्रयोगो मिथ्याकल्पनाद्वयात्मकः ॥ परं तु अस्मद्विज्ञातविज्ञानानां तथाभूतानां स्वरूपाणां वा बोधाय शब्दप्रयोगस्य कामं व्याहतत्वे ऽसंगतत्वेऽपि चास्य वस्तुसामान्याभावबोधकत्वे पर्यवसानात् लोकैः कृते शब्दानां प्रयोगे किं चिदप्यवधानं कुर्वाणस्य सर्वस्यापि सुस्पष्टमस्ति यदेतदतिपरिचितमस्ति । यदा मनुष्यो वस्तुविशेषं पश्यंस्तस्य मर्कटत्वे कुरूपप्राणित्वे मनुष्यत्वे तद्भिन्नत्वे ऽपि वा तत्तद्वस्तु जिज्ञासति, तदा मनुष्यपदबोध्यता यस्य कल्प्यते तद्वस्तुविशेष-

Digitized by Google

जातेराख्यं स्वरूपं तस्मिन्नस्ति न वेत्येव परं जिज्ञासति। अस्मिन् द्रव्य-नाम प्रयोगप्रकारे वक्ष्यमाणभ्रान्तकल्पनाद्वयमस्ति। यथा।—

प्रथमं तावत् सन्ति कानि चिद् यथार्थानि स्वरूपाणि प्रकृति-र्यदनुरूपान् सर्वान् वस्तुविशेषान् सृजति, यैश्च ते विशेषजातिरूपेण विविच्यन्ते इति। येन तत्तद्वस्तुनः स्वरूपं निर्वक्तुं शक्यते यदाश्रिताश्च तस्य प्रत्यक्षग्राह्या गुणाः सन्ति तादृशमाभ्यन्तरमवयवसंस्थानं सर्वस्यापि वस्तुनोऽस्तीति त्वसंदिग्धं तथापि, मन्ये, यथा वयं तान् वस्तुविशेषान् जातिषु व्यवस्थापयामस्तथैतद् विशेषजातिरूपेण तान् न विभेदयति नापि तयोस्त्वां परिच्छेदकं भवति।

द्वितीयतश्च तूष्णीमेवेदं क्रमशः अमीषां प्रस्तुतस्वरूपाणां वि-ज्ञानानि अस्माकं सन्तीतीव व्याप्नोति, यतो यदीदृशः स्वरूपविशेषो ज्ञातोऽस्तीति वयं न कल्पयेम तर्हि तस्मिन्नस्मिन् वा वस्तुनि विशेषजाते-राख्यं स्वरूपमस्तीति कस्मै प्रयोजनाय कल्पयेम। एवमपीदमस्त्ययथार्थम्। अतश्चास्मदविज्ञातविज्ञानज्ञापनाय रचितानां नाम्नामीदृशः प्रयोगोऽवश्यं तद्विषयकेषु तर्केषु संवादेषु च महतीमव्यवस्थां जनयेत्, शब्दैः संभाषणे च महद्दौष्कर्यं प्रसज्येत॥

२२॥ (६) शब्दा नियतं स्फुटमर्थं बोधयन्तीति कल्पना॥—ष-ष्ठतः, प्रायो विरलं परिदृश्यमानोऽपि पूर्वोक्तादपरोऽधिकं व्यापकः शब्दानां दुष्प्रयोगोऽवशिष्यते। स चेत्थम्। यत्किं चिद्विज्ञानसंबद्धानां शब्दानां प्रयोगस्य चिरपरिचयाद् मनुष्या येष्वर्थेषु तान् प्रयुञ्जते तैरर्थैः सार्द्धं तेषां शब्दानामावश्यकं साक्षात्संबन्धं कल्पयितुमर्हन्ति, येन ते शब्दस्य यावानर्थोऽस्ति तदतिरिक्तं किमपि बोद्धुं न शक्ष्यन्ते इत्यपरमपि कल्पयन्ति। अतश्च साधारणपरिगृहीतनाम्नां प्रयोगेषु वक्तृश्रोतारावश्य-मेकरूपं यथार्थं विज्ञानमवधारयत इति निःसंदिग्धमस्तीतीव शब्देषु संतोष्टुमर्हन्ति। अतो यदा संवादे किमपि पदं प्रयुज्यते तदा तेन पदेन तैः परेषां पुरतो यदधिकृत्य भाष्यते तदुपस्थाप्यते इति प्रकल्प्य तथैव च परैः

प्रयुक्तानि पदानि स्वव्यवहृतपदार्थमेव स्वभावत एव बोधयन्तीति निश्चित्य च परेषां पदानां सुस्पष्टमर्थस्यावगमाय स्वीयानां व्याख्यानाय च न कदापि श्रमं सहन्ते। अत एव वस्तुतः शब्दानां स्वैरिकास्थिरविज्ञानलिङ्गत्वे ऽपि सर्वानुमतविज्ञानानां स्थिरनियतलिङ्गतया पदानि मनुष्यैः परिगृह्यन्ते इति निरर्थको ऽपरिष्कृतः सार्वलौकिकः प्रवादः। किं चैवमपि याथार्थ्यैकरूपो विज्ञानसमुदायः स्वल्पेषामेव मिश्रविज्ञाननाम्नामस्तीत्यस्य तर्कैः सुप्रसिद्धत्वेपि यदि कश्चन संवादे वादे वा यत्र वस्तुतः प्रश्न आवश्यकस्तत्र परेषां पदानामर्थं पृच्छेत् तर्हि मनुष्या आश्चर्यं मन्वते। एतस्य सुस्पष्टमुदाहरणं न स्या,देवंविधः शब्दो दुर्लभ एव। प्राण इति पदस्यात्यन्तं परिचितत्वेपि प्रायः सर्वोपि तेन पदेन वक्ता किमभिप्रेतमिति जिज्ञासत एव। किं चैवमपि बीजान्तर्गतो वृक्षो, ऽण्डस्थितः पक्षिगर्भो, मूर्छागतश्चेष्टासंविच्छून्यो मनुष्यश्च जीवत्यस्ति न वेति यदि जिज्ञास्येत तर्हि प्राणेतिपदसदृशसुप्रसिद्धपदस्य प्रयोगेण सह स्फुटं विविक्तं नियतं च विज्ञानं सर्वदा संगतं नास्तीति सुखेन ज्ञायेत। मनुष्याः प्रायशः स्थूलानि विसंकुलानि विज्ञानानि वस्तुतो ऽवधार्य तत्र स्वस्वभाषीयान् साधारणशब्दान् प्रयुञ्जते। एवं यथार्थमक्रियमाणोपि तेषां शब्दप्रयोगस्तेषां लौकिककार्याणि संवादांश्च साधु निर्वाहयति। परं तु शास्त्रीयविमर्शाय नायं पर्याप्तः। प्रमातर्काभ्यां यथार्थानां नियतानां च विज्ञानानामपेक्षणात्। किं च यद्यपि मनुष्या न सर्वथा तथा जडा येन परैः प्रयुक्तशब्दानां विवरणजिज्ञासामकृत्वैव तेषां भाषितं किमपि न बुध्येयुर्नापि तथा हठिनो दोषैकदृशो येन ते परैः क्रियमाणशब्दप्रयोगाणां खण्डनायोद्यता भवेयुस्तथापि यादृशस्थले वस्तुतस्स्वं ज्ञानं च संगते स्तस्तत्र येषां शब्दानां तात्पर्ये संदेहस्तेषां विवरणस्य जिज्ञासायां न कमपि दोषं पश्यामि। नापि ऋते प्रयोक्ता स्वाभिप्रेतार्थविवरणाद् यथार्थार्थनिश्चयस्योपायान्तराभावात् परेण कीदृशार्थतात्पर्येणायं शब्दः प्रयुक्त इति स्वीयाज्ञानस्वीकारात् कुतो मनुष्यो जिह्रेतीत्यत्र हेतुं पश्यामि। यथा चायं परप्रयुक्तशब्दार्थेषु विश्रम्भरूपो दोषो विद्वत्सु बहुलं प्रसृतो

हानिकरश्च तथा नान्यत्र कुत्रापि। बुद्धिमद्भिः पुरुषैः क्रियमाणेषु विवादेषु पुनः पुनश्चर्वणं हठश्चकारणान्तरमपेक्ष्याधिकमस्मादेव शब्दानां दुष्प्रयोगाद्भवतः। यतो यद्यपि लोकानां व्यामोहजनकेषु नानाविधेषु भूयःसु विवादेषु मतानामत्यन्तं वैविध्यमस्तीत्यत्र सर्वेषां विश्वासस्तथापि भिन्नभिन्नमतावलम्बिनो विवदन्तो विद्वांसः परस्परं तर्कोपन्याससमये विभिन्नभाषाद्वयमेव भाषन्त इत्येव प्रायःसर्वत्रोपलभ्यते। यतो यदा तेषां मध्ये कोऽपि पदानि परित्यज्य वस्तुमात्रविषयकं विमर्शं करोति तदा तेषां वादिनां प्रतिपाद्यस्य कदा चिद्भेदे ऽपि तेषां विचारणीयं विषयं ज्ञात्वा ते सर्वे एकमेव विषयं विचारयन्तीति कल्पयितुं युज्यते॥

२३॥ अथ भाषायाः फलानि। तत्र प्रथममस्मद्विज्ञानानां संप्रदानम्॥—भाषाया अपूर्णत्वाख्यदोषस्य दुष्प्रयोगस्य चैतावद्विमर्शस्योपसंहाराय परैः सह संभाषणे भाषाया इमानि त्रीणि मुख्यानि फलानि विमृश्यन्ते। तत्र प्रथमं फलमेकस्य मनुष्यस्य विमर्शानां विज्ञानानां वा मनुष्यान्तरं प्रति ज्ञापनम्। द्वितीयं च यावच्छक्यं शैघ्र्येण सौकर्येण चैतस्य करणम्। तृतीयं च तथाकरणेन पदार्थानां ज्ञानस्य संपादनम्। एषां त्रयाणां मध्ये एकस्यापि फलस्यासिद्धौ भाषा दुष्प्रयुक्ता वा ऽपूर्णा वा भवति॥

प्रथमं तावत् शब्दा एषां फलानां प्रथमस्य संपादनाच्च्यवन्ते। ततश्चैकस्य विज्ञानानि परात्मगोचराणि न कुर्वन्ति। तत्र प्रथमतो यदा स्वोदीरितशब्दवाच्यानि नियतानि विज्ञानानि वक्त्रा स्वात्मन्यनवधार्य शब्दा उदीर्यन्ते। द्वितीयतो यदा यस्याः कस्या अपि भाषायाः सर्वलोकव्यवहृतानि पदानि लोकप्रसिद्धार्थविलक्षणे ऽत्यन्ताप्रसिद्धे ऽर्थविशेषे प्रयुज्यन्ते। तृतीयतश्च कदा चिदेकत्रार्थे ऽन्यदा ऽपरस्मिंश्चेत्रार्थे ऽनियमेन शब्दा यदा यदा प्रयुज्यन्ते॥

२४॥ द्वितीयस्य फलस्य शैघ्र्येण पदैः स्वाभिप्रायाविष्करणस्या संपादनम्॥—मनुष्या यदा येषां प्रसिद्धनामानि न सन्ति तादृशमिश्रवि-

ज्ञानानि पदैर्ज्ञापयितुमिच्छन्ति तदा स्वाभिप्रेतार्थं शैघ्र्येण सौकर्येण वा परान् प्रति ज्ञापयितुं न शक्नुवन्ति । कुत्र चिदयं दोषो भाषाया एव यत्र तादृशार्थविशेषप्रतिपादकानि पदानि न सन्ति, कुत्र चिच्च स्वविवक्षितार्थप्रतिपादकं शब्दविशेषमजानानस्य पुरुषस्येति ॥

२५ ॥ तृतीयतो वस्तूनां ज्ञानस्य भाषणेन संपादनरूपस्य भाषाफलस्यासिद्धिः ॥—तृतीयतो विज्ञानानां यथार्थवस्त्वनुरूपत्वाभावेन मनुष्यादीरितैः पदैर्वस्तूनां ज्ञानं न भवति । यद्यप्ययमस्मद्विज्ञानगतो दोष एव यदभ्यासावधानपरीक्षाभिर्व्यवस्थापितानि विज्ञानानि वस्तुस्वभावानुसारीणि न सन्ति, तथापि शब्दानां वास्तविकसद्वस्तुसंबद्धत्वेऽपि यदा वयं सद्वस्तुलिङ्गतया तान् प्रयुञ्ज्मस्तदा ऽस्माकं शब्देष्वप्ययं प्रसरति ॥

२६ ॥ मनुष्याणां शब्दाः कथं सर्वाणीमानि त्रीण्यपि फलानि न साधयन्ति ॥—प्रथमतो, यदर्थं शब्दः प्रयुज्यते तद्विविक्तं विज्ञानं स्वात्मनि अनवधार्यैव यत्किंचिद्वाषीयान् शब्दान् यः प्रयुङ्क्ते स तावत् संवादे तैः शब्दैरर्थशून्यं तात्पर्यशून्यं वा ध्वनिमेव केवलं करोति । किं च तेषां शास्त्रीयानां कठिनानां शब्दानां प्रयोगेण प्रतीयमानं तस्य विद्वत्त्वं तु अनधीतग्रन्थविषयस्य ग्रन्थनाममात्रमभ्यस्यतः पाण्डित्येन समानमेव नतु ततो ऽणुमात्रमप्यधिकम् । यतः सर्वेषाममीषां शब्दानां व्याकरणविधिप्रतिषेधाननुल्लङ्घ्य सुपरिष्कृतसमयानुसारेण तेषां परस्परानुकूल्येन च वाक्यशो व्यवस्थापने ऽपि केवलं शुष्कं ध्वनिमात्रं विहाय नेषदपि किमपि फलं सिद्ध्यति ॥

२७ ॥ द्वितीयतो यो नामविशेषवैधुर्येण मिश्रविज्ञानान्यवधारयति स स्वगृहे संचितानां वस्त्रादिबन्धनपरिष्काररहितानां पुस्तकाभिधानसूचकाग्रपत्रविधुराणां ग्रन्थानां केवलं ग्रन्थसंदर्भक्रमेणाव्यवस्थितपत्राणां प्रदर्शनेन परान् प्रति तान् ज्ञापयता भूतकथामात्रेण तादृशग्रन्थानधिकृत्य संवादं कुर्वता च केनापि पुस्तकक्रेत्रा तुल्यावस्थापन्न एव स्यात् । एवंविधो मनुष्यः शब्दाज्ञानेन स्वीये संवादे स्वविवक्षितानि मिश्रविज्ञानानि परान् प्रत्याविष्कर्तुं प्रयतमानो भ्राम्यति, तत एव चानेक शुद्धवि-

Digitized by Google

ज्ञानद्वारा बोधनाय बलादिव प्रवर्त्तितो ऽत एव च यद्विज्ञानं परेणैकेन पदेन बोधयितुं शक्यते तद्विज्ञानबोधाय पदानां विंशतिं प्रयुज्य प्रायः श्रान्तो भवति ॥

२८ ॥ तृतीयतो य एकमेव पदं तस्यैव विज्ञानस्य बोधाय न प्रयुङ्क्ते ऽपि तु तदेव पदं कदा चिदेकविधार्थं कदा चिच्चापरस्मिन्नेवार्थे प्रयुङ्क्ते स विद्वत्समाजे संवादे च स तथैव धूर्त्तोभिधीयेत, यथैव कश्चन क्रेता ऽऽपणे बहूनि वस्तून्येकेन नाम्ना विक्रीणाति ॥

२९ ॥ चतुर्थतो यः कस्या अपि भाषायाः पदानि तद्देशीयसकललोकप्रसिद्धाद्भिन्नएवार्थे प्रयुङ्क्ते तस्य वस्तुतस्त्वज्ञत्वे स्फुरत्प्रतिभाशालित्वे ऽपि च स स्वीयानां पदानां लक्षणानि पूर्वमकृत्वा तादृशैः पदैः परान् प्रति न कथमपि बोधयितुं प्रभवति । यतस्तेषां पदानां चिरपरिचितत्वेपि तदभ्यासशीलानां सुश्राव्यत्वे ऽपि च तत्पदसहचरितप्रायिकविज्ञानात् श्रोतुरात्मनि यस्योपस्थितये तानि पदानि लोकैः प्रयुज्यन्ते तेभ्यश्च भिन्ने ऽर्थे प्रयोगेण लोकास्तादृशार्थे पदानि प्रयोक्तुर्विवक्षितार्थान् कथमपि ज्ञातुं न शक्नुवन्ति ॥

३० ॥ पञ्चमतो यश्च कदाप्यभूतद्रव्याणि मनसा परिकल्प्य यथार्थवस्तुस्वभावाननुसारीणि विज्ञानानि मनसि संगृह्य च तादृशार्थे पदानि व्यवस्थाप्य लक्षणानि च तेषां प्रदर्शयति स्वीये संवादे यद्यपि स तानि पदानि प्रयोक्तुमर्हति कदा चिच्च स्वमनःकल्पितानि विज्ञानानि परात्मस्वपि संक्रामयितुं शक्नोत्यथापि यथार्थज्ञानलेशमपि न जनयितुं प्रभवति ॥

३१ ॥ यश्च विनैवार्थावधारणं शब्दानभ्यस्यति तस्य शब्दानामर्थाभावादर्थशून्यान्ध्वनीनिव पदमात्राणि स रटति । तच्च निरर्थकता दोषः प्रथमः, पदविधुराणां मिश्रविज्ञानानामवधारयिता स्वाभिप्रायाविष्करणे ऽस्वातन्त्र्यात्तत्साधनानां पदानामभावाच्च विवशो भूत्वा तत्समानार्थकानि लघुवाक्यानि प्रयुङ्क्ते । तच्च गौरवं द्वितीयो दोषः । यश्च स्वीयानि पदानि विकलानीवानियतार्थेषु प्रयुङ्क्ते सो ऽनवहिता-

न्तःकरणो वा तदर्थज्ञानविमुखो वा स्यात् । तत्रानिश्चितार्थकता तृतीयो दोषः । यः पुनः स्वीयानि पदानि लोकप्रसिद्धाद्भिन्नविज्ञानतात्पर्येण प्रयुङ्क्ते तस्य भाषणे ऽऔचित्यभावान्निरर्थकं जल्पनमिव भाषते । तत्र वक्त्रभिप्रेतार्थानवगमश्चतुर्थः । यस्तु सद्वस्त्वननुरूपाणां कल्पितद्रव्याणां विज्ञानान्यवधारयति तस्य बुद्धौ तावद्यथार्थज्ञानसाधनस्याभावात्सो ऽवश्यं भ्राम्यत्येव । तत्र यथार्थज्ञानासाधनत्वं दोषः पञ्चमः ॥

३२ ॥ कथं द्रव्येष्वमीदोषाः संभवन्ति॥—द्रव्यसंबद्धेष्वस्माकं विज्ञानेषु पूर्वोक्ताः सर्वे दोषाः संभाव्यन्ते । यस्मिन्नर्थे 'टारंट्युला' इति शब्दः प्रयुज्यते तमर्थमनवधार्यैव तं शब्दं प्रयुञ्जानः साधु पदमुच्चारयन्नपि न कमप्यर्थं विवक्षतीति तत्राद्यो दोषः । अदृष्टचरे देशे ऽदृष्टपूर्वान् जीवविशेषान् महीरुहविशेषांश्च पश्यंस्तद्विज्ञानानि अश्वमृगविज्ञानानीव यथार्थान्यवधारयन्नपि पुरुषो यावत्तद्देशीयैस्तत्तदर्थे प्रयुज्यमानानि पदानि नाभ्यस्यति स्वयं वा तेषां नामान्तराणि न कल्पयति तावत्तद्विज्ञानान्यधिकृत्य केवलं विवरणमात्रेण भाषितुं शक्नोति तत्र द्वितीयो दोषो गौरवम् । कदा चिद्विस्तारमात्रबोधाय कदाचिच्च घनत्वविस्तारयोर्बोधाय द्रव्यपदं प्रयुञ्जानस्य भाषणे ऽर्थव्यभिचारो ऽनियतार्थकत्वं वा तृतीयो दोषः । यत्राश्वतरपदाभिधेयतया प्रसिद्धे विज्ञाने ऽश्वपदं प्रयुङ्क्ते तत्र वक्तृविवक्षितार्थानवगमश्चतुर्थो दोषः । यत्र वक्ता मयुरिति पदं सद्वस्तुविशेषमभिदधातीति कल्पयति तत्र शब्दान् वस्तुत्वेन व्यपदिशन् भ्राम्यतीति भ्रमजनकत्वं दोषः पञ्चमो ऽवसरं लभतइति ॥

३३ ॥ कथं भावेषु संबन्धेषु च ॥—भावेषु संबन्धेषु चैतेषां दोषाणामाद्याश्चत्वारः संभाव्यन्ते । तथा हि । (१) कृतज्ञतादयेत्यादीनि भाववाचकानि पदानि तत्तत्पदवाच्ययथार्थविज्ञानान्यनवधार्यैवावधारयितुं शक्यन्ते इति तत्र प्रथमदोषस्य प्रसरः । (२) एवं तथाविधभाववाचकानि नामान्यज्ञात्वापि तत्तद्भावविज्ञानान्यवधारयितुं शक्यन्तइति तत्र गौरवावसरः । तथा हि । सुरापानेनयावद्वैवर्ण्यं संपद्यते पातुर्जिह्वा यावदविस्पष्टाक्षरा भवति नेत्रे रक्ते भवतः पादौ च स्खलतः तावत्पानस्य

विज्ञानमवधारयितुं शक्यते ऽथापि न ज्ञायते इदमुन्मादपदेनाभिधातव्यमिति । (३) पुण्यपापयोर्विज्ञाने तन्नामनी च ज्ञात्वापि यत्र भ्रान्त्या ते पदे प्रयुज्येते । यथा । यदा परैर्लोभपदेनाभिधीयमानविज्ञानस्य बोधाय कार्पण्यमिति पदं प्रयुनज्मि तदा तुरीयः । (४) इमानि सर्वाणि पदानि अनियतार्थे प्रयोक्तुं शक्यन्ते इति तृतीयदोषस्य संभवः । एवमपि भावेषु संबन्धेषु च सद्वस्त्वननुकूलानि विज्ञानानि न कल्पयितुं शक्यन्ते । यतो भावानां स्वैरमनःकल्पनाजन्यमिश्रविज्ञानात्मकतया, संबन्धानां च केवलं वस्तुद्वयतुलनाप्रकारेणात्मकल्पितविज्ञानरूपतया चेमानि विज्ञानानि कस्यापि सद्वस्तुनो ऽननुरूपाणि भवितुं नार्हन्ति । यतस्तानि प्रकृतिसिद्धनियतवस्तुप्रतिमानतया ऽऽत्मनि न सन्ति नापि स्वरूपतः कस्यापि द्रव्यस्य आभ्यन्तरसंस्थितेर्वा संपद्यमानानामव्यभिचरितधर्माणां रूपेणाप्यात्मनि सन्ति अपि तु क्रियाणां संबन्धानां च बोधाय प्रयुक्तनामभिः सहितानि तानि सद्वस्तुत्वेन आत्मनि अवधार्यन्ते । परंतु स्वीयविज्ञानबोधाय तदर्थाबोधकशब्दप्रयोगरूप एव सार्वत्रिको भ्रमः । एवं लोकप्रसिद्धातिरिक्तेर्थे शब्दप्रयोगेण बोधो न भवति, परंतु यदा तदबोधकः शब्दस्तस्मिन्नेव विज्ञाने प्रयुज्यते तदा वक्तुरयथार्थविज्ञानवत्त्वं चिन्त्यते । केवलं यदि मिश्रभावानां संबन्धानां च विज्ञानेषु किं चिदप्यननुगुणं विज्ञानं योज्येत तर्हि काल्पनिकविज्ञानमेवावधार्येत । एवंविधानां विज्ञानां सुपरीक्षणे सति आत्मगतानि तानि तत्पदबोध्यवास्तविकवस्तुसरूपाणि कथमपि भवितुं नार्हन्ति ॥

३४ ॥ (७) औपचारिकशब्दप्रयोगोपि भाषया दुष्प्रयोगः ॥–वैदग्ध्याः कल्पनायाश्च शुष्कतत्त्वयथार्थज्ञानाभ्यामधिकमाह्लादजनकत्वाद्भाषायामौपचारिकशब्दप्रयोगसंक्षिप्तकथान्तरसंवादौ विरलमेव भाषादोषत्वेन परिगणितौ । सत्यं चैतत् संभाषणस्य यदि केवलमितिवृत्तकथनज्ञानपरिष्कारावनुपेत्यानन्दजनकत्वं कर्तुमिष्यते तर्हि औपचारिकशब्दप्रयोगकथान्तरसंवादोत्थानि भूषणानि दोषत्वेन न व्यवहर्तुं शक्यन्ते । परं त्वेवमपि यदि वयं वस्तुतत्त्वान्यधिकृत्य भाषेमहि तर्ह्यवश्यमस्माभिः

स्वीकरणीयं यत् भ्रमं व्यक्ततां च विहायान्या सर्वाप्यालंकारिकाणां वैदग्धी वाग्मितयोर्हिताः सर्वेप्यौपचारिकाः शब्दप्रयोगाः केवलमयथार्थविज्ञानान्युत्पादयन्ति मनोवृत्तीश्चालयन्ति, तत एव च तत्त्वनिर्णयांश्चान्यथयन्ति । इत्थं च पूर्णोच्छलरूपा भवन्ति । किं चात एवेमौ रसिकवाक्येषु लौकिकसंभाषणे च यद्यपि श्लाघनीयौ लोकानुमतश्च वाग्मी योजयति तथापि सर्वेषु विश्वसनीयेष्वितिवृत्तप्रतिपादकेषु च वाक्येषु वस्तुतस्तौ सर्वथा परिहरणीयौ । यत्र च तत्त्वं प्रमां चाधिकृत्य भाष्यते तत्र तौ भाषाया वक्तुर्वा महादोषतया विचिन्त्येते । कथं कौ च ताविति त्यस्य विवरणमत्रानुपयुक्तमिति तत्परित्यज्यते । संसारे प्रचरिता अलंकारयन्त्या यथार्थेतिवृत्तजिज्ञासाशून्यपुरुषैः पठनीयाः सदोषवैदग्धीनां भूषितत्वात्सर्वजनप्रियतया च मनुष्येषु तत्त्वज्ञानयोः परिष्कारपरिरक्षणे विरल एव स्त इत्येव पश्यामि । प्रसिद्धं चैतन्मनुष्येभ्यः कथं बहुशो वञ्चनं वञ्चितत्वं च रोचेते ॥ यतो भ्रमवञ्चनयोर्दृढसाधनभूतमलंकारशास्त्रं विद्यामण्डलेषुलब्धपदैर्महाध्यापकैः सुप्रसिद्धमध्याप्यते स्तूयते च भृशं सर्वदा जनैः । किं चैतस्य विरोधेन यत्किमप्येतावदबोचं तेन निःसंदेहं मम साहसमरसिकत्वं वा विचिन्तयिष्यन्ति लोकाः । वाग्मिता वैदग्धी वा सुन्दरीव स्वस्मिन्परमलावण्यमादधती न कथमपि जनापवादं सहते । किं च यत्र मनुष्या वञ्चितभावेनैव सुखमनुभवन्ति तत्रैतद्वञ्चनवैदग्ध्योर्दोषोद्भावनं निरर्थकमेवेतिसुधियो विभावयन्तु ॥

॥ इति दशमः परिच्छेदः ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER XI.

THE AKSHAPÁDA (OR NYÁYA) DARŚANA.

(Continued from page 445).

The principle that final bliss or the absolute abolition of pain arises from the knowledge of the truth, although established

॥ सर्वदर्शनसङ्ग्रहः ॥

तत्त्वज्ञानाद्दुःखात्यन्तोच्छेदलक्षणं निःश्रेयसं भवतीति समानतन्त्रे

as only a tenet of the Nyáya School [and not universally accepted] is expressly declared by the author of the aphorisms in the words "proof, that which is to be proved, &c.—from knowledge of the truth as to these things there is the attainment of final bliss." This is the first aphorism of the Nyáya Śástra. Now the Nyáya Śástra consists of five books; and each book contains two 'daily portions.' In the first daily portion of the first book the venerable Gotama discusses the definitions of nine categories, beginning with 'proof,' and in the second those of the remaining seven, beginning with 'discussion' (*váda*). In the first daily portion of the second book he examines 'doubt,' discusses the four kinds of 'proof,' and refutes the suggested objections to their being instruments of right knowledge; and in the second he shews that 'presumption,' &c. are really included in the four kinds of 'proof' already given, [and therefore need not be added by the Mímánsakas as separate ones]. In the first daily portion of the third book he examines the soul, the body, the senses, and their objects; in the second 'understanding' (*buddhi*) and 'mind' (*manas*). In the first daily portion of the fourth book he examines 'volition' (*pravṛitti*), the 'faults,' 'transmigration,' 'fruit,' 'pain,' and 'final liberation;' in the second he investigates the truth* as to the causes of the 'faults,' and also

* In p. 112, line 16 of the Calcutta edition I read दोषनिमित्ततत्त्व for दोषनिमित्तकस्य compare Nyáya Sút. iv. 68.

ऽपि प्रतिपादितं, तदाह सूत्रकारः प्रमाणप्रमेयेत्यादि तत्त्वज्ञानान्निःश्रेय-साधिगम इति । इदं न्यायशास्त्रस्यादिमं सूत्रं न्यायशास्त्रञ्च पञ्चाध्याय्यात्मकं तत्र प्रत्यध्यायस्याह्निकद्वयम् । तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणं कृतम् । द्वितीयस्य प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम् । तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणं द्वितीये बुद्धिमनःपरीक्षणम् । चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणं

'wholes,' and 'parts.' In the first daily portion of the fifth book he discusses the various kinds of futility, (*játi*) and in the second the various kinds of 'occasion for rebuke' (*nigrahasthána* or 'unfitness to be argued with.')

In accordance with the principle that 'to know the thing to be measured you must first know the measure,' 'proof' (*pramána*) is first enunciated, and as this must be done by defining it, we have first a definition of 'proof.' 'Proof' is that which is always accompanied by right knowledge, and is at the same time not disjoined from the proper instruments [as the eye, &c.] and from the site of knowledge, [i. e. the soul]; * and this definition thus includes the peculiar tenet of the Nyáya School that God is a source of right knowledge, † as the author of the Aphorisms has expressly declared (ii. 68,) "and the fact of the Veda's being a cause of right knowledge, like spells and the medical science, follows from the fact that the fit one who gave the Veda was a source of right knowledge." And thus too hath the universally renowned teacher Udayana, who saw to the furthest shore of the ocean of logic, declared in the fourth chapter of the Kusumánjali :

* Without this last clause the definition might include the objects (*vishaya*) as these are of course connected with right knowledge.

† Íswara is a cause of right knowledge according to the definition, because *pramáyá áśraya.*

द्वितीये दोषनिमित्ततत्त्वनिरूपणं अवयव्यादिनिरूपणञ्च । पञ्चमस्य प्रथमे जातिभेदनिरूपणं । द्वितीये निग्रहस्थानभेदनिरूपणम् । मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणस्य प्रथममुद्देशे तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रमाणस्य प्रथमं लक्षणं कथ्यते । साधनव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम् एवञ्च प्रतितन्त्रसिद्धान्तसिद्धं परमेश्वरप्रामाण्यं सङ्गृहीतं भवति । तदेतदकथयत् सूत्रकारः मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति । तथाच न्यायपारावारपारदृश्वा विश्वविख्यातकीर्त्तिरुदयनाचार्यो ऽपि कुसुमाञ्जलौ चतुर्थे स्तबके ॥

"Right knowledge is accurate comprehension, and right knowing is the possession thereof; authoritativeness is, according to Gotama's school, the being separated from all absence thereof.

"He, in whose intuitive unerring perception, inseparably, united to Him and dependent on no foreign inlets, the succession of all the various existing objects is contained,—all the chaff of our suspicion being swept away by the removal of all possible faults as caused by the slightest want of observation in Him,—He, Śiva, is my authority; what have I to do with others, darkened as their authority must ever be with rising doubts?"

'Proof' is four-fold, as being divided into perception, inference, analogy, and testimony. The 'thing to be proved' or the 'object of right notion' is of twelve kinds, viz. soul, body, the senses, their objects, understanding, mind, volition, faults, transmigrations, fruit, pain, and final liberation. 'Doubt' is a knowledge whose nature is uncertainty; and this is three-fold, as being caused by the object's possessing only qualities which are common to other things also and therefore not distinctive,—or by its possessing only peculiar qualities of its own, which do not help us in determining our particular point in question,*—or by conflicting

* On this compare Siddhánta-muktávali, p. 115.

मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते इति ॥
साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ ।
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ॥
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः ।
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिव इति ॥

तच्चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् । प्रमेयं द्वादशप्रकारम् आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदात् । अनवधारणात्मकं ज्ञानं संशयः स त्रिविधः साधारणधर्मासाधारणधर्म-

testimony.—That thing which one proposes to one's self and then proceeds to act, is 'a motive' (*prayojana*); this is two-fold, i. e. visible and invisible. An 'example' is a fact brought forward as a ground for establishing a general principle, and it may be either affirmative or negative.* A 'tenet' (*siddhánta*) is something which is accepted as being authoritatively settled as true; it is of four kinds, as being 'common to all the schools,' 'peculiar to one school,' 'a pregnant assumption' (leading, if conceded, to a further conclusion), and 'an implied dogma' (i. 26—31). The 'member' (of a demonstration) is a part of the sentence containing an inference for the sake of another; and these are five, the proposition, the reason, the example, the application and the conclusion (i. 32—38). 'Confutation' (i. 39,) is the shewing that the admission of a false minor necessitates the admission of a false major † (cf Sút. i. 39, and iv. 3); and this is of eleven kinds, as *vyághátu*, *átmáśraya*, *itaretaráśraya*, &c.

'Ascertainment' (i. 40,) is right knowledge or a perception of the real state of the case. It is of four kinds as produced by

* On these compare my note to Colebrooke's Essays, Vol. i. p. 315.

† "Our coming to the conclusion that there can be no smoke in the hill if there be no fire, while we *see* the smoke, is the confutation of there being no fire in the hill." (*Ballantyne*). Or in other words, "the mountain must have the absence-of-smoke (*vyápaka*) if it has the absence-of-fire (the false *vyápya*)."

विप्रतिपत्तिलक्षणभेदात् । यमधिकृत्य प्रवर्त्तन्ते पुरुषास्तत्प्रयोजनं तद्द्विविधं दृष्टादृष्टभेदात् । व्याप्तिसंवेदनभूमिर्दृष्टान्तः । स द्विविधः, साधर्म्यवैधर्म्य-भेदात् । प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः स चतुर्विधः सर्व्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमभेदात् । परार्थानुमानवाक्यैकदेशोऽवयवः । स पञ्चविधः, प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् । व्याप्यारोपे व्यापका-रोपस्तर्कः । स चैकादशविधः, व्याघातात्माश्रयेतरेतराश्रयचक्रकाश्रयानव-स्थाप्रतिबन्धिकल्पनालाघवकल्पनागौरवोत्सर्गापवादवैजात्यभेदात् । यथा-र्थानुभवपर्य्याया प्रमितिर्निर्णयः । स चतुर्विधः, साक्षात्कृत्यनुमित्युपमिति-शाब्दीभेदात् । तत्त्वनिर्णयफलः कथाविशेषो वादः । उभयसाधनवती

perception, inference, analogy, or testimony. 'Discussion' (*váda*) is a particular kind of conversation, having as its end the ascertainment of truth (i. 41). 'Wrangling' (*jalpa*) is the talk of a man only wishing for victory, which is ready to employ arguments for either side of the question (i. 42). 'Cavilling' (*vitaṇḍá*) is the talk of a man who does not attempt to establish his own side of the question (i. 43). 'Dialogue' (*kathá*) is the taking of two opposite sides by two disputants. A 'fallacy' is an inconclusive reason which is supposed to prove something, and this may be of five kinds,—the 'erratic,' the 'contradictory,' the 'indifferent,' the 'unproved,' and the 'precluded' or 'mistimed,' (*Sút.* i. 44—49). 'Unfairness' (*chhala*) is the bringing forward a contrary argument by using a term wilfully in an ambiguous sense; this is of three kinds, as there may be fraud in respect of a term, the meaning, or a metaphorical phrase (i. 50—54). 'Futility' (*játi*) is a self-destructive argument (i. 58). This is of twenty-four kinds,—(as described in the fifth book of the Nyáya Aphorisms 1—38). 'Occasion for rebuke' is where the disputant loses his cause [by stupidity] and this is of twenty-two kinds, (as described in the fifth book of the Aphorisms 44—67). We do not insert here all the minute sub-divisions through fear of being two prolix,—they are fully explained in the Aphorisms.

विजिगीषुकथा जल्पः । स्वपक्षस्थापनाहीनः कथाविशेषो वितण्डा । कथा
नाम वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः । असाधको हेतुत्वेनाभिमतो
हेत्वाभासः । स पञ्चविधः, सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीत-
कालभेदात् । शब्दवृत्तिव्यत्ययेन प्रतिषेधहेतुश्छलं । तत्त्रिविधम्, अभि-
धानतात्पर्योपचारव्यत्ययवृत्तिभेदात् । स्वव्याघातकमुत्तरं जातिः । सा
चतुर्विंशतिविधा, साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्रा-
प्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपल-
ब्ध्यनुपलब्धिनित्यानित्यकार्यसमभेदात् । पराजयनिमित्तं निग्रहस्थानं
तद्द्वाविंशतिप्रकारं प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहे-

Digitized by Google

But here an objector may say, 'if these sixteen topics proof, &c., are all thus fully discussed, how is it that it has got the name of the Nyáya Śástra, as reasoning [i. e. *Nyáya* or logic properly] forms only a small part of the topics which it treats of?" We allow the force of the objection, still as names are proverbially said to be given for some special reason, we maintain that the name Nyáya was rightly applied to Gotama's system, since 'reasoning,' or inference for the sake of another, is justly held to be a predominant feature, from its usefulness in all kinds of knowledge and from its being a necessary means for every kind of pursuit. So it has been said by Sarvajna 'this is the pre-eminent science of Nyáya from its establishing our doctrines against opponents and from its producing action'; * and by Pakshila Swámin, 'This is the science of reasoning (*ánvíkshikí*) divided into the different categories, 'proof,' &c.;—the lamp of all sciences, the means for aiding all actions, the ultimate appeal of all religious duties, well proved in the declarations of science'.†

But here an objector may say,—"When you declare that final liberation arises from the knowledge of the truth, do you

* Action *(pravritti)* follows after the ascertainment of the truth by *Nyáya.*

† Cp. Vátsyáyana's Comment. p. 6. The Calcutta edition reads *prakírtitá* or *paríkshitá.*

स्वन्तरार्थान्तरनिरर्थकाविज्ञातार्थापार्थकाप्राप्तकालन्यूनाधिकपुनरुक्तानतु-भाषणाज्ञानाप्रतिभाविक्षेपमतानुज्ञापर्य्यनुयोज्योपेक्षणनिरनुयोज्यानुयोगाप-सिद्धान्तहेत्वाभासभेदात् । अत्र सर्व्वान्तर्गणिकस्तु विशेषस्तत्रशास्त्रे विस्पष्टो ऽपि विस्तरभिया न प्रस्तूयते ।

ननु प्रमाणादिपदार्थषोडशके प्रतिपाद्यमाने कथमिदं न्यायशा-स्त्रमिति व्यपदिश्यते सत्यं तथाप्यसाधारण्येन व्यपदेशा भवन्तीति न्यायेन न्यायस्य परार्थानुमानापरपर्य्यायस्य सकलविद्यानुग्राहकतया सर्व्व-कर्म्मानुष्ठानसाधनतया प्रधानत्वेन तथा व्यपदेशो युज्यते । तथाभाणि सर्व्वज्ञेन सो ऽपरमो न्यायः विप्रतिपन्नपुरुषप्रतिपादकत्वात् तथा प्रवृत्तिहे

mean that liberation ensues immediately upon this knowledge being attained?" We reply 'no,' for it is said in the second Nyáya Aphorism, 'pain,' birth, activity, faults, false notions,—on the successive annihilation of these in turn, there is the annihilation of the one next before it,"—by means of this knowledge of the truth. Now false notions are the thinking the body, &c., which are not the soul to be the soul; 'faults' are a desire for those things which seem agreeable to the soul and a dislike to those things which seem disagreeable to it,* though in reality nothing is either agreeable or disagreeable to the soul. And through the mutual reaction of these different 'faults,' the stupid man desires, and the desiring man is stupid, the stupid man is angry, the angry man is stupid,—and the man, impelled by these faults, does those things which are forbidden,—thus by the body he does injury, theft, &c.—by the voice falsehood, &c.,—by the mind malevolence, &c., and this same sinful 'activity' produces demerit. Or, again, he may do laudable actions by his body, as alms, saving others, &c.,—truthful speaking and upright counsel by his voice,—and guilelessness, &c., by his mind; and this same right activity produces merit. But both are two kinds of activity; and each

* The printed text omits the third fault, "a stupid indifference, *moha*," which is however referred to presently.

तुत्वाच्चेति । पक्षिलस्वामिना च सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना ।

प्रदीपः सर्व्वविद्यानामुपायः सर्व्वकर्म्मणाम् ।
आश्रयः सर्व्वधर्म्माणां विद्योद्देशे परीक्षितेति ॥

ननु तत्त्वज्ञानान्निःश्रेयससम्भवतीत्युक्तं तत्र किं तत्त्वज्ञानादनन्तरमेव निःश्रेयसं सम्पद्यते नेत्युच्यते किन्तु तत्त्वज्ञानाद्दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभाव इति । तत्र मिथ्याज्ञानं नामानात्मनि देहादावात्मबुद्धिः तदनुकूलेषु रागः तत्प्रतिकूलेषु द्वेषः वस्तुतस्त्वात्मनः प्रतिकूलमनुकूलं वा न किञ्चित् समस्ति, परस्परानुब-

leads to a similar laudable or blameable birth or bodily manifestation; and while this birth lasts, there arises the impression of 'pain,' which we are conscious of as of something that jars against us. Now this series beginning with 'false notions' and ending with 'pain' is continually going on and is what we mean by the words 'mundane existence' which rolls on ceaselessly like a potter's wheel. And whenever some pre-eminent man, by the force of his previous good deeds, obtains through the teaching of a great teacher, the knowledge that all this present life is only a scene of pain and bound up with pain,—he recognises that it is all to be avoided, and desires to abolish the ignorance &c., which are the causes that produced it.* Then he learns that the one means to abolish it is the knowledge of the truth; and as he meditates on the objects of right knowledge divided into the four sciences,† there arises in his mind the knowledge of the truth, or, in other words, a right view of things

* In p. 116 l. 8. I would read *tannirvartakam* for *tannivartakam*.

† This refers to the couplet so often quoted in Hindu authors, "Logic,—the three vedas,—trade and agriculture,—and the eternal doctrine of polity,—these four sciences are the causes of the stability of the world," (Cf. Manu, vii. 43). It occurs in Kámandaki's *Nítisára*, ii. 2. and seems to be referred to in Vátsyáyana's Comm. p. 3. from which Mádhava is here borrowing.

न्यत्वाच्च रागादीनां मूढो रज्यति रक्तो मुह्यति मूढः कुप्यति कुपितो मुह्यतीति ततस्तैर्दोषैः प्रेरितः प्राणी प्रतिषिद्धानि शरीरेण हिंसास्तेयादीन्याचरति वाचा अनृतादीनि मनसा परद्रोहादीनि सेयं पापरूपा प्रवृत्तिरधर्म्ममावहतीति । शरीरेण प्रशस्तानि दानपरपरित्राणादीनि वाचा हितसत्यादीनि मनसा अहिंसादीनि सेयं पुण्यरूपा प्रवृत्तिर्धर्म्मः । सेयमुभयी प्रवृत्तिः ततः स्वानुरूपं प्रशस्तं निन्दितं वा जन्म पुनः शरीरादेः प्रादुर्भावः तस्मिन् सति प्रतिकूलवेदनीयतया बाधनात्मकं दुःखं भवति, त इमे मिथ्याज्ञानादयो दुःखान्ता अविच्छेदेन प्रवर्त्तमानाः संसारशब्दार्थो घटीचक्रवन्निरवधिरनुवर्त्तते । यदा कश्चित् पुरुषधौरेयः पुराकृतसुकृतपरिपाकवशादाचार्य्योपदेशेन सर्व्वमिदं दुःखायतनं दुःखानुषक्तञ्च पश्यति

Digitized by Google

as they are; and from this knowledge of the truth false notions disappear. When false notions disappear, the 'faults' pass away; with them ceases 'activity;' and with it ceases 'birth;' and with the cessation of 'birth' comes the entire abolition of 'pain,' and this absolute abolition is final bliss. Its absoluteness consists in this, that nothing similar to that which is thus abolished can ever revive, as is expressly said in the second Aphorism of the Nyáya Sútras;—"pain, birth, activity, faults, false notions,—since, on the successive annihilation of these in turn, there is the annihilation of the one next before it, there is [on the annihilation of the last of them] final beatitude."

"But is not your difinition of the summum bonum, Liberation i. e. "the absolute abolition of pain,"—after all as much beyond our reach as treacle on the elbow is to the tongue; why then is this continually put forth as if it were established beyond all dispute?" We reply that as all those who maintain Liberation in any form do include therein the absolute abolition of pain, our definition, as being thus a tenet accepted in all the schools, may well be called the royal highway* of philosophy. No one in fact maintains that pain is possible without the individual's activity.

* Literally the 'bell-road,' i. e. "the chief road through a village, or that by which elephants, &c., decorated with tinkling ornaments, proceed," Wilson's Dict.

तदा तत्सर्वं हेयत्वेन बुध्यते ततस्तद्विवर्त्तकमविद्यादि निवर्त्तयितुमिच्छति तन्निवृत्त्युपायश्च तत्त्वज्ञानमिति कस्यचित्त्वतसृभिर्विद्याभिर्विभक्तं प्रमेयं भावयतः सम्यग्दर्शनपदवेदनीयतया तत्त्वज्ञानं जायते, तत्त्वज्ञानान्मिथ्याज्ञानमपैति, मिथ्याज्ञानापाये दोषा अपयान्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्मापैति, जन्मापाये दुःखमत्यन्तं निवर्त्तते सात्यन्तिकी निवृत्तिरपवर्गः । निवृत्तेरात्यन्तिकत्वं नाम निवर्त्यसजातीयस्य पुनस्तत्रानुत्पाद इति । तथाच पारमर्षं सूत्रं, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति ।

ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदद्यापि कफोणिगुडायितं वर्त्तते तत् कथं सिद्धवत्कृत्य व्यवह्रियत इति चेन्मैवं सर्वेषां मोक्षवादि-

Thus even the Mádhyamika's opinion that 'Liberation consists in the abolition of soul,' does not controvert one point, so far at any rate as that it is the abolition of pain. But if you proceed to argue that the soul, as being the cause of pain, is to be abolished just like the body, &c.—we reply that this does not hold, since it fails under either alternation. For do you mean by 'the soul' *a.* the continued succession of cognitions, or *b.* something different therefrom? *a.* If the former, we make no objection [since we Naiyáyikas allow that cognition is evanescent,* and we do desire to abolish cognition as a cause of *pravritti* or action,†] and who would oppose a view which makes for his own side? *b.* But if the latter then since it must be eternal‡ its abolition is impossible; and again, a second objection would be that no one would try to gain your supposed 'summum bonum.' For surely no sensible person would strive to annihilate the soul which is always the dearest of all, (on the principle that 'everything else is dear for the soul's pleasure;') and, again, every body uses such as a phrase as 'liberated,' [and this very term refutes the idea of annihilation or abolition.]

* The cognition is produced in the first moment, remain during the second, and classes in the third.

† See Náya Sút. 1. 2.

‡ As otherwise why should we require Liberation at all? or the author may assume that other Naiyáyiks have sufficiently established this point against its opponents.

नामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्वतन्त्रसिद्धा-
न्तसिद्धतया घण्टापथत्वात् नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चि-
त् प्रपद्यते तथाहि आत्मोच्छेदो मोक्ष इति माध्यमिकमते दुःखोच्छेदो-
ऽस्तीत्येतावत्तावदविवादम् । अथ मन्येथाः शरीरादिवदात्मापि दुःख-
हेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः किमात्मा ज्ञानस-
न्तानो विवक्षितः तदतिरिक्तो वा । प्रथमे न विप्रतिपत्तिः कः खल्वनुकू-
लमाचरति प्रतिकूलमाचरेत् । द्वितीये तस्य नित्यस्य निवृत्तिरशक्यविधा-
नैव प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावानात्मनस्तु
कामाय सर्वं प्रियं भवतीति सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रय-

Digitized by Google

"But why not say with those Bauddhas who hold the doctrine of pure intelligence, [i. e. the Yogáchåras and the Sautrántikas,*] that 'the summum bonum is the rising of pure intelligence consequent on the cessation of the conscious subject?" To this view we object that there is an absence of means; and, also, it cannot be established that the locus [or subject,] of the two states is the same. For the former,—if it is replied that the well-known fourfold set of Bauddha contemplations † are to be accepted as the cause, we answer that, as, (according to the Bauddha tenet of the momentary existence of all things,) there cannot be one abiding subject of these contemplations, they will necessarily exercise a languid power like studies pursued at irregular intervals, and be thus ineffectual to produce any distinct recognition of the real nature of things.

And for the latter,—since the continued series of cognitions when accompanied by the natural obstacles ‡ is said to be 'bound, and when freed from those obstacles is said to be 'liberated,' you cannot establish an identity of subject in the two states so as to be able to say that the very same being which *was* bound *is* now liberated.

Nor do we find the path of the Jainas,—viz. that 'Liberation is the releasing from all 'obstructions,'—a path entirely free from

* See S. D. Sangraha, pp. 17, 22.

† All is momentary,—all is pain,—all is sui generis,—all is unreal.

‡ In the form of the various *kleśas* or 'afflictions.'

तते सर्व्वाँहि प्राणी मुक्त इति व्यवहरति । ननु धर्म्मिनिवृत्तौ निर्म्मलज्ञा-
नोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्या-
नुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे
स्थिरैकाधारासम्भवात् लङ्घनाभ्यासादिवदनादितप्रकर्षं न स्फुटमभिज्ञान-
मभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च
मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते । आ-
वरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः बद्ध

bars to impede the wayfarer. Pray, will our Jaina friend kindly inform us what he means by 'obstruction?' If he answers "merit, demerit, and error," we readily grant what he says. But if he maintains that "the body is the true obstruction and hence Liberation is the continual upspringing of the soul consequent on the body's annihilation, as of a parrot released from its cage,"— then we must enquire whether this said soul possesses form or not. If it possesses form, then has it parts or not? If it has no parts, then since the well-known definition of an atom will apply here as 'that which has form without parts,' it will follow that the attributes of the soul are, like those of an atom, imperceptible to the senses.* If you say that it has parts, then the general maxim that 'all which has parts is non-eternal' would necessitate that the soul is non-eternal, and if this were conceded, then two grand difficulties [against the Providential course of the world,] would burst in unopposed, viz. that what the soul had done would, at its cessation, perish with it [and thus fail of producing the proper fruit.] while it would have reaped during life the effects of what it had not done, [as the good and evil which happened to it would not be the consequeces of its actions in a former birth.] If, on the other hand, the Jaina maintains that the soul does not possess form at all, then how can he talk of the soul's 'upspringing,'

* But the Nyáya holds that the attributes of the soul, as happiness, desire aversion, &c., are perceived by the internal sense, mind, (Bhásha P. § 83.)

भवान् पृष्टो व्याचष्टां किमावरणं ? धर्म्माधर्म्मभ्रान्तय इति चेत् इष्टमेव । अथ देहमेवावरणं तथाच तद्विवृत्तौ पञ्जरान्मुक्तस्य शुकस्येवात्मनः सततोर्द्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्त्तोऽमूर्त्तो वा । प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्त्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्म्मवदात्मधर्म्माणामतीन्द्रियत्वं प्रसज्येत । सावयवत्वे यत्सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम् । अमूर्त्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्त्तप्रतिबन्धात् पारतन्त्र्यं बन्धः

since all such actions as motion necessarily involve an agent possessing form? *

Again, if we take the Chárváka's view that "the only bondage is dependence on another, and therefore independence is the true liberation,"—if by 'independence' he means the cessation of pain, we have no need to controvert it. But if he means autocratic power, then no sensible man can concede it, as the very idea of earthly power involves the idea of a capability of being increased and of being equalled. †

Again, the Sánkhya opinion, which first lays down that nature and soul are utterly distinct, and then holds that "Liberation is the soul's remaining as it is in itself after nature [on being known] has withdrawn,"—even this opinion accepts our tenet of the abolition of pain; but there is left a difficulty as to whether this cognition of the distinction between nature and soul resides in the soul or in nature. It is not consistent to say that it resides in the soul, since the soul is held to be unchangeable and this would seem to involve that previously it had been hampered by ignorance, nor can we say that it resides in nature, since nature is always held to be unintelligent. Moreover, is nature spontaneously active or inactive? If the former, then it follows that there can be no Liberation at all, since the spontaneous actions of things cannot be set aside; and if the latter, the course of mundane existence would at once cease to go on.

* The reading मूर्त्तप्रतिबन्धात् is difficult, but I believe that *pratibandha* means here *vyápti*, as it does in Sánkhya Sútras, i. 100.

† The true summum bonum must be *niratiśaya*,—incapable of being added to.

स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेदविवाद
ऐश्वर्य्यं चेत्सातिशयतया सदृशतया च प्रेक्षावतां नाभिमतम् प्रकृतिपुरु-
षान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्या-
ख्यातेऽपि पक्षे दुःखोच्छेदे ऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं प्रकृत्याश्रयं वेति
एतावदवशिष्यते तत्र पुरुषाश्रयमिति न श्लिष्यते पुरुषस्य कौटस्थ्यात्

Again, we have the same recognition of our 'abolition of pain' in the doctrine of Bhaṭṭa Sarvajna and his followers, that " Liberation is the manifestation of an eternal happiness incapable of being increased ;" but here we have the difficulty that an eternal happiness does not come within the sphere of definite proof. If you allege Śruti as the proof, we reply that Śruti has no place when the thing itself is precluded by a valid non-perception,* or if you allow its authority then, you will have to concede the existence of such things as floatings stones.†

" But if you give up the view that " Liberation is the manifestation of happiness," and then accept such a view as that which holds it to be only the cessation of pain,—does not your conduct resemble that of the dyspeptic patient who refused sweet milk and preferred sour rice-gruel ? " Your satire however falls powerless, as fitter for some speech in a play (rather than for a grave philosophical argument.] The truth is that all happiness must be included under the category of pain, since, like honey mixed with poison, it is always accompanied by pain, either as admitting of

---

* *Yogyánupalabdhi* is when an object is not seen and yet all the usual concurrent causes of vision are present, as the eye light, &c.

† Alluding to the Vedaic phrase '*grávánah plavanti,*' See Uttara Naishadha, xvii. 37. The phrase *aśmánah plavanti* occurs in Shaḍv. Br. 5, 12.

स्यान्निरोधापाताच्चापि प्रकृत्याश्रयः अचेतनत्वात् तस्याः । किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वा आद्ये अनिर्मोक्षः स्वभावस्यानपायात् द्वितीये सम्प्रति संसारोऽस्तमियात् । नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्व्वज्ञाद्यभिमते ऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपद्धतिमध्यास्ते । श्रुतिस्तत्र प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा ग्रावप्लावे ऽपि तथा भावप्रसङ्गात् ॥

ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारे क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुभवतीति चेत्तदेतन्नाटकपक्षपातितं त्वद्वच इत्युपेक्ष्यते । सुखस्य सातिशयतया प्रत्यक्षतया

increase* or as being an object of perception or as being exposed to many hostile influences, or as being under an irksome sense of obligation to all kinds of instruments for its production. Nor may you retort on us that we have fulfilled the proverb of 'seeking one thing and dropping another in the search,' since we have abolished happiness as being ever tainted by some incidental pain, and at the same time our own favourite alternation is one which no one can consider desirable. For the truth is that any attempt to establish happiness as the summum bonum,—since it is inevitably accompanied by all kinds of causes of pain,—is only like the man who would try to grasp a red hot ball of iron under the delusion that it was gold. In the case of objects of enjoyment got together by rightful means, we may find many firefly-like pleasures, but then how many are the rainy days to drown them; and in the case of those got together by wrong means, the mind cannot even conceive the future issue which will be brought about. Let our intelligent readers consider all this and not attempt to disguise their own conscious experience. Therefore it is that we hold it as indisputable that for him, pre-eminent among his fellows, who, through the favour of the Supreme Being, has, by the regular method of listening to the revealed Śruti, &c., attained unto the knowledge of the real nature of the soul,—for him the absolute abolition of pain is the true Liberation.

* Or perhaps 'capable of being surpassed.'

बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतो ऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति अकाम्यो ऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् तथाहि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमपच्छादयन्तः सन्तो विदांकुर्वन्तु विद्वांसो भवन्तः। तस्मात् परिशे-

But it may be objected, "is there any proof at all for the existence of a Supreme Being, i. e. perception, inference or Śruti? certainly perception cannot apply here, since the Deity, as devoid of form, &c., must be beyond the senses. Nor can inference hold, since there is no universal proposition or true middle term which can apply.* Nor can Śruti, since neither of the resulting alternatives can be sustained,—for is it supposed to reveal, as being itself eternal or non-eternal? Under the former view, an established tenet of our school would be contradicted, [viz. that the Veda is non-eternal;] under the second, we should be only arguing in a circle.† As for comparison and any other proof which might be adduced [as that sometimes called presumption, &c.,] they need not be thought of for a moment, as their object matter definitely limited and cannot apply to the present case.‡ Therefore Supreme Being seems to be as unreal as a hare's horn." But all this elaborate disputation need excite no flurry in the breast of the the intelligent, as it can be at once met by the old argument, "the mountains, seas, &c., must have had a maker from their possessing the nature of effects just as a jar." a. Nor can our middle term [possessing the nature of effects'] be rejected as unproved,—

* Since the Supreme Being is a single instance.

† Since the Veda, if non-eternal. must [to be authoritative] have been created by God, and yet it is brought forward to reveal the existence of God.

‡ the Nyáya holds presumption to be included under inference, and comparison is declared to ascertain the relation of a name to the thing named.

षात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम् ।

नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा । आद्ये अपसिद्धान्तापातः द्वितीये परस्पराश्रयापातः । उपमानादिकमशक्यशङ्कं नियतविषयत्वात् । तस्मादीश्वरः शशविषाणायते इति चेदत्रैव चतुरचेतसां चेतसि चमत्कारमाविष्करोति । विवादास्पदं नगसाग-

since it can be established beyond a doubt by the fact of the subject's possessing parts. "But what are we to understand by this 'possessing parts?' is it 'existing in contact with parts,' or 'in intimate relation with parts?' It cannot be the first, since this would equally apply to such eternal things as ether* &c.; nor can it be the second, since this would prove too much as applying to such cases as the [eternal] species, thread, which abides in intimate relation with the individual threads. It therefore fails as a middle term for your argument." We reply, that it holds, if we explain the 'possessing parts' as 'the belonging to the class of those substances which exist in intimate relation†'

Or we may adopt another view and maintain, that it is easy to infer the 'possessing the nature of effects' from the consideration of their possessing intermediate magnitude.‡ *b.* Nor can our middle term be rejected as 'contradictory' *(viruddha*,§*)* since there is no such acknowledged universal proposition connected with it as would establish opposite major term to that in our syllogism, [i. e, that they must have had no maker.] *c.* Nor is our middle term too general *(anaikánta)*, since it is never found in opposite instances such as the lake, which is the *vipaksha*

* Since ether is connected by contact with the parts of everything, as e. g. a jar.

† The whole (as the jar,) resides by intimate relation in its parts (as the jar's two halves;)—But the eternal substances, ether, time, the soul, mind, and the atoms of earth, water, fire and air, do not so reside in anything,—although of course the category *viśesha* does reside in them by intimate relation.

‡ Intermediate between infinite and infinitesimal,—all eternal substances being the one or the other.

§ The *viruddha-hetu* is that which is never found where the major term is.

रादिकं सकर्तृकं कार्य्यत्वात् कुम्भवत् । न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात् । ननु किमिदं सावयवत्वं अवयवसंयोगित्वं अवयवसमवायित्वं वा नाद्यः गगनादेः व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात् । तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात् । अवान्तरमहत्त्वेन वा कार्य्यत्वा-

in the argument, "the mountain has fire because it has smoke."] *d.* Nor again is it precluded, *(bádhita,)* for there is no superior evidence to exercise such a precluding power. *e.* Nor is it counterbalanced, *(sat-pratipaksha,)* for there does not appear to be any such equally valid antagonist E. B. C.

नुमानस्य सुकरत्वात् । नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् नापि कालात्ययोपदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात् ॥

GAṆARATNÁVALÍ, BY BHAṬṬA YAJNEŚVARA.

An exceedingly useful work on the Gaṇapáṭha by Bhaṭṭa Yajneśvara who is well-known as the author of the excellent "Áryavidyásudhánidhi." The text of the Gaṇaratnávalí contains all the words of the Gaṇapáṭha thrown into a metrical form; an arrangement which exactly meets the wants of the Indian student who wishes to commit the whole Gaṇapáṭha to memory, and which at the same time affords an efficient protection against words being either interpolated or omitted. The commentary explains the more difficult words and gives throughout the forms which result from the application of the respective grammatic rules to the single words of the Gaṇa. In many places there are added short practical explanations showing the reasons for which a word has been received into a certain Gaṇa and recalling to the reader's mind the changes which the word has to undergo in consequence of other rules not immediately connected with the Gaṇa in question. The author's great learning and the conscientiousness with which he has done his work are conspicuous throughout. He has used the Gaṇaratnamahodadhi as his chief authority. Considering the difficulty with which the latter work is procurable and the absence of other books explanatory of the Gaṇas, a treatise like the Gaṇaratnávalí must be said to meet a real want of all students desirous of completely mastering Sanscrit Grammar.

G. THIBAUT.

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4. SEPTEMBER 1st 1877. Vol. II.

c/

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

॥ काशिकायाः ॥

सप्तमाध्यायस्य द्वितीयः पादः ।

णेरध्ययने वृत्तम् ॥ २६ ॥

ण्यन्तस्य वृत्तेर्निष्ठायामध्ययनार्थे वृत्तमितीडभावो णिलुक्च निपात्यते । वृत्तो गुणो देवदत्तेन । वृत्तं पारायणं देवदत्तेन । अध्ययनइति किम् । वर्त्तितमन्यत् । वृतिरयमकर्म्मकः, स ण्यर्थे वर्त्तमानः सकर्म्मको भवति । तेन निर्वृत्तइति हि प्रकृतेरेव कर्म्मणि क्तप्रत्ययो दृश्यते । तद्वदिहापि ण्यर्थवृत्तेरेव च वृतेर्वृत्तो गुणो देवदत्तेनेति भविष्यतीति निपातनमनर्थकं, तत्क्रियते यदापि णिचैव ण्यर्थोऽभिधीयते तदा वर्त्तितमित्यध्ययने मा भूदिति केचित् । अपरे तु वर्त्तितो गुणो देवदत्तेनेत्यपीच्छन्ति ॥

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ २७ ॥

णेरित्यनुवर्त्तते । दम् शम् पूरी दस् स्पश् छद् ज्ञप् इत्येतेषां ण्यन्तानां धातूनां वा अनिट्त्वं निपात्यते * । दान्तः । दमितः । शान्तः । शमितः । पूर्णः । पूरितः । दस्तः । दासितः । स्पष्टः । स्पाशितः । छन्नः । छादितः । ज्ञप्तः । ज्ञपितः । इट्प्रतिषेधो णिलुक्च निपात्यते । ज्ञपेस्तु भरज्ञपिसनामिति विकल्पविधानाद् यस्य विभाषेति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनम् ॥

हृष्यमत्वरसंघुषास्वनाम् ॥ २८ ॥

वेति वर्त्तते । हृषि अम त्वर संघुष आस्वन इत्येतेषां निष्ठायां वा इडागमो न भवति । हृष्टः । हृषितः । तीषसहलुभरुषरिष इति विकल्पविधानाद् यस्य विभाषेति प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् । अम् ।

---

* दान्त शान्त पूर्ण दस्त स्पष्ठ छन्न ज्ञप्त इत्येतानि निपात्यन्ते । दम्यादीनां धातूनां णयन्तानां निष्ठायां वा इडागमो निपात्यते इत्येकस्मिन्पुस्तके पाठः ।

Digitized by Google

अभ्यान्तः । अभ्यमितः । त्वर । तूर्णः । त्वरितः । आदितश्चेति प्रतिषेधे प्राप्ते वचनम् । संघुष । संघुष्टौ पादौ । संघुषितौ पादौ । संघुष्टं वाक्यमाह । संघुषितं वाक्यमाह । सघुष्टौ दम्यौ । संघुषितौ दम्यौ । संपूर्वस्य घुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति । आस्वन् । आस्वान्तो देवदत्तः । आस्वनितो देवदत्तः । आस्वान्तं मनः । आस्वनितं मनः । आङ्पूर्वस्य स्वनेर्मनोऽभिधाने ऽपि परत्वादयं विकल्पः क्षुब्धस्वान्तेति निपातनं बाधते ॥

हृषेर्लोमसु ॥ २९ ॥

लोमसु वर्त्तमानस्य हृषेर्निष्ठायां वा इडागमो न भवति । हृष्टानि लोमानि । हृषितानि लोमानि । हृष्टं लोमभिः । हृषितं लोमभिः । हृष्टाः केशाः । हृषिताः केशाः । हृष्टं केशैः । हृषितं केशैः । हृषु अलीकइत्युदित्त्वान्निष्ठायामनिट् । हृष तुष्टावित्ययं सेट् । तयोरुभयोरिह ग्रहणमित्युभयत्र विभाषेयम् । लोमानि मूर्द्धजानि अङ्गजानि च सामान्येन गृह्यन्ते । यथा लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यमिति । तद्विषये च हर्षे वर्त्तमानो लोमसु वर्त्तत इत्युच्यते । लोमस्विति किम् । हृष्टो देवदत्त इत्यलीकार्थस्य, हृषितो देवदत्त इति तुष्ट्यर्थस्य ॥ विस्मितप्रतिघातयोश्चेति वक्तव्यम् ॥ * ॥ हृष्टो देवदत्तः । हृषितो देवदत्तः । विस्मित इत्यर्थः । हृष्टा दन्ताः । हृषिता दन्ताः । प्रतिहता इत्यर्थः ॥

अपचितश्च ॥ ३० ॥

अपचित इति वा निपात्यते । अपपूर्वस्य चायतेर्निष्ठायामनिट्त्वं चिभावश्च निपात्यते । अपचितोऽनेन गुरुः । अपचायितोऽनेन गुरुः ॥ क्तिनि नित्यमिति वक्तव्यम् ॥ * ॥ क्तिनि नित्यं चिभावो निपात्यते, अपचितिः ॥

हु ह्वरेश्छन्दसि ॥ ३१ ॥

ह्वरतेर्धातोर्निष्ठायां छन्दसि हु इत्ययमादेशो भवति । हुतस्य चाह्रुतस्य च । अह्रुतमसि हविर्धानम् । छन्दसीति किम् । ह्वृतम् ॥

Digitized by Google

अपरिह्वृताश्च ॥ ३२ ॥

अपरिह्वृता इति निपात्यते छन्दसि विषये । ह्रु इत्येतस्यादेशस्याभावो निपात्यते । अपरिह्वृताः सनुयाम वाजम् ॥

सोमे ह्वरितः ॥ ३३ ॥

ह्वरित इति ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते छन्दसि विषये, सोमश्चेद्भवति । मा नः सोमो ह्वरितो, विह्वरितस्त्वम् ॥

ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च ॥ ३४ ॥

ग्रसित स्कभित स्तभित उत्तभित चत्त विकस्त विशस्तृ शंस्तृ शास्तृ तरुतृ तरूतृ वरुतृ वरूतृ वरूत्रीः उज्ज्वलिति क्षरिति क्षमिति क्षमित्यमिति इत्येतानि छन्दसि निपात्यन्ते । तत्र ग्रसितस्कभितस्तभितोत्तभितेति ग्रसु स्कम्भु स्तम्भु इत्येतेषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इडागमो निपात्यते । ग्रसितं वा एतत्सोमस्य । ग्रस्तमिति भाषायाम् । स्कभित । विष्कभिते अजरे । विष्कब्धेति भाषायाम् । स्तभित । येन स्वस्तभितम् । स्तब्धमिति भाषायाम् । उत्तभित । सत्येनोत्तभिता भूमिः । उत्तब्धेति भाषायाम् । उत्तभितेति उत्पूर्वस्य निपातनसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति । चत्त विकस्तेति । चतेः कसेश्च विपूर्वस्य निष्ठायामिडभावो निपात्यते । चत्ता वर्षेण विद्युत् । चतितेति भाषायाम् । विकस्त । उत्तानाया हृदयं यद्विकस्तम् । विकसितमिति भाषायाम् । निपातनं बहुत्वापेक्षं विकस्ता इति बहुवचनं कृतम् । अपरेषु तु निपातनेषु प्रत्येकं विभक्तिनिर्देशः । विशस्तृ शंस्तृ शास्त्रिति शसेर्विपूर्वस्य शंसेः शासेश्च तृचि इडभावो निपात्यते । विशस्तृ । एकस्त्वष्टुरश्वस्याविशस्ता । विशसितेति भाषायाम् । शंस्तृ । उत शंस्ता सुविप्रः । शंसितेति भाषायाम् । शास्तृ । प्रशास्ता । प्रशासितमिति भाषायाम् । तरुतृतरूतृवरुतृवरूतृवरू-

त्रीरिति तरतेर्वृङ्वृञोश्च तृचि उट् ऊट् इत्येतावागमौ निपात्येते । तरुतारं रथानाम् । तरूतारम् । तरितारं तरीतारमिति भाषायाम् । वरुतारं रथानाम् । वरूतारं रथानाम् । वरितारं वरीतारमिति भाषायाम् । वरूत्रीष्ट्वा देवीर्विश्वदेव्यावती । जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम् । अतन्त्रं चैतत्, इदमपि हि भवति अहोरात्राणि वै वरूत्रय इति । छान्दसिकमत्र ह्रस्वत्वम् । अपञ्चार्थमेव च ङीबन्तस्य निपातनम् । वरूतृशब्दो हि निपातितस्तत एव ङीपि सति सिद्धो वरूत्रीशब्दः । उज्ज्वलिति क्षरिति क्षमिति वमिति अमितीति च ज्वलतेः पूर्वस्य उद् क्षर क्षम वम अम् इत्येतेषां च तिपि शप इकारादेशो निपात्यते । शपो लुग्वा इडागमः । अग्निरुज्ज्वलिति । उज्ज्वलतीति भाषायाम् । क्षरिति । स्तोकं क्षरिति । क्षरतीति भाषायाम् । क्षमिति । स्तोमं क्षमिति । क्षमतीति भाषायाम् । वमिति । यः सोमं वमिति । वमतीति भाषायाम् । अमिति । अभ्यमिति वरुणः । अभ्यमतीति भाषायाम् । इतिकरणः प्रदर्शनार्थस्तेन क्व चिदीकारो भवति । रविमभ्यमीति वरुण इत्यपि हि वेदे पठ्यते ॥

आर्द्धधातुकस्येड्वलादेः ॥ ३५ ॥

छन्दसीति निवृत्तम् । आर्द्धधातुकस्य वलादेरिडागमो भवति । लविता । लवितुम् । लवितव्यम् । पविता । पवितुम् । पवितव्यम् । आर्द्धधातुकस्येति किम् । आस्ते । वस्ते । रुदादिभ्यः सार्वधातुक इत्येतस्मिन्नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवं भवतीति आर्द्धधातुकग्रहणं क्रियते । वलादेरिति किम् । लव्यम् । पव्यम् । लवनीयम् । पवनीयम् इडिति वर्त्तमाने पुनरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थम् ॥

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥

नियमार्थमिदम् । स्नुक्रमोरार्द्धधातुकस्य वलादेरिडागमो भवति, न चेत्स्नुक्रमी आत्मनेपदस्य निमित्तं भवतः । क्व च तावात्मनेपदस्य निमित्तं, यत्रात्मनेपदं तदाश्रयं भवति । भावकर्म्मकर्म्मकर्तृकर्मव्यतिहाराः । क्रमेर्वृत्त्यादयश्च । तेनायं सत्यात्मनेपदे प्रतिषेधो नास्तीति प्रतिषेधफलं

Digitized by Google

चेदं सूत्रम् । स्नुक्रमोरुदित्त्वादिट् सिद्ध एव । प्रस्नविता । प्रस्नवितुम् । प्रस्नवितव्यम् । प्रक्रमिता । प्रक्रमितव्यम् । अनात्मनेपदनिमित्ते इति किम् । प्रस्नोषीष्ट । प्रक्रंसीष्ट । प्रस्नोष्यते । प्रक्रंस्यते । प्रस्नुस्नूषिष्यते । प्रचिक्रंसिष्यते । सर्वत्रैवात्र स्नौतिः क्रमिश्चात्मनेपदस्य निमित्तम् । सनन्तादपि हि पूर्ववत्सन इत्यात्मनेपदं विधीयते । निमित्तग्रहणं किम् । सीयुडादेस्तत्परस्य च प्रतिषेधार्थम् । इह तु प्रस्नवितेवाचरतीति प्रस्नवित्रीयत इति क्यङन्तमात्मनेपदस्य निमित्तं न स्नौतिः ॥ क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः ॥ * ॥ प्रक्रन्ता । उपक्रन्ता । कर्तरीति किम् । प्रक्रमितव्यम् । उपक्रमितव्यम् । आत्मनेपदविषयादिति किम् । निष्क्रमिता । स्नौतेः सनि किति च प्रत्यये श्र्युकः किति सनि ग्रहगुहोश्च इत्येव प्रतिषेधो भवति । प्रसुस्नूषति । प्रस्नुतः । प्रस्नुतवान् ॥

ग्रहोऽलिटि दीर्घः ॥ ३७ ॥

ग्रह उत्तरस्य इटः अलिटि दीर्घो भवति । ग्रहीता । ग्रहीतुम् । ग्रहीतव्यम् । अलिटीति किम् । जगृहिव । जगृहिम । प्रकृतस्येटो दीर्घत्वमिदं चिण्वदिटो न भवति । ग्राहिता । ग्राहिष्यते ॥

वृतो वा ॥ ३८ ॥

वृ इति वृङ्वृञोः सामान्येन ग्रहणं तस्मादुत्तरस्य ऋकारान्तेभ्यश्चेटो वा दीर्घो भवति । वरिता । वरीता । प्रावरिता । प्रावरीता । ऋकारान्तेभ्यः । तरिता । तरीता । आस्तरिता । आस्तरीता । वृत इति किम् । करिष्यति । हरिष्यति । अलिटीत्येव । ववरिथ । तेरिथ ॥

न लिङि ॥ ३९ ॥

वृत उत्तरस्य इटो लिङि दीर्घो न भवति । विवरिषीष्ट । प्रावरिषीष्ट । आस्तरिषीष्ट । विस्तरिषीष्ट ॥

सिचि च परस्मैपदेषु ॥ ४० ॥

परस्मैपदपरे सिचि वृत उत्तरस्य इटो दीर्घो न भवति । प्राव-

रिष्टाम् । प्राग्नारिषुः । अस्तारिष्टाम् । आस्तारिष्टाम् । आस्तारिषुः * । परस्मैपदेष्विति किम् । प्रावरिष्ट । प्रावरीष्ट ॥

इट् सनि वा ॥ ४१ ॥

वृतः सनो वा इडागमो भवति । वुवूर्षति । विवरिषते । विवरीषते । प्रावुवूर्षति । प्राविवरिषति । प्राविवरीषति । ॠकारान्तेभ्यः । तितीर्षति । तितरिषति । तितरीषति । आतिस्तीर्षति । आतिस्तरिषति । आतिस्तरीषति । सनि ग्रहगुहोश्चेति इट्प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते । इटश्च वृतो वेति पक्षे दीर्घः । चिकीर्षति जिहीर्षति इत्यचोपदेशाधिकारात्तार्वधातुकत्वाच्च इडागमो न भवति ॥

लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥

वृतो लिङि सिचि च आत्मनेपदे परे वा इडागमो भवति । वृषीष्ट । वरिषीष्ट । प्रावृषीष्ट । प्रावरिषीष्ट । आस्तरिषीष्ट । आस्तीर्षीष्ट । सिचि खल्वपि । अवृत । अवरिष्ट । अवरीष्ट । प्रावृत । प्रावरिष्ट । प्रावरीष्ट । आस्तीर्ष्ट । आस्तरिष्ट । आस्तरीष्ट । आत्मनेपदेष्विति किम् । प्रावारिष्टाम् । प्रावारिषुः । लिङः प्रत्युदाहरणं न दर्शितमसंभवादिटोऽवलादित्वादिति ॥

ऋतश्च संयोगादेः ॥ ४३ ॥

ऋदन्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेषु वा इडागमो भवति । ध्वृषीष्ट । ध्वरिषीष्ट । स्मृषीष्ट । स्मरिषीष्ट । अध्वृषाताम् । अध्वरिषाताम् । अस्मृषाताम् । अस्मरिषाताम् । ऋत इति किम् । च्योषीष्ट । प्लोषीष्ट । अच्योष्ट । अप्लोष्ट । संयोगादेरिति किम् । कृषीष्ट । हृषीष्ट । अकृत । अहृत । आत्मनेपदेष्वित्येव । अध्वार्षीत् । अस्मार्षीत् । संस्कृषीष्ट समस्कृतेत्यचोपदेशाधिकारादभक्तत्वाच्च सुट इडागमो न भवति ॥

---

* व्यशारिष्टाम् । व्यशारिषुरित्यधिकं पुस्तकान्तरे ।

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥

स्वरति सूति सूयति धूञ् इत्येतेभ्य ऊदिद्भ्यश्चोत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । स्वर्त्ता । स्वरिता । सूति । प्रसोता । प्रसविता । सूयति । सोता । सविता । धूञ् । धोता । धविता । ऊदिद्भ्यः खल्वपि । गाहू । विगाढा । विगाहिता । गुपू । गोप्ता । गोपिता । वेति वर्त्तमाने पुनर्वाग्रहणं लिङ्सिचोर्निवृत्त्यर्थम् । सूतिसूयत्योर्विकरणनिर्देशः षूङोऽदादिकस्य निवृत्त्यर्थः । धूञिति सानुबन्धकस्य निर्देशो धू विधूनन इत्यस्य निवृत्त्यर्थः । सविता धवितेत्येव नित्यमेतयोर्भवति । स्वरतेरेतस्माद्विकल्पादृद्धनोः स्य इत्येतद्भवति विप्रतिषेधेन । स्वरिष्यति । क्तिवि तु प्रत्यये श्र्युकः क्तितीति नित्यः प्रतिषेधो भवति पूर्वविप्रतिषेधेन । स्वृत्वा । सूत्वा । धूत्वा ॥

रधादिभ्यश्च ॥ ४५ ॥

रध हिंसासंराद्ध्योरित्येवमादिभ्योऽष्टाभ्य उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । रधिता । रद्धा । नंष्टा । नशिता । त्रप्ता । तर्प्ता । तर्पिता । द्रप्ता । दर्प्ता । दर्पिता । द्रोग्धा । द्रोढा । द्रोहिता । मोग्धा । मोढा । मोहिता । स्नोढा । स्नोहिता । स्नोग्धा । स्नेग्धा । स्नेढा । स्नेहिता । क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति । अपरे पुनराहुः । पूर्वविधेरिड्निषेधविधानसामर्थ्याद्बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिटा भवितव्यम् । ररन्धिव, ररन्धिमेति भवति ॥

निरः कुषः ॥ ४६ ॥

निर् इत्येवंपूर्वात् कुष उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति । निष्कोष्टा । निष्कोषिता । निष्कोष्टुम् । निष्कोषितुम् । निष्कोष्टव्यम् । निष्कोषितव्यम् । निर इति किम् । कोषिता । कोषितुम् । कोषितव्यम् । निस इति वक्तव्ये निर इति निर्देशेन रेफान्तमुपस-

गान्तरमस्तीति ज्ञाप्यते । तस्य हि निलयनमित्युपसर्गस्यायताविति लत्वं भवति । निसो हि रुत्वस्यासिद्धत्वाल्लत्वं न स्यात् ॥

इण्निष्ठायाम् ॥ ४७ ॥

निरः कुषो निष्ठायामिडागमो भवति । निष्कुषितवान् । निष्कुषितः । इड्ग्रहणं नित्यार्थं, आरम्भो हि यस्य विभाषा इत्यस्य बाधको ऽन्यथा हि विकल्पार्थं एव स्यात् अत्रैव नित्यमिडागम उत्तरत्र विकल्प एवेति ॥

तीषसहलुभरुषरिषः ॥ ४८ ॥

तकारादावार्द्धधातुके इषु सह लुभ रुष रिष् इत्येतेभ्यो वा इडागमो भवति । इषु । एष्टा । एषिता ॥ इषु इच्छायामित्यस्यायं विकल्प इष्यते ॥ यस्तु इष गताविति दैवादिकस्तस्य प्रेषिता प्रेषितुं प्रेषितव्यमिति नित्यं भवति । योपि इष आभीक्ष्ण्य इति क्र्यादौ पठ्यते तस्याप्येवमेव । तदर्थमेव तीषसहेति सूत्रे के चिदुदितमिषं पठन्ति । सह । सोढा । सहिता । लुभ । लोभिता । लोब्धा । रुष । रोष्टा । रोषिता । रिष् । रेष्टा । रेषिता । तीति किम् । एषिष्यति ॥

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥ ४९ ॥

इवन्तानाम् धातूनाम् ऋधु भ्रस्ज दम्भु श्रि स्वृ यू ऊर्णु भर ज्ञपि सन् इत्येतेषां च सनि वा इडागमो भवति । इवन्तानाम् । दिदेविषति । दुद्यूषति । सिसेविषति । सुस्यूषति । ऋधु । अर्दिधिषति । ईर्त्सति । भ्रस्ज । बिभ्रज्जिषति । बिभ्रक्षति । बिभर्ज्जिषति । बिभर्क्षति । दम्भु । दिदम्भिषति । धिप्सति । धीप्सति । श्रि । उच्छिश्रयिषति । उच्छिश्रीषति । स्वृ । सिस्वरिषति । सुस्वूर्षति । यु । यियविषति । युयूषति । ऊर्णु । प्रोर्णुनविषति । प्रोर्णुनुविषति । प्रोर्णुनूषति । भर इति भृञित्येतस्य भौवादिकस्य ग्रहणं शपा निर्द्देशात् । बिभरिषति । बुभूर्षति । ज्ञपि । जिज्ञपयिषति । ज्ञीप्सति । सन् । सिसनिषति । सिषासति । के चिदत्र भरज्ञपिसनितनिपतिदरिद्राणामिति पठन्ति । तितनिषति । तितंसति ।

तितारयिषति । पिपतिषति । पित्सति । दिदरिद्रिषति । दिदरिद्रासति । सनीति किम् । दरिद्रिता । अष्टा ॥

क्लिशः क्त्वानिष्ठयोः ॥ ५० ॥

क्लिशः क्त्वानिष्ठयोर्वा इडागमो भवति । क्लिष्ट्वा । क्लिशित्वा । क्लिष्टः । क्लिष्टवान् । क्लिशितः । क्लिशितवान् । क्लिशू विबाधन इत्यस्य क्त्वायां विकल्पः सिद्ध एव निष्ठायां तु यस्य विभाषेति प्रतिषेधः प्राप्नोति । क्लिश उपतापइत्येतस्य तु क्त्वायां निष्ठायां च नित्यमिडागमः प्राप्नोति तदर्थं क्त्वाग्रहणं क्रियते ॥

पूङश्च ॥ ५१ ॥

पूङश्च क्त्वानिष्ठयोर्वा इडागमो भवति । पूत्वा । पवित्वा । सोमोऽतिपूतः । सोमोऽतिपवितः । पूतवान् । पवितवान् । श्र्युकः किताति प्रतिषेधे प्राप्ते विकल्पो विधीयते ॥

वसतिक्षुधोरिट् ॥ ५२ ॥

वसतेः क्षुधेश्च क्त्वानिष्ठयोरिडागमो भवति । उषित्वा । उषितः । उषितवान् । क्षुधित्वा । क्षुधितः । क्षुधितवान् । वसतीति विकरणो निर्देशार्थ एव । वस्तेरुदात्तत्वादेव भवितव्यमिटा । पुनरिड्ग्रहणं नित्यार्थम् ॥

अञ्चेः पूजायाम् ॥ ५३ ॥

अञ्चेः पूजायामर्थे क्त्वानिष्ठयोरिडागमो भवति । अञ्चित्वा जानु जुहोति । अञ्चिता अस्य गुरवः । उदितो वेति क्त्वाप्रत्यये विकल्पः प्राप्तः, निष्ठायां यस्य विभाषेति प्रतिषेधः प्राप्तस्तदर्थमिदं प्रारब्धम् । पूजायामिति किम् । उदक्तमुदकं कूपात् । उद्धृतमित्यर्थः ॥

लुभो विमोहने ॥ ५४ ॥

लुभो विमोहनेऽर्थे वर्त्तमानात् क्त्वानिष्ठयोरिडागमो भवति । लुभित्वा । लोभित्वा । विलुभिताः केशाः । विलुभितः सीमन्तः । विलुभितानि पदानि । विमोहनमाकुलीकरणं तत्र क्त्वायां तीषसहलुभेति विकल्पो

निष्ठायां यस्य विभाषेति प्रतिषेधः प्राप्तः । क्लिशेः इति किम् । लुब्धो वृषलः । शीतेन पीडित इत्यर्थः । लुब्ध्वा । लुभित्वा । लोभित्वा । गार्ध्ये यथाप्राप्तमेव भवति ॥

जॄव्रश्च्योः क्त्वि ॥ ५५ ॥

जॄ व्रश्च इत्येतयोः क्त्वाप्रत्यये इडागमो भवति । जरित्वा । जरीत्वा । व्रश्चित्वा । जॄ इत्येतस्य श्र्युकः किति इति प्रतिषेधः प्राप्तो व्रश्चेरूदित्त्वाद्विकल्पः । क्त्वाग्रहणं निष्ठानिवृत्त्यर्थम् ॥

उदितो वा ॥ ५६ ॥

उदितो धातोः क्त्वाप्रत्यये परतो वा इडागमो भवति । शमु । शमित्वा । शान्त्वा । तमु । तान्त्वा । तमित्वा । दमु । दान्त्वा । दमित्वा ॥

से ऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥

सकारादावसिच्यार्द्धधातुके कृत चृत छृद तृद नृत इत्येतेभ्यो धातुभ्यो वा इडागमो भवति । कृत् । कर्त्स्यति । अकर्त्स्यत् । चिकृत्सति । कर्त्तिष्यति । अकर्त्तिष्यत् । चिकर्त्तिषति । चृत । चर्त्स्यति । अचर्त्स्यत् । चिचृत्सति । चर्त्तिष्यति । अचर्त्तिष्यत् । चिचर्त्तिषति । छृद । छर्त्स्यति । अच्छर्त्स्यत् । चिच्छृत्सति । छर्दिष्यति । अच्छर्दिष्यत् । चिच्छर्दिषति । तृद् । तर्त्स्यति । अतर्त्स्यत् । तितृत्सति । तर्दिष्यति । अतर्दिष्यत् । तितर्दिषति । नृत । नर्त्स्यति । अनर्त्स्यत् । निनृत्सति । नर्त्तिष्यति । अनर्त्तिष्यत् । निनर्त्तिषति । सइति किम् । कर्त्तिता । असिचीति किम् । अकर्त्तीत् ॥

गमेरिट् परस्मैपदेषु ॥ ५८ ॥

गमेर्धातोः सकारादेरार्द्धधातुकस्य परस्मैपदेष्विडागमो भवति । गमिष्यति । अगमिष्यत् । जिगमिषति । गमेरिति किम् । वेष्यति । इड्ग्रहणं नित्यार्थम् । परस्मैपदेष्विति किम् । संगंसीष्ट । संगसीष्ट । संगंस्यते । संजिगंसते । संजिगंसिष्यते । अधिजिगांसते । अधिजिगांसिष्यते ।

गमेरिडादेशस्याज्झनगमां सनीति दीर्घत्वम् । सइत्येव । गन्तास्मि । गन्तास्वः । गन्तास्मः ॥ आत्मनेपदेन समानपदस्थस्य गमेरयमिडागमो नेष्यते ॥ अन्यत्र सर्वत्रैवेष्यते । लृत्यपि भवति, परस्मैपदलुकि च । संजिगमिषिता । अधिजिगमिषिता व्याकरणस्य । जिगमिषत्वमिति । पदशेषकारस्य * पुनरिदं दर्शनं गम्युपलक्षणार्थं परस्मैपदग्रहणम् । परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात्सकारादेरार्धधातुकस्येड्भवति । तन्मतेन संजिगंसिता अधिजिगंसिता व्याकरणस्य इत्येव भवितव्यम् ॥

न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥

वृतादिभ्यश्चतुर्भ्य उत्तरस्य सकारादेरार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । वृतु । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वृधु । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । शृधु । शर्त्स्यति । अशर्त्स्यत् । शिशृत्सति । स्यन्दू । स्यन्त्सति । अस्यन्त्स्यत् । सिस्यन्त्सति । चतुर्भ्य इति न वक्तव्यम् । वृद्ग्रहणं हि तत्र वृतादिपरिसमाप्त्यर्थं क्रियते क्लृपू सामर्थ्ये वृदिति, तदेव यदि वृतादिसमाप्त्यर्थमपि विज्ञायते न किंचिदनिष्टं प्राप्नोति, तत्क्रियते स्यन्देरूदिल्लक्षणमन्तरङ्गमपि विकल्पं प्रतिषेधो यथा बाधेतेति । चतुर्ग्रहणे हि सति तात्पर्येण स्यन्दिः संनिधापितो भवति । परस्मैपदेष्वित्येव । वर्त्तिषीष्ट । वर्त्तिष्यते । अवर्त्तिष्यत् । विवर्त्तिषते । अथात्रात्मनेपदेन समानपदस्थेभ्यो वृतादिभ्य इडागम इष्यते । अन्यत्र सर्वत्र प्रतिषेधः । लृत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति । विवृत्सिता । विवृत्सत्वमिति † ॥

तासि च क्लृपः ॥ ६० ॥

क्लृप उत्तरस्य तासेः सकारादेश्चार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । कल्प्ता । श्वः कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति । परस्मैपदेष्वित्येव । कल्पितासे । कल्पिषीष्ट । कल्पिष्यते । अकल्पिष्यत ।

---

* पदशेषो ग्रन्थविशेष इति पदमञ्जरी ।

† विवृत्सितुम् । विवृत्सितव्यमित्यधिकं पुस्तकान्तरे ।

चिकल्पिषते । कॢपेरथात्मनेपदेन समानपदस्थस्य इडागम इष्यते । अन्यत्र प्रतिषेधः । इत्यपि हि परस्मैपदलुकि च प्रतिषेधो भवति । चिक्लृप्सिता । चिक्लृप्सत्वमिति ॥

अचस्तास्वत्थल्यनिटो नित्यम् ॥ ६१ ॥

तासौ ये नित्यानिटो धातवो ऽजन्तास्तेभ्यस्तासाविव थलीडागमो न भवति । याता । ययाथ । चेता । चिचेथ । नेता । निनेथ । होता । जुहोथ । अच इति किम् । भेत्ता । बिभेदिथ । तास्वदिति किम् । लूत्वा । लुलविथ । थलीति किम् । याता । ययिव । ययिम । अनिड्ग्रहणं नित्यमित्यनेन विशेषणार्थम् । नित्यग्रहणं किम् । विधोता । विधविता । विदुधविथ । तासि विभाषितेटस्थलि नित्यमिडागमो भवति । तास्वदिति वतिनिर्द्देशः किमर्थः । तासौ सतस्थलि प्रतिषेधार्थः । यो हि तासावसचसत्वाच्च नित्यानिट् तस्य थलि प्रतिषेधो न भवति । जघसिथ । उवयिथ । उत्तरसूत्रेपि तास्वदिति वर्त्तते अदादेशो हि घसिर्वेञादेशश्च वयिस्तासौ नास्ति ॥

उपदेशेऽत्वतः ॥ ६२ ॥

उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात्तासाविव थलीडागमो न भवति । पक्ता । पपक्थ । यष्टा । इयष्ट । शक्ता । शशक्थ । उपदेशइति किम् । कर्ष्टा । चकर्षिथ । अत्वत इति किम् । भेत्ता । बिभेदिथ । तपरकरणं किम् । राद्धा । रराधिथ । तास्वदित्येव । जिघृक्षति । जग्रहिथ । नित्यमनिट इत्येव । अङ्क्ता । अञ्जिता । आनञ्जिथ ॥

ऋतो भारद्वाजस्य ॥ ६३ ॥

ऋकारान्ताद्धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलि इडागमो न भवति । स्मर्त्ता । सस्मर्थ । ध्वर्त्ता । दध्वर्थ * । सिद्धे सत्यारम्भो नियमार्थः । ऋत एव भारद्वाजस्य नान्येषां धातूनाम् । ययिथ । वयिथ । पेचिथ । शेकिथ । तदयमर्थात्पूर्वयोर्योगयोर्विकल्पः । तपरकरणमृकारान्तस्य निवृत्त्यर्थम् । तथा हि सति विध्यर्थमेतत्स्यात् ॥

* कर्ता चकर्थेति पुस्तकान्तरे ऽधिकम् ।

बभूथाततन्थजगृभ्मववर्थेति निगमे ॥ ६४ ॥

बभूथ आततन्थ जगृभ्म ववर्थ इत्येतानि निपात्यन्ते निगमविषये। निगमो वेदः। बभूथ। त्वं हि होता प्रथमो बभूथ। बभूविथेति भाषायाम्। आततन्थ। येनान्तरिक्षमुर्वाततन्थ। आतेनिथेति भाषायाम्। जगृभ्म। जगृभ्माते दक्षिणमिन्द्र हस्तम्। जगृहिमेति भाषायाम्। ववर्थ। ववर्थ त्वं हि ज्योतिषा। ववरिथेति भाषायाम्। क्रादिसूत्रादेवास्य प्रतिषेधे सिद्धे नियमार्थं वचनं निगमएव न भाषायामिति॥

विभाषा सृजिदृशोः ॥ ६५ ॥

सृजि दृशि इत्येतयोस्थलि विभाषा इडागमो न भवति। सस्रष्ठ। ससर्जिथ। दद्रष्ठ। ददर्शिथ॥

इडत्त्यर्त्तिव्ययतीनाम् ॥ ६६ ॥

अत्ति अर्त्ति व्ययति इत्येतेषां थलीडागमो भवति। आदिथ। आरिथ। संविव्ययिथ। व्येञो न व्यो लिटीत्यात्वप्रतिषेधः। अत्तिव्ययत्योश्चंतो भारद्वाजस्येति नियमाद्विकल्पः। अर्त्तेरपि नित्यः प्रतिषेधः। अत्रेड्ग्रहणं विस्पष्टार्थम्। विकल्पविधाने हि सति अत्तिव्ययतिग्रहणमनर्थकं, प्रतिषेधविधाने चार्त्तिग्रहणमिति नित्योयं विधिरिड्ग्रहणमन्तरेणापि शक्यते विज्ञातुम्॥

वस्वेकाजाद्घसाम् ॥ ६७ ॥

कृतद्विर्वचनानामेकाचां धातूनाम् आकारान्तानां घसेश्च वसाविडागमो भवति। आदिवान्। आशिवान्। पेचिवान्। शेकिवान्। धात्वभ्यासयोरेकादेशे कृते एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचना एते एकाचो भवन्ति। आत्। ययिवान्। तस्थिवान्। घस्। जक्षिवान्। सिद्धे सत्यारम्भो नियमार्थः। एकाजाद्घसामेव वसाविडागमो भवति नान्येषाम्। बिभिद्वान्। चिच्छिद्वान्। बभूवान्। शिश्रिवान्। क्रादिनियमात्प्रतिषेधाभावाच्च य इट् प्रसक्तः स नियम्यते। आद्ग्रहणमनेकाजर्थं द्विर्वचने हि कृते इटि च सति आतो लोपेन भवितव्यं, दरिद्रा-

तेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यम् । दरिद्रांचकार । यद्याप्याम् क्रियते तथापि च दरिद्रातेरार्द्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति प्रागेव प्रत्ययोत्पत्तेराकारे लुप्ते इडागमस्य निमित्तं विहतमिति न इडागमो भवति । ददरिद्वानिति भवितव्यम् । घसेरपि यदि ग्रहणमिह न क्रियते तदा द्विर्वचनात् परत्वाद् घसिभसोर्हलि चेति उपधालोपे कृते द्विर्वचनमेव न स्यादनच्कत्वाद्, इह तु घसिग्रहणाद् उपधालोपमपि परत्वादिडागमो बाधते । तत्र कृते गमहनजनखनघसामित्युपधालोपः । स च द्विर्वचनेऽचीति द्विर्वचने कर्त्तव्ये स्थानिवद्भवति, तेन जक्षिवानिति सिध्यति ॥

विभाषा गमहनविदविशाम् ॥ ६८ ॥

गम हन विद विश इत्येतेषां धातूनां वसौ विभाषा इडागमो भवति । गम । जग्मिवान् । जगन्वान् । मो नो धातोरिति नकारः । हन । जघ्निवान् । जघन्वान् । विद । विविदिवान् । विविद्वान् । विश् । विविशिवान् । विविश्वान् । विशिना साहचर्यादिह विदेस्तौदादिकस्य लाभार्थस्य ग्रहणम् । ज्ञानार्थस्य तु नित्यं विविद्वानित्येव भवति ॥ दृशेश्चेति वक्तव्यम् ॥ * ॥ ददृशिवान् । ददृश्वान् ॥

सनिंससनिवांसम् ॥ ६९ ॥

सनोतेः सनतेर्वा धातोः सनिंससनिवांसमिति निपात्यते * । अग्निंत्वाग्ने सनिंससनिवांसम् । इडागम एत्वाभ्यासलोपाभावश्च निपात्यते । सनिङ्पूर्वादन्यत्र सेनिवांसमित्येव भवति । छन्दसीदं निपातनं विज्ञायते † । भाषायां सेनिवांसमिति भवति ॥

ऋद्धनोः स्ये ॥ ७० ॥

ऋकारान्तानां धातूनां हन्तेश्च स्ये इडागमो भवति । करिष्यति ।

---

* सनिंपूर्वस्य सनोतेः सनतेर्वा सनिंससनिवांसमिति निपात्यते इत्येकस्मिन्पुस्तके पाठः ।

† इयं चानुपूर्वी छन्दस्येव नियतेति छन्दस्येव निपातनं विज्ञायते इति पा० २ ।

र्तनिष्यति । तरिष्यति । स्वरतेर्वेट्त्वादूदूतो: स्यइत्येतद्भवति विप्रतिषेधेन । स्वरिष्यति । तपरकरणं विस्पष्टार्थम् ॥

अञ्जे: सिचि ॥ ७१ ॥

अञ्जे: सिचि इडागमो भवति । आञ्जीत् । आञ्जिष्टाम् । आञ्जिषु: । सिचीति किम् । अङ्क्त्वा । अञ्जिता । ऊदित्वाद् विभाषा भवति ॥

स्तुसुधूञ्भ्य: परस्मैपदेषु ॥ ७२ ॥

स्तु सु धूञ् इत्येतेभ्य: सिचि परस्मैपदे परत इडागमो भवति । अस्तावीत् । असावीत् । अधावीत् । परस्मैपदेष्विति किम् । अस्तोष्ट । असोष्ट । अधोष्ट । अधविष्ट ॥

यमरमनमातां सक्च ॥ ७३ ॥

यम रम नम इत्येतेषामङ्गानामाकारान्तानां च सगागमो भवति परस्मैपदे सिचि इडागमश्च । यम् । अयंसीत् । अयंसिष्टाम् । अयंसिषु: । व्यरंसीत् । व्यरंसिष्टाम् । व्यरंसिषु: । अनंसीत् । अनंसिष्टाम् । अनंसिषु: । आकारान्तानाम् । अयासीत् । अयासिष्टाम् । अयासिषु: । यमादीनां हलन्तलक्षणा वृद्धि: प्राप्ता सा नेटीति प्रतिषिध्यते । परस्मैपदेष्वित्येव । अयंस्त । अरंस्त । अनंस्त ॥

स्मिपूङ्रञ्ज्वशां सनि ॥ ७४ ॥

स्मिङ् पूङ् ऋ अञ्जू अशू इत्येतेषां धातूनां सनीडागमो भवति । सिस्मयिषते । पिपविषते । अरिरिषति । अञ्जिजिषति । अशिशिषते । ङकारग्रहणं पूञो मा भूत् । पुपूषति इत्येव तस्य भवति । अशेरूदितो ग्रहणादश्नोतेर्नित्यमिडागमोस्त्येव ॥

किरश्च पञ्चभ्य: ॥ ७५ ॥

किरादिभ्य: पञ्चभ्य: सनि इडागमो भवति । कॄ । विकरिषति । गॄ । जिगरिषति । दृङ् । दिदरिषते । धृङ् । दिधरिषते । प्रच्छ । पिप्रच्छिषति । पञ्चभ्य इति किम् । सिसृक्षति । किरतिगिरत्योरिट् सनि वेति विकल्प: प्राप्त: वृतो वेति चास्येटो दीर्घत्वं नेच्छन्ति ॥

रुदादिभ्यः सार्वधातुके ॥ ७६ ॥

रुदादिभ्य उत्तरस्य वलादेः सार्वधातुकस्य इडागमो भवति । रुद् । रोदिति । स्वप् । स्वपिति । श्वस् । श्वसिति । अन् । प्राणिति । जक्ष् । जक्षिति । पञ्चभ्य इत्येव । जागर्त्ति । सार्वधातुकइति किम् । स्वप्ता । वलादेरित्येव । रुदन्ति ॥

ईशः से ॥ ७७ ॥

ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्य इडागमो भवति । ईशिषे । ईशिष्व ॥

ईडजनोर्ध्वे च ॥ ७८ ॥

ईड जन इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य से इत्येतस्य च सार्वधातुकस्य इडागमो भवति । ईडिध्वे । ईडिध्वम् । ईडिषे । ईडिष्व । जनिध्वे । जनिध्वम् । जनिषे । जनिष्व । जनी प्रादुर्भावइत्यस्य छान्दसत्वात् श्यनो लुक् उपधालोपाभावश्च ॥ जन जननइत्यस्यापि श्लुविकरणस्य ग्रहणमत्रेष्यते ॥ तस्य कर्मव्यतिहारे व्यतिजज्ञिषे । व्यतिजज्ञिष्व । व्यतिजज्ञिध्वे व्यतिजज्ञिध्वम्, इति च भवति ॥ ध्वशब्दे ईशेरपि इडागम इष्यते ॥ ईशिध्वमिति, तदर्थं केचिदीडिजनोः स्ध्वे चेति सूत्रं पठन्ति । तत्र सकारादेः सेशब्दस्य सूत्रएवोपादानाच्चशब्दो भिन्नक्रम ईशेरनुकर्षणार्थो विज्ञायते । ईडिशिजनां सेध्वयोरित्येकमेव सूत्रं न पठितं, विचित्रा हि सूत्रस्य कृतिः पाणिनेरिति । ध्वे इति कृतटेरेत्वस्य ग्रहणात् लङि ध्वमि न भवितव्यमिटा । लोटि पुनरेकदेशविकृतस्यानन्यत्वाद्भवितव्यमिटा ॥

लिङः सलोपो ऽनन्त्यस्य ॥ ७९ ॥

* सार्वधातुकइति वर्त्तते । सार्वधातुके यो लिङ् तस्य अनन्त्यस्य सकारस्य लोपो भवति । कः पुनरनन्त्यो लिङः सकारः । यो यासुट्सुट्सीयुटाम् । कुर्यात् । कुर्यातम् । कुर्युः । कुर्वीत । कुर्वीयाताम् । कुर्वीरन् ।

* सार्वधातुकइति वर्त्ततइत्येकस्मिन्पुस्तके नास्ति ।

अनन्त्यस्येति किम् । कुर्युः । कुर्याः । सार्वधातुकइत्येव । क्रियास्ताम् । क्रियासुः । कृषीष्ट । कृषीयास्ताम् । कृषीरन् ॥

अतो येयः ॥ ८० ॥

अकारान्तादङ्गादुत्तरस्य या इत्येतस्य सार्वधातुकस्य इय् इत्ययमादेशो भवति । पचेत् । पचेताम् । पचेयुरित्यत्रोस्यपदान्तादिति पररूपं बाधितम् । अत इति किम् । चिनुयात् । सुनुयात् । तपरकरणं किम् । यायात् । सार्वधातुकइत्येव । चिकीर्ष्यात् । ननु चातो लोपेनात्र भवितव्यम् । पचेदित्यत्रापि हि तर्हि अतो दीर्घो यञीति दीर्घत्वेन भवितव्यम् । तदनेनावश्यं विध्यन्तरं बाधितव्यम् । स यथैव दीर्घस्य बाधक एवमतो लोपस्यापि बाधकः स्यात् । स्यादेतदेवं यदि दीर्घः सार्वधातुके विधीयते । अथ तु तिङि विधीयते, तदा येन नाप्राप्तिन्यायेन दीर्घस्यैव बाधकः स्यान्न पुनरतो लोपस्य । येय इत्यविभक्तिको निर्देशः, य इति वा षष्ठीनिर्देशे यलोपस्यासिद्धत्वमनाश्रित्याद्गुणः कृतः सौत्रत्वान्निर्देशस्येति । केचिद् अत्रातो यासिय इति सूत्रं पठन्ति । तेषां सकारान्तः स्थानी षष्ठीसमासश्च ॥

आतो ङितः ॥ ८१ ॥

आकारस्य ङिदवयवस्य आकारान्तादङ्गादुत्तरस्य सार्वधातुकस्य इय् इत्ययमादेशो भवति । पचेते । पचेथे । पचेताम् । पचेथाम् । यजेते । यजेथे । यजेथाम् । सार्वधातुकमपिदित्यत्र न ङितीव ङिद्वदित्येवमङ्गीक्रियते ऽपितु ङित इव ङिद्वदिति पूर्वसूत्रएव उच्चुकुटिषतीतिप्रसिद्धये तथाङ्गीकरणम् । यदि गाङ्कुटादिसूत्रे ङिद्वतीत्येवमङ्गीक्रियते तदा अनुदात्तङितआत्मनेपदमिति आत्मनेपदं प्राप्नोतीति । अत इति किम् । पचन्ति । यजन्ति । पचन्ते । यजन्ते । ङित इति किम् । पचावहे । पचामहे । अत इत्येव । चिन्वाते । सुन्वाते । तपरकरणं किम् । मिमाते । मिमाथे ॥

आने मुक् ॥ ८२ ॥

आने परतोऽङ्गस्यान्तो मुगागमो भवति। पचमानो, यजमानः। अकारमात्रभक्तोयं मुक् अनुपदेशग्रहणेन गृह्यत इति अनुपदेशादिति लसार्वधातुकानुदात्तत्वं भवति। यद्येवमातो ङित इत्ययमपि विधिः प्राप्नोति, तपरनिर्द्देशान्न भविष्यति। मुकि सत्यप्यर्द्धमात्रो भवति। लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोति। नैष दोषः। उपदेशग्रहणं तत्र क्रियते। तेन उपदेशादूर्द्ध्वं सत्यपि कालभेदे भवितव्यम्। तथा च पचावः पचाम इत्यत्रापि भवति॥

ईदासः ॥ ८३ ॥

आसउत्तरस्यानस्य ईकारादेशो भवति। आसीनो यजते। अत्र पञ्चम्या परस्य षष्ठी कल्प्यते॥

अष्टन आ विभक्तौ ॥ ८४ ॥

अष्टनो विभक्तौ परत आकारादेशो भवति। अष्टाभिः। अष्टाभ्यः। अष्टानाम्। अष्टासु। विभक्ताविति किम्। अष्टत्वम्। अष्टता। आ इति व्यक्तिनिर्द्देशोऽयमाकृतिनिर्द्देशे तु नकारस्थानेऽनुनासिकाकारः स्यात्। विकल्पेनायमाकारो भवत्येतज्ज्ञापितमष्टनो दीर्घादिति दीर्घग्रहणा,दष्टाभ्य औशिति च कृतात्वस्य निर्द्देशात्तेनाष्टभिरष्टभ्य इत्यपि भवति। तदन्तविधिश्चात्रेष्यते। प्रिया अष्टौ येषां ते प्रियाष्टानः। प्रियाष्टौ॥

रायो हलि ॥ ८५ ॥

रै इत्येतस्य हलादौ विभक्तौ परत आकारादेशो भवति। राभ्याम्। राभिः। हलीति किम्। रायौ। रायः। विभक्ताविति किम्। रैत्वम्। रैता। मृजेर्वृद्धिरित्यतः प्राग्विभक्त्यधिकारः॥

युष्मदस्मदोरनादेशे ॥ ८६ ॥

युष्मदस्मदित्येतयोरनादेशे विभक्तौ परत आकारादेशो भवति। युष्माभिः। अस्माभिः। युष्मासु। अस्मासु। अनादेश इति किम्।

Digitized by Google

युष्मत् । अस्मत् । हलीत्यधिकारादप्यत्र न स्यात् । उत्तरत्र त्वनादेश-ग्रहणेन प्रयोजनं योऽचीति तदिहैव क्रियते ॥

द्वितीयायां च ॥ ८७ ॥

द्वितीयायां च परतो युष्मदस्मदोराकारादेशो भवति । त्वाम् । माम् । युवाम् । आवाम् । युष्मान् । अस्मान् । आदेशार्थं वचनम् ॥

प्रथमायाश्च द्विवचने भाषायाम् ॥ ८८ ॥

प्रथमायाश्च द्विवचने परतो भाषायां विषये युष्मदस्मदोराकारादेशो भवति । युवाम् । आवाम् । प्रथमाया इति किम् । युवयोः । आवयोः । द्विवचनइति किम् । त्वमहं, यूयं, वयम् । भाषायामिति किम् । युवं वस्त्राणि पीवसा वसाथे ॥

योऽचि ॥ ८९ ॥

अजादौ विभक्तावनादेशे युष्मदस्मदोर्यकारादेशो भवति । त्वया । मया । त्वयि । मयि । युवयोः । आवयोः । अचीति किम् । युवाभ्याम् । आवाभ्याम् । युष्मदस्मदोरनादेशइत्यत्र यदि हलीत्यनुवर्त्तते शक्यम-कर्तुमचीत्येतत् तत्क्रियते विस्पष्टार्थम् । अनादेशइत्येव । त्वद्गच्छति । मद्गच्छति ॥

शेषे लोपः ॥ ९० ॥

शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति । कश्च शेषः, यत्राकारो यकारश्च न विहितः ।

पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि ।
यान्यद्विवचनान्यत्र तेषु * लोपो विधीयते ॥

त्वम् । अहम् । यूयम् । वयम् । तुभ्यम् । मह्यम् । युष्मभ्यम् । अस्मभ्यम् । त्वत् । मत् । युष्मत् । अस्मत् । तव । मम । युष्माकम् । अस्माकम् । शेषग्रहणं विस्पष्टार्थम् । शेषे लोपे कृते स्त्रियां टाप् कस्मान्न भवति, त्वं ब्राह्मणी । अहं ब्राह्मणी । संनिपातलक्षणो विधिरनिमित्तं

* शेषे इति बहुषु पुस्तकेषु पाठः ।

तद्विघातस्य । अनिङ्गे वा युष्मदस्मदो इति । केचित्तु शेषे लोपं टिलोपमिच्छन्ति । कथं वक्ष्यमाणादेशापेक्षः शेषः, ते चादेशा मपर्यन्तस्य विधीयन्ते । तेन मपर्यन्ताद् योऽन्यः स शेष इति । तत्रायं लोप इति टिलोपो भवति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकावशेषः ॥

प्रविश्य च निराविलविलस्वर्गमिव तं वतंसरूपमखिलभुवनानां परिसरसरदनुपमयवसमानयवसमाननीयशाद्वलं विमलसरसीसरसीकृतपर्याप्तपर्याप्तविविधाभोगभोगसामग्रीसहितगोगोपगोपनभाजनभाञ्जनकमलोक्य सर्वे एव विसिष्मियिरे सिष्मियिरे च ॥ ११० ॥

तं प्रसिद्धं, सुतलादिकं, बिलस्वर्गमिव, परिसरे पर्यन्तभुवि सरद्भिर्मिलद्भिर्यवसमानैर्यवतुल्यैर्यवसैस्तृणैर्हेतुभिर्माननीयः शाद्वलः शादहरितप्रदेशो यत्र तम्, अपर्याप्ता च· आप्तः प्राप्तो विविधो रूपरसादिमय आभोगः परिपूर्णता यया सा च या भोगसामग्री तया सहितानां गवां गोपानां च गोपनभाजनं च रक्षणसमर्थं च तं भा कान्तिस्तस्या अञ्जनकं चेति तम् । विसिष्मियिरे विस्मयं प्राप्ताः, सिष्मियिरे· ईषज्जहसुश्च ॥ ११० ॥

ततश्च ।

गावः स्वच्छन्दभूषुः परिसरिणि बहिर्मण्डले शाद्वलाढ्ये
गोपालास्तत्पुरस्तात् सहचरणिसुरास्तत्पुरस्तात् पुरन्ध्र्यः ।
तत्रैव क्वापि राधाप्रभृतिकुलवधूमण्डली क्वापि कन्याः
पार्श्वद्वन्द्वे सखायो वटुरपि पितरावग्रतो लाङ्गली च ॥ १११ ॥

परिसरिणि प्रसरणशीले । लाङ्गली बलदेवः ॥ १११ ॥

एवं व्रजनगरीगरीयसा कौतुकेन केनचिदनातङ्कं तं कंचन निर्वृतिप्रदेशं प्रदेशं समासाद्य महाकल्पकल्पघनघटाघटावलिवलित-

निर्मुक्तासारसारपराभवभवदवसादं विजहति स्म सर्वे एव स्वेच्छा-समं समन्ततः स्थिता अपि गोवर्धनधरस्य रस्यतममात्ममयनाभि-मुखं मुखं मन्यन्ते स्म ॥ ११२ ॥

निर्वृतेरानन्दस्य प्रदायां प्रदाने· ईशं समर्थं, महाकल्पं महाप्रलयं कल्पयन्तीति तेषां घनानां मेघानां घटाभिः श्रेणीभिर्घटावलिवलित इव कलपश्रेणिसमुद्गलित इव निर्मुक्तो य आसारस्तस्मात् सारो बलवान् यः पराभवस्तस्मादुद्भवन् योऽवसादस्तम् ॥ ११२ ॥

अथ वेदविदामवनिनिर्जराणां निर्जराणां मङ्गलाशीराशी रामा-नुजं मानुजं लोकमासाद्य विहरन्तं हरन्तं च निखिलसुरासुराणाम-भिमानमानन्दयामास ॥ ११३ ॥

अवनिनिर्जराणां विप्राणां निर्जराणां तेजस्विनां मङ्गलाशिषां राशिः· रामानुजं कृष्णम्· आनन्दयामास । मानुजं मनुष्यसंबन्धिनम् ॥ ११३ ॥

तदनु च मातापितृपितृव्यैर्विस्मयस्मयजया जयाशंसया शं स यापितो घ्रातश्च शिरसि रचितो रोहिण्या वात्सल्यरसोत्सवेन नित्स-वेन नितरामपि प्रथमजनिजनितबलेन बलेन चोपगूहितो हि तोषस-मुल्लासेन ॥ ११४ ॥

विस्मयस्मयजया विस्मयो लोकोत्तरक्रियादर्शनोत्थः स्मयो हर्षोत्थं मुखप्रफुल्लत्वं ताभ्यां जनितया जयाशंसया वत्स विजयी भव सर्वापद्भ्यो बन्धूंस्त्रायस्व· इत्यादिकया शं कल्याणं यापितः प्रापितः । वात्सल्यर-सस्य· उत्सवेन सेकेन, नितरां जाता उत्सवो यस्मात् तेन ॥ ११४ ॥

मुल्लासेन स्मयमानस्मयमानमाननकमलमलसदरविकसन्नयनमी-षदुन्नमयन्तीभी रमयन्तीभी रतिकलाकलापमाभीरीभीरीयमाणप्रणया-मृतक्रियाभी राधादिभिरभिनवानुरागपरभागसुकुमारिकाभिः कुमारि-काभिश्च नयनचकोरकोरकितचकितचपलप्रान्तलक्ष्मीभिरक्ष्मीलमालि-ङ्गितः ॥ ११५ ॥

आननकमलमीषदुन्नमयन्तीभी राधादिभिः कर्णाभिर्नयनचकोरस्य कोरकितश्च चकितश्च चपलश्च यः प्रान्तः॰ व्रीडाशङ्कोत्सुक्यसूचकस्तस्य लक्ष्मीभिः संपत्तिभिरश्लीलं निर्निमेषमेवालिङ्गितः । तत्प्रकारमाह, मुल्लासेन हर्षप्रकाशेन॰ आननकमलम्॰ ईषदुन्नमयन्तीभिः । कीदृशं, स्मयो वाम्यसूचको गर्वः॰ मानो दाक्षिण्यसूचक आदरस्ताभ्यां स्मयमानं प्रफुल्लम् । रतिकलानां कलापः संघो यत्र तद्यथा स्यात् तथा ॥ ११५ ॥

प्रमदभरनिःसहसहचरचयप्रणयनिरीक्षणसक्षनिर्वृतो धृतो बन्धुजनेन सकलेन स कलेन वचसा च सानन्दं नर्मपटुना वटुना वदनमुन्नीय निजगदे, जगदेकवल्लभ वयस्य यस्य ब्रह्मवर्चसममोघमोघवत्तरमनुभवन्तो भवन्तो मोदन्ते सोऽहं सोऽहं कथयामि ॥ ११६ ॥

स श्रीकृष्णः, कलेन मधुरेण ॥ ११६ ॥

किमयि मयि तस्मिन् सति सखे सखेदोऽसि गिरिवरधारणेन न कथमाज्ञापयसि पयसिजेक्षण क्षणमहं गिरिवरमेनं बिभर्मि भर्मिणा दण्डकाष्ठशिखरेण खरेण श्रमेण श्रान्तो भवान् क्षणं विश्राम्यतु ॥ ११७ ॥

आज्ञापयसीति, तादृशो ब्रह्मवर्चस्यप्यहं सख्येन गोपजातेरपि तवाज्ञाकारीति किं तव भाग्यं वर्णनीयमिति भावः । भर्मिणा भर्म कनकं तद्वता ॥ ११७ ॥

तदुपाकर्ण्य निजगाद गोष्ठेश्वरी, अहो एभिरेव पुनरुद्धुते रुद्धुतेक्षणेन चेतसा मुहुरुद्धुतीकृतोऽसि भो वत्स, वत्सरकृत्यं शतमखमखमखण्डितं खण्डितं यत् कृतवानसि, न सिध्यति हि धर्मो देवताहेलनम् ॥ ११८ ॥

एतैः कर्तृभिः॰ उद्धुतीकृतोऽसि, उद्धुमावृतम्॰ अन्तः संवृतं तेऽस्याय्यं नीत्वात्त्वं ननु देवतासंमानमयमार्दवं यत्र तादृशेन चेतसा करणेन ॥ ११८ ॥

कथं नाम सुराणामसुराणामपि द्वेषो नरस्य रस्यतामेतु॰ उभयभयं यदि जातं तदा कथं वसतिरतिरस्या स्यादिति सवात्सल्यं

भरसमुखाकरकरकमलपलाशेन श्रीकृष्णस्याधन्दघनमपघनमपरिश्रम-मतिश्रममतितया परामृशन्ती गिरिवरभरभुजं भुजं परिस्पृश्य पुन-रूचे ॥ ११६ ॥

उभयभयं देवासुराभ्यां भयम् । सुखाकरेति, "सुखप्रियादानुलोम्ये हाच्" अपघनमङ्गम् । अपरिश्रमं परिश्रमरहितमपि । अतिश्रममतितया॰ अतिश्रमयुक्तत्वभावनया । गिरिवरभरं भुङ्क्ते॰ अनुभवतीति तम् ॥ ११९ ॥

अहो कथमभिनवनवनीतशीतलतरोऽमलतरो भुजवलयोऽवल-येगेन महीधरभरं सहते ॥ १२० ॥

भुजवलयो बाहुमण्डलः । अवलयेगेन वलयेगाभावेन ॥ १२० ॥

हंहो धराधराधिनाथ नाथति जनोऽयं वरमेकं यदि सत्यमेव तव भवान् भवान् देवतात्मको वतात्मकोमलतालघुताभ्यां समुचि-तमित एव तदास्तु मास्तु मान्यतम मम तनयस्य मतनयस्य खेदः ॥ १२१ ॥

नाथति याचते । तदा॰ आत्मकोमलतालघुताभ्यां समुचितं यथा स्यात् तथा चित आच्छन्न एव भवान्॰ अस्तु । हे मान्यतम॰ अतिमान-नीय मम तनयस्य खेदो मास्तु । मतः संमतो नयो नीतिर्यस्य तस्य, कोमलाङ्गे धारकेऽस्मिंस्तव तथाभूतत्वमेव नीतिः संमतेत्यर्थः ॥ १२१ ॥

बटुरुवाच, मातर्मैवं वादीः, क्व नामास्य खेदः, अवधीयताम् ।

कल्पान्तप्रतिमं महाघनघटासंघट्टमुद्घाटयन्
किंवा नोपचकार नः प्रकुपितो देवः स वज्रायुधः ।
पश्याद्रीन्द्रविधारणेऽस्य यदिदं माधुर्यमुज्जृम्भते
मातस्तत् कथमन्यथाक्षिपुटकैरस्माभिरास्यत ॥ १२२ ॥

संघट्टः संमर्दः । अन्यथेति, यदि देवः प्रकुपितो नाभविष्यत् तदा कथमस्माभिः॰ अक्षिपुटकैरस्य माधुर्यम्॰ आस्वाद्यत, नापास्यतेत्यर्थः, भूते क्रियातिपत्तौ लृङ् ॥ १२२ ॥

साह साहसिक माधुर्ये मा धुर्ये खल्विदमपितु खेदवैधुर्ये वै धुर्यबलं गिरिवरवहनस्य ॥ १२३ ॥

माधुर्ये मा खल्विदं, यतो धुर्ये धुरि भवं "दिगादित्वाद्यत्," नहि भारान्माधुर्यमुद्भवतीत्यर्थः, । अपितु वै निश्चितं धुरि भारे· अंसलं बलवत् खेदवैधुर्यं खेदेन वैकल्यमेव,"बलवान् मांसलोऽसल" इत्यमरः । ·गिरिवरवहनस्य कृष्णस्य ॥ १२३ ॥

पश्य पश्य ।

ललाटस्य प्रान्ते श्रमजलकणक्लिद्यमानालकालि-
मुखं शुष्यत्प्रायं सरसिजमिव म्लायमानं हिमान्या ।
भरेण द्रागद्रेर्वेमदिव पुरः पाणिपादं सुरागं
कथं मातुः प्राणाः शिव शिव परं कष्टमेतत् सहन्ताम् ॥ १२४ ॥

हिमान्या हिमसंहत्या । सुरागमिति, अतिसौकुमार्याद् रागवमनस्य सार्वकालिकत्वेऽपि तदात्वाधिक्यं रागस्य सुशब्देन बोधितम् ॥ १२४ ॥

श्रीकृष्ण आह । मातः परं मातः परं कौतुकमस्ति, वृथा किमाशङ्क्यते मम खेदः, खेऽदः पश्य गिरिवरस्य स्वयमवस्थानं, निगदितमेव पुरा, वपुरात्मीयं मे निमित्तमात्रमेवात्र ॥ १२५ ॥

हे मातः· अतः परम्· इतोऽन्यत् परमुत्कृष्टं कौतुकं मास्ति नास्ति । खे शून्य एव· अदोऽवस्थानं निभालय ॥ १२५ ॥

साह । वत्स भवतु । तथापि ।

एतावन्तं कालमालम्ब्य बालो
मन्दस्पन्दं बाहुमुद्यम्य तिष्ठन् ।
अद्रेः सङ्गात् खेदवत्पाणिपद्मः
खिन्नो न स्याः कस्य हेतोर्न विद्मः ॥ १२६ ॥

खेदवत् खेदयुक्तं पाणिपद्मं यस्य सः, पाणिपद्मस्य खेदे प्रकटं दृश्यमानेऽपीत्यर्थः ॥ १२६ ॥

वचनमिदं पटुं मन्यते मन्यते यदि तव करसङ्गरसं गमयित्वा स्वयमेव खेऽवखेलन्निवायमवतिष्ठते ॥ १२७ ॥

गमयित्वा विरहय्य ॥ १२७ ॥

बटुराह । गोष्ठेश्वरि मन्त्रप्रभावतो विप्रभावतो विशिष्टशिष्टस्य मम ममतैकभाजनं वयस्यममुमसुखन्नपि गिरिवरोऽयं करकमले स्थितः सुनखे न खेदयते दयते हि सर्वात्मनाथं प्रति सर्व एव ॥ १२८ ॥

असुखन्निति, मत्संमाननसिद्ध्यर्थमेवेति भावः । सुनखे करकमले स्थितोऽप्यमुं न खेदयते, नखस्पर्शासहसौकुमार्यं स्वीयं प्रकटय्य स्थित इति भावः ॥ १२८ ॥

साह । धृष्ट किं प्रलपसि मम प्राणा दंदह्यन्ते नह्यन्ते न ताव-दाश्वासपाशेन कृतमिह हासपरिकल्पनयानया ॥ १२९ ॥

आश्वासपाशेन न नह्यन्ते न बध्यन्ते, किंतु दाहपीडया निःसर्तु-मेवेच्छन्तीति भावः ॥ १२९ ॥

व्रजेश्वर आह । अयि कथमयमाक्रुश्यते ब꣡ः प्रायशो यशो-ऽवतामीदृशि दुष्करे कर्मणि नर्मणि नयच्चेदुत्साहसाहसवर्धनं क्रियते तेन नासमयज्ञोऽयम्, अस्य वचसि च सिद्धानुरागोऽयं वत्सः ॥ १३० ॥

सिद्धानुराग इति, अन्यथा निरुत्साहत्वेऽस्य श्रमानुभवः स्यादिति भावः ॥ १३० ॥

इत्येवमवसरे परितः परितस्थुषां गिरिवरधरस्य रस्यमूर्तेर्माधुरीधु-रीणतामवलोकयतां लोकयतां धियमतीत्य रतिमुद्वहतां हतांहसाम-न्योन्यरसालापः समजनिष्ट ॥ १३१ ॥

लोकयतां लोकव्यापारवर्तीं धियम् · अतीत्य · अतिक्रम्य, "यती प्रयत्ने" पचादिः ॥ १३१ ॥

तथाहि । अहो अहोभिरेताषद्भिरपीदं नानुभूतं भूतंसभूतं लावण्यमस्य ॥ १३२ ॥

भुवः पृथिव्यास्तंसभूतम्· मलंकाररूपम् ॥ १३२ ॥

पश्य पश्य ।

उद्यत्पार्ष्णिपदाग्रचुम्बितमहीपृष्ठं कियत्कुञ्चित-
श्रीमज्जानुविभुग्नवङ्क्षणतटव्यालोलमालाञ्चलम् ।
हेलोद्धूनितवामबाहुमहसा व्यालत्यकक्षस्थलं
वामं पार्श्वममुष्य पश्य विवलीवल्लीकमृज्वायतम् ॥ १३३ ॥

विभुग्नात् किंचिद्वक्रीभूताद् वङ्क्षणस्य· ऊरुसंधेस्तटाद् व्यालोलं दक्षिणपार्श्वे प्रत्युच्चलं मालाञ्चलं यत्र तत् । विगता वलीरूपा वल्ली यत्र तत् ॥ १३३ ॥

किंच ।

लीलाभुग्नकफोणि कोमलकरप्रादेशपार्श्वोल्लस-
च्छ्रोणीसीम वलद्वलीकमनृजुव्यालम्बिमालाञ्चलम् ।
सम्यङ्न्यासविलासिना पदतलेनालम्बितक्ष्मातलं
पार्श्वं दक्षिणमस्य पश्य यदहो निर्व्याजमुद्भ्राजते ॥ १३४ ॥

कोमला च सा करस्य प्रादेशस्तर्ज्जन्यङ्गुष्ठविस्तारो यत्र सा च पार्श्वे· उल्लसन्ती च श्रोणीसीमा यत्र तत् । वलन्ती पुष्टीभवन्ती वली यत्र तत् ॥ १३४ ॥

किंच ।

स्वेदक्लिन्नकपोलमण्डललसत्कर्णावतंसीकृत-
श्यामाम्भोरुहकेशरा मदभरव्याघूर्णमानेक्षणा ।
अद्यान्येव निरीक्ष्यते क्षितिधरोद्धारश्रमेऽपि श्रमा-
भावव्यञ्जकरञ्जकस्मितसुधा वक्त्रद्युतिर्द्योतते ॥ १३५ ॥

स्वेदक्लिन्नेति केशरविशेषणम् । अस्य वक्त्रद्युतिरन्यैव द्योतते ॥ १३५ ॥

अन्यतश्च, केचिदाहुरहो रहोऽन्तरमिदमतिमतिमर्द्दनमपि

सकलापदां पद्माम्बुजयोः संचरणाभावेन मूकमिव कलहंसकयुगलं हंसकयुगलं यथा सरोजायजागदपि निद्रितम् ॥ १३६ ॥

रहोऽन्तर्गमिदम्, एतदपि रहस्यमेकमित्यर्थः । किं तत्, पद्माम्बुजयोः संचरणाभावेन कलहंसकयुगलं मधुरपादकटकद्वयं मूकमिव । दृष्टान्तोऽनुकम्पार्थं कः ॥ १३६ ॥

कादाचित्कचित्कमनीयविन्यासविशेषेण यथास्थितविन्यासविपर्यासपर्यासन्नस्पन्दे तस्मिन्नेव पदतामरसेऽमरसेवाभिनन्दिते कृतनादमाकस्मिकीं चलनशङ्कां समासादयति ॥ १३७ ॥

कादाचित्कः कदाचिद्भवश्चासौ चित् उपलब्धिस्तया कमनीयश्च यो विन्यासविशेषस्तेन यथास्थितविन्यासस्य विपर्यासे विपर्यये सति पर्यासन्नः स्पन्दः किंचिच्चलनं यत्र तथाभूते पदतामरसे कृतो न झणत्कारो येन तत् हंसकयुगलं चलनशङ्कां धारयति ॥ १३७ ॥

पुनरन्यतः केचिदूचुः । अहो पश्यत पश्यत ।

एकेन पाणिकमलेन विलासवंशीं
बिम्बाधरेऽनुगमयन् मृदु वादयंश्च ।
अद्रीन्द्रधारणविधौ विगतश्रमत्व-
मावेदयन् रसयति प्रियवर्गचेतः ॥

तस्मिन्नेव समये वटुराह, भोभो अतिसाहसमिदम् ।

मा वादय स्वमुरलीं निनदैरमुष्याः
शैलो यदि स्खलति वा द्रुत एव वा स्यात् ।
तर्हि त्वमद्य विधिना कतमेन बन्धून्
रक्षिष्यसि प्रियवयस्य न दृश्यते सः ॥

यदस्या निर्वंशिकाया वंशिकायास्तथैव प्रभावः प्रभावः, यत्

खलु निनदेन शैलमपि विद्रावयति, विद्रावयति स्रोतस्वतीस्रोतः, स्वतीवानर्थकारिणीयम् ॥ १३८ ॥

विद्रावयति विद्रुतं गलितं करोति, स्रोतस्वत्या नद्याः स्रोतो विद्रावयति द्रव एव द्रावो गलितत्वं विगतद्रावं, कठिनं करोतीत्यर्थः, अत एव सुष्ठु· अतीवानर्थकारिणी ॥ १३८

सहचरा ऊचुः,

कुसुमासव गिरियं नो रक्षन् महासारो . महासारोपद्रवतो द्रवतो निजवपुषः किमाघातेन नाशयिष्यति, नैतत् ॥ १३९ ॥

महासारो महाधृतिः, महतामासाराणां धारापातानाम्· उपद्रवतो नोऽस्मान् रक्षन् । द्रवतः· द्रवीभावाद्· हेतोः ॥ १३९ ॥

महासाराः खलु पृथुनानन्दथुना नन्दन्तोऽपि द्रुतं द्रुतं चात्मानं स्तम्भयन्ति भयं तिलमाषमप्यत्र नास्ति श्रूयतां मुरलीनादो नादोधूयतां चित्तवृत्तिरिति ॥ १४० ॥

द्रुतं शीघ्रं, द्रुतं क्लिन्नं, न चित्तवृत्तिरादोधूयतां नातिचपलीक्रियताम् ॥ १४० ॥

परतश्चापरे निजगदुः ।

अहो मूढतामूढतादृशकोपस्य पश्यत शतमखस्य, अस्मिन्नपि सर्वसुहृदि हृदि वैरायते ॥ १४१ ॥

शतमखस्य मूढतां पश्यत, अस्मिन्नपि· ऊढस्तादृशः कोपो येन तस्य ॥ १४१ ॥

अयं गोपोन्नेता भवति स हि गोत्रक्षयकरः
स गृह्णात्येवायं जगति शतकोटिं वितरति ।
स एकाशापालो दिशति सकलाशाफलमयं
कथं धत्तेऽलज्जो हरिरिति स नाम्नः प्रतिकृतिम् ॥ १४२ ॥

गोत्रः पर्वतो गोत्रं कुलं च । स इन्द्रः शतकोटिं वज्रं गृह्णात्येव, अयं तु शतानां कोटिं वितरति ददाति । एकाशापालः पूर्वदिक्पालः, सकलानामप्याशाफलम् अभीष्टं दिशति । स इन्द्रः । प्रतिकृतिं प्रतिच्छायाम् ॥ १४२ ॥

अन्यतश्चान्ये जगदुः, अहो किमेतत् ।

अमी प्रलयमारुताः प्रलयवारिदा अप्यमी
इदं प्रलयदुर्दिनं प्रलयवारिवारोऽप्ययम् ।
भ्रमः किमयमेव नः किमियमिन्द्रजालक्रिया
कुतोऽपि न पराभवः क्वचन कोऽपि कस्याप्यभूत् ॥ १४३ ॥

वारिवारो जलसमूहः ॥ ४३ ॥

अन्यतश्च ।

मधुरगोष्ठीनिष्ठ्यूतः कश्चन*वसुधानवसुधाप्रवाह इव परस्परपरमरमणीयसौहृदहृदयालुतया कोमलपरिमलपरिहासहासपेशलः समजनि समजनिकौतुकः कथारम्भः ॥ १४४ ॥

समा जनिरुत्पत्तिर्यस्य तथाभूतं कौतुकं यत्र सः, कथारम्भः कौतुकं च युगपदेवाभूदित्यर्थः ॥ १४४ ॥

तथाहि ।

गोवर्धनं सुमुखि यावदयं बिभर्ति
राधे न तावदिह लोलय लोचनान्तम् ।
मास्तामभुष्य पृथुवेपथुभङ्गभाजः
पाणिस्थलस्खलितशैलकृतो विपाकः ॥ १४५ ॥

लोचनान्तमपाङ्गं न लोलय न चपलीकुरु ॥ १४५ ॥

---

* नवसु नवसु इति समाकारताद्योतनाय कश्चनेत्येवं पदविभागाभावोऽवसेयः । पूर्वस्मिन् पचितपद्ये कैलाश इत्येवं तालव्यशकारो गतः स दन्त्योऽवसेयश्च ।

इति मधुमधुरध्वनिभृतनिभृतपरिहासपेशलया श्यामलया परिहसिताखिलापाङ्गी कृपाङ्गीकृतत्रपा तामाह ॥ १४६ ॥

कृपया॰ अङ्गीकृता त्रपा यया सा, त्रपां प्रति कृपां कृत्वैव तां स्वीकृतवतीत्यर्थः, तेन तदानीं त्रपाया दौर्बल्याच्चापल्यमेव ध्वनितम् ॥ १४६ ॥

मा हरिणलोचने निजमदं मदन्तरे संचारय स्वयमुपदिश्यतामात्मा ॥ १४७ ॥

हरिणलोचने॰ इति, तवैव लोचनचाञ्चल्यं स्पष्टीभवतीति भावः ॥ १४७ ॥

अन्याह । महासारोऽयं येन धराधराधीशोऽयं कन्दुकीकृतस्तस्य समुपचितवैदग्ध्यविपाकयापि कया पिधीयतां सारः ॥ १४८ ॥

महासारो महाधृतिमान् । सम्यगुपचितो विवृद्धो वैदग्ध्यस्य विपाकः परिपाको यस्यास्तादृश्यापि कया वा॰ अस्य सारो धैर्यं पिधीयतां कवलीक्रियतां, लुप्यतामिति यावत् ॥ १४८ ॥

तामन्याह ।

सारोऽस्य शैलधरणेऽद्य निरीक्ष्यते यो
मन्ये तदेव गरिमाणममन्दमस्य ।
मुग्धे घनस्तनि तव स्तनकुम्भलक्ष्मी-
संदर्शनेऽपि यदि वीक्ष्यत ईदृगेव ॥ १४९ ॥

तामन्येति, हन्त हन्त सा त्वं सा त्वमेव भवसि मन्मुखेन स्वगुणं वाचयितुमेव त्वमेवमुपक्राम्यसीत्याह, सारोऽस्येति । तदेवास्य सारस्य गरिमाणम्॰ अमन्दं मन्ये॰ अहं, यदि तव स्तनकुम्भस्यापि लक्ष्म्याः शोभाया अपि संदर्शनेऽपि॰ ईदृगेव सारो धैर्यं वीक्ष्यते, तेन कर्णकण्डूयनादिव्याजेन कञ्चुलिकान्तव्यक्तं स्तनप्रान्तमस्मै दर्शयित्वा संदेहोऽयं निरस्यतामिति नर्म द्योतितम् ॥ १४९ ॥

Digitized by Google

अपराह्ह ।

पराहतपरिहासा हासावलोकलोकरमणीयं रमणीयन्त्रणाकारिना-गरिमगरिमगम्भीरमालोकयत यतमाना मधुरिमाणमस्य ॥ १५० ॥

पराहतपरिहासाः परिहासं परित्यज्य यतमाना यत्नवत्यः सत्यो-ऽस्य मधुरिमाणम्· आलोकयत । कीदृशं, रमणीनां यन्त्रणाकारिणो नागरिम्णो। नागरत्वस्य गरिम्णा गौरवेण गम्भीरम् ॥ १५० ॥

वामेन पाणिकमलेन बिभर्ति शैलं
वंशीं परेण मृदु वादयते सलीलम् ।
आलोकते * व्रजजनं नयनाञ्चलेन
शृण्वन् सुहृज्जनगिरं च शिरो धुनीते ॥

अथ राधिकामन्यतमाह ।

माहमन्यथा निगदामि पश्य पश्य ॥ १५१ ॥

शिरो धुनीत इत्यनुमोदनार्थम् ॥ १५१ ॥

इह सकलजनावलोकलीला-
क्रमघटिते भवदाननावलोके ।
द्रुतमुदितममी वपुर्विकारं
गिरिधरणोत्थितमेव तर्कयन्ति ॥ १५२ ॥

सकलजनकर्मको योऽवलोकस्तल्लीलाक्रमेण· इव घटिते भवत्या आननावलोके सति· अमी सकलजनाः ॥ १५२

अथ काचिदवादीदवादी ते व्याहारो हारो यथा कण्ठे कर्तुमर्हः ।

तथाहि ।

राधालोकनजातसंमदभरात् प्रस्वेदकम्पादिकं
श्रीगोवर्धनधारिणोऽस्य वपुषो दृष्ट्वा विकारोत्करम् ।

* प्रतिजनमिति पाठान्तरम् ।

श्रान्तोऽयं गिरिधारणेऽभवदिति स्नेहादमी गोदुहः
पर्यन्ताश्रयिणो गृहीतलगुडास्तं धर्तुमारेभिरे ॥ १५३ ॥

अवादी निर्विवादः । पर्यन्ताश्रयिणः· उपान्तस्थायिनः सन्तः ॥ ५३ ॥

इत्युक्ते सति मन्दाक्षमन्दाक्षमावृण्वत्या स्वमप्यतिमुख्या विधुमुख्या विधुरितमनसस्ते गिरिधरणोद्यता नतेनैव तेनैव नयनाञ्चलेन यदि तथैव सकृद् ददृशिरे ॥ १५४ ॥

मन्दाक्षेण लज्जया मन्दाक्षं यथा स्यात् तथा· आवृण्वत्या विधुमुख्या राधया ते गिरिधरणोद्यता अतिमुख्यास्तेनैव नयनाञ्चलेन नतेनैव लज्जया नम्रेणैव यदि सकृद् ददृशिरे दृष्टास्तदा ॥ १५४ ॥

तदा दरोदञ्चदञ्चलेन मुखमावृत्य निजसखीभिरप्यलक्षितं स्मितं चकार । इत्येवमवसरे बटुराह तान् ।

मा भैष्ट भो व्रजभुवो लगुडैर्यतध्वं
कण्डूयने न वपुषो धरणीधरस्य ।
शश्राम नामलबलः स बलानुजोऽयं
साराधिका न न रुचोऽपहतो प्रगाते ॥ १५५ ॥

लगुडैर्धरणीधरस्य गोवर्धनस्य वपुषः कण्डूयने निमित्ते न यतध्वं, नहि युष्मल्लगुडबलैरस्य धारणं संभवति किंतु कण्डूयनमेवेत्युपहासः ।

ननु तर्हि कस्तावदत्रोपायस्तत्राह, स प्रसिद्धो रामानुजोऽयं न शश्राम न श्रान्तोऽभूत्, यतोऽमलबलः, तत्र लिङ्गं सारेण बलेन· अधिका रुचयः कान्तयः· अपहतो· अपघाते सति न न प्रगाते न न गच्छन्ति, अपितु गच्छन्त्येवेत्यर्थः, अस्य तु ताः कान्तयो वर्तन्त एवेति सर्वान् ज्ञापयितुमिष्टोऽर्थः, सा प्रसिद्धा राधिका· आननरुचा स्वमुखकान्त्या· उपहतो कम्पादिभिरुपघाते निमित्ते प्रगाते प्रयातीत्ययमर्थस्तु कृष्णम्॥१५५॥

तदा तदाकर्ण्य गम्भीरस्मयमानः स्मयमानः कुवलयवलयसुकुमारः कुमारः श्रीव्रजपुरपुरंदरस्य दरस्यन्दमानमानसरसमाननचन्द्र-

मधुरिमाभिषिक्तदशनोस्रसहस्रसहकारचारुणारुणाधरपरिस्पन्देन मन्देन मधुरेण व्याजहार हारहासविकसद्वास्तमेव वटुम् ॥ १५६ ॥

गम्भीरस्य स्मयस्य विस्मयस्य मान आश्रयः, "मानश्चित्तोन्नतौ ग्रहे" इति विश्वः,दर ईषत् स्यन्दमानः चरन् बहिर्निःसरन् मानसरसो यत्र तद्यथा स्यात् तथा व्याजहार । अरुणाधरस्य परिस्पन्देन संचलनेन । कथंभूतेन, आननचन्द्रस्य मधुरिम्णा· अभिषिक्तानां दशनानाम्· उस्रसहस्रस्य किरणसहस्रस्य सहकारेण मेलनेन चारुणा मनोहरेण । हारेण हासेन च हारवद्धासेन वा विकसत् प्रकाशमानं वचो यस्य सः । अनेन किंचिल्लज्जानम्रत्वं च ध्वनितम् ॥ १५६ ॥

वटो स्वभावो हि भावो हिततरोऽयममीषां मयि क्रिमुपहस्यते सा राधिकापि कापि मम मूर्तिस्तथात्वेनामीभिर्न ज्ञायते मयि निरन्तरायनिरन्तरायमानबालभावेन तेनेदमतिशोभनमेव बहुलमतः परं कौतुकं किमिति ॥ १५७ ॥

सारेणाधिकापि· अतिबलिष्ठापि काप्यनिर्वचनीया मम मूर्तिः शरीरमिति सर्वान् ज्ञापयितुमिष्टोऽर्थः, सा प्रसिद्धा राधिका काप्यनिर्वाच्या मम मूर्तिरपि परमप्रेयसीत्वान्मच्छरीराभिन्नेत्येषोऽर्थस्तु वटुं राधिकावर्गं च । निरन्तरायो निर्विघ्नश्चासौ निरन्तरमविरतमेव· अयमानः प्रसरंश्च यो बालभावो वात्सल्यं तेन ॥ १५७ ॥

अतः परं तानेवाह, भो भो मदेकवत्सलाः· अलमलम्बो* लम्बोदरजनकवन्मान्यानां सामान्यानां साधारण्येन, तदुपरमत परमतमात् परिश्रमात्· अयमहमश्रान्तमश्रान्त एव ॥ १५८ ॥

लम्बोदरजनको महेशस्तद्वन्मा यानां वो युष्माकं सामान्यानामितरजनानां साधारण्येन साधर्म्येण· अलम्· तत् तस्मात्, अयमहमित्यात्मानं तर्जन्या दर्शयति, अश्रान्तं निरन्तरमेव, अश्रान्तः श्रमरहितः ॥ १५८ ॥

* संधिः प्राग्वत् ।

Digitized by Google

अथ कुतोऽपि पुनः पुरत एव तनयवत्सला वत्सलालसा यथा माता माता सा व्रजेश्वरी निजगाद ॥ १५८ ॥

माता गौः, "माता गौर्यादिजननीगोब्राह्मण्यादियोषिती"ति मेदिनी ॥ १५९ ॥

वत्स· अभूत् कालो भूयान् निरशनतया खिद्यसे, तात क्षामं वपुः क्षामं जातं पतितमुदरं विश्लथश्चेलबन्धः, अपि स्वेच्छाचारी सविधसुलभे शाद्वले नास्ति शस्यं गवां स्तोमः पश्यन्ननशितवतः शुष्यदास्यं तवैतत् ॥ १६० ॥

अनशितवतः· अभुक्तवतस्तव· आस्यं मुखं शुष्यत् पश्यन् सन् गवां स्तोमोऽपि शस्यं नात्ति न खादति ॥ १६० ॥

तदिदमावेदयामि दयामित्रमना मनागधुना मुञ्च वेणुविद्याविनोदं विनोदञ्चनेन पाणेर्मयैवापवर्ज्यमानमाननकमले कियदशान दशा ननु यदा यादृगुत्पद्यते तदुचितमाचारमाचारविदो वदन्ति॥१६१॥

दयामित्रमनाः कृपाक्लिन्नचित्ता, पाणेर्विनोदञ्चनेन हस्तस्योन्नमनं विनैव· अशान भुङ्क्ष्व मयैवापवर्ज्यमानं दीयमानम्, दानपर्याये· "अपवर्जनमंहति"रित्यमरः ॥ १६१ ॥

तेन स्त्यानमस्त्यानमदुष्णाभावमपूपमपूपहति सरसरसं दधि दधिरस्मि ॥ १६२ ॥

स्त्यानं स्निग्धम्· अपूपमस्ति, "स्त्यानं स्निग्धे प्रतीघाते" इति विश्वः । अानमम्· ईषद् घटमान उष्णाभावो यत्र तत् । पूः पावित्र्यं न विद्यते तस्या उपहतिर्यत्र तत् । दधि कीदृशं, सरेण सरसं स्वादवत् । दधिरस्मि धारयन्त्यस्मि, "धाञ्क्सृजनिनमिभ्य" इति किः ॥ १६२ ॥

समुचितसौभाग्यो भ्रातानमकुतूहलिना हलिना सह सहचरैश्च समं समञ्जसतया भोक्तुमर्हसि ॥ १६३ ॥

Digitized by Google

समुचितं सौभ्रात्रं यस्य सः, अत एव भ्रात्रा हलिना सहेति तत्प्रवर्तनार्थमनुरोधो दर्शितः ॥ १६३ ॥

वटुराह, वयस्य समुचितमेवाह माता मा तावदन्यथा कर्त्तव्यमिदं मयापि बुभुक्षयाक्षयापरितोषेण भूयते ॥ १६४ ॥

अक्षयोऽपरितोषो यस्य तेन ॥ १६४ ॥

स रसवानाह, नाहमम्ब मुहूर्त्तमपि गतं मन्ये तमन्ये तर्कयन्ति कथं बहुकालं का लङ्घयितुं युज्यते गौर्गुरूणां कियतायता क्षणेन क्षणेन तत् करणीयम् ॥ १६५ ॥

रसवानिति, तत्खेदोपशान्त्यर्थं स्वसारस्य व्यञ्जना । का गौर्लङ्घयितुं युज्यत इति, भ्रान्त्युक्त्या बुभुक्षा तु न मे संभवतीत्यर्थः । तस्मात् कियता क्षणेनायता गच्छता सता । तद् भोजनम् ॥ १६५ ॥

इति स्थिते शतमन्युरथ मन्युरथमिवारूढोऽपि लोकरावणैरावणैधमानगतिजवः पविपवित्रकरो घनाघनानुपर्युपर्युपोढगाढरागतयाऽगतया किमियतायतायतेन कालेन तत्र वृत्तमिति दिदृक्षया क्षयाय व्रजभुवां कृतारम्भोऽरं*म्भेणेव कुपितः समेत्य समालोकयामास ॥ १६६ ॥

मन्युः कोप एव रथस्तम्, आरूढस्तथापि लोकान् रावयति क्रन्दयतीति तादृशेन, ऐरावणेन, ऐरावतेन हेतुना एधमानो गतिवेगो यस्य सः, पविना वज्रेण पवित्रः सौम्यः करो यस्य सः, पवित्र इति हिंसात्वद्योतनाय विरुद्धलक्षणया, घनाघनान् वृष्टिशीलमेघान्, उपर्युपरि, उपोढा धृता या गाढरागता निविडप्रणयिता तया, अगतया निश्चलया, मेघगणोपरि निबद्धनिश्चलप्रेमतयेत्यर्थः, "वर्षुकाब्दो घनाघनः" इत्यमरः, "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु"त्यादिना द्वितीया, व्रजभुवां क्षयाय कृतारम्भः, इयता, एतावता, आयतेन दीर्घेण कालेन, अयता

* परसवर्णः प्राग्वत् ।

गच्छता सता तत्र गोष्ठे किं वृत्तमिति दिदृक्षया समेत्य, चरं शीघ्रं, भोगीव सर्प इव ॥ १६६ ॥

भित्त्वा गाढपटीयसीं घनघटामूर्ध्वंगतेः सानुभि-
र्वर्षाभावसुखस्थितद्विजमृगव्रातस्य भूमीभृतः ।
तस्यामेखलमास्थितैर्जलधरैः कल्पान्तवान्ताम्बुभि-
र्धौतप्रान्तभुवो व्यधायि सुषमा मुक्तातपत्राकृतिः ॥ १६७

गाढा निबिडा च सा पटीयसी·अतिदक्षा चेतितां घनघटां भित्त्वा·ऊर्ध्वं गतैः सानुभिः· तस्य पर्वतस्य· आमेखलं मेखलामभिव्याप्य· आस्थितैः, तथा च हरिवंशे, "स भूतः संगतो मेघैर्गिरिः सव्येन पाणिना । गृहभावं गतस्तत्र गृहाकारेण वर्चसा" ॥ इति, कल्पान्ते प्रलय इव वान्ता-नि·अम्बूनि यैस्तादृशैरपि तैर्धौता क्षालिता प्रान्तभूर्यस्य तस्य गोवर्धनस्य सुषमा· अतिशोभा· एव व्यधायि । मुक्तामयस्यातपत्रस्येवाकृतिर्यस्यां सा ॥ १६७ ॥

तथा निरीक्ष्यापीश्वरंमन्यो मन्योरन्तं विगमिषुर्महाप्रलयदुर्दि-नाकृतिकृतिनि जलमुचां कुले निर्घातध्वानमुचि नमुचिसूदनोऽनुता-परुषा पहृषायितहृदयो दयोपरोधरहितोऽहितोद्यमाय पुनरपि समु-त्तेजनां जनयामास, तदुपरोधात् पुनस्तेऽपि संभूय भूयसा सामर्थ्येन ववृषुः ॥ १६८ ॥

नमुचिसूदन इन्द्रः, अतितापेन या रुट् तया, दया गोषु· उपरोधो भगवति ताभ्यां रहितः, अहितमपकारस्तदुद्यमाय ॥ १६८ ॥

अथ पुरंदरदरतस्तदुपदिष्टा दिष्टान्तकारिणो महाप्रलयसमीरणा रणार्थमिव संनद्धा गिरिवरोद्धुनये कृताभियोगा भियो गाढतरां पदवीं विरचयन्ति स्म ॥ १६६ ॥

दिष्टान्तो नाशः, "दिष्टान्तः प्रलयोऽत्यय" इत्यमरः । गिरिव-

द्वतये गोवर्धनमुच्चालयितुम् । भियो भगवत्कोपोत्थस्य स्वभयस्य गाढतरां पदवीम् ॥ १६९ ॥

तथा सति ।

बाह्ये कष्टातिवृष्टिः खरतरमरुतः संप्रपातः शिलानां
ज्योतिःपातोऽम्बुदानामपि यदजनयन् क्लेशमुर्वीधरस्य ।
लीलापीयूषवर्षैर्मुखकमलमधूद्गारिभिः श्वासवातै-
र्हासज्योत्स्नाप्रपातैस्तनुमणिकिरणैस्तं हरिः संजहार ॥ १७० ॥

तद्यथा, बाह्ये अतिवृष्ट्याद्याः क्लेशमजनयंश्चकुर्वन्,तथैव लीलापीयूषवर्षादिभिस्तैस्तैरेव यथाक्रमेव तत्तुल्यं तं क्लेशं संजहार ॥ १७० ॥

किंच ।

बहिर्मेघा विद्युद्रततिततयः शक्रचापोऽतिवृष्टि-
र्मुकुन्दोऽन्तर्मेघः कुवलयदृशो निष्प्रकम्पाश्च शम्पाः ।
धनुश्चेन्द्रं बर्हाभरणमतुला कापि लावण्यवृष्टिः
स बाह्यान्तस्तुल्योऽधिकमिदमसौ कौस्तुभोऽन्तर्विवस्वान् ॥ १७१ ॥

अधिकमिदमिति, विवस्वतो बहिर्वर्तमानत्वेऽपिमेघान्तर उपलब्धेः ॥ १७१ ॥

अथ भूयोऽपि भूयोऽपिधीयमाननिजश्रमाशङ्कं मधुमधुरं धुरंधरो माधुर्यधुर्यसदसः सरसतरं तरङ्गितनयनाञ्चलो मुरलीकलं कलङ्करहितसितमयूखमुखो वादयामास ॥ १७२ ॥

भूयोऽपि पुनरपि, भूयो बहुतरं यथा स्यात् तथा· अपिधीयमाना· आव्रियमाणा निजश्रमाशङ्का येन तद्यथा स्यात् तथा, माधुर्यधुर्यसदसो माधुर्यधारिण्याः सभाया धुरंधरो मुख्यः ॥ १७२ ॥

तदाकर्ण्य केचिदाहुः ।

अहो पश्यत पश्यत ।

न्यञ्चद्वामभ्रवणकुवलयं तन्वतो वेणुनादं
लीलोदञ्चज्जयति गिरिभृतो दक्षिणं भ्रूलताग्रम् ।
मद्भङ्गापि प्रभवति भगवान् किं पुनर्वामदोष्णा
धर्तुं क्षोणीधरमिति कथयत् तत्प्रकारं च बिभ्रत् ॥ १०३ ॥

केचित् पौराः । लीलया॰ उदञ्चत्॰उद्गच्छत्॰ भ्रूलताग्रं कर्तृ॰ इति कथयत् सत्॰ जयति । किं तत् । मद्भङ्गापि मम भ्रुवोर्भङ्गापि क्षोणीधरं धर्तुं प्रभवति किं पुनर्दोष्णेति । भगवान् पराक्रमी कीर्तिमान् वा, "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्व"त्यमरः ॥ १०३ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरल्लोकाभिधमहाशयविरचितमानवी-यज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य ॥

॥ एकादशः परिच्छेदः ॥

१ ॥ ते ऽन्वेषणयोग्याः सन्ति ॥—नैसर्गिका गरीयांसश्च भाषादोषाः पूर्वस्मिन्परिच्छेदे विस्तरेण वर्णिताः । भाषायाः समाजस्य सहावस्थाननियामकत्वाद् ज्ञानपरिष्कारस्यैकस्मात्पुरुषात्पुरुषान्तरं प्रति कुलात्कुलान्तरं प्रति च प्रापकमार्गरूपतया च पूर्वोक्तदोषप्रतीकारोपायानां गाढतमो विचारो ऽवश्यं कर्तुं युज्यते ॥

२ ॥ न सन्ति सुलभाः ॥—आत्मानमुपहासास्पदमकृत्वा न कोपि सांसारिकसर्वभाषाणामेकस्या अपि स्वीयाया भाषाया वा परिष्कारं पूर्णं कर्तुं शक्नोतीति निरर्थकं विमर्शं न करोमि । तदर्थं च मनुष्यैरवश्यं सर्वदा शब्दानां प्रयोगो नियतैकविज्ञानतात्पर्येणैव करणीय इतीच्छा तु सर्वे मनुष्याः सममेव ज्ञानिनो भवेयुर्भाषेरंश्च सुव्यक्तानि सुज्ञातान्येव विज्ञानान्यधिकृत्य । इदं च सर्वेषु मनुष्येषु ज्ञानं तदभावं वा एकरूपमेव साधयितुं शक्नोमीति वृथागर्वरहितेन न केनापि पुंसा आशासितुं शक्य-

ते। किं च यो महार्हजिह्वया साधु ज्ञानमेव संपादनीयमिति मनुष्याणां भाषणेन स्वल्पमधिकं वा प्रमाजनकेनैव भाव्यमिति वा चिन्तयति स संसारे न कथमपि मेधावान् अभिधीयेत ॥

३ ॥ परं त्वेवमपि शास्त्रमावश्यकम् ॥—परं त्वापणे क्रयविक्रयव्यवहारे च स्वस्वभाषणप्रकाराणामेव परिग्राह्यत्वे ऽपि प्राचीनानां ग्रामीणपुरुषाणां कथोपकथानामपरिहार्यत्वेऽपि च तर्कशीलानां शास्त्रिणां भूयसां विवादानां परिहारस्योपायानां प्रदर्शने प्रयतमानत्वेऽपि च, मन्ये ये तत्त्वान्वेषणाय प्रयतन्ते तैरवश्यं चिन्तनीयं यदनवधानेन प्रयोगे क्रियमाणे निसर्गतः संभाव्यानां गूढत्वसंदिग्धत्वानेकार्थत्वदोषाणां वैधुर्येणास्माभिरवश्यं शब्दाः प्रयोक्तव्या इति ॥

४ ॥ शब्दानामन्यथा प्रयोगो भ्रमाणां महाकारणम् ॥—यतो यः शब्दानां दुष्प्रयोगेण जगति प्रसृतान् भ्रमसंकरगूढत्वान्यथाग्रहान् साधु विचारयिष्यति, स लोकव्यवहृता भाषा मनुष्येषु ज्ञानपरिष्कारं जनयति, आहोस्विद् ज्ञानप्रतिबन्धं करोतीति संदेहस्योत्थितौ किमपि कारणं लप्स्यते। यदा लोका वस्तून्यधिकृत्य चिन्तयेयुः स्वविमर्शान् शब्देष्वेव योजयेयुर्विशेषतश्च यदा तैर्नीतिविषया विवद्यन्ते तदा कति तथाविधाः सन्तीति, किं च यदि स्वप्रयुक्तपदबोध्यानां विज्ञानानामत्यन्तं विसंकुलत्वे ऽस्थिरत्वे च कदाचिच्च सर्वथा ऽभावे वा ध्वनिमात्रफलपर्यवसायिनि भाषणानि तर्काश्च भवेयुस्तर्हि को नाम विस्मयीत। एवंविधानां विमर्शानां तर्काणां च यथार्थज्ञानं व्यक्तनिर्णयं च विनैव केवलं गूढत्वं भ्रमश्च फले भवेतां तर्हि मन्ये न कोप्याश्चर्यमावहेत ॥

५ ॥ हठः ॥—मनुष्याः स्वगतभाषणे शब्ददुष्प्रयोगजन्यं काठिन्यमुपलभन्ते। परं तु परैः सह संभाषणे तर्कवादे चैतज्जन्या अव्यवस्था अत्यन्तं स्फुटाः सन्ति यतो भाषाया ज्ञानतर्कादीनां परस्परसंप्रदानसाधनीभूतप्रणालिकारूपतया वस्तुगतं ज्ञाननिर्झरमदूषयंश्चापि शब्ददुष्प्रयोगकारी पुरुषो मनुष्याणां साधारणलौकिकव्यवहारबाधकज्ञानसाधकान्

बहुतरान् मार्गान् अवरुणद्धि । व्यक्तस्थिरार्थविधुरान् शब्दान् प्रयुञ्जन् स्वस्मिन्परस्मिंश्च भ्रमानेव केवलमुत्पादयति । यश्च बुद्धिपूर्वमेवं करोति स तत्त्वयथार्थज्ञानयोः शत्रुरेव मन्तव्यः । किं चैवमपि सर्वाणि शास्त्राणि गूढानेकार्थशब्दैर्निरर्थकसंदिग्धोक्तिभिश्चात्यन्तं पूरितानीति श्रुत्वा समनस्कं सूक्ष्मबुद्धिं चात्यल्पं नैव वा ऽधिकज्ञानिनं मताग्रहिणं वा कुर्वन्तीति न कमप्याश्चर्यं जनयेत् । तत्त्वपरिरक्षणेन तत्त्वाध्यापनेन वोपजीवतां पुरुषाणां बुद्धेर्धर्मत्वेन व्यवहारात् । वस्तुतो धर्मश्च प्रायः केवलं गूढानां भ्रामकाणां वा पदानां सदोषभ्रामकप्रयोगात्मा मनुष्यानधिकमज्ञानावृतान् भ्रमेणाग्रहिणश्च करोति ॥

६ ॥ निरर्थकजल्पनं च ॥ —यत्किंचिद्वादविशेषस्य ग्रन्थे निरीक्षिते सति गूढानामस्थिराणामनेकार्थानां च पदानां फलं मनुष्यस्य बोधमनवधार्यैवापरिष्कृत्यैव वा ऽर्थशून्यशब्दप्रलापः कोलाहलश्च न तु ततोन्यत्किमपीत्युपलप्स्यते । यद्वाधाय शब्दाः प्रयुज्यन्ते तद्विज्ञाने वक्तृश्रोत्रोरुभयोरनैकमत्ये तर्कः कथमपि वस्तुविषयो भवितुं नार्हति किं तु पदमात्रविषयक एव । येषां शब्दानामर्थो वक्तृश्रोतृभ्यामुभाभ्यां परस्परानुमत्या न व्यवस्थापित एवंविधाः शब्दाः प्रायशः प्रयुज्यन्ते ऽतस्तयोर्बुद्धिभ्यां परस्परसंमतोऽर्थो नावधार्यते ऽपि तु शब्दमात्रम् । तदा तत्पदबोध्यतया चिन्तितानां वस्तूनां सर्वथा भिन्नत्वात् ॥

७ ॥ पक्षिगृहगोधिके ऽत्रोदाहरणम् ॥—जतुका पक्षिर्भवतु मा वा, तन्न प्रकृते विवक्षितम् । सा च यद्रूपा वस्तुतो ऽस्ति ततोन्यवस्तुरूपा भवति न वा, अथ वा वस्तुतो ये गुणा जतुकायां वर्तन्ते तेभ्योन्येपि गुणास्तस्यां सन्ति न वेति संदेहस्य सर्वथा व्याहतत्वात् प्रकृतः प्रश्न एतावन्मात्र एवास्ति यद्, ययोः पदार्थयोस्ते द्वे नामनी कल्पिते तयोरुभयोरन्यतरस्य वा ऽपूर्णविज्ञानवत्तां स्वीकुर्वाणयोर्मध्ये ऽयं प्रश्नः वक्ता श्रोता चोभौ यादृशशुद्धविज्ञानसमुदाये पक्षीतिपदं प्रयुञ्जाते, स सर्वोऽपि विज्ञानसमूहो जतुकायामुपलब्धुं शक्यते न वेति परीक्षया अपूर्णस्यापि तद्विज्ञानस्य पूर्णत्वसंपत्तये पक्षिणो जतुकाया वा नामाधिकृत्य वास्तविको

भवितुमर्हति । परं त्वयं प्रश्नो नैकतरपक्षस्य साधको बाधको वा ऽस्ति, किं तु वस्तुतत्त्वपरीक्षणाय केवलं जिज्ञासूनामेव । अथ वा ऽयं प्रश्नो विवदतोरेवास्तु ययोरेकतरो जतुका ऽस्ति पक्षिजातीयेति विदधाति परश्च नेति निषेधति । ततश्चायं प्रश्नः केवलमनयोरेकस्योभयोर्वा शब्दयोरर्थमधिकृत्यैव । एवं सति तत्पदद्वयबोध्यमिश्रविज्ञानद्वयमेकरूपमेवोभयोर्वादिनोर्न भवतीति हेतोरेव इमे द्वे नामनी सामानाधिकरण्येन विशेष्यविशेषणभावापन्ने भवितुमर्हत इति कथयति नेति च परः कथयति । यदि च तन्नामद्वयबोध्यार्थे एकमतौ भवेतां तर्हि तद्विषयकविवाद एव न संभवति, यतः, तथा सति यदि तौ विवदेतां तर्हि शीघ्रमेव स्फुटमुपलभेतां यत्पक्षीति साधारणतरनामबोध्यानि सर्वाणि शुद्धविज्ञानानि जतुकापदबोध्यमिश्रविज्ञानेषूपलभ्यन्ते न वेति । ततश्च जतुका ऽस्ति पक्षिजातीयेति संदेह एव नोदियात् । किं चावैतद्विचारणीयम्, अवधानपूर्वकं परीक्षणीयं च । जगति भूयिष्ठा विवादा न सन्ति केवलं वाचिकाः शब्दार्थविषयाश्चेति । अपि च यदि वादिप्रयुक्तपदानि लक्ष्यन्ते, यत्किंचिदर्थबोधनावसरे यथा तैरवश्यं भाव्यं तथैव तत्तत्पदबोध्यशुद्धविज्ञानानां नियतः समुदायस्तत्तदर्थतया व्यवस्थाप्येत तर्हि ते विवादा न स्वयमेव विरताः शीघ्रमेव नष्टा भवेयुः । कोऽस्ति विवादाभ्यासः कथं च ते स्वस्य परेषां वा हिताय साधु प्रवृत्ताः, ये सर्वदा केवलं विवदन्त एव ये वा केवलं वादेषु जल्पकथायां च स्वजीवनानि यापयन्ति । यदा सर्वैः क्रियमाणं गूढार्थकानेकार्थकपदप्रयोगं सर्वथा ऽकुर्वाणं कमपि वादिनं द्रक्ष्यामि तदा प्रमातत्त्वशान्तिकृते एवायं युद्ध्यति न पुनः निरर्थकयशःसंपत्तये महत्त्वाकाङ्क्षया पक्षपातेन वा युद्ध्यतीति तं कथयिष्यामि ॥

८ ॥ केन चित्परिमाणेन पूर्वोक्तभाषादोषाणां तत्समुद्भूतकाठिन्यस्य च परिहाराय वक्ष्यमाणनियमास्तावदुपयोक्ष्यन्ते यावत्कोऽपि बुद्धिमत्तरो ऽधिकनैपुण्येनैनं विषयमधिकविचारार्हं निश्चित्य लोकान् प्रति स्वविमर्शानुसारिचिन्तनाय न विवर्णीकुर्यात् ॥

॥ तत्र प्रथम उपायो विज्ञानं विना पदस्याप्रयोगः ॥—यदर्थे पदं प्रयुज्यते तद्विज्ञानविधुराणां अर्थशून्यपदानां प्रयोगस्याकरणाय पुरुषेण सावधानेन भवितव्यम् । यो नैसर्गिकबुद्धिः समवेदना विस्तृभूभागस्योन्नन इत्यादीनि पदानि परैः सह संभाषणेषु कथं पुनः पुनः प्रयुज्यन्ते तत्तत्पदप्रयोक्तारश्च यद्बोधाय प्रयुञ्जते तद्विज्ञानानि स्वात्मसु नावधारयन्ति किं तु तथाविधेष्ववसरविशेषेषु हेतूपन्यासस्य स्थाने प्रायशः क्रियमाणं शब्दमात्रोदीरणमेवेति स्मरिष्यति स सर्वाप्येनं नियमं सर्वथा ऽनावश्यकं न प्रत्येष्यति । एवंविधानां शब्दानामुचिततराः केप्यर्था नैव सन्ति, येषु ते प्रयोक्तुं शक्येरन् । परं तु कस्यापि पदस्य केनापि विज्ञानेन सह नैसर्गिकसंबन्धाभावाद्धिमे ऽन्ये च शब्दाः कण्ठतो ऽभ्यसनीया उद्घोषणीयाश्च तैर्यैस्तत्पदप्रतिपाद्यानि विज्ञानानि स्वात्मसु नावधारितानि । यदि मनुष्याः केवलं स्वगतमपि सुबोधं भाषितुमिच्छेयुस्तर्हि तएनं नियममावश्यकं वक्तुमर्हन्ति ॥

९ ॥ द्वितीयतः, भावबाचकेषु पदबोध्यानि विज्ञानानि व्यक्ततया ऽवधारणीयानि ॥—द्वितीयतो, मनुष्यो यत्किंचिद्विज्ञानतात्पर्येण पदानि प्रयुङ्क्ते इत्येतावन्मात्रेण नार्थसिद्धिः । पदबोध्यतया वक्तृतात्पर्यगोचराणां विज्ञानानां शुद्धत्वे ऽमिश्रितत्वे वा ऽवश्यं तैः सुज्ञेयैर्व्यक्तैश्च भवितव्यम् । मिश्रितत्वे तु नियतैर्भाव्यम् । एतदुक्तं भवति । आत्मनि व्यवस्थापितानां शुद्धविज्ञानानां यथार्थः समुदायः तेन पदेन तथा संबद्धो ऽपेक्षितो येन तत्पदं तस्यैव नियतस्य शुद्धविज्ञानसमुदायस्य लिङ्गं स्यान्नान्यस्य । अयं नियमो भावबाचकेषु नामस्वत्यन्तमावश्यको विशेषतश्च नीतिशब्देषु यत्र येभ्यः प्रतिमानरूपेभ्यस्तेषां विज्ञानानि संगृह्यन्ते तथाविधस्य नियतनैसर्गिकविषयस्याभावात् तद्वाच्यानि विज्ञानानि सर्वथा विसंकुलानि भवितुमर्हन्ति । न्याय इति शब्दः सर्वैरेव मनुष्यैरुदीर्यते ऽथापि प्रायो ऽनियतार्थक एवा ऽविस्पष्टार्थको वा भवति । यावद् मनुष्यः स्वात्मनि तन्मिश्रविज्ञानघटकावयवानां यथार्थं ज्ञानं न संपादयति तावत् सर्वदा एवमेव भविष्यति । किं च यदि तन्मिश्रविज्ञानमवयवशो विभज्येत

तर्हि ततोपि विभागः कर्तुं युज्येत यावत्तद्घटकानि शुद्धविज्ञानानि ज्ञायेरन् । अपि च यावदेतन्न क्रियते तावदस्य पदस्य दुष्प्रयोगमेव कुर्यात् । तथा हि न्यायो वा भवत्वन्यद्वा । एवमपि यत्र यत्रायं शब्द उपलभ्येत तत्र सर्वत्र सर्वदा ऽवयवशो विभागाय मनुष्येण प्रयतितव्यमिति न ममाशयो ऽपि तु तस्य पदस्यार्थस्तथा साधु परीक्षणीयस्तद्वाच्यमिश्रविज्ञानावयवाः स्वात्मनि तथा निर्धारणीया येन स यदैव इच्छेत्तदा परीक्षितुं विज्ञानं नियमयितुं च शक्नुयादित्येतत्करणमन्तत आवश्यकमेव । विध्यनुसारेण परेषां स्वस्य वा हितस्यानुष्ठानमित्येवं यो न्यायपदबोध्यं विज्ञानं रचयति स यदि न्यायपदार्थघटको विधिः को ऽस्तीति सुव्यक्तं साधु न जानीयात्तर्हि तस्य न्यायविज्ञानं स्वयमेव विसंकुलमपूर्णं च भवेदिति सुस्पष्टमेव । मन्ये एतद्याथार्थ्यस्यातियत्नसाध्यतया बहवो मनुष्या मिश्रभावानां मिश्रविज्ञानस्य स्वात्मस्वेवं याथार्थ्येन नियमनादुपरमितव्यमिति चिन्तयिष्यन्ति । परं त्वेवमपि यावदेतन्न क्रियते तावच्चैतदाश्चर्यकरं यत्तेषां मनःसु भूयिष्ठं गूढत्वं वैसंकुल्यं च भवतः, परैः सह तेषां संभाषणे च महाननर्थकः प्रलापश्च संभवतीति त्ववश्यं वक्तव्यमेव ॥

१० ॥ किं च तानि द्रव्यानुरूपाणि विविक्तानि चावश्यं भवेयुः ॥—द्रव्यवाचकनामसु पदानामुचितप्रयोगाय विज्ञानानां नियतत्वमपेक्ष्य किं चिदधिकमपेक्ष्यते । एषु नामभिः सत्तया ऽपि पदार्थस्वरूपैर्भवितव्यम् । परं तु क्रमश एनं विषयं यथावसरं विस्तरेण वर्णयिष्यामि । शास्त्रीयतत्त्वजिज्ञासासु तत्त्वविषयकेषु वादेषु चेदं यथार्थग्रहणं सर्वथा ऽऽवश्यकमेव । यद्यपि च साधारणसंवादेषु लौकिकव्यवहारेष्वप्येतस्य प्रचारः साधु भविष्यति, तथापि, मन्ये, नैतदाशासनीयम् । लौकिकानां ज्ञानानि लौकिकसंवादानुसारीणि भवन्ति, किं च तयोरुभयोः कामं विसंकुलत्वे ऽपि आपणिकादिसमाजकार्याणि साधु निर्वाहयन्ति । वणिजः कामुकाः पाचकाः सीवकादयश्च, स्वस्वव्यावहारिककार्यनिर्वाहकान् शब्दान् जानन्ति । एवमेव च मन्ये, शास्त्रिणो वादिनो ऽपि यदि स्वस्य परेषां च सुव्यक्तबोधनं विवक्षेयुस्तर्हि ते ऽपि जानीयुरिति ॥

११ ॥ तृतीयत, औचित्यम् । [शिष्टव्यवहारानुसरणम्] ॥—तृतीयतः स्वप्रयुक्तपदबोध्यविज्ञानानि नियतान्येव मनुष्या अवधारयन्तीत्येतावन्मात्रेणापि न कार्यसिद्धिरपि तु लोकव्यवहारे यद्बोधाय तानि तानि पदानि प्रयुज्यन्ते तत्सजातीयानां तदभिन्नानां वा बोधायैव पदानां प्रयोगायापि मनुष्यैरवश्यं सावधानैर्भवितव्यम् । यतः शब्दानां विशेषतश्च पूर्वरचितभाषीयशब्दानामेकैकव्यक्तिमात्रज्ञेयत्वाभावादपि तु वणिग्व्यवहारलौकिकसंभाषणयोः साधारणपरिच्छेदकतया केनापि स्वेच्छया लोकव्यवहृतप्रतिमानस्य परिवर्तनं न कर्तुं युज्यते नापि तत्तत्पदसंबद्धानि विज्ञानानि परिवर्तयितुं शक्यन्ते । अथ वा अन्ततो यद्येवं करणस्यावश्यकता तदा ऽवश्यं तेन परान् प्रति तज्ज्ञापनीयम् । संभाषणे मनुष्यस्य तात्पर्याणि ज्ञेयानि भवितुमर्हन्ति ज्ञातानि वा सन्त्येव । इदं च मनुष्यतात्पर्यावधारणं यत्र मनुष्यैर्लोकव्यवहारानुसरणं न क्रियते तत्र ऋते पुनः पुनर्विवरणाद्, जिज्ञासाभ्यः, क्लेशकराक्षेपादीनां करणाच्च न कथमपि भवितुमर्हति । भाषाया औचित्यं च महता सौकर्येण परान् प्रति वक्तृतात्पर्यसंदेशपथायकं साधनमत एव च तत्रास्माकमवधानमभ्यासश्चापेक्ष्येते विशेषतश्च नीतिशास्त्रधर्मशास्त्रग्रटकेषु शब्देषु । शब्दानां यथोचितप्रयोग उचितार्थश्च तेभ्यो ऽभ्यसनीयौ येषां लेखेषु भाषणेषु च सुस्पष्टतमविज्ञानत्वं प्रतीयते ये च तेषु विज्ञानेषु स्वीयान् शब्दान् योग्यतया ऽन्यूनानतिप्रसक्तरूपेण च प्रयुञ्जते । अस्य भाषाया औचित्यानुसारेण पदानां प्रयोगस्य सर्वदा ऽर्थबोधकत्वरूपफलोपधायकत्वाभावे ऽपि प्रायशः स्वीयेषु संभाषणेषु यथोचितपदप्रयोगं कुर्वन्नेवंकरणचतुरस्य मनुष्यस्य तदज्ञानदोषात् परिरक्षितो भवति ॥

१२ ॥ चतुर्थतः, तेषामर्थस्य ज्ञापनम् ॥—चतुर्थतो यतो लोकव्यवहारो नैवं सावात्म्यमर्थं पदैः सह योजयति येन मनुष्याः कस्मिंश्चदपि याथार्थ्येन पदानि प्रयोक्ष्यानीति सर्वदा निश्चिनुयुः । किं च यतो मनुष्याः स्वज्ञानपरिष्काराय प्रायिकलोकव्यवहृतविज्ञानेभ्यो भिन्नान्येवाकलयन्ति । तदर्थं चाप्रामाण्यदोषशङ्कया विरलमेव परिगृहीतान् नवीनान्

शब्दान् रचयन्ति, नवीनार्थतात्पर्येण प्राचीनमेव वा पदं प्रयुञ्जते । अतः पूर्वोक्तनियमेषु परीक्षितेषु सत्सु पदानामर्थस्य ज्ञापनाय पदस्यार्थं निश्चेतुं कुत्र चिदिदमस्त्यावश्यकं यत्र लोकव्यवहारे ऽपि नियतो ऽर्थो न भवति यथा भूयःस्वत्यन्तमिश्रविज्ञाननामसु यत्र वा पदस्यैव विवादकारणतया विवादस्य मुख्ये विषये संदेहो भ्रमो वा भवति ॥

१३ ॥ अर्थज्ञापनं च त्रिधा ॥–पदप्रतिपाद्यविज्ञानानां नानाजातीयकत्वेनावसरविशेषे पदाभिधेयविज्ञानानां ज्ञापनप्रकारोऽपि भिद्यते । अतो यद्यपि पदानामुचितार्थस्य ज्ञापनाय लक्षणकरणमिति युक्तः पन्थास्तथापि लक्षणनिर्वाच्ययथार्थार्थकानामपि पदानां सत्त्वात्कानि चित्पदानि नैव लक्षितानि भविष्यन्ति । किं चैभ्यो द्विविधेभ्यो ऽपि पदेभ्यो भिन्नप्रकाराण्यपि शुद्धविज्ञानानां भावानां द्रव्याणां च नामानि कुत्र चिदुपलप्स्यन्ते ॥

१४ ॥ (१) शुद्धविज्ञानेषु पर्यायशब्दैः प्रदर्शनेन वा ॥–प्रथमतः शुद्धविज्ञाननाम्नः प्रयोगं यदा मनुष्यस्तेषां विज्ञानानामबोध्यतां पश्यंस्तेषु संदेहस्य शङ्कया वा करोति तदा भाषाफलनियमानुरोधेन विवशो भूत्वा स्वतात्पर्यप्रकाशनाय स्वोच्चारितपदबोध्यविज्ञानज्ञापनाय च प्रवर्तते । उक्तदिशा लक्षणकरणेनेदं संपादयितुं शक्यते, ऽतश्च यदा पर्यायशब्देनैतत्कर्तुं न शक्यते तदा एषामेक एव प्रकारो ऽवशिष्यते । तत्र प्रथमं, यस्मिंस्तच्छुद्धविज्ञानमुपलभ्यते तद्द्रव्यस्य नाम तन्नाम्नो ऽर्थं प्रत्याययिष्यति तान् प्रति ये तद्द्रव्यं तत्पदाभिधेयत्वेन जानन्ति । इत्थं च कं चिन्नागरिकं प्रति 'फ्युइल्मार्ट' इतिपदाभिधेयवर्णविशेषज्ञापनाय वर्षाकाले पतिष्णूनां शुष्कपत्राणां वर्ण इत्येतावत्कथनमेवालं भविष्यति । द्वितीयतः कस्यापि शुद्धविज्ञानार्थस्य ज्ञापनस्य नियतः प्रकारस्तद्विज्ञानोपस्थापकतद्विषयप्रदर्शनेन तत्पदप्रतिपाद्यविज्ञानस्य वस्तुतः श्रोत्रात्मनि प्रत्यायनमेव ॥

॥ शेषो ऽग्रे भविता ॥

अथ संस्कृतसमाजाभिधसभावृत्तान्तवर्णनम् ।

अथ ज्येष्ठकृष्णप्रतिपदि संस्कृतसमाजनाम्न्यां सभायां वृत्तायाः कथाया वर्णनम् । तत्र प्रथमं गङ्गाधरशास्त्री वैज्ञानिकमतमित्थमुपन्यस्यति स्म । विज्ञानमेवैकं तत्त्वमिति वैज्ञानिकास्तदित्थम् । रज्जुसर्पमरुमरीचिका, गंधर्वनगर, स्वाप्निकगजारोहणादिज्ञानानि ऋते विषयेभ्यो ज्ञानबहिर्भूतेभ्यो यथा स्वरसमनुभवमधिरोहन्ति, तथैतानि घटपटादिविषयकज्ञानानि स्वात्मकं तंतं विषयमवगाहमानानि न बाह्यविषयसत्त्वोपष्टम्भलब्धजीवनानि यश्चासौ घटज्ञानात् पटज्ञानं विभिन्नमिति विषयवैचित्र्यपक्षपातो ज्ञानानां सोपि स्वात्मकविषयवैचित्र्यनिबन्धेन ज्ञात एवेति नातिरिक्तबाह्यविषयसत्तां प्रमापयति न कां चन वैचित्रीमकल्पयतो भवतोपि बाह्यविषयवैचित्र्यमात्रादेव ज्ञानवैचित्र्यनिर्वाहः । ज्ञानवैचित्र्येण विषयवैचित्र्य विषयवैचित्र्येण वैचित्र्यं ज्ञानस्येति स्पष्टमितरेतराश्रयात् ॥ तस्मान्न बाह्यविषयाभ्युपगमो ज्ञानवैचित्र्यं निर्वहति । किंतु ज्ञानस्यैवायमतिशयो यत् ज्ञानं स्वात्मनैव ज्ञानान्तरेभ्यः स्वात्मानं विमोचयत् विषयविषयिभावावगाहि वर्तत इति । अन्वग्राहि चैष पक्षः प्राच्यैः ॥ सहोपलम्भनियमादभेदो नीलतद्धियोरिति । नहि नीलस्य प्रत्ययमन्तरेण आत्मानं प्रत्ययो वा नीलमन्तरेणात्मानं प्रतिलभत इति हि तदर्थः ॥ यश्च आशामोदकानि नापनयन्ति क्षुधं वैज्ञानिकों परं तु आपणवीथिकास्थान्येवेत्यधिक्षेपः सोप्यसावधस्ताद्दत्ताञ्जलिरिति सुखितमास्महे इति शम् ॥ ततो राममिश्रशास्त्री ।

तदेतत्तार्किकेभ्यो न रोचते ॥ योयं मरुमरीचिकादिदृष्टान्तावष्टम्भवशादेष्टव्यो बाह्यविषयोपप्लवः सोयं मरुमरीचिकाप्रत्ययानामभ्रान्तत्वे सति स्याद् प्रमात्मकज्ञानस्यैव साधनबाधनक्षमतायाः सर्वतैर्थिकसिद्धान्तसिद्धत्वात् । नच बाह्यविषयानसहिष्णुनापि भवता मरुमरीचिकादिप्रत्ययप्रामाण्यमभ्युपेयं तथा सति ज्ञानानां भ्रमप्रमादिव्यवहारनिबन्धनसकम्पनिष्कम्पप्रवृत्त्युपधायकत्वानुपपत्तेः । तस्मान्मरुमरीचिकादि-

Digitized by Google

दृष्टान्तप्रतीतीनां भ्रमात्मकतया न बाह्यविषयमोषोपष्टम्भभावोपि यच्च न कांचन ज्ञानवैचित्रीमप्रकल्प्य बाह्यविषयचित्र्यमात्रेण ज्ञानवैचित्र्यनिर्वाहः । ज्ञानवैचित्र्येण विषयवैचित्र्यं विषयवैचित्र्येण च ज्ञानस्येति स्पष्टमितरेतराश्रयादित्युक्तं तदपि विषयानवधाननिबन्धनम् । ज्ञानं हि द्व्यात्मकतया स्वात्मानं लभते विषयात्मना तद्विषयविषयात्मना चेति सर्वानुभवसिद्धम् । तथा च विचित्रभावेनावस्थितविषयविषयकत्वेन ज्ञानवैचित्र्यं विषयवैचित्र्यं तु स्वत एव विषयवैचित्र्यं किंज्ञाप्यमिति जिज्ञासायां तु ज्ञानान्तरज्ञाप्यमेवेत्युत्तरं न तावता भवदुक्तान्योन्याश्रयावकाशः यतो ज्ञानं विषयं परिच्छिन्दत् आत्मानमश्नुते विषयस्तु न तथेति सिद्धान्तात् ॥ यच्च सहोपलम्भनियमादित्युक्तं तदसाधकं विपक्षबाधकतर्कशून्यत्वात् । विभिन्नत्वेनाभिमतयोरपि घटपटयोर्घटपटाविति समूहालम्बने सहोपलम्भात् किंच यदि स्युरबाह्या विषयास्तदा गृहे विनिर्णीतघटः पुमान् गेहे घटाभावकालेपि घटमासादयेत् नासादयेच्च समुत्पन्नविपरीतधीर्घटवत्यपि घटम् ॥ किंच तस्यादालयविज्ञानं यन्नीलादिकमुल्लिखेत् । तस्यात्प्रवृत्तिविज्ञानं यद्वेदहमास्पदम्, इति भवन्मतेपि प्रवृत्तिविज्ञानालयविज्ञानयोर्नीलाद्युल्लेखित्वानुल्लेखित्वाभ्यामेव विशेषो गृहीतव्यः इति स्वानुभवमतिरोधाय परिच्छिनत्तु भवानेव विषयविशेषमपरिच्छिद्य ज्ञानं न स्वात्मानं लभतइति किंच अनवधृताज्ञानसंशयविपर्यासस्य ते कथं कथायां प्रवेशः परकीयास्ते त्वया दुरवधारणाः परपुंवृत्तिस्वरूपत्वात् तेषां परबुद्धेश्चासाक्षात्कारात् इति ॥

ततो गङ्गाधरशास्त्री । अत्रायं वैज्ञानिकानामाक्षेपनिक्षेपः ॥ न तावन्मरुमरीचिकादिदृष्टान्तानां भ्रमत्वात्साधनाक्षमत्वं सुवचम् ॥ तेषां भ्रमत्वस्यैवासिद्धेः ॥ तथा हि ॥ बाह्यविषयसिद्धेरुत्तरमेव हि जलाद्यभाववति जलादिप्रकारताकतया तेषां भ्रमत्वं वाच्यं नान्यथा ॥ विज्ञानस्यैवैकस्यास्मन्मतेऽङ्गीकारेण सर्वत्रैव घटादिविरहस्य सत्तया सर्वेषामेव ज्ञानानां भ्रमत्वप्रसक्तेर्भवन्मतसिद्धभ्रमलक्षणस्य तैरनङ्गीकारात् ॥ प्रत्युत भ्रमात्मकज्ञानमेव तैर्नाङ्गीक्रियते भ्रमत्वप्रमात्वविभागस्यैव शशविषाणायमानत्वात् ॥

Digitized by Google

न चैवं सति सकम्पनिष्कम्पप्रवृत्त्याद्युपपत्तिर्न स्यादिति शङ्कनीयम् ॥ भवन्मतेऽपि वस्तुतो भ्रान्तस्य तत्र भ्रान्तिमननुव्यवस्यतस्तत्र निष्कम्पप्रवृत्तेरानुभाविकतया वस्तुतो भ्रमे प्रवृत्तिजनकत्वाभावस्यैवमेव वस्तुतः प्रमायाम्प्रवृत्तिजनकत्वस्य चासिद्धेः ॥ अपि तु तत्र भ्रान्तताम्प्रमातृताञ्च गृह्णत एव पुरुषस्य तादृशप्रवृत्त्यादिदर्शनेन भ्रान्तिज्ञानत्वतदभावयोरेव निष्कम्पप्रवृत्त्यादिजनकतायाः सर्वमते सिद्धतयाऽस्मन्मतेऽपि विज्ञाने भ्रमत्वाख्यवैलक्षण्यग्रहे प्रवृत्त्यभावस्य तदभावे च प्रवृत्तेरुपपत्तेः ॥ तादृशवैलक्षण्यग्रहश्च भवन्मतेऽपि तद्वति तत्प्रकारकत्वग्रहप्रयोजकीभूतया प्रत्यक्षादिसामग्र्या प्रयोज्य इति मन्मतेऽपि तुल्यमेव ॥ अपि च विज्ञानवैचित्र्यस्य विषयवैचित्र्यनिबन्धनत्ववादे विषयवैचित्र्यस्य ज्ञानवैचित्र्यनिबन्धनत्वस्यैव वाच्यतयाऽन्योन्याश्रयः ॥ यत्तु ज्ञानं द्व्यात्मकतयाऽत्मानं लभते विषयात्मना तद्विषयविषय्यात्मना चेति विषयवैचित्र्यनिबन्धनमेव ज्ञानवैचित्र्यं विषयवैचित्र्यं तु स्वतः सिद्धमेव ज्ञानान्तरज्ञाप्यवैचित्र्यवदिति चाभिदधुस्तद्वैज्ञानिकवादस्य विज्ञानातिरिक्तवस्त्वभाववादरूपतया विज्ञाने द्व्यात्मकत्वस्यैवासिद्धेः पराहतम् ॥ विषयवैचित्र्यस्य स्वतः सिद्धत्वं त्वाशामात्रमेव ॥ एवं सति तार्किकमते पञ्चमपदार्थस्य विशेषस्यासिद्धेः ॥ घटपटयोर्भेदोपपादनाय तदारम्भकभेदोपपादनक्रमेण तदन्त्यारम्भकभेदोपपादनाय हि विशेषा आश्रीयन्ते । तद्विषयस्य स्वतःसिद्धवैचित्र्याङ्गीकारेऽन्ते रण्डाविवाहन्यायायितमेव ॥ ज्ञानान्तरज्ञाप्यत्वं तु पुनस्तज्ज्ञानवैचित्र्यसापेक्षमेवेति पूर्वप्रदर्शितन्यायेनैव ज्ञान एव स्वतस्सिद्धं वैचित्र्यं किमिति नाश्रयेः ॥ आवश्यकमेव प्रत्युत तवैव विषयवैचित्र्याप्रयोज्यमेव ज्ञाने स्वतःसिद्धं वैचित्र्यं स्वप्नभ्रमदशाविज्ञानवैचित्र्योपपादनस्यावश्यकत्वात् ॥ यदपि सहोपलम्भनियमादभेदो नीलतद्धियोरित्यस्य निराकरणं विपक्षबाधकतर्कशून्यत्वात्समूहालम्बनज्ञाने घटपटयोः सहोपलम्भेऽपि भेदस्य सर्वैरङ्गीकारेण व्यभिचाराच्चेत्यूचुस्तन्नियमपदाननुसन्धानमूलकमिति विशदमेव ॥ अवयव्युपलम्भस्य मतान्तरे तार्किकमते च धान्यराश्युपलम्भस्यावयवधान्योपलम्भव्याप्योपलब्धिरूपतया तदभेदस्य स्वीकारेणान्वयव्यतिरेकाभावादीनां

प्रत्येकोपलम्भाभावेनाभेदाभावस्य स्वीकारेण व्यतिरेकव्याप्तेश्च सुलभतया तेन भेदस्यैव साधनं स्यादिति सम्भावनाया अपि दूरोत्सारितत्वात् ॥ घटपटयोः क्व चिदेकोपलब्धिविषयत्वेऽपि स्वविषयकत्वव्यापकविषयकत्वस्य घटादावभावेन घटाभेदापादनस्य पटेऽशक्यत्वाच्च । नियमपदेन व्याप्तेरेवाभिधानात् । अत एव ज्ञानत्वावच्छेदेन स्वविषयकत्वविवक्षयो कस्यापि तथाविधव्यापकविषयताया अभावेन स्वाभिमतासिद्धेर्यत्किञ्चिज्ज्ञाने स्वविषयतायाः स्वीकारे प्रागुक्तसमूहालम्बनात्मकज्ञानविषयताया घटादौ सत्त्वादभेदापत्तिरिति न ॥ स्वविषयकत्वव्यापकविषयताकत्वसम्बन्धेन स्ववैशिष्ट्यस्यैव स्वाभेदनियामकत्वाभ्युपगमात् ॥ न च ययोरुत्पन्नविनष्टघटयोरङ्कुरयोर्वा सहैव ज्ञानमजनि तयोरैक्यापत्तिरिति वाच्यम् ॥ तादृशयोरप्रसिद्धेरैक्येऽपि दोषाभावाच्च ॥ अङ्कुरान्तरग्रहप्रतिबन्धकसामग्रीसत्त्वे तत्स्थले जिघृक्षिताङ्कुरग्राहकसामग्रीसमनैयत्येन तस्या अङ्कुरान्तरग्राहकत्वसत्तया समूहालम्बननैयत्यविघटकत्वेन भेदस्य सुवचत्वाच्च ॥ एवं बाह्यविषयानभ्युपगमवादे गेहे विनिर्णीतघटः पुमान्घटाभावकालेऽपि घटमासादयेन्नासादयेच्च घटसत्तादशायामपि घटाभावं निश्चिन्वन्नस्त्विति दूषणमपि न ॥ त्वन्मतेऽपि घटं निश्चिन्वतो गेहे घटेन्द्रियसंयोगसमनन्तरमेव तदुपलब्धिरिष्टा विशेषणतया भुवि घटाभावग्रहतश्च तदभावानुव्यवसायः न तु केवलं वस्तुतो घटसत्तायास्तदभावसत्तायाश्च तत्तद्ग्रहप्रयोजकत्वम् ॥ तथैव मन्मते घटात्मकविज्ञानवतोऽपि गृहघटात्मकविज्ञानेन्द्रियात्मकविज्ञानयोस्सम्बन्धस्यैव तत्प्राप्तिप्रयोजकताया अभ्युपगमेन तत्र वैचित्र्येणैव घटात्मकविज्ञानानुदयात्तदिन्द्रियस्यासम्बन्धेन तत्प्राप्तेरनापत्तेः ॥ अयमेव किल विज्ञानवादिनां त्वन्मताद्विशेषः ॥ यद्भवान् प्रत्यक्षादिगोचरवस्तुजातस्य वास्तविकीं सत्तामभ्युपैति ॥ स च त्वन्मते रज्जुसत्तादशायां सर्पस्येव सर्वस्याप्यवास्तविकीं विज्ञानस्यैवानादिव्यवहारगोचरीभूतानेकतत्तद्रूपेण वास्तविकीं सत्ताम् ॥ नैतावता क्वचिदपि व्यवहारेऽतिप्रसङ्गोऽप्रसङ्गो वा ॥ एवमेव किल वेदान्तिनोऽप्यपर्यनुयोज्या भवन्ति ॥ अत एव तस्यात्मवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेदिति नीलाद्युल्लेखित्वस्य

Digitized by Google

तथा स्वीकारेऽपि न विज्ञानातिरिक्तवस्तुसत्ताभ्युपगमो भवति पारमार्थिकव्यावहारिकत्वाभ्यां विविक्तविषयत्वात् ॥ एवञ्चानवधृताज्ञानविपर्ययस्य ते कथङ्कथायां प्रवेशः प्रावृत्तेरसत्त्वादितिप्रभृति सर्वमेव विचार्यमाणं स्वतो विशीर्यते व्यवहारदशायां व्याप्त्यादिग्रहस्य साध्यादिनिश्चयस्य प्रत्यक्षाद्याहेतस्य तवैव तादृशसामर्थ्यबलान्ममापि तादृशसामर्थ्यात्मकविज्ञानबलादेवोपपत्तेस्त्वदपेक्षया व्यवहारे विसंवादाभावादिति कृतमवस्तुनेति ॥

ततो राममिश्रशास्त्री किंच बाह्यविषयसत्तामनभ्युपेत्य तृष्णात्मकस्वीयज्ञानेन स्वीयज्ञानात्मकस्वीयपानात्मकज्ञानेनोपशमननिर्वाहेऽपि प्रकुपितविद्वेषस्य विमूर्छितपुंसः संजीविनी पुनः किंचित्करी स्यात् अचेतयमानस्य तस्य स्वीयज्ञानात्मकसंजीवन्या विरहसत्त्वात् स्थिरायाश्च बाह्यभूतसंजीवन्याश्चानभ्युपगमात् ॥ न च स्वीयज्ञानविरहेऽपि जीवतो ज्ञानात्मकप्रदानाद्यभिज्ञज्ञानात्मकसंजीवन्या उपकारकत्वमिति सांप्रतम् ॥ अन्यदीयज्ञानात्मकस्य वस्तुनोऽन्यदीयोपकारकारित्वे चैत्रीयज्ञानात्मकाशनेन मैत्रस्य तृप्तिरिति साधुरिति समर्थितः कार्यकारणभावः ॥ किंच ज्ञानाभावकालेऽपि अनुव्यवसेत् न व्यवस्येच्च ज्ञानान्तरमपि अनुव्यवसायात्मकज्ञानस्य स्वविषयीभूतव्यवसायसत्तानिरपेक्षत्वात् यदि च ज्ञानात्मकज्ञानज्ञानात्मकात्मनोऽज्ञानात्मकः संनिकर्षोऽनुव्यवसायसन्निकर्षस्य तदभावमिति सूक्ष्ममप्यालोकयसे अङ्ग तर्हि विषयसत्त्वात्मीययोर्निरूपकात्मनोः संनिकर्षतदभावयोरनुव्यवसायतदभावनियामकयोः कोऽयं विषयसत्तया सहानुगमननियमः कदाचिदनुव्यवसायतदभावौ तावदनिपतेतां विषयसत्तामिति किं न स्यात् किं च सहोपलम्भनियमेन सिद्धोऽयमितीयमभेदः पारमार्थिक उतापारमार्थिकः पारमार्थिकत्वे नास्मदुक्तिः पारमार्थिकत्वं हि ते स्वीयज्ञानानतिरिक्तात्मकत्वं तच्च ममापि त्वदीयज्ञानेऽभीष्टम् । स्वस्मिन्स्वतादात्म्यात् वस्तुवतोऽस्मद्भिप्रेतस्य भेदस्य च त्वदीयज्ञानानतिरिक्तात्मना अभेदशतकेनाप्यपलापितुमशक्यत्वात् अन्यथा चैत्रीयज्ञानात्मकेन भेदेन अभेदसिद्धिप्रतिरोधं त्वमपि कस्मान्नाभ्युपगच्छेः । न द्वितीयः, अभेदस्य अपारमार्थिकत्वे हि ज्ञाना-

तिरिक्तात्मकत्वम् तच्चास्माकम् इष्टं न तव इति फलितं नः प्रयासकुसुमेन, किं चानुमितेः प्राक् साध्यप्रमित्याश्चाधुनिकवेदान्तिकमतप्रवर्तकदूषणानि चोपयुक्तानि सिद्धेरपि न सुकरत्वादिदूषणशतकं प्रमाणशास्त्रकुशलैः स्वयमूह्यन्त एवेति कृतं वाचां विस्तरैरिति शम् ॥

अथ भाद्रपदकृष्णप्रतिपदि नियतसमये श्रीयुतबाबूप्रमदादासमित्रमहाशयमन्दिरे संस्कृतसमाजनाम्नी सभोपातिष्ठत तत्रभवतामध्यक्षवराणां कतिपयसभासदां च कार्यवशात्तत्रानुपस्थानादतीतसभावृत्तान्तालेखनाच्च समुपस्थिताः सभ्याः सभाकृत्यमारब्धुं किंचिदनिच्छव इव प्रत्यैयन्त । परं तु वन्ध्यं दिनं मा भूदिति धिया सभाप्रोत्साहकेन प्रेरितः केशवशास्त्री पूर्वसभाप्रक्रान्तःबाध्यक्षवरैः सम्यक् प्रतिपादितेऽपि वेदान्तविषये पुनः सन्दिहानः इदमाह । तद्यथा । यद्यपि स्वाप्निकविषयाणां जागर्तौ जागरविषयाणां च स्वप्ने तयोः पुनः सुषुप्तौ तस्याश्च स्वप्नजागरणयोर्बाधितत्वाद्बाधितस्य च मिथ्यात्वाद्विषयमात्रस्य मिथ्यात्वेन ज्ञानभेदकाभावाज्ज्ञानघनैकब्रह्मण एवावशेषादद्वैतं सिध्यति तथापि ब्रह्मप्रतिबिम्बभूतानां जीवानां स्वगतभूतपूर्वसुखदुःखादिभोक्तृत्वभ्रमस्मरणाद्ब्रह्मणश्च तदभावाद्बिम्बप्रतिबिम्बभावाच्च तयोर्वैधर्म्येण द्वैतमापद्यते ॥

ततो कुण्ठिराजशास्त्री, व्यावहारिकसत्तादशायां युगपत्सुखदुःखादिभोगवैचित्र्यं तदुपभोक्त्रानन्त्यसद्भावमन्तरा न घटत इत्यनन्तास्सुखदुःखादिभोक्तारः कल्प्यन्ते । ते च जीवापरपर्याया ब्रह्मप्रतिबिम्बान्येव । पारमार्थिकसत्तादशायां तु तदुपभोग्यानां सुखदुःखादीनां मिथ्यात्वाद्भोगासिद्धौ चिदेकमयानां जीवानां ब्रह्मसारूप्यान्निराबाधमेवाद्वैतमित्यवोचत् ।

ततः केशवशास्त्री—पारमार्थिकसत्तादशायां विषयाणामिव तदुपभोगस्य तदुपलब्धेर्वाऽलीकत्वेऽपि कथं नाम जीवा भूतपूर्वमात्मभ्रममनुस्मरन्तो ब्रह्मणो न विभिद्येरन्नित्यभ्यधात् ।

ततः सभाप्रोत्साहकः—नूनं घटपटादिविषयाणां परमार्थेऽलीकत्वेऽपि न तदनुभवस्मृतेरलीकत्वं शक्यते वक्तुम् । नहि कश्चित्स्वप्नादावनु-

भूतानां विषयाणां जागरे मिथ्यात्वेऽपि तदनुभवस्मृतिमपलपति । तथा-चात्ममोहस्तृष्णां जीवानां भ्रमकल्पनाशून्येन ब्रह्मणा सहाभेदो दुरुपपाद इव प्रतीयते । तत्रेदमुच्यते । न तावज्जीवब्रह्मणोर्बिम्बप्रतिबिम्बभावो मुखादर्शमुखादिलौकिकपदार्थसदृशो येन तयोर्भेद आपद्येत किं तु भास्वराणां सूर्यादीनां जलादावुपसंक्रान्तानां किरणानां च बिम्बप्रतिबिम्बभावेन सदृश एव विवक्ष्यते । यथा जलादिगतं सूर्यप्रतिबिम्बं साक्षात्सूर्यनिर्गतकिरणपुञ्जात्मकमेवेति न ततो विभिद्यते तथा विभोः परमात्मनोऽन्तःकरणावस्थिता जीवाभिधा अंशास्ततोऽभिन्ना एव परं स्वेन परमात्मनोऽभिन्ना अपि जीवा उपाधिसंबन्धात् ततो भिद्यन्ते । अत एव तेषां सुखदुःखादिसंबन्धः । यथा सूर्यादभिन्ना अपि किरणास्ततो निर्गच्छन्तो जलमुपसंक्रम्य सूर्याद्विद्यमानाः सन्तो जलकम्पादिमन्तः सौरदाहकशक्तिशून्याश्च भवन्ति । तथा च द्वैतापत्तिरित्युच्यते चेद्व्यावहारिकदशायामिष्टैव सेत्यवादीत् ।

ततः शिवकुमारमिश्रः—नहि जीवात्मनि युगपदेव परमात्मभेदाऽभेदयोः संभवतः । विरुद्धधर्मयोरसामानाधिकरण्यनियमात् तथा चात्माभिन्न एव जीव उपाधिवशाद्भिन्न इव भासत इति वक्तव्यम् न तु कथमपि ततो भिद्यत इति । यथा सूर्यात्मापि सूर्यकरस्ततो भिन्न इव भासते न तु वस्तुतस्तथाभूतो भवति किरणपुञ्जात्मकत्वाद्धि सूर्यस्येत्याह ।

ततः सभाप्रोत्साहकः—सूर्यस्य किरणपुञ्जात्मकत्वं तु न तावत्परीक्षया सिध्यति । तस्य तथात्वे हि किरणधाराप्रवाहानुवृत्तौ सततं प्रवर्तमानायामनन्तानन्तकालादूर्ध्वं किरणानां निःशेषतायां सूर्यस्यैव विलयापत्तेः ।

ततः केशवशास्त्री—किमिति धूमस्येव किरणानां निस्सरणानुवृत्तिरनुमन्यते । ते च दीपशिखाकिरणा इव सदा प्रसृता एवावतिष्ठन्ते । तेषां क्रमिकोदयादिकं तु तद्व्यवधायकमिहिकाद्यपगमादिक्रमाश्रितं बोध्यं तथा च सूर्यस्य किरणपुञ्जात्मकत्वेपि न क्षतिरित्याब्रवीत् ।

अत्रान्तरे सन्ध्यावन्दनसमयमुपस्थितं दृष्ट्वा प्रक्रान्तं विषयं सभान्तरे विविचारयिषन्तस्सर्वे सभ्याः सभां व्यसृजन् ॥

अथ कार्तिककृष्णप्रतिपदि नियतसमये सभाप्रोत्साहकानां श्रीयुतबाबूप्रमदादासमित्रमहाशयानामालये संस्कृतसमाजनाम्नी सभोपातिष्ठत । तत्रभवन्तावुभावपि सभाध्यक्षौ कतिपये सभासदश्च कार्यान्तरव्याक्षेपेनामपि सभामसभाजयन् । अवशिष्टानां च सभ्यानां कतिपयेष्वागतेष्वपरेष्वागमिष्यत्स्वेव सत्सु नियतसभाकृत्यारम्भात् प्राक् सभाप्रोत्साहको महाशय ईश्वरसर्वज्ञतास्वीकारे समर्पितप्रायानां निखिलदोषाभासानां निरासायावसरैः पूर्वतरसभायां सम्यक् प्रतिपादितेनानिर्वचनीयत्ववादेनैवतत्तुष्टद्रवेदमाह । तद्यथा । परमेश्वरस्य सर्वज्ञतया नित्यज्ञानवत्तयैव च सकलाभीष्टसिद्धावत्रा ऽनिर्वचनीयत्वसमाश्रयणमनावश्यकमिव प्रतीयते । यतो हि नित्यज्ञानवानीश्वर इति निश्चिन्वानस्य पुंसः स्वकार्यसिसाधयिषया कथं प्रवृत्तिरित्याद्याक्षेपा ईश्वरस्य सर्वज्ञतया तादृशप्रवृत्तेरपि तज्ज्ञानगोचरत्वेनाऽवश्यंभावात्परास्ता एव । अन्यथेश्वरसर्वज्ञताया एव हानिप्रसङ्गात् । नन्वेवं तर्हि किं नित्यज्ञानवानीश्वर इति निश्चिन्वन् पुमानकिञ्चिदपि बलादीश्वरज्ञानगोचरत्वमात्रेणैव व्यापारविशेषान् कार्यत इति चेत् प्रवृत्तिकारणीभूतेच्छादीनामपि भगवज्ज्ञानविषयत्वेनावश्यंभावादनिच्छापूर्वकप्रवृत्तिकल्पने मानाभावात् यत्र च ज्योतिष्टोमादीन् विदधतोऽपि पुरुषस्येष्टसिद्धिर्न दृश्यते यत्र वा तानविदधतोऽपि पुरुषान्तरस्य सा दृश्यते तत्र भगवज्ज्ञाने दृष्टसिद्ध्यननुगतस्यैव पुरुषविशेषकर्तृकज्योतिष्टोमादेरज्योतिष्टोमपूर्वकपुरुषान्तरेष्टसिद्धेर्वा कल्पने न कोऽपि दोषावकाश इति विनैवानिर्वचनीयत्ववादाश्रयणं सर्वं सूपपद्यतइति ।

केशवशास्त्री—भगवज्ज्ञानगोचरत्वागोचरत्वाभ्यामेव सकलप्रवृत्तिनिवृत्त्युपपत्तौ सर्वेषां वेदोक्तविधीनां वैयर्थ्यं प्रसज्येत । न तावत्सिद्धस्यैवार्थस्य प्रवर्तने वेदः प्रवर्तते । तस्यापूर्वविधायकत्वस्यैव सर्वसम्मतत्वात् । किं चास्मिन् पक्षे सकलजनोद्देशेनेष्टसिद्ध्युपायोपदेष्टृत्वं चास्य न संभवति । यत्कर्तृकाग्निष्टोमादेरीश्वरज्ञातत्वं तदुपदिदिक्षयैव तस्य प्रवृत्तत्वात् । तस्य जनान्तरोपदेशकत्वे फलाभावात् । एवं च वेदोक्तविधीनां सार्थकत्वं सार्वज्ञ्यं चेश्वरस्योपगच्छतामस्माकमनिर्वचनीयतावाद एव शरण्योऽस्तीत्यवोचत् ।

प्रमदादासमित्रमहाशयः—किं भो वेदस्यैवाभावे कथं नाम जनाः स्वाभीष्टार्थसिद्ध्युपायान् जानीयुः कथं च तेषु तेषु कर्मसु तेषां प्रवृत्तिः स्यात् इति जनैरश्रुतपूर्वाणामीश्वरज्ञातानां च विधीनां प्रदर्शकस्य वेदस्य न कथमपि वैयर्थ्यमुद्भावयितुं शक्यते। यच्चोच्यते सकलजनोद्देशेनेष्टसिद्ध्युपायोपदेष्टृत्वमस्य न संभवतीति तदप्ययुक्तम्। न खलु सकलसस्यादिहेतोरार्द्रीकरणाय प्रवृत्ता वृष्टिः फलाभावात्समुद्रे न पततीति शक्यते कल्पयितुम्। तथा च सकलजनोपकाराय निष्पक्षपातं प्रवृत्तो भगवद्वाक्यकल्पो वेद ईश्वरसंमतत्वात्सकलमानवव्यक्तीरविशेषेणोद्दिश्य प्रवर्तते तदुक्तविध्यनुष्ठानादिकं तु स्वस्वादृष्टानुसारतः कतिपय एव जना अनुतिष्ठन्तीति युष्माकमपि स्वीकार्यमेवेत्याह।

अत्रान्तरे सर्वान् प्रतीक्षितान्सभ्यानुपस्थितान् दृष्ट्वा श्रीयुतपण्डितवामनाचार्यं च तद्दिनसभाध्यक्षत्वेन वृत्वा तदनुमत्योपसंपादकः केशवशास्त्री पूर्वसभावृत्तान्तं यथावदवाचयत्। तदनु पूर्वसभोपक्रान्तां द्वैतापत्तिमेवाधिकृत्य तन्निराचिकीर्षया विचारः प्रावर्तत।

तत्र सभाप्रोत्साहको महाशयः—आत्माभिन्नोऽपि उपाधिसंबन्धवशाद्भिन्नो भवति। उपाध्यपगमे चोदकापगमे प्रतिबिम्बस्येव किंचिज्ज्ञत्वादिजीवरूपेण जीवस्याप्यपगमात्केवलस्य परमात्मन एवावशेषादद्वैतमेवेत्यवादीत्।

केशवशास्त्री—उपाध्यपगम एव चेदैकात्म्यं सिद्ध्यति तर्ह्यात्मबोधेन किं क्रियताम्। तादृशबोधोत्तरमप्युपाधीनां विद्यमानतयाऽद्वैतासिद्ध्या सकलानर्थस्य तादवस्थ्यात्। तथा च ज्ञान्यज्ञानिनोरविशेषप्रसङ्गः।

सभाप्रोत्साहकमहाशयः—ज्ञानप्राप्त्युत्तरं च जीवः स्वप्नजागरणसुषुप्तिगोचराणां विषयाणां बाधितत्वेन मिथ्यात्वं विभावयन्स्वबिम्बभूतस्य परमात्मन एव च केवलं सत्यत्वमनुसंदधदिष्टप्राप्त्या चानिष्टनिवृत्तिसिद्ध्या चाविषीदन् परमात्मपरायणः सर्वदुःखातिगो भवति। अज्ञानी तु सर्वं विषयजातं सत्यं मन्यमानोऽनुवेलमनर्थपरम्परामनुभवतीति प्रसिद्ध एव ज्ञान्यज्ञानिनोर्विशेष इति॥

गङ्गाधरशास्त्री—न केवलं ज्ञानप्राप्त्युत्तरं विषयमिथ्यात्वमेवानुभूयते जीवेन किंतु स्वात्मनः परमात्मतादात्म्यमपि। तदेव च तत्त्वमस्यादिवाक्यैर्जहदजहल्लक्षणावृत्त्या प्रतिपाद्यते। अत एव जीवन्मुक्तानां ब्रह्मैवाहं न संसारीत्याद्युक्तिरपि संगच्छते॥

गहनोऽयं विषयो नाल्पैर्दिवसैर्विना पारं गमिष्यतीत्यद्यैवं विरन्तव्यमिति सभाप्रोत्साहकमहाशयेनाभिहितं सर्वेऽन्वमोदन्त ततश्चोत्तरसभायां केशवशास्त्री प्रारब्धवादमधिकृत्य किंचिद्विलिख्य पठिष्यति। प्रोत्साहकमहाशयश्च प्रथमवादं करिष्यतीति निश्चित्य सभां व्यसर्जन्॥

अथ मार्गशीर्षशुक्लप्रतिपदि संस्कृतसमाजनाम्नी सभा यथापूर्वमास्तीर्णा। तस्यां केशवशास्त्री प्रथमं पूर्वसभावृत्तान्तं संवाच्य प्रारब्धवादमाक्षिप्य लीलावाद एव युक्तः प्रतिभातीत्युपपादयत्। यथा सर्वो हि जन्तुस्तत्तत्सुखमभीप्सन्साधुष्वसाधुषु वा कर्मसु प्रवर्तते। एको हि यमनियमस्वाध्यायादिकायक्लेशैः स्वसुखं साधयितुं यतते। अपरश्च रुचिरान्नपानादिग्राम्यविषयोपभोगैरेव। तावेतौ समं वेदवेदाङ्गपारगावपि स्वस्वसुखसाधनत्वेन भिन्नभिन्नकारणसामग्रीमाश्रयन्तौ तत्तत्कर्मसमुत्थमपूर्वमिह परत्र चोपभुञ्जाते इत्यनुभूयते श्रूयते च। तत्रानयोर्विजातीयसुखविशेषाभीप्सापूर्वकसामग्रीविशेषादरः किं पूर्वजन्मकर्मनियत आहोस्विदीश्वरेच्छानियतः। तत्र केचन पूर्वजन्मकर्मनियत एव स इति वदन्ति॥

यतो हि समानादेव गुरोः शिक्षमाणानां सममभ्यासशालिनां च पुरुषाणामेक उत्तमोऽपरो मध्यमो निकृष्टो वा संपद्यते। कस्मादिदं कारणसाम्येऽपि फलवैचित्र्यं संभवतीत्यस्ति कोऽप्यदृष्टकारणविशेष इत्यनुमीयते। तादृशादृष्टकारणेष्वपि वैचित्र्यापादकं किमिति पृष्टे ततोऽपि पूर्वपूर्वजन्मकर्मेत्यनवस्थां स्वीकुर्वन्ति। प्रामाणिकानवस्थाया अदूषितत्वात्। परे त्वीदृशानवस्थास्वीकारापेक्षया स ऐक्षतेत्यादिवचनादवश्यस्वीकार्येश्वरेच्छावैचित्र्यमेवाभ्यर्हितं मत्वा तेनैव सकलसांसारिककार्यवैचित्र्यमुपपादयन्ति लोकवत्तु लीलाकैवल्यमित्यादिसूत्रप्रणयनाल्लीलाप्रवृत्तस्येश्वरस्य सृष्टिवैचित्र्यं न तावद्वैषम्यनैर्घृण्यानुमापकं भविष्यति शिशुवत्स्वभावे-

लीलाया एवासिद्धेः। नहि लोके लीलापटुस्सूत्रधारः स्वपात्राणां कानिचिच्चोरयन् कानिचिद्वदान्यवरपराणि च भिक्षार्थीकुर्वन् वचनीयो भवति। तथा स्वलीलासंपिपादयिषुरीश्वरो लोकदृष्ट्या कांश्चन दुर्मतीनपरांश्च सुमतीन् कुर्वन् कथमपि वाच्यः स्यात्। एतेन स्वयमेव मनुष्यैस्तानि तान्युचितानि वानुचितानि कर्माणि कारयित्वा तेषां श्रेयोदण्डादिविधानमीश्वरस्यायुक्तमिति वदन्तः प्रत्युक्ताः, एवं चेश्वरेच्छाघटितया दृश्यकारणसामग्र्यैव सकलकार्योपपत्तावदृष्टकारणानुसन्धानक्लेशो व्यर्थः। एकादृष्टकारणेनानिर्वाहेऽदृष्टान्तरस्य तेनाप्यनिर्वाहे तदितरस्य कल्पने महद्गौरवमनवस्थादोषश्च॥

ननु दृश्यकारणसाम्येऽपि फलवैषम्यमुपलभ्यते लोके तत्कथमदृष्टकारणान्तरकल्पनां विनोपपादयितुं शक्येत। केन दृष्टकारणेन सममभ्यासशालिनोः सतीर्थ्ययोरेकतरस्य विद्वत्त्वमपरस्य च जडत्वमुपपाद्येयाताम् इति चेश्वरेच्छानियततत्तज्जनकगुणदोषकृतबुद्धिवैलक्षण्येनैवेति गृहाण। वैषम्यनैर्घृण्यादिदोषस्तु नास्त्येवास्माकमित्यवोचाम। प्रत्युत स दोषः प्रारब्धवाद एवापद्यते तत्र हि वर्तमानकुकर्मादीनां पूर्वकर्मनियतत्वेनावश्यंभावात्तदर्थं जनानां दण्डदानस्यानौचित्यात् यदि च साध्वसाधुप्रवृत्त्यनुकूलेच्छातिरिक्तानामेव जीवावस्थानां प्रारब्धनियतत्वं तादृशेच्छायास्तु स्वात्मायत्तत्वमेव। तथा च कुकर्मप्रवृत्तिनिवृत्त्योर्जीवाधीनत्वेऽपि ततोऽनिवर्तमानस्य जीवस्य दण्डविधानं न्याय्यमेवेति भण्यते चेदर्धजरतीयं जीवेच्छावैचित्र्यं पुनर्दुरुपपादमेव। एवं स्थितेऽनवस्थादिविविधदोषदूषितं प्रारब्धवादमपेत्य दोषलेशशून्य ईश्वरेच्छावाद एवोपपन्नतरः प्रतीयते। इच्छानवस्थाया अस्वीकारे सांख्याचार्यादीनां संमतिश्चास्ति। तथाच द्वाविंशत्यधिकशततमसांख्यसूत्रे भाष्यकारः। "आदिसर्गे हि वृक्षं विनैव बीजमुत्पद्यते हिरण्यगर्भसंकल्पेन तच्छरीरादिवच्च इति श्रुतिस्मृत्योः प्रसिद्धम्"। तत्रैव धृतं विष्णुपुराणवचनं च "यथा हि पादपो मूलस्कन्धशाखादिसंयुतः। आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः" इति॥ ततः प्रमदादासमिश्रमहाशयो न लीलावादो युक्तो लोके लीलाका-

शिवामचेतनकाष्ठादिनिर्मितक्रीडनकोपादानस्यैव दर्शनात् चेतनान्युपादाय तेषु सुखदुःखाद्युत्पादने दोषस्य दुरुद्धरत्वात्। नहि लोकेऽपि प्रभुरपि पृथ्वीपतिर्लीलावशपिशाचिकावेशदूषितो नेदीषु निजाश्रितेषु कांश्च न घातयन्परांश्च समेधयन् युक्तकारीति व्यपदिश्येत । प्रारब्धवादे तु युक्तकारिणः सुखयन्नयुक्तकारिणश्च पीडयन् विविच्य निग्रहानुग्रहौ विदधानो नृपइव मुच्यते वचनीयतायाः। तानि च कर्माणि पूर्वपूर्वजन्तुरार्जितकर्मनियतान्यपि तपयितुं शक्यन्ते संप्राप्तनरतनुना यथावता श्रुतिस्मृत्युदितानुपदेशाननितमदनुष्ठतमविरुद्धाना विदधानाञ्च कोपप्रसादयोः पात्रीक्रियन्तइति लोकदृष्टान्तेन सर्वांशे सादृश्यमश्नुतेऽयं वाद इति । ततो विश्वनाथशास्त्री। न तावदस्त्ययं नियमो लोके ऽचेतनान्येव लीलायै गृह्यन्तइति नाट्ये चेतनानामपि ग्रहणादर्शनात् । तेष्वप्येकस्य रामभावेनापरस्य रावणतया च तात्कालिकसुखदुःखातिशयोत्पादनाच्चेति । ततो महाशयः। भो नास्ति तेषां मध्ये कस्यापि दुःखलेशोऽपि कथमन्यथा ते प्रवर्तेरन्। सुखदुःखादि तु केवलमभिनयन्तीति । ततो ढुण्ढिराजशास्त्री। ब्रह्मातिरिक्तवस्तुमात्रस्य सिद्धान्ते ऽनङ्गीकाराच्च कस्मिंश्चित्सुखं दुःखं वोत्पादितमीश्वरेणेति कोऽयं दोष इति। ततो महाशयः। भोः कस्यां दशायामिदमुच्यते पारमार्थिक्यां व्यावहारिक्यां वा पूर्वस्यां लीलावादः प्रारब्धवादः सुखं दुःखमिति सर्वमेवालीकमद्वैतसिद्धान्तादिति वादमात्रस्य व्यावहारिकदशायामेवात्रसरइति पर्यालोच्यतां सा दुर्निवारेश्वरवैषम्यनैर्घृण्यता लीलावादे न वेतीति। ततो राममिश्रशास्त्री। नास्तीश्वरे वैषम्यं नैर्घृण्यं वा कर्मप्रयोज्यत्वाच्छुभाशुभफलानामत एवोक्तं वैषम्यनैर्घृण्ये कर्मसापेक्षत्वादिति कर्मणां तु जडत्वादीश्वरः सिद्धः परमार्थतश्च भेद एव वास्तवो नाभेदो भेदपक्ष एव शास्त्रयोनित्वादित्यारभ्यानावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तः शास्त्रसंदर्भः सुयोजोऽभेदपक्षे च क्लिष्टयोजनो न वा योजयितुं शक्यतइति। ततो महाशयः समानकर्मणामपि फलभेददर्शनात्प्रारब्धमङ्गीक्रियतइति । ततः केशवशास्त्री। ईश्वरस्य निर्गुणत्वस्वीकाराच्च वैषम्यनैर्घृण्ये लीलावादे ऽपीति। ततो महाशयः। भो इदं परमार्थिकं न व्यावहारिकमिति । ततः केशवशा-

स्वी । नैर्घृण्यस्य घृणाभावरूपतया सुखदुःखाद्यभावश्च सोऽपि चेत्स्वीक्रि-
येत कः स्याद्दोष इति । ततो महाशयः । भो घृणाभाव एव दोषः परदुःखप्र-
हाणेच्छा हि सा सा चेदीश्वरे नाभ्युपगम्येत राक्षसेभ्योऽप्यधिकं क्रौर्यमीश्व-
रेऽभिहितं स्यादिति। ततो बालशास्त्रिणः । भोः शिशिरीयते मे मानसमन-
नेन वादेन यद्युभाभ्यामपि वादिप्रतिवादिभ्यामीश्वरे नैर्घृण्यवैषम्ये नेष्येते
तर्हि किमिति ते उद्भावनीये समाधेये च तदुद्भावनस्य प्रकृतकथानङ्गत्वा-
देकतरस्यैव दोषत्वे तदुद्भावनस्य युक्तत्वात् । एवमीश्वरेच्छायाः कारण-
ताकल्पनरूपो लीलावादः स्वस्वकृतकर्मणां फलप्रयोजकत्वरूपः प्रारब्धवा
दश्चेति पृथक् पृथक् स्वीकृत्य विवादोऽपि मह्यं न रोचते समाहृत्यैवो-
भयं समाधानस्य सुश्लिष्टत्वात् । नहि लीलावादेऽपि लौकिकीव लीला स-
म्भवेत आप्तकामे भगवति शक्याऽभिधातुं तस्यास्तात्कालिकसुखैकप्रयोज-
नकत्वात् । एवं प्रारब्धवादेऽपि सुकृतदुष्कृतकर्ममात्रोत्पाद्यत्वं सुखदुःख-
योरशक्याभिधानमेव प्रतिबन्धकाभावादेरपि कारणताया आवश्यकत्वात् ।
महाशयपक्षेऽप्येकेन सुकृतमपरेण दुष्कृतं च कारयित्वा सुखे दुःखे च तान्
पातयन् भगवानवचनीयः स्यात् । एवमन्त्यपक्षेऽपि कर्ममात्रस्य कारणता
दुर्वचेति स्पष्टमेव । भेदवादे चेदं दुष्परिहरमेव केवलेच्छायाः कारणत्व-
वादे । बुद्धिमतः सुखदुःखादयो नात्मन इति तु न शक्यं वक्तुं लोकेष्वेवं
कंचन ताडयतस्त्वद्दुःखमेव दुःखं न तवेत्यभिदधतोऽप्यवैषम्यापातात् एव-
मभेदवादेऽपि स्वाभिन्नेनेश्वरेणाभिन्ने नरान्तरे दुःखं सुखं चोत्पादयन् त-
दात्मन्येवोत्पादयन्निति साधीयसी वादसरणिः । दृश्यते च कर्मणां नाना-
जन्मसंचितपापनाशकता यमनियमादीनां वैदिकी नास्ति सांख्यसमं ज्ञानं
नास्ति योगसमं बलमिति तस्य बलं च प्रारब्धसंचितोभयविधदुरितनिरा-
करणत्वमिति स्पष्टमेव । तस्मादल्पेनापि नियमेन बहुतरपापनाशे भगवदि-
च्छायाः कर्मणश्च कारणताऽभ्युपगमे न कोऽपि दोषावकाश इति ।

एतच्च सर्वेष्वनुमोदयत्स्वेव पुनरिदमवोचत् ।

यदियं सभा साधीयोमहोत्साहयुक्तपण्डितसभाजितेत्यनया ता-
दृशं फलमुत्पादनीयं यच्चिरं सहृदयानामास्वादनीयतां व्रजेत् । यद्यपी-

Digitized by Google

दृशो ऽपि विचारः प्रचुरजनोपकारदक्षो ऽस्याऽपि न तादृशो यथा कश्चन धर्मशास्त्रनिबन्धः सुतरामुपकारको भवेत् । श्रीमन्तां च माधवाचार्यादीनां महात्मनां परिश्रमा यैः सकलार्यावर्त्तवसुमती निःशङ्कमनुतिष्ठति धर्ममनुगृहीता । तेषां च तावन्तो निबन्धा ये पूर्णायुषापि पुरुषेण न लेखितुमपि शक्यन्ते । अतस्तादृशो निबन्धो निर्मीयेत यत्र साकल्येन मतविवेकपूर्वकं कृत्स्नो धर्मविषयः श्रीलविनयार्जवादिसामान्यधर्मप्रशंसनप्रपञ्चनपुरःसरमुपनिबध्येत । सर्वे च यूयं सभ्या युवानो महोत्साहा धीमन्तश्चेति मन्ये युष्माभिः महान्यथा त्वेकेनैतादृशपरिश्रमो दुष्कर एव । श्रूयते च माधवाचार्योऽपि श्रीबुक्कभूपतेः प्रधानसचिवो धनेन विनयेन प्रणयेन च संकलय्य नानादेशवासिनः पण्डितान्निबन्धानिमानुपरचितवानिति । एवं यूयमप्येकचित्तास्तादृशनिबन्धमीदृशं निबध्नीयुः स्याज्जनानां महानुपकारो भवतां च कीर्तिराकल्पस्थायिनी मयाप्यत्र यथाशक्ति प्रयत्येतेति । ततो रामभिश्रशास्त्री व्यवहारकाण्डसंग्रहणं रामकृष्णशास्त्री च कालविवेकनिबन्धनं कुञ्जरराजशास्त्री च आह्निकनिर्णयनिर्माणं प्रत्यग्रहीषत् ततः संध्यासमये जाते सर्वे सभात उदतिष्ठन्निति शम् ॥

अथ त्रयस्त्रिंशदधिकैकोनविंशतिशततमवैक्रमाब्दीयमाघकृष्णद्वितीयायां श्रीयुतप्रमदादासमित्रमहाशयानामुद्याने संस्कृतसमाजनाम्नी सभा प्रतिपक्षं प्रतिपदि भवन्त्यपि श्रीमत्याः सकलवसुमतीतलशास्त्र्यमनुल्लङ्घनीयशासनाया विजयिनीदेव्या भारतवर्षराजराजेश्वरीपदस्वीकरणाकर्णनसमुन्मीलदतुलप्रमोदसंततिं संभूयानुभवितुं किल समास्तीर्णा । तां च समलमकुर्वत प्रतिसभमनायास्तो ऽपि कतिपये श्रीमद्ग्राफसाहिबप्रभृतयो महाशयाः । अध्यासीनेषु च सर्वेसभ्येषु यथोचितान्यासनानि तात्कालिकस्वस्वतात्त्विकप्रमोदप्रकाशनमेव प्रधानं तद्दिनकार्यमालोचयता साम्प्रतं प्रस्तुतमुपक्रम्यतामिति सप्रश्रयं निवेद्यमानाः प्रमदादासमित्रमहाशयेन श्रीबालशास्त्रिणो हर्षप्रकर्षगद्गदाक्षरमिदमुपाददते स्म वचनम् । यथैव पूर्णचैतन्यः परमेश्वरो निखिलेषु चतुर्मुखप्रभृतिषु कीटपर्यन्तेषु जीवतत्त्वेषु तत्तददृष्टविशेषपर्यालोचनपुरःसरं स्वचैतन्यभागं तत्तदुचितं समर्पयन्

ब्रह्मण्याहितेन चैतन्येन सृष्टिसंपादनं विष्णुधाहितेन च तेन परिपालनं रुद्रसमर्पितेन च तेन संहरणं किं बहुना लोकेपि परस्परमुपकारानपकारांश्च किंचिन्न्यूनतां बहून्नतां च विरचयन् परमार्थतस्तत्तद्व्यक्त्यवच्छिन्नचैतन्यप्रतिफलितसुखदुःखादिसंवेदनात्मकं फलं स्वयमेवोपभुनक्ति स्वचैतन्येनैव चैतन्यवत्तामभिमन्यमानाननुचितकारिणोऽनुचितकारिणश्च योग्यताज्ञानादिद्वारेण साधुफलमसाधुफलं च प्रापयति तथानन्तशक्तेर्यस्यैव शक्तिलेशैस्तत्तत्कार्यशक्तानीव पृथिव्यादितत्त्वानि धारणाप्यायनप्रकाशनादीनि विचित्राणि कार्याण्यारभन्ते यदीयशक्तिमन्तरा न तृणमपि परस्पन्दितुं प्रभवति यच्चैतन्यसंबन्धमन्तरा च कोपि किमपि न ज्ञातुमलं तथा साम्प्रतमसावपि निरवधिकैश्वर्यप्रभुशक्तिमन्त्रशक्तीनामेकमायतनं विजयिनी देवी तत्तत्पुरुषानुगतविवेकविनयविद्यादिभिरुदयमासादयन्त्या स्वेच्छयैव केषुचिद्द्वीपाधिपत्यं केषु चिद्देशाधिपतितां केषु चिज्जनपदस्वामितां केषु चिन्नगराधिकारं ग्रामपरिवृढतां च स्वशक्तेरंश गुरुलघुखण्डसमर्पणपुरःसरं समर्पयन्ती सकलां मेदिनीं परिपाल्य स्वयमाप्तसमस्तकामापि प्रजासंबन्धिसुखसंतत्या स्वयं सुखिनी तदीयदुःखैश्च दुर्मनायमाना विविधविद्याशिल्पादिकौशलशालिनो योग्यताविशेषविवेचनपुरःसरं ग्रामाधिपतिदेशपरिवृढादिद्वारा परितोषयन्ती विरूपमाचरतश्च दण्डयन्ती परमार्थतः स्वयैव शक्त्या सर्वं नियमयति निजेनैवैश्वर्येण सर्वाः प्रजाः सुखभागिनीः करोतीति कः संशयीत किमधिकेन तादृशतादृशाश्रुतदृष्टचरकारणसामग्रीसमवधानद्वारा पृथिव्यादीन्यपि तत्त्वानि नियमयन्ती प्रत्यक्षेश्वरतामपि विपश्चिन्मानसेषु संभावयति सा नानाविधद्वीपमण्डलान्यात्मसात्कृतवत्यपि भारतवर्षप्रजासु निरतिशयं स्नेहं प्रकाशयन्त्यद्य स्वीकरोति भारतवर्षराजराजेश्वरीति पदमिति कः स्यादस्माकमितोऽपि विशिष्टो महोत्सवाश्रयो वासरः सदृशो वा । तदद्यास्माभिरपरं किं विधेयमृते श्रीविश्वेश्वरं मुहुः प्रणम्य विजयिनीदेव्याश्चिरं साम्राज्यसंपत्समुल्लासस्थैर्यहेतोर्यथोत्साहं विचित्रैः श्लोकैरुपश्लोकनादिति तदेव सम्राट्साधुवादसंवलितं प्रस्तूयतामिति । ततस्तावच्चरणतर्करत्नमहाशयाः । अहो कथमियमद्य वसु-

धाऽसाधरणगुणगणविराजमानाधिपतिसंप्राप्तिप्रमदमेदुरजननिचिता विराजते । यादृशी च साम्प्रतमस्याः समृद्धिर्न तादृशी पुरा । केन प्राक्तनेन महीभुजा परमुपकारकाणि पुस्तकानि प्राकाश्यन्त । यानि चिरकालातिक्रमवशान्नामशेषाणि कानि चिच्चाप्यश्रुतानि यथा साम्प्रतिकसम्राजा मुद्रणोपायसुलभानि विरचितानि स्वल्पव्ययेनापि समासादयितुमधुना शक्यन्ते । केन वा स्वस्वजातिवर्णदेशाद्यभिमानमुत्सार्य कृत्स्नैव प्रजा सुतनिर्विशेषमपाल्यत न येन बलीयसाऽऽक्रम्यमाणा दुर्बला न दुःखं नाप्नुवते स्म । केनान्येन पथिकजनानामनायासेन स्वल्पव्ययेन लघुना कालेनाभीप्सितदेशप्राप्तिहेतुभूतं बाष्पवेगवशवेगवत्तममनायासिततुरगादिवाहनं यानं निरमीयत । केन वा पुरा योगबलेनापि केनचिदेव शक्यसाधनं दूरतरदेशस्थवार्तोपलम्भवार्ताप्रापणादिकौशलं सर्वजनसुलभं समपाद्यत । कियतीं वा वाचं चिरं प्रपञ्चयामहे नानाविधौषधालयविद्यालयादिनिर्माणैरतीवोपकृता सकला प्रजा विस्मरत्येव पूर्वमहीपतीन् । तदधुना सर्वात्मना भगवन्तमम्बिकापतिमाराधयद्भिरस्माभिरिदमेव पुनः पुनराशंसनीयं यत्प्रतिपलोपचीयमानवैभवानुभावा भुवं भूषयेद्यशोवितानैर्देवी विजयिनी सस्तुतेति । तदनु प्रमदावार्समित्रमहाशयः श्रीविश्वनाथप्रणतिसम्राट्प्रशंसाबोधकपद्यश्रावणपूर्वकमिदमाह निःसंशयं चिरादभिलषितो मनोरथ आर्यावर्तवास्तव्यानां भागधेयोदयैरस्माकमद्य साधु फलितः । येन श्रीमती विजयिनीदेवी प्रजान्तरेभ्यो विशेषप्रियतां भारतजनेषु दर्शयन्ती सर्वपोहत्य देशाधिपप्रभृतिसाधारणजनपर्यन्तं जना मत्संबन्धिन इति बोधयन्ती नानाविधान्तरीपपालिन्यपि भारतराजराजेश्वरीत्यसाधारणं निजं पदमनुमन्यते स्म । तदीदृशेऽवसरे यदि वयं तदीयधन्यवादपुरःसरं परस्परं चिरात्प्रचलितामीर्ष्यां परोत्कर्षासहिष्णुतां च तुन्दपरिमृजतां च विसृज्य परस्परसाहाय्यकप्रवणमानसा मानसाधनतया विविधा विद्या मतिवैशद्यसंपादकानि च विचित्राणि शिल्पानि शुभोदर्कांश्चोद्यमान् सम्यगुपाददीम कोऽस्मादपि परो लाभ इति विचिन्त्यताम् । यथाद्य यावदिहत्यानां क्षेमत्वमत्यन्तं दुरन्तमभूद्येन विजातीया इति गौडा माहाराष्ट्रान् ते च गौडानिमे च बङ्गदेशनिवासिनोऽसूयन्तो द्वेषमेव स्वीयत्व-

साधनमिति आम्यन्त ईदृशीं परायत्ततामश्नुवते स्म येन द्वीपान्तरीयैः सुतरां संहतव्यापाराः पारावारपतिता इव सांयात्रिका न कथमपि स्वोदयं संभावयन्त्यपि। विचारचतुरचेतसां पुनरिदं न रोचते यदेकमपि द्वीपमधिवसतां भाषाभेदमात्रकेण कृता विभिन्ना इति व्यपदेशः। यथा किल द्वीपान्तरनिकेतना अपीमे समागत्य जनमिहत्यमपि स्वजनमिवायत्यां भूरिफलेषु कर्मसूत्साहजननपुरःसरं धनमपि निजं वितीर्य प्रेरयन्ति तथा वयमपि चेदधुनाऽपि वैमत्यत्यागं पुरस्कृत्य प्रवर्तेमहि महितेषु हितेषु कार्येषु प्राप्नुयाम स्तोकेनैव कालेन परमामुन्नतिमिति दृढं निश्चिनोमि। अपि चायं न केवलं नयो धर्मोऽप्यस्माकं शीलं सत्यं परोत्कर्षसंतोषिता शमो विनय आर्जवमिन्द्रियनिग्रहश्चेत्यादिरसाधारणः साधारणः सर्वेषाम्। पश्यत भारतादीन् महत इतिहासान् यत्र शीलस्य कियन्माहात्म्यमुद्घुष्यते मुहुः

> जिता सभा वस्त्रवता मिष्टाशा गोमता जिता।
> अध्वा जितो यानवता सर्वं शीलवता जितम्॥
> शीलं प्रधानं पुरुषे तद् यस्येह विनश्यति।
> न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥

इत्यादि। एवं सत्यस्यापि॥

> अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
> अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥

इत्यादिना। अनृतस्य च नानृतात्पातकं परमित्यादिनाऽतीव हेयता प्रकृश्यते। तदद्य कश्चिदीदृशं प्रबन्धं विरचयेत्तत्र दशकं धर्मलक्षणमिति प्रारभ्य सर्वेषां परीक्षणं प्रमाणोपन्यासपुरःसरं भवेत्तेन सर्वेषामुपकारः स्यात्तस्मै चेदृशमहोत्सवे पारितोषिकं वितरत्व श्रीमत्सभाध्यक्षाधिकारे मया स्थापितमर्प्यतेति। ततो बालशास्त्रिणः। न केवलमेतेन महद्वोऽदार्यं महाशयानामवगच्छामोऽपि तु विद्यार्थकाङ्क्षिणामेषजनोपकृतिरक्ततां च दृढमनुमिमीम इति।

ततो रामकृष्णशास्त्रिप्रभृतिभिर्विद्वद्भिः [illegible]-
[illegible]केषु पत्रेषु वाच्यमानेषु [illegible] वाचयन्ति स्म [illegible]-

दम्। तदनु श्रीविश्वेश्वरसपर्यार्थमद्य कोऽपि गच्छतु समभ्यर्थयतां च भगवतो भारतेश्वरीभावुकाभिवृद्धिमिति बालशास्त्रिभिरादिष्टे केशवशास्त्री निजगमनोत्साहमदर्शयत् । ततः प्रमदादासमित्रमहाशयेऽपि मदीयमपि पूजासंभारं प्रापयतु भवानिति । तदनु सायंसमयेऽपि प्रत्यासन्ने गुणिजनसमागमैकलोभिनस्सर्वे ऽपि सभ्याः संभूय युगपदेव प्रश्रयं पुरस्कृत्य श्रीगाफसाहिबमहाशयान् श्रीथिबोसाहिबांश्चानुमन्येतां युवां सभाप्रोत्साहकतामिति विज्ञापयन्तस्तत्क्षणएव भृशं प्रसीदता गाफसाहिबमहाशयेन नितरामहमनुगृहीतो ऽस्मि समागमादीदृश्याः सभाया इति परितोषिताः सभां व्यसृजन्निति । शम् ॥

शीतांशुशोभिशिरसं गिरिराजकन्या-
नेत्राम्बुजद्वयविकाससहस्रभानुम् ।
श्रीविश्वनाथमधुना मधुनाशनेड्यं
भक्त्या नताः स्म जनतास्मरशोकभूमिम् ॥ १ ॥
प्राप्तोदया किल दया हृदयान्तराला-
त्तस्यैव सा विजयिनी जयिनी रिपूणाम् ।
कल्याणकारकतया तनयाविशेषं
पुष्णात्यशेषजनतां विनतां नितान्तम् ॥ २ ॥
नानान्तरीपनृपमौलिमणिप्रभाभि-
रभ्यर्चिताङ्घ्रियुगला ऽपि निजप्रतापैः ।
सा भारती भुवमभावयदिद्धभाग्या-
मार्येश्वरीति पदमात्मनि मानयन्ती ॥ ३ ॥
आशागजश्रुतिपथातिथिभिः शतघ्नी-
घोषैर्मुलहुनधियेव चलद्भिरुच्चैः ।
सम्राट्सभा वसुमती समया स्तवेश्च
साम्राज्यघोषमयतां व्रजति स्म सर्वम् ॥ ४ ॥
राज्ञ्याः पदं सकृदं सकलेश्वरेभ्यो
भूपा न केवलममन्यत साधुवादैः ।

आशान्तरालघटितप्रतिनाददम्भा-
द्दिक्पालकैरपि सुरैरयमन्वमोदि ॥ ५ ॥

पुष्पाञ्जलीन् विसृजतां करकुड्मलेभ्यः
कूलङ्कषप्रमदमेदुरमानसानाम् ।
साहायकं विदधिरे सकलप्रजानां
पुष्पोपमा वियति काल्पनिकाः प्रदीपाः ॥ ६ ॥

चिषाम्बुधौ न निरमज्जयदाशु केषां
चेतोऽद्भुता वियति दीपततिर्भ्रमन्ती ।
दासीभवत्सकलदिग्वनिताकराग्र-
नीराजनाभ्रममहो हृदये दिशन्ती ॥ ७ ॥

ये सौखशायनिकतामगमन्नुडूनां
नामापरत्वमभजन्त च ये प्रदीपाः ।
ते तत्प्रतापमवनौ गगने च सन्तं
कस्यान्तरन्तरितबाधमबोधयन्न ॥ ८ ॥

अद्यानुरागतरुरार्यजनस्य मन्ये
जातः फलेग्रहिरवाप्य दयाम्बु तस्याः ।
आस्वाद्य यत्फलमतुल्यरसं चिराय
पीयूषमीषदपि नेष्यति लोक एषः ॥ ९ ॥

तस्मादपारकरुणाभरितान्तरङ्गं
सम्प्रार्थयाम गिरिशं नमितोत्तमाङ्गाः ।
जीव्यात् प्रतिक्षणविवृद्धयशःप्रतापा
पारे शतं विजयिनी शरदस्सपुत्रा ॥ १० ॥

विश्वेशविश्वजयिनीयशसां प्रसार-
माशेदिवांसि सुखिसभ्यसुधीवचांसि ।
संश्रुत्य संस्कृतसमाजसभासहायो
गङ्गाधरोऽलिखदुदन्तममुं यथावत् ॥ ११ ॥ गङ्गाधरशास्त्री

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5. OCTOBER 1ST 1877. VOL. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
स्वकरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

मपर्यन्तस्य ॥ ९१ ॥

मपर्यन्तस्येत्ययमधिकारो, यदित ऊर्ध्वमनुक्रमिष्यामो मपर्यन्तस्येत्येवं तद्वेदितव्यम् । वक्ष्यति । युवावौ द्विवचने । युवाम् । आवाम् । मपर्यन्तस्येति किम् । युवकामावकामिति साकच्कस्य मा भूत् । त्वमावेकवचने । त्वया । मया । मपर्यन्तस्येति किम् । सर्वस्य मा भूत् । तथा च सति त्वमयोरकारस्य योऽचीति यकारे कृते ऽनिष्टं रूपं स्यात् । मान्तस्येत्येव सिद्धे ऽस्मिन् यत्परिग्रहणं कृतमवधिद्योतनार्थं तन्मान्ते मा भूत्, कदा, यदा * ग्यन्तयोः क्विपि मान्तत्वं विद्यते, युष्मदस्मदोः स्थानिवत्त्वं च येरच्च क्वौ लुप्तत्वाच्च विद्यते ॥

युवावौ द्विवचने ॥ ९२ ॥

द्विवचनइत्यर्थग्रहणम् । द्विवचने ये युष्मदस्मदी द्व्यर्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने युव आव इत्येतावादेशौ भवतः । युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् । युवयोः । आवयोः । यदा समासे द्व्यर्थे युष्मदस्मदी भवतः, समासार्थस्यान्यसंख्यत्वादेकवचनं बहुवचनं वा भवति, तदापि द्व्यर्थयोर्युष्मदस्मदोर्युवावौ भवतः, यदि त्वाहौ सौ इत्येवमादिना आदेशान्तरेण न बाध्येते । अतिक्रान्तं युवा,मतियुवाम् । अत्यावाम् । अतिक्रान्तान् युवा,मतियुवान् । अत्यावान् । अतिक्रान्तेन युवा,मतियुवया । अत्यावया । अतिक्रान्तैर्युवा,मतियुवाभिरत्यावाभिः । अतिक्रान्तेभ्यो युवा,मतियुवभ्यमत्यावभ्यम् । अतिक्रान्तस्माद् युवा,मतियुवत् । अत्यावत् । अतिक्रान्तेभ्यो युवामागतः, अतियुवत् । अत्यावत् । अतिक्रान्तानां युवा,मतियुवाकम् । अत्यावाकम् । अतिक्रान्ते युवा,मतियुवयि ।

* मा भूद्यदा तदेति पदमञ्जरीधृतः पाठः ।

Digitized by Google

अत्यावयि । अतिक्रान्तेषु युवा,मतियुवासु । अत्यावासु । त्वाहादीनां तु विषये परत्वात्तएव भवन्ति । अतिक्रान्तो युवा,मतित्वम् । अत्यहम् । अतिक्रान्ता युवाम्, अतियूयम् । अतिवयम् । अतिक्रान्ताय युवाम्, अतितुभ्यम् । अतिमह्यम् । अतिक्रान्तस्य युवा,मतितव । अतिमम । यदा तु युष्मदस्मदी एकत्वबहुत्वयोर्वर्त्तेते, समासार्थस्तु द्वित्वे, तदा युवावौ न भवतः । अतिक्रान्तो त्वाम्, अतित्वाम् । अतिमाम् । अतिक्रान्तो युष्मान्, अतियुष्मानत्यस्मान् । एवं सर्वत्र ज्ञेयम् ॥

यूयवयौ जसि ॥ ९३ ॥

युष्मदस्मदोर्मपर्यन्तस्य जसि परतो यूय वय इत्येतावादेशौ भवतः । यूयम् । वयम् । परमयूयम् । परमवयम् । अतियूयम् । अतिवयम् । तदन्तविधिरत्र भवति । अङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति * ॥

त्वाहौ सौ ॥ ९४ ॥

युष्मदस्मदोर्मपर्यन्तस्य सौ परे त्व अह इत्येतावादेशौ भवतः । त्वम् । अहम् । परमत्वम् । परमाहम् । अतित्वम् । अत्यहम् ॥

तुभ्यमह्यौ ङयि ॥ ९५ ॥

युष्मदस्मदोर्मपर्यन्तस्य तुभ्य मह्य इत्येतावादेशौ भवतो ङयि परतः । तुभ्यम् । मह्यम् । परमतुभ्यम् । परममह्यम् । अतितुभ्यम् । अतिमह्यम् ॥

तवममौ ङसि ॥ ९६ ॥

युष्मदस्मदोर्मपर्यन्तस्य तव मम इत्येतावादेशौ भवतो ङसि परतः । तव । मम । परमतव । परममम । अतितव । अतिमम ॥

त्वमावेकवचने ॥ ९७ ॥

एकवचनइत्यर्थनिर्द्देशः । एकवचने ये युष्मदस्मदी एकार्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने त्व म इत्येतावादेशौ भवतः । त्वाम् ।

* अङ्गाधिकारे तस्य तदुत्तरपदस्य चेत्यादि बहुषु पुस्तकेषु नास्ति । तदेव तु युक्तम् । पदमञ्जर्यां दर्शनात् ।

माम् । त्वया । मया । त्वत् । मत् । त्वयि । मयि । यदा समासे एकार्थे युष्मदस्मदी भवतः, समासार्थस्य त्वन्यसंख्यत्वाद् द्विवचनं बहुवचनं वा भवति, तदापि त्वमावादेशौ भवतः । आदेशान्तराणां तु विषये त्वाहौ सावित्येवमादीनां पूर्वविप्रतिषेधेन तएवेष्यन्ते । अतिक्रान्तस्त्वामतित्वम् । अत्यहम् । अतिक्रान्तौ त्वामतित्वाम् । अतिमाम् । अतिक्रान्तान् त्वामतित्वान् । अतिमान् । अतिक्रान्ताभ्यां त्वामतित्वाभ्याम् । अतिमाभ्याम् । अतिक्रान्तैस्त्वामतित्वाभिः । अतिमाभिः । इत्येवमाद्युदाहार्यम् ॥

प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥

एकवचन इत्यनुवर्त्तते । प्रत्यये उत्तरपदे च परत एकत्वे वर्त्तमानयोर्युष्मदस्मदोर्मपर्यन्तस्य त्व म इत्येतावादेशौ भवतः । तवायं, त्वदीयः । मदीयः । अतिशयेन त्वं, त्वत्तरः । मत्तरः । त्वामिच्छति, त्वद्यति । मद्यति । त्वमिवाचरति, त्वद्यते । मद्यते । उत्तरपदे । तव पुत्त्रस्त्वत्पुत्त्रः । मत्पुत्त्रः । त्वं नाथोस्य, त्वन्नाथो, मन्नाथः । एकवचन इत्येव । युष्माकमिदं युष्मदीयम् । अस्मदीयम् । युष्माकं पुत्त्रो ऽस्माकं पुत्त्रो युष्मत्पुत्त्रो ऽस्मत्पुत्त्रः । विभक्तावित्यधिकारात् पूर्वयोगो विभक्तावेव । ततोन्यत्रापि प्रत्यये उत्तरपदे च यथा स्यादित्ययमारम्भः । ननु चात्राप्यन्तर्वर्तिनी विभक्तिरस्ति तस्यामेवादेशौ भविष्यतः । नैवं शक्यं, लुका तस्या भवितव्यम् । बहिरङ्गो लुक् अन्तरङ्गावादेशौ प्रथमं तौ भविष्यतः । एतदेव तर्ह्यादेशवचनं ज्ञापकमन्तरङ्गानपि विधीन्बहिरङ्गोपि लुग् बाधते इति । तेन गोमान्प्रियोस्य गोमत्प्रिय इत्येवमादौ नुमादि लुका बाध्यते । एवं च सति त्वाहौ सावित्येवमादयोपि प्रत्ययोत्तरपदयोरादेशा न भवन्ति । त्वं प्रधानमेषां त्वत्प्रधानः । मत्प्रधानः । यूयं पुत्त्रा अस्य युष्मत्पुत्त्रो ऽस्मत्पुत्त्रः । तुभ्यं हितं त्वद्धितं मद्धितम् । तव पुत्त्रस्त्वत्पुत्त्रो मत्पुत्त्रः । अथ किमर्थमेषां त्वाहादीनां बाधनार्थमेतच्च विज्ञायते । लक्ष्यस्थित्यपेक्षया । ज्ञापकार्थं ह्येतस्मिन्बहुतरमिष्टं संगृह्यते ॥

त्रिचतुरोस्स्त्रियां तिसृचतसृ ॥ ९९ ॥

त्रि चतुर् इत्येतयोः स्त्रियां वर्त्तमानयोस्तिसृ चतसृ इत्येतावादेशौ भवतो विभक्तौ परतः । तिस्रः । चतस्रः । तिसृभिः । चतसृभिः । स्त्रियामिति किम् । त्रयः । चत्वारः । त्रीणि । चत्वारि । स्त्रियामिति चैतत् त्रिचतुरोरेव विशेषणं नाङ्गस्य । तेन यदा त्रिचतुःशब्दौ स्त्रियामङ्गं तु लिङ्गान्तरे तथाप्यादेशौ भवत एव । प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणस्य प्रियतिसा ब्राह्मण इति । प्रियतिस्रौ । प्रियतिस्रः । प्रियतिसृ ब्राह्मणकुलम् । प्रियतिसृणी । प्रियतिसॄणि । प्रियचतसा । प्रियचतस्रौ । प्रियचतस्रः । प्रियचतसृ । प्रियचतसृणी । प्रियचतसॄणि । नद्यृतश्चेति समासान्तो न भवति । विभक्त्याश्रयत्वेन तिसृभावस्य बहिरङ्गलक्षणत्वात् * । यदा तु त्रिचतुःशब्दौ लिङ्गान्तरे स्त्रियामङ्गं तदा आदेशौ न भवतः । प्रियास्त्रयोऽस्याः प्रियाणि त्रीणि वा अस्या ब्राह्मण्याः सा प्रियत्रिः । प्रियत्री । प्रियत्रयः । प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः ॥ तिसृभावे संज्ञायां कन्युपसंख्यानं कर्त्तव्यम् ॥ * ॥ तिसृका नाम ग्रामः ॥ चतसर्याद्युदात्तनिपातनं कर्त्तव्यम् ॥ * ॥ चतस्रः पश्येत्यत्र चतुरः शसीत्येव स्वरो मा भूत् । चतसृणामित्यत्र तु षट्त्रिचतुर्भ्यो हलादिरित्येव स्वरो भवति । हलादिग्रहणसामर्थ्यान्निपातनस्वरो बाध्यते ॥

अचि र ऋतः ॥ १०० ॥

तिसृ चतसृ इत्येतयोर्ऋतः स्थाने रेफादेशो भवति अजादौ विभक्तौ परतः । तिस्रस्तिष्ठन्ति । तिस्रः पश्य । चतस्रस्तिष्ठन्ति । चतस्रः पश्य । प्रियतिस्र आनय । प्रियचतस्र आनय । प्रियतिस्रः स्वम् । प्रियचतस्रः स्वम् । प्रियतिस्रि निधेहि प्रियचतस्रि निधेहि । पूर्वसवर्णोत्वङिसर्वनामस्थानगुणानामपवादः । परमपि ङिसर्वनामस्थानगुणं पूर्वविप्रतिषेधेन बाधते । अचीति किम् । तिसृभिः । चतसृभिः । ऋत इति तिसृचतस्रोः प्रतिपत्त्यर्थमन्यथा हि तदपवादस्त्रिचतुरोरेवायमादेशो विज्ञायेत ॥

जराया जरसन्यतरस्याम् ॥ १०१ ॥

* बहिरङ्गलक्षणस्यासिद्धत्वादिति पुस्तकान्तरे पाठः ।

Digitized by Google

जरा इत्येतस्य जरसित्ययमादेशो भवति अन्यतरस्यामजादौ विभक्तौ परतः। जरसा दन्ताः शीर्यन्ते। जरया दन्ताः शीर्यन्ते। जरसे त्वा परिदद्युः। जरायै त्वा परिदद्युः। अचीत्येव। जराभ्याम्। जराभिः। नुमो जरसादेशो विप्रतिषेधेन। अतिजरांसि ब्राह्मणकुलानि। इहातिजरसं ब्राह्मणकुलं पश्येति लुग्न भवति आनुपूर्व्या सिद्धत्वात्। अतिजर अमिति स्थिते लुगम्भावो जरस्भाव इति त्रीणि कार्याणि युगपत्प्राप्नुवन्ति। तत्र लुक्तावदपवादत्वादम्भावेन बाध्यते। अम्भावेऽपि परत्वाज्जरसादेशेन, न च पुनर्लुक्शास्त्रं प्रवर्त्तते भ्रष्टावसरत्वाद् इत्येवमेव भवति अतिजरसं ब्राह्मणकुलं पश्येति, प्रथमैकवचने तृतीयाबहुवचने च अतिजरं ब्राह्मणकुलं तिष्ठति, अतिजरैरिति च भवितव्यमिति गोनर्दीयमतम्। किं कारणं, संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। अन्ये त्वनित्यत्वादस्याः परिभाषाया अतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरित्येवं भवितव्यमिति मन्यन्ते॥

त्यदादीनामः॥ १०२॥

त्यदित्येवमादीनामकारादेशो भवति विभक्तौ परतः। त्यद्। स्यः। त्यौ। त्ये। तद्। सः। तौ। ते। यद्। यः। यौ। ये। एतद्। एषः। एतौ। एते। इदम्। अयम्। इमौ। इमे। अदस्। असौ। अमू। अमी। द्वि। द्वौ। द्वाभ्याम्॥ द्विपर्यन्तानां त्यदादीनामत्वमिष्यते॥ इह न भवति। भवत्। भवान्। संज्ञोपसर्जनीभूतास्त्यदादयः पाठादेव पर्युदस्ता इतीह न भवति। त्यद्। त्यदौ। त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। त्यदादिप्रधाने तु शब्दे भवत्येव। परमसः। परमतौ। परमते॥

किमः कः॥ १०३॥

किम् इत्येतस्य क इत्ययमादेशो भवति विभक्तौ परतः। कः। कौ। के। साकच्कस्याप्ययमादेशो भवति, तेनाकार एव किमो न विधीयते किमोऽदिति॥

कु तिहोः॥ १०४॥

तकारादौ हकारादौ च विभक्तौ परतः किमित्येतस्य कु इत्यय-मादेशो भवति । कुतः । कुत्र । कुह । तिहोरितीकार उच्चारणार्थः ॥

क्वाति ॥ १०५ ॥

अतीत्येतस्यां विभक्तौ परतः किमित्येतस्य क्व इत्ययमादेशो भवति । क्व गमिष्यसि । क्व भोक्ष्यते । आदेशान्तरवचनमोर्गुणनिवृत्त्यर्थम् । किमो ऽद्विति च प्रत्ययान्तरं न विधीयते साकच्कार्थम् ॥

तदोः सः सावनन्त्ययोः ॥ १०६ ॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सकारादेशो भवति सौ पर-तः । त्यद् । स्यः । तद् । सः । एतद् । एषः । अदस् । असौ । अनन्त्य-योरिति किम् । हे स । सा ॥

अदस औ सुलोपश्च ॥ १०७ ॥

अदसः सौ परतः सकारस्य औकारादेशो भवति सोश्च लोपो भवति । असौ ॥ औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः सादुत्वं च ॥ * ॥ यदा चौत्वप्रतिषेधः तदा सकारादुत्तरस्य उत्वं भवति । असुकः । असकौ ॥ उत्तरपदभूतानां त्यदादीनामकृतसन्धीनामादेशा वक्तव्याः ॥ * ॥ परमा-हम् । परमायम् । परमानेन ।

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ।
ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत् ॥
आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्त्तनात् ।
प्रत्ययस्थाच्च कादित्वं शीभावश्च प्रसज्यते ॥

इदमो मः ॥ १०८ ॥

इदमः सौ परतो मकारोन्तादेशो भवति । इयम् । अयम् । इदमो मकारस्य मकारवचनं त्यदाद्यत्वबाधनार्थम् ॥

दश्च ॥ १०९ ॥

इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः। इमौ। इमे। इमम्। इमौ। इमान् *॥

यः सौ ॥ ११० ॥

इदमो मकारस्य यकारादेशो भवति सौ परतः। इयम्। उत्तरसूत्रे पुंसीति वचनात्स्त्रियामयं यकारः॥

इदो ऽय् पुंसि ॥ १११ ॥

इदम इद्रूपस्य पुंसि सौ परतो ऽय् इत्ययमादेशो भवति। अयं ब्राह्मणः। पुंसीति किम्। इयं ब्राह्मणी॥

अनाप्यकः ॥ ११२ ॥

इदमो ऽककारस्य इद्रूपस्य स्थाने अन इत्ययमादेशो भवति आपि विभक्तौ परतः। अनेन। अनयोः। अक इति किम्। इमकेन। इमकयोः। आपीति प्रत्याहारः तृतीयैकवचनात्प्रभृति सुपः पकारेण॥

हलि लोपः ॥ ११३ ॥

हलादौ विभक्तौ परत इदमो ऽककारस्य इद्रूपस्य लोपो भवति। आभ्याम्। एभिः। एभ्यः। एषाम्। एषु। नानर्थके ऽलोन्त्यविधिरिति सर्वस्यायमिद्रूपस्य लोपः। अथ वा नायमिल्लोपः। अनाप्यक इति अन्वयद्वयमनुवर्त्तते †॥

मृजेर्वृद्धिः ॥ ११४ ॥

विभक्ताविति निवृत्तम्। मृजेरङ्गस्य इको वृद्धिर्भवति। मार्ष्टा। मार्ष्टुम्। मार्ष्टव्यम्। मृजेरिति धातुग्रहणमिदं, धातोश्च कार्यमुच्यमानं धातुप्रत्ययएव वेदितव्यम्। कंसपरिमृड्भ्यां कंसपरिमृड्भिरित्यत्र न भवति॥

अचो ञ्णिति ॥ ११५ ॥

अजन्तस्याङ्गस्य ञिति णिति च वृद्धिर्भवति। ञिति। एकस्त-

* इह साविति न संबध्यते, उत्तरसूत्रे साविति वचनादित्यधिकमेकस्मिन्पुस्तके।
† अथ वा ऽनोयमलोन्त्यलोप इति पा० व पुस्तकान्तरे।

बहुलनिघायः । द्वौ शूर्पनिष्पावौ । कारः । हारः । णिति । गौः । गावौ । गावः । सखायौ । सखायः । जैत्रम् । यौत्रम् । च्यौत्नः । जयतेर्यौतेश्च त्रणादयो बहुलमिति ष्ट्रन् प्रत्ययः । च्यवतेरपि नक् ॥

अत उपधायाः ॥ ११६ ॥

अङ्गोपधाया अकारस्य स्थाने ञिति णिति च प्रत्यये वृद्धिर्भवति । पाक,स्त्यागो,यागः । पाचयति । पाचकः । पाठयति । पाठकः । अत इति किम् । भेदयति, भेदकः । उपधाया इति किम् । चकासयति तक्षकः ॥

तद्धितेष्वचामादेः ॥ ११७ ॥

तद्धिते ञिति णिति च प्रत्यये परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । गार्ग्यः । वात्स्यः । दाक्षिः । प्लाक्षिः । णिति । औपगवः । कापटवः । स्वाङ्गो बागत इत्यत्राचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधते ॥

किति च ॥ ११८ ॥

किति च तद्धिते परतोऽङ्गस्याचामादेरचः स्थाने वृद्धिर्भवति । नडादिभ्यः फक् । नाडायनः । चारायणः । प्राग्वहतेष्ठक् । आक्षिकः । शालाकिकः ॥

इति काशिकायां वृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥

सप्तमाध्यायस्य तृतीयः पादः ।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥

देविका शिंशपा दित्यवाट् दीर्घसत्र श्रेयस् इत्येतेषामङ्गानामचामादेरचः स्थाने वृद्धिप्रसङ्गे आकारो भवति ञिति णिति किति तद्धिते परतः । देविकायां भवमुदकं, दाविकमुदकम् । देविकाकूले भवाः शालयः, दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राचां ग्रामः । तत्र भवः पूर्वदाविकः । प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः साप्याकार एव भवति । शिंशपा । शिंशपाया विकारश्चमसः, शांशपश्चमसः । पलाशादिरयं तेन

पदे अण् अनुदात्तादिलक्षणो वा अञ्। शिंशपास्थले भवाः, शांशपास्थलाः। पूर्वशिंशपा नाम प्राचां ग्रामः तत्र भवः पूर्वशांशपः। दित्यवाट्। दित्यौह इदं, दात्यौहम्। दीर्घसत्रे भवं, दार्घसत्रम्। श्रेयसि भवं, श्रायसम्॥ वहीनरस्येद्वचनम्॥ * ॥ वृद्धिविषये ऽचामादेरचः स्थाने वहीनरस्य इकारादेशो भवति। वहीनरस्यापत्यं, वैहीनरिः। के चित्तु विहीनरस्यैव वैहीनरिमिच्छन्ति॥

केकयमित्त्रयुप्रलयानां यादेरियः॥ २॥

केकय मित्त्रयु प्रलय इत्येतेषां यकारादेरिय इत्ययमादेशो भवति तद्धिते ञिति णिति किति च परतः। केकयस्यापत्यं कैकेयः। जनपदशब्दात्क्षत्रियादञित्यञ्प्रत्ययः। मित्त्रयुभावेन श्लाघते, मैत्त्रेयिकया श्लाघते। गोत्रचरणाच्छ्लाघात्याकारतदवेतेष्विति वुञ्। लौकिकं हि तत्र गोत्रं गृह्यते। लोके चर्षिशब्दो गोत्रमित्यभिधीयते। प्रलय। प्रलयादागतं, प्रालेयमुदकम्॥

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्॥ ३॥

यकारवकाराभ्यामुत्तरस्य अचामादेरचः स्थाने वृद्धिर्न भवति ताभ्यां तु यकारवकाराभ्यां पूर्वमैचावागमौ भवतो ञिति णिति किति च तद्धिते परतः। यकारादैकारः। वकारादौकारः। व्यसने भवं, वैयसनम्। व्याकरणमधीते, वैयाकरणः। स्वश्वस्यापत्यं, सौवश्वः। य्वाभ्यामिति किम्। त्र्यर्थस्यापत्यं त्रार्थिः। पदान्ताभ्यामिति किम्। यष्टिः प्रहरणमस्य याष्टीकः। यतेश्छात्रा याताः। प्रतिषेधवचनमैचो विषयप्रक्लृप्त्यर्थं,मिह माभूद्वाध्यश्विः। माध्यश्विरिति। नह्यत्र य्वाभ्यामुत्तरस्य वृद्धिप्रसङ्गोऽस्ति। वृद्धेरभावात्प्रतिषेधोऽपि नास्तीत्यप्रसङ्गः॥ उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्यते॥ पूर्वेष्वलिन्दे भवः, पूर्वैष्वलिन्दः। यत्र तूत्तरपदसंबन्धी यण् न भवति तत्र नेष्यते प्रतिषेधः। द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिकः॥

द्वारादीनां च ॥ ४ ॥

द्वार इत्येवमादीनां य्वाभ्याम् उत्तरपदस्याचामादेरचः स्थाने वृद्धिर्न भवति पूर्वौ तु ताभ्यामैजागमौ भवतः । द्वारे नियुक्तः, दौवारिकः । द्वारपालस्येदं, दौवारपालम् । तदादिविधिश्चात्र भवति । स्वरमधिकृत्य कृतो ग्रन्थः, सौवरः । सौवरोऽध्यायः । सौवर्यः सप्तम्य इति । व्यल्कशे भवः, वैयल्कशः । स्वस्तीत्याह, सौवस्तिकः । स्वर्भवः, सौवः ॥ अव्ययानां भमात्रे टिलोपः ॥ * ॥ स्वर्गमनमाह, सौवर्गमिकः । स्वाध्यायन इति के चित्पठन्ति, तदनर्थकम् । शोभनोऽध्याय, इत्येतस्यां व्युत्पत्तौ तु पूर्वेणैव सिद्धम् । अथाप्येवं व्युत्पत्तिः क्रियते । स्वोऽध्यायः स्वाध्याय इति । एवमप्यत्रैव स्वशब्दस्यैव पाठात्सिद्धम् । तदादावपि हि वृद्धिरियं भवत्येव । स्फ्यकृतस्यापत्यं, स्फैयकृतः । स्वादुमृदुन इदं, सौवादुमृदवम् । श्वन् । शुन इदं, शौवनम् । अवर्णा इति प्रकृतिभावः । शुनो विकारो मांसं, शौवम् । प्राणिरजतादिभ्योऽञित्यञ् । श्वादंष्ट्रायां भवः, शौवादंष्ट्रो मणिः । स्वस्येदं, सौवम् । स्वग्रामे भवः, सौवग्रामिकः । अध्यात्मादित्वाट्ठञ् । अपदान्तार्थोयमारम्भः । द्वार । स्वर । स्वाध्याय । व्यल्कश । स्वस्ति । स्वर् । स्फ्यकृत । स्वादुमृदु । श्वन् । स्व ॥

न्यग्रोधस्य च केवलस्य ॥ ५ ॥

न्यग्रोधशब्दस्य केवलस्य यकारादुत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति तस्माच्च पूर्वमैकार आगमो भवति । न्यग्रोधस्य विकारः, नैयग्रोधश्चमसः । केवलस्येति किम् । न्यग्रधमूले भवाः शालयः, न्याग्रोधमूलाः शालयः । न्यग्रोहयतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थं,मव्युत्पत्तिपक्षे विध्यर्थम् ॥

न कर्मव्यतिहारे ॥ ६ ॥

कर्मव्यतिहारे यदुक्तं तन्न भवति । प्रतिषेधागमयोरयं प्रतिषेधः । व्यावक्रोशी । व्यावलेखी व्यावचर्ती व्यावहासी वर्त्तते । कर्म्मव्यतिहारे णच् स्त्रियामिति णच् प्रत्ययस्तदन्तात्णचः स्त्रियामञ् * ॥

* तदन्ताद् टिड्ढाणञिति ङीप् । इत्यधिकमेकस्मिन्पुस्तके ।

स्वागतादीनां च ॥ ७ ॥

स्वागत इत्येवमादीनां यदुक्तं तन्न भवति । स्वागतमित्याह, स्वागतिकः । स्वध्वरेण चरति, स्वाध्वरिकः । स्वङ्गस्यापत्यं, स्वाङ्गिः । व्यङ्गस्यापत्यं, व्याङ्गिः । व्यडस्यापत्यं, व्याडिः । व्यवहारेण चरति, व्यावहारिकः । व्यवहारशब्दोऽयं लौकिके वृत्ते वर्त्तते न तु कर्म्मव्यतिहारे । स्वपतौ साधुः, स्वापतेयः । द्वारादिषु स्वशब्दपाठाच्च प्राप्तिः । स्वागत । स्वध्वर । स्वङ्ग । व्यङ्ग । व्यड । व्यवहार । स्वपति ॥

श्वादेरिञि ॥ ८ ॥

श्वादेरङ्गस्य इञि परतो यदुक्तं तन्न भवति । श्वभस्त्रस्यापत्यं, श्वाभस्त्रिः । श्वादंष्ट्रिः । स्वशब्दो द्वारादिषु पठ्यते, तत्र तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकम् ॥ इकारादिग्रहणं कर्त्तव्यं श्वागणिकाद्यर्थम् ॥ * ॥ श्वगणेन चरति, श्वागणिकः । श्वायूथिकः ॥ तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यते ॥ श्वाभस्त्रेरिदं, श्वाभस्त्रम् ॥

पदान्तस्यान्यतरस्याम् ॥ ९ ॥

श्वादेरङ्गस्य पदशब्दान्तस्यान्यतरस्यां यदुक्तं तन्न भवति । श्वापदस्येदं, श्वापदम् । शौवापदम् ॥

उत्तरपदस्य ॥ १० ॥

उत्तरपदस्येत्ययमधिकारः, हनस्तोचिण्णलोरिति प्रागेतस्मात् । यदित ऊर्द्ध्वमनुक्रमिष्याम उत्तरपदस्येत्येवं तद्वेदितव्यम् । वक्ष्यत्यवयवादृतोः । पूर्ववार्षिकम् । अपरवार्षिकम् । पूर्वहैमनम् । अपरहैमनम् । यत्र पञ्चमीनिर्द्देशो नास्ति जे प्रोष्ठपदानामित्येवमादौ तदर्थमुत्तरपदाधिकारः । पञ्चमीनिर्द्देशेष्वपि विस्पष्टार्थं वृद्धेश्च व्यपदेशार्थम् । उत्तरपदशब्दो सर्वे चेत्युत्तरपदाधिकारे वै या वृद्धिरित्येवं विज्ञायते ॥

अवयवादृतोः ॥ ११ ॥

अवयववाचिन उत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । पूर्ववार्षिकम् । पूर्वहै-

Digitized by Google

मनम् । अपरत्रार्षिकम् । अपरहैमनम् । पूर्वं वर्षाणामपरं वर्षाणामित्येकदेशिसमासः । तत्र भव इत्येतस्मिन्नर्थे वर्षाभ्यष्ठक् हेमन्ताच्च सर्वत्राण् च तलोपश्च इत्यण् प्रत्ययः, तत्र ऋतोर्वृद्धिमद्विधाववयवादिति * तदन्तविधिः । अवयवादिति किम् । पूर्वासु वर्षासु भवं पौर्ववर्षिकम् । कालाट्ठञ् इति ठञ् । अवयवपूर्वस्यैव तदन्तविधिर्नान्यस्य ॥

सुसर्वार्द्धाज्जनपदस्य ॥ १२ ॥

सु सर्व अर्द्ध इत्येतेभ्य उत्तरस्य जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्द्धपाञ्चालकः । जनपदतदवध्योश्च अवृद्धादपि बहुवचनविषयादिति वुञ् । सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः ॥

दिशोऽमद्राणाम् ॥ १३ ॥

दिग्वाचिन उत्तरस्य जनपदवाचिनो मद्रवर्जितस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । पूर्वपाञ्चालकः । अपरपाञ्चालकः । दक्षिणपाञ्चालकः । पूर्ववत्तदन्तविधिः प्रत्ययश्च । दिश इति किम् । पूर्वः पञ्चालानां, पूर्वपञ्चालः । तत्र भवः, पौर्वपञ्चालकः । आपरपञ्चालकः । अमद्राणामिति किम् । पौर्वमद्रः । आपरमद्रः । मद्रेभ्योऽञित्यञ्प्रत्ययः ॥

प्राचां ग्रामनगराणाम् ॥ १४ ॥

प्राचां देशे ग्रामनगराणां दिश उत्तरेषामचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । ग्रामाणाम् । पूर्वेषु कामशम्यां भवः, पूर्वैषुकामशमः । अपरैषुकामशमः । पूर्वकार्ष्णमृत्तिकः । अपरकार्ष्णमृत्तिकः । नगराणाम् । पूर्वस्मिन्पाटलिपुत्रे भवः, पूर्वपाटलिपुत्रकः । अपरपाटलिपुत्रकः । पूर्वकान्यकुब्जः । अपरकान्यकुब्जः । ग्रामत्वादेव

* क्वचिदवयवानामिति षष्ठीबहुवचनान्तः पाठः । सोऽयुक्तः । अर्थासंगतेरिति पदमञ्जरी ।

Digitized by Google

नगराणामपि ग्रहणे सिद्धे भेदेन यदुभयोरुपादानं तत्संबन्धभेदप्रतिपत्त्यर्थं दिक्पूर्वपदो हि समुदायः पूर्वेषुकामशम्यादिः ग्रामनामधेयम् । पाटलिपुत्रादिः पुनरुत्तरपदमेव नगरमाह । तत्र ग्रामवाचिनमाङ्गनामवयवस्य दिक्शब्दादुत्तरस्य वृद्धिर्भवतीत्येवमभिसंबन्धः क्रियते । इतरत्र तु दिश उत्तरेषां नगराणामित्येव । पूर्वेषु कामशम इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवतीति ज्ञापितं नेन्द्रस्य परस्येति प्रतिषेधेन ॥

संख्यायाः संवत्सरसंख्यस्य च ॥ १५ ॥

संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्यायाश्चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । द्वौ संवत्सरावधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः । संख्यायाः । द्वे षष्टी अधीष्टो भृतो भूतो भावी वा, द्विषाष्टिकः । द्विसाप्ततिकः । द्विषष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्त्तमानः कालाधिकारविहितं प्रत्ययमुत्पादयति । परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वैसमिकः त्रैसमिक इत्युत्तरपदवृद्धिर्न भवति । द्विवर्षा त्रिवर्षा माणविकेत्यपरिमाणबिस्ताचितेति पर्युदासो न भवति ॥

वर्षस्याभविष्यति ॥ ॥ १६ ॥

संख्याया उत्तरस्य वर्षशब्दस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः, स चेत्तद्धितो भविष्यत्यर्थे न भवति । द्विवर्षं अधीष्टो भृतो भूतो वा, द्विवार्षिकः । त्रिवार्षिकः । अभविष्यतीति किम् । यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति । त्रीणि वर्षाणि भावीति त्रैवर्षिकम् । अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न भवति । गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म्म करिष्यतीति, द्विवार्षिको मनुष्यः ॥

परिमाणान्तस्यासंज्ञाशाणयोः ॥ १७ ॥

परिमाणान्तस्याङ्गस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो

वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः, संज्ञायां विषये शाणे चोत्तरपदे न भवति । द्वौ कुडवौ प्रयोजनमस्य, द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं, द्विसौवर्णिकम् । विभाषा कार्षापणसहस्राभ्यामित्यत्र सुवर्णशतमानयोरुपसंख्यानमिति लुको विकल्पः । द्वाभ्यां निष्काभ्यां क्रीतं, द्वित्रिपूर्वान्निष्कात्, द्विनैष्किकम् । असंज्ञाशाणयोरिति किम् । पाञ्चलोहितिकम् । पाञ्चकपालिकम् । पञ्च लोहित्यः परिमाणमस्य पञ्च कपालानि परिमाणमस्येति विगृह्य तदस्य परिमाणमिति योगविभागात्प्रत्ययस्तद्धितान्तश्चायं समुदायः संज्ञा । द्वाभ्यां शाणाभ्यां क्रीतं, द्वैशाणम् । त्रैशाणम् । शाणाद्वा, द्वित्रिपूर्वादण्चेत्यण् प्रत्ययः । असंज्ञाशाणकुलिजानामिति के चित्पठन्ति । द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः ॥

जे प्रोष्ठपदानाम् ॥ १८ ॥

जइति जातार्थो निर्दिश्यते । तत्र यस्तद्धितो विहितस्तस्मिन् ञिति णिति किति च परतः प्रोष्ठपदानामुत्तरस्याचामादेरचो वृद्धिर्भवति । प्रोष्ठपदा नाम नक्षत्रं ताभिर्युक्तः काल इत्यण् । तस्य लुबविशेषइति लुप् । प्रोष्ठपदासु जातः । सन्धिवेलाद्यृतुनक्षत्रेभ्योऽणित्यण् । प्रोष्ठपदो माणवकः । जइति किम् । यदा प्रोष्ठपदो मेघो धरणीमभिवर्षति । प्रोष्ठपदासु भवः प्रौष्ठपदः । प्रोष्ठपदानामिति बहुवचननिर्देशात्पर्यायोऽपि गृह्यते भद्रपाद इति ॥

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ १९ ॥

हृद् भग सिन्धु इत्येवमन्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः । सुहृदयस्येदं, सौहार्दम् । सुहृदयस्य भावः, सौहार्दम् । सुभगस्य भावः, सौभाग्यम् । दौर्भाग्यम् । सुभगाया अपत्यं, सौभागिनेयः । दौर्भागिनेयः । कल्याण्यादिषु सुभगदुर्भगेति पठ्यते । सुभग मन्त्रे इत्युद्गात्रादिषु पठ्यते । तत्रोत्तरपदवृद्धिर्नेष्यते । मह्यते सौभगाय । छन्दसि सर्वविधीनां विकल्पितत्वात् ।

सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, सक्तुसिन्धुषु भवः, साक्तुसैन्धवः। पानसैन्धवः। सिन्धुशब्दः कच्छादिषु पठ्यते, तेन तदन्तविधिरिष्यते इत्यणप्रत्ययः॥

अनुशतिकादीनां च ॥ २० ॥

अनुशतिक इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति वा परतः। अनुशतिकस्येदम्, आनुशातिकम्। अनुहोडेन चरति, आनुहौडिकः। अनुसंवरणे दीयते, आनुसांवरणम्। अनुसंवत्सरेण दीयते, आनुसांवत्सरिकः। अङ्गारवेणुर्नाम कश्चित्तस्यापत्यम्, आङ्गारवैणवः। असिहत्य। तत्र भवं, आसिहात्यम्। अस्यहत्य इति केचित्पठन्ति ततोपि विमुक्तादित्वादण्। अस्यहत्यशब्दोस्मिन्नध्यायेस्ति, आस्यहात्यः। अस्यहेतिरित्येवमपरे पठन्ति। अस्यहेतिः प्रयोजनमस्य, आस्यहैतिकः। अत एव वचनादस्य समुदायस्य प्रातिपदिकत्वं विभक्तेश्चालुक्। वध्योग इति बिदादिरयं, तस्यापत्यं वाध्यौगः। पुष्करसत्, अनुहरत्, एतौ बाह्वादिषु पठ्येते। पौष्करसादिः। आनुहारतिः। कुरुकत गर्गादिः, कौरुकात्यः। कुरुपञ्चाल। कुरुपञ्चालेषु भवः, कौरुपाञ्चालः। जनपदसमुदायो जनपदग्रहणेन गृह्यते इति वुञ् न भवति। उदकशुद्धस्यापत्यम्, औदकशौद्धिः। इहलोक। परलोक। तत्र भवः, ऐहलौकिकः। पारलौकिकः। लोकोत्तरपदस्येति ठञ्। सर्वलोक। तत्र विदितः, सार्वलौकिकः। सर्वपुरुषस्येदं, सार्वपौरुषम्। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। प्रयोग। तत्र भवः, प्रायौगिकः। परस्त्री। पारस्त्रैणेयः। कुलटाया वेतीनङ् * ॥ राजपुरुषात् ष्यञि॥ राजपौरुष्यम्। ष्यञीति किम्। राजपुरुषस्यापत्यं राजपुरुषायणिः। उदीचां वृद्धादगोत्रादिति फिञ्। शतकुम्भसुखशयनादयः। शतकुम्भे भवः, शातकौम्भः। सौखशायनिकः। पारदारिकः † ॥

---

* अपपाठो ऽयम्। तत्र हि स्वरूपग्रहणम्। कल्याण्यादिषु परस्त्रीशब्दः पठ्यते तस्मात्कल्याण्यादीनामिनङिति पाठ इति पदमञ्जरी।

† शतकुम्भेत्यारभ्य पारदारिक इत्यन्तं बहुषु पुस्तकेषु नास्ति।

सूत्रनडस्यापत्यं सौत्रनाडिः । आकृतिगणश्चायमिष्यते । तेनेदमपि सिद्धं भवति । अभिगममर्हति, आभिगामिकः । अधिदेवे भवमाधिदैविकम् । आधिभौतिकम् । चतस्र एव विद्याः, चातुर्वैद्यम् । स्वार्थे ष्यञ् । अनुशतिक । अनुहोड । अनुसंवत्सर । अङ्गारवेणु । असिहत्य । वध्योग । पुष्करसद् । अनुहरत् । कुरुकत । कुरुपञ्चाल । उदकशुद्ध । इहलोक । परलोक । सर्वलोक । सर्वपुरुष । सर्वभूमि । प्रयोग । परस्त्री ॥ राजपुरुषात् ष्यञि ॥ सूत्रनड ॥

देवताद्वन्द्वे च ॥ २१ ॥

देवताद्वन्द्वे च पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति वा परतः । आग्निमारुतीमनड्वाहीमालभेत । आग्निमारुतं कर्म्म । यो देवताद्वन्द्वः सूक्तहविःसंबन्धी तत्रायं विधिः । इह तु न भवति । स्कन्दविशाखौ देवते अस्य, स्कान्दविशाखः । ब्रह्मप्रजापती । ब्राह्मप्रजापत्यम् ॥

नेन्द्रस्य परस्य ॥ २२ ॥

इन्द्रशब्दस्य परस्य यदुक्तं तन्न भवति । सौमेन्द्रः । आग्नेन्द्रः । परस्येति किम् । ऐन्द्राग्नमेकादशकपालं चरुं निर्वपेत् । इन्द्रशब्दे द्वावचौ तत्र तद्धिते एकस्य यस्येति लोपो ऽपरस्य पूर्वेण सहैकादेश इत्यप्राप्तिरेव वृद्धेः, तदिदं प्रतिषेधवचनं ज्ञापकम् । बहिरङ्गमपि पूर्वोत्तरपदयोः पूर्वं कार्यं भवति पश्चादेकादेश इति, तेन पूर्वैषुकामशम इत्यादि सिद्धं भवति ॥

दीर्घाच्च वरुणस्य ॥ २३ ॥

दीर्घादुत्तरस्य वरुणस्य यदुक्तं तन्न भवति । ऐन्द्रावरुणम् । मैत्रावरुणम् । दीर्घादिति किम् । आग्निवारुणीमनड्वाहीमालभेत । अग्नेरीदग्नेः सोमवरुणयोरित्यस्यानङपवादस्य इद्वृद्धाविति प्रतिषेधो विधीयते तेन दीर्घात्परो न भवति ॥

प्राचां नगरान्ते ॥ २४ ॥

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति

तद्धिते ञिति णिति किति च परतः । सुह्मनगरे भवः, सौह्मनागरः । पौण्ड्रनागरः । प्राचामिति किम् । मद्रनगरमुदक्षु, तत्र भवः । माद्रनगरः ॥

अङ्गस्वधेनुवलजान्तस्य विभाषितमुत्तरम् ॥ २५ ॥

अङ्गल धेनु वलज इत्येवमन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिर्भवति विभाषितमुत्तर,मुत्तरपदस्य विभाषितं तद्धिते ञिति णिति किति वा परतः । कुरुजङ्गलेषु भवं, कौरुजङ्गलम् । कौरुजाङ्गलम् । वैश्वधेनवम् । वैश्वधैनवम् । सौवर्णवलजः । सौवर्णवालजः ॥

अर्धात्परिमाणस्य पूर्वस्य तु वा ॥ २६ ॥

अर्धशब्दात्परस्य परिमाणवाचिन उत्तरस्याचामादेरचः स्थाने वृद्धिर्भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति वा परतः । अर्धद्रोणेन क्रीतमार्धद्रौणिकम् । अर्धद्रौणिकम् । अर्धकौडविक,मार्धकौडविकम् । परिमाणस्येति किम् । अर्धक्रोशः प्रयोजनमस्यार्धक्रोशिकम् * ॥

नातः परस्य ॥ २७ ॥

अर्धात्परस्य परिमाणाकारस्य वृद्धिर्न भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति वा परतः । अर्धप्रस्थिकः । आर्धप्रस्थिकः । अर्धकंसिकः । आर्धकंसिकः । अत इति किम् । आर्धकौडविकः । तपरकरणं किम् । इह मा भूत् । अर्धखार्यां भवा अर्धखारी, किं च स्यात् आर्धखारी भार्या यस्य अर्धखारीभार्यः । वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारइति पुंवद्भावप्रतिषेधो न स्यात्, यत्र हि तद्धिते वृद्धिः प्रतिषिध्यते स वृद्धिनिमित्तं न भवतीति पुंवद्भावो न प्रतिषिध्यते । यथा वैयाकरणी भार्या यस्य, वैयाकरणभार्य इति ॥

प्रवाहणस्य ढे ॥ २८ ॥

प्रवाहणस्य ढे परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वप-

* परिमाणस्येति किम् । अर्धक्रोशः प्रयोजनमस्यार्धक्रोशिकमिति बहुषु पुस्तकेषु नास्ति ।

Digitized by Google

दस्य वा भवति । प्रवाहणस्यापत्यं, प्रावाहणेयः । प्रवाहणेयः । शुभ्रादिभ्यश्चेति ढक् प्रत्ययः ॥

तत्प्रत्ययस्य च ॥ २९ ॥

ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धितेषु परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वस्य तु वा । प्रवाहणेयस्यापत्यं प्रावाहणेयिः । प्रवाहणेयिः । प्रावाहणेयकम् । प्रवाहणेयकम् । बाह्यतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुमशक्येति सूत्रारम्भः ॥

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ३० ॥

नञ उत्तरेषां शुचीश्वर क्षेत्रज्ञ कुशल निपुण इत्येतेषामचामादेरचो वृद्धिर्भवति पूर्वपदस्य वा भवति तद्धिते ञिति णिति किति वा परतः । शुचि । अशौचम् । आशौचम् । ईश्वर । आनैश्वर्यं,अनैश्वर्यम् । क्षेत्रज्ञ । आक्षैत्रज्ञ्यम् । अक्षैत्रज्ञम् । कुशल । आकौशलम् । अकौशलम् । निपुण । आनैपुण,अनैपुणम् । अत्र केचिदाहुरियं पूर्वपदस्य वृद्धिरप्राप्तैव विभाषा विधीयते । नञ्पूर्वात्तत्पुरुषादित्युत्तरो भावप्रत्ययः प्रतिषिध्यते तत्र शुच्यादिभ्य एव प्रत्यये कृते पश्चान्नञ्समासे सति वृद्धिरनङ्गस्यापि वचनाद्भवतीति । तदपरे न मृष्यन्ते । भाववचनादन्योपि हि तद्धितो वृद्धिनिमित्तमपत्यादिष्वर्थेषु नञ्समासादेव विद्यते बहुव्रीहेश्च नञ्समासाद्भाववचनोप्यस्ति तत्राङ्गाधिकारोपमर्दनं न युज्यतइति । अक्षेत्रज्ञानीश्वरौ तत्पुरुषावेव ब्राह्मणादिषु पठ्येते,ततस्ताभ्यां भावे ष्यञ्भवति ॥

यथातथयथापुरयोः पर्यायेण ॥ ३१ ॥

यथातथ यथापुर इत्येतयोर्नञ उत्तरयोः पर्यायेणाचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति वा परतः । आयथातथ्यम् । अयाथातथ्यम् । आयथापुर्यं,मयाथापुर्यम् । अयथातथ, अयथापुरेति ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ । सूत्रे यथातथयथापुरशब्दौ तु यथा सादृश्यइति अव्ययीभावसमासौ तथा नपुंसकाश्रयं ह्रस्वत्वं कृतम् । भाष्ये तु यथादर्शितम् अयथातथाभाव इति तथा सुप्सुपेति समासो लक्ष्यते ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकावशेषः ॥

एवं तत्र गिरिगर्तोदरेऽदरे दामोदरादरानुगृहीतो हृतोपद्रवा द्रवातिरेकेण समयं रसमयं जानन्तः केऽपि किमपि नापरं परं तदेकमनसो मनसो विषयीचक्रुः ॥ १०४ ॥

द्रवातिरेकेण सारस्याधिक्येन । अपरं श्रीकृष्णादन्यम् । परम् उत्कृष्टम् ॥ १०४ ॥

तेषु च ।

एके विस्मयिनः परे रतिभृतः केचित् प्रहासप्रियाः
प्रोत्साहाश्रयिणः परे सखितया प्रीत्येकनिष्ठाः परे ।
सर्वे कौतुकिनः स्मयेन रभसेनापि प्रसीदद्धियो
वात्सल्यादनवस्थिता तु जननी न स्वास्थ्यमालम्बते ॥ १०५ ॥

अथ तत्र विविधवासनानां सर्वेषामेकत्र स्थितानां निखिलरसपोषकस्वरूपे तस्मिन् श्रीकृष्णे स्वस्वभावोदयमाह । विस्मयिनो विप्रपौराद्याः । रतिभृतः श्रीराधाद्या गोपीजनाः । प्रहासप्रिया विदूषकाः सखिभेदाः । प्रोत्साहाश्रयिणः प्रियसखाः सुबलादयः । प्रीत्येकनिष्ठा दासा रक्तकपत्रकाद्याः । जननी न स्वास्थ्यमिति, तत्रापि वात्सल्यस्योदयोद्रेक इति शान्ताद्याः पञ्च मुख्यरसा दर्शिताः ॥ १०५ ॥

एवं सति सा सादरमेलालवङ्गखण्डाखण्डामोदघनघनसारसारस्यरस्यतमं विदलितमुद्वेगमुद्वेगहारि हारितरताम्बूलिकादलपुटघटितवीटीपरिपाकललितं करकमले निधाय निजगाद ॥ १०६ ॥

विदलितं कर्तितम्, उद्वेगं गुवाकफलम्, "गुवाकः खपुरोऽस्य तु । फलमुद्वेग"मित्यमरः । कथंभूतम्, एला च लवङ्गखण्डानि च अखण्ड आमोदो यत्र तथाभूतो घनो निविडो घनसारः कर्पूरश्च तैर्यत् सारस्यं सरसता तेन रस्यतमम् आस्वाद्यम् ॥ १०६ ॥

वत्स मुरलीवादनं परिहर नादेनास्या दामोदर मोदरपूरणं भवति भव तिरोधापयितुं खेदमधुना धुनासि किमपरं मे मनो मनोहरमिदं प्साहीप्सा हीयते यच ॥ १७७ ॥

अस्या मुरल्या नादेन· उदरपूरणं मा भवति न स्यात्, खेदं तिरोधापयितुं दूरीकर्तुम्· अधुना भव वर्तस्व, इदं मनोहरं वस्तु प्साहि भुङ्क्ष्व, यत्र ईप्सा हि निश्चितम्· ईयते प्राप्नोति तच्च प्साहि, "प्सा भक्षणे" ॥ १७७ ॥

गतो हि बहुतिथोऽनेहा नेहापरं विलम्बस्व ॥ १७८ ॥

बहुतिथः· बहूनां पूरणः, अनेहा कालः ॥ १७८ ॥

यदि विलम्बसे दिवि लम्बसेविष्यमानबलविरामापेक्षया रामापेक्षया तदा कृतं ते यदयं बुभुक्षितः खिद्यति ॥ १७९ ॥

दिवि लम्बानि लम्बमानानि सेविष्यमानानि· अतिस्फुरन्ति जलानि तेषां विरामापेक्षया यदि विलम्बसे तदा रामापेक्षया तव कृतम्, अलमित्यर्थः । रामापेक्षा त्वयातः परं त्यक्तेति द्रुतमेव भोजनप्रवृत्तिकरणमिति भावः ॥ १७९ ॥

अथवेदं ताम्बूलमद्धि मद्धितकृत इति सुबलमामन्त्र्य सुबल बलमानस्ते महानेष प्रणयः, तदिदमाशय समाशय सरसताम्बूलमिति तस्य करे ददाति ॥ १८० ॥

अधुनैव त्वया भोजितोऽस्मीति नेदानीं मे बुभुक्षेत्यनश्नन्तमाह· अथवेदमिति । अद्धि भुङ्क्ष्व, मद्धितकृते, मदनुरोधार्थमित्यर्थः । आशय भोजय । समः सख्या तुल्य आशयोऽन्तःकरणं यस्य हे तादृश ॥ १८० ॥

स च सचमत्कारमादाय समाकृष्य वंशिकां वंशिकाङ्गुरागस्य तस्य मुखकमलमङ्गुलेन विमृज्य ताम्बूलमादयामास मादयामास च मातृहृदयं हृदयंगमो धराधरधराधरपुटं च रञ्जयामास ॥ १८१ ॥

वंशिकाया अगुरुरसस्य· अनुरागो यस्य तस्य, “ वंशिकागुरुराजा· र्हे”त्यमरः । धराधरधरस्य कृष्णस्याधरपुटम् ॥ १८१ ॥

अथ वर्हिरत्र ।

प्रभुस्येन विडौजसा दृढरुषा नुन्नो घनानां गणो
यावच्छक्ति ववर्ष शक्तिसदृशं वाति स्म झंझानिलः ।
अद्रीन्द्रस्य तु मेखलापरिसरान्निर्धाविता धूलयो
नैवाक्लेदि खगैर्मृगैश्च न दलैः शीर्णै तरूणामपि ॥ १८२ ॥

विडौजसा· इन्द्रेण, “विडौजाः पाकशासन”इत्यमरः, श्लेषभङ्ग्या मालिप्रदानं च । नुन्नः प्रेरितः ॥ १८२ ॥

आरात् पारावारवारादपारान्
वारां भारान् वारिदा यानहार्षुः ।
ते तं जग्मुः क्ष्मां गताः किंत्वमीषां
गारोद्गारक्षोभ एवावशिष्टः ॥ १८३ ॥

पारावारवारात् समुद्रसमूहात् ते वारां भारास्तं समुद्रमेव क्ष्मां गताः सन्तो जग्मुः । अमीषां वारिदानां गारोद्गाराभ्यां निगिलनोद्गिल· नाभ्यां क्षोभः ॥ १८३ ॥

किंच ।

भ्रान्तं भूरि महानिलैर्बहुतरं वान्तं पयोदैः पयः
श्रान्तं तैरपि तैश्च हन्त पतितं तस्यैव पादोपरि ।
न श्रान्तं पतितं च नैव तदपि क्रोधेन वास्तोष्पतेः
क्रोधान्धः परमन्ध एव हतधीर्नान्धो दृशान्धो जनः ॥ १८४ ॥

तस्यैव· इन्द्रस्यैव ॥ १८४ ॥

एवं वृष्ट्ये निरन्तरायनिरन्तराय्यमाणाः प्रलयकालतद्विधजगत्· प्रभञ्जनप्रभञ्जनसहिताः प्रबला बलाहका अहो अहोरात्रान् सप्त

तन्तुं सप्ततन्तुभङ्गजनितमन्युं शतमन्युं शतकोटिकोटिकुटिलं प्रीण-यितुमशक्नुवन्तोऽवन्तोऽनिशं तन्निदेशमपि विनाशनाशया व्रजभुवां स्वस्थपुटभेदनस्य स्वस्थपुटभेदनस्य दशामाषं गता गतासव इव यदा बभूवुस्तदा त्रपयापयातमदो निजपुरं पुरंदरो न गन्तुमियेष ॥ १८५ ॥

अहोरात्रान् सप्त व्याप्य वृष्ट्यर्थं निरन्तरायं निर्विघ्नं यथा स्यात् तथा निरन्तरमयमानाश्चलन्तो बलाहका मेघास्तं तु शतमन्युमिन्द्रं तु प्रीणयितुमशक्नुवन्तः श्रान्त्या गतासव इव यदा बभूवुस्तदा पुरंदरो नि-जपुरं गन्तुं त्रपया न इयेष नैच्छत् । तं तु कीदृशम्, सप्ततन्तोर्मखस्य भङ्गेन जनितमन्युं, शतकोटिकोटेर्वज्राग्रादपि कुटिलम् । व्रजभुवां स्वस्थं यत् पुटभेदनं पत्तनं तस्य विनाशनस्याशया तन्निदेशमिन्द्राज्ञामनिशम-वन्तः पालयन्तोऽपि । किंच, स्वेषां यानि स्थपुटानि शिरोऽस्थीनि तेषां भेदनस्येव स्फोटनस्येव दशां गताः ॥ १८५ ॥

यस्य तु सप्तभिरहोभिरहो सप्तयुगायितं धरणिधरधरपरिज-नानां तु सप्तघटिकाभिरघटि काभिरमणीयतेयं भगवतो विभवस्य भवस्य कमलभवस्य च यो न गोचरो यो नगोऽचरोऽस्य करक-मलगतः, स च तावता वतायामवतापि तापिभुवनेन तापिभुवनेन धारानिकरकरकापातवातबाधासहस्रेणापि निरुपद्रुतो द्रुतोद्वर्तितश-रीर इव बहुशो बहुशोभाभरनिर्भर इवाभाति स्म ॥ १८६ ॥

सप्तभिरहोभिः सप्तभिर्घटिकाभिरिव अघटि चेष्टितं, समभा-वीति वा, इन्द्रस्य महत् कष्टमेषां तु महत् सुखमेवेति ध्वनितम् । वर्णि-तमर्थमुपसंहरन् सशीत्कारमाह भगवतो विभवस्य केयमभिरमणीयता यो विभवो भवस्य शंभोः । योऽचरो निश्चलो नगो गोवर्धनपर्वतः । स च तावतापि धारानिकरादिसहस्रेणापि निरुपद्रुतो भगवच्छक्तिसंचारादिति भावः । वतेति विस्मये । आयामवतापि, यतस्तापीनि अनुतापयुक्तानि भुवनानि लोका यतस्तेन । तापकानि जलानि यत्र तेन ॥ १८६ ॥

* तं त्विति मुद्रणोपे परसवर्णः प्राग्वत् ।

व्रजे पुरगोपुरगोपानसीप्रभृतिकमपि कमपि शोभाभरमापाति-प्रभावतोऽभावतो विपदां कृतमङ्गलस्नानमिव ॥ १८७ ॥

किंच । व्रजे पुरेति, तत्रापि भगवच्छक्तिनिधानमेव हेतुरित्याह-आतिप्रभावत इति ॥ १८७ ॥

तथा सति जन्मान्तरमापन्नमिव गगनम्, अङ्कुरिता इव हरितः, नश्यद्दृष्टायामन्धतमसेरुद्गीर्णा इव प्रकाशनामा पदार्थाः, तत्काल-मदितिगर्भान्निष्क्रान्त इव किरणमाली, तत्क्षणमादिवराहेणोन्नीत-मिवावनितलं, सद्यः प्ररुह्य वर्धिता इव तरुगुल्मलतादयः, उन्मा-दव्याधिविनिर्मुक्त इव अपस्मारतो निर्गत इव प्रकृतिं गतः पवनः ॥ १८८ ॥

उन्मादापस्माराभ्यां परनिर्जोद्वेजकत्वद्योतनम् ॥ १८८ ॥

पतिव्रतताव्रततादवस्थ्येन जलनिधिपतिकृतात्मसमर्पणतया तद्गतजीवनत्वेन नाममात्रैकशरीरा गिरिदुहितरः, भगवतत्त्वावबो-धसंपत्तो कामादय इव कुतोऽपि द्रुतविद्रुताः पयोवाहाः ॥ १८९ ॥

पतिव्रतता पातिव्रत्यं तदेव व्रतं तस्य तादवस्थ्येन स्वस्थत्वेन जलनिधिरेव पतिस्तत्र कृतमात्मसमर्पणं याभिस्तत्तया । जीवनं जीवितं जलं च । गिरिदुहितरो नद्यः । पयोवाहा मेघाः ॥ १८९ ॥

क्रमपतितेषु सप्तस्वहोरात्ररूपगर्भेषु कालभार्याया अष्टममिवाप-त्यमहः समुत्पन्नं यदि तदा श्रीगोवर्धनधरः सरसमुवाच ॥ १९० ॥

काल एव भार्या तस्याः ॥ १९० ॥

भोभो आर्यपादाः,

नष्टा कष्टातिवृष्टिः क्षयसमयघनाः संक्षयं प्राप्नुवन्तः

शान्तं ध्वान्तं समन्तात् क्षितिरपि रहिता दुर्दमैः कर्दमौघैः ।

सप्ताहं प्राप्तमूर्च्छो नयनमिव समुन्मीलयामास सूर्यः

पुर्यां वः पूर्वरूपाः सपदि समुचितः प्रक्रमो निष्क्रमस्य ॥ १९१ ॥

क्षयसमयो महाप्रलयः । सप्ताहमिति, विंशत्यधिकचतुःशतघटिकातिक्रमज्ञानात् ॥ १९१ ॥

एवमुक्ते भगवतागवता सर्वे एव समुद्गिता मुदिताः सन्तो महोत्साहे तथाविधेऽनूना अनूनां धेनूनामावलिमग्रतो निष्क्रामयितुं प्रचक्रमिरे ॥ १९२ ॥

भगवता गिरिधारिणा, समुद्गिताः प्राप्तसमुदयाः, महोत्साहेऽनूना अन्यूनाः ॥ १९२ ॥

तासां च यथाहुंकृतमेव बहिर्निर्गमिषूणामिषूणामिव वेगो यद्यपि समभवत् तथापि तथा पिबन्तीनां भगवदाननमाधुर्यमाधुर्यमिवात्मानं मन्यमानानामन्यमानानादरतयादरतया च तद्बाधदुःखस्य चणविलम्बे विलम्बेष्टयति सति स तिलमात्रतो निष्कम्पानुकम्पानुगतया तयापाङ्गभङ्ग्यैव निष्क्रामयामास ॥ १९३ ॥

इषूणामिवेति बहुतणनिरोधोत्तरनिष्क्रमे पशूनां तथा स्वाभाव्यात्, तथापि तथा निर्विघ्नं पिबन्तीनामित्यर्थः, माधुर्यमतिश्रेष्ठम्, अत एव अन्यमाने सुखहेतुकसंमानान्तरे अनादरतया तद्बाधदुःखस्य तस्य माधुर्यपानस्य बाधे प्राप्ते यद्दुःखं तस्य अदरतया अनल्पतया च हेतुना चणविलम्बे सति श्रीकृष्णानिष्क्रमादर्शनात् पुनः स्वबलादेव परावृत्य बिलं गते वेष्टयति सति, स श्रीकृष्णः, अपाङ्गस्य भङ्ग्यैव अयमहमधुनैव युष्माननुसर्पामीति व्यञ्जयन्त्या इत्यर्थः, तया प्रसिद्धया, ताभिः शिचितप्रकारयेत्यर्थः ॥ १९३ ॥

ततश्च ।

पातालोदरतः फणीशितुरिव स्फीताः सहस्रं फणा
ज्योत्स्नाजालमिवालमन्धतमसचत्तं भुवो गर्भतः ।
अद्रीन्द्रस्य शिफावलिः स्फटिकजा संचारिणीवोद्धृता
निश्चक्राम समन्ततो बिलभुवः स्निग्धा गवां संततिः ॥ १९४ ॥

* बिलं वेष्टयतीत्येवं मुद्रणीये परस्वर्णः प्राप्नवत् ।

फणीशितुः शेषनागस्य फणा इति, अत्र घोरत्वप्रसक्तिमाशङ्क्याह ज्योत्स्नाज्ञालं चन्द्रिकासमूहः, तस्यापि दिने सूर्यतः पराभवमाशङ्क्य पुनराह शिखावलिः स्फटिकजेति ॥ १९४ ॥

एवं श्रीकृष्णोत्क्षिप्तिक्रमतः क्रमतः सर्वे एवाभीरा भीराहित्येन विकसदन्तरा दन्तराजिराजिकिरणमञ्जरीजरीजृम्भ्यमाणवदना गिरितलविवरतो वरतोषेण निश्चक्रमुश्चक्रमुत्साहस्य साहस्यसमासन्नं च समासेदुः ॥ १९५ ॥

दन्तराजीनां दन्तश्रेणीनां राजिनीभिर्विराजमानाभिः किरणमञ्जरीभिरतिप्रकाशमानवदनाः, हसो हासस्तेन सह वर्तमानं सहसं सहसस्य भावः साहस्यं तेन समासन्नं संसक्तम्· उत्साहस्य चक्रं, हासोत्साहयोरेकत्र साहित्यौचित्यात् ॥ १९५ ॥

ततश्च ।

भुवो गर्भात् सिद्धौषधिततय इव प्रज्वलन्त्यो दिवापि
चरन्तीनां शैलाद् घृणय इव महादिव्यरत्नावलीनाम् ।
भुजंगानां लोकादिव भुजगफणावृन्दमाणिक्यभासः
समुत्तस्थुः कृष्णे विनिहितनयनप्रान्तमाभीरनार्यः ॥ १९६ ॥

आभीरनार्यः श्रीगोपयुवतयः, शैलात् चरन्तीनां दिव्यरत्नावलीनां घृणयः किरणा इव । अत्र सिद्धौषधितत्यादीनां तिसृणामुपमानां कान्त्या महार्घ्यतया चोत्तरोत्तरप्राशस्त्याद्युवतियूथानामप्युत्तरोत्तरश्रेष्ठानां कनिष्ठक्रमेण निष्क्रमो ज्ञेयः ॥ १९६ ॥

एवं निःसृतेषु तेषु च सहचरादिषु । स्वयमपि च ।

करतलकृतशैलः शैलसीमामतीत्य
व्रजभुवि कृतपादाम्भोजलीलाविलासः ।
कुसुममयमिवैकं कन्दुकं वामपाणेः
शिथिलितमिव कृत्वा तं यथास्थानमास्थत् ॥ १९७ ॥

सहचरादिष्विति । अत्रायं क्रमः ।

निर्जग्मुः कालयन्तो गा गोपास्तास्तत्सखा अपि ।
पौरा गोप्यस्ततो वृद्धा नन्दः सर्वा ततः प्रसूः ॥

वामपाणेः सकाशात्· शिथिलितमिव कृत्वेति, दक्षिणहस्तास्पर्शैः स्वस्थानायासत्वं सर्वान् प्रति ज्ञापयितुम् । यथास्थानं तस्य स्थानमनतिक्रम्य, आस्यत् निक्षिप्तवान् ॥ १९७ ॥

एवं यथास्थलस्थलक्षणे क्षणेन कृते सति गिरीन्द्रे स्नेहानुतापितरौ पितरौ गाढमालिङ्ग्य शिरो जिघ्रतुः कुतूहली हली चालिलिङ्ग सस्नेहास्रम् ॥ १९८ ॥

स्नेहादनुतापितरौ· अतिशयेनानुतापिनौ १९८ ॥

हा स्रंसमानबलमिवाखिलमङ्गं गिरिभरेण निर्भरेण निर्भातमस्तीति प्रसूः प्रसूतवात्सल्यातिशया शयाभ्यां वामबाहुमस्य मृद्नती वामकरतलं चुचुम्ब ॥ १९९ ॥

प्रसूः श्रीयशोदा, शयाभ्यां पाणिभ्यां, मृद्नती संवाहयन्ती ॥ १९९ ॥

वात्सल्यकाष्ठाधिरोहिणी रोहिणी च मणिदीपावलिवलितकरतला साश्रुनीरा नीराजयामास ॥ २०० ॥

वात्सल्यस्य काष्ठा·उत्कर्षस्तामधिरोढुं शीलमस्याः सा ॥ २००॥

व्रजपुरपुरन्ध्रयोऽरन्ध्रयोजितशुभाशिषो निविडतरस्नेहोदध्यक्षता दध्यक्षताङ्कुरितदूर्वादिभिः पूजयामासुः ॥ २०१ ॥

अरन्ध्रं निश्छिद्रमेव योजिताः शुभा आशिषो याभिस्ताः, यतो निविडतरे स्नेहोदधौ· अक्षताः क्षतं छिद्रं तद्रहिताः, अव्यभिचरिता इत्यर्थः ॥ २०१ ॥

विप्रा विप्रागल्भ्या विप्रभार्या विप्रभार्याश्च सस्नेहमाश्लिष्य सप्रशंसाभिराशंसाभिरानर्चुः ॥ २०२ ॥

विप्रागल्भ्या विशिष्टप्रागल्भ्यवन्तः, विशिष्टया प्रभया· आर्याः ॥ २०२ ॥

सनन्दादयश्च पितृव्याः पितृव्याकुलतानूना वत्सलतालता-पाशबद्धा इव निर्भरमालिङ्ग्य शिरो जघ्रुः ॥ २०३ ॥

पितुर्या व्याकुलता तस्यामनूना न न्यूनाः ॥ २०३ ॥

केवलवलमानानुरागरागवत्तरतरलमन्दाक्षमन्दाक्षतविलोचनाञ्चलचलदनुपमनिरीक्षणक्षणविसृष्टशोभासहचरीकेन केनचिन्मनोविलासविशेषेण समर्हयामासुरनुरागिण्यः ॥ २०४ ॥

केवलं वलमानेन अनुरागेण रागो रञ्जनं तद्वत्तरं च तत् तरलेन विश्लथेन मन्दाक्षेण लज्जया मन्दं यथा स्यात् तथा अक्षतं च यद्विलोचनाञ्चलं तस्माच्चलत् प्रसरच्च अनुपमं च यन्निरीक्षणमवलोकनं तत्क्षणे तदवसर एव विसृष्टं दत्तं शोभासहचर्या शोभैव सहचरी तद्द्वारा कं सुखं यतस्तेन ॥ २०४ ॥

अथ तस्मिन्नेवानेहसि हसितसुधासुधावितमधुराधरं मधुराधरञ्जिनं वसन्तमिव सकलसुमनःपरिमलं तमेनमेनसोऽपहारिणं हारिणं व्रजराजयुवराजं नभसि भसितकुसुमसुमहावृष्टिकिरां प्रसिद्धसिद्धसुरसविद्याधरविद्याधरसुसाध्यसाध्यशुभगन्धगन्धर्वकिंपुरुषपुरुषयोषितामावलिरतितुष्टा तुष्टाव ॥ २०५ ॥

माधुर्यादधिसंमग्नप्रियवर्गेण सत्कृतम् ।
ऐश्वर्यादधिसंमग्नाः सिद्धाद्यास्तुष्टुवुर्हरिम् ॥

अथानन्तरं तस्मिन्नेवानेहसि समये, “अनेहापि समय” इत्यमरः, तं प्रसिद्धसिद्धादीनामावलिस्तुष्टाव । मधुराधो चैत्रवैशाखौ रञ्जयितुं शीलमस्य तं वसन्तमिव, सकलानां सुमनसां पुष्पाणां पक्षे देवानां साधूनां वा परिमलो गन्धः पक्षे साद्गुण्यं च यतस्तम्, एनसोऽघस्यापहारिणम् । भानि नक्षत्राणीव सितानि कुसुमानि तेषां सुमहावृष्टिं किरन्तीति तासाम् ॥ २०५ ॥

जय जय नन्दात्मज जय वृन्दावनरसकन्दातुलगुणवृन्दा-
धिकतरनन्दच्चिन्मकरन्दस्वपदरविन्दद्वयकुरुविन्द-
प्रभनखचन्द्रावलिभिरतन्द्रामलरुचिसान्द्राकृतिभिरलं द्रा-
वितनिजलोकव्यतिकरशोक स्फुरदस्तोकप्रथितश्लोक
श्रीधरधीर व्रजवरवीर प्रकटाभीर श्यामशरीर ॥ २०६ ॥

वृन्दावने रसानां सर्वेषां विषयत्वेन आश्रयत्वेन च कन्द मूलभूत, वृन्दावने रसो रागस्तेन कं सुखं ददातीति वा । अतुलैर्गुणवृन्दैरधिकतरं च तत् नन्दन्ती समृद्धिमती चित् उपलब्धिरेव मकरन्दो यत्र तच्च यत् स्वपदरविन्दद्वयं तस्य कुरुविन्दप्रभाभिर्नखचन्द्रावलिभिः । कीदृशीभिः, अतन्द्रा चासौ अमला निष्कलङ्का च रुचिभिः सान्द्रा च आकृतिर्यासां ताभिरिति, कमले चन्द्रश्रेणी सा चातन्द्रत्वादिलक्षणेत्यभूतत्वम् । अलमतिशयेन द्रावितो निजलोकानां व्यतिकरेण व्यतिषङ्गेण शोको येन, इति शोकस्य तमस्त्वं संतापत्वं वा व्यञ्जितम् । स्फुरचस्तोकः प्रचुरः श्लोको यशो यस्य हे तथाभूत ॥ २०६ ॥

वारमेकमात्रमेव तेऽहमित्युदीरयन्ति ये तु तानपि त्वमत्र नाथ पासि
जन्ममृत्युखेदभेदकारिहारिपादपद्ममेव ते भजन्ति ये तु तान्नु किंतु ।
नित्यसत्यशुद्धबुद्धमुक्तरूपपार्षदौघसेव्यमानमाननीयगीयमान
गोकुलेन्द्रपुत्र चित्तचञ्चरीक देवदेव तुभ्यमेव मे नमो नमो नमोऽस्तु
॥ २०७ ॥

तेऽहमिति तवास्मीति । नित्यमेव सत्याश्च ते शुद्धबुद्धाः शुद्धज्ञानवन्तश्च मुक्तरूपा ये पार्षदौघास्तैः सेव्यमानश्चासौ माननीयश्च गीयमानश्चेति स तथा ॥ २०७ ॥

प्रकुपितशक्रोद्धतमदशक्रोद्भटकृतविक्रोशनघनचक्रो-
ज्झितगुरुवृष्टिव्रजपुरसृष्टिव्रजजनतुष्टिप्रथनपरीष्टि-
प्रकटितहेलालसभुजखेलातोलितशैलाधिप हे जय जय ॥ २०८ ॥

Digitized by Google

प्रकुपितश्चासौ वक्रश्च उद्धतमदश्च यः शक्रस्तेन उद्भटं यथा स्यात् तथा कृतं विक्रोशनं यत्र तादृशं यद्घनचक्रं मेघसमूहस्तेन उज्झिता गुर्वी वृष्टिस्तया हता पुरुसृष्टिस्तदुपशमोपायनिर्माणं येषां तथाभूतानां व्रजजनानां तुष्टिप्रथनं संतोषविस्तार एव परीष्टिः परिचर्या तया प्रकटिता हेलालसस्य भुजस्य या खेला तयैव तोलित उद्धीतः शैलाधिपो येन सः ॥ २०८ ॥

लीलाकन्दुककल्पीकृतगिरितल्पीकृतकरमल्पीभवदवि-
कल्पीभूतसुरेशस्मयमखिलेशव्यतिकरकेशप्रणयिमणीश ।
व्रजजनबन्धो करुणासिन्धो दृढतरबन्धो न खलु मन्दान्धो
भजति भवन्तं भुवि विहरन्तं त्रिभुवनकान्तं स्वमहसि सन्तम् ॥२०९॥

मदान्धो जनो भवन्तं न भजति । कीदृशमपि, लीलया कन्दुककल्पीकृतो यो गिरिस्तस्य तल्पीकृतः करो येन तम् । अल्पीभवच्चातितुच्छीभवत्यविकल्पीभूतोऽपि सुरेशस्य शक्रस्य स्मयो गर्वो यतस्तं, श्लेषेण अविकल्पीभूतो मेघसदृशीभूतो यः सुरेश इत्याक्षेपः । अखिलानाम् ईशव्यतिकराणां केशप्रणयी शिरोवर्ती यो मणीशो रत्नमुख्यस्तद्रूप । दृढतरो बन्धः संसारो यस्य सः ॥ २०९ ॥

जय जय गोपीरतिरसरोपी सकलकलापीवर सुखवापी-
धर तव देहो घनरसदेहोऽनिशसुखदोहो गतसंदेहो
महदहमादिप्रकृतिपुमाद्यैर्नियतमनाद्यैर्धुततरवादि-
व्यतिकरजल्पैः करुणाकल्पैः स्वमहिमतल्पैश्चिद्रसकल्पैः
सपरमहंसैर्योगिवतंसैः प्रथिताशंसैश्चित्सुखशंसै-
रपि हृदि भाव्यो निजजनसेव्यो जगदतिनव्यो जयति सुभव्यो
व्रजजनरञ्जी नवघनगञ्जी निरवधिपुञ्जीकृतसुखसञ्जी-
वनरसमूर्ते कृतरसपूर्ते हतजगदार्ते सुविशदकीर्ते ॥ २१० ॥

गोपीनां रतिरसं रोपयितुं शीलमस्य तथाभूतः सन् जय जय । हे सकलकलापीवर तव देहो जयति । कथंभूतः, घनं सान्द्रं रसं स्निग्धेऽउपचिनोतीति सः । अतोऽनिशमेव सुखं दोग्धि पूरयतीति सः । अतो नात्र प्राकृतत्वाशङ्कुत्याहुर्गतसंदेह इति । किंच महदहमोरादौ यौ प्रकृतिपुमांसौ तयोरप्यादिः । स्वमहिमेव तल्पं शय्या यस्य सः । करुणा कृपैवाकल्पो भूषणं यस्य सः, तस्या आकल्प इति वा । चिद्रसानां कल्पः कल्पनं यस्मात् सः । सुभव्यः सुमङ्गलः ॥ २१० ॥

जय जय कृष्ण प्रणयसतृष्ण
द्विषति महोष्ण प्रधनिषु धृष्णक् ।
जय जय धीर व्रजवरवीर
प्रकटाभीर श्यामशरीर ॥ २११ ॥

द्विषति शत्रौ महोष्ण । प्रधनिषु योद्धृषु धृष्णक् हे प्रगल्भ ॥ २११ ॥

तव पादसरोजमधुव्रततां गतवानपवर्गमपि ह्यभिकाङ्क्षति न
क्व नु धर्मधने सुखभोगकथासुतदारसुहृत्प्रभृतिग्रहिलत्वमपि ।
भवनं द्रविणं सुहृदः सुजना गुरवो गरिमा महिमा यशसां च ततिर्भगवन् भजतामखिलं स भवान् निरुपाधिकृपाजलधिर्गुणरत्नमयः॥२१२॥

अपवर्गं मोक्षमपि न॰ अभिकाङ्क्षति, क्व नु धर्मधने, किं पुनर्धर्मार्थावित्यर्थः । अत एव भजतां जनानां सुखादिग्रहिलत्वं न स्यात् । किंच भवनादिकमखिलं भवानेव ॥ २१२ ॥

त्वां स्तुमहे स्तुतिदूर विदू रतिरागपरा गहनार्तिभृतो-
ऽतिह विभ्रतमभ्रकदम्बविडम्बकमङ्गमनङ्गतरङ्गसुसंगत-
मिन्दुमदं दुरवापमिवापरमानयदाननबिम्बमलं
विमलं वनशोभन लोभहमुद्वह मुद्वहदुत्कसमुत्कर हे ॥ २१३ ॥

रतिरागपराः प्रेमासक्तिपरा जनास्त्वां विदुर्जानन्ति, वयं तु स्तुमहे, नतु विद्म इति भावः । किंच हे स्तुतिदूर स्तुतिभिरपि दुर्गम

Digitized by Google

तथापि ते दीनवात्सल्यस्वभाव एवास्मान् प्रवर्तयतीत्याहुः। गहनार्तिभृतो जनस्य॰ आर्तिं पीडां हन्तीति हे तथाभूत। त्वां कथंभूतम्, अभ्रकदम्बविडम्बकं मेघसमूहतिरस्कारकमङ्गं बिभ्रतम्। न विद्यते परः शत्रुस्तिरस्कारको यस्य तत्॰ अपरम्॰ आननबिम्बं च बिभ्रतम्। कथंभूतम्, इन्दोश्चन्द्रस्य मदं गर्वं दुरवापमिव दुर्लभमिव॰ आनयत् कुर्वत्। अलमतिशयेन वनं वृन्दावनं शोभयतीति हे तादृश। अत एव लोभहाम्॰ अन्यस्पृहाहारिणीं मुदं वहति प्रापयतीति तथा, उक्तपोषन्यायेनाहुः, मुदुहन्तो हर्षधारिणा उत्कसमुत्करा उत्सुकसमूहा यस्य तथा॥ २१३॥

पद्मरुगद्मरनेत्रमतित्रसमञ्चितकुञ्चिसदैर्घ्यमहा-
र्घ्यकचप्रचयप्रकटीकृतभाकृतकामकलामतचामर।
तामरसाक्ष समक्षरदुन्मधुसन्मधुराधरसेधधुरा-
निजवैभवतो धुतसाधुसुबिम्बफलं वसुधामहधामद॥ २१४॥

पद्मरुचां कमलकान्तीनाम्॰ अद्मरे कवलकारिणी नेत्रे यस्य तम्। त्रसमतिक्रान्तम्॰ अतित्रसं, धीरमित्यर्थः, "त्रसमिङ्गं चराचर" मित्यमरः। अञ्चितश्चासौ कुञ्ची कुटिलश्च सदैर्घ्यश्च महार्घ्योऽभिनन्दनीयश्च यः कचप्रचयस्तेन प्रकटीकृता या भा तया कृतं कल्पितं कामकलासु मतं चामरं यस्य हे तथाभूत। हे तामरसाक्ष। सम्यगक्षरत्॰ निश्चलम्॰ उत्कृष्टं मधु यत्र स चासौ संश्च मधुरश्च योऽधरस्तस्य सेधधुरा माङ्गल्यातिशयस्तया धुतं खण्डितं साधु सुबिम्बफलं येन तम्। वसुधाया भूमेर्महधामनी उत्सवकान्ती ददातीति हे तादृश॥ २१४॥

मौक्तिकपङ्क्तिदकुन्दकसुन्दरदन्त निरन्तरभासुरभासुरसामलधामरहास॥ २१५॥

मौक्तिकपङ्क्तिं द्यन्ति खण्डयन्तीति ते च ते कुन्दकसुन्दराश्च दन्ता यस्य हे तथाभूत, निरन्तरमेव भासुरः कान्तिमांश्चासौ भस्य नक्षत्रस्य॰ इव॰ आ सम्यक् सुरसम्॰ अमलं धाम रातीति तादृशश्च हासो यस्य तथा॥ २१५॥

विलासकवंशिकमंशिकनूत्नसरत्नककाञ्चनपञ्चककुण्डल-
ताण्डवलोलकपोलवतंसकमंससगुञ्जितमञ्जुसरन्मधु-
पोन्मधुरागपरागधुराम लकोमलमाल्यसुपाल्यलसद्वर-
पीवरवक्षसमक्षरसौभगशोभमपारकृपारम मारम ॥ २१६ ॥

विलासं कायति गायतीति विलासिका वंशिका यस्य तम् । अंशि परिपूर्णं कं सुखं दर्शने यस्मात् तच्च नूत्नं च सरत्नकं च यत् काञ्चनं तस्य पञ्चो विस्तारो ययोस्तयोः कुण्डलयोस्ताण्डवेन लोलौ चपलौ कपोलचारिवतंसौ यस्य तम् । अंसे स्कन्धे तन्नतं चेत्यर्थः सगुञ्जितं मञ्जु यथा स्यात् तथा सरन्तो मधुपा यत्र तच्च तत्· उन्मधु· उत्कृष्टो मकरन्दः· रागो रक्तिमा परागः पुष्परजस्तेषां धुरा· अतिशयेन· अमलं कोमलं च यन्माल्यं तेन सुपाल्यं लसत्· वरं पीवरं वक्षो यस्य तम् । अक्षरमचलं सौभगं यस्यां सा शोभा यत्र तम् । अपारया कृपया रमयतीति हे तथाभूत ॥ २१६ ॥

बन्धुरसिन्धुसुताङ्कसशङ्कसुदामनि धामनिकामसुधामनि
वक्षसि लक्षणलक्षित दक्षिणकौस्तुभवास्तुनि निस्तुलवस्तुनि
हारविहारतरङ्गिणि रिङ्गितवल्लभतल्लजतीव्रवधूव्रज-
हृद्भवमुद्भवदुन्नतिमन्नवदर्पकदर्पणदर्पसमर्पण-
मुत्कटमुत्करभेन्द्रसुसान्द्रसमत्करसत्करदोर्भरनिर्भर ॥ २१७ ॥

वक्षसि लक्षणैर्लक्षित । कथंभूते, बन्धुरो मनोहरो यः सिन्धुसुताङ्को लक्ष्मीरेखा तत्र सशङ्कं तच्छोभाच्छादनसभयं सुदाम सुमाल्यं यत्र तस्मिन्, धाम्नां कान्तीनां निकामसुन्दरगृहे, दक्षिणस्य सरलस्य कौस्तुभस्य वास्तुनि वासभूमौ, निस्तुलवस्तुनि निरुपमपदार्थरूपे, हाराणां विहारा एव तरङ्गास्तद्वति । रिङ्गितः संचारितो वल्लभतल्लजे प्रियमुख्ये तीव्रे दुष्प्रवेशे वधूव्रजे हृद्भवः कामो येन तम् । ततश्च· उद्भवन्· उन्नति· मान् यो नवो दर्पकः कन्दर्पः स एव दर्पणः स्वप्रतिबिम्बास्पदं तत्र दर्पस्य

समर्पणं संचारणं यस्य तम् । उत्कटा मुत्· हर्षो यस्य तथाभूतस्य कर- भेन्द्रस्य सुसान्द्रो रसाकरश्च यः सत्कारः स एव डोर्बाहुस्तस्य भरेण भारेण निर्भर निरतिशय ॥ २१७ ॥

गोष्ठगरिष्ठमहिष्ठवरिष्ठ म-
हेन्द्रसुसान्द्रमदच्चयसुत्तम
नन्दय मन्दज नो दययोदज-
जन्मनुतोन्मददानवहानद
निर्जरदुर्जय भोजय भोजय ॥ २१८ ॥

गोष्ठस्य हितोपदेष्टृत्वात्· आश्रयत्वान्मुख्यत्वाच्च क्रमेण गरिष्ठा- दिक, महेन्द्रस्य सुसान्द्रमदच्चये सुत्तम, हे नन्दज, नोऽस्मान् दयया न- न्दय । उदजन्मा ब्रह्मा तेन नुत स्तुत । उन्मदानां दानवानां हानद नाशक । निर्जरेण देवेनापि दुर्जय । भोजय स्वयं प्रयोजको भूत्वास्मान् पालय, भुजेर्ण्यन्ताल्लोट् ॥ २१८ ॥

त्रिलोकशोकभञ्जनं स्वभक्तचित्तरञ्जनं
भवप्रवाहखण्डनं शिखण्डखण्डमण्डनम् ।
स्फुरत्कलिन्दनन्दिनीतटान्तकान्तकानने
तमस्तमालगञ्जनं भजामहे महन्महः ॥
प्रथमशाखा ॥ २१६ ॥

तमस्तमालगञ्जनमिति तमोगुणस्य साक्षाद्विनाश एव, तमालस्य तु सादृश्येण तिरस्कार एवात्र व्याख्येयः ॥ २१९ ॥

त्वं जय रञ्जय नो जय योजय
सादरपादरतो भवभीभर-
मर्दय मर्दय दुर्मदनिर्दय
काममदामयमाशयमाशय
शं जनयाञ्जनपुञ्जनिगञ्जन ॥ २२० ॥

नोऽस्मान् रञ्जय । केन प्रकारेण, सादरं यथा स्यात् तथा पादरतौ चरणसेवाप्रीतौ योजय । एवं नोऽस्मान् जय कामवशतां विधूय स्ववशीकुर्वित्यर्थः ।

ननु संसारिणां युष्माकं कथमेवं भवेत् तत्राहुः, भवभीभरम्· अर्दय । तत्र प्रथमं काममद एव· आमयो व्याधिस्तं मर्दय । यतो दुर्मदेषु दुष्टेषु निर्दय हे निष्करुण । ततश्च शं कल्याणं जनय । जनयित्वा च· आशयमन्तःकरणम्· आशय व्यापय, "अशू व्याप्तौ" । हे· अञ्जनपुञ्जस्य निगञ्जन निजवर्णकान्त्या तिरस्कारक ॥ २२० ॥

रञ्जनकुञ्जविहारविकार
विशारद शारदचन्द्रवितन्द्र-
दरस्मित विस्मितकृद्वदनाद्
वत विद्वरद्वरनर्मद मर्म-
रसग्रहणग्रह जल्पविकल्पह-
सुश्रुतविश्रुत जल्पितकल्पित-
कर्णरसार्णव शुद्धरसोद्भव ॥ २२१ ॥

रञ्जनो रञ्जको यः कुञ्जविहारस्तत एव विकारो हर्षादिभावोद्गमो यस्य तथा । हे विशारद । शारदचन्द्रवद्वितन्द्रं दरस्मितं मन्दहासो यस्य तथा । विस्मयकारिणो वदनात् सकाशाद् विद्वद्भिर्वरैर्नर्मदासि । वतेति हर्षे । मर्मण्यपि यो रसस्तस्य ग्रहणे ग्रह आग्रहो यस्य तथा । जल्पविकल्पौ वितण्डासंशयौ हन्तीति तथाभूतं यत्·सुश्रुतं वेदशास्त्रं तत्र विश्रुत विख्यात, "श्रुतमाकर्णिते वेदे" इति मेदिनी । जल्पितेन वचनेन कल्पितः कर्णयो रसार्णवो येन तथा । शुद्धरसेनैव·उद्भव उत्सवो यस्य तथा ॥ २२१ ॥

मन्मथसन्मदघूर्णनपूर्ण-
दलत्कमलोत्करह्रीकरभाकर-
लोलविलोचन लोचनरोचन ॥ २२२ ॥

मन्मथेन कामेन हेतुना सन्मदे विद्यमानमदे घूर्णमपूर्णे दलत्कमलोत्कराणां स्फुटत्पद्मसमूहानां ह्रीकरे तिरस्कारिणी भामां कान्तीनाम् आकरौ खनी तद्रूपे लोले चपले विलोचने नेत्रे यस्य तथा, लोचनानि सर्वजननेत्राणि रोचयतीति तथा ॥ २२२ ॥

तापकृदापदपायकृपायद
भक्त्यनुरक्त्यनुरूपसुरूपनु-
वज्जनहृज्जलजासनवासल ॥ २२३ ॥

तापकृद् या॰ आपद् विपत्तिस्तस्या अपायो यतस्तथाभूता कृपा यस्य तथा, अयः शुभावहो विधिस्तं ददातीति तथा, भक्तिर्भजनमनुरक्तिः प्रेम तदनुरूपेण सुरूपं शोभनं सौन्दर्यं नुवतां स्तुवतां जनानां हृदेव जलजासनं कमलरूपमासनं तत्र वासं लातीति तथा ॥ २२३ ॥

कोपयमोपमशक्रपराक्रम-
मण्डलखण्डनचण्डिममण्डन
हेलनखेलनशीलवितोलन-
निर्भयदोर्भरताण्डवपाण्डर-
पङ्कजशङ्खनहंसवतंसन
रूपनिरूपकपूर्तिदकीर्तिक ॥ २२४ ॥

कोपेन यमोपमस्यापि शक्रस्य पराक्रममण्डलं खण्डयति यश्चण्डिमा तेनैव मण्डनं भूषणं यस्य तथा । हेलनेन हेलयैव खेलनशीलस्य क्रीडापर्वतस्य वितोलनमुन्नयनं तत्र निर्भयस्य दोषो भुजस्य भरेण ताण्डवं नाट्यं ययोस्ते पाण्डरपङ्कजशङ्खने श्वेतकमलशङ्खधारिणी हंसवतंसने सूर्योपमकुण्डले यस्य तथा । रूपनिरूपकस्य पूर्तिदा कीर्तिर्यस्य तथा ॥ २२४ ॥

वामकरामलपद्मसुसद्मल-
गोप विचित्रचरित्रपवित्र च-

राचरगोचरखेचरभूचर-
विस्मयनस्मयकार महारय ॥ २२५ ॥

वामकार एव॰ अमलपद्मं तदेव सुसद्म तल्लाति गोत्रः पर्वतो यस्य तथा । विचित्रेण चरित्रेण प्रचर । हे चराचराणां गोचरखेचराणां देवादीनां भूचराणां मनुष्याणां च विस्मयनेन स्मयकार॰ ईषद्धास्यकारक । हे महारय महावेग, उत्सवालय इति वा ॥ २२५ ॥

वल्लववल्लभ सुप्रथ सुप्रभ
दुर्मददुर्मरदुर्धरवार्धर-
वर्गनिसर्गसुकष्टसुरिष्टसु-
पीवरसंवरसंचयसंचर-
णाकुलगोकुलरक्षणदक्ष ल-
सत्तमवृत्तजवाद्भुतसद्भुज-
विक्रमचक्रमहत्तर सत्तम ॥ २२६ ॥

वल्लवा एव वल्लभा यस्य तथा । शोभना प्रथा यस्य तथा । हे सुप्रभ । दुर्मदश्चासौ दुर्मरो मरणशून्यश्च दुर्धरो धर्तुमशक्यश्च यो वार्धरवर्गः प्रलयमेघसमूहस्तस्य निसर्गात्॰ अतिवृष्टिरूपस्वभावात् सुकष्टोऽतिकष्टदश्च सुरिष्टोऽन्यशुभश्च सुपीवरः॰ अतिपुष्टश्च संवरसंचयो जलसंचयस्तस्य संचरणादाकुलस्य गोकुलस्य रक्षणे दक्ष, "रिष्टं क्षेमाशुभाभावे" ष्विति, "नीरक्षीराम्बुशंवर"मिति चामरः । लसत्तमश्चासौ वृत्तो वृठश्च जवेनाद्भुतश्च संश्च यो भुजविक्रमस्तस्य चक्रेण महत्तर । हे सत्तम ॥ २२६ ॥

निस्तुलशस्त दयामय कामद
विद्धनबद्धनवृन्दविनिन्दन-
विग्रहविग्रहजाग्रदनुग्रह
दक्ष विपक्षविनिग्रहयोग्य वि-
शिष्टपदिष्टद दुष्टसुकष्टद ॥ २२७ ॥

Digitized by Google

निस्तुलं शस्तं चेमं यतस्तथा । हे दयामय । हे कामद । चिहु-नश्चासौ संश्च घनवृन्दस्य विनिन्दनः कान्त्या तिरस्कारकश्च यो विग्रहो देहस्तस्य विशिष्टो ग्रहो ग्रहणं प्रपञ्चलोके प्रकटीकरणं तेन त्रायत्-अनुग्रहो यत्र तथा । हे दव । विपक्षाणां विनिग्रहणे॰ चम । हे विशि-ष्टाविष्टदायक । दुष्टानां सुकष्टद ॥ २२७ ॥

दलत्कदम्बकेसरप्रभाविडम्बिडम्बर-
च्छविच्छटावराम्बरो महामनस्विनां वरः ।
मदान्धताधुरंधरं जिगाय यः पुरंदरं
जुगोप गोपगोकुलं स वस्तुतः स्तुतोऽस्तु नः ॥
द्वितीयशाखा ॥ २२८ ॥

डम्बर आटोपः । वस्तुतो यथार्थतः ॥ २२८ ॥

॥ शेषमग्रे ॥

॥ अथ संस्कृतसमाजाभिधसभावृत्तान्तवर्णनम् ॥

स्वस्ति श्री१०५मती

विजयिनी विनयेन मुदाऽऽदराद्
भरतभूपतिवृन्दसमर्पितम् ।
निजगुणानुगुणं भुवनेश्वरी-
पदमिदं विगुणाहि विधो दधौ ॥ १ ॥

सा च निर्वैरोर्वीतलसाम्राज्यसुखमनुभवन्ती पुत्रपौत्रमित्रबान्धवा-दिपरिवारसमेता चिरं जीव्यादिति सर्वजगन्नियन्तारं विश्वेश्वरमनवरतं प्रार्थयते,

धर्माधिकार्युपपदो कुण्ठिराजशास्त्री ॥

॥ अथैकमत्यवादः ॥

अहो ! महदद्य सुदिनाहं यदस्मासु भारतवर्षीयप्रजासु मातेव वात्सल्यं वहन्ती श्री१०५मती श्वेतद्वीपनिकेतना विजयिनी देवीतः पूर्व-

मेव वस्तुसती भरतभूमिभूपालसामन्तचक्रवर्तिन्यपि संप्रति भारतवर्षीयमहाराजाधिराजप्रभृतिनिखिलभारतवर्षीयप्रजानां भूयो भूयोऽभ्यर्थनया भारतराजराजेश्वरीति निजमहत्वानुरूपां पदवीं स्वीचक्रे । तेन च भारतीयजनस्य सर्वथैकमत्यं संपादितं भविष्यतीति सुदृढमनुमनोमि । अस्तीदं तावदसंदिग्धतया निर्विवादं सकलजनसंमतं यद् ऐकमत्येन बहूनि दुःसाधान्यपि कार्याणि तादृशकार्यकरणासमर्थैरपि साधयितुं शक्यन्ते ॥

तथा च श्लोकः । बहूनामप्यसाराणां संयोगः कार्यसाधकः । तृणैरारभ्यते रज्जुस्तेन नागोपि बध्यते ॥ १ ॥ यथा हि ऐकमत्येनैव च हितोपदेशे वर्णिताः कपोता जालबन्धेन जीवितसंदेहमापन्ना अपि जिजीवुः । संप्रत्यपि दृश्यतां तावत् पार्लिमेन्टनामकसभाव्यवस्थापनमुखेन, तत्तद्देशेषु चादरमात्रैकवेतनानां दण्डनायकानां (आनररीम्याजिस्त्रेट्) इति पदवीसमलंकृतानां प्रतिष्ठापनेन, उत्तमसाहसकार्यविवेचनादिषु प्राणदण्डादिषु च तत्तद्देशनिवासिनां महाप्रतिष्ठितानामतिलौकिकप्रतिभाशालिनां असेसर् इति पदभूषितानां द्वित्रपुरुषाणां प्राड्विवाककृतनिर्णयपरिशोधनाय वरणेन चैकमत्यसिद्धान्तमनुतिष्ठन्ती सम्राट् "असंतुष्टा द्विजा नष्टाः संतुष्टाः पार्थिवास्तथेति श्लोकार्थमनुसरन्ती क्रमेणोत्तरोत्तरं स्वाधिकारं विस्तारयन्ती च भारतश्वेतद्वीपादिविविधद्वीपोपद्वीपराजराजेश्वरीपदमलंकुर्वन्ती विराजते । परस्परवैमत्येनैव च सुन्दोपसुन्दौ समूलनाशं नष्टौ । तेनैव च भारतीयाष्टादशाक्षौहिणीसेनासमेतमिखिलवीरनाशपुरःसरं पृथ्वी पञ्चवीरावशेषिता बभूव । अन्योन्यसाहाय्यवैधुर्येणैव चास्मिन् भारतवर्षे क्रमशोऽपचयं गच्छन्त्यः शिल्पसङ्गीतचिकित्साविद्याः संप्रति लुप्तप्रचारा विनष्टकल्पा एवाभूवन् । वैमत्यकारणानि च धर्मो धनं धरा महत्वाकाङ्क्षा चेति चत्वारि । तत्र द्वितीयादिषु त्रिषु परकीयत्वाभावसहितमेव स्वकीयत्वं सर्वोपि जनो वाञ्छति । आद्ये पुनरेतद्विपरीतं सर्वो लोकोऽहमिवापरेऽपि तस्मिन् स्वीयत्वाभिमानं धारयेयुरिति सततमभिकाङ्क्षति । यद्यपि नीतिकुशला धनधराविवादपरिहारे बद्धादराः पूर्वकालिकराजेष्वपि बहवोऽभूवन्निति श्रूयते तथापि न ते सांप्रतिकसम्राडिव परध-

र्मोऽविरोधिन आसन्नपि तु परधर्मोन्मूलनपुरःसरं स्वस्वधर्मव्यवस्थापका बभूवुरिति तत्र तत्रेतिहासादिषु बहुत्र वर्णितम् । श्री१०५मन्महाराज्ञ्यामस्यां राज्यधुरं वहन्त्यां तु पूर्वकालिकाः शिल्पादिविलोपिनइव न सांप्रतिका विद्वांसो ऽन्योन्यसाहाय्यं विद्विषन्ति, प्रत्युत लुप्तप्रचारपुस्तकमुद्रणादिभिर्नवीनयन्त्रनिर्माणप्रकारप्रदर्शनादिभिर्विद्याशिल्पादिप्रचारमुपबृंहयन्त आङ्गलपण्डिताः परस्परसाहाय्यं कुर्वन्तो ऽधिकसाहाय्यकारितया च स्वस्मिन्नधिकं महत्त्वं बुद्ध्यमाना ऐकमत्यसिद्धान्तमेवानुतिष्ठन्ति । तथैव भारतवर्षीयानस्मानपि सम्राडनुशासनमहिमैव तात्त्विके महत्त्वाकाङ्क्षाफले परस्परसाहाय्ये पूर्णोत्साहशालिनः करिष्यतीति सुदृढमाशासे । धनधरापहारकृतवैमत्यतमोन्मूलनसमर्था दण्डनीतितरणिर्जागर्त्यैवेति तेनाप्यैकमत्यमेव क्रमेणात्रापि भारते वर्षे बाढं संभावयामि । धर्मविषये यद्यप्यस्ति तत्तन्मनुजात्मसु स्वस्वधर्मप्रचिचारयिषा तथापि "श्रुतिर्विभिन्ना स्मृतयो विभिन्ना नैको मुनिर्यस्य वचः प्रमाणम् । धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्था इति मान्यनिबन्धृवचनमादृत्य अस्मत्पूर्वजान् अपेत्याहमस्मि बुद्धिमत्तरः सारासारविवेचनक्षमतर इत्यभिमानं परप्रतारणाधियं च परित्यज्य यदि वयं परधर्मानविद्विष्यैव स्वस्वकुलोचितान् धर्मान् निखिलधर्ममूलभूतान् शमदमदयासत्यादिशीलपदाभिधेयान् धर्मांश्चानुतिष्ठन्तः परान् प्रत्यपि "श्रेयान्स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितादित्येव निर्मत्सरा भूत्वोपदिशेम तर्हि मन्ये, निःसंदेहं भारतीयजनस्य सर्वथैकमत्यं संपादितं भविष्यतीत्यलं सुधियामग्रे वाचां विस्तरेण ॥

सर्वेष्वस्मासु युवपण्डितेषु महोपकारप्रावण्येन परमवात्सल्येनास्माकं मुहुरभ्यर्थनेन चैतत्संस्कृतसमाजाध्यक्षपदं स्वीकुर्वन्तो गुरुवराः श्री६बालशास्त्रिण एतल्लेखगतं न्यूनातिरिक्तभावं परिहरिष्यन्तीति स्वाशासे ॥

अभ्यर्थये च परेशमेतत्संस्कृतसमाजसभ्यान् चिरमुत्साहशालिनः कुर्यादिति ॥ शम् ३

ढुण्ढिराजशास्त्री ॥

॥ श्रीः ॥

विश्वेश्वरेण क्षितिगोलपृष्ठे ऽखिलस्थलानां खलु मध्यदेशे ।
देशो ऽङ्गलाख्यो विनिवेशितो ऽस्तीत्येतद्भूगोलविदां प्रसिद्धम् ॥ १ ॥
मध्यःप्रदेशो ऽस्ति यतः प्रधानं सर्वत्र तस्मात् तदधीश्वरी स्यात् ।
सम्राट् परे माण्डलिकाश्च सर्वे भूपा इतीष्टं परमेश्वरस्य ॥ २ ॥
एवं समस्तावनिमण्डलस्याधीश्वर्यपि प्रेमभरेण साद्य ।
निजेच्छया भारतवर्षराजराजेश्वरीत्थं पदमारुरोह ॥ ३ ॥
ततो वयं भारतवर्षनिष्ठाः समग्रभूमण्डललोकमुख्याः ।
जाताः स्म इत्थं सुविचिन्त्य कुर्मो विश्वेश्वरस्योत्तमधन्यवादम् ॥ ४ ॥
सहात्मजा भारतवर्षराजराजेश्वरी जीवतु सा चिराय ।
नीत्या सदा रक्षतु नश्च बापूदेवस्त्वितीशं भृशमर्थये ऽहम् ॥ ५ ॥

पण्डित बापूदेवशास्त्री ।

```
२ २ २ १ १ २
स्वस्तिश्री सम्पूर्णा ।                 १०    १२
२ २ २ २ २ २

१ २ १ २ ११ २ १ २ १
तत्त्वाङ्कव्यञ्जनैश्च मात्राभिः ॥      १४    १८
२ २ २ २ १ २ १ २ २ २

१११११११११ १ १
हरिवसुभूरविशशिभि-                     १०    १२
१ १११२१११११ २

१ ११११११ ११ २ १
स्सेवितचरणा जयत्याऽऽर्या ॥ १ ॥        ११    १५
२ ११११२ १२ २ २
                                        ——    ——
व्यऽर्धःश्लोकः                          ४५    ५०
```

तत्राद्यः । आर्या ईश्वरी जयति स्वस्ति च श्रीश्च ताभ्यां सम्पूर्णा तत्त्वानि च २५ अङ्काश्च ९ तावद्भिः व्यञ्जनैः हल्वर्णैः मात्राभिः १८

स्वरैश्च सम्पूर्णेत्यन्वयः हरिप्रभृतिभिर्देवैस्सेवितचरणा इति । एतेन आदिवान्ताऽक्षरमयी हरिहरविरिञ्च्यादिभिराराध्या श्रीशारदामूर्त्तिः प्रतिपाद्यते ॥ १ ॥

अथवा आर्याछन्दः स्वस्तिरूपिण्या श्रिया सम्पूर्णा तत्त्वप्रमितै-रङ्कैः पञ्चगुणैर्नवभिः पञ्चचत्वारिंशत्सङ्ख्यैरिति यावत्, व्यञ्जनैर्हल्वर्णैः सम्पूर्णा च पुनः हरि १२ वसुभू १८ रवि १२ शशि १५ भिर्मात्राभिस्से-वितचरणा एतेनाद्यपादे द्वादश द्वितीये ऽष्टादश तृतीये द्वादश चतुर्थे पञ्चदश मात्राः पञ्चचत्वारिंशद्वर्णाश्चास्यामार्यायां सन्तीति सूचि-तम् ॥ २ ॥

अथवा आर्या विजयिनी साम्राज्यपदारूढा देवी महाराज्ञी स्वस्ति-श्रीपूर्वपदा तत्त्वानि पृथिव्यादीन्येवाङ्गानि येषां तथाभूतैर्व्यञ्जनैरग्निया-नादिभिः मात्राभिस्तारायन्त्रादिकलाभिश्च सम्पूर्णा हरिः सिंहः तेन सिंहासनम् वसु धनम् तेन निधयः भूः सागरान्ता मेदिनी रविः रविवंश्या राजानः शशी चन्द्रवंश्याराजानश्च तैस्सेवितचरणा । एतेन स्वस्तिश्रीवि-जयिनी साम्राज्यपदारूढा देवी सागरान्तमेदिन्यनुशासिनी महाराज्ञी सर्वोत्कर्षेण वर्त्तेत इति मन्मानसोल्लासस्सर्वानुल्लासयतु ॥ ३ ॥

गुरुणाम्पादपद्मेषु प्रभूणां हृदयाम्बुजे ॥ कवीनाङ्करपद्मेषु विदुषां वदनाम्बुजे ॥ २ ॥ खलवारणकुम्भेषु मित्राणाचयनाम्बुजे ॥
नारायणमनोभृङ्गझङ्कारः प्रविराजताम् ॥ ३ ॥

श्रीमत्पङ्कजपुञ्जसौरभभरभ्राम्यन्मिलिन्दावली-
सौन्दर्यास्मितगर्वहारिगलहृत्कर्पूरपूराकृतिः ।
विश्वेशः करुणारसैकवरुणागारः शिवं सर्वदा
दद्यात्सेवकमण्डलाय मुदितो भक्त्याऽनुरक्त्याऽपि च ॥ १ ॥
सोऽयं सम्प्रति सर्वलोककुशलाकाङ्क्षाऽवतीर्णा ऽवनौ
नानाभूपतिमानितां विजयिनीत्याख्यां बिभर्त्यात्मना ।

आर्यावर्तजनान् स्वकीयतरतां संप्रापयन्नश्नुते
श्रीमद्भारतराजराजपदवीमित्यद्य मोदामहे ॥ २ ॥

नैतादृक् सकलेन्द्रियाणि मदयन् जातः कदाप्युत्सवो
नो वा क्वापि जनिष्यते दृढमिति स्वान्ते विनिश्चिन्वतः ।
जीयादाप्रलयं यशःशशिकरैरेषा जनाह्लादिनी-
त्याशंसा सफलास्तु शंभुकृपया श्रीरामकृष्णस्य सा ॥ ३ ॥

संस्कृतसमाजसभायाः प्रधानसंपादको रामकृष्णशास्त्री

श्रीमद्राजसमाजपूजितपदा श्रीराजराजेश्वरी-
त्याख्यां प्राप्तवती सदा विजयतामानन्दयित्री भृशम् ।
दीनानां परिपालने दृढमतिः कारुण्यवारांनिधिः
स्वीयैः सद्गुणमौक्तिकैः सुरचितां कीर्तिस्रजं बिभ्रती ॥ १ ॥

आसादयन्ति यद्रूपं हरेणुर्हरयोर्विना ।
चिरपूर्वं हि ते भूयादिति याचे सदाशिवम् ॥ २ ॥

काशीस्थसंस्कृतसमाजसभास्थितेन
श्रीरामचन्द्रविदुषा किल देव ईशः ।
अभ्यर्थ्यते प्रतिदिनं खलु सार्वभौमी
जीव्यादियं शतसमाः स्वसुतैः समेता ॥ ३ ॥

पौराणिकोपाह्वरामचन्द्रशास्त्री

नमस्तस्मै यथाभक्तिभक्ताभीष्टविधायिने ।
धारिणे सर्वभद्राणां नाशिने सज्जनापदाम् ॥ १ ॥

सृष्ट्वा त्रैलोक्यमग्रे तदवनकुशलानिन्द्रचन्द्रादिदेवान्
दिग्राज्येषु न्ययुङ्क्त प्रबलतनुभृतो नागलोकाधिकारे ।
शेषादींश्चोरगेन्द्रांस्तदनु पुरुदयो भूजनान् यो जुगुप्सुः
प्रादुश्चक्रे जयश्रीललितविजयिनीं नामराज्ञीं नृलोके ॥ २ ॥

याऽऽदौ यस्य प्रसादादतुलगुणगणैर्भूषिता राज्यलक्ष्मीं
गौरद्वीपस्थधाम्नो विनयधनकलाशास्त्रजातस्य लेभे ।
वर्षस्याऽस्यापि पश्चात्प्रचुरबुधवरैर्मण्डितस्यापि राज्यं
प्राज्यं यत्नैरनेकैः सकलभुवनभृत्प्रेरितैर्भारतस्य ॥ ३ ॥
सेयं पुत्रैः प्रपौत्रैर्बहुलबलयशोराशिभीराजमाना
संपूर्णाभिः पराभिः प्रकृतिविततिभिः सेविता राजवर्यः ।
सम्राज्ञी भारतस्येत्यखिलजनमनःप्रेयसीं ख्यातिमद्य
स्वीकुर्वाणा सदा स्तात्सकलविजयिनी वर्षलक्षाणि लोके ॥ ४ ॥
इत्थं प्रशस्ताः समुदाशिषः स्युः सत्यीकृताः श्रीजगदीश्वरेण ।
संप्रार्थिताः केशवशास्त्रिणा या विद्वत्समाजे परमादरेण ॥ ५ ॥

केशवशास्त्री ।

आनमन्नृपसहस्रविस्फुरन्मौलिरत्नलसदङ्घ्रिपङ्कजा ।
अप्रमेयकरुणातरङ्गिणी श्रीमती विजयिनी विराजते ॥ १ ॥
या प्रभावविजितान् जनेश्वरी भारतप्रभृतिभूरिनीवृतः ।
पाति दूरपगतापि मातृवद्राजनीतिमनुसृत्य सर्वदा ॥ २ ॥
यस्याः शरच्चन्द्रकराभिरामां कीर्तिं पवित्रां जगतीतलेऽस्मिन् ।
गायन्ति सर्वे युववृद्धबालाः प्रमोदबाष्पाकुलनेत्रमालाः ॥ ३ ॥
यस्याः प्रतापज्वलनं प्रदीप्तं प्रतीपपृथ्वीपतयोऽभिमानात् ।
उल्लङ्घयन्तः सहसा व्रजन्ति भङ्गं पतङ्गा इव दग्धपक्षाः ॥ ४ ॥
सा विधाय करुणामधीश्वरी भूतये भरतवर्षवासिनाम् ।
स्वीचकार किल भारतावनेः सार्वभौमपदवीं समुन्नताम् ॥ ५ ॥
तदुत्सवे संमिलिता इदानीं श्रीविश्वनाथं वयमर्थयामः ।
यावन्मही तिष्ठति पातु तावदार्य्येश्वरी भारतवर्षमेतत् ॥ ६ ॥

पण्डितशीतलाप्रसादत्रिपाठिनः ।

यः स्वेच्छैकसहाय एतदखिलं विश्वं जगन्निर्ममे
धीरैर्यन्मनसाऽपि नापि रचनाचातुर्यचिन्तापरैः ।
दीनानान्तरतापतापिततनून्मीनानिवाम्भोधरः
स्वीयान् वत्सलताम्बुधिः स्वकरुणाऽऽसारैर्मुहुः सिञ्चति ॥ १ ॥

संप्राप्ता जनताऽतिपातिचरिता सर्वेसहामण्डले
कीर्तिक्रान्तदिगन्तराऽतुलदयादाक्षिण्यवारांनिधिः ।
शक्तिस्तस्य विभोः समुद्रवसनासाम्राज्यलक्ष्म्यास्पदं
सौभाग्यं विजयश्रियो विजयिनी देवी वरीवर्त्यसौ ॥ २ ॥

नानादेशवसुन्धराऽधिपतिरप्यार्यैऽनुकम्पाभरात्
या स्वीकर्तुमियेष सम्प्रति ममस्यार्येश्वरीति प्रथाम् ।
युक्तं तत्प्रतिभात्यशेषजगतां संपालकेनाप्यहो
यत्पूर्वं विभुना दयाबहुतया गोपालतैवाश्रिता ॥ ३ ॥

इयं विदधती भुवं चिरतरं सनाथामिमाम्
प्रजासु दयया ऽभिधामपि यथार्थयन्ती निजाम् ॥
जयत्वविरतं रिपून् परिभवं नयन्ती मुदा
जगत्प्रभुमिदं मुहुर्मुहुरिहा ऽर्थयेऽहं सदा ॥ ४ ॥

गन्धर्वट्युपाभिधो बापूशर्मा

विजयते जगदीशकृपानिधिर्विजयिनी सुतवत्परिपालिनी ।
भरतवर्षजनान्विनतान्सदा निजबलेन जितारिसमूहिनी ॥ १ ॥

नीत्या शुक्रति बुद्धिवैभवबलाऽजीवत्यसौ शान्तितो
वैकुण्ठत्यरिसङ्घकक्षदहनात्पार्थत्यतिप्रीणनात् ।
जम्बूद्वीपनिवासिलोकमनसां रामत्यहो दातृता-
शालित्वेन च कर्णति प्रतनुतश्चार्येश्वरी चन्द्रति ॥ २ ॥

Digitized by Google

यत्कीर्त्तिः शिशिरांशुकान्तिनिचयः सन्तर्क्यते पण्डितैः
स्वर्गङ्गामवगाहते सितरुचिर्हंसीव लोकोत्तरा ।
इन्द्रेण प्रतिमार्ग्यते त्रिभुवने श्वेताश्व उच्चैःश्रवा
यत्कीर्त्या धवलीकृते त्रिनयनःस्वीयं वृषं मार्गते ॥ ३ ॥

दयानिधिः पण्डितमानतत्परा विद्यासमुद्रस्य च पूर्णचन्द्रः ।
जीयाच्छतायुर्मुदिता सपुत्रा स्वामात्ययुक्ता ससुहृद्गणाढ्या ॥ ४ ॥

सुरेशवन्द्याङ्घ्रियुगं सुधांशुचूडामणिं लोकगुरुं शिवेशम् ।
श्रीदण्डिभट्टाख्ययतस्त्रिनेत्रं नाथत्ययश्चाग्घ्रजविश्वनाथः ॥ ५ ॥

श्रीशम्भोः सकला कला विजयिनीवेषेण भूमण्डलं
कीर्त्या मण्डयितुं च खण्डयितुमप्यास्तेद्विषन्मण्डलं ।
संप्रत्यार्यजनानुरागमुदिता सा भारताधीश्वरी-
त्यर्थाख्यां समलंकरोत्ययमतो लोकः सनाथीकृतः ॥ १ ॥

यत्नादृक्प्रमदाश्रिजातपुलको दामोदरः शंकरं
शश्वत्संप्रणिपत्य भक्त्यतिशयात्संयाचते सर्वदा ।
जीव्याद्वर्षशतं सुतैर्विजयिनी स्वस्यानुरूपैर्वृता
यन्नीतिव्रततिश्रिता जनखगाः प्राप्तप्रमोदा इति ।
विजित्य वलयं भुवो मलयचन्दनाच्छं यशो
निचित्य महिमण्डलाखिलनृपालमालार्चिता ।
प्रतापतपनं रिपूत्करतमांसि लोप्तुं सदा
प्रकाश्य भुवि जाग्रती जयतु राजराजेश्वरी ॥ १ ॥

सुतैरतुलविक्रमैरमितसद्गुणालङ्कृतै-
श्चतुर्भिरिव दिग्गजैश्चतसृणां दिशां जित्वरैः ।

सद्देयमवनीमिमामवति भारतीं भारती
यथार्चितपदा तथा जयतु राजराजेश्वरी ॥ २ ॥
शत्रूनीर्षति मित्रमुन्नति महीपालावली प्रह्वति
प्राज्ञः प्राज्यति तेजसां ततिरपि प्रोद्दण्डमातण्डति ।
कीर्तिः पूर्णशशाङ्कति प्रतिदिनं राजानति स्वप्रजा
यस्याः सा जयताच्चिरं विजयिनी श्रीराजराजेश्वरी ॥ १ ॥
एतां भारतभूमिमुग्रयवनैर्दुष्टैर्जितामन्वहं
शोचन्तीं निजदुर्दशां हतपतिं नेतान् भजन्तीं मुदा ।
पश्यन्ती सकलान् विजित्य कृपया या पाति हृष्टामिमां
लोकातीतपराक्रमा जयतु सा श्रीराजराजेश्वरी ॥ २ ॥

बेचनरामपण्डितस्य

अथ पौषकृष्णप्रतिपदि संस्कृतसमाजनाम्नी सभोपस्तीर्णा तस्यां गङ्गाधरशास्त्री स्वलिखितं संदर्भमवाचयत् । तद्यथा । नैयायिकमते हि चत्वारि प्रमाणानि । तथा च सूत्रम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति । वैशेषिकास्तु द्वे पूर्वोक्ते एव प्रमाणे अनन्तरयोस्त्वनुमानान्तर्गतत्वेनैव प्रामाण्यमभ्युपगच्छन्ति । अत एवोक्तम् "शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते । अनुमानगतार्थत्वादिति वैशेषिकं मत"मिति । युक्तं चैतत् । उपमानस्येतरप्रमाणान्तर्गतत्वं सांख्यादीनामभिमतं तैरेव निरूपितमिति न प्रकृते तत्र महान् प्रयासः सफलः । शब्दस्यानुमानादनतिरिक्तत्वं तु विस्पष्टतरम् । तथाहि । यो ऽयं घटमानयेत्यादिवाक्याद्घटकर्मकानयनादेः प्रत्ययस्तस्यानुमितित्वमेव । अन्यथा करादेर्यं कं चिदभिमुखीकृत्य स्वाभिमुखमाकृष्टादभिमुखीकृतस्वसमीपागमनेच्छाप्रत्ययस्यापि प्रमित्यन्तरताया दुर्वारतया तादृशकरचेष्टादेरपि पृथक् प्रामाण्यापत्तेः सुस्पष्टत्वात् । अतश्च यथा तादृशकरादिचेष्टावन्तं पक्षीकृत्य तत्कराभिमुखपुरुषादिकर्तृकस्वसमीपदेशप्राप्तीच्छा तथाविधक-

रचेष्टया ऽनुमातुं सुशका तथैव प्रकृते ऽपि शब्दोच्चारयिता पुरुषो मत्कर्तृकघटकर्मकस्वसंनिकृष्टदेशसंयोगेच्छावान् तथाविधशब्दोच्चारणादिति स्पष्ट एव परामर्शादिकः प्रत्ययः । अभिप्रायस्यानुमानादेव च न विषयस्य तथाविधस्यासत्त्वे ऽपि दोषः । उच्चारयित्रिच्छायामविद्यमानस्यापि घटादेः प्रकारतायाः संभवेन तच्च तत्प्रकारकत्वादेरेवानुमानात् । एवमेव किल स्वामिनो दानेच्छाभावे दानाभावे च याचतिघटितवाक्याच्छाब्दबोधो नैयायिकैरपि निर्वहणीयः । यत्तूच्यतेऽभिनवकविरचितश्लोकादपि बोधोदयात्तत्र व्याप्तिग्रहस्याभावेन गत्यन्तरविरहाच्छब्दस्य प्रामाण्यमावश्यकमिति, तच्च विचारसुन्दरम् । भवन्मते ऽपि तादृशश्लोकवृत्त्याकाङ्क्षाज्ञानासंभवेन शाब्दस्याप्यनुत्पत्त्यापत्तेः । वस्तुत आकाङ्क्षाया अकारणत्वात् । तस्मात्तत्र भवताप्यवान्तरपदयोराकाङ्क्षाया अन्यत्र सत्या ज्ञानात्सामान्यतो नामोत्तरषष्ठ्युत्तरनामादेः षष्ठीप्रत्यये स्वस्वामिभावादिसंबन्धेन तत्प्रकृत्यर्थस्य तदुत्तरनामार्थादावन्वयक्रमेण विशिष्टबोधाङ्गीकारवन्मयापि तत्रावान्तरपदरूपसंकेतज्ञानादवान्तराभिप्रायावगतिक्रमेण विशिष्टाभिप्रायो ज्ञातुं शक्यइति सममेव, अत एव कम्बलादिपदशक्त्यग्रहदशायामिव भवन्मते मन्मते तत्संकेताग्रहदशायामपि योग्यसंबन्धेन ब्राह्मणादिप्रकारको वस्तुत्वादिरूपेण विशेष्यतामवलम्बमानो बोधो ब्राह्मणस्य कम्बल इत्यादिवाक्यादानुभाविको भवन्मते ऽप्युपपादनीयो मन्मतेपि । किं च भवन्मतेऽनेकत्र मुखं चन्द्र इत्यादौ शाब्दबोधस्य योग्यताज्ञानविरहादसंभवेन तत्र मानसो बोध इत्युच्यते । तच्च शपथैकसंवेद्यमेव स्वकल्पितकार्यकारणभावस्याभावेनाभ्युपगन्तव्यमिति बद्धमुष्टिवानरन्यायितमेव । अभिप्रायमनुमिन्वतां समञ्जसमेव सर्वमुपपद्यतइति प्रागेवावोचाम । न च स्पष्टमुपलभ्यते शब्दस्यापि चेष्टाविशेषानन्तर्गतत्वे दृढं प्रमाणम् । शाब्दयामीत्यनुव्यवसायस्तु न प्रत्ययान्तरत्वसाधको विप्रतिपत्तेरिति विशदमेव । तस्मात्करादिसंकेतवच्छब्दोप्यनुमापक एवाभिप्रायस्येति सिद्ध्यतीति । ततो रामकृष्णशास्त्री । नोपमानं तावत्प्रमाणान्तरेष्वन्तर्भवितुमर्हति । गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानवतः पुंसः कदा-

Digitized by Google

चिद्गवयदर्शनं ततोऽतिदेशवाक्यार्थस्मरणमनन्तरं च गवयो गवयपदवाच्य इति गवयपदशक्तिग्रहात्मिका प्रमैवोपमितिरिति व्यवह्रियते, सा च नानुमितिरूपा संभवति । तस्या व्याप्तिग्रहपूर्वकत्वासंभवात् । नापि शाब्दरूपा, तस्याः परैरनभ्युपगमात् । अभ्युपगमेऽपि वा प्रकृतप्रमायाः शब्दजन्यत्वासंभवेन तदसंभवाच्च । एवं शाब्दस्यापि नानुमितावन्तर्भावो दृष्टान्तबलेन सूपपादः, दृष्टान्ते च तादृशचेष्टाया एकार्थप्रत्यायकत्वेन व्याप्तिग्रहस्य सुघटतया अनुमानसंभवेऽपि शाब्दस्थले नानार्थप्रत्यायकत्वेन शब्दानां तदसंभवात् । व्याप्तिज्ञानविरहवतः पुंसो बोधानापत्तेश्च । किं च भूतलं घटवन्नवेति संदिहानस्य पुंसो घटवद्भूतलमित्याप्तवाक्यात्तादृशाप्तेच्छाज्ञानेऽपि संदेहानिवृत्तिरेव स्यात्, इच्छाज्ञानसंदेहयोरविरोधादिति । ततो राममिश्रशास्त्री अमुमेवार्थमनुमोद्योपमितेः पृथक् प्रमितितां गोसदृशो गवयपदवाच्य इति वाक्यस्याप्तोक्तस्य गोसदृशप्रत्यक्षकाले स्मरणेन गोसदृशे गवयपदवाच्यत्वज्ञानमनुमितिरेवेति स्फुटमुपपाद्य शाब्दस्य तु पृथक् प्रमितित्वमावश्यकमन्यथा वेदप्रामाण्यस्य दुर्निरूपत्वात्, नहि तत्र कश्चन पुरुषः प्रत्यक्षोऽस्ति यदभिप्रायं वेदस्थशब्दैरनुमिमीमहीत्यवोचत् । ततो गङ्गाधरशास्त्री । भो वेदस्थशब्दैरपीश्वरोऽनुमातुं शक्य एव । तादृशशब्दानां तथाविधाभिप्रायानुमापकत्वपूर्वकमभिप्रायस्य स्वसमवाय्यनुमापकत्वात् । किं च व्याप्तिमगृह्णतोऽपि पुरुषस्य शाब्दोत्पत्तिरुच्यते सा नोचिता पदजन्यपदार्थोपस्थित्युत्तरमेव शाब्दस्य भवन्मतेऽपीष्टत्वेनोपस्थितेः पदजन्यत्वाय तदर्थविषयकबोधस्य तत्पदाव्यवहितोत्तरत्वव्याप्यतया मन्मतेऽपि तथाविधाभिप्राये तादृशशब्दाव्यवहितोत्तरत्वव्याप्तेः सुलभत्वात् । चेष्टैकमेवार्थं बोधयतीति तु न युक्तमङ्गुलिद्वयस्य स्वसमीपदेशप्रापणेन व्यक्तिद्वयकर्मकस्वसमीपदेशप्रापणस्यापि बोधात् । शाब्दसामग्र्याः प्रत्यक्षं प्रति प्रतिबन्धकत्वं न स्यादिति तु न । इच्छानां सर्वत्रोत्तेजकत्वेनेच्छाभावविशिष्टसामग्रीत्वेन प्रतिबन्धकतयेच्छानामनुगमासंभवेन तेनतेनैव रूपेण प्रतिबन्धकताया वाच्यतया शब्दजन्यानुमितिं प्रति प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वास्वीकारात् ।

ततो रामकृष्णशास्त्री न ममायमाशयो यच्चेष्टैकमेवार्थं बोधयतीति परमेकं यथार्थमेव बोधयतीत्येव, नह्यङ्गुलीनां स्वसमीपदेशप्रापणं स्वसन्निकृष्टदेशप्रापणादन्यमर्थं बोधयति शब्दस्तु तात्पर्यवशेनैक एव घटपटादीन्नानाविधानर्थान्बोधयति । तदनु प्रमदादासमित्रमहाशयः । नहि शब्दोपि युगपन्नानाविधानर्थान्बोधयति । प्रकरणादिसहकृतस्तु तत्तत्प्रकारेण भिन्नानिति चेच्चेष्टाप्येवमेव क्व चित्तात्पर्यग्राहकान्तरसत्त्वे तत्तत्प्रकारेण भिन्नार्थग्राहिका भवत्येव तात्पर्यग्राहकान्तरसत्त्वे चेष्टाया नैरर्थक्यमिति चेद्भवन्मतेऽपि तात्पर्यग्रहमन्तरा शाब्दबोधानुत्पत्तेस्तात्पर्यग्राहकान्तरस्यापेक्षिततया शब्दस्य वैयर्थ्यमिति तुल्यमेव । तस्माद्बोजनकालिकत्वविशिष्टसैन्धवशब्दो लवणतात्पर्यविषयस्सन्नेव पदार्थान्तरान्वयप्रयोजकोऽप्यपेयस्तथैव मन्मतेपि चेष्टाया अप्येवमेव प्रकरणसहकृतायाः स्वार्थबोधपूर्वकविशिष्टार्थबोधकत्वमिति युक्तमित्यवोचत् । ततो रामकृष्णशास्त्री तदुक्तमभ्युपगच्छन्ननुमितिसामग्र्यां शाब्दसामग्र्यां च युगपद्वर्तमानायां शाब्दसामग्र्याः प्रतिबन्धकत्वमनुमितिं प्रतीष्यते तच्च भवन्मते न स्यादुभयोरप्यनुमितितया समूहालम्बनात्मकानुमितेरेवापत्तेरित्यभ्यधात् । ततः सर्वे सभासदः संप्रति संध्यासमयो जातस्तद्दिनान्तरे एतस्य विचारो भविष्यतीति विचार्य सभां विसस्रुजुरिति शम् ॥

अथ पौषशुक्लप्रतिपदि सभाप्रोत्साहकश्रीयुतप्रमदादासमित्रमहाशयानां गृहे संस्कृतसमाजनाम्नी सभोपस्तीर्णा । तस्यां च केशवशास्त्री सांख्यशास्त्रविषये कं चित्संदर्भलेखं निजनिर्मितं प्रथममवाचयत् । तद्यथा श्रीनित्यशुद्धबुद्धस्वरूपं जगदीश्वरं प्रणम्य तत्र भवतां सभाध्यक्षाणां सभासदां चानुमत्या साङ्ख्यशास्त्रमधिकृत्य किंचिज्जिज्ञास्यते । तत्र खलु पुरुषः प्रकृतिर्महानहङ्कारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि भूतपञ्चकमिति पञ्चविंशतिः पदार्थाः स्वीक्रियन्ते । तेषां पुरुषो नित्यशुद्धबुद्धस्वरूपः प्रकाशात्मा चेतनोऽपरिणामी, प्रकृतिस्तु तद्विरुद्धस्वभावा गुणमयी परिणामिन्यचेतनेत्युच्यते । जडाया अपि प्रकृतेरचेतनस्यापि वत्सविवृद्धिनिमित्तं प्रवृत्तस्य क्षीरस्येव पुरुषविमोक्षणार्थं प्रवृत्तिः प्रति-

साध्यते । एवमबुद्धिपूर्वं प्रवृत्ताया अपि प्रकृतेः कार्याणां महदादीनां 'सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मादि'त्यादिना सकलविषयग्रहणक्षमत्वं बोध्यते । पुरुषस्य तु 'तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य, कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्चे'त्यादिना सत्यपि साक्षात्कारकर्तृत्वे दर्शनकर्तृत्वे चाकर्तृत्वं प्रदर्श्यते । तथा 'तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः । लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेने'त्यनेन तस्य जरामरणादिजन्यदुःखानुभवकर्तृत्वरूपबन्धं, प्रकृतेस्तादृशबन्धमोचकत्वं चाङ्गीकृत्य 'तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्, संसरति बध्यते मुच्यते च नानाश्रया प्रकृति'रित्यादिना पुरुषस्य नित्यमुक्तत्वं च निरूप्यते । तस्येदृशनित्यमुक्तप्रकाशात्मकस्यापि प्रतिशरीरं भेदश्च साध्यते ॥ अत्रेदं वदामो यदिदं सर्वं परस्परविरुद्धं बाधितमिव भासते । कथं नामैकस्या एव प्रकृतेर्जडत्वं चेतनत्वं च संभवेत् । परस्परविरुद्धयोर्धर्मयोरेकाधिकरणेऽवस्थातुमशक्यत्वात् । किं चान्तःकरणात्मिकायाः प्रकृतेश्चेतनत्वात्सकलसुखदुःखादिविषयानुभवकर्तृत्वेन भोक्तृत्वे सिद्धे किमिति पुरुषाख्योऽपरो भोक्ता कल्प्यते । कथं च तस्य नित्यमुक्तशुद्धप्रकाशात्मनो भोक्तृत्वं शक्यते वक्तुम् । कथं पुनस्तस्य ज्ञानित्वेन चेतनत्वेन वा प्रकृतिसाधर्म्यात्ततो वैधर्म्यं । कथं वाऽस्य सुखदुःखादिभोक्तृत्वेऽप्यकर्तृत्वम् । अकर्तृत्वे च तस्याभिमानराहित्येन बन्धाभावात् कोऽसौ प्रकृतिप्रयासो यदात्मबन्धमोक्षणं नाम । यदि च सूर्याकाशादाविवालौकिकमारोपितमेव वा द्रष्टृत्वसाक्षित्वादिकमात्मन्युपेयते तदाकाशादिसदृशेन सर्वव्यापकैकात्मनैव निर्वाहे नानात्मकल्पनवैयर्थ्यं स्वसिद्धान्तभङ्गश्चेति । तदनु च राममिश्रशास्त्री । चेतनत्वं च यदि परिणामित्व ज्ञानाद्यन्यतमरूपं वा तदा तस्य बुद्धिमात्रवृत्तित्वेन जडत्वसामानाधिकरण्यस्य सुस्पष्टत्वया नात्रासंभवोद्भावनसंभवः । यदि चापरिणामित्वं चेतनत्वमभिप्रेयते तदा तु पुरुषमात्रवृत्तित्वेनैव तस्य सांख्यशास्त्रे प्रसिद्धत्वेन शङ्काया एव नावसरः । तथा चान्तःकरणात्मिकायाः प्रकृतेश्चेतनत्वस्य दुरुपपादत्वेन ततः परो भोक्ताऽसंहतश्चेतनत्वादिधर्म

वात् "संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृ-
भावात्कैवल्यार्थं प्रवृत्तेश्च" इत्यादि विविधहेतुभिः स्पष्ट एव सिध्यति।
न च शयनासनादिदृष्टान्तस्य संहतपरोपकारकत्वदर्शनेन तदनुरोधात्
चेतनोऽपि संहत एव सिध्येत्। तेन संहतस्य सिद्धौ हि तस्यापि संघात-
रूपत्वेन तेनापि पुनः संहतस्यैव सिद्ध्यापत्त्या तेनतेनेत्यनवस्थाप्रसङ्गात्।
दृष्टान्तदृष्टसर्वधर्मानुरोधेनत्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गात्।
ततः सभाप्रोत्साहकमहाशयेन चेतनत्वं किमात्मकं तच्चाभिमतं सांख्या-
नामिति पृष्टे रामामिश्रशास्त्री पुनराह। चेतनत्वमपरिणामित्वं प्रतिबि-
म्बसंबन्धेन सुखादिवृत्तिमत्त्वं वा, न ज्ञानाद्यन्यतमरूपं ज्ञानेच्छादेर्बुद्धि-
धर्मत्वेन चैतन्यस्यात्मधर्मत्वेन च तैः स्वीकारात्। ततो ऽध्यक्षवराः
श्रीबालशास्त्रिणः। "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः" इत्यनेन पुरुषसांनिध्यात्तद्गता-
श्चेतनत्वादयो धर्मा बुद्धौ, बुद्धिधर्माश्च कर्तृत्वादय आत्मनि प्रतिबि-
म्बन्तीति प्रतिपादनेन चैतन्यस्य अपरिणामात्मकत्वे प्रतिबिम्बसंबन्धेन
सुखादिवृत्तिरूपत्वे वा तादृशचैतन्यारोपस्य बुद्धौ निष्फलत्वमेवापतेदिति
तत्स्वरूपं सम्यङ्निरूप्यतामित्येनमेवार्थं प्रौढतरवाग्विस्तरैः स्फुटमुपपा-
दयन्। तदनु च रामामिश्रशास्त्री, सत्यमेतत्। न चेतनत्वं प्रतिबिम्बसंबन्धेन
सुखादिवृत्तिरूपमित्यादि युक्तं, किं तु कार्यमात्रस्यासमवायिकारणपूर्व-
कत्वनैयत्येन सुखाद्यसमवायिकारणचेतनसंयोगाश्रयतयैव पुरुषः सिध्य-
तीति बुद्धौ चेतनसंयोगस्यावश्यकत्वेन सफल एव तदारोप इति। तदनु
बालशास्त्रिणः। तन्त्रान्तरीयसामग्रीसमवधानेनैव तदुत्पत्तिसिद्धेर्निराबा-
धतया ऽपूर्वतत्कार्यकारणभावकल्पनायां प्रमाणाभावः। अन्यथा तद्धेत-
तुस्यैव कस्य चित्सिद्ध्यापत्तेः। संघातपरार्थत्वादित्यादिहेतुभिः स्फुटमेव
तत्सिद्ध्या तत्साधने सिद्धसाधनप्रसङ्गात् बुद्धिगतचैतन्याभिमानप्रश्ने
पुरुषसिद्धेः सांप्रतमनुपयोगाच्चेति तदेव स्पष्टमुपपाद्यतामिति। रामामि-
श्रशास्त्री चेतनत्वं प्रकाशात्मकत्वं, तस्य बुद्धावारोपादेव चेतनोऽहं करोमी-
त्यादिव्यवहारोपपत्तिरन्यथा बुद्धिगतकर्तृत्वादेरात्मगतचैतन्यस्य च सामा-

नाधिकरण्यविरहेण तदनुपपत्तेरिति । ततः सभाप्रोत्साहकमहाशयेन वेदान्तिमतसमानैवात्मसिद्धिरेतन्मतेऽपि संजातेति प्रतिपादिते, राममिश्रशास्त्री सत्यमेतत् परं का नो हानिरांशिकतन्मतसाम्ये, एवं तु नित्यविभुत्वादिरूपैर्नैयायिकेनाप्यस्ति साम्यमिति । तदनु बालशास्त्रिणः । सम्यगेतद्विरूपितं परं आत्मनि कर्तृत्वाभिमानेनैव तादृशव्यवहारोपपत्तेर्बुद्धौ चैतन्याभिमानस्य किं प्रयोजनमित्येतदवशिष्यते तद्विरूप्यतामिति । ततो राममिश्रशास्त्रिणा गहनोऽयं विषयः सभान्तरे एतस्य विचारो भवेदित्यभिहिते संध्यासमयं दृष्ट्वा सभाध्यक्षानुमत्या सर्वे सभासदः सभां विसस्रुजुरिति शम् ॥

अथमाघकृष्णप्रतिपदि प्रमदादासमित्रमहाशयानां गृहे संस्कृतसमाजनाम्नी सभोपस्तीर्णा । तस्यां प्रथमं रामकृष्णशास्त्री पूर्वसभावृत्तान्तं संवाच्य सभ्यानश्रावयत् । तदनु राममिश्रशास्त्री । अहं किल गतपक्षे ज्वरेण पीडितो नापारयं भाष्यपञ्चकविषये प्रतिश्रुतं संदर्भं लेखितुम् । तत् सभ्यैः सभाध्यक्षैश्च क्षम्यमाणमभ्यर्थये । आगामिप्रतिपदि च स्वस्थः स्यां चेदवश्यमेव तद्विलिख्य वाचयिष्यामीत्यभ्यधात् । ततः केशवशास्त्री पूर्वप्रक्रान्तकथाविषयएव प्रकृतेः सर्ववस्तुविषयकवृत्तिवैशिष्ट्येन तस्या एव प्रकाशरूपतायाः अनुभूयमानतया कथं जडत्वं कथं वा तद्विलक्षणः पुरुषश्चैतन्याश्रयः सिध्येदिति संदेहमुदघाटयत् । ततो राममिश्रशास्त्री संघातपरार्थत्वादिना परस्य सिद्धौ परश्चेतन एव सिध्यति संहतत्त्वेनैव च तस्या जाड्यमपि सिद्धश्च चैतन्यवानेवेति तेनाहितचैतन्या वस्तुजातं गृह्णाति । संहतं तु नानुमापयत्यनवस्थापातादित्युक्तमेवेति । लोकेऽपि भोज्यभोजकाभ्यामवश्यं भूयतइति भोजकत्वाद् बुद्धेस्तया भोज्योऽपेक्ष्यते स एव च पुरुषः स च प्रकाशरूपतया प्रतिबिम्बमाश्रयन् सुखादिमानिव भवतीति । ततः केशवशास्त्री चैतन्यसंबन्धमन्तरा विषयग्रहणाभावेन परकीयं चेच्चैतन्यं तत्रारोप्यतोलमारोपेण वास्तविकमेव च तस्याश्चैतन्यमङ्गीकृत्य कार्यं निर्वाह्यतामित्यवादीत् । ततो राममिश्रशास्त्री सा हि जडैव सिद्धा ततश्च जाड्यचैतन्ययोः सामानाधिकरण्यस्यासंभवाच्चैतन्याश्रयः

परः सिध्यतीति । ततः केशवशास्त्री वास्तविकं चेत् चैतन्यं तत्र नेष्यते तदारोपितं कथं कार्यं निर्वाहयेदारोपेण तद्रूपतया ज्ञानस्य सैालभ्येऽपि कार्यस्य दैार्लभ्याचहि आरोपेण कार्यमात्रं संपादयितुं शक्यतइति । ततो राममिश्रशास्त्री । नहि युक्तिमात्रेण स्वमर्थं साधयामस्तस्याप्रतिष्ठानदोषग्रस्तत्वादत एव तस्मादपि चासिद्धं परोक्षमाप्तागमास्तिद्धमित्युक्तमेवमत्राप्यागमसहकृतया युक्त्या तस्या जाड्यं पुरुषस्य च चैतन्यं साधयाम इति । एवं परस्परमधरोत्तरेणानिश्चीयमाने विषये तद्विषये निश्चयाय प्रमदादासमित्रेण नहि बुद्धिः कदापि चैतन्यव्यतिरेकेणोपलभ्यते तत्कथं बुद्धौ चैतन्यारोपप्रवादः स उपपाद्यतामिति विज्ञप्ता बालशास्त्रिणो ऽवोचन् । ज्ञानं हि विषयेण संबध्यमानमेव विषयान् प्रकाशयति न त्वन्यथा । सर्वत्रैव सर्वविषयकज्ञानोत्पादप्रसङ्गात् । अत एव नैयायिका वैज्ञानिकानां मतमपहाय बाह्यपदार्थसत्तामास्थिषत । तदनु तेषां मतमेव युक्तं मन्यमानैः सांख्यैरपि ह्यतीतानागतवस्तुविषये तेषामसत्तया तैः साकं संबन्धस्यासंभवेन बौद्धपदार्था आस्थीयन्ते । अथ बाह्यपदार्थैरपि संबन्धस्य दुर्निरूपतया ज्ञानमात्रविषये बुद्धेस्तदाकारतापरिणाम एव ज्ञानसामग्र्या जन्यते सैव वृत्तिर्नाम । ततश्च बुद्धेः परिणामितया तस्याश्च जडत्वव्याप्यतयाऽजडेन प्रकाशात्मना पदार्थेनास्त्यवश्यमपेक्षेति पुरुषोऽपि सिध्यति । स च सवितेव नानाविधं वस्तुजातं प्रकाशयन्स्वयं च प्रकाशात्मा दर्पणइव स्वस्मिन्सकलानि ज्ञानानि प्रतिबिम्बरूपेण दधानोऽपि तेन तेन रूपेणापरिणमन् अपरिणामितालक्षणं प्रकाशत्वं तत एव च नित्यत्वमाश्रयतीति । ततो गङ्गाधरशास्त्री पूर्वप्रक्रान्तं शाब्दबोधस्यानुमितिगतार्थत्वं समानविषयकानुमित्यन्तरसामग्रीसमवधाने शाब्दसामग्र्याः प्रतिबन्धकतावादिभिः शाब्दोत्पत्त्युपपादनस्य शक्यत्वात्प्रकृते च समूहालम्बनात्मकानुमितिवृयापत्तिदोषदूषितमवधार्येत्थं तन्निराकरोत् । शाब्दस्यानुमित्यन्तर्गतत्ववादिभिरपि समानविषयकानुमितिं प्रति शब्दजन्यानुमितिसामग्र्याः प्रतिबन्धकत्वमुच्यते ऽतो नायं दोषः । किंच चेष्टायाः पृथक् प्रामाण्यापत्तिः कथं परिहृतेति । ततो राममिश्रशास्त्री । शाब्दयामीत्यनुव्यवसायोदयात् शाब्द-

त्वस्य जातित्वं सिध्यतीति तस्याः पृथगेव प्रामाण्यम् । चेष्टायास्तु तथा ऽनुव्यवसायानुदयाच्च पृथक् प्रामाण्यापत्तिरिति । ततो बालशास्त्रिणः । भो यदयं शाब्दबोधस्यानुमित्यन्तर्गतत्ववादे प्रतिबध्यप्रतिबन्धकभावविषय आक्षेपसमाधानोपन्यासो नायमुचितो यतो नायं वादः केवलं वैशेषिकान्नैयायिकान्वा विषयीकुरुते ऽपि तु सर्वानेव प्राभाकरादींस्तान्त्रिकास्ततश्च ये च न युगपदनेकज्ञानोत्पत्तिमभ्युपगच्छन्तः प्रतिबध्यप्रतिबन्धकभावमेव न स्वीकुर्वन्तीति कस्तद्विषये दोषः । एवमनुव्यवसायविसंवादस्य दूषणतयोपन्यासोप्यनुचितः केषांचिदनुव्यवसायस्यैवानभ्युपगमादपरेषां च विप्रतिपन्नत्वात् । यस्त्वत्राभिनवकविविरचितश्लोकस्य तादृशार्थविषयकबोधेन व्याप्तेर्व्यभिचारस्तस्माद्बाधो न स्यादिति दोषस्य समाधानं भवन्मते ऽपि तद्वृत्त्याकाङ्क्षाज्ञाने कारणताया व्यभिचारात्कथं बोधः स्यादित्युक्तं तेन चिन्नीयते मे मानसं यतस्तच्छ्लोकश्रावणप्रत्यक्षरूपस्यैव तद्वृत्त्याकाङ्क्षाज्ञानस्य सत्त्वात्तद्वृत्तिकारणताव्यभिचारस्य चानुपयोगाच्छाब्दबोधस्योपपत्तिरनुमित्यन्तर्गतत्ववादे व्याप्तिव्यभिचारासंभव इति । एवं योग्यतासंशयेनापि शाब्दबोधो भवत्यनुमितिस्तु नैवमिति वैषम्यम् । किंच वेदवाक्येभ्य ईश्वरमस्वीकुर्वतां तदभिप्रायानुमितिसंभवे ऽपि तमनभ्युपगच्छतां किमभिप्रायानुमितिः स्यादिति निपुणं निरीक्ष्यताम् । तेषामीश्वरानभ्युपगमस्य भ्रमत्वे ऽपि शाब्दबोधस्तु तेषां भवद्भिरप्युपपादनीयः । न च भवन्मते ऽपि तात्पर्यज्ञानस्य कारणत्वात्तत्र किंनिष्ठतात्पर्यज्ञानं स्यादिति वाच्यम् । तात्पर्यज्ञानस्य कारणतायाः सर्वैरनभ्युपगमादिति । ततः प्रमदादासमित्रमहाशयः । ये हि विज्ञानात्मकमेव वस्तुमात्रमुपयन्ति तन्मये विषयज्ञानयोः संबन्धस्यासत्त्वाद्विज्ञानस्यैव तत्तदाकारत्वसिद्धान्तेन तत्र स्वतः सिद्धचैतन्यसत्त्वात्कथं बुद्धेर्जडत्वसिद्धिः सर्वमतेषु च बुद्धेर्जाड्यं साधनीयमिति । ततो बालशास्त्रिणः । विज्ञानिकानां मतं हि नैयायिकैरेव दूषितं तत्रास्ति प्रकृते तद्दूषणस्य सार्थक्यमिति । ततः प्रमदादासमित्रमहाशयो नात्र केषांचिन्मतमिति किंचनोपन्यस्यते न च तत् कस्यचिन्मतानुसारेण दूषणमर्हतीति यतो ऽस्याः सभाया उद्देशो न मतप्रतिपादने ऽपितु वस्तुतत्त्वपरी

चणइति मतेषु पक्षपातमुत्सृज्य यद्देव युक्तमाभासेत तच्छुश्रूषामहे इत्य-वोचत् । अथ बालशास्त्रिणः । आदौ तावत्प्रत्यक्षातिरिक्तमनुपयत्सु चार्वाकेषु बौद्धास्तन्मतनिरासपुरःसरमनुमानप्रामाण्यमास्थिषत । तदनु सांख्यास्तदुक्तमार्गेणैव बुद्धेर्जडत्वमसाधयन् प्रकाशरूपतां च पुरुषस्य । एवं मध्ये बहुभिस्सैद्धान्तिकैर्वेदप्रामाण्यमपि निर्भरेण निरूपयद्भिर्यद्यपि स्व-स्वमतानुसारेण पदार्थोत्पत्त्यादिक्रमो बुद्धेरात्मनिष्ठत्वादिकमपि च न्य-रूप्यत तथापि न तेषां तदंशे प्रामाण्यं न वा तस्य वस्तुस्थितौ तेषां तात्पर्यम् । यत्परः शब्दः स शब्दार्थ इति न्यायात् । पूर्वपूर्वमतोपगतापसिद्धान्तनिरास एव तेषां तात्पर्यात् । अतश्च नैयायिकादिभिर्बुद्धेरात्मगुणत्वव्यवस्थापनेऽपि सुखदुःखादेरात्मसमवेतत्वव्यवस्थापनेऽपि च परमार्थतो विचारे शाङ्क-रमेव मतं सकलसिद्धान्तशिरोमणिभूतमित्येव परमोऽस्माकं विश्वासः । तथापि कथाकाले तत्तन्मतोपरि निक्षिप्यमाणा आक्षेपा विचारपुरःसरं युक्तिभिर्निरसनीया एव । न हि देह एवात्मेति वदन् विना नैयायिकाद्युक्त-युक्त्युपन्यासं प्रथममेव नित्यशुद्धबुद्धमुक्त आनन्दस्वरूप एवात्मेति कथम-ञ्जसा प्रबुध्यीत । एवमेव च किल सकलशास्त्राणामविरोध उपपादनीय इति वदन्ति स्म । तदुत्तरं चोत्तरसभायां विश्वनाथशास्त्री पुरुषबहुत्वं निरस्यामीत्यवोचत् । ततः संध्यावन्दनसमये जाते सर्वे सभां व्यसृज-न्निति शम् ।

THE

NYÁYADARS'ANA.

WITH THE COMMENTARY BY VÁTSYÁYANA.

Continued from page 128.

5. APHORISM.

Now, inference preceded by that [Perception] is of three kinds: [the first is called] Púrvavat or the inference proceeding

न्यायदर्शनवात्स्यायनभाष्यम् ।

सू॰ अथ तत्पूर्व्वकं त्रिविधमनुमानम् पूर्व्ववच्छेषवत् सामान्यतो दृष्टञ्च ॥ ५ ॥

Digitized by Google

from the prior i. e. cause; [the second is] Śeshavat or that proceeding from the posterior i. e. effect; [the third is] Sámányatodṛishṭa or that proceeding from the fact of general observation.

COMMENTARY.

In the phrase 'Preceded by that' the word 'that' refers to the observation of the mutual relation between a sign and what is marked by it, and to the observation of the sign itself. By the observation of the relation between a sign and what is marked by it we mean the remembrance of a sign being universally associated with what is marked by it (the "vyápti" of the later nyáya). By means of the recollection of a sign being universally associated with what is marked by it, an object which cannot be perceived by the senses at the time, is inferred.

The inference proceeding from the prior takes place when we infer an effect from its cause; as we infer for example, from the rising of clouds that it will rain. The inference proceeding from the posterior takes place when we infer a cause from its effects; as for instance, when we see a river overflowing its banks, its water having at the same time a colour quite different from that it had before, and its current being unusually rapid, we conclude from it that it has rained. The third kind of inference takes place when we conclude a thing from the fact of general obser-

---

भा० तत्पूर्व्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनम् लिङ्गदर्शनञ्चाभिसम्बध्यते लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते । पूर्व्ववदिति यत्र कारणेन कार्य्यमनुमीयते । यथा मेघोन्नत्या भविष्यति वृष्टिरिति । शेषवत्तत् यत्रकार्य्येण कारणमनुमीयते । पूर्व्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति, सामान्यतो दृष्टं व्रज्यापूर्व्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति तथाचादित्यस्य तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति । अथ वा पूर्व्ववदिति यत्र यथा पूर्व्वम्प्रत्यक्षभूतयोरन्यतरदर्शनेनान्यतरस्याप्रत्यक्षस्यानुमानम् । यथा धूमेनाग्निरि-

vation; as for example, it being generally observed that an object seen in different places is moving, we infer the motion of the sun, though invisible to us, from his being seen in different places. Or else, the inference proceeding from the prior takes place when we infer the existence of one of two objects previously seen together from the view of the other, as for instance. fire is inferred from the sight of smoke. 'Śeshavat' means the inference of what is remaining. In this kind of inference, some of the predicates which might possibly be given to a certain object being denied to it, one is led to conclude what is not denied, that is, remaining. As for example: It being asserted that the non-eternal is possessed of the highest universality [Śattá] by this attribute, which commonly appertains to substance [Dravya] quality [Guṇa] and action [Karma], sound is excluded from the categories of generality [Sámánya] particularity [Viśesha] and of Inhesion [Samaváya]; but it being doubtful whether sound comes under the category of substance or of action or of quality, it is argued that it is not one of the substances [Dravya] from its being inherent in one substance [ether] only; nor is it an action [Karma], from its being the cause of another sound. Now what remains i. e. has not been rejected, is the category left for sound, and so it is proved to be one of the qualities.

ति। शेषवन्नाम परिशेषः स च प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः यथा सदनित्यमित्येवमादिना द्रव्यगुणकर्म्मणामविशेषेण सामान्यविशेषसमवायेभ्यो निर्भक्तस्य शब्दस्य तस्मिन् द्रव्यकर्म्मगुणसंशये न द्रव्यमेकद्रव्यकत्वात्[1], न कर्म्म, शब्दान्तरहेतुत्वात्, यस्तु शिष्यते सोयमिति शब्दस्य गुणत्वप्रतिपत्तिः। सामान्यतो दृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते यथेच्छादिभिरात्मा इच्छादयो गुणाः गुणाश्च द्रव्यसंस्थानाः तद्यदेषां स्थानं स आत्मेति॥ विभागवचनादेतत्त्रिविधमिति सिद्धे त्रिविधवचनम् महतो महाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वा-

---

1 द्रव्यकत्वात् instead of द्रव्यत्वात् B. I.

'Sámányatodṛishṭa' is that kind of inference wherein the relation between a mark or sign [Linga] and what is marked by it [Lingí] being unknown we conclude the invisible Lingí from the resemblance of the sign [Linga] to some other object. As for instance: we infer the soul from desire and so forth; for, desire and so forth being qualities which must be inherent in some substance, we cannot but assign a substratum to those qualities and this we call the soul or mind.

Although the triplicity of the inference would be quite manifest from the mere statement of its division, yet the word "three fold" is added to show that the author thinks highly of the shortness of his Sútra which contains the whole doctrine of the important and much comprising syllogism, and that, he thinks comparatively less of the shortness of other Sútras. The triplicity of inference as mentioned above is mostly found in the science concerning the Established truths [Siddhánta] Fraud [chhala] words of the trustworthy [Śabda] and so forth. Perception refers to present objects [Sat]; whereas inference refers to present and absent objects. Why? From its comprehending all the three times: for the objects existing in the three times are grasped by inference. For we can infer what will be, what is, and what has been. Absent [Asat] means either what is past or what is future. Now about Comparison.

6. APHORISM.

Comparison or Knowledge of resemblance [Upamána] is the means of proving what is to be proved, through its similarity to something perfectly well known.

क्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः। तथा चायमित्थम्भूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छले शब्दादिषु च बहुलं समाचारः शास्त्र इति। सद्विषयञ्च प्रत्यक्षं सदसद्विषयञ्चानुमानम्, कस्मात् त्रैकाल्यग्रहणात् त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते भविष्यतीत्यनुमीयते भवतीति चाभूदिति च। असच्च खल्वतीतमनागतञ्चेति। अथोपमानम्॥

सू० प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्॥ ६॥

भा० प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति। यथा गौरेवं गवय इति, किं पुनरत्रोपमानेन क्रियते यदा खल्वयं गवा समानधर्म्मं प्रतिपद्यते तदा प्रत्यक्षतस्तमर्थं प्रतिपद्यत इति समाख्यास-

COMMENTARY.

Knowledge of resemblance [Upamána] is the instrument of knowledge of an object through its similarity to something well known previously. For instance, the Gavaya is known from its similarity to the cow. But, some one might object, what is effected, in this instance, by the knowledge of resemblance? For, when a man finds qualities similar to those of a cow, he directly perceives the object [Gavaya]. We answer that the use of the knowledge of resemblance is the knowledge of the relation between a name and an object so named. For, a particular case of knowledge of resemblance being expressed to a man as, 'just as a cow is so is Gavaya,' he when perceiving, with his eye, an object possessing the same characters as a cow, knows the relation of the name Gavaya to that object. In like manner, other cases of Upamána being expressed as, 'just as Mudga [a sort of kidney bean] is so is Mudgaparṇí '[another sort of kidney bean],' 'just as Másha is so is Máshaparṇí,' one, from the knowledge of resemblance knowing the relations of the names 'Mudgaparṇí and Máshaparṇí' to the herbs so named takes them for the purpose of a medicament. In the same way many other cases of Upamána may be sought for in the world. Now about words of the trustworthy (śabda).

म्बन्धप्रतिपत्तिरुपमानार्थं इत्याह । यथा गौरेवं गवय इत्युपमाने प्रयुक्ते गवा समानधर्म्ममर्थमिन्द्रियार्थसन्निकर्षादुपलभमानोऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति । यथा मुद्गस्तथा मुद्गपर्णी यथा-माषस्तथा माषपर्णीत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञि[1]सम्बन्धम्प्र-तिपद्यमानस्तामोषधीं भैषज्यायाहरति एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति । अथ शब्दः ॥

सू॰ आप्तोपदेशः शब्दः ॥ ७ ॥

भा॰ आप्तः खलु साक्षात्कृतधर्म्मा यथादृष्टस्यार्थस्य चिख्याप-यिषया प्रयुक्त उपदेष्टा । साक्षात्करणमर्थस्याप्तिस्तया वर्त्तत[2] इत्याप्तः ऋष्यार्य्यम्लेच्छानां समानं लक्षणम् । तथा च सर्व्वेषां व्यवहाराः प्रवर्त्तन्त-

---

1 संज्ञासंज्ञि instead of संज्ञासंज्ञि B. I.

2 वर्त्तते instead of प्रवर्त्तते, B. I.

7. APHORISM.

Word or testimony is the assertion of the veracious [Ápta].

COMMENTARY.

The characters of the veracious Ápta should be well known. The "Ápta" is a man who, whilst giving information, is actuated by a desire to state the facts in exact agreement with his own experience. Immediate knowledge of an object is called Ápti or acquisition; one possessing it [as well as other qualities] is said to be Ápta. Such is the description of the veracious 'Ápta' which is applicable to all sages, respectable men and even barbarians that are endowed with the said qualities. So that all the actions and all the intercourse of gods, men and animals proceed by means of the instruments of knowledge only and by no other way.

8. APHORISM.

It is of two kinds, 1. that [testimony] whereof the matter is seen [Dṛishṭártha], 2. that whereof the matter is not seen [Adṛishṭártha].

COMMENTARY.

Dṛishṭártha means that assertion whereof the matter is seen in this world. Adṛishṭártha means that assertion whereof the matter is to be seen in the next world. Such is the difference between the assertions of the sages and those of ordinary men. Why is this division given? It is given, in order that one may not

---

इति । एवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्पन्ते[1] नातो-न्यथेति ॥

सू॰ सद्विविधो दृष्टाऽदृष्टार्थत्वात् ॥ ८ ॥

भा॰ यस्येह दृश्यतेऽर्थः स दृष्टार्थः यस्यामुत्र प्रतीयते सोऽदृष्टार्थः एवम् ऋषि[2]लौकिकवाक्यानां विभागइति । किमर्थं पुनरिदमुच्यते स न मन्येत दृष्टार्थएवाप्तोपदेशः प्रमाणम् अर्थस्यावधारणादिति । अदृष्टार्थोऽपि प्रमाणमर्थस्यानुमानादिति । किं पुनरनेन प्रमाणेनार्थजातं प्रमातव्यमिति तदुच्यते ॥

---

1 प्रकल्पन्ते instead of प्रकल्प्यन्ते B. I.

2 एवम् ऋषि instead of एवमपि B. I.

suppose only those assertions of the veracious to be authoritative whereof the matter is seen in this world, the certainty of the matter being manifestly determined; for, that assertion also, whereof the matter is not seen in this world, is authoritative, the existence of that matter being inferred.

In anticipation of the question what are those objects to be established by the instruments of knowledge, the author gives the next aphorism.

9. APHORISM.

Soul, body, sense, sense-objects, knowledge, intellection, mental sensory, activity, vices, transmigration, fruit, pain, and beatitude are the things worth rightly knowing.

COMMENTARY.

The Soul is all-seeing, all-enjoying and all-suffering, all-feeling and all-knowing. Body is its abode through which it enjoys or suffers. Organs of sense are the instruments of experience. Sense-objects are the things to be felt or experienced. Intellection [Buddhi] is experience. The organs of sense are not able to produce experience of all objects; but the mental sensory [Manas] which is an internal organ, takes any thing as its object. It is the cause of the external and internal perceptions, that is, perception of the external objects and feeling of pleasure and pain. Activity and vices do not belong to it, that is, to the mental sensory. Transmigration of the soul [Pretyabháva] is the state of the soul undergoing a perpetual change of bodies differing from preceding and

---

सू० आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥

भा० तत्रात्मा सर्वस्य द्रष्टा, सर्व्वस्य भोक्ता, सर्वज्ञः, सर्व्वानुभावी, तस्य भोगायतनं शरीरम् । भोगसाधनानीन्द्रियाणि भोक्तव्या इन्द्रियार्थाः भोगो बुद्धिः । सर्व्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्व्वविषयमन्तःकरणं मनः शरीरेन्द्रियार्थबुद्धिसुखदुःखवेदनानां निर्वृत्तिकारणम्, प्रवृत्तिर्दोषाश्च नास्य, इदं शरीरमपूर्व्वमनुत्तरञ्च, पूर्व्वशरीराणामादिर्नास्ति उत्तरेषामपवर्गोऽन्त इति प्रेत्यभावः । स साधनसुखदुःखोपभोगः फलम् । दुःखमिति नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्या-

Digitized by Google

succeeding bodies. The series of the preceding bodies has no beginning, but that of the subsequent bodies terminates in beatitude. Fruit is the experience of pleasure or pain through the means of body sense and so forth. Pain does not consist in the privation of the agreeable perception of pleasure. What then? It proceeds even from the birth, in other words, pain takes its rise from the very beginning of the birth of a creature. The instruments of pleasure or pain, namely, the body, senses, objects and so forth, being ever closely connected with pain never parting from it, nay, experiencing a variety of vexations, the author recommending pain to be known, suggests us to engage in the abstract meditation; for, a man engaged in meditation obtains clearness of thoughts, and then possessing clearness of thoughts he becomes disgusted with worldly concerns, and being disgusted with the worldly concerns, he becomes void of attachment to all objects and after being void of attachment to objects he gains beatitude. Beatitude is defined as an entire annihilation of pain together with freedom from the bondage of the continuous series of births and deaths.

Though there are other sorts of objects worth knowing, as Substance. Quality, Action, Generality Particularity and Inhesion,* which are innumerable with their divisions, yet the objects enumerated in this aphorism have been particularly enunciated by the author; for, the right understanding of them leads one to beatitude and the misunderstanding to transmigration.

* See the fourth Vaiśeshika Aphorism.

स्यानम्, किन्तर्हि जन्मनएवेदम्, ससुखसाधनस्य दुःखानुषङ्गाद्दुःखेनावि-प्रयोगाद्विविधबाधनायोगाद्दुःखमिति समाधिभावनमुपदिश्यते, समाहितो भावयति, भावयन्निर्विद्यते, निर्विण्णस्य वैराग्यम् विरक्तस्यापवर्ग इति जन्ममरणप्रबन्धोच्छेदः सर्व्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्य-गुणकर्म्मसामान्यविशेषसमवायाः प्रमेयम् तद्भेदेन चाऽपरिसङ्ख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गः मिथ्याज्ञानात् संसार इत्यत एतदुपदिष्टं विशेषेणेति॥

तत्रात्मा तावत्प्रत्यक्षतो न गृह्यते स किमाप्तोपदेशमात्रादेव प्रति-पद्यतइति नेत्युच्यते। अनुमानाच्च प्रतिपत्तव्यइति। कथम्॥

सू० इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति॥ १०॥

The soul being not known by the senses, the question arises: Is it known merely from the assertion of the veracious, *Âpta*? We answer not so; it is to be known from inference. How is it?

10. APHORISM.

Desire, aversion, volition, pleasure, pain and cognition are the sign of the soul.

COMMENTARY.

The soul perceiving an object of the same sort from the vicinity of which it has once felt pleasure wants to possess it again. Such desire to possess, which, necessarily supposes one percipient, perceiving various objects and at the same time recalling his previous perceptions, is the mark of the existence of the soul. Recollection is not possible in mere intellection which is cognisant only of some limited object, just as it is impossible in the case of a separate body [which does not recollect what is perceived by another body than itself]. In like manner, as to the means of pain, there arises aversion in a percipient subject perceiving various objects, from the recollection of his previous perceptions. Again, the knowing subject, seeing an object of the same sort that is well known to him as the means of pleasure, wishes or endeavours to possess it; such will or volition cannot take place, if there be no such being to perceive various objects and to recall to himself his past experiences. Nor is this recollection possible in the mere intellection, cognisant only of some limited object, as in the case of a separate body. In the same way a volition in the case of the means of pain may be explain-

भा॰ यज्जातीयस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनोदर्शनप्रतिसन्धानाद्भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे प्रतिसंधानं न सम्भवति[1] देहान्तरवदिति । एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्दुःखहेतौ द्वेषः, यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थम्पश्यन्नादातुम् प्रयतते सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात् नियतविषये बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति एतेन दुःखहेतौ प्रयत्नो व्याख्यातः । सुखदुःखस्मृत्या

1 बुद्धिमात्रे प्रतिसंधानं न संभवति instead of बुद्धिमात्रे न संभवति. B. I.

ed. By the remembrance of pleasure or pain the soul acquiring the means of them finds pleasure or pain, that is, experiences them. Here the reason is the same as mentioned before. When the soul wishes to know something it deliberates about it: 'What is it?' and having thus pondered over it, he knows it to be such and such a thing. Such knowledge having the same agent as the desire of knowing and the reflexion about object, is another sign of the soul. Here there is the same reason as mentioned before. Now the phrase 'like a separate body,' [Dehántaravat] is thus explained:—With regard to the deniers of the soul, (we remark the following) as the different intellections situated in the different bodies, and directed upon some fixed objects, are not remembered by each other, [as they are not perceived by each other]; just so the different intellections or cognitions of the same persons could not be remembered by one another; both cases being quite similar to each other. There is a law pertaining to a single body that one can remember what has been seen by oneself and not that which is seen by any other than oneself In like manner, there is another law regarding beings more than one that they do not remember what has been seen by persons different from themselves. But the deniers of the soul are not able to establish these two laws. So it has been proved that the soul exists.

KEŚÁVA ŚÁSTRI.

(To be continued).

चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते सुखदुःखे वेदयते पूर्व्वोक्त एव हेतुः, बुभुत्समानः खल्वयं विमृशति किंस्विदिति विमृशन् जानीते इदमिति तदिदं ज्ञानं बुभुत्साविमर्शाभ्यामभिन्नकर्तृकं गृह्यमाणमात्मलिङ्गम् पूर्व्वोक्त एव हेतुरिति । तत्र देहान्तरवदिति विभज्यते । यथाऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयते तथैकदेहविषया अपि न प्रतिसन्धीयेरन् अविशेषात्, सो ऽयमेकसत्त्वस्य समाचारः स्वयं दृष्टस्य स्मरणं नान्यदृष्टस्येति एवं खलु नानासत्त्वानां समाचारोऽन्यदृष्टमन्ये न स्मरन्तीति । तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमिति । एवमुपपन्नमस्त्यात्मेति ।

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6. NOVEMBER 1st 1877. Vol. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

हनस्तो ऽचिण्णलो: ॥ ३२ ॥

तद्धितेष्विति निवृत्तम् । तत्संबद्धं किनीत्यपि । ञ्णितीति वर्त्तते । हनस्तकारादेशो भवति ञ्णिति प्रत्यये परत: चिण्णलौ वर्जयित्वा । घातयति । घातक: । साधुघाती । घातंघातम् । घातो वर्त्तते । अचिण्णलोरिति किम् । अघानि । जघान । धातो: कार्यमुच्यमानं धातो: प्रत्यये विज्ञायते । इह न भवति वार्त्रघ्नमितरद्विति ॥

आतो युक्चिण्कृतो: ॥ ३३ ॥

आकारान्तस्याङ्गस्य चिणि कृति ञ्णिति युगागमो भवति । अदायि । अधायि । कृति । दायो, दायक: । धायो, धायक: । चिण्कृतोरिति किम् । ददौ । दधौ । चौडि: । बालाकि: । बाह्वादित्वादिञ् । का देवता अस्य क: ॥

नोदात्तोपदेशस्य मान्तस्यानाचमे: ॥ ३४ ॥

उदात्तोपदेशस्य मान्तस्याङ्गस्याचमिवर्जितस्य चिणि कृति च ञ्णिति यदुक्तं तन्न भवति । किं चोक्तमत उपधाया इति वृद्धि: । अशमि । अतमि । अदमि । कृति खल्वपि । शमक: । तमक: । दमक: । शम, तमो, दम: । उदात्तोपदेशस्येति किम् । यामको, रामक: । कथमुद्यमोपरमौ । आह उद्यमे यम उपरमे इति निपातनादनुगन्तव्यौ । उपदेशग्रहणं किम् । शमी दमी तमीत्यत्र यथा स्या,दिह मा भूत्, यामक:, रामक इति । मान्तस्येति किम् । चारक: । पाटक: । अनाचमेरिति किम् । आचामक: ॥ अनाचमिकमिवमीनामिति वक्तव्यम् ॥ * ॥ काम: । काम: । आचाम: । काम इति चौरादिकस्य णिचि वृद्धौ सत्यां भवति । तत्र

हि मित्त्वं नास्ति । नान्ये मितो ऽहेताविति । सूर्यविश्रामा भूमिरित्येव-मादिकं प्रयोगमन्याय्यमेव मन्यन्ते । चिण्णमुलोरित्येव । शशाम तताम ॥

जनिवध्योश्च ॥ ३५ ॥

जनि वधि इत्येतयोश्चिणि कृति च ञिणति यदुक्तं तच्च भवति । अजनि । जनकः । प्रजनः । अवधि । वधकः । वधः । वधिः प्रकृत्य-न्तरं व्यञ्जनान्तोस्ति तस्यायं प्रतिषेधो विधीयते । भक्तकश्चेव विद्येत वधकोपि न विद्यते इति हि प्रयोगो दृश्यते । वधादेशस्यादन्तत्वा-देव वृद्धेरभावः । चिण्णमुलोरित्येव । जजान गर्भं महिमानमिन्द्रम् ॥

अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ ॥ ३६ ॥

सर्वं निवृत्तमङ्गस्येति वर्त्तते । अर्त्ति ह्री व्ली री क्नूयी क्ष्मायी इ-त्येतेषामङ्गानामाकारान्तानां च पुगागमो भवति णौ परतः । अर्त्ति । अर्पयति । ह्री । ह्रेपयति । व्ली । व्लेपयति । री । रेपयति । क्नूयी । क्नोपयति । क्ष्मायी । क्ष्मापयति । आकारान्तानाम् । दापयति । धाप-यति । अर्त्तीति ऋ गतिप्रापणयोः, ऋ गताविति द्वयोरपि धात्वोर्ग्रह-णम् । रीत्यपि री गतिरेषणयोरीङ् श्रवण इति । पुकः पूर्वान्तकरणमदी-दपदित्यत्रोपधाह्रस्वो यथा स्यादिति ॥

शाच्छासाह्वाव्यावेपां युक् ॥ ३७ ॥

शा छा सा ह्वा व्या वे पा इत्येतेषामङ्गानां युगागमो भवति णौ परतः । शा । निशाययति । छा । अवच्छाययति । सा । अवसाय-यति । ह्वा । ह्वाययति । व्या । संव्याययति । वे । वाययति । पा । पाययति । पाग्रहणे पै ओवै शोषण इत्यस्यापीह ग्रहणमिच्छन्ति । पा रक्षण इत्यस्य लुग्विकरणत्वान्न भवति ॥ लुगागमस्तु तस्य वक्तव्यः ॥ * ॥ पालयति ॥ धूञ्प्रीञोर्नुग्वक्तव्यः ॥ * ॥ धूनयति । प्रीणयति । एते पूर्वान्ता एव क्रियन्ते । तेन न्यशीशयत् । अपीपलत् । अदूधुनत् । अपि-प्रिणत् । इत्युपधाह्रस्वत्वं भवति । शाच्छासाह्वाव्यावेपां कृतात्वानां ग्रहणं पुकः प्राप्तिमाख्यातुम् । किमेतस्याख्याने प्रयोजनम् । एतस्मिन्

प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा नास्तीत्युपदिश्यते । तेनाध्यापयति ज्ञापयतीत्येवमादि सिद्धं भवति ॥

वो विधूनने जुक् ॥ ३८ ॥

वा इत्येतस्य विधूननेऽर्थे वर्त्तमानस्य जुगागमो भवति णौ परतः । पक्षेणोपवाजयति । विधूननइति किम् । आवापयति केशान् । किमर्थं सूत्रं वज गतौ एयन्तस्य सिद्धत्वात् । वातेर्युग्मा भूदित्येवमर्थम् । पै ओ-वै शोषणे इत्यस्यैतद्रूपम् ॥

लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥ ३९ ॥

ली ला इत्येतयोरङ्गयोरन्यतरस्यां नुक् लुक् इत्येतावागमौ भवतो णौ परतः स्नेहविपातनेऽर्थे । घृतं विलाययति । विलीनयति घृतं, विलालयति । विलापयति । ली ई इतीकारः प्रश्लिष्यते तत ईकारान्तस्यैव नुग्भवति, न तु कृतात्वस्य विभाषा लीयतेरिति । स्नेहविपातनइति किम् । जतु विलापयति । जटाभिरालापयते । ली इति लीलीङोर्ग्रहणम् । ला इति लातेः कृतात्वस्य च लीयतेः ॥

भियो हेतुभये षुक् ॥ ४० ॥

भी इत्येतस्य हेतुभयेऽर्थे षुगागमो भवति णौ परतः । मुण्डो भीषयते । जटिलो भीषयते । अत्रापि भी ई इतीकारप्रश्लेषः कृतात्वस्य षुग्निवृत्त्यर्थः । मुण्डो भापयते इत्येवं हि तत्र भवति । हेतुभयइति किम् । कुञ्चिकयैनं भाययति । नात्र हेतुः प्रयोजको भयकारणं किं तर्हि कुञ्चिका ॥

स्फायो वः ॥ ४१ ॥

स्फाय इत्येतस्याङ्गस्य वकारादेशो भवति णौ परतः । स्फावयति ॥

शदेरगतौ तः ॥ ४२ ॥

शदेरन्त्यस्यागतावर्थे वर्त्तमानस्य तकारादेशो भवति णौ परतः । पुष्पाणि शातयति * । अगताविति किम् । गाः शादयति गोपालकः ॥

रुहः पोन्यतरस्याम् ॥ ४३ ॥

रुहेरन्त्यस्यान्यतरस्यां पकारादेशो भवति णौ परतः । व्रीहीन् रोपयति । व्रीहीन् रोहयति ॥

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥

प्रत्ययस्थात्ककारात्पूर्वस्याकारस्य इकारादेशो भवति आपि परतः, स चेदाप्सुपः परो न भवति । जटिलिका । मुण्डिका । कारिका । हारिका । एतिकाश्चरन्ति । प्रत्ययग्रहणं किम् । शक्नोतीति शका । स्थग्रहणं विस्पष्टार्थं ककारमात्रं प्रत्ययो नास्तीति सामर्थ्यात्प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुम् । कादिति किम् । नन्दना । रमणा । पूर्वस्येति किम् † । पटुका । मृदुका । अत इति किम् । गोका । नौका । तपरकरणं किम् । राका । धाका । आपीति किम् । कारकौ, धारकः । अथापीत्यनेन विशिष्यते ककारः । यद्येवं, कारिकेत्यत्रापि न प्राप्नोति अकारेण व्यवहितत्वात् । एकादेशे कृते नास्ति व्यवधानम् । एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव । वचनाद् व्यवधानमीदृशं यत्स्थानिवद्भावकृतमेकेन वर्णेन तदाश्रीयते रथकट्यादिषु तु श्रुतिकृतमनेकेन वर्णेन व्यवधानमिति इत्वं न भवति । असुप इति किम् । बहवः परिव्राजका अस्यां मथुरायां बहुपरिव्राजका मथुरा । सुबन्तादयं बहुपरिव्राजकशब्दात्पर आबिति प्रतिषेधो भवति । प्रसज्यप्रतिषेधश्चायं न पर्युदासः । पर्युदासे हि सति समुदायादसुबन्तात्पर आबितीत्वमत्र स्यादेव । अविद्यमानः सुप् अस्मिन् सेयमसुबिति । एवमपि नाश्रीयते । तथा हि सति बहुचर्मिकेत्यत्रापि न स्यात् ॥ मामकनरकयोरुपसंख्यानं कर्त्तव्यमप्रत्ययस्थत्वात् ॥ * ॥ मम इयं मामिका । नरिका । अणि ममकादेशः । केवल-

---

* फलानि शातयतीति पुस्तकान्तरे ऽधिकम् ।

† परस्य माभूदित्यधिकं पुस्तकान्तरे ।

मामकेति नियमात् संज्ञाछन्दसोरीकारो नान्यत्र । तेनाणप्रत्ययान्तादपि टाप् भवति । नरान् कायतीति नरिका । आतोनुपसर्गे क इति कः प्रत्ययः ॥ प्रत्ययनिषेधे त्यक्त्यपोश्चोपसंख्यानम् ॥ * ॥ उदीचामात स्थाने यकपूर्वाया इति विकल्पो मा भूदिति, दाक्षिणात्यिका । इहत्यिका ॥

न यासयोः ॥ ४५ ॥

या सा इत्येतयोरिकारादेशो न भवति । यका । सका । या सा इति निर्देशो न तन्त्रं यत्तदोरुपलक्षणमेतत् । इहापि प्रतिषेध इष्यते । यकांयकामधीमहे । तकांतकां पचाम इति ॥ यत्तदोः प्रतिषेधे त्यकन उपसंख्यानम् ॥ * ॥ उपत्यका । अधित्यका ॥ पावकादीनां छन्दस्युपसंख्यानम् ॥ * ॥ हिरण्यवर्णाः शुचयः पावकाः । यासु अलोमकाः । छन्दसीति किम् । पाचिका ॥ आशिषि चोपसंख्यानम् ॥ * ॥ जीवतात् जीवका । नन्दतात् नन्दका । भवतात् भवका ॥ उत्तरपदलोपे चोपसंख्यानम् ॥ * ॥ देवदत्तिका । देवका । यज्ञदत्तिका । यज्ञका ॥ क्षिपकादीनां चोपसंख्यानम् ॥ * ॥ क्षिपका । ध्रुवका ॥ तारका ज्योतिष्युपसंख्यानम् ॥ * ॥ तारका । ज्योतिषीति किम् । तारिका दासी ॥ वर्णका तान्तव उपसंख्यानम् ॥ * ॥ वर्णका प्रावरणभेदः । तान्तवइति किम् । वर्णिका भागुरी लोकायते ॥ वर्त्तका शकुनौ प्राचामुपसंख्यानम् ॥ * ॥ वर्त्तका शकुनिः । प्राचामन्यत्र उदीचां तु वर्त्तिका । शकुनाविति किम् । वर्त्तिका भागुरी लोकायतस्य ॥ अष्टका पितृदैवत्ये ॥ * ॥ अष्टका । पितृदैवत्यइति किम् । अष्टिका खारी ॥ वा सूतकापुत्रकावृन्दारकाणा मुपसंख्यानम् ॥ * ॥ सूतिका । सूतका । पुत्रिका । पुत्रका । वृन्दारिका । वृन्दारका ॥

उदीचामातः स्थाने यकपूर्वायाः ॥ ४६ ॥

उदीचामाचार्याणां मतेन यकारपूर्वायाः ककारपूर्वायाश्चातः स्थाने योऽकारस्तस्यातः स्थाने इकारादेशो भवति । उदीचां ग्रहणं विकल्पार्थम् । इभ्यका । इभ्यिका । चत्रियका । चत्रियिका । ककारपूर्वायाः ।

चटकका । चटकिका । मूषिकका । मूषिकिका । आत इति किम् । सांकाश्ये भवा सांकाश्यिका । स्थानग्रहणमनुवादेऽपि स्थानसंबन्धप्रतिपत्त्यर्थम् । आत इत्यनेन ह्यत इति स्थानी विशिष्यते । यकपूर्वाया इति किम् । अश्वा । अश्विका । यकपूर्वाया इति स्त्रीलिङ्गनिर्देश आतः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थं, इह न भवति । शुभं यातीति शुभंयाः । शुभंयिका ॥ यकपूर्वत्वे धात्वन्तप्रतिषेधः ॥ * ॥ धात्वन्तयोर्यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः । सुनयिका । सुशयिका । सुपाकिका । आशोकिका ॥

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥ ४७ ॥

आतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्याणां मतेन । भस्त्रा । भस्त्रिका । भस्त्रका । अभस्त्रका । अभस्त्रिका । एषका । एषिका । अजका । अजिका । अनजिका । अनजका । ज्ञका । ज्ञिका । अज्ञका । अज्ञिका । द्वके । द्विके । स्वका । स्विका । अस्विका । अस्वका । एषाद्वे नञ्पूर्वे न प्रयोजयतः । किं कारणम् । तत्र हि सति यदि साकच्काभ्यां नञ्समासः, अथापि कृते नञ्समासे पश्चादकच्, उभयथापि समासाद् या विभक्तिरुत्पद्यते तस्यां त्यदाद्यत्वे सति टापा भवितव्यं सोऽन्तर्वर्तिन्या विभक्त्या सुबन्तात्पर इति इत्वस्य प्राप्तिरेव नास्ति । तेन अनेषका अद्वके इत्येव नित्यं भवितव्यम् । स्वशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोऽपि प्रयोजयति । भस्त्रेत्ययमभाषितपुंस्कस्तस्याभाषितपुंस्काच्चेत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थम् । अविद्यमाना भस्त्रा यस्या अभस्त्रा । साल्पा, अभस्त्रका । अभस्त्रिका । अत्रोपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्कात्त्वाट्टाबुत्पद्यते तस्य के ऽण इति यो ह्रस्वो नासावभाषितपुंस्काद्विहितस्यातः स्थाने भवति । नञ्पूर्वाणामपीत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते । निर्भस्त्रिका । निर्भस्त्रका । बहुभस्त्रका । बहुभस्त्रिका, इत्येवमनयोरपीष्यते । तत्र नञ्पूर्वाणामिति वचनमनुवाद एव मन्दबुद्धिप्रतिपत्त्यर्थः ॥

अभाषितपुंस्काच्च ॥ ४८ ॥

अभाषितपुंस्काद्विहितस्यातः स्थाने योकारस्तस्योदीचामाचार्याणां मतेन इकारादेशो न भवति । खट्विका । खट्वका । अखट्वका । अखट्विका । परमखट्विका । परमखट्वका । बहुव्रीहौ यदा कपि ह्रस्वः क्रियते तदा भवितव्यमनेन विधिना । तत्राप्यभाषितपुंस्काद्विहितस्यातः स्थाने भवत्यकार इति । यदा तु अविद्यमाना खट्वा अस्याः अखट्वा, अल्पा अखट्वा, अखट्विकेति तदा न भवति । तथा अतिक्रान्ता खट्वामतिखट्वा, अल्पा अतिखट्वा, अतिखट्विका ॥

आदाचार्याणाम् ॥ ४९ ॥

अभाषितपुंस्कादातः स्थाने यो ऽकारस्तस्याचार्याणामाकारादेशो भवति । खट्वका । अखट्वाका । परमखट्वाका ॥

ठस्येकः ॥ ५० ॥

अङ्गस्य निमित्तं यष्ठः, कश्चाङ्गस्य निमित्तं, प्रत्यय,स्तस्य प्रत्ययठस्य इक इत्ययमादेशो भवति । प्राग्वहतेष्ठक् । आक्षिकः । शालाकिकः । लवणाट्ठञ् । लावणिकः । ठगादिषु यदि वर्णमात्रं प्रत्यय उच्चारणार्थोऽकारस्तदा इहाप्यकार उच्चारणार्थः । वर्णमात्रं तु स्थानित्वेनोपादीयते । संघाते तु प्रत्यये ऽत्रापि संघातग्रहणमेव । तत्र कणेष्ठः, कण्ठ इत्येवमादीनामुणादीनामुणादयो बहुलमिति न भवति । मथितं पण्यमस्य माथितिक इत्यत्र तु यस्येति लोपे कृते इसुसुक्तान्तात्क इति स्थानिवद्भावादिकस्य कादेशः प्राप्नोति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । यस्येत्यकारलोपस्य स्थानिवद्भावाद्वा । पूर्वस्मादपि हि विधौ स्थानिवद्भावः ॥

इसुसुक्तान्तात्कः ॥ ५१ ॥

इस् उस् इत्येवमन्तानामुगन्तानां तान्तानां चाङ्गानामुत्तरस्य ठस्य क इत्ययमादेशो भवति । इस् । सार्पिष्कः । उस् । धानुष्कः । याजुष्कः । उक् । नैषादकर्षुकः । शाबरजम्बुकः । मातृकम् । पैतृकम् । तान्तात् । औदश्वित्कः । शाकृत्कः । याकृत्कः । इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न

भवति । आशिषा चरति । आशिषिकः । उषा चरति औषिका ॥ दोष उपसंख्यानम् ॥ * ॥ दोर्भ्यां चरति दौष्कः ॥

चजोः कु घिण्ण्यतोः ॥ ५२ ॥

चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः । घिति । पाकः । त्यागः । रागः । ण्यति । पाक्यम् । वाक्यम् । रेक्यम् ॥

न्यङ्क्वादीनां च ॥ ५३ ॥

न्यङ्कु इत्येवमादीनां कवर्गादेशो भवति । न्यङ्कुः । नावञ्चतेरिति उप्रत्ययः । मद्गुः । मिमस्जिभ्य उरिति मस्जेरुप्रत्ययः । भृगुः । प्रथिमुदिभ्रस्जां संप्रसारणं सलोपश्चेत्युप्रत्ययः । दूरेपाकः । फलेपाकः । दूरे पच्यते स्वयमेव । फले पच्यते स्वयमेव । पचाद्यच् निपातनाद्वृद्धिः । तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् । क्षणेपाक इत्यपि हि के चित्पठन्ति । दूरेपाका फलेपाका इति टाबन्तमपरेऽधीयते । उकारान्तावपरे । दूरेपाकुः फलेपाकुरिति । तेषाम्,प्रत्ययो निपातनादेव । तक्रं वक्रमिति । तञ्चतेर्वञ्चतेश्च स्फायितञ्चिवञ्चीत्यादिना सूत्रेण रक् । व्यतिषङ्गः । व्यतिषजतीति पचाद्यच् । अनुषङ्गः । अवसर्गः । उपसर्गः । मेघः । श्वपाकः । मांसपाकः । कपोतपाकः । उलूकपाक इति । कर्म्मोपपदादणप्रत्ययः । संज्ञायामर्घः । अवदाघः । निदाघः । अर्हतेर्घञ् । अर्घः । अवपूर्वस्य निपूर्वस्य च दहेरवदाघः । निदाघः । संज्ञाया अन्यत्र अर्हः । अवदाहः । निदाहः । न्यग्रोधः, वीरुदित्यत्र न्यक्पूर्वस्य रुहेः पचाद्यचि विपूर्वस्य क्विपि धकारो विधीयते । न्यग्रोहयतीति न्यग्रोधः । विरोहयतीति विरुत् ॥

हो हन्तेर्ञ्णिन्नेषु ॥ ५४ ॥

हन्तेर्हकारस्य कवर्गादेशो भवति ञिति णिति प्रत्यये परतो नकारे च । घातयति । घातकः । साधुघाती । घातंघातम् । घातो वर्त्तते । नकारे । घ्नन्ति । घ्नन्तु । अघ्नन् । ह इति किम् । अलोन्त्यस्य मा भूत् । हन्तेरिति किम् । प्रहारः । प्रहारकः । ञ्णित्प्रत्ययो हन्तेर्विशेष-

णाम् । नकारो हकारस्य नकारे अनन्तरस्य हन्तिहकारस्येति । तच्चानन्तर्यं श्रुतिकृतं संनिपातकृतमाश्रीयते । स्थानिवद्भावशास्त्रकृतं तु यद्नानन्तर्यं तद्विघातकं वचनसामर्थ्यात् । यद्यपि सर्वैरेव णिजाद्यैर्हन्तिहकारो विशिष्यते तथापि येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति णिजादि धात्ववयवेन व्यवहितेपि सति भवति । इह तु न भवति । हननमिच्छति हननीयति हननीयतेर्ण्वुल्, हननीयक इति ॥

अभ्यासाच्च ॥ ५५ ॥

अभ्यासादुत्तरस्य हन्तिहकारस्य कवर्गादेशो भवति । जिघांसति । जङ्घन्यते । अहं जघान । अभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योभ्यासस्तस्मादेवैतत्कुत्वम् । इह न भवति । हननीयितुमिच्छति । जिहननीयिषति ॥

हेरचङि ॥ ५६ ॥

हिनोतेर्हकारस्याभ्यासादुत्तरस्य कवर्गादेशो भवति अचङि । प्रजिघीषति । प्रजेघीयते । प्रजिघाय । अचङीति किम् । प्राजीहयद् दूतम् । अचङीति शक्यमकर्तुं, कथं चङ्यभ्यासनिमित्ते णौ हिनोतिरङ्गं भवति । तत्राभ्यासनिमित्ते प्रत्यये हेरङ्गस्येति विज्ञायमाने प्राप्तिरेव नास्ति । तर्हि तत् ज्ञापकार्थम् । एतज्ज्ञाप्यते । हेरचङीति चङोन्यत्र हेरर्थाधिकस्यापि कुत्वं भवतीति । तेन प्रजिघाययिषतीति सिद्धं भवति ॥

सन्लिटोर्जेः ॥ ५७ ॥

सनि लिटि च प्रत्यये जेरङ्गस्य योभ्यासस्तस्मादुत्तरस्य कवर्गादेशो भवति । जिगीषति । जिगाय । सन्लिटोरिति किम् । जेजीयते । जिनातेः संप्रसारणे कृते यद्यपि जिर्भवति तथापि लाक्षणिकत्वात्तस्य ग्रहणं न भवति । जिज्यतुः । जिज्युः । इत्येव भवति ॥

विभाषा चेः ॥ ५८ ॥

चिनोतेरङ्गस्य सन्लिटोरभ्यासादुत्तरस्य विभाषा कवर्गादेशो भवति ।

चिचीषति । चिकीषति । चिकाय । चिचाय । सन्लिटोरित्येव । चेचीयते ॥

न क्वादेः ॥ ५९ ॥

कवर्गादेर्द्धातोश्चजोः कवर्गादेशो न भवति । कूजो वर्त्तते । खर्जः । गर्जः । कूज्यं भवता । खर्ज्यं, गर्ज्यं, भवता ॥

अजिव्रज्योश्च ॥ ६० ॥

अजि व्रजि इत्येतयोश्च कवर्गादेशो न भवति । समाजः । उदाजः । व्रजि । परिव्राजः । परिव्राज्यम् । अजेस्तु अजेर्व्यघञपोरिति वीभावस्य विधानाण्ण्यति नास्त्युदाहरणम् ॥

भुजन्युब्जौ पाण्युपतापयोः ॥ ६१ ॥

भुज न्युब्ज इत्येतौ शब्दौ निपात्येते पाणावुपतापे च । भुज्यतेनेनेति भुजः पाणिः । हलश्चेति घञ् । तत्र कुत्वाभावो गुणाभावश्च निपात्यते । उब्ज आर्जवे, न्युब्जिताः शेरतेस्मिन्निति न्युब्जः । उपतापो रोगस्तत्रैव घञि कुत्वाभावो निपात्यते । पाण्युपतापयोरिति किम् । भोगः । समुद्गः ॥

प्रयाजानुयाजौ यज्ञाङ्गे ॥ ६२ ॥

प्रयाज अनुयाज इत्येतौ निपात्येते यज्ञाङ्गे । पञ्च प्रयाजाः । पञ्चानुयाजाः । त्वमग्ने प्रयाजानां पश्चात् त्वं पुरस्तात् । यज्ञाङ्ग इति किम् । प्रयागः । अनुयागः । प्रयाजानुयाजग्रहणं प्रदर्शनार्थमन्यत्राप्येवंप्रकारे कुत्वं न भवति । एकादशोपयाजाः । उपांशुयाजमन्तरा यजति । अष्टौ पत्नीसंयाजा भवन्ति । ऋतुयाजैश्चरन्ति । इत्येवमादि सिद्धं भवति ।

वञ्चेर्गतौ ॥ ६३ ॥

वञ्चेरङ्गस्य गतौ वर्त्तमानस्य कवर्गादेशो न भवति । वञ्च्यं वञ्चन्ति वणिजः । गताविति किम् । वङ्क्यं काष्ठम् । कुटिलमित्यर्थः ॥

Digitized by Google

ओक उचः के ॥ ६४ ॥

उचेर्धातोः के प्रत्यये ओक इति निपात्यते। किं पुनरत्र निपात्यते। कुत्वं गुणश्च। न्योकः शकुन्तः। न्योको वृक्षः। कर्त्तरि इगुपधलक्षणः कः प्रत्ययः। अधिकरणादौ तु कारकान्तरे घञर्थे कविधानमिति। किमर्थं पुनरयं घञेव न व्युत्पाद्यते स्वरार्थमन्तोदात्तोयमिष्यते घञि सत्याद्युदात्तः स्यात्। दिवौकसः। जलौकसः। इत्येवमादावप्यसुनि प्रत्यये उणादयो बहुलमिति कुत्वं द्रष्टव्यम् ॥

ण्य आवश्यके ॥ ६५ ॥

ण्ये परत आवश्यकेऽर्थे कवर्गो न भवति। अवश्यपाच्यम्। अवश्यवाच्यम्। अवश्यरेच्यम्। आवश्यक इति किम्। पाक्यम्। वाक्यम्। रेक्यम् ॥

यजयाचरुचप्रवचर्चश्च ॥ ६६ ॥

यज याच रुच प्रवच ऋच इत्येतेषां ण्ये परतः कवर्गादेशो न भवति। यज। याज्यम्। याच। याच्यम्। रुच। रोच्यम्। प्रवच। प्रवाच्यम्। ऋच। अर्च्यम्। ऋदुपधादपि ऋचेरत एव निपातनाण्ण्यद्भवति। प्रवचग्रहणं शब्दसंज्ञार्थम्। प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोस्ति। अपरे पुनराहुरुपसर्गपूर्वस्य नियमार्थम्। प्रपूर्वस्यैव वचेरशब्दसंज्ञायां कुत्वप्रतिषेधो यथा स्यात्। अन्योपसर्गपूर्वस्य मा भूदिति। अविवाक्यमहरिति पठन्ति। एतत्तु विशेषणेष्यते। दशरात्रस्य यद्दशममहः। अन्यत्राविवाच्यमेव भवति ॥ ण्यति प्रतिषेधे त्यजेरुपसंख्यानम् ॥ * ॥ त्याज्यम् ॥

वचोशब्दसंज्ञायाम् ॥ ६७ ॥

वचोशब्दसंज्ञायां ण्यति परतः कवर्गो न भवति। वाच्यमाह। अवाच्यमाह। अशब्दसंज्ञायामिति किम्। अवघुषितं वाक्यमाह ॥

प्रयोज्यनियोज्यौ शक्यार्थे ॥ ६८ ॥

Digitized by Google

प्रयोज्य नियोज्य इत्येतौ शब्दौ शक्यार्थे निपात्येते । शक्यः प्रयोक्तुं प्रयोज्यः । शक्यो नियोक्तुं नियोज्यः । शक्यार्थइति किम् । प्रयोग्यो, नियोग्यः ॥

भोज्यं भक्ष्ये ॥ ६९ ॥

भोज्यं निपात्यते भक्ष्येभिधेये । भोज्य ओदनः । भोज्या यवागूः । इह भक्ष्यमभ्यवहार्यमात्रम् । भक्ष्यइति किम् । भोग्यः कम्बलः ॥

घोर्लोपो लेटि वा ॥ ७० ॥

घुसंज्ञकानां लेटि परतो वा लोपो भवति । दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । न च भवति । यदग्निरग्नये ददात् । आडागमे सति लोपेपि ददादिति सिद्धं भवति । तत्र वावचनं विस्पष्टार्थम् । एवा हि कस्य चिदाशङ्का स्याद्ददादित्येव नित्ये प्राप्ते लोप आरभ्यमाणो बाधतएवैतद्रूपमिति ॥

ओतः श्यनि ॥ ७१ ॥

ओकारान्तस्याङ्गस्य श्यनि परतो लोपो भवति । शो, निश्यति । छो, अवच्छ्यति । दो, अवद्यति । सो, अवस्यति ॥

क्सस्याचि ॥ ७२ ॥

क्सस्याजादौ प्रत्यये लोपो भवति । अधुक्षाताम् । अधुक्षाथाम् । अधुक्षि । अचीति किम् । अधुक्षत् । अधुक्षताम् । ककारवत उपादानं किम् । इह मा भूत् । उत्सौ । उत्साः । वत्सौ । वत्साः ॥

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥ ७३ ॥

दुह दिह लिह गुह इत्येतेषामात्मनेपदे दन्त्यादौ परतः क्सस्य वा लुग्भवति । अदुग्ध । अधुक्षत । अदुग्धाः । अधुक्षथाः । अदुग्ध्वम् । अधुक्षध्वम् । अधुक्ष्वहि । अधुक्षावहि । दिह । अदिग्ध । अधिक्षत । लिह । अलीढ । अलिक्षत । गुह । न्यगूढ । न्यघुक्षत । दुहादीनामिति किम् । व्यत्यवक्षत । आत्मनेपदइति किम् । अधुक्षत् । दन्त्यइति । किम् ।

अधुक्षामहि । लोप इति वर्त्तमाने लुग्ग्रहणं सर्वादेशार्थं तच्च वह्यर्थम् । अन्यत्र ह्यन्त्यस्यैव लोपे कृते झलो झलीति सकारलोपेन सिद्ध्यति । स्थानिवद्भावोऽपि अकारलोपस्य नास्ति । पूर्वत्रासिद्धे न स्थानिवदिति । दन्त्योष्ठ्योऽपि वकारो दन्त्य इति गृह्यते । यदि स न गृह्येत ततस्तोयग्रहणमेवात्र कृतं स्यात् ॥

शमामष्टानां दीर्घः श्यनि ॥ ७४ ॥

शमामष्टानां दीर्घो भवति श्यनि परतः । शम् । शाम्यति । तम् । ताम्यति । दम् । दाम्यति । श्रम् । श्राम्यति । क्षम् । क्षाम्यति । क्लम् । क्लाम्यति । मदी । माद्यति । अष्टानामिति किम् । असिति? अस्यति । श्यनीति किम् । भ्रमति । बभ्राम । वा भ्राशेति श्यनो विकल्पः ॥

ष्ठिवुक्लम्याचमां शिति ॥ ७५ ॥

ष्ठिवु क्लमु आचम् इत्येतेषां दीर्घो भवति शिति परतः । ष्ठीवति । क्लमु क्लामति । आचामति । क्लमि ग्रहणं शबर्थम् । चमेराङ्पूर्वस्य ग्रहणं, इह मा भूत् । चमति । विचमति ॥

क्रमः परस्मैपदेषु ॥ ७६ ॥

क्रमः परस्मैपदपरे शिति परतो दीर्घो भवति । क्रामति । क्रामतः । क्रामन्ति । परस्मैपदेष्विति किम् । आक्रमते आदित्यः । इह उत्क्राम संक्रामेति हेर्लुकि कृते न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्दीर्घो न प्राप्नोति । नैष दोषः । लुमता शब्देन लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः । न च हौ क्रमिरङ्गं किं तर्हि शपि ॥

इषुगमियमां छः ॥ ७७ ॥

इषु गमि यम इत्येतेषां शितिपरतश्छकारादेशो भवति । इच्छति । गच्छति । यच्छति । इषेरुदितो ग्रहणं इह मा भूत् । इष्यति । इष्णातीति । ये इषिमुदितं नाधीयते तेऽचीत्यनुवर्त्तयन्ति । तत्र प्रधानमङ्गग्रहणं शितीत्यनेन विशेष्यत इति वर्णयन्ति । तथा च सति तदादिवि-

धिर्न भवति । यस्मिन्विधिस्तदादावल्ग्रहणइत्येतदपि विशेषणेनैवेष्यते । तेन दृषाणेत्यत्र छत्वं न भवति । नह्ययमजेत्र श्चिदिति ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां
पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७८ ॥

पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्त्ति शद सद इत्येतेषां पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद इत्येते आदेशा भवन्ति शिति परतः । पा । पिबति । घ्रा । जिघ्रति । ध्मा । धमति । स्था । तिष्ठति । म्ना । मनति । दाण् । यच्छति । दृशि । पश्यति । अर्त्ति । ऋच्छति । सर्ति । धावति । शद । शीयते । सद् । सीदति । पिबतेर्लघूपधगुणः प्राप्नोति सोऽङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति न भवति । अथ वा अकारान्तोयमादेश आद्युदात्तो निपात्यते । सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति । अन्यत्र सरति अनुसरतीत्येव भवति ॥

ज्ञाजनोर्जा ॥ ७९ ॥

ज्ञा जन इत्येतयोर्जादेशो भवति शिति परतः । जानाति । जायते । जनेर्दैवादिकस्य ग्रहणम् ॥

प्वादीनां ह्रस्वः ॥ ८० ॥

पू इत्येवमादीनां ह्रस्वो भवति शिति परतः । प्वादयः क्र्यादिषु पठ्यन्ते । पूञ् पवनइत्यतः प्रभृति व्ली गतौ वृदिति यावत्के चिदिच्छन्ति, वृत्करणमेतल्ल्वादीनां प्वादीनां च परिसमाप्त्यर्थमिति । अपरे तु ल्वादीनामेव परिसमाप्त्यर्थं वृत्करणमेतदिच्छन्ति । आगणान्ताः प्वादय इति । पूञ् । पुनाति । लूञ् । लुनाति । स्तॄञ् । स्तृणाति । येषामागणान्ताः प्वादयस्तेषां जानातीत्यत्रापि ह्रस्वः प्राप्नोति । ज्ञाजनोर्जा इति दीर्घकरणसामर्थ्यात्र भवति । जनेरपि हि जआदेशे सति अतो दीर्घो यञीति दीर्घत्वेन जायतइति सिद्ध्यति ॥

मीनातेर्निगमे ॥ ८१ ॥

मीनातेरङ्गस्य शिति प्रत्यये परतो ह्रस्वो भवति निगमविषये । प्रमिणन्ति व्रतानि । निगमइति किम् । प्रमीणाति ॥

मिदेर्गुणः ॥ ८२ ॥

मिदेरङ्गस्येको गुणो भवति शिति प्रत्यये परतः । मेद्यति । मेद्यतः । मेद्यन्ति । शितीत्येव । मिद्यते ॥

जुसि च ॥ ८३ ॥

जुसि च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । अजुहवुः । अबिभयुः । अबिभरुः । अथ चिनुयुः सुनुयुरित्यत्र कस्मान्न भवति । अत्र तु ङित्त्वे सार्वधातुकाश्रयं यासुडाश्रयं च । तत्र नाप्राप्ते सार्वधातुकाश्रयङित्त्वनिमित्ते प्रतिषेधे जुसि गुण आरभ्यमाणस्तमेव बाधते । यासुडाश्रयङित्त्वनिमित्तं तु न बाधते । तत्र हि प्राप्ते चाप्राप्ते चारभ्यतइति ॥

सार्वधातुकार्द्धधातुकयोः ॥ ८४ ॥

सार्वधातुके आर्द्धधातुके च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति । तरति । नयति । भवति । आर्द्धधातुके । कर्त्ता । चेता । स्तोता । सार्वधातुकार्द्धधातुकयोरिति किम् । अग्नित्वम् । अग्निकाम्यति । यदि हि प्रत्यये सङ्गीति वोच्येत, इहापि स्यात् ॥

जाग्रो ऽविचिण्णल्ङित्सु ॥ ८५ ॥

जागृ इत्येतस्याङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः । जागरयति । जागरकः । साधुजागरी । जागरंजागरम् । जागरो वर्त्तते । जागरितः । जागरितवान् । वृद्धिविषये प्रतिषेधविषये च यथा स्यादिति जागर्त्तेरयं गुण आरभ्यते । तस्मिन्कृते यात उपधाया वृद्धिः प्राप्नोति सा न भवति । यदि हि स्यादनर्थक एव गुणः स्याच्चिण्णलोश्च प्रतिषेधवचनमनर्थकम् । अविचिण्णल्ङित्स्विति किम् । जॄस्तॄजागृभ्यो क्विन् ।

जागृविः । चिण् । अजागारि । णल् । जजागार । ङित् । जागृतः । जागृथः । वीति के चिदिकारमुच्चारणार्थं वर्णयन्ति क्वसावपि वकारादौ गुणो न भवति । जजागृवान् । अजागरुः । अहं जजागर इत्यत्र प्रतिषेधः प्राप्नोति, नाप्रतिषेधात् । अविचिण्णल्ङित्स्विति पर्युदासोयम् । अथ वा जाग इति प्राप्तिरसावानन्तर्याद् विचिण्णल्ङित्सु प्रतिषिध्यते । या तु जुसि च सार्वधातुकार्धधातुकयोरिति च प्राप्तिः सा न प्रतिषिध्यते ॥

पुगन्तलघूपधस्य च ॥ ८६ ॥

पुगन्तस्याङ्गस्य लघूपधस्य च सार्वधातुकार्धधातुकयोर्गुणो भवति । पुगन्तस्य । ब्लेपयति । ह्रेपयति । क्नोपयति । लघूपधस्य । भेदनम् । छेदनम् । भेत्ता । छेत्ता । प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्ये सति लघूपधगुणो न व्यावर्त्यते इति ज्ञापितमेतत् क्नुसनोः कित्करणेन । घसिगृधिधृषिक्षिपेः क्नुः । हलन्ताच्चेति ।

संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षे लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥
धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनल्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥
अभ्यस्तस्य यदाहाचि लक्षणं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥

उपधात्र इगेव गृह्यते । ततो भिनत्तीति गुणो न भवति । अपरे पुकि अन्तः पुगन्तः । लघ्वी उपधा यस्य लघूपधा पुगन्तश्च लघूपधा च पुगन्तलघूपधमिति सूत्रार्थं वर्णयन्ति ॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ८७ ॥

अभ्यस्तसंज्ञकस्याङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति । नेनिजानि । अनेनिजम् । परिवेविषाणि । पर्यवेविषम् । अभ्यस्तस्येति किम् । वेदानि । अचीति किम् । नेनेक्ति । पिद्ग्रहणमुत्तरा-

Digitized by Google

र्थम् । सार्वधातुकइति किम् । नेनेज्ञ । लघूपधस्येत्येव । जुहवानि । अजुहवम् ॥ बहुलं छन्दसीति वक्तव्यम् ॥ * ॥ जुजोषदिति यथा स्यात् । पस्पशीति । चाकशीति । वावशीति । यङ्लुकि छान्दसमुपधाह्रस्वत्वं द्रष्टव्यम् । पस्पशीतीत्यत्राभ्यासह्रस्वत्वं च प्रकृत्यन्तराणां वा स्य स्पशि-कशिवशीनामेतानि रूपाणि ॥

भूसुवोस्तिङि ॥ ८८ ॥

भू सू इत्येतयोस्तिङि सार्वधातुके गुणो न भवति । अभूत् । अभूः । अभूवम् । सुवै । सुवावहै । सुवामहै । सूतेर्लुग्विकरणस्येदं ग्रह-णम । सुवतिसूयत्योर्विकरणेन तिङो व्यवधानम् । विकरणस्यैव ङित्त्वा-द्गुणाभावः सिद्धः । तिङीति किम् । भवति । सार्वधातुकइत्येव । व्यति-भविषीष्ट । अथ बोभवीति यङ्लुकि गुणप्रतिषेधः कस्मान्न भवति । ज्ञाप-कात् । यदयं बोभूत्विति गुणाभावार्थं निपातनं करोति ॥

उतो वृद्धिर्लुकि हलि ॥ ८९ ॥

सार्वधातुके पितीति वर्त्तते । उकारान्तस्याङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके । यौति । यौषि । यौमि । नौति । नौषि । नौमि । स्तौति । स्तौषि । स्तौमि । उत इति किम् । एति । एषि । एमि । लुकीति किम् । सुनोति । सुनोषि । सुनोमि । हलीति किम् । यवानि । रवाणि । पितीत्येव । युतः । रुतः । अपि स्तुयाद्राजानमि-त्यत्र हि ङिच्च पिन्न भवतीति पित्त्वप्रतिषेधाद् वृद्धेरभावः । नाभ्यस्त-स्येत्येतदिहानुवर्त्तते । योयोति, नोनोति, इत्येवमाद्यर्थम् ॥

ऊर्णोतेर्विभाषा ॥ ९० ॥

ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके । प्रोर्णौ-ति । प्रोर्णोति । प्रोर्णौषि । प्रोर्णोषि । प्रोर्णौमि । प्रोर्णोमि । हलीत्येव । प्रोर्णवानि ॥

गुणोऽपृक्ते ॥ ९१ ॥

ऊर्णोतेर्हलादावपृक्ते हलि पिति सार्वधातुके गुणो भवति । प्रो-

Digitized by Google

र्थात् । प्रोर्णोः । हलीति वर्त्तमाने यदपृक्तग्रहणं क्रियते तेनैव ज्ञाप्यते भवत्येषा परिभाषा यस्मिन्विधिस्तदादावल्ग्रहणे इति ॥

तृणह इम् ॥ ९२ ॥

तृणह इत्येतस्याङ्गस्य इमागमो भवति हलि पिति सार्वधातुके । तृणेढि । तृणेक्षि । तृणेह्मि । अतृणेट् । वर्णाश्रयेऽप्यत्र प्रत्ययलक्षणमिष्यते । हलीति किम् । तृणहानि । पितीत्येव । तृण्ढः । तृणह इत्यागतश्नमको गृह्यते श्नमि कृते इमागमो यथा स्यादिति ॥

ब्रुव ईट् ॥ ९३ ॥

ब्रु इत्येतस्मादुत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति । ब्रवीति । ब्रवीषि । ब्रवीमि । अब्रवीत् । हलीत्येव । ब्रवाणि । पितीत्येव । ब्रूतः ॥

यङो वा ॥ ९४ ॥

यङ उत्तरस्य हलादेः पितः सार्वधातुकस्य ईडागमो भवति वा । शाकुनिको लालपीति । दुन्दुभिर्वावदीति । त्रिधा बद्धो वृषभो रोरवीति । महादेवो मर्त्यां आविवेश । न च भवति । वर्वर्त्ति चक्रम् । वर्वर्मि । हलादेः पितः सार्वधातुकस्य यङन्तादभाव इति यङ्लुगन्तस्योदाहरणम् ॥

तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥

तु इति सौत्रोऽयं धातुः । रु शब्दे । ष्टुञ् स्तुतौ । शम उपशमे । अम् गत्यादिषु । इत्येतेभ्यः परस्य सार्वधातुकस्य हलादेर्वा इडागमो भवति । उत्तौति । उत्तवीति । उपरौति । उपरवीति । उपस्तौति । उपस्तवीति । शाम्यध्वम् । शमीध्वम् । अभ्यमति । अभ्यमीति । शम्यमोर्बहुलं छन्दसीति विकरणलुकि सति हलादिसार्वधातुकमनन्तरं संभवति । आपिशलाःतुरुस्तुशम्यमः सार्वधातुकासुच्छन्दसीति पठन्ति । तत्र सर्वेषामेव छन्दसि विषये सर्वेषामेव विधिरयं भवति । सार्वधातुकइति वर्त्तमाने पुनः सार्वधातुकमपिदर्थं स्तुवीत,शमीध्वमित्यत्रापि यथा स्यात् इति ॥

अस्तिसिचोऽपृक्ते ॥ ९६ ॥

अस्तेरङ्गात् सिजन्ताच्च परस्यापृक्तस्य सार्वधातुकस्य ईडागमो भवति । अस्तेः । आसीत् । आसीः । सिजन्तात् । अकार्षीत् । असावीत् * । अपृक्त इति किम् । अस्ति । अकार्षम् । आहिभुवोरीटि प्रतिषेध इति स्थानिवद्भावप्रतिषेधादिह न भवति । आत्थ । अभूदिति ॥

बहुलं छन्दसि ॥ ९७ ॥

अस्तिसिचोरपृक्तस्य सार्वधातुकस्य ईडागमो भवति बहुलं छन्दसि विषये । आप एवेदं सलिलं सर्वमाः । आसीदिति स्थाने आः क्रियापदम् । अहरेवासीन्न रात्रिः । सिचः खल्वपि । गोभिरक्षाः प्रत्यञ्चमत्साः । अभैषीर्मा पुत्रकेति च भवति छान्दसत्वात् । माङ्योगेप्यडागमो भवति । अक्षाः । अत्सा इति । सिच इडभावः ॥

रुदश्च पञ्चभ्यः ॥ ९८ ॥

रुदादिभ्यः परस्य सार्वधातुकस्य हलादेरपृक्तस्य ईडागमो भवति । अरोदीत् । अरोदीः । अस्वपीत् । अस्वपीः । अश्वसीत् । अश्वसीः । प्राणीत् । प्राणीः । अजक्षीत् । अजक्षीः । पञ्चभ्य इति किम् । अजागर्भवान् । अपृक्तस्येत्येव । रोदिति ॥

अड्गार्ग्यगालवयोः ॥ ९९ ॥

रुदादिभ्यः पञ्चभ्यः परस्य अपृक्तस्य सार्वधातुकस्याडागमो भवति गार्ग्यगालवयोर्मतेन । अरोदत् । अरोदः । अस्वपत् । अस्वपः । अश्वसत् । अश्वसः । प्राणत् । प्राणः । अजक्षत् । अजक्षः । गार्ग्यगालवयोर्ग्रहणं पूजार्थम् ॥

अदः सर्वेषाम् ॥ १०० ॥

अद भक्षणे अस्मादुत्तरस्यापृक्तस्य सार्वधातुकस्याडागमो भवति सर्वेषामाचार्याणां मतेन । आदत् । आदः । अपृक्तस्येत्येव । अत्ति । अत्सि ॥

---

* अपावीत् । अलावीत् । इत्यधिकमेकस्मिन्पुस्तके ।

Digitized by Google

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकावशेषः ॥

देवं बकीबकवत्सकवत्सक- *
लासुरभासुरगर्वहदोर्वर
धुवणसुवम तुङ्गभुजंगम-
दैत्यमहात्ययदक्ष रिपुक्षय-
शौण्डिमपण्डित चण्डिमखण्डित-
पद्मजपद्मजतामद धामज-
वाहितवाहितकालिय पालित-
सूरसुतारस मोहदसाहस
दावदवावर बन्धुषु बन्धुर ॥ २२८ ॥

हे देव । बकी पूतना च बकश्च वत्सकश्च तद्वत् तेषामिव स-कलासुराणां भासुरं गर्वं हन्तीति तादृशौ दोर्वरौ भुजवरौ यस्य तथा । धुवणं बन्धुसंतर्पणं तत्र सुवम । तुङ्गभुङ्गमः॰ अघासुरो दैत्यः॰ तस्य महात्यये मारणे दक्ष । रिपुक्षये यः शौण्डिमा मत्तता तत्र पण्डित । चण्डिम्ना खण्डितः पद्मजस्य ब्रह्मणः पद्मजतामदो येन तथा । धामज-वस्य तेजोवेगस्य॰ आहितेन॰ आधानेन वाहितो निर्यापितः कालियो येन तथा । पालितः सूरसुताया यमुनाया रसो जलं येन तथा । बन्धुषु मोहदं साहसं यस्य तथा । तदेवाहुः, दावदवाद् वनवह्नेः सकाशात्॰ अवं रक्षणं राति ददातीति तथा । हे बन्धुर सुन्दर ॥ २२९ ॥

गोपसुतापरभागसुरागर-
हस्यतरस्यनुषक्त्यनुरक्त्यनु-

---

*—वत्-सक—इति मुद्रणीये—वत्सक—इत्येवं मुद्रणं लिपितोऽपि यमकसौष्ठ-वप्रदर्शनार्थम् ।

बन्धधुरंधर तत्पटहृत्पर
हासविलासकलापसुलापक ॥ २३० ॥

गोपसुतानां परभागः सौन्दर्यं सुरागोऽतिप्रेमा च ताभ्यां रहस्यं रहसि भवं तदो वेगविशेषस्तत्र· अनुषक्तया· अनुषङ्गेण हेतुना योऽनुरागानुबन्धस्तत्र धुरंधर । तस्यैव प्रकारमाहुः, तासां पटानां हृत्पर हरणपर । ततश्च हासविलासयोः कलापो वृन्दं यत्र तद्यथा स्यात् सुष्ठु लपति भाषत इति तथा ॥ २३० ॥

विप्रवधूप्रणयक्षणसत्वर
मिन्नतदन्नपरिग्रहणाग्रप-
टो हठतो हृतयज्ञसमज्ञत-
योद्धतबुद्धिर मन्दपुरन्दर- *
सृष्टविवृष्टिसहस्रसहस्त्र स-
खेलसहेलतयोन्नमितोन्नत-
पर्वतपर्वद संमतसंमद ॥ २३१ ॥

विप्रवधूनां प्रणयक्षणे प्रेमसमये सत्वर सोत्सव । मिन्नं स्निग्धं यत् तदन्नं तस्य परिग्रहणे· अग्रपटो हे मुख्य चतुर । हठतो हठादेव हृतो यज्ञः समज्ञा कीर्तिश्च यस्य तस्य भावस्तत्ता तया हेतुना·उद्धतां बुद्धिं गृह्णातीति सः । मन्दो यः पुरंदरस्तेन सृष्टं यद्वृष्टिसहस्रं तस्य सहसस्तेजसः सकाशात् त्रायत इति तथा । सखेलसहेलतया· उन्नमितेन पर्वतेन हेतुना पर्व· उत्सवं ददातीति तथा । तदेव स्पष्टयन्ति, संमतः स्वस्वोचितः संमदो हर्षो यस्मात् तथा ॥ २३१ ॥

भो जय भो जगदण्डकरण्डग-
जन्तुकमन्तुविनाशकृदाशवि-
भो जय भो जनलोचनरोचन ॥ २३२ ॥

* परसवर्णः प्राग्वत् ।

जगदण्डमेव करण्डं तत्र गतानां जन्तुकानां निकृष्टजीवानां मन्तुरपराधस्तद्विनाशकृत् आशा यस्य तथा । भो विभो प्रभो । जनलोचनानि रोचयतीति तथा ॥ २३२ ॥

शैलशिखालसदाहृतिसाहस-
नन्दनकन्दलवोत्सववत्सल ॥ २३३ ॥

शैलशिखानां गोवर्धनशृङ्गाणां कर्तृणां लसता स्पष्टेन आहृतिसाहसेन नन्दनस्य इन्द्रोद्यानस्य कन्दलवो मूलोत्खातो यस्मात् तथा । किंच, हे उत्सववत्सल, स्वजनानन्दवर्धक इत्यर्थः ॥ २३३ ॥

किं पुरु किंपुरुषास्तव शस्तरु-
चेः शुभमाशु भणन्तु विदन्तु भ-
गो गुणमागुरु के पुनरापुरु-
दारतमा बत कान्ततदन्त त-
था त्वमसात्वतदुर्गम दुर्गत-
हीनसुदीननतातिकृतावन ॥ २३४ ॥

किंपुरुषास्तव पुरु शुभं किम् आशु शीघ्रं भणन्तु स्तुवन्तु, न किमपीत्यर्थः । कथंभूतस्य तव, शस्तरुचेः प्रशस्तसौन्दर्यस्य । हे भगो भगवन् के गुणम् आ सम्यक् गुरु यथा स्यात् तथा विदन्तु । बत खेदे, के उदारतमा गुणम् आपुः प्रापुः । हे कान्ततदन्त कान्तो रम्यस्तेषां गुणानाम् अन्तः स्वरूपं यत्र तथा, "अन्तो नाशे स्वरूपे ना" इति मेदिनी । तथा तेन प्रकारेण त्वं नोऽस्मान् धुवय जीवयेत्यन्वयः । असात्वतैरभक्तैर्दुर्गम दुर्ज्ञेय । दुर्गताश्च हीनाश्च सुदीनाश्चापि ये नतास्तेषाम् अतिशयेन कृतम् अवनं येन तथा ॥ २३४ ॥

धुवय नोऽवतया कृपया कृत-
मोदमहोदधिमज्जनसज्जधि-
यो हतमोहतमस्तरसस्तत-

Digitized by Google

भक्तिविरक्तिमतस्तव निस्तम-
सस्तवशस्तमतीन् कुरु नः कुम-
तिं व्रज नुमोऽद्य भवन्तमनन्तभ-
मीश वयं शरणं करुणं कर-
वाम नमाम च नाम भणाम च
भोजय भो जगदुत्तम चित्तग ॥ २३५ ॥

चञ्चतया कृपया कृतं मोदमहोदधौ मज्जनं यया तथाभूता सज्जा धीर्येषां तथाभूतान् नोऽस्मान् कुरु । एवं द्वितीयान्तानां कुर्वित्यनेनैवान्वयः । हृतं मोहतमसस्तरो वेगो येषां तान् । तत्र तता विस्तृता भक्तिश्च विरक्तिश्च तद्वतः । निस्तमसस्तमोरहितान् । स्तवैः स्तुतिभिः शस्ता मतिर्येषां तथाभूतान् । कुमतिं व्रज खण्डय, "व्रज्· खण्डने" लोट् । अत्र भवन्तं नुमः । अनन्तभम्· अपरिमेयकान्तिम् । हे· ईश ॥ २३५ ॥

विपक्षलक्षतक्षणं स्वपक्षपक्षरक्षणं
क्षणक्षणक्षणप्रदं सगर्वगर्वखर्वणम् ।
कृपाविपाकपालिते व्रजे व्रजद्व्रजेश्वर-
व्रजेश्वरीमहामहं भजामहे महन्महः ॥

तृतीया शाखा ॥ २३६ ॥

क्षणे क्षणे प्रतिक्षणमेव क्षणप्रदम्· आनन्ददं महो भजामहे । कथंभूतं, व्रजे व्रजत्· गच्छत् । कृपाया विपाकः परीपाकस्तेन पालिते ॥ २३६ ॥

श्रीबलदेवकनिष्ठ महिष्ठकनिष्ठ गरिष्ठपटिष्ठदविष्ठप-
विचविचिचचरित्र न कुच चमत्कृतिमत्कृतिमानतिमानति-
रस्कृतदुष्कृतिकस्त्वमवस्त्वतिरन्धन बन्धनमोचन शोचन-
रोचन कोचनकाशननाशनरक्षणसक्षण सद्गुणसद्गुण ॥ २३७ ॥

महिष्ठे के सुखे निष्ठा यस्य तथा । गरिष्ठादिकं चरित्रं यस्य तथा । चमत्कृतिमती कृतिः क्रिया तद्वान्· त्वं कुत्र न, अपितु सर्वत्रैवेत्यर्थः । अतिमानेन· अतिसेवया तिरस्कृतानि दुष्कृतानि यतः स त्वम् । अवस्तुनः संसारस्य· अतिरन्धन नाशक । अत एव हे बन्धनमोचन । ततश्च शोचनेभ्यो न सेवितवन्तो वयमेतावन्तं कालमित्यनुशोचद्भ्यो रोचन रोचक । ततश्च तेषां कोचनकाशनयोः संकोचप्रकाशनयोर्यथासंख्येन नाशनरक्षणाभ्यां सक्षण सोत्सव । सतामुत्कृष्टानां गुणानां सन् वर्तमानो गणो यत्र तथा ॥ २३७ ॥

वल्लवतल्लजकन्यकयान्यज-
नाधिकसाधितसौभगशोभित
सत्तमयात्तकलाधिकराधिक-
या स्मयविस्मयहासविलासय-
थार्थसमर्थनदर्पकदर्प न-
मद्धृदयोद्धृतपर्वदपर्वत ॥ २३८ ॥

वल्लवतल्लजकन्यकया श्रेष्ठगोपकन्यया· अन्यजनाधिकं यथा स्यात् तथा साधितं यत् सौभगं तेन शोभित । सत्तमया· आत्तकला चासौ· अधिका च या राधिका तया सह स्मयादीनां यथार्थमेव समर्थनं यत्र तथाभूतो यो दर्पकः कामस्तेनैव दर्पो यस्य तथा । नमतां प्रणमतां हृदयं मनो यत्र तथा । उद्धृतः पर्वदायिपर्वतो येन तथा ॥ २३८ ॥

सर्वद शर्वविरिञ्चिमुखाञ्चिवि-
चक्षणलक्षविलक्षणकक्षवि-
शिष्टसदिष्टद मिष्टसुदिष्टद
तुष्टिसुपुष्टिदहृष्टिसुहृष्टिद-
मूर्तिक कीर्तिकथार्तिसुपूर्तिक ॥ २३९ ॥

हे सर्वद । शर्वविरिञ्चिमुखा अञ्चिनः पूजका ये विचक्षणास्तेषां लक्षाय विलक्षणकत्वं च विशिष्टं च सत् शोभनं च यदिष्टं तद्ददातीति तथा । मिष्टं मधुरं सुदृष्टमतिभाग्यं ददातीति तथा । सुष्टिसुपुष्टिदा च दृष्टेः सुहृष्टिदा च मूर्तिर्यस्य तथा । कीर्तिकथया आर्तेः पीडायाः सुपूर्तिः सुष्ठु पालनं यस्मात् तथा, यद्वा कीर्तिकथायाम् आर्तिरुत्कण्ठा तस्याः पूर्तिर्यस्मात् तथा ॥ २३९ ॥

गोपवधूपदसंचलनाञ्चद-
लंकृतझंकृतकिङ्किणिशङ्कित-
डिण्डिमचण्डिममन्मथहृन्मम-
कारविकारविलासविकाशवि-
शेषण शेषमुखैः किल तैः किमु
गम्यमगम्य तवेहितमाहित-
तर्ककुतर्कपरैरपरैरप-
वारण तारणकारणवारण-
खेल सहेलगतेऽदरमोदग ॥ २४० ॥

गोपवध्वाः पदयोः संचलनेन अञ्चदलंकृतं चपलनूपुरश्च झंकृता झङ्कारयुक्ता किङ्किणिश्च ताभ्यां शङ्कितो डिण्डिमचण्डिमा यस्य तथाभूतेन मन्मथेन कामेन हृदि ममकाररूपो यो विकारस्तस्माच्च यो विलासस्तस्य विकाशं प्रकशं विशेषयतीति तथा । शेषमुखैः संकर्षणादिभिस्तैः प्रसिद्धैः तव ईहितं किमु गम्यं, न गम्यमेवेत्यर्थः । हे अगम्य ज्ञातुमशक्य । अपरैरधमैः आहिततर्ककुतर्कपरैरपवारणमाच्छादनं यस्य तथा[1] । हे तारणस्य कारणवारणस्य गजस्येव खेला यस्य तथा । सहेला गतिर्यस्य तथा । हे अदरमोदग अनल्पहर्षयुक्त ॥ २४० ॥

---

१ फलितार्थकथनमेतत्त्व तु लौकिकविग्रहरूपं वाक्यम् ।

भोस्तवकस्तवने*ऽस्तु न वस्तु वरं तदनन्तमलन्तव शन्तम
तत्त्वमतत्त्वविदो विषयो विविधा हि विधा हितकर्तरवर्तत
यस्य रहस्यतमस्य रहस्यत एव न देव तवेहितमूहित-
मीश महेशमुखैरपि तैरमुना किमु नाकिजनेन धनेनज-
लेनमुखेन वसन् भगवन् भव नो हृदि सौहृदधामनि कामद-
हास रसासुरजर्जरनिर्जरवृन्दममन्दहचं कुशलं कुरु ॥ २४१ ॥

तव स्तवने स्तुतौ कोऽस्तु, न कोऽपीत्यर्थः । तव तत्त्वम् अत-त्त्वविदो न विषय इत्यन्वयः । कीदृशं तत्त्वं, वरं श्रेष्ठं वस्तु, तत् अ-निर्वचनीयम्, अनन्तमपरिच्छिन्नम् । अलमतिशयेन हे शंतम । विविधा विधा बहुविधं विधानं हे हितकर्तः हितकारिन् यस्य रहस्यतमस्य तव रहसि अवर्तत । अत एव हे देव हे ईश महेशमुखैस्तैरपि तवेहितं न ऊहितं न वितर्कितम् । ततश्च अमुना नाकिजनेन स्वर्गवासिदेवेन किमु, न किमपीत्यर्थः । धनेनः कुबेरश्च जलेनो वरुणश्च तन्मुखेन तदादिना हे भगवन् नोऽस्माकं हृदि वसन् भव । कथंभूते हृदि, सौहृदस्य धाम-न्याश्रये । हे कामदहास । रसायाः पृथिव्या ये असुराः कंसाद्यास्तैर्जर्जरं निर्जरवृन्दं देवसमूहम् अमन्दरुचं कुरु, कुशलं यथा स्यात् तथा, कुशल-युक्तमिति वा ॥ २४१ ॥

विदग्धमुग्धसुन्दरीकदम्बचुम्बडम्बरं
सुमञ्जकुञ्जकुञ्जरं नवाञ्जनौघगञ्जनम् ।
अनङ्गरङ्गमङ्गलप्रसङ्गतुङ्गसंगरं
रहोमहो महोदयं नुमो नुमो नुमो नुमः ॥ २४२ ॥

महान् उदयो यस्य तत् महः किमपि तेजो नुमः स्तुमः । चुम्बे चुम्बने डम्बर आटोपो यस्य तत् । अत्र त्वां स्तुमहे स्तुतीत्यादिभिश्च-तसृभिरशीतिभिः कलाभिश्चतस्रो महाकालिका द्विगादिगणवृत्ते कोर-

* भोः तव कः स्तवने इत्येवं मुद्रणीये भोस्तवकस्तवने इति ध्येयम् । तथा-मलं तवेति मुद्रणीये संधिः शन्तमपदानुरोधादिति च ।

काख्या ज्ञेयाः, तदुक्तं विरुदावलीलक्षणे, "द्विगादिकलिकां धीराः कोरकाख्यां प्रचक्षते । द्विगभस्तनसंदर्भैरनन्यगणपातिभिः । स्वेच्छावसानैः संक्लृप्तां द्विगादिकलिकां विदु"रिति, अत्र तु भद्वयेन कलानिर्माणं, श्लोकच्छन्दांसि तु पञ्च चामराख्यानि ॥ २४२ ॥

इत्येवं स्तवस्तवकितभारतीभारतीव्रसिद्धविद्याधरप्रमुखमुखरितेषु दिशां मुखेषु गुरुतरचमत्कारकारणसमुत्कसमुत्कमानसा मानसाराः सर्व एव गोपा गोपयितारं व्रजपुरस्य चरितमुपगम्य सप्रश्रयं श्रयन्तः किमपि निवेदयांबभूवुः ॥ २४३ ॥

एवं स्तवेन स्तवकिता स्तवकिनी कृता या भारती वाणी तस्या भारेण तीव्रा एकान्ता ये सिद्धादयस्तैर्मुखरितेषु शब्दितेषु सत्सु, गुरुतरश्चमत्कार एव कारणं हेतुस्तेन समुत्कं किंचिज्जिज्ञासया सम्यगुत्कं समुत्कं सहर्षं च मानसं येषां ते । मान एव सारो येषां ते, संमाननीया इत्यर्थः ॥ २४३ ॥

हंहो व्रजाधीशा धीशावल्यहेतोरिदं वः पृच्छामोऽच्छामोदाः ॥ २४४ ॥

व्रजाधीशा इति गौरवाद् बहुवचनम् । धियां बुद्धिवृत्तीनां शावल्यं संशयनिश्चयशङ्कास्मृत्यादिसंमर्दस्तद्धेतोः ॥ २४४ ॥

यदिह स्वयागक्रमातिक्रमातिम्लायमानमानवसुना सुनासीरेणैव इवासंख्याः संख्याः संवर्तकगणत्वेन प्रलयसमयसमयमानमहावृष्टिकारिणो व्रजनगरगरणाय जलधरा धराप्लवनाय प्रहिता हि तानलमोघान् मोघान् कुर्वन् ॥ २४५ ॥

यदिह तवायं बालकः सप्तहायनः सप्त दिवसानि व्याप्य नगराजं पर्वतराजं समुद्धृत्य शतमन्युमिन्द्रं नगराजं नगरस्याजं याम्यं छागमिव चकार तदयं क इति न विद्म इत्यन्वयः । बालकः कथंभूतः, सुनासीरेण ये जलधराः प्रहिताः· हि निश्चितं तान्· अलमोघान्· अलमत्यर्थम्·

ओघो वेगो येषां तानपि मोघान् व्यर्थान् कुर्वन् । सुनासीरेण कीदृशेन, स्वयागस्य क्रमः परिपाटी तस्यातिक्रमेण· अतिम्लायमानो मान आदर एव वसु धनं यस्य तेन । संख्याः सम्यक् ख्यातिमन्तः । गरणाय गलनाय, नाशायेत्यर्थः ॥ २४५ ॥

तथाय*म्बालको लम्बालको ऽलं लघुतरं तरङ्गितकौतुकः सौकुमार्याकरेण करेण वामेन मेनकादुहितृनाथस्यापि दुर्धरमुपरि परितः स्यन्दमानपुष्करं पुष्करं मदकलकलभेन्द्र इव दिवसानि सप्त सप्तहायनः सलीलं समुद्धृत्य नगराजं नगराजं चकार शतमन्युं शतमन्युम् ॥ २४६ ॥

लघुतरमतिशीघ्रं स्यन्दमानानि स्रवन्ति पुष्कराणि मकरन्दजलानि यत्र तत्, पुष्करं कमलमिव ॥ २४६ ॥

तदयं क इति न विद्मो विद्मोह एव नो जायते येनानेन जातमात्रेणैव सकलबन्धुर्जीवेन बन्धुजीवेन सदृशाभ्यां सदृशाभ्यां मधुमधुरोष्ठाधराभ्यां विषविषमं स्तनरसं पिबतावताशुतरामेव पूतना पूतनामाकारि ॥ २४७ ॥

विद्मो ज्ञानस्य मोहः । सकलानां बन्धूनां जीवेन सदृशा, सदृशेनेत्यर्थः । आभ्यां मधुतोऽपि मधुरौष्ठाधराभ्यां, व्यवधानान्वयो यमकानुरोधात् सोढव्यः । आशुतराम्· अतिशीघ्रमेव । पूतनामा पवित्रनाम्नी मृतदेहस्याप्यगुरुसौरभोद्गारात् ॥ २४७ ॥

तदनु मञ्जुलवञ्जुलवनसलयकिसलयकिशोरललितेन पदतलेन विशङ्कटशकटशकलीकारोऽपि रोपितः ॥ २४८ ॥

वञ्जुलस्याशोकस्य वने कदाचित् सलयः संश्लेषसहितः किसलयकिशोरः स्यात् ततोऽपि ललितेन विशङ्कटस्य वृहतः शकटस्य शकलो-

---

* संधिः प्राग्वत् ।

कारः खण्डनं रोपितो जनितः, कृत इति यावत्, "रुह जन्मनि प्रादुर्भावे" इति धातोः ॥ २४८ ॥

तदनु च यमुनाशैवलवलयसदृशेन भुजवलयेन जवनयेन सोत्कण्ठं कण्ठं विधृत्य धृत्यवरोधकविलोको लोकोपप्लवकरोऽवकरोदयवत् प्राणैर्वियोजितोऽजितोऽखिलसुरासुरादिभिरपि महावात्यादैत्यः ॥ २४९ ॥

तदनु महावात्यादैत्यः प्राणैर्वियोजितः, धृत्यवरोधको धैर्यनाशको विलोकोऽवलोकनमपि यस्य सः ॥ २४९ ॥

तदनु च वत्सवत्सबकस्या*घव्यालस्याघव्यालस्यापि व्यरचि मारणं रणं विनैव नैव कुत्रापि परिश्रमः ॥ २५० ॥

वत्सवत्· वत्सासुरस्येव· अघव्यालस्यापि । कीदृशस्य, अघमपराधं विशेषेण· आ सम्यक्· लाति गृह्णातीति तस्य ॥ २५० ॥

अस्माकं स्माकम्पित एवात्र तथैवास्याप्यस्मासु निरन्तरायो निरन्तरायो रतिरासोऽहरहरनितरामौत्पत्तिक एव संपनीपद्यमानो विद्यमानो विशिष्यानिरुच्यमानो रुच्यमानोऽनुभूयत एव भवद्भिरपि तत् किमत्र तत्त्वं तत्त्वं† कथयितुमर्हसि ॥ २५१ ॥

निरन्तरमेव· आयो वृद्धिर्यस्य सः, रतिरासः प्रेमोल्लासः, अनि· रुच्यमानोऽशक्यनिरुक्तिको· रुचिभिः प्रभाभिरमानो निरुपमः । किमत्र तत्त्वमिति, अस्य मानुषत्वे तत् तत् कर्म दुर्घटम्, ईश्वरत्वे· एतत्कर्तृकमस्मासु प्रीतिगौरवभावाद्वीति संदेहः ॥ २५१ ॥

तदा तदाकर्ण्य व्रजपुरपुरंदरोऽदरोदितहर्षितिषितिम्नातिम्नातमधुरिमगरिमगदशनवसनं किंचिदुवाच ॥ २५२ ॥

अहो मत्पुत्र एवासावमीभिस्तत्त्वमश्रुतवद्भिः परमेश्वरत्वेन कल्प्यत इति· अदरोदिता हसितिः ॥ २५२ ॥

---

* वत्सवत् सबकस्या--इत्येवं मुद्रणीये संधिः प्राग्वत् ।

† तत् त्वं पृथक् पदे, संधिः प्राग्वत् ।

भोभो वल्लवतल्लजा अवधीयतां निरवधीयतां निरवद्यानां मे वचसां तत्त्वम् ॥ २५३ ॥

निरवधि·इयतां प्रतीयताम् ॥ २५३ ॥

यदेनं नाम नामकरणसमये सुकुमारं कुमारं समुद्दिश्य स मुद्दि-श्यमानमानसो निरवद्यसार्वज्ञ्यादिगुणवर्गो गर्गो गतमोहं तमोहन्ता हन्ताह ॥ २५४ ॥

स गर्गः । मुदा द्विश्यमानं वशीक्रियमाणं मानसं यस्य सः । तमोहन्ता संशयच्छेत्ता ॥ २५४ ॥

अस्य तव कुमारस्य मा रस्यतायाः पारमास्ते, पारमहंस्यां पारमहं स्यां गतो विद्यायामित्यभिमानवानपि न रहस्यमस्य मन्तु-मर्हति ॥ २५५ ॥

रस्यतायाः सौभाग्यस्य पारं मा· आस्ते, पारमहंस्यां विद्यायां पारं गतोऽहं स्याम्· इत्यभिमानवानपि ॥ २५५ ॥

अस्य ह्यविकृता कृतादिषु चतुर्युगेषु चतुर्युगेषु वर्णभिदा ॥ २५६ ॥

अस्य· अविकृता निर्विकारैव वर्णभिदा चतुर्युक् चतुःसंख्यावती, एषु कृतादिषु ॥ २५६ ॥

कृतेऽवलक्षो वलक्षो वर्णस्त्रेतायां जितारुणोऽरुणो द्वापरे श्या-मश्यामः कलौ कृष्णः कृष्णः खल्विदानीमयम् ॥ २५७ ॥

वलक्षः शुक्लो वर्णः, अवलक्षः· न बलस्य क्षा क्षयो यस्मात् सः । श्यामो मेघ इव श्यामः, "श्यामः स्यान्मेचके वृद्धदारके हरिते घने·" इति विश्वः । कलौ कलियुगे कृष्ण इति । वैवस्वतमन्वन्तरगताष्टाविंश-चतुर्युगीयकलौ तु पीत एवेति (मूर्त इव कलौ कलौ पीत), इति पञ्चमस्त-बकोक्त्या न विरुध्यते । इदानीं द्वापरावसाने खल्वयं कृष्णः ॥ २५७ ॥

कदाचिदेष चिदेष एव वसुदेवादेवासीत् तेनायमभिधासु सु-स्तवासु वासुदेवाभिधोऽपि ॥ २५८ ॥

चित्· चिन्मय एव· एष इच्छा यस्य तथाभूतः सन् । एवेति,तादृशेच्छावशादेव न तु कर्मवशादित्यर्थः ॥ २५८ ॥

एतेनापि त्वमस्य महिमनि मनो नारा नारायणसम एवायम् ॥ २५६ ॥

अहो कश्चिदसौ महासिद्धो वा मद्गृहेऽवतीर्ण इति वितर्कयन्तं मां पुनरप्यवधापयन्नाह· एतेनेति, त्वमस्य महिमनि माहात्म्ये मनो न· अराः· न दत्तवानसि, अवधेहि नारायणसम एवायमिति,तेन देवेन्द्रादिनिर्जयोऽप्यस्य संभवत्येवेति भावः ॥ २५९ ॥

एतस्मिन् ये पुनरतिरतिमन्तो मन्तोरणुमात्रमपि न तेषां तेषामङ्गमङ्गलमेव परितोऽपरितोषो न कुत्रापि प्रेमास्पदमयं सकलनरनारीणां नारीणां च पराक्रमक्रमणिकात्रेति ॥ २६0 ॥

नचात्र महिमदृष्ट्या बन्धुभावश्लथनेन संभ्रमः कार्य इत्यप्याह· एतस्मिन्निति, मन्तोरपराधस्य, नारीणां न शत्रूणाम् ॥ २६० ॥

तत् कृतमत्र शङ्कया शङ्*कयायमीहया नेहतेऽस्माकं तदुचितं चितं वः प्रेमात्र मात्र बन्धुता धुता करणीया वयमपि पुत्रभावमेव कुर्वीमहि ॥ २६१ ॥

तत् तस्मात्· अत्र शङ्कया कृतं, नारायणोऽयमिति न मन्तव्य इत्यर्थः । कया· ईहया चेष्टया· अयमस्माकं यं मङ्गलं न· ईहते, अपितु सर्वथैव ॥ २६१ ॥

महिमश्रवणेनापि स्वभावो हि भावो नाहार्यतामालम्बतेऽलम्बतोऽह वो मान्यतया मान्यतया चात्मा खेदयितव्यो दयितव्योऽयं मे कुमार इति निगदिते सर्व एव यथामनीषमनीषदेव निवृता वृताश्च बन्धुजनैर्यथापूर्वमतयो यथास्थानमवतस्थिरे ॥ २६२ ॥

* यं कया इत्येवं मुद्रणीये संधिः प्राग्वत् ।

† मतं वतेत्यपि तथा ।

भावः स्वपुत्रत्वमयः· अहार्यतां न· आलम्बते· आश्रयति, यतः स्वभावः स्वप्रभारत्तो, अत एव· इह श्रीकृष्णो वो युष्माकं मान्यतया· आदरणीयतया· अलं, युष्माकमेतद्बहुत्वादिति भावः । वतेति खेदे· अनुकम्पायां वा । कृष्णसंबन्धात्· अन्यतया च· आत्मा मा खेदयितव्यः अयमीश्वरो नु स्यादयं तद्वान्य एव गोपाः कथमेतत्संबन्धवन्तो भवितुमर्हाम इति भावनाकष्टं न कर्तव्यमित्यर्थः, किंतु दयितव्योऽनुकम्प्योऽयम् । अनीषदेव· अनल्पमेव, निर्वृता आनन्दिताः ॥ २६२ ॥

स्थिरे सति सकलजनमनसि निजलोकतोऽजलोकतोषितां तदनुमोदितां मोदितां च स्वसंतानरक्षणक्षणतः सकलसौभाग्यपरिमलसुरभिं सुरभिं समुपव्रजन्तीमुपव्रजन्ती * व्रतरापत्रपापत्रपालिच्छन्ननयनसहस्रसहस्रवद्रोषरजा निर्वेदसंपदेव पुरु हूतः पुरुहूतः पथि संगम्य ॥ २६३ ॥

ततश्च पुरुहूत इन्द्र उपव्रजं निजलोकतः समुपव्रजन्तीं सुरभिं पथि संगम्य स्वापराधं क्षमापयितुं नगोपरि विहरन्तं श्रीकृष्णं रहसि समुपससादेत्यन्वयः । सुरभिं कथंभूताम्, अजलोकैः· अजेन ब्रह्मणा तल्लोकैश्च तोषितां, सकलसौभाग्यमेव परिमलस्तेन सुरभिं, सुगन्धितामिवेत्यर्थः । स च कीदृशः, तीव्रतरा या· अपत्रपा लज्जा तस्याः पत्रपालिभिर्दलश्रेणिभिरिव छन्नं यन्नयनसहस्रं तेन सह स्रवन्ति गलन्ति रोषरजांसि क्रोधगर्वादीनि यस्य सः । निर्वेदस्य स्वावमाननस्य संपदा कर्त्र्या पुरु· अधिकं यथा स्यात् तथा हूतः, स्वचरणार्थमिव कृताह्वान इत्यर्थः ॥ २६३ ॥

स्वापराधं क्षमापयितुमापयितुमपि स्वविनयं नयं च तत्सौभाग्यलक्ष्म्या समाकृष्टमिव नगोपरि परितोषेण विहरन्तं हरन्तं च तस्य वातवृष्टिजन्यक्लममिव कस्मैचित् कार्यान्तरायान्तरायापन्नक्षणसङ्गसुखैरनुचरै रहिततयाततया च कृपयाद्वितीयं कृष्णं रहसि समुपससाद ॥ २६४ ॥

* —व्रजं तीव—इत्येवं मुद्रणार्हतायामपि संधिः प्राग्वत् ।

ज्ञापयितुं प्रापयितुं, ज्ञापयितुमित्यर्थः । नगस्य गोवर्धनस्योपरि । तस्य नगस्य सौभाग्यसंपत्त्या समाकृष्टमिवेति विहरणे हेतुरुत्प्रेक्षितः । हरन्तं चेति तत्र प्रयोजनमुत्प्रेक्षितम् । कस्मैचित्· इन्द्रादिप्रसादनरूपाय । अनुचरै रहिततयेति, तत्र तैः साहित्ये रसभङ्गापत्तेः । अत एवान्तरायेण विघ्नेन· आपन्नं विपन्नं सुखं व्याप्य सङ्गसुखं येषां तैः ॥ २६४ ॥

सादरमथ सा गवां जननी गवां देवीव देवी वक्तुमुपचक्रमे क्रमेण, भो देव व्रजराजराजधानीमृगमदविशेषक विशेषकथामव-धेहि ॥ २६५ ॥

गवां वाचां देवीव । देवी सुरभिः । विशेषक तिलकरूप ॥ २६५ ॥

वधेहि गवां गोदुहां च कृतोद्यमस्यातिशतमन्योः शतमन्योः प्रबलतरतरसं कष्टामतिवृष्टिमतिवाह्य मतिवाह्यतायाः अप्यविषयम-तिमहिमानं महिमानं प्रकटयन् यदखिलसौभगवान् भगवान्· तत्र-भवान् भवान् गोकदम्बमरक्षीत्, तेन स्वयं स्वयंयोनिना परममुदि-तायां मुदि मुदितमनसाहमुक्ता मुक्तातिधैर्येण ॥ २६६ ॥

कष्टाम्· अतिवृष्टिमतिवाह्य पराभूय भवान् यद्गोकदम्बमरक्षीत् तेन स्वयंयोनिना ब्रह्मणा मुदितमनसा· अहमुक्तेत्यन्वयः । प्रबलतरं तरो वेगो यस्यास्तामतिवृष्टिम् । मतिभिर्बुद्धिभिर्वाह्यतायाः वोढुं शक्यतायाः अप्यविषयम्· अतिशयो महिमा बृहत्त्वं यस्य तं महिमानं प्रकटयन्· लोके प्रदर्शयन् । मुदि· आनन्दे परमं यथा स्यादेवम्· उदितायां सर्वत्रोदित-वत्यां सत्याम् ॥ २६६ ॥

याहि सुरभे देवि सुरभेदे विगतस्पृहं देवोपनतेन शतमन्युम-न्युना विपद्यमानानां महाकविपद्यमानानां महाकरुणां गवां रक्षणा-क्षणपरं सानन्दा नन्दात्मजं त्वमधुना गवामिन्द्रत्वेनाभिषेक्तुम-र्हसि ॥ २६७ ॥

Digitized by Google

सुराणां भेत्रे विगता स्पृहा येन तदन्यथा स्यात् तथा याहि, महा-कवीनां पद्यैर्मानः स्तवो यासां तासाम् ॥ २६७ ॥

एष चाहं स हंसमारुह्य ब्रह्मर्षिसुरर्षिसुरकिंनरचारणसिद्धसिद्ध-साहित्यस्तमहमहतमहानन्दमालोकयितुमनुसरामीति ॥ २६८ ॥

एष च स तद्वन्यत्वेन प्रसिद्धः, बालवत्साहरणागसि दृष्टचरतद्वैभव इत्यर्थः, ब्रह्मर्ष्यादिभिः सिद्धं साहित्यं मेलनं यस्य तथाभूतः सचेत्रेति विलम्बो द्योतितः ॥ २६८ ॥

अयं च मुहुरागोरागोपहतो मन्दाक्षमन्दाक्ष एव निजाभव्यताभव्यतापः स्वमवमन्तुमना मन्तुमनाकलितमपमार्जयितुमागतोऽपि पुरो भवितुं पुरंदरो दरोपहत आस्ते ॥ २६६ ॥

आगोऽपराधश्च रागस्तद्धेतुः क्रोधश्च ताभ्यामुपहतः स्वं मुहुरवमन्तुमना इति संबन्धः । मन्तुमपराधम् अनाकलितमननुभूतपूर्वं, दरोपहतो भयव्याकुलः ॥ २६९ ॥

तदनुमन्यतामन्यतामागत इवायं स्वयमेव भयज्वरणाभ्यासमभ्यासन्नः स्वगतं निवेदयतु ॥ २७० ॥

अन्यतामागत इव, अन्यो जनो यथा स्वयमेव निवेदयति तथायमपीत्यर्थः ॥ २७० ॥

इति तयोक्ते भीतभीत इव नयनसहस्रसहस्रवदम्भा दम्भादवतीर्य मुकुटतटघटमानमहामणीन्द्रमहसा सहसा बालयन्निव चरणमूलमचललम्बोऽलम्बे* स्तुस्तम्भ इव ॥ २७१ ॥

नयनसहस्रात् सहैव स्रवन्ति अम्भांसि यस्य सः, दम्भादवतीर्य वियुक्तीभूय, दम्भं परित्यज्येत्यर्थः ॥ २७१ ॥

* अत्रापि संधिः प्राग्वत् ।

चिरादुत्थाय सादरदरमञ्जलिं निबध्य सापराधतयाधोमुखः पद्नखराखरामलमरीचिवीचिवीचयनव्याः किंचिदस्तोदस्तोजा विडोजा निविडोऽजानियतदम्भेनापि नापिहितविनयः ॥ २०२ ॥

सादरदरं सादरं सभयं च, पदनखराणाम्. अखराः स्निग्धा अमला या मरीचयस्तद्वीचीनां वीचयो वा उत्सवो यस्य सः, अस्तोजा गततेजस्कः, अजा माया तया नियत एव यो दम्भस्तेन निविडेऽपि, तदानीं न. अपिहितो न. आच्छन्नो विनयो यस्य सः, अन्यदा तु पारिजातहरणादौ दुर्विनयव्यक्तेरिति भावः ॥ २०२ ॥

त्वमसि सकललोकनाथनाथो
व्रजपुरनाथसुतः स्वतः स्वतन्त्रः ।
महमहितमहामहत्त्वतत्त्व-
स्तव महिमा नहि मादृशोर्विगाह्यः ॥ २०३ ॥

महेन. उत्सवेनापि महितं पूजितं नतु स्वेनोपमातुं शक्यं महामहत्त्वं यस्य तदेव तत्त्वं यस्य सः ॥ २०३ ॥

निजमदमदिरामुदा मदान्धाः
कथमथ ते महिमानमामनन्तु ।
प्रकृतिकृतविकारदृष्टिदोषा
द्युमणिरुचो न विलोकयन्ति घूकाः ॥ २०४ ॥

प्रकृतिः स्वभावः, घूकाः पेचकाः ॥ २०४ ॥

अथ मदमदिराविनष्टदृष्टे-
रयमुचितो मखखण्डचण्डदण्डः ।
पुरुकरुण सुदण्ड एव पथ्यो
हतजनुषां जनुषान्धमण्डलानाम् ॥ २०५ ॥

सुदण्ड एव, पक्षे· ऋजु लकुटम् ॥ २७५ ॥

उपकृतमिदमेव मे त्वया यत्
पुरुकरुणावरुणालयेन देव ।
अपकृतमिति तन्मया विबुद्धं
प्रकृतिखलाः किल विप्रतीकबोधाः ॥ २७६ ॥

विबुद्धं विरुद्धतया बुद्धम् ॥ २७६ ॥

अपि गतरजसं रजो धुनीते
विषयविषामिषलालसान् किमस्मान् ।
कथयितुमथवा मदः कथं स्यात्
प्रभवति चेत् तव दुर्नमा न माया ॥ २७७ ॥

गतरजसं वीतरागं, मुनिमपीत्यर्थः । अस्मान् कथयितुं किम्, अस्मान् धुनीते· इति वक्तुं किमशक्यमित्यर्थः, अस्माकं का कथेति यावत् । दुर्नमा दुर्दमा ॥ २७७ ॥

जय जयद जगत्त्रयैकसार
व्रजपुरमङ्गल मङ्गलावतार ।
निरुपमगुणनामधाम दामो-
दर वसुदामसुदामदामबन्धो ॥ २७८ ॥

निरुपमानां गुणानां नाम्नां धाम हे· आश्रयभूत ॥ २७८ ॥

दुरवगम नमो नमो न मोहं
पुनरुपपादय देव नो दयस्व ।
सुघटविघटनाय दुर्घटस्या-
पि च घटनाय भवन्ति ते कटाक्षाः ॥ २७९ ॥

दुरवगम हे दुर्ज्ञेय पुनर्मोहं न प्रापय ॥ २७९ ॥

अभव बहुभवोंऽशतः पुरा त्वं
विबुधमुदे कुतुकादभूरुपेन्द्रः ।
स्वयमयमधुनोक्षितः सुरभ्या
भव सकलेन्द्रशिखेन्द्रनीलनील: ॥ २८० ॥

अभव हे॰ अज तदपि त्वं बहुभवो बहूवतारः, पुरा॰ अंशतोंऽशेन विबुधानां मुदे कुतुकादेव स्वमुपसर्जनोकृत्य॰ उपेन्द्र इन्द्रकनिष्ठोऽभूः, सुरभ्या॰ उक्षितः॰ अभिषिक्तः सन् ॥ २८० ॥

गोविन्देत्यभिरामनाम यदपि प्रागेव सिद्धं सदा
गोलाभादथ गोविचारकतया शश्वद्गवां सतया ।
गोपेन्द्रात्मज भोस्तथापि भगवन्नद्याभिषेकोत्सवे
श्रीगोवर्धनभूधरेन्द्रधर हे गोविन्दनामा भव ॥ २८१ ॥

गोलाभादित्यादिना "विदॢ लाभे" "विद विचारणे" "विद सत्तायां"मित्येतैः साधितं गोविन्देति ॥ २८१ ॥

इति वास्तवस्तवनेन स्वमानमुचि नमुचिसूदने सति पुरस्कृतकमलासना सनातनसनकसनन्दनसनत्कुमारकुमारसहितसोमसोमशेखरा दिगधीशपरंपरापराचिता नारदतुम्बुरुप्रभृतिकोत्तममहर्षिमहर्षिमण्डलमण्डितारुन्धतीप्रभृतिमुनिभार्याभार्या रूपगुणलावण्यसमानमाननारा नारायणोरुप्सरःप्रधानाप्सरःप्रथा नानाविधा सभा सुराणां भासुराणां तदभिषेकमहामहाधिकदिदृक्षयाक्षयानन्देन नभो मण्डयामास ॥ २८२ ॥

नमुचिसूदने॰ इन्द्रे स्वमानमुचि स्वगर्वं त्यक्तवति सति तस्य कृष्णस्य॰ अभिषेकमहामहस्य॰ अधिकदिदृक्षया सुराणां नानाविधा सभा नभ आकाशं मण्डयामासेत्यन्वयः । सनातनादिभिः सहितः सोम उमासहितः सोमशेखरो महादेवो यस्यां सा । कुमारः कार्त्तिकेयः । नारद॰

सुमुखप्रभृतिकं च तत्· उत्तममम्· उत्कृष्टशोभं च हर्षि हर्षयुक्तं च यन्महर्षिमण्डलं तेन मण्डिता । मुनिभार्याणां भाभिः कान्तिभिरार्या । रूपगुणादिभिः समानाम्· अनुरूपां माननाम्· आदरं रान्ति प्राप्नुवन्तीति सोमपाश्चवत्, ताश्च नारायणोरुजा उर्वशी· अप्सरःप्रधानं यासां ता अप्सरसश्च तासां प्रथा प्रकृष्टधारणं यस्यां सा ॥ २८२ ॥

तस्मिन्नेव समये ।

सिंहासनं विविधरत्नशिलाविलासि
गोवर्धनः स्ववपुषोऽवयवेन चक्रे ।
पाशायुधः स्वयमुपेत्य मणीन्द्रमुक्ता-
विस्रावि तच्च विदधार सदातपत्रम् ॥ २८३ ॥

गोवर्धनस्य सर्वतः श्रेष्ठ्यात् सिंहासनस्यापि· इन्द्रत्वे मुख्यलिङ्गत्वात् प्रथमं तेनैव तदुपकृतमित्याह सिंहासनम् । सत् सुन्दरम् ॥ २८३ ॥

सच्चारुचामरविधूननधूनहस्ताः
अष्टाववश्येन परितो मरुतोऽपि तस्थुः ।
पूर्णः सुधांशुरपि मण्डलरूपयेव
तन्वा विवृत्य मणिदर्पणतामियाय ॥ २८४ ॥

विवृत्य विवृत्तीभूय ॥ २८४ ॥

देध्मीयते स्वयमथ स्म विधाय काय-
व्यूहं मुहुस्तत इतोऽप्यथ पाञ्चजन्यः ।
ज्योतिर्मयः परित एव रुचां चयेन
जाज्वल्यते स्वयमुपेत्य सुदर्शनः स्म ॥ २८५ ॥

देध्मीयते स्म· अतिशयेन ध्वनितवान् । जाज्वल्यते स्म, दीपादिरूपेणेत्यर्थः ॥ २८५ ॥

Digitized by Google

पद्मं विभोरपि विभुत्वमुपेत्य नाना
छत्राणि हंसविशदानि समन्ततोऽभूत् ।
कौमोदकी तु महसा महिताभिषेक-
यज्ञोत्सवस्य मणियूप इवावतस्थे ॥ २८६ ॥

विभोः पद्ममपीति संबन्धः ॥ २८६

समुद्रार्णवाश्च सरितश्च नदाश्च पुण्याः
पुण्यानि यानि सलिलाशयमण्डलानि ।
स्वस्वाम्बुपूर्णमणिमङ्गलकुम्भहस्ते-
स्तैस्तैरभावि परिभावितदिव्यदेहैः ॥ २८७ ॥

परिभावितस्तिरस्कृतो दिव्योऽपि देहो यैस्तैः, यद्वा परि सर्वतो भावेनैव भावितः कृतो दिव्यो देहो यैस्तैरभावि तत्राभूयत ॥ २८७ ॥

॥ शेषमग्रे ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

॥ तृतीयाध्यायस्य ॥

॥ एकादशः परिच्छेदः ॥

१५ ॥ मिश्रभाववाचकेषु लक्षणाकरणेन ॥—मिश्रभावानां विशेषतो नीतिसंबन्धिनां च तेषां प्रायो मनसि स्वैरं संगृहीतसाचित्यस्थिरप्रतिमानविधुराणां विज्ञानानां समुदायतया तद्वाचकनाम्नामर्थः शुद्धविज्ञानानामिव न कथमपि शब्दव्याहिकृतया प्रदर्शयितुं शक्यते । परं तु तेषामवयवशः परीक्षया पूर्णयाथार्थ्येन ते भावा लक्षयितुं शक्यन्ते । यतस्तेषां कैश्चित्प्रतिमानैः सह संबन्धं विनैव स्वैरमात्मनासंगृहीतानामनेकविज्ञानानां समुदायतया मनुष्याः स्वविवक्षानुसारेण सर्वेषु समुदायेष्वनुगतानि कानि चिद्विज्ञानानि पृथगाकलयन्ति, ततश्च वक्तृश्रोतारावुभावपि क-

स्मिंश्चिच्चियते ऽसंदिग्धे ऽर्थविशेषे शब्दान् प्रयुञ्जाते, सत्यवसरे पूर्णतया प्रतिपादयतश्च तेषां वाच्यमर्थम् । साधु विचार्यमाणे नीतिविषमकसंवादान् सुव्यक्तमकुर्वाणास्तु महत एतद्दोषस्य भाजनानि भवन्ति । यतो मिश्रभावनाम्नां वास्तविकार्थस्य सर्वत्रैकरूपस्य निखिलविशेषजातीनामार्थस्वरूपात्मकस्य ज्ञातव्यतया तासां च विशेषजातीनामनैसर्गिकत्वान्मनुष्यरचितत्वाच्च गूढत्वेनानियमेन च नीतिविषयकः संवादो ऽविरुद्धो ऽपार्थकश्च भवति । अयं च दोषो यत्रात्यन्तविरुद्धतर्कभिया कुत्रचिदेव संदिग्धार्थानि पदानि परित्यक्तव्यानि भवन्ति तादृशस्थले नैसर्गिकद्रव्यविषयके संवादे बहुशः त्यक्तव्यो भवतीति क्रमशः प्रदर्शयिष्यामः ॥

१६ ॥ नीतिविषया उपपत्तिप्रभृतिसाधनैः स्फुटयितुं शक्यन्ते ॥—प्रदर्शितेन हेतुना नीतिशास्त्रीयशब्दवाच्यवस्तूनां यथार्थार्थस्वरूपस्य पूर्णभावेन ज्ञातुं शक्यतया तथैव च पदार्थानां परस्परं साधर्म्यवैधर्म्ययोर्नियताबाधिताविष्कारस्य कर्तुं शक्यतया गणितविषया इव नीतिविषया अप्युपपत्तिभिः प्रदर्शयितुं शक्यन्त इति निःशङ्कं चिन्तयामि । गूढत्वजनकभाववाचकपदानीवद्रव्यनामान्यपि नीतिशास्त्रे भूयशः प्रयुज्यन्ते इति तत्रापि सानुपपत्तिस्तु न शङ्क्या । नीति कथागतानां द्रव्याणां तु कल्पितानां विसंकुलानां धर्माणां बहूनामनपेक्षणात् । तथा हि । मनुष्यो ऽस्ति विधिनिषेधानुष्ठानाधिकारीति यदा भिधीयते तदा शरीरी विवेकशाली जीव इत्येव केवलं विवक्ष्यते । प्रकृतस्थले तस्य प्राणिन आर्थं स्वरूपं किमस्ति के वा ऽन्ये धर्माः सन्तीत्यादितु न कथमपि विचार्यते । अतश्च भौतिकपदार्थपरीक्षानुसारेण किमप्यपत्यं भूतादिपरिवर्तितं वा मनुष्यो वा भवतु, भवतु वा नैसर्गिकपदार्थपरीक्षकेषु विवादयस्तमिदमथापि नेदं किमपि नीतिशास्त्रीयसंवादकारिणा मनुष्येण विचार्यते येन 'शरीरी विवेकी जीव' इति विज्ञानमविकार्यमपरिहार्यं चास्तीति तं प्रति कथयितुं शक्येत । यतो यदि कश्चन वानरो ऽन्यो वा जीवो यावत्या बुद्ध्या स साधारणलिङ्गानि बोद्धुं साधारणविज्ञानसंबद्धानि फलानि संपादयितुं च

समर्था भवेत्तावत्या बुद्ध्या युतः स्यात्तर्हि सो ऽवश्यं प्राड्विवाककृतनिर्णयफलभाग् भवेद् । एवं सति कामं तस्य मनुष्यपदाभिधेयेभ्यो ऽपरेभ्यः प्राणिभ्यो भिन्नाकृतिमत्त्वेप्येवंविधार्थतात्पर्येण निःसंदेहं मनुष्यपदाभिलप्यो भवेदेव । द्रव्यनामानि यथोचितार्थेषु प्रयुक्तानि चेत्तानि गाणितिकसंवादान् यावद्विपर्यस्यन्ति न ततो ऽधिकं नीतिविषयकान् संवादान् विपर्यस्यन्ति । यत्र स्वासंबद्धे कस्मिंश्चिद्द्रव्यविशेषे भ्रमेण पदस्य प्रयोगे ऽपि नियतमेकरूपं सुस्पष्टमेव विज्ञानं सुवर्णस्य द्रव्यान्तरस्य वा घनगोलावधिकृत्य भाषमाणो गाणितिको ऽवधारयति ॥

१७ ॥ नीतिसंवादा लक्षणैः कर्तुं शक्यन्ते ॥—मिश्रभावनामसु तत्फलभूतेषु सर्वेषु नीतिसंवादेषु च लक्षणाकरणस्य नियतस्पष्टतरनीतिविषयज्ञानसंपादकतया ऽवसरविशेषेषु लक्षणाकरणेन मनुष्याणां कोर्थः सिध्यतीति प्रदर्शनायात्रैतावता प्रबन्धेन क्रमशो वर्णितम् । लक्षणाकरणस्य विवादलेशशून्यनियतार्थज्ञापकोपायतया नीतिशास्त्रीयशब्दानां यथार्थार्थस्य ज्ञापनाय समर्थत्वाच्च तदकरणं प्रज्ञालेशशून्यकृत्यमेव स्यात् । अतश्च यदि नीतिविषयकाः संवादा नैसर्गिकपदार्थप्रपञ्चनशास्त्रीयेभ्यस्तेभ्यः स्पष्टतरा न भवेयुस्तर्हि विज्ञानैर्यदनुसारिभिर्यत्संबद्धैश्च भवितव्यं तादृशानां बाह्यप्रतिमानानामभावात् तेषामेकतमस्यापि विरुद्धत्वे मिथ्यात्वे वा मनुष्याणामुपेक्षाः सोढुं शक्यन्ते । यानि न्यायपदप्रतिपाद्यप्रतिमानानि सन्ति यैश्च तथा प्रतिमानानि विरच्यन्ते येन येषां सर्वाः क्रिया यदनुरूपा भवन्ति तानि विज्ञानानि तेन नाम्ना बोधयितुं शक्यन्ते, एवं भूतानि विज्ञानानि स्वात्मसु सुखेन मनुष्यैर्विरचयितुं शक्यन्ते न पुनर्याज्ञवल्क्यं दृष्ट्वा तत्सदृशवस्तुमात्रे वस्तुतः सर्वभावेनानुगतं किमपि विज्ञानम् । मनुष्याणां स्वैरं विज्ञानरचनाकर्तृत्वेपि तत्सदृशस्य कस्याप्यभावात् । कुत्रचित्स्वात्मनि संगतानां विज्ञानानां समुदायमात्रमेव तैर्ज्ञातुमिष्यते कुत्रचिच्च सर्वत्र गूढेष्ववयवसंस्थानेषु तत्तद्धर्मविधुराणां वस्तूनां नानाविधेषु धर्मेषु स विज्ञानसमुदायस्तैरवश्यमन्वेष्टव्यो भवति ॥

१८ ॥ किं त्वेष एव च प्रकारः ॥—मिश्रभावानां विशेषतश्च नीतिशब्दानामत्यन्तावश्यकलक्षणकरणस्यान्यत्कारणमयमेवैकः प्रकारो येन भूयिष्ठानां तेषामर्थो नैयत्येन ज्ञापयितुं शक्यत इति किं चिदेव पूर्वं वर्णितम् । यतः प्रायशस्तद्वाच्यविज्ञानावयवानां क्वापि पृथक् सद्भावस्थितेरभावा ऽपि त्वन्यैः सह समस्तत्वादपृथक्त्वाच्च मन एव केवलं तानि संगृह्णाति. संयोजयति चैकविज्ञानरूपेण । किं च वयं मनसा संकलितानां बहूनां शुद्धविज्ञानानां परिगणकैः शब्दैरेव परान् प्रति तद्वाचकपदप्रतिपाद्यानि ज्ञापयामः । इन्द्रियाणां साहाय्यस्य च प्रायशो दृश्यशुद्धविज्ञानानां केषां चिद्द्रव्यनाम्नामपि चार्थप्रकाशकत्वेन प्रकृतस्थले दृश्यविषयाणां पुरः प्रदर्शनरूपोपायेन एवंविधशब्दवाच्यविज्ञानानां प्रकाशकत्वे ऽकिंचित्करत्वात्,

१९ ॥ (३) द्रव्येषु प्रदर्शनेन लक्षणकरणेन च ॥—द्रव्यनाम्नामस्मदवधृततत्तद्विशेषजातिविज्ञानवाचकतया तेषामर्थविवरणाय पूर्वोक्तं प्रदर्शनं लक्षणकरणं चेति द्वयमपि बहुषु स्थलेषु व्यवहार्यत्वायावश्यकमस्ति । येषु तद्विशेषजातेर्मिश्रविज्ञानवाचकान्यपराणि विज्ञानानि योजितानीति कल्पयाम एवंभूतानां केषां चिन्मुख्यधर्माणां प्रायः सर्वासु जातिषु सत्त्वेन यत्र तस्या विशेषजातेः प्रधानतमविज्ञानत्वेन परिगृहीतं मुख्यं लिङ्गमुपलभ्यते तत्र सविश्रम्भं विशेषनाम प्रयुञ्ज्मः । इमानि मुख्यानि परिचायकानि विज्ञानानि प्राणिजातिषु महीरुहजातिषु च पञ्चमपरिच्छेदस्यैकोनत्रिंशत्तमखण्डे नवमपरिच्छेदस्य पञ्चदशे खण्डे चोक्तेन प्रकारेण प्रायश्च आकृतिरेव, अचेतनेषु च वर्णः केषु चिच्चोभयमपि । एवं सति ॥

२० ॥ द्रव्यगतानां मुख्यधर्माणां विज्ञानानि प्रदर्शनेन साधु परिगृह्यन्ते ॥—इमे प्रत्यक्षग्राह्या मुख्या धर्मास्ते सन्ति ये ऽस्माकं विशेषविज्ञानानां मुख्यानवयवान् रचयन्ति, तत एव चास्मज्ज्ञानगोचरद्रव्यजातिघटका विशेषपदानां लक्षणेषु विचारणीयतमा अपरिवर्तनीयाश्च भागा भवन्ति । यतो यद्यपि मनुष्य इति पदं समुदायान्तरबोधन इवैकाधि-

करणाकविवेकप्राणोभयघटितमिश्रविज्ञानबोधने समर्थं तथापि लोके ऽस्मत्सजातीयकजीवजातिबोधकलिङ्गतया प्रयुज्यते। मन्ये मनुष्यपदबोध्यमिश्रविज्ञाने तत्रोपलभ्यमानान्यधर्मेष्व बाह्याकारोप्यावश्यकत्वेन परिगृह्यते। अत एव च "पक्षलोमहीनोद्विपात् प्राणीति" प्लेटो महाशयकृतमनुष्यलक्षणं तां प्राणिजातिं बोधयदपि साधुलक्षणं कुतो न भवितुमर्हतीति नानायासेन प्रदर्शयितुं शक्यते। यत आकार एव मुख्यो धर्मो य आपाततो ऽप्रतीयमानां कुत्र चिच्च सर्वथा ऽप्रतीयमानां तर्कशक्तिमपेक्ष्याधिकं तस्या जातेर्नियामकः प्रतीयते। किं च यद्येवं न स्वीक्रियेत तर्हि न जाने कस्य हेतोस्तेषां मनुष्यहत्यापराधः क्षम्यते, ये क्रूराकृतिमन्तु यः सद्योजाते विरूपाकृतिमति सुरूपाकृतिमति वा बालके ऽविशेषेणैव ज्ञातुं शक्यते स तर्कशक्तिमान् जीवोऽस्ति न वेति निर्णयमकृत्वैव तान् घ्नन्ति। किं च तर्कशक्तिमान् जीवो बाह्याकारसारूप्यरहिते शरीरे वस्तुं न शक्नोति, न वा बाह्याकारेणात्यन्तमरूपं विहायान्येन पिण्डेन सहात्मानं योजयितुं शक्नोतीति को नामास्मान् कथयति स्म॥

THE

NYÁYADARŚANA.

WITH THE COMMENTARY BY VÁTSYÁYANA.

Continued from page 320.

The abode of soul wherein it experiences pleasure and pain is given in the next aphorism.

11. APHORISM.

The Body [Śaríra], is the site of the muscular actions [cheshṭá], of the organs of sense, and of pleasure and pain.

न्यायदर्शनवात्स्यायनभाष्यम्।

भा॰ तस्यभोगाधिष्ठानम्।

सू॰ चेष्टेन्द्रियार्थाश्रयः शरीरम्॥ ११॥

COMMENTARY.

How is this that it is the site of the muscular actions?

The activity of a man who is actuated by the desire either to obtain or to shun an object, with regard to the object he wishes to obtain or to shun, is the said muscular action; and the place wherein the activity, being characterised by the prosecution of the plan of what is intended to be done, takes place, is the body. How is this that it is the site of the organs of sense? Because the abode wherein the organs of sense, being pleased or hurt by the benefit or mischief done to the body itself, receive their objects either good or bad is what we mean by the site of the senses. How is it the site of pleasure and pain? because the abode in which pleasure and pain take their rise being produced from the contact of the senses with their objects, is what we mean by the site of pleasure and pain, and that is the body itself.

Now the author enumerates the instruments of experience.

12. APHORISM.

[The instruments of experience] are the organs of sense which [originating] from the elements, are smell, taste, sight, touch and hearing.

भा॰ कथं चेष्टाश्रयः । ईप्सितं जिहासितं वाऽर्थमधिकृत्येप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा सा यत्र वर्त्तते तच्छरीरम् । कथमिन्द्रियाश्रयः । यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु वर्त्तन्ते स एषामाश्रयस्तच्छरीरम्, कथमर्थाश्रयः यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरमिति । भोगसाधनानि पुनः ॥—

सू॰ घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १२ ॥

भा॰ जिघ्रत्यनेनेति घ्राणं गन्धं गृह्णातीति, रसयत्यनेनेति रसनं रसं गृह्णातीति । चष्टेऽनेनेति चक्षुः रूपं पश्यतीति, स्पृशत्यनेनेति स्पर्श-

COMMENTARY.

Smell [Ghráṇa] is that sense by which one perceives the odour of things, that is to say, this organ takes in the odour. Taste [Rasana] is that sense by which one ascertains the flavor of bodies; in other words it takes in the flavor. Sight [Chakshus] is that by which one sees, or the organ of seeing colours. Touch [Tvak] is the organ having the skin as its site; but by implication, it is called Tvak [skin] from the name of its site. Hearing is that organ whereby one hears, or in other words, it catches sounds. Such explanations of the senses, that is to say, that they are characterised by their different abilities to receive their proper objects, are to be derived from the literal sense of the names assigned to the organs of sense. The phrase 'from the elements' [Bhútebhyas] has been added in order to show that the organs of sense whose objects are limited, originate from different origins and not from the same source. And the definitions of the organs of sense by their capacities to receive their proper objects, are possible in case there be the limitation of the objects. What are the causes of the organs of sense?

13. APHORISM.

[They are] the elements, namely the earth, water, light, air and ether.

नम् * त्वक्स्थानमिन्द्रियं त्वक् तदुपचारः स्थानादिति । शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति । एवं समाख्यानिर्वचनसामर्थ्याद्बोध्यम् स्वविषयग्रहणलक्षणानीन्द्रियाणीति । भूतेभ्य इति नानाप्रकृतीनामेषां सतां विषयनियमो नैकप्रकृतीनां सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवतीति । कानि पुनरिन्द्रियकारणानि ॥—

सू० पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ १३ ॥

* The underlined phrase seems to be interpolated in the edition of the Bibliotheca Indica; for it gives the etymoligical sense of the word स्पर्शनम् which is not given in the aphorism, and it is natural to think that the commentator Vátsyáyana would not have commented a word which is not given in the text. I am further authorised, in this remark, by an old Ms. that omits the said phraso.

COMMENTARY.

The separate enunciation of the elements by their designatory words has been made with a view that the effects of them would be easily stated they [elements] having been divided.

14. APHORISM.

Odour, savour, colour, tangibility and sound are the qualities of the earth &c. and are the objects of them [the senses].

COMMENTARY.

Odour &c. are the qualities of the earth &c. just in accordance with possibility, and are the objects of senses according to the order.

'Knowledge of Intellection [Buddhi], which (buddhi) is an unintelligent internal organ, is the modification [Vṛitti] of itself (buddhi), whereas the knowledge of the soul which is inactive and intelligent is consciousness.' *—to contravene this tenet, as an unreasonable doctrine, the author states the following :—

15. APHORISM.

Intellection (buddhi), consciousness and knowledge all mean the same thing.

---

* Here the commentator states, the Sánkhya-dogma and refutes it by the following aphorism.

भा॰ संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां सुवचं[1] कार्य्यम्भविष्यतीति । इमे तु खलु ॥–

सू॰ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १४ ॥

भा॰ पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति । अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः चेतनस्याकर्त्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाणक इवेदमाह ॥–

सू॰ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥

---

1. V. L. सुवचनम्.

COMMENTARY.

Intellection, in case it were an unintelligent organ, could not be said to possess knowledge; for, in that case it should be intelligent. [In truth] there is only one Intelligent principle quite different from the combination consisting of body and senses. Although this aphorism is intended to describe one of the objects [Prameyas] yet the exposition of the other fact, [viz. the contravening of the Sánkhya-doctrine] by the same aphorism is owing to the force of the argument implied by that description. Although memory, inference, words or testimony, doubt, imagination, sleep, cognition, conjecture, feeling of pleasure &c. desire and so forth are so many marks of the existence of the internal organ, [Manas] yet there is one more given as follows :—

16. APHORISM.

Impossibility of ideas more than one arising simultaneously in the same subject is the mark of the internal organ [Manas].

COMMENTARY.

Memory and so forth, which are not caused by any organ of sense, ought to have some other organ as the cause of their production. Nor do the different sensations or perceptions arise

---

भा० नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हति तद्धि चेतनं स्यात् एकश्चायं चेतनो देहेन्द्रियसङ्घातव्यतिरिक्त इति। प्रमेयलक्षणार्थस्याऽपि वाक्यस्यान्यार्थप्रकाशनमुपपत्तिसामर्थ्यादिति। स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि तेषु सत्स्वयमपि ॥—

सू० युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥

भा० अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति युगपच्च खलु घ्राणादीनां गन्धादीनाञ्च सन्निकर्षेषु सत्सु युगपद्ज्ञानानि[1] नोत्पद्यन्ते तेनानुमीयते अस्ति तत्तदिन्द्रियसंयोगि सहका-

---

1. V. L. युगपज्ज्ञानानि.

simultaneously on the simultaneous contacts of the senses, the smell &c. with their objects, odour &c. Hence it is concluded that there is some auxiliary cause unpervading, yet putting itself in connection with each of the senses severally; and that no cognition takes place during its absence from the senses; but it takes place while it is pre-connected with them. If the contact of the senses with their objects, were the cause of cognitions, independently of the connection with the internal organ, there could simultaneously arise a multitude of sensations or perceptions. Now the author states what presents itself next in order.

17. Aphorism.

Activity is the effort done either with tongue, or with the internal organ or with body.

Commentary.

Here, in the text, by the word Buddhi [usually intellection] is meant the internal organ [Manas], taking the word buddhi in its etymological sense, viz. that by means of which one takes cognisance of objects. The activity, as defined in the text, either religious or irreligious and originated either from body or from tongue or from mental sensory, is ten-fold which has already been commented in the second aphorism.

18. Aphorism.

Vices have the characteristic that they cause activity.

रिनिमित्तान्तरमव्यापि तस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यतइति मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति । क्रमप्राप्ता तु ॥—

सू॰ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ॥ १७ ॥

भा॰ मनोऽत्र बुद्धिरित्यभिप्रेतम्, बुद्ध्यतेऽनेनेति बुद्धिः, सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः, तदेतत् कृतभाष्यं द्वितीयसूत्रइति ॥

सू॰ प्रवर्तनालक्षणादोषाः ॥ १८ ॥

COMMENTARY.

The text-word 'Pravartaná', signifies the capability of causing activity; for, attachment and so forth [which are all vices] lead the percipient to merit or demerit. Where there is false notion there prevails [in the same subject] attachment, hatred and so on. Why are, therefore, these vices, which are known to every mind by self-conciousness, described by their characteristics? Because, those persons who are affected by love, hatred or delusion are found to be characterised by their works; for he who is possessed by love, does such a work whereby he feels pleasure or pain; the same case is with those who are possessed by hatred or delusion. It would be much to say that attachment, hatred and delusion are vices.

19. APHORISM.

Transmigration [Pretyabháva] means reproduction.

COMMENTARY.

Transmigration [Pretyabháva] is defined as the reproduction, after having been dead, of that which had been born somewhere in an animal body. 'The born' signifies the connected. The

भा॰ प्रवर्त्तना प्रवृत्तिहेतुत्वम् ज्ञातारं हि रागादयः प्रवर्त्तयन्ति पुण्ये पापे वा । यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति । प्रत्यात्मवेदनीया हीमेदोषाः कस्मात् लक्षणतो निर्द्दिश्यन्त इति । कर्म्मलक्षणाः खलु रक्तद्विष्टमूढाः रक्तो हि तत्कर्म्म कुरुते येन कर्म्मणा सुखं दुःखं वा भजते, तथा द्विष्टस्तथा मूढ इति दोषा रागद्वेषमोहा इत्युच्यमाने बहुनोक्तं[1] भवतीति ॥ १८ ॥

सू॰ पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥

भा॰ उत्पन्नस्य क्वचित्सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः[2] । उत्पन्नस्य संबद्धस्य संबन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः, पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः । पुनरित्यभ्यासाभिधानं । यत्र

1. V. L. बहुलोक्तम्.

2. V. L. सा प्रेत्यभावः ।

soul is said to be connected with body, senses, internal organ, intellection and feeling of pleasure and pain. By reproduction we mean the reunion with body and so forth. The prefix 'Re' in the word 'reproduction' is intended to signify repetition of the case. When some one, existing in some or other animate body, gives up that body etc. previously acquired by himself, he is said to die; where as when some one existing somewhere receives a new body and so forth, he is said to be born. It may be noticed that Transmigration or one's being born over again after having been dead, consists of the repetition of a series of births and deaths, which has no beginning but has an end in beatitude.

20. APHORISM.

Fruit [Phala] is that thing which is produced by activity and vices.

COMMENTARY.

Fruit [Phala] is the experience of pleasure and pain. Activity results either in pleasure or in pain. Inasmuch as the experience of pleasure and pain is possible only in the presence of a body, organs of sense, objects, and intellection, fruit is meant in connection with the body, organs &c.; so that all these, body and so forth, taken together, are considered as the fruit produced by activity and vices. Such a fruit, when received has a tendency

---

क्वचित् प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत् प्रैति ॥ यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद्भवति ॥ प्रेत्यभावो मृत्वा पुनर्जन्म । सोऽयं जन्ममरणप्रबन्धाभ्यासो ऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति ॥

सू॰ प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥

भा॰ सुखदुःखसंवेदनं फलम् । सुखविपाकं कर्म्म दुःखविपाकं च । तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सहदेहादिभिः फलमभिप्रेतम् । तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वम्भवति । तदेतत् फलमुपात्तमुपात्तं[1] हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा

---

1. उपात्तमुपात्तम् instead of उपात्तम्. B. I.

to be lost, and when lost, a tendency to be received again. Nor is there any end of the perpetual succession of the loss and reception of the fruit. Indeed the whole universe is carried on by the current of losing and receiving the fruit. The same fruit is considered as pain as follows.

21. APHORISM.

Pain is that which is characterised by suffering.

COMMENTARY.

'Suffering' signifies affliction or distress. The fruit or the experience of pleasure and pain in connection with body and so forth, being pierced by, or closely connected with, or inseparably united with pain, is said to be pain itself. A person seeing everything pierced by pain, wishing to get rid of it yet finding his life painful, gets disgusted with the worldly concerns, and being thus disgusted with the world, he becomes void of attachment to all objects, and being thus void of attachment gains emancipation. When his pain ceases to exist there results beatitude as explained in the next Sútra.

पर्यवसानं वाऽस्ति स[1] खल्वयं फलस्य हानोपादानस्रोतसोह्यते लोक इति । यथेतदेव ॥

सू॰ बाधनालक्षणं दुःखमिति ॥ २१ ॥

भा॰ बाधना पीडा ताप इति । तयानुविद्धमनुषक्तमविनिर्भागेन वर्त्तमानं दुःखयोगाद्दुःखमिति सोयं सर्व्वं दुःखेनानुविद्धम्[2] इति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते निर्विण्णो विरज्यते विरक्तो विमुच्यते यत्र तु निष्ठा यत्र तु पर्य्यवसानं सोऽयम्[3] ।

---

1. स instead of न B. I.

2. After the word अनुविद्धम् I omit बहन्तम् which is an interpolation in the edition of Bibliothera Indica.

3. I read यत्र तु पर्यवसानं सोयम् instead of सोयं यत्र तु पर्यवसान् B. I.

22. APHORISM.

The absolute deliverance from that is beatitude.

COMMENTARY.

From that i. e. from pain or life, the entire deliverance is beatitude. How? Because the knowers of beatitude understand by the word beatitude lasting giving up of the present life, as well as the non-acceptance of the life to come. It is Brahma or the attainment of consummate bliss, which is fearless, undecaying and exempt from death. It is alleged that, beatitude is the eternal bliss, which, though beyond cognisance like the largeness of the soul, becomes cognizable at the time of the absolute deliverance from pain; and when the bliss is cognized, one finally emancipated from pain, becomes happy. But this opinion, being supported by no grounds is untenable; for there is no evidence afforded either by perception or by inference, or by testimony, supporting the opinion that the eternal bliss, though imperceptible like the largeness of the soul, becomes cognized at the time of the absolute deliverance from pain. The cause of the cognition of the eternal bliss should be stated; in other words, that cause should be stated from which the consciousness of the eternal bliss proceeds. If you should say that the consciousness

---

सू॰ तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥

भा॰ तेन दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्गः । कथम् ॥ उपात्तस्य जन्मनो हानमन्यस्य चानुपादानम् एतामवस्थामपर्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः। तदभयमजरममृत्युपदं ब्रह्म क्षेमप्राप्तिरिति। नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यंतं विमुक्तः सुखी भवतीति के चिन्मन्यन्ते तेषां प्रमाणाभावादनुपपत्तिः । न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यत इति। 'नित्यस्याभिव्यक्तिः संवेदनं तस्य हेतुवचनम्'[1] । नित्यस्याभिव्यक्तिः संवेदनं ज्ञानमिति तस्य हेतुर्वाच्यो यतस्तदुपपद्यत इति । सुखवन्नित्य-

---

1. The passage between two commas is improperly omitted in the edition B. I.

Digitized by Google

of the bliss is equally eternal as the bliss itself; we could not agree with you. Because in that case there would be no difference between a man of the world and one emancipated from its concerns; for as the emancipated man is endowed with the eternal consciousness of the bliss as well as with the bliss itself, just so would have to be a man of the world; both, the bliss and the consciousness of it being, according to you, eternal. If your opinion be granted, the eternal bliss and the fruit of the merit or demerit would be felt simultaneously, in other words, that pleasure or pain, which we experience, by turns, in the places of its production, as the fruit of merit or demerit, would have to be felt, together with the eternal consciousness of the bliss. You cannot allege the accidental non-existence either of the bliss, or of the consciousness of it; they both being eternal. If you should say that they are not eternal, we should ask you the reason why it is so. You would state that the consciousness of the eternal bliss, which is developed at the time of the absolute emancipation [Moksha] is non-eternal; and that the cause from which the consciousness of the eternal bliss proceeds, consists of the contact of the soul with the internal organ accompanied by some other subordinate causes. But we say that though the contact of

---

मिति चेत् संसारस्थस्य मुक्तेनाविशेषः । यथा मुक्तः सुखेन तत्संवेदनेन च नित्येनोपपन्नस्तथा संसारस्थोऽपि प्रसज्यतइति । उभयस्य नित्यत्वात् । अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्यं यौगपद्यं गृह्येत । यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्यायेण तस्य च नित्यसुखसंवेदनस्य[1] च सहभावो यौगपद्यं गृह्येत । न सुखाभावो नाऽनभिव्यक्तिरस्ति उभयस्य नित्यत्वात् । अनित्यत्वे हेतुवचनम् ।

अथ मोक्षे नित्यस्य सुखस्य संवेदनमनित्यं यत उत्पद्यते स हेतुर्वाच्यः । आत्ममनः संयोगस्य निमित्तान्तरसहितस्य हेतुत्वम् । आत्ममनः संयोगो हेतुरिति चेदेवमपि तस्य सहकारि निमित्तान्तरं

---

1. नित्यसुखसंवेदनस्य instead of नित्यं स्वसंवेदनस्य B. I.

the soul with the internal organ is given as the cause of the consciousness, yet the subordinate cause of it remains to be mentioned. If you assert it to be merit, we should ask you the cause even of that, wherefrom that [merit] proceeds. For the merit proceeding from religious meditation, being destructive of the notion of any object, stops consciousness or sensation whatsoever; and perishes itself. To explain, if you suppose the merit proceeding from religious meditation to be the subordinate cause of the consciousness of the eternal bliss, this will not do; because the merit being, in the mediator, distructive of the notion of any object removes sensation altogether while vanishing itself; and when there is no sensation of any object, it makes no difference whether the object of sensation is existing or not existing. In short, if the distruction of the merit is followed by the cessation of any sensation, then even the eternal bliss should not be felt. Nor is there any particular inference determining either of the cases, *viz.* whether the eternal bliss, which is not felt, does exist or does not exist. Nor can the indestructibility of the merit be inferred from its having the quality of being produced. We cannot

वचनीयमिति धर्मस्य कारणवचनम् । यदि धर्मो निमित्तान्तरं तस्य हेतुर्वाच्योऽयत उत्पद्यतइति । योगसमाधिजस्य कार्यावसायविरोधात् प्रक्षये[1] संवेदनानिवृत्तिः । यदि योगसमाधिजो धर्मो हेतुस्तस्य कार्यावसायविरोधात् प्रक्षये संवेदनमत्यन्तं निवर्तयति । असंवेदने चाऽविद्यमानाविशेषः । यदि धर्मक्षयात् संवेदनोपरमो नित्यं सुखं न संवेद्यतइति । किं विद्यमानं न संवेद्यते अथाविद्यमानमिति । नानुमानं विशिष्टेस्तीति । अक्षयश्च धर्मस्य निरनुमान उत्पत्तिधर्मकत्वात् । योगसमाधिजो धर्मो न क्षीयत इति नास्त्यनुमानमुत्पत्तिधर्मकमनित्यमिति विपर्ययस्य त्वनुमानम् । यस्य तु संवेदनोपरमो नास्ति तेन संवेदनहेतु[2]र्नित्य इत्यनुमेयम् । नित्ये च मुक्तसंसारस्थयोरविशेषइत्युक्तम् । यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च । संवेदनस्य तु-

1. प्रक्षये instead of प्रलये B. I.

2. संवेदनहेतुः instead of संवेदनेन हेतुः B. I.

Digitized by Google

infer that the merit proceeding from religious meditation does not perish; nay, we can infer the contradictory of this, as a thing having the quality of being produced is not everlasting. However, one, whose sensation of the bliss does not stop at all, might infer the eternity of the cause of the sensation [i. e. the merit]. Grant the eternity of it [the merit], and there would be no difference between a man of the world and one emancipated from it, which has already been explained, For as the emancipated has, according to you, the eternal bliss and the eternal cause of its sensation, which sensation never ceases to exist on account of the eternity of its cause [the merit], just so would be the case with the man of the world; so that the sensation of the eternal bliss and that of pleasure or pain, which is the fruit of merit or demerit, would be felt simultaneously. If you say that the connection with the body and so forth prevents the sensation; we answer such is not the case; for the use of the body and so forth is nothing but the production of the experience or sensation. Nor can any inference show its contradictory. There could be an opinion that the connection with the body and so forth prevents the sensation of the eternal bliss in the man remaining in the worldly state and that, so there is no absence of

---

परमोनास्ति कारणस्य नित्यत्वात् । तथा संसारस्थस्यापीति । एवं च सति धर्माधर्मफलेन सुखदुःखसंवेदनेन साहचर्यं गृह्येतेति । शरीरादिसंबन्धः प्रतिबन्धहेतुरिति चेन्न । शरीरादीनामुपभोगार्थत्वात् । विपर्ययस्य चाननुमानात् । स्यान्मतं संसारावस्थस्य[1] शरीरादिसंबन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकस्तेनाविशेषो नास्तीति । एतच्चायुक्तम् । शरीरादय उपभोगार्थास्ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम् । न चास्त्यनुमानमशरीरस्यात्मनो भोगः कश्चिदस्तीति ।

दृष्टाधिगमार्था प्रवृत्तिरिति चेन्न । अनिष्टोपरमार्थत्वात् । [इदमनुमानम्[2]] । दृष्टाधिगमार्थो मोक्षोपदेशः 'प्रवृत्तिश्च मुमुक्षूणां नोभयमन-

---

1. संसारावस्थस्य instead of संसारावस्थशरीरादिः B. I.

2. It is omitted in B. I.

difference [between the emancipated and the man of the worldly concerns]. But we reject this opinion as being improper; for it is not reasonable to say that body and so on, which are only for the use of producing enjoyment and suffering form an empediment to them. Nor can there be any inference proving the sensitivity of the soul without body.

If you say, 'effort is made for some wished—for object,' we say, no: [such is not the general case]; the use of an effort being the removal of evils. Here some people might reason thus: instructions about the absolute emancipation and one's effort for it are for the sake of gaining some wished-for object: because both of them cannot be useless. We reject this argument as unreasonable; because the instructions about the absolute emancipation are given for the removal of evils; and the effort also of one striving after emancipation is made to the same purpose. For it is impossible for one to have one's desired object unconnected with evils through which even the wished-for object becomes evil; and consequently one trying to get rid of evils cannot but lose the wished-for objects; it being impossible to lose one without losing the other. If you say that one trying for emancipation gives up the ordinary bliss and longs for the eternal one which is not connected with evils, I say the same is the case with the

थैकमिति । एतच्चायुक्तम् । अनिष्टापरमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणामिति'[1] । नेष्टमनिष्टेनाननुविद्धं संभवतीतीष्टमप्यनिष्टं संपद्यते । अनिष्टहानाय घटमान इष्टमपि जहाति विवेकहानस्याशक्यत्वादिति ॥

दृष्टातिक्रमश्च देहादिषु तुल्यः । यथा दृष्टमनित्यं सुखं परित्यज्य नित्यं सुखं कामयते एवं देहेन्द्रियबुद्धीरनित्या[2] दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः । साधीयश्चैवं मुक्तस्य कैवल्यं[3] कल्पितं भवतीति । उपपत्तिविरुद्धमिति चेत्समानम् । देहादीनां नित्यत्वं प्रमा-

1. This also is omitted in B. I.
2. बुद्धीरनित्या instead of बुद्धिरनित्या B. I.
3. कैवल्यम् instead of चैकात्म्यम् B. I.

ordinary body and so forth ; since, as you say that the man striving after emancipation gives up the transitory worldly happiness and gains the eternal bliss, so you must imagine that he, in like manner, quits the transitory body, organs of sense, and intellect, and receives the eternal ones instead of them. If so, you have established the doctrine of the absolute emancipation admirably indeed! If you assert that what I say is unreasonable, I would retort the same charge to you ; for as the eternity of the body and so forth is contrary to reason and so cannot be imagined as possible, just so the eternity of the bliss is contrary to reason and cannot therefore be thought as possible.

As the word bliss is also used in the sense of the entire annihilation of the worldly pains, there is no fear of repugnance though some authority be found against us, that is to say, if there be some Vedic authority stating that the emancipated enjoy the greatest happiness, it must be understood that the word 'the greatest happiness' has been used there in the sense of the entire annihilation of pain, so there is no repugnance. Moreover in the ordinary usage, the word bliss or happiness is copiously used in the sense of the privation of pain. Attainment of the absolute emancipation is quite impossible in case the attachment towards the eternal bliss is not removed ; for the attachment of any degree is known as a bondage. If a man knowing that the eternal bliss

---

णविरुद्धं कल्पयितुमशक्यमिति समानं सुखस्यापि नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति । आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमेऽपि सत्यविरोधः । यद्यपि कश्चिदागमः स्यान्मुक्तस्यात्यन्तिकं सुखमिति, सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते । दृष्टो हि दुःखाभावे सुखशब्दप्रयोगो बहुलं लोक इति । नित्यसुखरागस्याप्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाम्नानात् । यद्ययं मोक्षे नित्यं सुखमभिव्यज्यत इति नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तुमर्हतीति । बन्धनसमाम्नातो[1] हि रागः । न च बन्धने

---

1. V. L. समाम्नानो–

is developed in the state of the emancipation, strives after it with the desire of the eternal bliss, he certainly will not attain to it; nor does he deserve it, his desire being a kind of bondage. It is not possible for any one to be emancipated in spite of the bond. When the desire of the eternal bliss is removed it offers no obstruction, or in other words, when the attachment to the eternal bliss is entirely extinguished it makes no hindrance in gaining the emancipation. If it is so, it is settled then that one's possession of the emancipation and one's non-possession of it do not suppose in one, the existence of the eternal bliss, and in the other, the non-existence of it.

As this is the proper place for giving the definition of doubt, it is given in the next Aphorism.

23. APHORISM.

Doubt is the wavering judgment accompanied by a desire of knowing the proper attribute of its object and arising either from the knowledge of its object's common quality; or from the knowledge of its abject's special quality which can distinguish a given object from various objects; or from contradiction; or from the indecision of perception; or from the indecision of non-perception.

सत्यपि कश्चिन्मुक्तइत्युपपद्यत इति। प्रहाणे[1] नित्यसुखरागस्याप्रतिकूलत्वम्। यद्यास्य नित्यसुखरागः प्रहीयते तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवति। यद्येवं मुक्तस्य नित्यं सुखं भवति अथापि न भवति नास्योभयोः पक्षयोर्मोक्षाधिगमो विकल्प्यत इति॥

भा॰ स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते।

सू॰ समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः॥ २३॥

भा॰ समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशयइति। स्थाणुपुरुषयोः समानधर्ममारोहपरिणाहौ पश्यन् पूर्वं दृष्टं च तयोर्विशेषं बुभु-

---

1. V. L. प्रहीण–

COMMENTARY.

The first kind of doubt or the wavering judgment accompanied by a desire of knowing the proper attribute of its object and arising from the knowledge of its object's common quality is seen in a man, who, observing an object of such and such height, and of such and such breadth, which are the qualities common to a man and a branchless trunk of a tree, and wishing to know their difference which he once knew, finds nothing to determine between the two objects, that is, man and branchless trunk. Such uncertainty of knowledge is doubt. The consciousness of the man that he preceives only their common qualities and not their distinguishing attributes, which he desires to know, gives rise to doubt, which, for this reason is said to be accompanied by a desire of knowing the propor attribute of its object.

In the definition of the second kind of doubt or the wavering judgment arising from the knowledge of its object's special quality which can distinguish a given object from various other objects, the phrase 'various objects' indicates homogeneous and heterogeneous objects; and from them a given object can be

---

त्समानः किं स्विदित्यन्यतरन्नावधारयति तदनवधारणं ज्ञानं संशयः। समानमनयोर्धर्म्ममुपलभे विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्तिका वर्तते[1] तेन विशेषापेक्षो विमर्शः संशयः। अनेकधर्मोपपत्तेरिति समानजातीयमसमानजातीयञ्चानेकम् तस्यानेकस्य धर्मोपपत्तेर्विशेषस्योभयथादृष्टत्वात्‌ समानजातीयेभ्यो ऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते। गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजत्वं विशेषः तस्मिन् द्रव्यं गुणः कर्म्म वेति सन्देहः विशेषस्योभयथादृष्टत्वात् किं द्रव्यस्य सतो गुणकर्म्मभ्यो विशेष आहोस्विद्गुणस्य सत इति अथ कर्म्मणः सत इति विशेषापेक्षा अन्यतमस्य व्यवस्थापकं धर्म्मं नोपलभे इति बुद्धिरिति। विप्रतिपत्तेरिति, व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति। अस्या-

---

1. V. L. विद्यते।

distinguished by its special quality; for, special qualities are seen to distinguish their objects in both ways, that is, from homogeneous as well as from heterogeneous species. As for instance the earth, by means of its special quality of smell, may be distinguished from the qualities (Guṇa) and actions (Karma) which are its heterogeneous species, and from water and as forth, which are its homogeneous species.

Of the second kind of doubt an example is furnished by the case of sound that has the special quality of being produced from the disjunction of any two things. From this quality one may doubt whether sound is a substance or a quality, or an action. For, as the special qualities are seen to distinguish their objects in both ways, as in the case of the earth, it is natural to doubt, whether the said quality of smell distinguishes sound as a substance from the qualities and actions, or as a quality from the substances and actions, or lastly, as an action from the substances and qualities. In this case doubt is accompanied by the desire of knowing the proper attribute of sound which should determine it to be either of these three categories.

KESAVA ŚASTRI.

To be continued.

त्मेत्येकं दर्शनं नास्त्यात्मेत्यपरम् न च सद्भावासद्भावौ सहैकत्र सम्भवतः न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति। उपलब्ध्यव्यवस्थातः। खल्वपि सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु वा[1] ऽविद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथासदिति संशयो भवति। अनुपलब्ध्यव्यवस्थातः। सच्च नोपलभ्यते मूलकीलकोदकादि। असच्चानुत्पन्नं निरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उतासदिति संशयो भवति। विशेषापेक्षा पूर्ववत्· पूर्वः[2] समानो ऽनेकश्च धर्म्मो ज्ञेयस्थः। उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे एतावता विशेषेण पुनर्वचनम् समानधर्म्माधिगमात् समानधर्म्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति स्थानवतां लक्षणवचनमिति समानम्॥

---

1. V. L. चा· 2. V. L. पूर्वै।

SARVA-DARS'ANA-SANGRAHA.

CHAPTER XI.

THE AKSHAPÁDA (OR NYÁYA) DARŚANA.

(Continued from page 192).

"If you bring forward as an antagonistic syllogism, The mountains, &c., cannot have had a maker, from the fact that they were not produced by a body, just as is the case with the eternal ether,"—this pretended inference will no more stand examination, than the young fawn can stand the attack of the full-grown lion, since the additional words 'by a body' are useless, since 'from the fact that they were not produced' would be a sufficient middle term by itself, [and the argument thus involves the fallacy called *vyápyatvásiddhi.* *]. Nor can you retort, "well, let this then

* This and much of the whole discussion is taken from the Kusumánjali. v. 2, and I extract my note on the passage there. "The older Naiyáyikas maintained that the argument "the mountain has fire because it has blue smoke" involved the fallacy of vyápyatvásiddhi, because the alleged middle term was unnecessarily restricted. See Siddhánta Muktáv. p. 77. The moderns however more wisely consider it as a harmless error, and they would rather meet the objection by asserting that there is no proof to establish the validity of the assumed middle term."

॥ सर्वदर्शनसङ्ग्रहः ॥

ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेदेतत् परीक्षाक्षममीष्यते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात् । तर्ह्यजन्यत्वमेव साधनमिति चेदसिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्यमपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यत्कारकचक्रमवधीर्यात्मानमवसादयेदित्येतदविवादम् । तच्च सर्वं कर्तृविशेषोपहितमर्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम् । एवञ्च कर्तृव्यावृत्तेस्तदुपहि-

be our middle term,"—for you cannot establish it as a real fact. Nor again is it possible to raise the smallest shadow of a fear lest our middle term should be liable to limitation by any suggested condition, (*upádhi*) [such as 'from being produced by a body' instead of 'from having the nature of effects,'] because we have on our side a valid line of argument to establish our premises, viz. "if the mountains, &c. had no maker, then they would not be effects," [but all do acknowledge that they have the nature of effects,]—for in this world that is not an effect which can attain its proper nature independently of any series of concurrent causes. And this series inevitably involves the idea of some sort of maker; and I mean by 'being a maker' the being possessed of that combination of volition, desire to act, and knowledge of the proper means, which sets in motion all other causes but is itself set in motion by none." And hence we hold that if the necessity of a maker were overthrown, the possibility of the action of all other causes, would be simultaneously overthrown, since these are dependent thereon; and this would lead to the monstrous doctrine that effects could be produced without any cause at all. There is a rule laid down by Śankara-kinkara, which applies directly to the present case:

तसमस्तकारकव्यापृत्ताखकारणककार्योत्पादप्रसङ्ग इति स्थूलः प्रमादः तथा निरटङ्कि शङ्करकिङ्करेण ।

अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव इति

यद्दीश्वरः कर्ता स्यात् तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जाग- र्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात् तदुदितमुदयनेन ।

आगमादेः प्रमाणत्वे बाधनाददनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रया सिद्धिरुद्धतेति ॥

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात् ।

"When a middle term is accompanied by a sound argument to establish its validity,
Then you cannot attempt to supply a limiting condition from the [supposed] non-universality of the major term."

If you maintain that there are many sound counter-arguments, such as 'of the Supreme Being were a maker He would be possessed of a body,' &c., we reply that all such reasoning is equally inconsistent, whether we allow that Supreme Being's existence to be established or not.* As has been said by Udayana Áchárya [in the Kusmánjali, (iii. 5.)]

"If Śruti, &c., have any authority, your negative argument is precluded; if they are fallacious, our old objection of a 'baseless inference' returns stronger than ever."

---

* As in the former case it would be clear that He has no body, and in the latter you would be liable to the fault of *áśrayásiddhi* a 'baseless inference,' since, your subject (or minor term,) being itself non-existent, it cannot be the locus or subject of a negation. Cf. Kusumánjali, iii. 2. "just as that subject from which a given attribute is excluded cannot be unreal, so neither can an unreal thing be the subject of a negation."

तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्ये ऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत । अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित्तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात् स्वार्थमनपेक्ष्य परदुःखाहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः ।

प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते ।
जगच्चासृजतस्तस्य किं नाम न कृतं भवेदिति ॥

नास्तिकशिरोमणे तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः सृज्यप्राणि-

Nor need we fear the possibility of any other contradiction to our argument, since it would be overthrown by either alternation of God's being known or unknown.*

"Well, let all this be granted; but the activity of God in creating the world,—what end did it have in view, his own advantage or some other being's? If it was for the former end, was it in order to attain something desired or to avoid something not desired? It could not be the first, because this would be quite incongruous in a being who possesses every possible desire gratified; and for the same reason too it cannot be the second. If it was for the latter end [the advantage of another,] it would be equally incongruous, for who would call that being 'wise' who busied himself in acting for another? If you replied that his activity was justified by compassion, any one would at once retort that this feeling of compassion should have rather induced him

* If God is known, then His existence must be granted,—if He is not known, how can we argue about Him? I read lines 15, 16 in p. 120 of the Calcutta edition विकल्पपराहतत्वात् and then begin the next clause with स्यादेतत्. The printed text—विकल्पपराहतः स्यात् । तदेतत् seems unintelligible.

कृतसुकृतदुष्कृतपरिपाकविशेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्वाहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमस्तत्र प्रमाणम् । यद्येवं तर्हि परस्पराश्रयबाधयाधिं समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा । नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वे ऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वे ऽपि तस्यान्यतो ऽवगमात् नापि तदनित्यत्वज्ञप्तौ आगमानित्यत्वस्य तीव्रादिधर्म्मोपेतत्वादिना सुगमत्वात् ।

तस्मान्निर्वर्त्तकधर्म्मानुष्ठानवशादीश्वरप्रसादसिद्धावभिमतेष्टसिद्धिरिति सर्व्वमवदातम् ॥

इति सर्व्वदर्शनसंग्रहे अक्षपाददर्शनम् ॥

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7. DECEMBER 1st 1877. Vol. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1877.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अच्छरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

॥ सप्तमाध्यायस्य तृतीयः पादः ॥

अतो दीर्घो यञि ॥ १०१ ॥

अकारान्तस्याङ्गस्य दीर्घो भवति यञादौ सार्वधातुके परतः। पचामि। पचावः। पचामः। पक्ष्यामि। पक्ष्यावः। पक्ष्यामः। अत इति किम्। चिनुवः। चिनुमः। यञीति किम्। पचतः। पचथः। सार्वधातुकइत्येव। अङ्गना, केशवः। के चिदत्र तिङीत्यनुवर्त्तयन्ति, तेषां भववानिति कृतो सार्वधातुकदीर्घो न भवति॥

सुपि च ॥ १०२ ॥

अतो दीर्घो यञीत्यनुवर्त्तते। सुपि च यञादौ परतोऽकारान्तस्याङ्गस्य दीर्घो भवति। वृक्षाय। प्लक्षाय। वृक्षाभ्याम्। प्लक्षाभ्याम्। अत इत्येव। अग्निभ्याम् *। यञीत्येव। वृक्षस्य। प्लक्षस्य॥

बहुवचने झल्येत् ॥ १०३ ॥

बहुवचने झलादौ सुपि परतो ऽकारान्तस्याङ्गस्य एकारादेशो भवति। वृक्षेभ्यः। प्लक्षेभ्यः। वृक्षेषु। प्लक्षेषु। बहुवचनइति किम्। वृक्षाभ्याम्। प्लक्षाभ्याम्। झलीति किम्। वृक्षाणाम्। सुपीत्येव। पचध्वम्। पचध्वम्॥

ओसि च ॥ १०४ ॥

ओसि परतोऽकारान्तस्याङ्गस्य एकारादेशो भवति। वृक्षयोः स्वम्। प्लक्षयोः स्वम्। वृक्षयोर्निधेहि। प्लक्षयोर्निधेहि॥

आङि चापः ॥ १०५ ॥

आङिति पूर्वाचार्यनिर्देशेन तृतीयैकवचनं गृह्यते। तस्मिन्नाङि परतश्चकारादोसि च आबन्तस्याङ्गस्यैकारादेशो भवति। खट्वया। माल-

---

* वायुभ्यामित्यधिकं पुस्तकान्तरे।

या । खट्वयोः । मालयोः । बहुराजया । कारीषगन्ध्यया । बहुराजयोः । कारीषगन्ध्ययोः । आप इति किम् पित्रा वस्त्रं किम् । कीलालपा ब्राह्मणेन । कीलालपोर्ब्राह्मणकुलयोः । ङ्याब्ग्रहणे ऽदीर्घग्रहणमिति वचनादिह न भवति । अतिखट्वेन ब्राह्मणकुलेन ॥

संबुद्धौ च ॥ १०६ ॥

आप इति वर्त्तते । संबुद्धौ च परत आबन्तस्याङ्गस्य एत्वं भवति । हे खट्वे । हे बहुराजे । हे कारीषगन्ध्ये ॥

अम्बार्थनद्योर्ह्रस्वः ॥ १०७ ॥

संबुद्धाविति वर्त्तते । अम्बार्थानामङ्गानां नद्यन्तानां ह्रस्वो भवति संबुद्धौ परतः । हे अम्ब । हे अक्क । हे अल्ल । नद्याः खल्वपि । हे कुमारि । हे शार्ङ्गरवि । हे ब्रह्मबन्धु । हे वीरबन्धु ॥ डलकवतीनां प्रतिषेधो वक्तव्यः ॥ * ॥ हे अम्बाडे । हे अम्बाले । हे अम्बिके ॥ छन्दसि वेति वक्तव्यम् ॥ * ॥ हे अम्बाड । हे अम्बाडे । हे अम्बाल । हे अम्बाले । हे अम्बिक । हे अम्बिके ॥ ततो ह्रस्वो वा डिसंबुद्ध्यो रिति वक्तव्यम् ॥ * ॥ देवते भक्तिः । देवतायां भक्तिः । हे देवत । हे देवते ॥ छन्दस्येव ह्रस्वत्वमिष्यते ॥ मातृणां मातच् पुत्रार्थमर्हते ॥ * ॥ मातृणां मातजादेशो वक्तव्यः संबुद्धौ पुत्राय पुत्रमभिधातुं. कीदृशाय, अर्हते । मात्रा व्यपदेशमर्हति श्लाघनीयत्वाद्यः पुत्रस्तदर्थम् । हे गार्गीमात । नद्यृतश्चेति समासान्तापवादो मातजादेशः, चित्करणमन्तोदात्तार्थम् ॥

ह्रस्वस्य गुणः ॥ १०८ ॥

संबुद्धाविति वर्त्तते । ह्रस्वान्तस्याङ्गस्य गुणो भवति संबुद्धौ परतः । हे अग्ने । हे वायो । हे पटो । हे कुमारि, हे ब्रह्मबन्धु, इत्येवमादीनां ह्रस्वविधानसामर्थ्याद्गुणो न भवति । यदि गुण इष्टः स्यात् । अम्बार्थानां ह्रस्व इत्युक्त्वा नद्योह्रस्वयोर्गुण इत्येवं ब्रूयात् ॥

जसि च ॥ १०९ ॥

जसि परतो ह्रस्वान्तस्याङ्गस्य गुणो भवति । अग्नयः । वायवः । पटवः । धेनवः । बुद्धयः ॥ जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधाया ह्रस्व इत्येतस्मात् ॥ * ॥ इतः प्रकरणात् प्रभृति छन्दसि वेति वक्तव्यम् । किं प्रयोजनम् । अम्बे दर्वि शतक्रत्वः पश्वे नृभ्यः किकिदीव्या । अम्बे । अम्ब । पूर्वो दर्वि । पूर्वो दर्वे । पश्वा शतक्रत्वः । शतक्रतवः । पश्वे नृभ्यः । पशवे नृभ्यः । किकिदीव्या । किकिदीविना ॥

ऋतो ङिसर्वनामस्थानयोः ॥ ११० ॥

गुण इति वर्त्तते । ऋकारान्तस्याङ्गस्य ङौ परतः सर्वनामस्थाने च गुणो भवति । ङौ । मातरि । पितरि । भ्रातरि । कर्त्तरि । सर्वनामस्थाने । कर्त्तारौ । कर्त्तारः । मातरौ । पितरौ । भ्रातरौ * ॥

घेर्ङिति ॥ १११ ॥

घ्यन्तस्याङ्गस्य ङिति प्रत्यये परतो गुणो भवति । अग्नये । वायवे । अग्नेरागच्छति । वायोरागच्छति । अग्नेः स्वम् । वायोः स्वम् । घेरिति किम् । सख्ये । पत्ये । ङितीति किम् । अग्निभ्याम् । सुपीत्येव । पट्वी । कुरुतः ॥

आण्नद्याः ॥ ११२ ॥

नद्यन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्याडागमो भवति । कुमार्यै । ब्रह्मबन्ध्वै । कुमार्याः । ब्रह्मबन्ध्वाः ॥

याडापः ॥ ११३ ॥

आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य याडागमो भवति । खट्वायै । बहुराजायै । कारीषगन्ध्यायै । खट्वायाः । कारीषगन्ध्यायाः । बहुराजायाः । अतिखट्वायेत्यत्राकृते दीर्घे ह्रस्वत्वे ऽदीर्घ इति वचनाद्याडागमो न भवति । कृते तु लाक्षणिकत्वात् ॥

---

* तपरकरणं मुखसुखार्थम् । इति पुस्तकान्तरे अधिकम् ।

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ११४ ॥

सर्वनाम्न आबन्तादङ्गादुत्तरस्य ङितः प्रत्ययस्य स्याडागमो ह्रस्वश्च भवति । सर्वस्यै । विश्वस्यै । यस्यै । तस्यै । कस्यै । सर्वस्याः । विश्वस्याः । यस्याः । तस्याः । कस्याः । अन्यस्यै । अन्यस्याः । आप इत्येव । भवति । भवते ॥

विभाषा द्वितीयातृतीयाभ्याम् ॥ ११५ ॥

द्वितीया तृतीया इत्येताभ्यामुत्तरस्य ङितः प्रत्ययस्य विभाषा स्याडागमो भवति । द्वितीयातृतीययोश्च ह्रस्वो भवति । द्वितीयस्यै । द्वितीयायै । तृतीयस्यै । तृतीयायै ॥

ङेराम्नद्याम्नीभ्यः ॥ ११६ ॥

नद्यन्तादाबन्तान्नीत्येतस्माच्चोत्तरस्य ङेरामित्ययमादेशो भवति । कुमार्याम् । गौर्याम् । ब्रह्मबन्ध्वाम् । धीबन्ध्वाम् । आपः । खट्वायाम् । बहुराजायाम् । कारीषगन्ध्यायाम् । नी । राजन्याम् । सेनान्याम् * ॥

इदुद्भ्याम् ॥ ११७ ॥

इकारोकाराभ्यां नदीसंज्ञकाभ्यामुत्तरस्य ङेरामादेशो भवति । कृत्याम् । धेन्वाम् ॥

औत् ॥ ११८ ॥

इदुद्भ्यामुत्तरस्य ङेरौकारादेशो भवति । यच्च नदीसंज्ञं नापि घिसंज्ञमिकारान्तं तदिहोदाहरणम् । सख्यौ । पत्यौ ॥

अच्च घेः ॥ ११९ ॥

औदिति वर्त्तते । घिसंज्ञकादुत्तरस्य ङेरौकारादेशो भवति तस्य च घेरकारादेशो भवति । अग्नौ । वायौ । कृतौ । धेनौ । पटौ । अदिति तपरकरणं स्त्रियां टापो निवृत्त्यर्थम् । औदच्च घेरिति येषामेकमेवेदं सूत्रं ते प्रधानशिष्टमिदुद्भ्यामौत्त्वं वर्णयन्ति । अन्वाचयशिष्टं घेरकारमिति ॥

---

* ग्रामण्यामिति पुस्तकान्तरे ऽधिकम् ।

Digitized by Google

आङो नाऽस्त्रियाम् ॥ १२० ॥

घेरुत्तरस्याङो नाभावो भवति अस्त्रियाम् । अग्निना । वायुना । पटुना । पुंसि इति नोक्तममुना ब्राह्मणकुलेन । अस्त्रियामिति किम् । कृत्या । धेन्वा ॥

॥ इति काशिकायां वृत्तौ सप्तमाध्यायस्य तृतीयः पादः ॥

॥ सप्तमाध्यायस्य चतुर्थः पादः ॥

णौ चङ्युपधाया ह्रस्वः ॥ १ ॥

अङ्गस्येति वर्तते । चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वो भवति । अचीकरत् । अजीहरत् । अलीलवत् । अपीपठत् । अत्र द्विर्वचनोपधाह्रस्वत्वयोः प्राप्तयोः परत्वादुपधाह्रस्वत्वं तत्र कृते द्विर्वचनम् । इह तु मा भवानटिटदिति नित्यत्वाद् द्वितीयस्य द्विर्वचनं प्राप्नोति तथा सति ह्रस्वभाविनोऽङ्गस्याकारस्योपधात्वं विहितमिति ह्रस्वो न स्यात् । नैष दोषः । ओणोर्ऋदित्करणं ज्ञापकं नित्यमपि द्विर्वचनमुपधाह्रस्वत्वेन बाध्यतइति । णाविति किम् । चङ्युपधाया ह्रस्व इत्युच्यमाने ऽलीलवदित्यत्र वचनसामर्थ्यादन्तरङ्गामपि वृद्धिमादेशं च बाधित्वा ह्रस्वः स्यात् । अदीदपदित्यत्र ह्रस्वत्वेन पुको बाधः स्यात् । अपीपचदित्येवमादौ तु नैव स्यात् । चङीति किम् । कारयति । हारयति । उपधाया इति किम् । अचकाङ्क्षत् । अववाञ्छत् । तदेतदुपधाग्रहणमुत्तरार्थमवश्यं कर्तव्यं तदिहापि ह्रस्वत्वं निवर्तयतीत्येवमर्थं येन नाव्यवधानमित्येतन्नाश्रयितव्यमिति ॥ उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् * ॥ * ॥ वादितवन्तं प्रयोजितवान् । अवीवदद्वीणां परिवादकेन । योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावेनाग्लोपित्वाद्वाङ्गस्य ह्रस्वो न प्राप्नोति । यथाकृतिनिर्देशात् सिद्धम् ॥

* णौ णिच्युपसंख्यानमिति पाठान्तरम् । णौ परतो यो णिस्तस्मिन्नित्यर्थः ।

नाग्लोपिशास्वृदिताम् ॥ २ ॥

अग्लोपिनामङ्गानां शास्वृदितां च णौ चङ्युपधाया ह्रस्वो न भवति । अग्लोपिनां तावत् । मालामाख्यत् । अममालत् । मातरमाख्यत् । अममातरत् । राजानमतिक्रान्तवान् । अत्यरराजत् । लोमान्यनुमृष्टवान् । अन्वलुलोमत् । अगेव यत्र केवलो लुप्यते तत्र स्थानिवद्भावादपि सिद्धम् । हलचोरादेशे तु न सिद्ध्यतीति तदर्थमेतद्वचनम् । शास् । अशशासत् । ऋदिताम् । बाधृ । अबबाधत् । याचृ । अययाचत् । ढौकृ । अडुढौकत् ॥

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥ ३ ॥

भ्राज भास भाष दीप जीव मील पीड इत्येतेषामङ्गानां णौ चङ्युपधाया ह्रस्वो भवत्यन्यतरस्याम् । भ्राज । अबिभ्रजत् । अबभ्राजत् । भास । अबभासत् । अबीभसत् । भाष । अबभाषत् । अबीभषत् । दीप । अदिदीपत् । अदीदिपत् । जीव । अजीजिवत् । अजिजीवत् । मील । अमिमीलत् । अमीमिलत् । पीड । अपिपीडत् । अपीपिडत् । भाषभासोर्ऋदित्करणमपाणिनीयम् ॥ काण्यादीनां वेति वक्तव्यम् ॥ * ॥ अचकाणत् । अचीकणत् । अववाणत् । अवीवणत् ॥

लोपः पिबतेरीच्चाभ्यासस्य ॥ ४ ॥

पिबतेरङ्गस्य णौ चङ्युपधाया लोपो भवति अभ्यासस्येकारादेशो भवति । अपीप्यत् । अपीप्यताम् । अपीप्यन् । उपधालोपे कृते णेः पृथग्वचनं ज्ञापकं णौ स्थानिवद्भावस्येति स्थानिवद्भावाद् द्विर्वचनम् ॥

तिष्ठतेरित् ॥ ५ ॥

तिष्ठतेरङ्गस्य णौ चङ्युपधाया इकारादेशो भवति । अतिष्ठिपत् । अतिष्ठिपताम् । अतिष्ठिपन् ॥

जिघ्रतेर्वा ॥ ६ ॥

जिघ्रतेरङ्गस्य णौ चङ्युपधाया इकारादेशो वा भवति । अजि-

Digitized by Google

घ्रिपत् । अजिघ्रिपताम् । अजिघ्रिपन् । अजिघ्रपत् । अजिघ्रपताम् । अजिघ्रपन् ॥

उर्ऋत् ॥ ७ ॥

णौ चङ्युपधाया ऋवर्णस्य स्थाने वा ऋकारादेशो भवति । इररारामपवादः । इर् । अचिकीर्तत् । अचीकृतत् । अर् । अववर्तत् । अवीवृतत् । आर् । अममार्जत् । अमीमृजत् । वचनसामर्थ्यादन्तरङ्गा अपि इररारो बाध्यन्ते । तपरकरणं दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यात् । अचीकृतदिति । न चायं भाव्यमानः किं तु आदेशान्तरनिवृत्त्यर्थं स्वरूपमेवैतदभ्यनुज्ञायते ॥

नित्यं छन्दसि ॥ ८ ॥

छन्दसि विषये णौ चङ्युपधाया ऋवर्णस्य स्थाने ऋकारादेशो भवति नित्यम् । अवीवृधत्पुरोडाशेन । अवीवृधताम् । अवीवृधन् ॥

दयतेर्दिगि लिटि ॥ ९ ॥

दयतेरङ्गस्य लिटि परतो दिगीत्ययमादेशो भवति । अवदिग्ये । अवदिग्याते । अवदिग्यिरे । दयतेरिति दीङो ग्रहणं न तु दय दानइत्यस्य । तस्य हि लिट्याम्विहितः ॥ दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यते ॥

ऋतश्च संयोगादेर्गुणः ॥ १० ॥

ऋकारान्तस्याङ्गस्य संयोगादेर्गुणो भवति लिटि परतः । स्वृ । सस्वरतुः । सस्वरुः । ध्वृ । दध्वरतुः । दध्वरुः । स्मृ । सस्मरतुः । सस्मरुः । ऋत इति किम् । चिक्षियतुः । चिक्षियुः । संयोगादेरिति किम् । चक्रतुः । चक्रुः । प्रतिषेधविषयेऽपि गुणो यथा स्यादित्ययमारम्भः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । सस्वार । सस्मार । लिटीत्येव । स्मृतः । स्मृतवान् ॥ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थं कर्त्तव्यम् ॥ * ॥ संचस्करतुः, संचस्करुः । इत्यत्र हि पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्यत्र दर्शने लिटि कृते तदाश्रये च द्विर्वचने पश्चादुपसर्गयोगे सत्यडभ्यासव्यवायेऽपीति सुट् क्रियते । एवं च कृत्वा संस्कृषीष्ट

उपस्कर्षीष्टेत्यत्र सुटो बहिरङ्गलक्षणस्यासिद्धत्वादृतश्च संयोगादेरिति इडागमो न भवति ॥

ऋच्छत्यॄताम् ॥ ११ ॥

ऋच्छतेरङ्गस्य ऋ इत्येतस्य ॠकारान्तानां च लिटि परतो गुणो भवति । ऋच्छ । आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । ऋ । आरतुः । आरुः । ॠकारान्तानाम् । निचकरतुः । निचकरुः । निजगरतुः । निजगरुः । ऋच्छेरलघूपधत्वादप्राप्तो गुणो विधीयते । ऋतां तु प्रतिषिद्धः । वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते । निचकार । निजगार ॥

शॄदॄप्रां ह्रस्वो वा ॥ १२ ॥

शॄ दॄ पॄ इत्येतेषामङ्गानां लिटि परतो वा ह्रस्वो भवति । विशश्रतुः । विशश्रुः । विशशरतुः । विशशरुः । विदद्रतुः । विदद्रुः । विददरतुः । विददरुः । निपप्रतुः । निपप्रुः । निपपरतुः । निपपरुः । ह्रस्ववचनमित्त्वोत्त्वनिवृत्त्यर्थम् । केचिदेतत्सूत्रं प्रत्याचक्षते । श्रा पाके द्रा कुत्सायां प्रा पूरणे इत्येतेषामनेकार्था धातव इति शॄदॄप्रामर्थे वर्तमानानां विशश्रतुः विशश्रुः विदद्रतुः विदद्रुः निपप्रतुः निपप्रुः, इत्येतानि रूपाणि साधयन्ति । तथा च सति क्वसौ विशश्रवानित्येतद्रूपं न स्यात् ॥

केऽणः ॥ १३ ॥

के प्रत्यये परतोऽणो ह्रस्वो भवति । ज्ञका । कुमारिका । किशोरिका । अणः इति किम् । गोका । नौका । राका धाकेत्यत्र उणादयो बहुलमिति ह्रस्वो न भवति । न कपीतिप्रतिषेधसामर्थ्यात्कनोपि सानुबन्धकस्य ग्रहणमिह भवति ॥

न कपि ॥ १४ ॥

कपि प्रत्यये परतोऽणो ह्रस्वो न भवति । बहुकुमारीकः । बहुवधूकः । बहुलक्ष्मीकः । गोस्त्रियोरुपसर्जनस्येत्ययमपि ह्रस्वः कपि न भवति । समासार्थे ह्युत्तरपदे कपि कृते पश्चात्समासेन भवितव्यमिति स्त्रीप्रत्ययान्तसमासप्रातिपदिकं न भवति ॥

Digitized by Google

आपोऽन्यतरस्याम् ॥ १५ ॥

आबन्तस्याङ्गस्य कपि ह्रस्वो न भवत्यन्यतरस्याम् । बहुखट्वाकः । बहुखट्वकः । बहुमालकः । बहुमालाकः ॥

ऋदृशोऽङि गुणः ॥ १६ ॥

ऋवर्णान्तानां दृशेश्च अङि परतो गुणो भवति । शकलाङ्गुष्ठकोऽकरत् । अहं तेभ्योऽकरं नमः । असरत् । आरत् । जरा । दृशेः । अदर्शत् । अदर्शताम् । अदर्शन् ॥

अस्यतेस्थुक् ॥ १७ ॥

अस्यतेरङ्गस्य थुगागमो भवत्यङि परतः । आस्थत् । आस्थताम् । आस्थन् ॥

श्वयतेरः ॥ १८ ॥

श्वयतेरङ्गस्याकारादेशो भवत्यङि परतः । अश्वत् । अश्वताम् । अश्वन् ॥

पतः पुम् ॥ १९ ॥

पतेरङ्गस्य पुमागमो भवत्यङि परतः । अपप्तत् । अपप्तताम् । अपप्तन् ॥

वच उम् ॥ २० ॥

वचेरङ्गस्य अङि परत उमागमो भवति । अवोचत् । अवोचताम् । अवोचन् ॥

शीङः सार्वधातुके गुणः ॥ २१ ॥

शीङोऽङ्गस्य सार्वधातुके परतो गुणो भवति । शेते । शयाते । शेरते । सार्वधातुकइति किम् । शिश्ये ॥

अयङ् यि क्ङिति ॥ २२ ॥

यकारादौ क्ङिति प्रत्यये परतः शीङोऽङ्गस्यायङित्ययमादेशो भवति । शय्यते । शाशय्यते । प्रशय्य । उपशय्य । यीति किम् । शिश्ये । क्ङितीति किम् । शेयम् ॥

उपसर्गाद्ध्रस्व ऊहतेः ॥ २३ ॥

उपसर्गादुत्तरस्य ऊहतेरङ्गस्य ह्रस्वो भवति यकारादौ क्ङिति प्रत्यये परतः । समुह्यते । समुह्य गतः । अभ्युह्यते । अभ्युह्य गतः । उपसर्गादिति किम् । ऊह्यते । ऊहतेरिति किम् । समीह्यते । यीत्येव । समूहितम् । क्ङितीत्येव । अभ्यूह्योऽयमर्थः । अण इत्येव । आ ऊह्यते । ओह्यते । समोह्यते ॥

एतेर्लिङि ॥ २४ ॥

एतेरङ्गस्योपसर्गादुत्तरस्य लिङि यकारादौ क्ङिति परतो ह्रस्वो भवति । उदियात् । समियात् । अन्वियात् । आशिषि लिङि अकृत्सार्वधातुकयोरिति दीर्घत्वे कृते ह्रस्वोऽनेन भवति । उपसर्गादित्येव । ईयात् । अण इत्येव आ ईयात् । एयात् । समेयात् ॥

अकृत्सार्वधातुकयोर्दीर्घः ॥ २५ ॥

अकृद्यकारे असार्वधातुकयकारे च क्ङिति परतोऽजन्तस्याङ्गस्य दीर्घो भवति । भृशायते । सुखायते । दुःखायते । चीयते । चेचीयते । स्तूयते । तोष्टूयते । चीयात् । स्तूयात् । अकृदिति किम् । प्रकृत्य । प्रहृत्य । परत्वाद्दीर्घत्वेन तुको बाधः स्यात् । असार्वधातुक इति किम् । चिनुयात् । सुनुयात् । क्ङितीत्येव । उरुया । धृष्णुया ॥

च्वौ च ॥ २६ ॥

च्विप्रत्यये परतोऽजन्तस्याङ्गस्य दीर्घो भवति । शुचीकरोति । शुचीभवति । शुचीस्यात् । पटूकरोति । पटूभवति । पटूस्यात् ॥

रीङ् ऋतः ॥ २७ ॥

ऋकारान्तस्याङ्गस्य अकृद्यकारे ऽसार्वधातुके यकारे च्वौ च परतो रीङित्ययमादेशो भवति । मात्रीयति । मात्रीयते । पित्रीयते । चेक्रीयते । मात्रीभूतः । क्ङितीत्येतन्निवृत्तं, तेनेहापि भवति । पितुरागतं पित्र्यम् । ऋत इति तपरकरणं किम् । चेकीर्यते । निजेगिल्यते ॥

रिङ् शयग्लिङ्क्षु ॥ २८ ॥

ऋकारान्तस्याङ्गस्य श यक् इत्येतयोर्लिङि च यकारादावसार्वधातुके परतो रिङित्ययमादेशो भवति । श । आद्रियते । आध्रियते । यक् । क्रियते । ह्रियते । लिङ् । क्रियात् । ह्रियात् । असार्वधातुक इत्येव । बिभृयात् । यीत्येव । कृषीष्ट । हृषीष्ट ॥

गुणोऽर्त्तिसंयोगाद्योः ॥ २९ ॥

अतो यकि लिङि इति वर्त्तते । शइत्यचासंभवान्नानुवर्त्तते । गुणो भवत्यर्त्तेः संयोगादीनामृकारान्तानां यकि परतो लिङि च यकारादावसार्वधातुके । अर्यते । अर्यात् । स्मर्यते । स्मर्यात् । इह संस्क्रियते, संस्क्रियादिति सुटो बहिरङ्गलक्षणस्यासिद्धत्वादभक्तत्वाद्वा संयोगादित्वमङ्गस्य नास्तीति गुणो न प्रवर्त्तते । यीत्येव । स्मृषीष्ट । ध्वृषीष्ट । असार्वधातुक इत्येव । इयृयात् ॥

यङि च ॥ ३० ॥

यङि च परतो अर्त्तेः संयोगादेश्च ऋतो गुणो भवति । अरार्यते । सास्वर्यते । दाध्वर्यते । सास्मर्यते । अर्त्तेरट्यर्त्त्यशूर्णोतीनामुपसंख्यानमिति यङ् ॥ न न्द्राः संयोगादय इति द्विर्वचनप्रतिषेधो यकारपरस्य नेष्यते ॥ हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः ॥ * ॥ जेघ्नीयते । हिंसायामिति किम् । जङ्घन्यते ॥

ई घ्राध्मोः ॥ ३१ ॥

घ्रा ध्मा इत्येतयोर्यङि परत ईकारादेशो भवति । जेघ्रीयते । देध्मीयते ॥

अस्य च्वौ ॥ ३२ ॥

ई इति वर्त्तते । अवर्णान्तस्याङ्गस्य च्वौ परत ईकारादेशो भवति । शुक्लीभवति । शुक्लीस्यात् । खट्वीकरोति । खट्वीस्यात् ॥

क्यचि च ॥ ३३ ॥

अस्येति वर्त्तते । क्यचि परतोऽवर्णान्तस्याङ्गस्य ईकारादेशो भवति । पुत्रीयति । घटीयति । खट्वीयति । मालीयति । अकृत्सार्वधातुकयोर्दीर्घ इत्यस्यापवादः । पृथग्योगकरणमुत्तरार्थम् ॥

अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु ॥ ३४ ॥

अशनाय उदन्य धनाय इत्येतानि निपात्यन्ते बुभुक्षा पिपासा गर्द्ध इत्येतेष्वर्थेषु । अशनायेत्यशनशब्दस्यात्वं क्यचि निपात्यते । अशनायतीति भवति बुभुक्षा चेत् । अशनीयतीत्येवान्यत्र । उदन्येति उदकशब्दस्य उदन्नादेशो निपात्यते । उदन्यतीति भवति पिपासा चेत् । उदकीयतीत्येवान्यत्र । धनायेति धनशब्दस्यात्वं निपात्यते । धनायतीति भवति गर्द्धश्चेत् । धनीयतीत्येवान्यत्र ॥

नच्छन्दस्यपुत्रस्य ॥ ३५ ॥

छन्दसि विषये पुत्रवर्जितस्यावर्णान्तस्याङ्गस्य क्यचि यदुक्तं तन्न भवति । किं चोक्तं, दीर्घत्वमीत्वं च । मित्रयुः । पुत्रयुः । संस्वेदयुः । देवाञ्जिगाति सुम्नयुः । अपुत्रस्येति किम् । पुत्रीयन्तः सुदानवः ॥ अपुत्रादीनामिति वक्तव्यम् ॥ * ॥ जनीयन्तोऽन्वग्रवः ॥

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ॥ ३६ ॥

दुरस्युः द्रविणस्युः वृषण्यति रिषण्यति एतानि छन्दसि निपात्यन्ते । दुष्टशब्दस्य क्यचि दुरस्भावो निपात्यते । अवियोना दुरस्युः । दुष्टीयतीति प्राप्ते । द्रविणशब्दस्य द्रविणस्भावो निपात्यते । द्रविणस्युर्विपन्यया । द्रविणीयतीति प्राप्ते । वृषशब्दस्य वृषणभावो निपात्यते । वृषण्यति । वृषीयतीति प्राप्ते । रिष्टशब्दस्य रिषणभावो निपात्यते । रिषण्यति । रिष्टीयतीति प्राप्ते ॥

अश्वाघस्यात् ॥ ३७ ॥

अश्व अघ इत्येतयोः क्यचि परतः छन्दसि विषये आकारादेशो भवति । अश्वायन्तो मघवन् । मा त्वा वृका अघायवो विदन् । एतदेवात्त्ववचनं ज्ञापकं नच्छन्दस्यपुत्रस्येति दीर्घप्रतिषेधो भवतीति ॥

Digitized by Google

देवसुम्नयोर्यजुषि काठके ॥ ३८ ॥

देव सुम्न इत्येतयोः क्यचि परत आकारादेशो भवति यजुषि काठके। देवायन्तो यजमानाय। सुम्नायन्तो हवामहे। यजुषीति किम्। देवाञ्जिगाय सुम्नयुः। काठकइति किम्। सुम्नयुरिदमासीत् ॥

कव्यध्वरपृतनस्यर्चि लोपः ॥ ३९ ॥

कवि अध्वर पृतना इत्येतेषामङ्गानां क्यचि परतो लोपो भवति ऋचि विषये। कव्यन्तः सुमनसः। अध्वर। अध्वर्यन्तः। पृतन्यन्तस्तिष्ठन्ति ॥

द्यतिस्यतिमास्थामित्ति किति ॥ ४० ॥

द्यति स्यति मा स्था इत्येतेषामङ्गानामिकारादेशो भवति तकारादौ किति प्रत्यये परतः। द्यति। निर्दितः। निर्दितवान्। स्यति। अवसितः। अवसितवान्। मा। मितः। मितवान्। स्था। स्थितः। स्थितवान्। तीति किम्। अवदाय। कितीति किम्। अवदाता ॥

शाछोरन्यतरस्याम् ॥ ४१ ॥

शा छा इत्येतयोरन्यतरस्यामिकारादेशो भवति तकारादौ किति। शा। निशितम्। निशातम्। निशितवान्। निशातवान्। अवच्छितम्। अवच्छातम्। अवच्छितवान्। अवच्छातवान् ॥ श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम् ॥ * ॥ संशितो ब्राह्मणः। संशितव्रत इत्यर्थः। व्यवस्थितविभाषाविज्ञानात्सिद्धम्।

देवत्रातो गलो ग्राह इतियोगे च सद्विधिः।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ॥

दधातेर्हिः ॥ ४२ ॥

दधातेरङ्गस्य हीत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः। हितः। हितवान्। हित्वा ॥

जहातेश्च क्त्वि ॥ ४३ ॥

जहातेरङ्गस्य हीत्ययमादेशो भवति क्त्वाप्रत्यये परतः। हित्वा राज्यं वनं गतः। हित्वा गच्छति। जहातेर्निर्दुशाज्जिहीतेर्न भवति। हात्वा॥

विभाषा छन्दसि॥ ४४॥

जहातेरङ्गस्य विभाषा हीत्ययमादेशो भवति छन्दसि विषये क्त्वाप्रत्यये परतः। हित्वा शरीरं यातव्यम्। हात्वा *।

सुधितवसुधितनेमधितधिष्वधिषीय च॥ ४५॥

सुधित वसुधित नेमधित धिष्व धिषीय इत्येतानि छन्दसि विषये निपात्यन्ते। तत्र सुधित वसुधित नेमधित इति सुवसुनेमपूर्वस्य दधातेः क्तप्रत्यये इत्वमिडागमो वा प्रत्ययस्य निपात्यते। गर्भं माता सुधितम्। सुहितमिति प्राप्ते। वसुधितमग्नौ जुहोति। वसुहितमिति प्राप्ते। नेमधिता बाधन्ते। नेमहिता इति प्राप्ते। धिष्वेति लोण्मध्यमैकवचने दधातेरित्वमिडागमो वा प्रत्ययस्य द्विर्वचनाभावश्च निपात्यते। धिष्व सोमम्। धत्स्वेति प्राप्ते। धिषीयेति आशीर्लिङ्यात्मनेपदोत्तमैकवचने दधातेरित्वमिडागमो वा प्रत्ययस्य निपात्यते। धिषीयेति। धासीयेति प्राप्ते॥

दो दद् घोः॥ ४६॥

दा इत्येतस्य घुसंज्ञकस्य ददित्ययमादेशो भवति तकारादौ किति प्रत्यये परतः। दत्तः। दत्तवान्। दत्तिः। द इति किम्। धीतः। धीतवान्। धेट एतद्रूपम्। घोरिति किम्। दाप् लवने। दातं बर्हिः। दैप् शोधने। अवदातं मुखम्॥ अयमादेशः स्थानइष्यते॥ एवं ह्युक्तम्। तान्ते दोषो दीर्घत्वं स्याद्दान्ते दोषो निष्ठानत्वम्। धान्ते दोषो धत्वप्राप्तिस्थान्ते ऽदोषस्तस्मात्थान्तम्॥ यदि तु दत्तोति तकारादौ दीर्घत्वं तदा तान्तेऽप्यदोषः। दान्तधान्तयोरपि सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति नत्वधत्वे न भविष्यत इति न दोषः॥

---

* छान्दसत्वादीत्वाभाव इति पदमञ्जरी।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

अच उपसर्गात्त इति प्राप्ते निपात्यन्ते । अनुपसर्गा वा एते अवादयः क्रियान्तरविषया वेदितव्याः ॥

अच उपसर्गात्तः ॥ ४७ ॥

अजन्तादुपसर्गादुत्तरस्य दा इत्येतस्य घुसंज्ञकस्य त इत्ययमादेशो भवति तकारादौ किति । प्रत्तम्, अवत्तं, नीत्तं, परीत्तम् । अच इति किम् । निर्दत्तम् । दुर्दत्तम् । उपसर्गादिति किम् । दधि दत्तम् । मधु दत्तम् । घोरित्येव । अवदातं मुखम् । उपसर्गादिति पञ्चमीनिर्देशादादेरलः प्राप्नोति । तत्र समाधिमाहुः । अच इत्येतदावर्त्यते । तत्रैकं पञ्चम्यन्तमुपसर्गविशेषणार्थं, अपरमपि षष्ठ्यन्तं स्थानिनिर्देशार्थमित्याकारस्य स्थाने तकारो भवति । द्वितकारो वा संयोगो ऽयमादिश्यते । सोनेकाल्त्वात्सर्वस्य भविष्यति । अपो भीत्यत्र पञ्चम्यन्तमच इत्यनुवर्त्तते । तेन पकारमात्रस्य भविष्यति ॥ द्यतेरित्यादयस्त इत्येतद्भवति विप्रतिषेधेन ॥ * ॥ अवत्तम् । प्रत्तं जुहोति ॥

अपो भि ॥ ४८ ॥

अप् इत्येतस्याङ्गस्य भकारादौ प्रत्यये परतस्त इत्ययमादेशो भवति । अद्भिः । अद्भ्यः । भीति किम् । अप्सु ॥ स्ववःस्वतवसोर्मास उषसश्च तकारादेश इष्यते छन्दसि भकारादौ ॥ स्ववद्भिः । स्वतवद्भिः । माद्भिष्ट इन्द्रो वृत्रहा । समुषद्भिरजायथाः ॥

सः स्यार्द्धधातुके ॥ ४९ ॥

सकारान्तस्याङ्गस्य सकारादावार्द्धधातुके परतस्तकारादेशो भवति । वत्स्यति । अवत्स्यत् । विवत्सति । जिघत्सति । स इति किम् । वक्ष्यति । सीति किम् । घासः । वासः । आर्द्धधातुक इति किम् । आस्से । वस्से ॥

तासस्त्योर्लोपः ॥ ५० ॥

तासेरस्तेश्च सकारस्य सकारादौ प्रत्यये लोपो भवति । तासे: । कर्त्तासि । कर्त्तासे । अस्ते: । त्वमसि । व्यतिसे । अस्तेरकारसकारयोर्लुप्तयोः से इति प्रत्ययमात्रमेतत्पदम् । तेन शात्पदाद्योरिति षत्वं न भवति ॥

रि च ॥ ५१ ॥

रेफादौ च प्रत्यये परतः तासस्त्योः सकारस्य लोपो भवति । कर्त्तारौ । कर्त्तारः । अध्येतारौ । अध्येतारः । अस्तेर्लिटि । व्यतिरे ॥

ह एति ॥ ५२ ॥

तासस्त्योः सकारस्य हकारादेशो भवति एति परतः । कर्त्ताहे । अस्तेः । व्यतिहे ॥

यीवर्णयोर्दीधीवेव्योः ॥ ५३ ॥

यकारादाविवर्णादौ च परतो दीधीवेव्योर्लोपो भवति । यकारादौ । आदीध्य गतः । आवेव्य गतः । आदीध्यते । आवेव्यते । इवर्णादौ । आदीधिता । आवेविता । लिङि । आदीधीत । आवेवीत । यीवर्णयोरिति किम् । आदीध्यनम् । आवेव्यनम् ॥

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ५४ ॥

सनि प्रत्यये सकारादौ परतो मी मा घु रभ लभ शक पत पद इत्येतेषामङ्गानामचः स्थाने इसित्ययमादेशो भवति । मी इति मीनातिमिनोत्योर्द्वयोरपि ग्रहणमिष्यते । मित्सति । प्रमित्सति । मा इति गामादाग्रहणेष्वविशेषः । मित्सते । अपमित्सते । घु । दित्सति । धित्सति । रभ । आरिप्सते । लभ । आलिप्सते । शक । शिक्षति । पत । पित्सति । पद । प्रपित्सते । सनीति किम् । दास्यति । सीत्येव । पिपतिषति । तनिपतिदरिद्राणामुपसंख्यानमिति पतेरिडागमविकल्पः ॥ सनि राधो हिंसायामच इस्वक्तव्यः ॥ * ॥ प्रतिरित्सति । हिंसायामिति किम् । आरिरात्सति ॥

Digitized by Google

आप्ज्ञप्यृधामीत् ॥ ५५ ॥

आप् ज्ञपि ऋध इत्येतेषामङ्गानामच ईकारादेशो भवति सनि सकारादौ परतः। आप्। ईप्सति। ज्ञपि। ज्ञीप्सति। ऋध्। ईर्त्सति। ज्ञपेर्द्वावचौ तत्रयोः पूर्वविप्रतिषेधेन लोप इतरस्य त्वीत्वम्। सनीत्येव। प्राप्स्यति। सीत्येव। जिज्ञपयिषति। अर्द्दिधिषति। सनीवन्तर्द्धेति ज्ञपेर्ऋधेश्चेटो विकल्पः॥

दम्भ इच्च ॥ ५६ ॥

दम्भेरच इकारादेशो भवति चकारादीच्च सनि सकारादौ परतः। धीप्सति। धिप्सति। सीत्येव। दिदम्भिषति॥

मुचोकर्मकस्य गुणो वा ॥ ५७ ॥

मुचोऽकर्म्मकस्य गुणो वा भवति सनि सकारादौ परतः। हलन्ताच्चेति किस्त्वप्रतिषेधो विकल्प्यते। मोक्षते वत्सः स्वयमेव। मुमुक्षते वत्सः स्वयमेव। अकर्म्मकस्येति किम्। मुमुक्षति वत्सं देवदत्तः। कर्म्मकर्त्तरि मुचिरकर्म्मको भवति कर्म्मविशेषस्य वा विवक्षायाम्॥

अत्र लोपोऽभ्यासस्य ॥ ५८ ॥

यदेतत्प्रक्रान्तं सनि मीमेत्यादि मुचोऽकर्म्मकस्येति यावत्। अत्राभ्यासलोपो भवति। तदेतदाहृतम्। अभ्यासस्येत्येतच्चाधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः। इत उत्तरं यद्वक्ष्यामोऽभ्यासस्येत्येवं तद्वेदितव्यम्। वक्ष्यति। ह्रस्वः। डुढौकिषते। तुत्रौकिषते। सनि मीमाघुरभलभशकपतपदामच इस् अभ्यासलोपश्चेत्येवं सिद्धे यदत्र ग्रहणमिह क्रियते तद्विषयावधारणार्थमत्रैवाभ्यासलोपो भवति। सन्वद्भावविषये न भवति। अमीमपत्। अदीदपत्। सन्वल्लघुनि चङ्परइति सन्वद्भावात्प्राप्नोति। सर्वस्याभ्यासस्यायं लोप इष्यते। तदर्थमेव केचिदत्रग्रहणं वर्णयन्ति। नानर्थकेऽलोन्त्यविधिरित्यपरे सर्वस्य कुर्वन्ति॥

ह्रस्वः ॥ ५९ ॥

ह्रस्वो भवत्यभ्यासस्य । डुढौकिषते । तुत्रौकिषते । डुढौके । तुत्रौके । अडुढौकत् । अतुत्रौकत् ॥ अभ्यासस्यानचि ॥ * ॥ अभ्यासस्य यदुच्यते अनचि तद्भवतीति वक्तव्यम् । चराचरः । चलाचलः । पतापतः । वदावदः । हलादिः शेषो न भवति ॥

हलादिः शेषः ॥ ६० ॥

अभ्यासस्य हलादिः शिष्यते अनादिर्लुप्यते । जग्लौ । मम्लौ । पपाच । पपाठ । आट । आटतुः । आटुः । आदिशेषनिमित्तोयमनादेर्लोपो विधीयते । तत्राभ्यासजातेराश्रयणात्क्वचिदपि वर्त्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति । अपरे तु ब्रुवते । शेषशब्दोयं निवृत्त्या विशिष्टमवस्थानमाह । तदवस्थानमुक्तितो यद्यपि प्रधानमविधेयत्वात्तु तदप्रधानम् । निवृत्तिरेव तु विधेयत्वात्प्रधानम् । तत्रायमर्थोस्य जायते । अभ्यासस्यानादेर्हलो निवृत्तिर्भवतीति । सा किमित्यादेरविधेयां सतीमनिवृत्तिमपेक्षिष्यतइति ॥

शर्पूर्वाः खयः ॥ ६१ ॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते । अन्ये हलो लुप्यन्ते । चुश्चोतिषति । तिष्ठासति । पिस्पन्दिषते । शर्पूर्वा इति किम् । पपाच । खय इति किम् । सस्नौ ॥ खर्पूर्वाः खय इति वक्तव्यम् ॥ * ॥ उचिच्छिषतीत्यत्र उच्छेरन्तरङ्गत्वात्तुकि कृते द्विर्वचनं तत्र हलादिः शेषे सत्यभ्यासे तकारः श्रूयेत ॥

कुहोश्चुः ॥ ६२ ॥

अभ्यासस्य कवर्गहकारयोश्चवर्गादेशो भवति । चकार । चखान । जगाम । जघान । हकारस्य । जहार । जिहीर्षति । जहौ ॥

न कवतेर्यङि ॥ ६३ ॥

कवतेरभ्यासस्य यङि परतश्चुर्न भवति । कोकूयते उष्ट्रः । कोकूयते खरः । कवतेरिति विकरणनिर्देशः कौतेः कुवतेश्च निवृत्त्यर्थः । तयोश्चुत्वमेव भवति । चोकूयते । यङीति किम् । चुकुवे ॥

कृषेश्छन्दसि ॥ ६४ ॥

कृषेश्छन्दसि विषये यङि परतोऽभ्यासस्य चुर्न भवति। करीकृष्यते यज्ञकुणपः। छन्दसीति किम्। चरीकृष्यते कृषीवलः॥

दाधर्त्तिदर्धर्त्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ॥ ६५ ॥

दाधर्त्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते अलर्षि आपनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदत् भरिभ्रत् दविध्वतः दविद्युतत् तरित्रतः सरीसृपतं वरीवृजत् मर्मृज्य आगनीगन्ति इत्येतानि अष्टादश छन्दसि विषये निपात्यन्ते। दाधर्त्ति दर्धर्ति दर्धर्षीति धारयतेर्धृञो वा श्लौ यङ्लुकि वा अभ्यासस्य दीर्घत्वं णिलोपश्च। दाधर्त्ति। एवं दर्धर्ति। श्लौ रुगभ्यासस्य निपात्यते। तथा दर्धर्षीति। अत्र च यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम्। बोभूत्विति। भवतेर्यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते। नैतदस्ति प्रयोजनम्। अत्र भूसुवोस्तिङीति गुणाभावः सिद्धः। ज्ञापनार्थं तर्हि निपातनमेतत्। ज्ञापयति। अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवतीति। बोभोति। बोभवीति। तेतिक्ते। तिजेर्यङ्लुगन्तस्यात्मनेपदं निपात्यते। यङो ङित्त्वात्प्रत्ययलक्षणेनात्मनेपदं सिद्धमेव। ज्ञापनार्थं त्वात्मनेपदनिपातनमन्यत्र यङ्लुगन्तादात्मनेपदं न भवति। अलर्षीति। ऋयर्त्तेर्लटि सिपि अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते। सिपा निर्देशो तन्त्रं तिप्यपि दृश्यते अलर्त्ति दक्षः। आपनीफणदिति। फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीगिन्निपात्यते। संसनिष्यदिति। स्यन्देः संपूर्वस्य यङ्लुक् शतर्यवाभ्यासस्य निक् धातुसकारस्य षत्वं निपात्यते। न चास्य संपूर्वता तन्त्रं, अन्यत्रापि हि दृश्यते। आसनिष्यददिति। करिक्रदिति करोतेर्यङ्लुगन्तस्य शतरि चुत्वाभावोऽभ्यासक-

ऋकारस्य रिगागमो निपात्यते । कनिक्रददिति । क्रन्देर्लुङि च्लेरङादेशो द्विर्व-
चनमभ्यासस्य चुत्वाभावो निगागमश्च निपात्यते । तथा चास्य विवरणं
कृतम् । अक्रन्दीदिति भाषायाम् । भरिभ्रदिति बिभर्तेर्यङ्लुगन्तस्य शतरि
भृञामिदिति इत्त्वाभावो जश्त्वाभावोऽभ्यासस्य रिगागमो निपात्यते ।
दविध्वत इति ध्वरतेर्यङ्लुगन्तस्य शतरि जसि रूपमेतत् । अत्राभ्यास-
स्य विगागम ऋकारलोपश्च निपात्यते । दविध्वतो रश्मयः सूर्यस्य । दवि-
द्युतदिति द्युतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य संप्रसारणाभावो ऽत्त्वं
विगागमश्च निपात्यते । तरित्रत इति तरतेः शतरि श्लौ षष्ठ्येकवचने
ऽभ्यासस्य रिगागमो निपात्यते । सरीसृपतमिति सृपेः शतरि श्लौ द्वि-
तीयैकवचने ऽभ्यासस्य रीगागमो निपात्यते । वरीवृजदिति वृजेः शतरि
श्लौ रीगागमो निपात्यते ऽभ्यासस्य । मर्मृजेति मृजेर्लिटि णलि अभ्या-
सस्य रुगागमो धातोश्च युगागमो निपात्यते । ततो मृजेर्वृद्धिर्न भवत्यल-
घूपधत्वात् । लघूपधगुणे प्राप्ते वृद्धिरारभ्यते । आगनीगन्तीति आङ्पू-
र्वस्य गमेर्लटि श्लौ अभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते ।
वत्यन्ती वेदा गनीगन्ति कर्णम् । इतिकरणमेवंविधानामन्येषामप्युपसं-
ग्रहार्थम् ॥

उरत् ॥ ६६ ॥

ऋवर्णान्तस्याभ्यासस्याकारादेशो भवति । ववृते । ववृधे । न-
र्नर्ति । नरिनर्त्ति । नरीनर्त्ति । इत्येवमादावभ्यासविकारेषु अपवादा नो-
त्सर्गान्विधीन्बाधन्त इत्युरदत्त्वे कृते रुगादय आगमाः क्रियन्ते ॥

द्युतिस्वाप्योः संप्रसारणम् ॥ ६७ ॥

द्युति स्वापि इत्येतयोरभ्यासस्य संप्रसारणं भवति । विदिद्युतत् ।
विदिद्योतिषते । विदिद्युतिषते । विदेद्युत्यते । स्वापेः । सुष्वापयिषति ।
स्वापिर्ण्यन्तो गृह्यते तस्याभ्यासनिमित्तेन प्रत्ययेनानन्तर्ये सति संप्रसारण-
मिष्यते । इह न भवति । स्वापयतेर्ण्वुल् । स्वापकः । तस्मात्क्यचि
स्वापकीयति । स्वापकीयतेः सन् । सिस्वापकीयिषति ॥

व्यथो लिटि ॥ ६८ ॥

व्यथेर्लिटि परतोऽभ्यासस्य संप्रसारणं भवति । विव्यथे । विव्यथाते । विव्यथिरे । हलादिः शेषेण यकारस्य निवृत्तौ प्राप्तायां संप्रसारणं क्रियते । वकारस्य न संप्रसारणे संप्रसारणमिति प्रतिषिध्यते । लिटीति किम् । वाव्यथ्यते ॥

दीर्घ इणः किति ॥ ६९ ॥

इणोऽङ्गस्य योऽभ्यासस्तस्य दीर्घो भवति किति लिटि परतः । ईयतुः । ईयुः । इणो यणिति यणादेशे कृते स्थानिवद्भावाद्द्विर्वचनम् । कितीति किम् । इयाय । इययिथ ॥

अत आदेः ॥ ७० ॥

अभ्यासस्यादेरकारस्य दीर्घो भवति लिटि परतः । अतो गुणे पररूपत्वस्यापवादः । आट । आटतुः । आटुः । आदेरिति किम् । पपाच । पपाठ ॥

तस्मान्नुड् द्विहलः ॥ ७१ ॥

तस्मादतोऽभ्यासाद्दीर्घीभूतादुत्तरस्य द्विहलोऽङ्गस्य नुडागमो भवति । आनङ्ग । आनङ्गतुः । आनङ्गुः । आनञ्ज । आनञ्जतुः । आनञ्जुः । द्विहल इति किम् । आट । आटतुः । आटुः । ऋकारैकदेशो रेफो हल्ग्रहणेन गृह्यते । तेनेहापि द्विहलोऽङ्गस्य नुडागमो भवति । आनृधतुः । आनृधुः ॥

अश्नोतेश्च ॥ ७२ ॥

अश्नोतेश्च दीर्घीभूतादभ्यासादुत्तरस्य नुडागमो भवति । व्यानशे । व्यानशाते । व्यानशिरे । अश्नोतेरिति विकरणनिर्देशो अश्नातेर्मा भूदिति । आश । आशतुः । आशुः ॥

भवतेरः ॥ ७३ ॥

भवतेरभ्यासस्याकारादेशो भवति लिटि परतः । बभूव । बभूव-

Digitized by Google

तुः । बभूवुः । बभूवे । भवतेरिति कर्तृनिर्देशादिह न भवति । अनुबभूवे कम्बलो देवदत्तेन । लिटीत्येव । बुभूषति । बोभूयते ॥

ससूवेति निगमे ॥ ७४ ॥

ससूव इति निपात्यते । सूतेर्लिटि परस्मैपदं वुगागमो ऽभ्यासस्य चात्वं निपात्यते । ससूव स्थविरं विपश्चिताम् । सुषुवे इति भाषायाम् ॥

निजां त्रयाणां गुणः श्लौ ॥ ७५ ॥

निजादीनां त्रयाणामभ्यासस्य गुणो भवति श्लौ सति । निजिर्, नेनेक्ति । विजिर्, वेवेक्ति । विष्ल, वेवेष्टि । त्रियहणमुत्तरार्थम् । एषां हि वृत्करणं समाप्त्यर्थं पठ्यतएवेति । श्लाविति किम् । निनेज ॥

भृञामित् ॥ ७६ ॥

भृञादीनां त्रयाणामभ्यासस्येकारादेशो भवति श्लौ सति । भृञ् । बिभर्ति । माङ् । मिमीते । ओहाङ् । जिहीते । त्रयाणामित्येव । जहाति । श्लावित्येव । बभार ॥

अर्त्तिपिपर्त्योश्च ॥ ७७ ॥

अर्त्ति पिपर्त्ति इत्येतयोरभ्यासस्येकारादेशो भवति श्लौ । इयर्त्ति धूमम् । पिपर्त्ति सोमम् ॥

बहुलं छन्दसि ॥ ७८ ॥

छन्दसि विषये ऽभ्यासस्य श्लौ बहुलमिकारादेशो भवति । पूर्णां विवष्टि । वशेरेतद्रूपम् । तथा वचेः । जनिमा विवक्ति । सचेः । वत्सं न माता सिषक्ति । जिघर्त्ति सोमम् । न च भवति । ददातीत्येवं ब्रूयात् । जजनमिन्द्रं माता यद्वीरं दधनद्धनिष्ठा ॥

सन्यतः ॥ ७९ ॥

सनि परतोकारान्ताभ्यासस्येकारादेशो भवति । पिपक्षति । यियक्षति । तिष्ठासति । पिपासति । सनीति किम् । पपाच । अत इति किम् । लुलूषति । तपरकरणं किम् । पापचिषते ॥

ओः पुयण्ज्यपरे ॥ ८० ॥

सनीति वर्त्तते इदिति च । उवर्णान्ताभ्यासस्य पवर्गे यणि जकारे चावर्णपरे परत इकारादेशो भवति सनि प्रत्यये परतः । पवर्गे परे । पिपविषति । पिपावयिषति । बिभावयिषति । यण्परे । यियविषति । यियावयिषति । रिरावयिषति । लिलावयिषति । जपरे । जु इति सौत्रोऽयं धातुः । जिजावयिषति । एतदेव पुयण्ज्यपर इति वचनं ज्ञापकमद्विर्वचननिमित्तेऽपि णौ स्थानिवद्भवतीति । ओरिति किम् । पापच्यते । सन् । पापचिषति । पुयण्जीति किम् । अनुनावयिषति । जुहावयिषति । अपर इति किम् । बुभूषति ॥

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥ ८१ ॥

स्रवति शृणोति द्रवति प्रवति प्लवति च्यवति इत्येतेषामभ्यासस्य ओरवर्णपरे यणि वा इकारादेशो भवति सनि परतः । सिस्रावयिषति । सुस्रावयिषति । शृणोति । शिश्रावयिषति । शुश्रावयिषति । द्रवति । दिद्रावयिषति । दुद्रावयिषति । प्रवति । पिप्रावयिषति । पुप्रावयिषति । प्लवति । पिप्लावयिषति । पुप्लावयिषति । च्यवति । चिच्यावयिषति । चुच्यावयिषति । वचनसामर्थ्यादेकेन वर्णेन यणो व्यवधानमाश्रीयते । पूर्वसूत्रे त्वनन्तर एव यणि भवितव्यमित्यप्राप्तविभाषेयम् । अपर इत्येव । सुस्रूषति । शुश्रूषति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चदशस्तबकावशेषः ॥

भूमिः स्वयं तनुमती मणिपाचिकाया-
माहृत्य सप्तमणिसंपुटिकोदरस्थाः ।
आधारतोऽथ दधती शुचिसप्तमृत्स्नाः
कृत्स्नाभिलाषवरदस्य पुरोऽवतस्थे ॥ २८८ ॥

शुचिसद्मसुत्वाः प्रशस्तमृत्तिकाः, "वल्मीकात् पर्वताग्राच्च सरस्तीराह्रदाद्व्रजात् । अन्त्यागारात् तु गृह्णीया"दिति भविष्यपुराणोक्ताः, आहृत्य मणिपात्रिकायां दधती सती, पुरोऽग्रतोऽवतस्थे । तनुमती मूर्तिधारिणी ॥ २८८ ॥

मूर्ताः समेत्य तनयश्च महौषधीनां
सर्वौषधीश्च परिगृह्य महौषधीश्च ।
अथ समागत वनस्पतयश्च पुण्या
वैदूर्यपात्रगतपञ्चकषायहस्ताः ॥ २८९ ॥

"सहदेवा वचा व्याघ्री बला चातिबला तथा । शङ्खपुष्पी तथा सिंही सूर्यावर्त्ता तथाष्टमी"ति· अष्ट महौषधीः· "मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । शठी चम्पकमुस्तं च सर्वौषधिगणः स्मृत" इति सर्वौषधीश्च परिगृह्य, सर्वौषधीनां च तनयः समागतेति चकारात् ॥ २८९ ॥

नानाफलोदकघटीघटिताग्रहस्ता
नानाविधानि च फलानि करे दधानाः ।
अभ्याययुस्तत इतो वनदेवताश्च
नानामणीश्वरकरा गिरिदेवताश्च ॥
शङ्खादयश्च निधयो नव सिद्धयोऽष्टौ
चिन्तामणीन्द्रनिकरा अपि कामगव्यः ।
कल्पद्रुमा अपि गृहीतमनोज्ञरूपा
दूरे कृताञ्जलिपुटाः पुर एव तस्थुः ॥ २९० ॥

नानाफलानां नारिकेलादीनाम्· उदकपूरिता या घट्यस्तासु घटिता अग्रहस्ता यासां ताः । "इन्द्रनीलमुकुन्दादीन् मकरानन्दकच्छपान् । शङ्खपद्मादिकौ चापि निधीनष्टौ क्रमाद्यजे"दिति क्रमदीपिकानुसारेणाष्टौ । हारावल्यां तु नवैव निधयः । अणिमादयोऽष्टौ सिद्धयः प्रसिद्धा एव ॥ २९० ॥

स्वर्णाम्बराण्युपनिनाय सुमेरुलक्ष्मी-
र्हारावलीरुपजहार हिमालयश्रीः ।
श्रीगन्धमादनभवा कनकारविन्दा-
न्यादाय मानसजलात् स्वयमाजुगुम्फ ॥ २९१ ॥

मानसजलात् तत्रत्यमानसाख्यसरोवरजलात् ॥ २९१ ॥

गन्धोत्तमं मलयजं मलयस्य लक्ष्मी-
र्गोवर्धनस्य दृषदि स्वयमापिपेष ।
कैलासतो गिरिसुतागिरिशाद्यदृष्टां
तच्छ्रीः समाहरत कामपि रत्नमालाम् ॥ २९२ ॥

तच्छ्रीः कैलासश्रीः, गिरिसुता च गिरिशश्च तदादिभिरप्यदृष्टाम् ॥ २९२ ॥

मन्दाकिनीसलिलतो विकचानि काले
सप्तर्षिभिर्निजकरैः समुपाहृतानि ।
चन्द्रांशुभिः पुनरथो मुकुलीकृतानि
पङ्केरुहाणि रविरुत्कचयांचकार ॥ २९३ ॥

चन्द्रस्य तदानीं तत्रागत्य स्वीकृतमणिदर्पणात्मकताकस्य· अंशुभिः किरणैः ॥ २९३ ॥

वह्निः स्वयं ललितकाञ्चनधूपपात्र्या-
मालम्बमानवरविद्रुमशृङ्खलायाम् ।
उद्यत्पिधानगतरन्ध्रसहस्रधूमं
चक्रे सुधारसुरसागुरुदारुदाहम् ॥ २९४ ॥

उद्यदुच्छ्रन् पिधानगते रन्ध्रसहस्रे धूमो यतस्तथा स्यात् तथा दाहं चक्रे ॥ २९४ ॥

ज्योतिर्मयेन कनकोत्तमभास्वरेण
पक्षद्वयेन गरुडो विदधे वितानम् ।
भोगान् भुजंगपतयः फणरत्नशेषां-
श्चक्रुर्ध्वजानपि च रत्नमयीः पताकाः ॥ २६५ ॥

भोगान् फणान् ध्वजांश्चक्रुः, फणानां रत्नशेषान् रत्नाग्रान् पताकाश्चक्रुः,अत्र मिथोविरोधिनामपि भगवदनुवृत्तौ निर्वैरत्वादुल्लास एव सर्वेषामुदभूत् ॥ २६५ ॥

श्रीसूक्तयोऽप्यथ परेऽप्यभिषेकमन्त्रा
धृत्वा वपुः किमपि पूरुषसूक्तयश्च ।
आत्मानमेव बभणुर्मधुरैरुदात्त-
मुख्यैः स्वरैर्मुनिगणाहितसाधुवादाः ॥ २६६ ॥

बभणुः शब्दितवन्तः, उदात्तमुख्यैरुदात्तानुदात्तादिभिः ॥ २६६ ॥

गव्यानि पञ्च सुरभिः स्वयमाजहार
पञ्चामृतानि चतुरानन एव देवः ।
ऐरावतः करहृतैः सुरदीर्घिकाया-
स्तोयैर्मणीन्द्रमयकुम्भकदम्बमप्रात् ॥
तूर्याणि नेदुरभितो दिवि देवतानां
देव्यस्तु नन्दनवनीकुसुमान्यवर्षन् ।
गन्धर्वकिंपुरुषचारणसिद्धसाध्य-
विद्याधरा मुमुदिरे ननृतुर्जगुश्च ॥ २६७ ॥

सुरदीर्घिकायाः स्वर्गङ्गायाः, अप्रात् पूरयामास ॥ २६७ ॥

नाट्यं मुखप्रभृतिपञ्चसुसंधिबन्धं
नानाविधं सरसमप्सरसोऽभ्यनैषुः ।

काश्चिन्निरीक्ष्य तमथो मुमुहुर्बभूव
नारायणोऽहृजनिरेव निकामभक्ता ॥ २६८ ॥

मुखप्रभृतीनां मुखप्रतिमुखगर्भविमर्शनिर्वहणानां पञ्चानां शोभनसंधीनां बन्धो यत्र तत्, नानाविधं रूपकोपरूपकाद्यवान्तरबहुभेदम्, अभ्यनेषुरभिनीतवत्यः ॥ २९८ ॥

एवं रसमये समये पितामहो महोत्सुकहृदयो दयोत्तरतरलतालतासुरभि सुरभिमासाद्य किंचिदुवाच ॥ २६६ ॥

दयोत्तरा तरलता कृपाप्रधानं तारल्यं सैव लता, अनुकम्प्यजनावरणात्, तस्याः कुसुमेन सुरभि, फलाभिव्यञ्जकप्रकाशेन समीचीनमित्यर्थः, तद्यथा स्यात् तथा ॥ २९९ ॥

अयि. अद्य निरवद्यनिरवसरसरसः समयः समयामास मा सरलेऽत: परमिष्यतां विलम्बो लम्बोदरजनकमनुज्ञाप्य समारभ्यतामभिषेकः ॥ ३०० ॥

निरवद्यश्चासौ निःशेषेणावसरेण सरसश्चेति सः, समयग्. अयामास प्राप्तः ॥ ३०० ॥

यावत् कृष्णां समया मया गम्यते तावन्मत्प्रियमनुहृन्धतीयमहृन्धतीयमनसूयासूयारहिता च धृतरजस्तमोलोपा लोपामुद्रा च मुद्राचतुरा भगवती सर्वसंमानगा नगात्मजा च पुरुगायगायत्री च वेदमाता माता च देवानामदितिरदितिरपीयं च गिरां देवी देवी स्वाहा स्वाहार्यगुणा चेति सर्वा एव तन्निकटमुपसर्पन्त्विति परिप्राप्य तन्निदेशं देशं तमनुसृतासु तासु भगवानपि स्वयं स्वयंभूरनुससार ॥ ३०१ ॥

कृष्णं समया कृष्णस्य निकटम् । साध्वीगणमूर्धन्यत्वेन माङ्गल्याधिक्यादरुन्धत्याः प्राङ्निर्देशः । मुदां रा दानं तत्र चतुरा नगात्मजा पार्वती । पुरु प्रचुरं गायति· अभिधत्त इति पुरुगाया सा चासौ गायत्री

चेति सा । द्दितिः खण्डनमर्द्दितिस्तद्दुहिता गिरां देवी सरस्वती । सुष्ठु-माहार्या गुणा यस्याः सा ॥ ३०१ ॥

अनुसृत्य च ।

अर्घ्येण पाद्यपयसाचमनीयकेन
वक्रेन्दुसीम्नि मधुपर्कसमर्पणेन ।
सिंहासने समुपवेश्य गिरां प्रयत्नैः
पद्मासनः स समपूजयदम्बुजाक्षम् ॥ ३०२ ॥

सिंहासने समुपवेश्य· अर्घ्यादिना समपूजयदिति योजना ॥ ३०२ ॥

तदनु तन्निदेशेनेव ।

पञ्चामृतैः सुरभिभिः सह पञ्चगव्यै-
र्भव्यैर्निजस्तनरसैः सुरभिश्च देवी ।
ताभिः समं कमलजासनसन्नियोगात्-
श्रद्धान्विता शिखरिधारिणमभ्यषिञ्चत् ॥ ३०३ ॥

ताभिरहन्धत्यादिभिः ॥ ३०३ ॥

तदा तदालोकयद्भिरेवमतर्क्यत ।

ज्योत्स्नाभिर्नवनीरदः किमथवा शुक्लेन नीलो गुणः
शुद्धस्फाटिकरत्नकान्तिसलिलैः किंवेन्द्रनीलाङ्कुरः ।
मुक्ताभिः किमु वा तमालतरुणः स्नातः समुद्भ्राजते
किंवा श्यामसरोजमुज्ज्वलविधुक्षोदैर्मुरारेर्वपुः ॥ ३०४ ॥

तदा· अभिषेककाले ज्योत्स्नाभिरिति स्नानीयदुग्धदध्यादिवस्तूनां कदाचिज्जलमिश्रितत्वेन तारल्यात् । शुक्लेन गुणेनेति तेषामेव कदाचिज्जलामिश्रितत्वेन नैविड्यात् । शुद्धस्फाटिकेति तेषामेव प्रत्येकमन्ते शुद्धजलाद्दकेन क्षालनात् । मुक्ताभिरिति तेषामेव कदाचिल्ललाटादिषु कणरूपेणावस्थितेः । उज्ज्वलविधुक्षोदैः· उत्तमकर्पूरचूर्णैरिति तेषां सर्वेषां सौरभ्यादुत्प्रेक्षा,यदुक्तं "पञ्चामृतैः सुरभिभि"रिति ॥ ३०४ ॥

Digitized by Google

तदनु च ।

गायत्रिका च गिरिजा च सुरप्रसूश्च
साऽरुन्धती च परमा पतिदेवतानाम् ।
चूर्णैर्महासुरभिभिः शुभगानपूर्वं
चक्रुर्विरूक्षणमपेक्षितमातृमोदाः ॥ ३०५ ॥

विरूक्षणमभ्यङ्गानन्तरं गन्धचूर्णैरुद्वर्तनम् । अपेक्षितो मातुरिव मोदो हर्षो याभिस्ताः ॥ ३०५ ॥

ततश्च ।

प्रत्येकमन्त्रपरिपूतमहाभिषेक-
द्रव्योज्ज्वलैः शुभजलैः सुरदीर्घिकायाः ।
एकैकशः समुदिताः सनकादयश्च
सप्तर्षयश्च गिरिधारिणमभ्यषिञ्चन् ॥ ३०६ ॥

सुरदीर्घिकाया गङ्गायाः ॥ ३०६ ॥

ततश्च ।

सिन्ध्वादिभिर्निजनिजोदकमर्पयद्भि-
स्तेषां करे स्वजनिनाथ नियोज्यमानैः ।
कृष्णोऽभ्यषेचि रभसोद्गतलोचनाम्भो-
रोमाङ्कुरक्षुभितचित्रपवित्रगात्रैः ॥ ३०७ ॥

तेषां सनकादीनाम् । स्वजनिना स्वयंभुवा । रभसेन हर्षेण. उद्गताभ्यां लोचनाम्भसा रोमाङ्कुरैश्च ताभ्यां क्षुभितानि चित्राणि पवित्राणि गात्राणि येषां तैः ॥ ३०७ ॥

भूयश्च घोणातरसुन्दरगन्धतैलै-
नाभ्यज्य शैलतनयादय एव देव्यः ।
कर्पूरपूरितसुशीतसहस्रधारा-
धाराजलैस्तदनु गङ्गजलैरषिञ्चन् ॥ ३०८ ॥

कर्पूरपूरितैः सुशीतैश्च सहस्रधाराख्यस्थाल्या धाराजलैः ॥ ३०८ ॥

एवं तस्मिन्नेव समये ।

चिन्ताश्मकल्पतरुकामगवीप्रभाव-
लक्ष्मीप्रसूतसुकुमारकुमारिकाणाम् ।
वर्गेण सूक्ष्मसितकोमलचेलखण्डै-
श्चक्रे निकाममभिषेकजलापसारः ॥ ३०९ ॥

चिन्ताश्मादीनां प्रभावलक्ष्मीः प्रभावमयी संपत्तिस्तया प्रसूता आविर्भाविता याः सुकुमार्यः कुमारिकास्तासां वर्गेण ॥ ३०९ ॥

काचित् केशकलापतोऽथ वदनाम्भोजात् परा वक्षसः
काचिद् बाहुयुगात् परा चरणतो गात्रस्य काचिच्छनैः ।
वासःखण्डमनार्द्रकं विदधती श्रोणीतटे वेष्टितं
वासोऽन्याः स्तिमितं विहाय्य सलिलं तस्मादपासीसरत् ॥ ३१० ॥

केशकलापादितः सलिलम्· अपासीसरत्· अपसारयामास । अनार्द्रकं शुष्कम् । तस्मात्· श्रोणीतटात् । तत्तत्कर्म मातृकल्पानामदित्यादीनां कर्तुमयोग्यमिति कान्तायमानानां कुमारिकाणां सृष्टिः ॥ ३१० ॥

एवं द्विस्त्रिराकेशमापादपद्ममभिमार्ज्य ।

पूर्वोपनीतवसनाभरणानुलेपैः
कन्यागणोऽतिचतुरः समभण्डयत् तम् ।
शैलाधिराजतनयाद्युपदिश्यमानः
केशान् प्रसाध्य निपुणं पुनराबबन्ध ॥ ३११ ॥

चतुरो दक्षः ॥ ३११ ॥

गोगोपगोपवनितादिरसप्रसङ्ग-
स्वाभाविकव्रजविलासमुहूर्तहानेः ।
कृष्णस्य तत्तदुपरोधवशेन सर्वे
स्वीकुर्वतः क्षणमुपद्रववद्बभूव ॥ ३१२ ॥

गोगोपगोपवनितानां रसप्रसङ्गेन स्वाभाविक एव यो व्रजविलासस्तस्य मुहूर्तं व्याप्य हानेर्हेतोः ॥ ३१२ ॥

तथापि तथा पितामहादीनामनुरोधत उद्वेगस्य तरङ्गा रङ्गाहतये तस्य न बभूवुः ॥ ३१३ ॥

रङ्गाहतये, तेषां स्वस्य च रङ्गनाशार्थमित्यर्थः ॥ ३१३ ॥

प्रत्युत भक्तभक्ततया ये यथावत् कुर्वन्ति तथैव तदनुमोदमानो मानोन्नतो गाम्भीर्यमेवालम्बते स्म ॥ ३१४ ॥

मानेनादरेण· उन्नतः ॥ ३१४ ॥

ते स्मयमानमुखाश्चतुर्मुखादयः स्नातमलंकृतमलंकृतकर्माणं तमवलोक्य कल्पतरुप्रसूते सर्वतोभद्रे सर्वतोभद्राभद्रासने समुपवेश्य तेनैव कन्यकागणेन कृतचरणधावनं कारयामासुः ॥ ३१५ ॥

अलमत्यर्थे कृतकर्माणं कृतकृत्यम् । सर्वतोभद्रे पीठे । सर्वतोभद्राया गंभार्या भद्रासने ॥ ३१५ ॥

समनन्तरं विरिञ्चिः सर्वोत्कर्षाञ्चिकां चिकारयिषुः पूजां मनसि चिन्तयामास ॥ ३१६ ॥

पूजां चिकारयिषुः कारयितुमिच्छन् । कीदृशीं, सर्वोत्कर्षम्· अञ्चति प्राप्नोतीति सर्वोत्कर्षाञ्चिकाम् ॥ ३१६ ॥

केन करिष्यते मदभिमता मतावपरिच्छिद्यरसा निरपचितिरपचितिरस्य ॥ ३१७ ॥

निरपचितिरपचयशून्या· अपचितिः पूजा ॥ ३१७ ॥

रस्यतमेन केन मन्त्रेण वा भवितव्यं नहि निर्मन्त्रमर्हणमर्हणमिति तमथ चन्द्रशेखरोऽखरोदितवचा निजगाद ॥ ३१८ ॥

अर्हणं पूजनम् । अर्हणं योग्यम्, अर्हतीत्यर्थः । अखरं यथा स्यात् तथा· उदितमुन्नतं वचो यस्य सः ॥ ३१८ ॥

भो भो चतुरानन चतुरा न न चिन्तयन्ति कुमारोऽयमर्चयिष्यति ॥ ३१९ ॥

न न, नहि नहीत्यर्थः, संभ्रमे वीप्सा । कुमारोऽयमिति तर्जन्या मूर्तमष्टादशाक्षरमन्त्रं दर्शयति ॥ ३१९ ॥

इत्युक्तवत्येव व्योमकेशे नाकेशेनाभिमुखमीड्यमानो महोमहोदय इव गोविन्दाभिषेकपूजोपयुक्तो गोविन्दनामाङ्कितो मूर्तिमानष्टादशाक्षरो महामनुराविरासीत् ॥ ३२० ॥

व्योमकेशे महादेवे । नाकेशेन· इन्द्रेण । महसां महाम्· उदय इव ॥ ३२० ॥

तमद्भुतमहसं महःसंतोषवर्धकमालोक्य पितामहो महोल्लासमासाद्याहो महामनुरयं रसौघवर्षी स्वयमाविर्भूतोऽनुभूतो नु मया यत्र ऋषिरमुष्य नारदो नारदोपहर्ता छन्दश्च गायत्री· उभाभ्यामेव निर्विशिष्टोऽस्मि ॥ ३२१ ॥

महःसंतोषवर्धकम्· उत्सवसंबन्धिसुखवर्धकम् । नारदोपहर्ता नरसमूहस्य भक्तिप्रतिबन्धकदुरितहारी ॥ ३२१ ॥

तेनानेनाहमेव कृष्णं देवतामर्चयिष्यामीति संभृतसंभारो भारोपद्विगुणगुणगणो भक्तिवासने*तरवासनारदेन नारदेन तत्त्ववासनसनकादिभिश्च भक्तिरसध्रुवेण ध्रुवेण च सकलजनमनःप्रह्लादेन प्रह्लादेन च सात्वतमतवसुना वसुना च तथापरैश्च परमभागवतैः समं समुपससार ॥ ३२२ ॥

भा कान्तिस्तस्या आरोपेण मन्त्रकान्तिसंक्रमेण द्विगुणितो गुणगणो यस्य सः । वासनां रदति· उत्पाटयतीति तथा तेन, "रद उत्पाटने" ॥ ३२२ ॥

* भक्तिवासेने—इति पा० ।

उपसृत्य च कृतपादशौचं भगवन् पूजार्थमाबद्धपद्मासने पद्मासने चतुर्दिगवस्थितानि चत्वारि मुखानि भगवदभिमुखमुखतयैकमुखीकृत्य हृष्टाभिरष्टाभिर्दृष्टिभिरीक्षमाणे सति भगवत्पूजामहार्घ्यादिभाजनयोग्या महार्घ्यादिभाजनयोग्याः सर्वोपरिभापरिभावितदुग्धा दुग्धाब्धिना समुपानीयन्त दीर्घतरपुङ्खाः शङ्खाः ॥ ३२३ ॥

भगवतः पूजामहस्य पूजोत्सवस्य· अर्घ्यादिपात्रार्हाः शङ्खा दुग्धसमुद्रेण समुपानीताः। कथंभूताः, महार्घ्या बहुमूल्याश्च· आदिभाजनयोग्याश्चेति ते,आदिभाजनयोग्यं प्रथमार्चनप्रवर्तनोपायमर्हन्तीति ते,भाजनमिति भजतेर्हेतुमण्ण्यन्ताल्ल्युट् ॥ ३२३ ॥

शतधृतिधृतिकर्या तु सुमेरुश्रियोरुश्रिया हाटकघटितास्त्रिपदिकाश्च समाह्रियन्त ॥ ३२४ ॥

एवं त्रिपदिकाः कुतो लभ्या इत्यधैर्ये प्रसक्ते शतधृतेर्ब्रह्मणो धृतिकर्या धैर्यकारिण्या। उरुश्रिया विपुलशोभाः ॥ ३२४ ॥

कैलाशलक्ष्म्या तु प्रमोदवर्धनी वर्धनी स्फटिकेन्द्रस्य ॥ ३२५ ॥

वर्धनी मङ्गलघटी ॥ ३२५ ॥

हिमगिरिश्रिया श्रियापरिमितानि सभासभाजनानि भाजनानि पुष्पादीनां तत्क्षणादेव देवताभिर्वेनानां गन्धपुष्पाक्षतयवकुशाग्रतिलसिद्धार्थार्घ्यद्रव्याणि श्यामाकदूर्वाकमलापराजिताराजितानि पाद्यद्रव्याणि सुजातिजातिकक्कोललवङ्गान्याचमनीयद्रव्याणि परमेष्ठगन्धो गन्धो धरण्या नन्दनवनदेवतया तु कुसुमानि कल्पतरुणा तरुणाभरणानि पीताम्बराणि वराणि ॥ ३२६ ॥

अर्घ्यद्रव्याणीत्यादिषु सर्वत्र वचनव्यत्ययेनापि समाह्रियन्तेत्यनेनानुषङ्गः, सिद्धार्थः श्वेतसर्षपः ॥ ३२६ ॥

पुरपुरःसरसरसागुरुपरिमलमलयजादिधूपो घनसारसारवर्तिवर्तिकः सुरभिसुरभिसर्पिष्कः प्रदीपश्चाग्निवल्लभया कामगव्या गव्यानि नानाविधानि देवमाचा मात्रारहितानि हितानि पूपादीनि ॥ ३२७ ॥

पुरपुरःसरो गुग्गुलयुक्तः, "कौशिको गुग्गुलः पुर" इत्यमरः । घनसारः कर्पूरः । सुरभीनि सुरभेः सर्पींषि यत्र सः । मात्रारहितानि॰ अपरिमितानि ॥ ३२७ ॥

दलितोद्वेगानि दलितोद्वेगानि जाम्बूनदाभताम्बूलीदलानि ताम्बूलानि पौलोम्यानुलोम्यानुरञ्जितमनसा ॥ ३२८ ॥

दलितः खण्डित उद्वेगो मुखजाड्यं यैस्तानि । दलितानि शिल्पकौशलकर्तनाद् दलायमानानि॰ उद्वेगानि गुवाकफलानि यत्र तानि, "गुवाकः क्रमुकोऽस्य तु फलमुद्वेग" मित्यमरः । पौलोम्या शच्या ॥ ३२८ ॥

इत्येवं युगपदेव देवदेवीभिरभितः समाहृतेषु पूजोपकरणेषु विचक्षणोऽपि स्वयं स्वयंभूरानन्दमन्दप्रज्ञतयाऽज्ञतया मुग्ध इव मन्त्रर्षिणा नारदेन दर्शितक्रमो मूलमन्त्रमुच्चार्य भगवन्तमर्घ्यादिक्रमेण क्रमेण यावत् पूजयितुमारेभे ॥ ३२९ ॥

क्रमेण शक्त्या ॥ ३२९ ॥

तावदेव ध्वनिपरिवर्तः कृत इव देवदुन्दुभिभिः॰ जन्मान्तरमासादितमिवाप्सरसां लास्येन लब्धयौवनमिव गन्धर्वादिगानं जरातः प्रतिनिवृत्य पुनस्तरुण इव चारणादिस्तवः॰ हर्षस्यापि हर्षः समुत्पन्न इव, एवं स एव समयः समयान्तरमिव भवन् सर्वेषां चित्तं चित्तान्तरमिव जनयामास ॥ ३३० ॥

ध्वनीति, देवदुन्दुभ्यादीनां तेषां प्रतिस्वकर्मसु तदानीमभूतपूर्वं वैचक्षण्य श्रीभगवच्छक्तिप्रभावात् स्वत एवोद्भूतमिति भावः ॥ ३३० ॥

ततः सुमेधा महासेनो रसेनोरविलस्तदातपत्रं तस्य शिरसि निदधार ॥ ३३१ ॥

Digitized by Google

सुमहाः सुतेजाः· महासेनः कार्त्तिकेयः· तस्य मूर्धनि रसेन प्रीत्या· धातपत्रं छत्रं दधार । उदसिनः प्रथमस्तवत्ता इति सौन्दर्येण प्रतिकृततया च तस्यैव तद् योग्यमिति व्यञ्जितम् । "स्यादुदस्वानुदसित्" इत्यमरः ॥ ३३१ ॥

तस्मिंस्तदारूढे रूढेन परमानन्देन महर्षिगणगीतमन्त्रपुरःसरं पुरः स रञ्जितमनाः परमेष्ठी परमे स्फुरन्मणिमहःपटलं तन्मुकुटवरं श्रीकृष्णशिरसि निबध्य संपादितविशेषकं विशेषकं च विलिख्य भाले भालेपललित इव सकलदेवदेवेन्द्रो गोविन्दोऽसीति निजगाद ॥ ३३२ ॥

तस्मिंश्छत्रे तदारूढे तन्मूर्धापरिस्थे सति परमे श्रीकृष्णशिरसि परमेष्ठी ब्रह्मा तन्मुकुटवरं निबध्य । कीदृशं, स्फोटयतामिव मुखेभ्य उद्गिरतामिव मणीनां महःपटलानि यत्र तद् विशेषकं तिलकं संपादितं विशेषेण कं सुखं येन तद् भाले विलिख्य । कीदृशे, भानां कान्तीनां लेपेन प्रलेपेनेव ललिते ॥ ३३२ ॥

गदिते च तथा तेन सर्वे एव महर्षयो हर्षयोगेन सनन्दनादयो नादयोगेन तुष्टुवुः ॥ ३३३ ॥

नादयोगेन· उच्चैः शब्दयोगेन ॥ ३३३ ॥

यथा ।

जय श्रीमद्वृन्दावनमदन नन्दात्मज विभो
प्रियाभीरीवृन्दारिक निखिलवृन्दारकमणे ।
चिदानन्दस्यन्दाधिकपदरविन्दास्य नमो
नमस्ते गोविन्दाखिलभुवनकन्दाय महते ॥ ३३४ ॥

प्रिया· आभीरी वृन्दारिका यस्य हे तथाभूत । स्वयं च निखिलानां वृन्दारकाणां देवानां रूपवतां वा मुख्यानां वा मणे रत्नसदृश । चिदा·

यस्यानन्दस्य स्यन्दः क्षरणं यतस्तथाभूतोऽधिकः पदारविन्दयोरासवो मकरन्दो यत्र तथा ॥ ३३४ ॥

ततश्च ।

पूजान्ते सहतुम्बुरु-
रुरुपरितोषेण रूढरोमाञ्चः ।
गिरिवरधरणक्रीडां
नारद उपवीणयामास ॥

ततश्च ।

मन्दाकिनीसमवगाहविधौतभूति-
मालाकपालभुजगाभरणानि हित्वा ।
मौलीन्दुकान्तिकमनीयमणीन्द्रदीपै-
र्नीराजनामथ चकार पतिः पशूनाम् ॥ ३३५ ॥

मन्दाकिन्यत्र मानसगङ्गैव ॥ ३३५ ॥

एवं कृते पूजाङ्गे तस्मिन्नाराधिके पुनरभिषेकमहोत्सवाङ्गं महौगन्धशिलाधान्यादिभिर्महर्षिगणगीतप्रत्येकमन्त्रपूतैरेकैकशः श्रीकृष्णशिरः संस्पृश्य पुनः पुनः काञ्चनभाजनस्थितैर्मिलितैरेव सकलैः पूर्ववन्मन्त्रान्तरपाठपूर्वकं महानीराजनं च विदधे ॥ ३३६ ॥

महोत्सवाङ्गमिति महानीराजनमित्यस्य विशेषणमाविष्टलिङ्गम् ॥ ३३६ ॥

ततश्चाचारतो गायत्री गौरी चारुन्धतीप्रभृतयो मुनिपत्न्यश्च देवमातरो देवपत्न्यश्च मङ्गलदीपकलिकाभ्यामन्योन्यविपर्यस्तविन्यस्तप्रकोष्ठकरतलाभ्यामेकैकशो नीराजयामासुः ॥ ३३७ ॥

अन्योन्यं विपर्यस्तेन व्यत्ययेन विन्यस्तौ प्रकोष्ठौ ययोस्ताभ्यां करतलाभ्यां, वामप्रकोष्ठे दक्षिणप्रकोष्ठमुपर्यधोभावेन तिर्यग्विन्यस्य स्व-

वामे दक्षिणकरतलधृतया स्वदक्षिणे च वामकरतलधृतया दीपशिखयेत्यर्थः ॥ ३३७ ॥

एवं वृत्ते महोत्सवे भगवानात्मयोनिर्भगवन्नैवेद्यं विष्वक्सेनगरुडादिपरमभागवतेभ्यो विभज्य दत्त्वा शङ्खादिनिधिवर्गकल्पतरुचिन्तामणिकामधेनूरादिदेश कालोचितम्, भो भोः सम्प्रति प्रतिपन्ने भगवन्महोत्सवे ।

देवोपदेवमुनयश्च तदङ्गनाश्च
नागेश्वराश्च गिरिकाननदेवताश्च ।
ये चाप्सरःप्रभृतयोऽप्यपरे समस्ता-
स्तान् भूषयन्तु विविधं परिधापयन्तु ॥

इति तन्निदिष्टा दिष्टातीतफलप्रदाः प्रत्येकं परमसुभगभगवदुत्सवावलोककारिमावमेव ते वासोऽलङ्कारतिलकताम्बूलैरर्हयामासुः ॥ ३३८ ॥

ते शङ्खनिध्यादयः, "पुमान् स्त्रिया" इत्येकशेषात् पुंस्त्वम् ॥ ३३८ ॥

अनन्तरमनन्तरहसो महोत्सवस्य परिसमाप्तौ श्रीकृष्णं प्रदक्षिणीकृत्य कृत्यकोविदाः कोविदारा इव सुमनोरक्ताः पितामहादयो महादयोद्धुराः सद्य एव तिरोदधुः, केवलं शक्रसुरभी सुरभीतिहारिणस्तस्य पुरतः समतिष्ठताम् ॥ ३३९ ॥

कोविदाराः काञ्चनारवृक्षाः, सुमनोभिः पुष्पै रक्ता अरुणाः, पक्षे शोभनमनोभिरनुरागिणः । महादयोद्धुरा इति, दया चात्र इन्द्रविषयिका भगवदभिषेकोत्सवैः सर्वलोकविषयिका च ज्ञेया ॥ ३३९ ॥

नैतदाश्चर्यं नेदमधिकमैश्वर्यं नेदमतिरस्यं यदस्य वैभवं वै भवन्ति यस्यामी केचिदंशाः केचिदंशांशाः केचित् कलाः केचिद्विभूतयः, तैः कृतेऽस्यादरे स्यादरे न किंचिदपि वैचित्र्यम् ॥ ३४० ॥

Digitized by Google

वैभवं प्रभुत्वं, ते निश्चितं भवन्ति, तेनादरेऽस्य कृते न किमपि वैचित्र्यं स्यात्, अरे· इति स्थूलधियः प्रति ससंरम्भं संबोधनम् ॥ ३४० ॥

अथ तिरोहितेषु तेषु चतुर्मुखमुखविबुधवर्गेषु पुरोऽवस्थितं पुरंदरमदरमनीषमनीषदनुग्रहोदयसदयसरसतरं तरङ्गितकौतुकः किमपि कृष्णो निजगाद ॥ ३४१ ॥

अदरमनीषं निर्भयबुद्धिम् ॥ ३४१ ॥

कथय शतमन्यो मन्योरुपशमस्ते जातः, न त्वमन्तरङ्गोऽन्तरङ्गो[1]पयितुमर्हसि, न मया नमयामासे तव मदोऽयमुद्रोहेण मुद्रोहेण केवलम् ॥ ३४२ ॥

कथयेत्यादिना प्रणयपरिहासेन किंचित् सख्यांशमुपस्थाप्य तेन च सलज्जं सकम्पं च शङ्कमालक्ष्य पुनस्तं स्वस्वीकर्तुम्· अधिकृतदासोचितभावानुकूलस्वप्रभुताविष्कारेणाह, तवायं मदो मया· उद्रोहेण· उद्रिक्तेन द्रोहेण न नमयामासे, किंतु केवलं मुद्रोहेण तव या मुद्रा मदमयी तस्या ऊहेन, यद्वा मुदो हर्षस्य रोहेण· उत्पत्त्या, ईदृशं कौतुकं द्रष्टुमिति भावः ॥ ३४२ ॥

मतः स्वजनमदो मदोऽवश्यं न सह्यते स्वजनो हि मत्तो मत्तो हि दण्डमर्हति ॥ ३४३ ॥

मदोजसा मत्तेजसा कर्त्रा, मत्तो मदयुक्तः, मत्तो हि मत्सकाशादेव ॥ ३४३ ॥

शतमख मखभङ्गस्तेऽनुग्रहत एव कृत इति मातः परं परंतप मामसूयितुमर्हसि याहि सुखेन भुङ्क्ष्व तां निजमैन्द्रं पदं संपदं संततां मामाश्रित्य मा परं प्रमत्तेन भवितव्यमिति सानुकम्पमुदितो मुदितोऽतिसरसमङ्गलतुल्यमानकृपापाकशासनः पाकशासनः साश्चर्यं प्रणम्य

१ संधिः प्राग्वत् ।

प्रदक्षिणीकृत्य च भगवन्तं निजपुरमेव जगाम गामपि सुरभिं सुरभिं कृत्वा प्रणयपरिमलेन विमलेन विसर्ज्य स्वीकृतपूर्ववेष एव. एकान्त-कान्तलावण्यो निमेषमात्रात् कुतोऽपि समागत इव श्रीकृष्णोऽपि व्रजमाविवेश ॥ १४४ ॥

अतिसरसां भगवतो वलमानां कृपां कायति गायति व्यनक्तीति तादृशं शासनं यत्र सः ॥ १४४ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे गोवर्धनोद्धरणो नाम पञ्चदशः स्तबकः ॥ १५ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां पञ्चदशस्तबकसंगमनम् ॥ १५ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ षोडशस्तबकारम्भः ॥

अथ कथकजनकथककथामोदमोदकारिहारिविचित्रचरित्रचरिता-र्थीकृततदितरकथाश्रवणो ॥ १ ॥

श्रुत्वा केशाहृतं तातं केशवे तत्पुरं गते ।
षोडशे गोपिकामोहो गोपानां ब्रह्मदर्शनम् ॥

अथ भगवति रतिरसवतां व्रजभुवां जनानां परमानन्देन कियत्सु दिवसेषु यत्सु गच्छत्सु सत्सु कदाचिद्गोपाधीशो द्वादशीपालनकृतादर-तया निशाशेष एव शमनस्य स्वसारं यमुनां स्नातुमवजगाहे । भगवति कथंभूते, कथकजनानां कथा यत्र तथाभूताभिः कथाभिः किं हर्षस्यापि हर्षे इतिवत्-मोदस्यापि मोदकारीणि हारीणि विचित्राणि चरित्राणि यानि तैश्चरितार्थीकृतानि रत्नयोरैक्यात् गतार्थीकृतानि तदितरक-थाश्रवणानि येन तस्मिन् ॥ १ ॥

श्रवणेन्द्रियकृतार्थताकारिगुणावलीले लीलेहितहृतसकलजनमानसे मानसेव्यमानरूपलक्ष्मीके ॥ २ ॥

श्रवणेन्द्रियस्य कृतार्थकारिणीं गुणावलीं लाति गृह्णातीति तस्मिन्। लीला नेत्रान्तचरणाग्रभ्रूभङ्गः, ईहितानि गोवर्धनोद्धारणानि कर्माणि। मान आदरः ॥ २ ॥

लक्ष्मीकेलिकलाकलापतोऽपि परमसंगोपरमणीयगोपरमणीयशःप्रदकेलिकेऽलिके विलसत्तरकाश्मीरविशेषके ॥ ३ ॥

लक्ष्म्याः केलिकलासमूहतोऽपि परमसंगोपाः परमरहस्या रमणीया रम्या गोपरमणीनां यशःप्रदाः केलयो यस्मिन्। अलिके ललाटे विलसत्तरं काश्मीरविशेषकं कुङ्कुमतिलकं यस्य तस्मिन् ॥ ३ ॥

विशेषकेशरकुसुमसुमनोज्ञकेशकलापे कलापेशलगोपवनितानितान्तसौभाग्यस्वरूपे रूपेण जितकोटिकन्दर्पे ॥ ४ ॥

विशेषेण केशरकुसुमैर्बकुलपुष्पैः सुमनोज्ञः केशानां कलापो भूषणं यस्य तस्मिन् ॥ ४ ॥

दर्पणाधरीकृतसकललोकपाले कपालेश्वरादिसर्वदेवाभिवादितेऽदितेरपत्यात्ययहारिणि हारिणि व्रजपुरपुरन्दरनन्दने नन्दनेश्वरमदखण्डनाय गोवर्धनधृत्या गोवर्धनधृत्या च गोविन्दनामालंकुर्वति भगवति रतिरसवतां व्रजभुवां परमानन्देन कियत्सु यत्सु दिवसेषु ॥ ५ ॥

अत्ययोऽतिक्रमः। गोवर्धनधृत्या च कान्तिवर्धिनी या धृतिर्धीरता तया च ॥ ५ ॥

पूर्वपूर्ववत् सह सहचरैस्तस्मिन्नपि गोचा गोचारणादिकेन विहारेण रसमयं समयं रचयित्वा गमयति सति ॥ ६ ॥

गोचा गां कान्तिमञ्चता प्राप्नुवता ॥ ६ ॥

कदाचिद् घोषाधीशो धीशोधिकायामेकादश्यामुपोषितः पोषितश्च तदामोदेन द्वादशीपालनकृतादरतया दरतया च तस्याः संत्वरो निशाशेषेऽनिशाशेषैर्हितसुकृतैस्त्रिचतुरैरतिचतुरै रतिमद्भिर्बन्धुजनैः समं समुपेत्य प्रकटितस्वसारं स्वसारं शमनस्य मनस्यवहितः स्नातुमवजगाहे ॥ ७ ॥

धियं बुद्धिं शोधयतीति तस्यां धीशोधिकायाम् । तस्या द्वादश्या दरतया॰ अल्पतया हेतुना सत्वरस्त्वरायुक्तो निशाशेषे रात्रेश्चरमयाम एव "कलाधौ द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि । आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शंभुशासनात्" ॥ इति स्मृतेः । अनिशं निरन्तरमेव॰ अशेषेण निःशेषेण साङ्गोपाङ्गतया॰ ईहितानि कृतानि सुकृतानि यैस्तैः । प्रकटितस्वसारमिति स्नानक्रियाविशेषणम् । तत्र द्वादशीपारणानुरोधेना॰ सुरकालेऽपि मे जले प्रवेशो नासमञ्जस इति स्वबलप्रकटनं स्वसाङ्गिनस्तत्र समुत्साहयितुमिति ज्ञेयम् । अवहितः सावधानः ॥ ७ ॥

ततश्च स्नानसमसमयान्यथाभावेन जातप्रतिघाः प्रतिघातक्षिप्रचेतसः प्रचेतसः पुरसदो रसदोत्तमचरितं भगवतो जनकं जनकन्दनास्ते प्रसह्यासह्यातिक्रमं तमपां पत्युरभ्यासमभ्यासमनयन्त ॥ ८ ॥

स्नाने समः समञ्जसो यः समयस्तस्यान्यथाभावेन जातप्रतिघा उत्पन्नक्रोधाः प्रतिघातेन जलावघातमात्रेणैव क्षिप्तचेतसः प्रचेतसो वरुणस्य पुरे सीदन्तीत्यत्रत्यं जनानां कन्दना उद्वेजकाः प्रसह्य बलात्॰ अपां पत्युर्वरुणस्य॰ अभ्यासं निकटम्॰ अभि॰ आभिमुख्येन॰ आ सम्यक्॰ अकष्टेन समिति संगत्या॰ अनयन्त ॥ ८ ॥

ततस्तटस्थास्तटस्था इव किमिदं किमिदमिति जातसंभ्रमा भ्रमापहं श्रीकृष्णमुद्दिश्य तारस्वरं चुक्रुशुः ॥ ९ ॥

तटस्थाः कूलस्थितास्तटस्था इव॰ उदासीना इव तत्प्रतीकाराशक्तेः सह गमनासंभवाच्च तथात्वेनोत्प्रेक्ष्यन्त एव ननु वस्तुतस्तटस्था इति । भ्रमम्॰ अनिष्टाशङ्कामयम्॰ अपहनिष्यतीति तम् ॥ ९ ॥

हन्त हन्तरसुराणां सुराणां प्रतिकर्तरार्तबन्धो बन्धोपशमन कृष्ण पाहि पाहि भो अत्याहितमत्याहितमेष ते पिता पितामहादेरपि माननीयो नीयते यमुनामवगाहमानो मानोद्धतेः केश्चन तन्महाबाहो भवानद्य आयतामायतामतिविपदं त्वां विना विनाशयितुं कः क्षमः ॥ ५० ॥

हन्तरित्यादिविशेषणचतुष्टयेन दुष्टनिग्रहशिष्टपालनदीनवात्सल्यबन्धुत्रायकत्वलक्षणा गुणाः प्रस्तुतोपयोगिन उक्ताः । पाहि पाहीत्यादिर्द्विरुक्तं भयेन । मानोद्धतेर्गर्वोद्धतेः । अद्य· आ· अयताम्· आगच्छतु ॥ १० ॥

इति गोदुहामार्तस्वरं स्वरंहसा विसारिणं श्रीकृष्णः समाकर्ण्य माकर्ण्यमतिविरसत्वेन दुरावारा वारां पत्युरनुचरापसदानां सदानान्ध्यवर्जितानामक्रियेयमिति जानन् यथास्थित एव तद्व्रजवल्लवकरसुकृतकृतसमाकर्ष इव तत्पुरपुरस्कारकारणत एव तत्र समभिजगाम ॥ ११ ॥

अतिविरसत्वेन मा कर्ण्यं न कर्णहितम् । वारां पत्युर्वरुणस्यानुचरापसदानां भृत्याधमानामियमक्रिया कुकर्म· इति जानन् परामृशन् । अक्रिया कथंभूता, दुरावारा तेनापि वारयितुमशक्या, तस्य को दोष इति भावः । सदा सन्तु वा· अनन्धस्य भाव आनान्ध्यं चक्षुष्मत्त्वं तद्वर्जितानाम् । तद्व्रजं व्रजस्य यत् सुकृतं तेन कृतः समाकर्षो यस्य तथाभूत इव । तत्पुरस्य पुरस्कार आदरः साफल्यमिति यावत् स एव कारणं हेतुस्तत एव, निजसंनिधानेन तत्पुरं कृतार्थीकर्तुमित्यर्थः । तत्र वरुणपुरे ॥ ११ ॥

अथ तत्र गतवति भगवति प्रचेतःसदनं चेतःसदनं बभूव गोकुलभुवां च कुलभुवां च बालानाम् ॥ १२ ॥

चेतःसदनं चेतसोऽवसादः, "सदॢ विशरणगत्यवसादनेषु" । गोकुलभुवां व्रजवासिमात्राणां, कुलभुवां कुलजानां बालानां रमणीनाम् ॥ १२ ॥

न भवति यद्यपि सुदृशां
सद्भावलोको हरेस्तदपि ।
एकग्रामनिवासो
ह्येकालयवासवद्भाति ॥

तेन प्रवासवासरमिव तं भगवतः श्रीकृष्णस्य विदित्वानुरागिण्योऽबला बलापायपातुकशरीरा इव समायत क्षणमपि युगसहस्रमिव मन्यन्ते स्म ॥ १३ ॥

बलस्यापायेन पातुकानि पतनशीलानि शरीराणि यासां ता इव ॥ १३ ॥

न शृणोति नैव पश्यति
न वदति न स्पन्दतेऽङ्गनाविततिः ।
अन्तःकरणमिवास्या
गतमिव कृष्णस्य सङ्गेन ॥ १४ ॥

बलापायेत्यादिना "चिन्तात्र जागरोद्वेगौ तानवं मलिनाङ्गता । प्रलापो व्याधिरुन्मादो मोहो मृत्युर्दशा दश"इत्यासां द्विवा दशाः सूचिता अथ्यन्तर्भाव्यसहसैव दशम्यपि दशा· आसन्नप्राया बभूवेत्याह । न शृणोतीति मोहः ॥ १४ ॥

जीवितमिव न विलोलं
प्रेमास्यास्तेन जीविते॓ऽपि गते ।
प्रियविरहे खिन्नाङ्गीं
राधां प्रेमैव जीवयति ॥ १५ ॥

वृन्दावनेश्वरी तु दशमीमेव दशां संश्रितवती, ननु तर्हि संवीजनचन्दनसेकादिकं परिजनैः किमर्थं कृतं तत्राह जीवितमिवेति, अयमर्थः, जीवितेन हि प्रियविरहानलज्वालां सोढुमसमर्थेन झटित्येव तस्या

देहाद्विष्क्रान्तवता स्वचापल्यदोष एवोपार्जितः, प्रेम तु महास्थिरं तादृश्या ज्वालयापि दुर्जरं प्रत्युत प्रतिक्षणं वर्धमानं सत् स्वशक्त्या तद्दृढं संजीव्यैव रक्षितुं स्वस्थैर्यसादृश्यमेव प्रथयामास· इति, एवं च जीविते नष्टेऽपि न प्रेमास्याः क्षीयत इत्यायातम्, इदमत्र तत्त्वं, करुणविप्रलम्भेऽस्मिन्ननिष्टाशङ्कामयेऽपि श्रीगर्गादिसर्वज्ञवाक्यविश्वासात् पुनः प्राप्तिप्रत्याशया मदन्या का वा तदा मत्कान्तं सुखयितुं पारयिष्यति मद्दशां श्रुत्वा तस्यापीदृशी दशा नूनं भविष्यतीति शङ्कया च कृच्छ्रेणापि प्राणधारणमेव दुष्करं प्राणत्यागश्च सुकर एवोक्तन्यायेन प्रेमांशप्रातिकूल्योद्भावकश्च, तेनास्या जीवनं प्रेमबलेनैव रक्षितमगतमेव गतत्वेनोत्प्रेक्षितम् ॥१५॥

तथापि ।

संवीजनेन नलिनीदलतालवृन्तैः
सेकेन चन्दनजलैस्तनुदाहमस्याः ।
शेकुर्न संशमयितुं यदि बन्धुवध्वो
मूर्च्छा सखी किमपि निर्वृतिमाततान ॥ १६ ॥

तेन नवम्येव दशास्याः प्राप्तावसरेत्याह संवीजनेत्यादि ॥ १६ ॥

प्रशिथिलतूलकधूनन-
मूलकमनुमीयते श्वसितम् ।
तेन च जीवनमस्याः
सखीजनैस्तेन च स्वायुः ॥ १७ ॥

प्रथिशिथिलस्य तूलकस्य धूननं कम्पनमेव मूलं गमकं यस्य तत्· श्वसितम् ॥ १७ ॥

आयाति कृष्ण इति बन्धुवधूजनोक्त्या
कृच्छ्रेण पङ्कजदृशा स्थिरपक्ष्मतारे ।
उन्मीलिते बत यथेव दृशौ तथेव
ते तस्थतुर्लिखितपङ्करुहद्वयीव ॥ १८ ॥

यथैव· उन्मीलिते तथैव तस्यतुरिति, सखीवाक्यविश्वासान्मूर्च्छाभङ्गे सति· उन्मीलिताभ्यां दृग्भ्यां कृष्णमदृष्ट्वा· एता मृषैव मामाश्वासयन्तीति तदैव पुनर्मूर्च्छामालम्बितवत्यास्तस्या व्याजेन दृशोर्निमेषाभावात् ॥ १८ ॥

कृष्णः क्षणादिह समेष्यति सर्वथेति
स्वालीजनस्य वचने यदपि प्रतीतिः ।
हन्त क्षणो यदि स एव युगायते तत्
किं दूषणं बत तया विरहव्यथायाः ॥ १६ ॥

क्षणादिहेति, कृष्ण आयातीति नास्माभिर्मृषोक्तं किंतु क्षणमात्रविलम्बेनेति किमिति न विश्वस्यत इत्यभिप्रायज्ञानात् ॥ १९ ॥

उन्मील्य नेत्रमथ कृष्णमलोकयन्त्या
हृत् पूर्वतोऽपि नितरां परितप्तमस्याः ।
हृद्वर्तिकृष्णमहसः पटली यदेषा
धाराञ्जनाश्रुकपटेन बहिर्बभूव ॥ २० ॥

उन्मीलिते बत यथैव दृशौ तथैवेत्यत्र किंचिदवर्णितमवशिष्टं पुनः पद्येनैव वर्णयितुं तदेवोद्दृङ्कयति· उन्मील्येति, पूर्वतोऽपि तप्तमिति तप्ततैलकटाहमध्ये जलबिन्दुपातादिव तन्मध्यतः सखीजनाश्वासप्रक्षेपात्, हृद्वर्तीति, तत्तापसहनासमर्थैवेति भावः ॥ २० ॥

एवं गतवति करुणावरुणालये वरुणालये तमालोक्य ससंभ्रममुपगम्य प्रणम्य प्रणयाभिभूतः प्रचेताः प्रचेताश्चर्ययाश्चर्ययार्घ्यादिकया कयाचन पूजयित्वा जयित्वादधृष्यमहसं महसंचयमिव मूर्तिमन्तं मूर्तिमन्तं चिदानन्दरसमिव भगवन्तं तुष्टाव ॥ २१ ॥

प्रचेता वरुणः प्रचेताः प्रकृष्टचित्तवान्· चर्यया परिचर्यया· आश्चर्ययापूर्वया· अर्घ्यादिक्रिया पूजयित्वा तुष्टाव । कथंभूतं, जयित्वात् सर्वोत्कर्षवत्त्वात्· अधृष्यतेजसं महसंचयम्· उत्सवसमूहं मूर्तिमन्तमिव

देहधारिणमिव" इति सपरिकरनिजपरमोल्लासः" चिदानन्दरसं मूर्तिमन्तं घनीभूतमिवेत्यननुभूतचरपरमरसास्वादश्च सूचितः, "मूर्तिः काठिन्यकाययो"रित्यमरः ॥ २१ ॥

नमस्ते करवाम वामदेवादिदेवादिदेव देवकीगर्भरत्न रत्नगर्भाभारावतारकावतार कामकोटिकमनीय कृतार्थोऽहमद्य निरवद्यनिरवकाशप्रकाश प्रकटपरमानन्द नन्दतनय तव चरणरजो रजोऽपहारि मम पुरीपुरीतत्परिशोधनं समजनि जनिरपि मे कृतार्था ॥ २२ ॥

वामदेवः शंभुस्तदादीनां देवानामप्यादौ दीव्यतीति हे तथाभूत, तदपि देवकीगर्भमधिवसतो रत्न नीलमणिस्वरूप, किमर्थं, रत्नगर्भायाः पृथिव्या भारावतारकः अवतारो यस्य तथा, न केवलमेतदेव प्रयोजनं किंतु स्वरूपमाधुर्यानुभावनेन जगदपि कृतार्थयितुमित्याह कामकोटीत्यादिभिस्त्रिभिर्विशेषणैः, तत्र प्रथमेन देहसौन्दर्यस्य द्वितीयेन तच्छवीनां तृतीयेन तत्स्वरूपतत्त्वस्य विवृतिः, निरवद्यश्चन्द्रसूर्यादीनामिवातिशीतोष्ण्यादिरहितो निरवकाशोऽवच्छेदशून्यः प्रकाशो यस्य तथा, प्रकटेति, प्रकटत्वं प्रपञ्चगोचरीभूतत्वं परमत्वं मायातीतत्वं, स्वीयभावानुसारेण पूर्वं देवकीगर्भरत्नेत्युक्त्वापि सम्प्रति माधुर्यनिमग्नचित्ततया प्राह नन्दतनयेति, तव चरणरजो मम रजोऽपहारि रजोगुणहन्तृ समजनि, तथा मम पुर्यां पुरीं स्ववाटीवर्गं ये तन्वन्ति ते पुरीपुरीततो मण्डलेश्वरास्तेषामपि परिशोधनं, "गमः क्वा"वित्यत्र "गमादीनामिति वक्तव्य"मिति तनोतेः क्विप्यनुनासिकलोपे रूपम् ॥ २२ ॥

किंच ।

कालाख्यभवदपाङ्गभङ्गिभङ्गुरमिममुपलभ्य विभवं विभवन्तं भवन्तं यन्न विद्मो विद्मोहेन तत्र तत्रभवत्या भवत्यायतो हेतुः प्रभावो भवन्मायायाः ॥ २३ ॥

विभवः संपत्तिः, विभवन्तं विभुं, विद्मोहेन ज्ञानमोहेन, आयतो विस्तृतो हेतुर्भवति ॥ २३ ॥

मा यायावरादिमुनिनिकरदुर्गयानयातः परं परंपरागतेन मोहेन नष्टदृशो मादृशो माधव कारयितुमर्हसि ॥ २४ ॥

यायावरादीनामपि मुनीनां निकरैर्दुर्गया दुस्तरया॰ अनया मायया॰ अतः परं मद्विधान् नष्टदृशः कारयितुं मा॰ अर्हसि ॥ २४ ॥

हन्त हन्तरघासुरस्य सुरस्यचरित तापकृतापकृताप्युपकृतं मे तव जनकं जनकंसन समानयता मानयतात्मनः सौबुद्ध्यं बुद्ध्यंशलेशाभाववतापि मदनुचरेण ॥ २५ ॥

मदनुचरेण तव जनकं समानयता मम तापकृता तथा॰ अपकृता भृत्यापराधेन स्वामिनो दण्ड इति न्यायेन ममापकारं कुर्वतापि॰ उपकृतमेव । हे जनकंसन जननाम्नोऽसुरस्य कंसन घातक, "कसि हिंसायां" हे जनार्दनेत्यर्थः । मदनुचरेण कीदृशेन,आत्मनः सौबुद्ध्यं सुबुद्धित्वं मानयता,वस्तुतस्तु बुद्ध्यंशलेशस्याप्यभाववता ॥ २५ ॥

रेणवस्ते चरणकमलयोरनयोरनयोद्धुरस्य मम शिरःशेखरीभूताः खरीभूताः किल्बिषविषज्वालाश्च शान्ताः ॥ २६ ॥

अहो परमदुर्लभं वस्तु मया कृतागसापि लब्धमित्याह रेणव इति, किल्बिषमपराधः पापकूटं संसारो वा तद्विषज्वालाश्च शान्ताः । कीदृश्यः, खरीभूताः ॥ २६ ॥

तेन वन्दे नवन्दे*वाधिदेव ते रुचिरुचिरताजितनवतमालमालम्बमानवनमालमाललितशतपत्रपत्रनेत्रमाबन्धुरोदरमदरमहःपूरमायतवृत्तद्विबाहु बाहुलेयजनकादिवृन्दारकवृन्दवन्द्यचरणकमलमिदं वपुरपूर्वम् ॥ २७ ॥

हे देवाधिदेव तेन हेतुना तव नवं वपुरिदं वन्दे । कथं भूतं, रुचीनां कान्तीनां रुचिरतया जितो नवतमालो येन तत् । आ सम्यक्॰

* संधिः प्राग्वत् ।

लम्बमाना वनमाला यत्र तत् । आयतौ· आजानुलम्बिनौ वृत्तौ सुवलि-तौ द्वौ बाहू यत्र तत् । बाहुलेयः कार्त्तिकेयः ॥ २७ ॥

इत्यभिष्टुत्य चरणकमलममलमधुगन्धिनाम्बुनाम्बुनाथो निज-करकिशलयेन धावयामास धावयामास च सकलापदं पदं सकल-सौभाग्यस्य ॥ २८ ॥

सकलसौभाग्यस्य पदं चरणकमलं धावयामास क्षालयामास, सकलापदं धावयामास द्रावयामास, "धावु गतिशुद्ध्योः" ॥ २८ ॥

तदनु दनुजदमनं पुनर्जगाद भगवन्ननुगृहाण गृहाण यद्रोचते च ते वस्तुषु मदीयलोकरत्नभूतेष्वेतेष्वेतदखिलं तवैव वै बहुना किमुक्तेन ॥ २९ ॥

मदीयलोके रत्नभूतेषु· एतेषु वस्तुषु मध्ये यद्रोचते तद्गृहाण ॥ २९ ॥

वयमपि तावका बकार्दन तत एवास्माभिः समुपचितसुकृत-सुकृतफलोदयवशादेव क्षणमात्रमपि लब्धचरणपरिचरणाः पितापि तावदयं ते हन्तेह रक्षितोऽक्षितोषाय भवदवलोकनोत्थाय नोत्थाय विरतो भवति भवति कुतोऽभिलाषः ॥ ३० ॥

हन्त· अनुकम्पायाम्· अकष्टमेव· इह रक्षितः, अक्षितोषाय भव-दवलोकनादुत्तिष्ठति योऽक्ष्णोस्तोषस्तदर्थम् ॥ ३० ॥

तथापि क्षम्यतामयमपराधोऽपराधोचितदण्डधर धरणितला-लंकार किंवा क्षमाभृत्या भृत्यापराधे स्वामिनो दण्ड इति ममोद्दण्डो दण्डो ह्येव समुचित इति कृताञ्जलि जलितमदमतिकम्रेडितमाम्रे-डितमाकर्ण्य पाशभृतो भृतोदारकारुण्यः श्रीकृष्णो निजगाद ॥ ३१ ॥

भृत्यस्यापराधे सति स्वामिनः क्षमाभृत्या क्षमाधारणेन हेतुना दण्डः, यदि तु भृत्यं न क्षमते स्वयं दण्डयत्येव तदा स्वामी न दण्ड्य इत्यर्थः, समुचित इत्यत्र क्रियतामित्यनुक्तिराज्ञापनदोषप्रसक्तिभयात्, कृ-

ताञ्जलि यथा स्यात्· ज्वलितमदं जरा संजाता· अस्य जरितो ज्वलितो मदो मत्तता येन तद्यथा स्यात् तथा, अतिक्रममोडितम्, आम्रेडितं द्विस्त्रिरुक्तम् ॥ ३१ ॥

परितुष्टोऽस्मि भोश्वरमदिगधीश धीशबलताभावेन भावेन ते ॥ ३२ ॥

धीशबलता बुद्धेः शाबल्यं कर्बुरत्वं मालिन्यमित्यर्थः· तस्या अभावो यत्र तेन भावेन प्रेम्णा ॥ ३२ ॥

अखिलमेवैतन्मे तन्मेदुराशय दुराशयदूरवर्तिने मह्यं किं पुनर्देयं त्वय्येवास्तु वास्तुरयं ममैवेति निगद्य मितममितमधुरं धुरंधरो माधुर्यवतामथ विधाय पितरमग्रेसरमग्रे सरहसो विस्मयस्य स्मयस्य च वर्तमानः समाजगाम व्रजपुरं व्रजपुरंदरनन्दनः ॥ ३३ ॥

मेदुराशय हे स्निग्धाशय । पितरम्·अग्रेसरं विधाय । सरहसः सरहस्यस्य विस्मयस्य स्मयस्य प्रफुल्लतायाश्च· अग्रे वर्तमानः सन् समाजगाम । तदागमनानन्तरं व्रजस्थानां तादृशविस्मयप्रफुल्लते समाजग्मतुरित्यर्थः ॥ ३३ ॥

तदा प्रभूतभूतमङ्गलकोलाहलोहलोलमनसां सहचरीणां सह चरीणां प्रमोदसुधाधारामुद्वहन्तीनां विरहिसखीसमाश्वासमाश्वासरसतया जनयन्तीनां नयन्तीनां प्रेमपरिपाकं महानुत्साहो जातः ॥ ३४ ॥

तदा सहचरीणां महानुत्साहो जातः, प्रथमं प्रभूतभूतः प्रचुरीभूतो यो मङ्गलकोलाहलस्तेन· ऊहः श्रीकृष्णागमनवितर्कस्तेन लोलमनसां, ततश्च जनसंघमुखात् तदागमनं निर्धार्य सह च साहित्येनैव रीणां चरितां प्रमोदसुधाधाराम्· उत्कर्षेण वहन्तीनां, ततश्च विरहिणी या सर्वयूथेशा तस्याः समाश्वासम्· आशु· आसरसतया जनयन्तीनां, यथासौ जायते तथा कथयन्तीनामित्यर्थः ॥ ३४ ॥

अथ व्रजपुरपुरंदरेणादरेणादरेणातिविस्मयतः पाथभृतः पुरः श्रीरश्रीयमाणमालिन्या वनमालिन्यावनत्यं च लालित्यं च स्तुतीनां यदवलोकयामासे ॥ ३५ ॥

व्रजपुरपुरंदरेण यदवलोकयामासे तदखिलं तदाननतः॰ आश्रुत्य गोपा इमं श्रीकृष्णम्॰ अखिलजगतो गोपायितारम्॰ ईश्वरं मन्यमानाः किमयं ब्रह्माख्यं परमहोऽस्मान् दर्शयिष्यतीत्येवं हृदि संकल्पकल्पका यदि बभूवुस्तदा॰ अमीषां ब्रह्माकारां धिषणाया वृत्तिं कारयामासेत्यन्वयः। अदरेण निर्भयेन। न श्रीयमाणं न स्वीक्रियमाणं मालिन्यं यया सा पुरःश्रीः। आवनत्यम्॰ अवनतत्वम्॥ ३५॥

तदाननतो नततोषतरलास्तदखिलमाश्रुत्य श्रुत्यर्थमिव मूर्तिमन्तमिमं तमिमे गोपा गोपायितारमखिलजगतो गतोहं मन्यमाना मानातीतोऽयमीश्वरः स्वयमात्मनो ब्रह्माख्यं परमहो महोदारं किमहो दर्शयिष्यतीति सर्वे यदि संकल्पकल्पका बभूवुः॥ ३६॥

नततोषतरला अपितु परमगम्भीरा अपि तदाश्रुत्य॰ आनन्दचपलाः सन्तः। गतोहं गतवितर्कं यथा स्यात् तथा मन्यमानाः। मानातीतो ज्ञानातीतो निष्परिमाणो वा। परमहः परमतेजोमयम्॥ ३६॥

तदा तदाज्ञाय तेषां मनोरथगतमथ महाकारुणिको नराकारवपुर्ब्रह्म ब्रह्मतोऽप्यानन्दकन्दकमनीयमिति व्यतिरेकेण बोधयिष्यन् धयिष्यन्नतिमोहतमोहतधियां कुतर्ककृतां संदेहं व्रजभुवाममीषां ब्रह्माकारामधिकाराममधिषणाया वृत्तिं कारयामास॥ ३७॥

महाकारुणिक इति, मुक्तिसुखमेवामी बहु मन्यन्ते तत् तु किंचिन्मात्रादपि भक्तिसुखात्॰ न्यूनं किं पुनरेतदीयादिति तदनुभावनेनैव तस्यारोचकतामेषां जनयित्वा वर्तमानमेतत् प्रेमसुखमेव समुत्कर्षयिष्ये तथा वरुणलोकसंपत्तिमात्रश्रवणेनैवानुमितसर्वोत्कर्षे मद्वैकुण्ठलोके वासेप्सूनेतान्॰ तदनुभावनेनैव ततोऽपि निवर्तयिष्य इति स्वगतं परामृश्येत्यर्थः। व्यतिरेकेण नराकारब्रह्मविषयकप्रेमास्वादस्य त्याजनेन। अतिमोहेन तत्कारणभूततमसा च हता धीर्येषां तेषां कुतर्कं कुर्वतां संदेहं धयिष्यन्॰ चुलुकीकरिष्यन्, दूरीकरिष्यन्नित्यर्थः। अधिक आरामः प्रेमसुखास्वादमयो यस्यास्तादृश्या अपि धिषणाया बुद्धेर्वृत्तिं ब्रह्माकाराम्॥ ३७॥

Digitized by Google

ततश्च ब्रह्मसाक्षात्कारेऽविकारेऽविशेषतस्तदानन्दानानन्दानाकलनानुभवबाधे बाधेव तेषां यद्यजनि जनितकरुणास्तदा तदाकारवृत्तितो मुक्तियातुधानीजठरपिठरपिनद्धानमूनमूढयन्निव निवद्धीभूतप्रणयानात्मजनान् न कदापि दापितमुक्तिग्रहग्रहणान् करोतीति सिद्धान्तयन्निव निष्क्रमय्य भूयो भूयोऽपिहितहितमानन्दनन्दकं कुतोऽपि कदापि न वै कुण्ठं वैकुण्ठं नाम परमं स्वलोकं दर्शयामास ॥ ३८ ॥

तस्य कृष्णस्य· आनन्दश्च· अनानन्दश्च तयोः स्वकर्तृकलालनालाननोत्थयोरनाकलनम्· अदर्शनमज्ञानं वा तेन हेतुना· अनुभवस्य पूर्वसिद्धस्य बाधे सति तेषां बाधा· इव व्यथा· इव यद्यजनि तदा तयैव बाधया जनिता करुणा यस्य तादृशः सन् ब्रह्माकारवृत्तितो निष्क्रमय्य भूयः पुनरपि भूयो बहुतरं वैकुण्ठं दर्शयामास । दापितेति भक्तेः कर्तृत्वं स्वस्य च प्रयोजकत्वमिति णिच्, दापितेन मुक्तिग्रहेण ग्रहणं स्वीकारो येषां तथाभूतान् न करोति किंतु कथंचिद्भक्तेच्छानुरोधात् तान् कियन्तं कालमेव तत्स्पृष्टान् करोतीति, अत एवोक्तं “मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्त” इति । न पिहितमाच्छादितं हितं यत्र तत्· आनन्दस्य नन्दकं समृद्धिकरम् ॥ ३८ ॥

ततश्च समाधितः समुत्थिता इव तमथ मूर्तं ब्रह्मानन्दमिव समालोक्यतममालोक्य तमसः परं परं प्रमोदमापुरमी पुरमीमांसकाः सन्तः किमपि विषयीकर्तुं न शक्नुवन्ति स्म ॥ ३६ ॥

समालोक्यतमम्· अतिशयेन दर्शनीयं तं वैकुण्ठं तमसः प्रकृतेः परम् । परमं प्रमोदमापुरिति, मुक्तियातुधानीजठरतो निष्क्रान्तानां तेषां तेनापि संधुक्षणप्राप्तेः । ततश्च पुरस्य निजगोष्ठवसतेर्मीमांसका विमर्शकाः सन्तः किमपि वैकुण्ठीयं वस्तु विषयीकर्तुं द्रष्टुं श्रोतुं स्प्रष्टुं घ्रातुं वा न शक्नुवन्ति स्म ॥ ३९ ॥

क्षणमात्र एव ब्रह्मकैवल्यं वल्यं च वैकुण्ठसुखमनुभवन्तो भ-

वन्तो युगसहस्रमिव मन्यमाना न्यमाना इव बभूवुर्निखिलघोषभग-वतो भगवतो मुखानवलोकेन ॥ ४० ॥

तत्र हेतुर्मधुरनरलीलामयस्य श्रीकृष्णस्यादर्शनमेवेत्याह तथामाच एवेति । बल्यं बलार्हं, केवल्याद्बलवदित्यर्थः । न्यमाना इव नितराम्-अमानास्तत्सुखवञ्चनादनादृता दीना इव ॥ ४० ॥

नवलोकेन पुनस्तेन तेषामानन्दं वर्धयितुं वर्धयितुं च परितापं पुनस्तदपि वैकुण्ठं कुण्ठं चकार कारणरसविग्रहो भगवान् ॥ ४१ ॥

ततस्तदपि वैकुण्ठं कुण्ठं चकार, व्रजवासिनामसारस्यापातात् ततोऽपि तान् निष्क्रमयामासेत्यर्थः । किमर्थं, नवलोकेन नवीनस्यावलोकेन यद्वा नित्यनवो यो लोको गोकुलाख्यस्तेन । परितापं च वर्धयितुं छेदयि-तुम् । नन्वेतस्य कुतस्तथा शक्तिस्तत्राह, कारणभूतश्च रसमयश्च विग्र-हो यस्य तथा, कर्तुमकर्तुमन्यथाकर्तुं च समर्थ इत्यर्थः ॥ ४१ ॥

तदनन्तरं तरङ्गितमहा महानन्दनिर्वृताः श्रीकृष्णं विलोक-यन्तो बभूवुरेते. एतेन ब्रह्मब्रह्मस्वरूपस्वलोकसायुज्ययुज्यमानता-भ्यामपि तदलौकिकलौकिकलीलालावण्यादिकपरिशीलनमेव परमरम-णीयमिति सिद्धान्तः ॥ ४२ ॥

ब्रह्म च ब्रह्मभूतः स्वलोको वैकुण्ठश्च तयोर्यथाक्रमेण सायुज्यं च युज्यमानता च ताभ्यामपि, अत एव "ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता" इत्यादेस्तात्पर्यार्थमुद्घाटयद्भिः श्रीरूपगोस्वामिचरणैरुक्तम्,

"लोको रम्यः कोऽपि वृन्दाटवीतो
नास्ति क्वापीत्यञ्जसा बन्धुवर्गम् ।
वैकुण्ठं यः सुष्ठु संदर्श्य भूयो
गोष्ठं निन्ये पातु स त्वां मुकुन्दः" ॥

इति ॥ ४२ ॥

स एवं हि बंहिष्ठमहिमा नहि मानवद्भिरपि वितर्ककुतर्ककुलकर्कशकश्मलमतिभिर्वेदितुं सुशको दुःशको दुःशीलैरनुसंधातुमपि यः खलु लीलारिङ्गदपाङ्गतरङ्गतरलिममात्रेणैव प्रयुज्य सायुज्यसाधीयस्त्वमथ ततोऽतिदुर्घटघटनविघटनविधिना निष्कासयामास किमशक्यं तस्य लीलाशक्तेरिति ॥ ४३ ॥

इत्यानन्दवृन्दावने कै*शल्यलीलालताविस्तारे ब्रह्मलोकदर्शनो नाम षोडशः स्तबकः ॥ १६ ॥

मानवद्भिरपि ज्ञानवद्भिरपि । अत्र स्तबकद्वयोक्तलीलासमयक्रमो वैष्णवतोषणीदृष्ट्या ज्ञेयः, यथा कार्तिकस्यामावास्यायां कर्मवार्त्तोत्थापनेन• इन्द्रमखभङ्गः, तच्छुक्लप्रतिपदि गोवर्धनमखोत्सवः, द्वितीयायां यमुनातीरे भ्रातृद्वितीयाभोजनोत्सवः, तृतीयामारभ्य नवमीपर्यन्तं गोवर्धनधारणं, दशम्यां गोपानां विस्मयकथाबाहुल्यम्, एकादश्यां गोविन्दाभिषेकः, द्वादश्यां वरुणलोकगमनं, पौर्णमास्यां ब्रह्मलोकदर्शनमिति ॥ ४३ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां षोडशस्तबकसंगमनम् ॥ १६ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तदशस्तबकारम्भः ॥

अथ चतुर्मुखमुखसर्वगर्वगरिमखण्डनानन्तरमनन्तरमदमदकलकन्दर्पदर्पदमनाय ॥ १ ॥

जयत्यतुलमाधुर्यवर्षिणी विश्वहर्षिणी ।
लक्ष्मीसंतर्पिणी रासक्रीडा गोपीप्रक†र्षिणी ॥

* कैशोर—इति पा०

† प्रह—इति पा० ।

शुभ्रांशुवेणुनिनदप्रमदाभिसार-
कूटाभिधानविरहाधिविवादवाचः ।
कान्तप्रसादनविहारतिरोहितानि
वर्ण्यानि सप्तदशके स्तबके क्रमेण ॥

अथ वनसीम्नः सीमन्तं सीमन्ततुल्यं वर्त्म- आश्रित्य भगवान् प्रदोषे समये स्वयोगमायामखिलेषु कार्येषु तदुपयोगिषु नियोज्य रन्तुं मनश्चक्रे- इत्यन्वयः ।

तत्र चत्वारि प्रयोजनानि चकारद्वयेन- आनुषङ्गिकत्वमुख्यत्वाभ्यां द्विशो द्विशो विभज्य क्रमेण निबध्नाति, अनन्तरेण निश्छिद्रेण निविडेन निरवधिना वा मदेन मदकलो मत्तो यः कन्दर्पस्तस्य दर्पदमनाय, यथा- अहं परमेष्ठी महैश्वर्यवानिमं मोहयामीति प्राकृतजगदैश्वर्यमत्तस्य चतुर्मुखस्य मदं चिदानन्दघननिजाचिन्त्यमहैश्वर्याविष्कारेण व्यखण्डयत् तथैवाहमेव शृङ्गाररसमयो धीरललितो विश्वमेव मोहयामीत्यात्तमदं कन्दर्पमपि निजरासादिविलासदर्शनेन "साक्षान्मन्मथमन्मथ" इति ब्रह्माणमिव तमपि संमोह्यैव गर्वपर्वतादवरोहयामासेवेत्यर्थः ॥ १ ॥

निजमुरलिकालिकानयिताप्तपरीक्षापरीष्टये च ॥ २ ॥

निजा मुरलिकेव- आलिका- अनुकम्पितसखी तस्याः सकाशात् तया वा- आप्ता गृहीता या शिक्षा तस्याः परीक्षापरीष्टये प्राकाम्याय, "परीष्टिः परिचर्यायां प्राकाम्येऽन्वेषणे स्त्रिया"मिति मेदिनी, यथेष्टपरीक्षार्थमित्यर्थः ॥ २ ॥

भुजयुगयुगलेन युगपदनेकरमणीरमणीयपरिरम्भाय ॥ ३ ॥

भुजयुगं यौति मिश्रयति यद्युगलं तेन, "मित्रय्वादिभ्य उपसंख्यान"मिति डुः ॥ ३ ॥

कात्यायन्युपासनासनातनानां कुमारीणामारीणाममृतधारामिव नवानुरागरसलहरिकामकामर्हितां हितां समकालमकालपाकेन केन-

चिदिच्छाविशेषेणाशेषेणानुमोदयितुं च समये मयेमा रंस्यथ क्षपा इति मनीषितबहुतररजनी रजनीरेकान्तदीर्घा निर्माता ॥ ४ ॥

कात्यायन्युपासनमेव· ऋा सम्यक् सनातनं नित्यं यासां तासां, विशेषोपचारमयमासमात्रार्चनव्रतं समाप्यापि नित्यं तामुपासीनानामित्यर्थः, ऋारीणां सम्यक् चरन्तीं न कामेन बृंहितां, कान्तसुखतात्पर्यकत्वात् प्रेम्णैवेत्यर्थः, हितां स्वीकारोचितां, समकालं परोढारासंभोगादेस्तुल्यकालमेव ।

ननु ताः कनीयस्यो विचित्रनाट्यगानवैदग्ध्यप्रगाढसंभोगयोग्यतावत्यः सहसैव कथमभूवंस्तत्राह, अकालेऽपि पाको यस्मात् तेन, तदीयेच्छाशक्तेः किमशक्यमिति भावः, मनीषितस्य बुद्धिविषयस्य रासादिविलासस्य बहुतरा जनिहत्यस्त्रियासु ता रजनी रात्रीरेकान्ततो दीर्घा ब्रह्मरात्रिकल्पा निर्माता, "वृचन्तो"ऽयम् ॥ ४ ॥

मातापित्रोरपि पूर्वपूर्वनिशानिशान्तावस्थानप्रत्ययं प्रत्ययं भगवान् कृतशक्तिनिक्षेपोऽक्षेपोदारसारसाधुतया धुतया लोकापेक्षयाक्षयामोदः ॥ ५ ॥

अक्षेपा विक्षेपरहिता· उदारा महती सारा श्रेष्ठा या साधुता तया पूर्वपूर्वनिशास्विव निशान्तावस्थानप्रत्ययं सुखशय्यायां मया शायितः पुत्रः सुखेनैव निद्रातीति गृहस्थितिप्रतीतिं प्रति कृतः शक्तिनिक्षेपो येन सः, यतोऽयं भगवान् लोकद्वयापेक्षया धुतया खण्डितया सत्या· अक्षय आमोदो यस्य सः, तदुक्तं"रागेणोल्लङ्घयन् धर्म"मित्यादि ॥ ५ ॥

वनसोमसीमन्तमाश्रित्य प्रदोषे प्रदोषे विराजमानो मानोज्ज्वलाः संकल्पितसंकल्पितगणराचदेवता वताग्रे मूर्तिमतीराशाप्रतीक्षणक्षणवतीरालोक्य सकलाः सकलाः सत्यो भवत्यो भवन्त्विति निगद्य च ॥ ६ ॥

प्रकृष्टा दोषा रात्रिर्यस्मात् तथाभूते प्रदोषे समये संकल्पिताः सम्यक्कल्पवदाचरिताश्च ताः संकल्पिताः प्रतिज्ञाताः शारदाश्चेति या

गणरात्रदैवता बहुराज्यधिष्ठात्र्यस्ता आलोक्य, "गणरात्रं निशा बहूः" इत्यमरः, इयमुत्प्रेक्षैव ज्ञेया, वस्तुतस्तु यदि सकला एव रजन्यः पूर्णचन्द्रा विलासबहुला अतिदीर्घाः संभवेयुस्तदैव मे विचित्ररासादिविलासः सिध्येदिति यदैव तदिच्छा समजनि तदैव तस्य सत्यसंकल्पत्वात् तास्तथाभूता बभूवुरिति ॥ ६ ॥

विशेषरहश्चिकीर्षिचकीर्षितकेलिकलाकलापस्यानियोजितसर्वाध्यवतयाव्रतया भगवतीं स्वयोगमायामायासरहितामखिलकार्येषु नियोज्य रन्तुं मनश्चक्रे ॥ ७ ॥

योगमायानियोजनमप्येवं ज्ञेयम् । रहो रहस्यं तस्य चिकीः कर्त्तुमिच्छुः "सवन्तात् क्विप्" । अनियोजितसर्वाध्यवतया नियोगं विनापि॰ अभिप्रायज्ञानादेव या सर्वाध्यवता तया॰ आयासरहिताम् ॥ ७ ॥

अथ ताश्च निशा निशातमहसो महसोषूयमाणसुरभिसुरभिनिदाघशरत्कालिकशोभाबहुशोभाबहुलतयापरिमिता अपरिमिता अभवन् ॥ ८ ॥

नितरां शातं सुखमयं महो यासां ताः, महेन॰ उत्सवेन सोषूयमाणा अतिशयेनोत्पद्यमानाश्च ताः सुरभयो मनोज्ञाश्च याः सुरभिनिदाघशरत्कालिक्यः शोभास्तासां बहुशो भूरिशो भावबहुलतया प्रकाशबाहुल्येन॰ अपरिमिताः परिमाणशून्याः, "मनोज्ञे च सुगन्धौ च वाच्यवत् सुरभि स्मृतमिति विश्वः, "वसन्ते पुष्पसमयः सुरभि"रित्यमरः, न विद्यते परि सर्वतोभावेन मितमुपमा यासां ताः ॥ ८ ॥

चयाणामेव ऋतूनामनूनामनूत्तमां कुसुमादिश्रियं च शिश्रियुः ॥ ९ ॥

अनु॰ अनन्तरम्॰ उत्तमां कुसुमादिसमृद्धिं च शिश्रियुः श्रितवत्यः, कीदृशम्, अनूनां न॰ ऊनां, संपूर्णामित्यर्थः ॥ ९ ॥

तथाहि ।

हरिति हरिति हारी पूरयन् कर्णमोदं
मदकलकलकण्ठीकण्ठनादो जजृम्भे ।
सुमधुरमधुराजन्माधवीगन्धबन्धु-
र्गतिमतनुत मन्दश्चान्दनो गन्धवाहः ॥ १० ॥

तामेवैकैकपद्येन क्रमादुर्णयति, हरिति हरिति दिशि दिशि ॥ १० ॥

कुसुमकुलमफुल्लं मल्लिकावल्लिकानां
मदमधुपयुवानोऽलङ्कृता झङ्कृतेन ।
उपरि परिपिबन्तो वादयन्ते स्म शङ्खा-
निव निबिडनिदाघश्रीविहारोत्सवस्य ॥ ११ ॥

मल्लिकावल्लीनाम्, अफुल्लमविकसितमेव कुसुमकुलं परिपिबन्तो मदमधुपयुवानः शङ्खानिव वादयन्ते स्म, अत्र दार्ष्टान्तिके कोरकाणां पानं दृष्टान्ते च शङ्खानाम्, अग्रभागे मुखं विन्यस्य वादनं मत्तत्वव्यञ्जकम् ॥ ११ ॥

किंच ।

सरसि सरसि सारं सारमामोदमीयु-
र्मदकलकलहंसाः सारसाः सारसाश्च ।
विकचकुमुदिनीनां मण्डले गन्धलुब्धा
व्यधिषत रतिकेलिं चञ्चुलाश्चञ्चरीकाः ॥ १२ ॥

सारं सारं सृत्वा सृत्वा, आमोदं हर्षम् ॥ १२ ॥

अथवेलासमयसमयमानादरोदरोच्छलत्किरणः समुदियाय तुहिनकिरणः स च प्रथमं कोपारुणमुखकमलायाः कमलायाः कपोलपोलकः कनकताटङ्क इव ॥ १३ ॥

कोपेति, मानिन्याः कमलाया लक्ष्म्याः कपोले पोलकः, स्फीत

इत्यर्थः, "पुल महत्त्वे," कनकताटङ्कः स्वर्णकुण्डलं, स्वस्य पीतिम्ना गण्डस्यारुणिम्ना मिलितस्य पीतरक्तस्य मण्डलाकृतेस्तस्य· उद्यच्चन्द्रसादृश्यम् ॥ १३ ॥

युवजनहृत्पटरङ्गकुण्डवलय इवानङ्गरङ्गरजकस्य ॥ १४ ॥

तस्य कामोद्दीपकत्वमाह युवजनेति ॥ १४ ॥

नभःकुण्डताण्डविता रसमयसमयनिश्चयघटिका घटिकापात्रीव ताम्रमयी ॥ १५ ॥

मध्यगगनचिह्नमिषया तस्योदयस्थानात् किंचिच्चलनमालक्ष्याह, नभ एव कुण्डं तत्र ताण्डवितं चलनविशेषो यस्याः सा रसमयस्य स्निग्धस्य समयस्य निश्चयं घटयतीति सा घटिकापात्री दण्डप्रहरादिप्रमात्री, अनेन युवजनसंप्रयोगादिमनोरथसाधकत्वमुक्तम् ॥ १५ ॥

भगवद्विदृक्षयाक्षयामोदं पीतनपीतनवकान्तिकन्दलीकमुन्मुखं मुखं हरिहरिदङ्गनाया इव ॥ १६ ॥

ततोऽपि किंचिच्चलने त्यक्तारुण्यगुणस्य पीतिमानमालक्ष्याह, हरिरिन्द्रस्तस्य दिगेवाङ्गना तस्या मुखं भगवतो विदृक्षया·उन्मुखम्· उन्नतायमिव, पीतनेन कुङ्कुमेन पीता नवा कान्तिकन्दली यत्र तत्, अनेन तस्य प्रागभावकारणमपि सूचितं भगवतः पराङ्गनासमाकर्षकत्वगुणनिदर्शकत्वं चोक्तम् ॥ १६ ॥

कमलपरागरागपिञ्जरो राजहंस इव पूर्वदिक्सरसः ॥ १७ ॥

अथ तदैव नक्षत्रमण्डलीं प्रकटोदयां शरत्कालिकत्वेन पूर्वदिशोऽपि स्वच्छतामालक्ष्याह कमलपरागेति, कमलेति प्रथमातिशयोक्त्या नक्षत्राण्युक्तानि, व्रजस्त्रियोः श्रीकृष्णस्यापि राधानुराधादिस्वप्रेयसीगणकुचकुङ्कुमपिञ्जरितत्वापादकभाविविहारशुभसूचकत्वमप्युन्नीतम् ॥ १७ ॥

तत्कालकालपुरुषमथ्यमानगगनदध्युदध्युदितो नवनीतपिण्ड इव ॥ १८ ॥

तथान्तरे च तमदृष्टचरस्निग्धाह्लादमयशुद्धश्वेतिमधरं स्वकान्त्या च श्वेतीकृतगगनमालक्ष्य सचमत्कारमसौ वर्णितलक्षणश्चन्द्रो न भवति किंत्वसावन्य एवेत्युत्प्रेक्षते, तत्कालेन शीघ्रेणैव काल एव पुरुषस्तेन मथ्यमानं गगनमेव दध्युदधिस्तस्मादुदितोऽभ्युद्गतो नवनीतपिण्ड इवेति, अनेनान्तर्बहिःस्नेहमयत्वेन लब्धविश्वासस्य विरहिणीजनस्यापि दिदृक्षणीयत्वम् ॥ १८ ॥

सितपटमण्डप इव रश्मिरश्मिवितानितः ऋतुराजस्य ॥ १६ ॥

ततश्च विरहिणीभिर्दुःसहतेजस्त्वेन कुञ्चितनेत्रतया दृश्यमानस्य तस्य किरणानां रज्जूपमत्वमालक्ष्याह सितपटेति,रश्मयः किरणा एव रश्मयो रज्जवस्तैर्वितानितो विस्तारितः, ऋतुराजस्य वसन्तस्य, तत्र शरदि तस्यापि सत्त्वात् ॥ १९ ॥

जगदण्डमण्डपस्थनभोविटङ्कस्य विटङ्कस्य समेधवलधवलपारावत इव ॥ २० ॥

कान्तसंयुक्ताभिस्तु संपूर्णनेत्रतया दृश्यमानस्य तस्य तत्क्रीडोपकरणायमानत्वमेवेत्याह, जगदण्डमेव मण्डपस्तत्रस्थं नभ एव विटङ्कः कपोतपालिका तस्य पारावत इव । कीदृशस्य, विशिष्टष्टङ्को बन्धो यस्य तस्य, “टकि बन्धे” । सम्यगेधते वर्धत इति समेधं बलं यस्य स चासौ धवलश्चेति सः ॥ २० ॥

अविकलकलङ्कशङ्कितताम्बूलप्रतिबिम्बः स्फटिकसंपुटपुटक इव दिगङ्गनानाम् ॥ २१ ॥

तन्मध्यगतं मालिन्यं निभाल्याह, अविकलेन कलङ्केन शङ्कितो वितर्कितस्ताम्बूलप्रतिबिम्बो यत्र सः ॥ २१ ॥

नभोऽकूपारपारमागन्तुमुद्यत इव सकलधौतकलधौतपोतः कालपोतवणिजस्य ॥ २२ ॥

स्फटिकताम्बूलसंपुटस्य चलनं न संभवतीत्यन्यथोत्प्रेक्षते, नभ एवाकूपारः समुद्रस्तस्य पारम् आ सम्यक् गन्तुमुद्यतः सकलं धौतं

यस्य स चासौ कलधौतपोतो रजतनौका, काल एव पोतवाणिजस्तस्य, अनेन स एव तन्मध्यवर्ती कालवर्णः कलङ्कस्योपमा ॥ २२ ॥

सपल्लवो राजतकुम्भ इव रजनीजनीमहोत्सवस्य ॥ २३ ॥

कलङ्कित्वेऽपि सौन्दर्यं माङ्गल्यं चाह सपल्लव इति ॥ २३ ॥

एवं हीरककुण्डलमिव कुतूहलहलधरस्य ॥ २४ ॥

कलङ्क एव न भवति किंतु मध्ये छिद्रमेव तथात्वेनालक्ष्यत इत्याह हीरकेति ॥ २४ ॥

अण्डमिव शरत्कीर्तिहंस्याः ॥ २५ ॥

सच्छिद्रत्वमपि दुष्कीर्तिरिति तां वारयितुमाह· अण्डमिवेति, अन्तर्वर्तिनोऽजातपक्षस्य शावकपिण्डस्य प्रतिबिम्ब एव कलङ्कतयोक्ष्यत इत्यर्थः ॥ २५ ॥

मृणालोपधानमिव स्वमदोष्णकंदर्पस्य ॥ २६ ॥

मृणालोपधानेति तापहारित्वं कामिलोकालम्बनत्वं चोक्तम् ॥ २६ ॥

मालतीकुसुमगर्भक इव विदोषप्रदोषप्रभादेव्याः ॥ २७ ॥

मालतीति साध्वीजनस्याप्यादरणीयत्वम् । गर्भकः केशमध्यस्थमाल्यम् ॥ २७ ॥

पाञ्चजन्य इव· उरीकृतविष्णुपदस्य विष्णुपदस्य ॥ २८ ॥

पाञ्चजन्येति भगवद्भक्तजनस्यापि रसोद्दीपनत्वं, विष्णुपदस्य· आकाशस्य, उरीकृतं विष्णोः पदं चिह्नमपि येन तस्य ॥ २८ ॥

रजतातपत्रमिव मदनराजचक्रचक्रवर्तिनः ॥ २९ ॥

रजतेति कामिलोकमात्रवशयितृत्वं सुखदर्शिशिरशीकरवर्षित्वं च ॥ २९ ॥

स्फटिकाज्यस्थालीव तमोऽभिचारचारवोत्पादस्य यज्वस्य ॥ ३० ॥

स्फटिकेति सर्वजननेत्रोद्वेगहारित्वं मानिनीजनमानकालुष्यनाशकत्वं स्वच्छत्वं च ॥ ३० ॥

विकीर्णनरतारकाकारातुलमौक्तिकपटलः शुक्तिसंपुट इव गगनक्षीरनीरनिधेः ॥ ३१ ॥

विकीर्णं ताराकाराणामतुलमौक्तिकानां पटलं येनेति शरत्कालसमुल्लसितत्वं, क्षीरनीरनिधेरिति तत्कान्त्या गगनस्य श्वेतीभूतत्वात् ॥ ३१ ॥

दर्पण इव शोभादेव्याः ॥ ३२ ॥

दर्पण इति द्वीपसमुद्रादिसर्वशोभाभ्यञ्जकत्वम् ॥ ३२ ॥

चन्दनतिलकमिव रजनिरमण्याः ॥ ३३ ॥

चन्दनेति रात्रिशोभादायित्वम् ॥ ३३ ॥

कर्पूरपूर इव लोकलोचनानाम् ॥ ३४ ॥

कर्पूर इति नयनसुखदत्वम् ॥ ३४ ॥

एकं पुण्डरीकमिवानन्दसरोवरस्य ॥ ३५ ॥

पुण्डरीकेति आनन्दान्तरस्यापि साफल्याधायकत्वम् ॥ ३५ ॥

डिण्डीरपिण्ड इव मधुरिमजलराशेः ॥ ३६ ॥

डिण्डीर इति माधुर्यम् ॥ ३६ ॥

सौध इव सौन्दर्यदेवतायाः ॥ ३७ ॥

सौध इति सौन्दर्यम् ॥ ३७ ॥

सैकतवलय इवाकाशगङ्गायाः ॥ ३८ ॥

सैकतवलय इति पावित्र्यम् ॥ ३८ ॥

मदमुद्रितकोकिलसमूह इव सकलकलः पुण्यराज इव सुचारुमण्डलश्रीः दाशरथिरिव सारस इव सलक्ष्मणः ॥ ३९ ॥

एवमाकारसाम्येन षट्त्रिंशतिधा उपमाय शब्दसाम्येनापि दशधा उपमिमीते । सकलकलः कलकलयुक्तः, पक्षे सकलाः समस्ताः कला यत्र सः । सुचारुमण्डलानां देशविशेषाणां श्रीः संपत्तिर्यतः सः, पक्षे सुचारुणा मण्डलेन श्रीः शोभा यस्य सः । लक्ष्मणो रामभ्राता लक्ष्मणा सारसस्य स्त्री लक्ष्मणं कलङ्कचिह्नं च ॥ ३९ ॥

भगवद्भक्त इव कुमुदामोदकः संतापहारकश्च· उपदेष्टेव सदोषधीशः· मदन इव रतिवर्धनः· विवेकीव· अवनीतमोऽपहः सुग्रीव इव ताराधीशः समुद्र इव सदाहिमकरः करनिकरेण वृन्दावनं मार्जयामास ॥ ४० ॥

कोः पृथिव्या एव मुदम्· आमोदयति विस्तारयतीति सः, पक्षे स्पष्टम् । सदोषां धियं बुद्धिं श्यति नाशयतीति सः, पक्षे सदेव· ओषधीशः, "शकन्ध्वादिः" सतीनामोषधीनामीशो वा । रतिं स्वकान्तां सौभाग्येन वर्धयतीति सः, पक्षे स्पष्टम् । अवन्यास्तमोऽज्ञानमन्धकारं च· अपहन्तीति सः । सदेव· अहयो मकराश्च यत्र सः, पक्षे हिमकिरणः ॥ ४० ॥

एवमुदित एव नभोमध्यमध्यवस्थाय स्थितश्च तरुतरुणगणानां चपलपलाशान्तरन्तर्रार्पितकिरणलवलवनिपातसहचरपलाशच्छायाच्छायामशावल्येन वल्येन प्रतितरुतलं वनशोभाचालनीकारश्चालनीकारणचतुर इव क्षणं तदा वनशोभासुभगंभावुकभावुक आसीत् ॥ ४१ ॥

तादृशपलाशच्छायानामच्छो निर्मल आयामो विस्तारस्तस्य शावल्येन श्वेतिमश्यामलिममिश्रणेन, प्रतितरुतलं वल्येन वलनीयेन सुवलनेनेत्यर्थः, वनशोभायाश्चालनीकार इव, कीदृशः, चालन्याः कारणं कालनं चालनमिति यावत्· तत्र चतुरो निपुणः, वनशोभायाः सभगमनुकूलं भवतीति सुभगंभावुकं "खुकञ्", तादृशं भावुकं मङ्गलं यस्मात्, यद्वा वनशोभायाः सुभगंभावुका या भा तदानींतनी कान्तिस्तस्या भावुको जनकः ॥ ४१ ॥

ततश्च निविडोडुगणमुक्ताफलफलदम्बरवितानमध्यलम्बी वलद्विकिरणकिरणकेशरराजिरुचामरोरुचामरोत्तमः सित इव ॥ ४२ ॥

इत्यधस्तनीं शोभां वर्णयित्वा· उपरितनीमपि वर्णयति, निबिडोडुगणानेव मुक्ताफलानि फलति यदम्बरं तदेव वितानं चन्द्रातपस्तन्म-

धवलश्री, वलद्धिकिरणं क्षेपो येषां ते किरणा एव केशराराजयस्तासां रुचा॰अमराणामुरुचामरोत्तमः सितः, "ह्रस्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेने"त्यस्य प्रायिकत्वाद् विक्रिरणमित्यत्र न गुणः ॥ ४२ ॥

किंवा भावलिभावलितनभोमुक्तातपत्रस्य विगतदण्डस्य मध्यनिस्यूतो धवलपट्टसूत्रपुण्डरीकबिम्ब इव विरराज ॥ ४३ ॥

चतुर्षु दिक्षु॰ अवनतम्॰ उपरि तूच्चतं गगनमालक्ष्य नेदं वितानं तथात्वे समन्तात् साम्यापत्तेरिति विमृश्यान्यथोत्प्रेक्षते, भावलिर्नक्षत्रश्रेणिस्तस्या भा कान्तिस्तया वलितं नभ एव मुक्तातपत्रं तस्य ॥ ४३ ॥

तमथ मथनो वक्रस्य कस्यचन शोभाविशेषस्य जनकं न कं रञ्जयन्तं जयन्तं सर्वतोभावेन भावेन दिगवलावलाकर्षणकरैः करैर्धवलयन्तं वलयन्तं च मुदा भुवो वलयं निम्नोन्नततारारहित्येन तारारहित्येन न सौहित्येन हित्येन प्रीणयन्तं समालोक्य मालोक्यचरितो निखिलरमणीसुहृदयं हृदयंगमां मुरलीं वादयामास ॥ ४४ ॥

तं तुहिनकिरणं भुवो वलयं भूमण्डलं मुदा वलयन्तं प्रवलीकुर्वन्तं सौहित्येन प्रीणयन्तं, "सौहित्यं तर्पणं तृप्ति'रित्यमरः, कीदृशेन, निम्नोन्नततायाः राहित्यं यत्र तेन, एकरूपेणेत्यर्थः, आहितम्॰ अर्पितं तस्य भाव आहित्यं ताराभिर्नक्षत्रैराहित्यम्॰ अर्पितत्वं यत्र तेन, हित्येन हितमर्हता, मा शोभा तया॰ आलोक्यं दर्शनार्हं चरितं यस्य सः, यद्वा मा॰ इति निषेधे, अलौकिकचरित्र इत्यर्थः ॥ ४४ ॥

सर्वाकर्षी यदपि युगपन्निस्वनः कृष्णवेणोः
कृष्णोच्छ्वासस्तदपि समये श्रूयते केश्चिदेव ।
आह्वाने वा खगमृगगवां[1] मोहने वाङ्गनानां
यस्मिन् यर्हि प्रसरति मनस्तत् तदासौ शृणोति ॥ ४५ ॥

१ समासान्तविधेष्टचोऽनित्यत्वमत्र शरणम् ।

खगमृगगवां वा· आह्वाने कर्मणि कर्तव्ये· अङ्गनानां वा मोहने कर्तव्ये यस्मिन्· जने· अस्य मनः प्रसरति तत्· आह्वानं मोहनं वा तदासौ शृणोति नान्य इति, पितृमातृश्वश्रूननान्द्रादयो न शुश्रुवुरित्यर्थः ॥ ४५ ॥

एकेनैव स्वरपरिमलेनैकदेवाङ्गनानां
मामेवाकारयति मुरलीत्येव यत्र प्रतीतिः ।
तज्जातीयेतरपरिचयाभावतन्मात्रगम्यां
रम्याराावां मधुरमथ तां वादयामास कृष्णः ॥ ४६ ॥

तज्जातीया इतरे ये शब्दादयो विषयास्तेषां परिचयाभावेन तन्मात्रमेव गम्यमनुभवनीयं यस्यां ताम्, यस्याः श्रवणे विषयान्तरस्फूर्तिर्न भवतीत्यर्थः ॥ ४६ ॥

अथ तेन वीचीतरङ्गरङ्गनामपहायाप्राकृततया स्वशक्त्या व्यापकेन भव्यापकेन भद्रमेव तासाम् ॥ ४७ ॥

तेन वाद्येन· उन्मीलितमिवेत्यादिभिः संबन्धः । वीचीतरङ्गरङ्गनां वीचीतरङ्गन्यायेन धारावाहिकलोलत्वं विहाय व्यापकेन सता, प्रदेशविशेषावधित्वं परित्यज्य समन्तात् स्फुरतेत्यर्थः ॥ ४७ ॥

उन्मीलितमिव हृदयं
बुद्धिः पीतेव पाटितेव धृतिः ।
आलोपितेव दृष्टिः
श्रवणपथप्राप्तिमात्रेण ॥ ४८ ॥

उन्मीलितमिवेति, श्रीकृष्णपार्श्वे शीघ्रं समर्पयितुमिवेति भावः, तेन तासां हृदयस्यातिमृदुलत्वविमलत्वादिभिः कमलायितत्वं मुरलीवाद्यस्य तु मत्तमातङ्गशुण्डायितत्वं प्रथममुक्तं, ननु परामर्शवती मतिरेव तत्र प्रतिबन्धिकास्तीति तत्राह बुद्धिः पीतेति, बुद्धेरपारत्वगम्भीरत्वस्वच्छत्वस्निग्धत्वादिभिः समुद्रायितत्वं तद्वाद्यस्य तु· अगस्त्यायितत्वम्, ननु तथापि कुलवतीनां धृतिर्दुर्वारेति तत्राह पाटितेति, धृतेः कठोरकाष्ठायितत्वं वाद्यस्य क्रकचत्वम्, ननु तदपि लज्जावतीनां द्वाराजिरस्थादिस्थगुरुजनदर्शनमेव तन्निवर्तकं स्यादिति तत्राह· आलोपितेति, दृष्टेः खञ्जनायितत्वं वाद्यस्य श्येनायितत्वम्,अत्रावेगनामा संचारी ॥ ४८ ॥

॥ शेषमग्रे ॥

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 8. JANUARY 1st 1878. Vol. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
मञ्जुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकाया: ॥

सप्तमाध्यायस्य तृतीय: पाद: ॥

गुणो यङ्लुकोः ॥ ८२ ॥

यङि यङ्लुकि च इगन्तस्याभ्यासस्य गुणो भवति । चेचीयते । लोलूयते । यङ्लुकि । जोहवीति । यङोवितीद्विकल्पः । चोक्रुशीति ॥

दीर्घोकितः ॥ ८३ ॥

अकितोभ्यासस्य दीर्घो भवति यङि यङ्लुकि च । पापच्यते । पापचीति । यायज्यते । यायजीति । अकित इति किम् । यंयम्यते । यंयमीति । रंरम्यते । रंरमीति । ननु चाचापवादत्वादकित एते ऽभ्यासस्यानजन्तत्वादेव दीर्घत्वं न भविष्यति । एवं तर्ह्यकित इत्यनेनैतज्ज्ञाप्यते, अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन्बाधन्त इति । किमेतस्य ज्ञापने प्रयोजनं, डोढौक्यत इत्यत्र दीर्घोकित इत्यनेन संध्यक्षरह्रस्वो न बाध्यते । अचीकरदित्यत्र दीर्घो लघोरित्यनेन सन्वदित्त्वं न बाध्यते । मान्प्रभृतीनां दीर्घेण सनीत्वं न बाध्यते मीमांसते । ई च गणः इतीत्वेन हलादिःशेषो न बाध्यते अजीगणत् ॥

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥ ८४ ॥

वञ्चु स्रंसु ध्वंसु भ्रंसु कस पत पद स्कन्द इत्येतेषामभ्यासस्य नीगागमो भवति यङि यङ्लुकि च । वञ्चु । वनीवच्यते । वनीवञ्चीति । स्रंसु । सनीस्रस्यते । सनीस्रंसीति । ध्वंसु । दनीध्वस्यते । दनीध्वंसीति । भ्रंसु । बनीभ्रस्यते । बनीभ्रंसीति । कस । चनीकस्यते । चनीकसीति । पत । पनीपत्यते । पनीपतीति । पद । पनीपद्यते । पनीपदीति । स्कन्द । चनीस्कद्यते । चनीस्कन्दीति ॥

नुगतोनुनासिकान्तस्य ॥ ८५ ॥

Digitized by Google

अनुनासिकान्तस्याङ्गस्य योऽभ्यासस्तस्याकारान्तस्य नुगागमो भवति यङ्यङ्लुकोः परतः। तंतन्यते। तंतनीति। जंगम्यते। जंगमीति। यंयम्यते। यंयमीति। रंरम्यते। रंरमीति। नुगित्येतदनुस्वारोपलक्षणार्थं द्रष्टव्यम्। स्थानिना ह्यादेशो लक्ष्यते। तेन यंयम्यतइत्येवमादावझल्परत्वेऽप्यनुस्वारो भवति॥ पदान्तवच्चेति वक्तव्यम्॥ * ॥ वा पदान्तस्येति परसवर्णविकल्पो यथा स्यादिति। अत इति किम्। तेतिम्यते। तपरकरणं तु भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थम्। बाभाम्यते। अनुनासिकान्तस्येति किम्। पापच्यते॥

जपजभदहदशभञ्जपशां च॥ ८६॥

जप जभ दह दश भञ्ज पश इत्येतेषामभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः। जंजप्यते। जंजपीति। जंजभ्यते। जंजभीति। दंदह्यते। दंदहीति। दंदश्यते। दंदशीति। दश इति दंशिरयं नकारलोपार्थमेव निर्दिष्टः। तेन यङ्लुक्यपि नकारलोपो भवति। भञ्ज। बंभज्यते। बंभजीति। पश इति सौत्रो धातुः। पंपश्यते। पंपशीति॥

चरफलोश्च॥ ८७॥

चर फल इत्येतयोरभ्यासस्य नुगागमो भवति यङ्यङ्लुकोः परतः। चंचूर्यते। चंचूरीति। पंफुल्यते। पंफुलीति॥

उत्परस्यातः॥ ८८॥

चरफलोरभ्यासात्परस्यात उकारादेशो भवति यङ्यङ्लुकोः परतः। चंचूर्यते। चंचूरीति। पंफुल्यते। पंफुलीति। परस्येति किम्। अभ्यासस्य मा भूत्। अत इति किम्। अलोन्त्यस्य मा भूत्। उदिति तपरकरणं चंचूर्ति पंफुलीति, अत्र लघूपधगुणनिवृत्त्यर्थम्। दीर्घस्यासिद्धत्वादिह लघुत्वं न निवर्त्तते।

ति च॥ ८९॥

तकारादौ प्रत्यये परतश्चरफलोरकारस्य उकारादेशो भवति। चरणं चूर्त्तिः। ब्रह्मणश्चूर्त्तिः। प्रफुल्तिः। प्रफुल्लाः सुमनसः। यङ्लुकोरभ्यासस्येति चानुवर्त्तमानमपि वचनसामर्थ्यादिह नाभिसंबध्यते॥

Digitized by Google

रीगृदुपधस्य च ॥ ९० ॥

ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रीगागमो भवति यङ्लुकोः परतः । वरीवृत्यते । वरीवृश्च्यते । वरीवृतीति । वरीवृधीति । नरीनृत्यते । नरीनृतीति ॥ रीगृत्वत इति वक्तव्यम् ॥ * ॥ इहापि यथा स्यात् । वरीवृश्च्यते । वरीवृश्चीति ॥

रुग्रिकौ च लुकि ॥ ९१ ॥

यङ्लुकि ऋदुपधस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतश्चकाराद्रीक्च । नर्नर्ति । नरिनर्ति । नरीनर्ति । वर्वर्ति । वरिवर्ति । वरीवर्ति । उकार उच्चारणार्थः ॥ मर्मृज्यते मर्मृज्यमानास इत्युपसंख्यानम् ॥ * ॥ मर्मृज्यते । मर्मृज्यमानासः ॥

ऋतश्च ॥ ९२ ॥

ऋकारान्तस्याङ्गस्य योऽभ्यासस्तस्य रुग्रिकावागमौ भवतो रीक्च यङ्लुकि । चर्कर्ति । चरिकर्ति । चरीकर्ति । जर्हर्ति । जरिहर्ति । जरीहर्ति । तपरकरणं किम् । किरतेश्चाकर्ति ।

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः * ॥

तत्रेयं प्राप्तिस्तपरकरणसामर्थ्यादङ्गविशेषणमृतइत्येतत्तथा वा-प्राप्तिः किरतिगादीनामिति ॥

सन्वल्लघुनि चङ्परेऽनग्लोपे ॥ ९३ ॥

लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य चङ्परे णौ परतः सनीव कार्यं भवति अनग्लोपे । सन्यत इत्युक्तं चङ्परेऽपि तथा । अचीकरत् । अपीपचत् । ओः पुयण्ज्यपरे इत्युक्तं चङ्परेऽपि तथा । अपीपवत् । अली-

* किरतिमिति ऋकारान्तोपलक्षणं, चर्करीतमिति यङ्लुकः पूर्वाचार्यसंज्ञा, पचतीति लट उपलक्षणम् । तेन चाकर्तीत्यादीनि रूपाणि किरतेर्यो नयेदित्यर्थः । प्राप्तिज्ञं ऋगादीनां विषयविभागेन या प्राप्तिस्तज्ज्ञं, संग्रहः साधुशब्दसंग्रहः । इति पदमञ्जरी ।

Digitized by Google

लवत् । अजीजवत् । स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वेत्युक्तं चङ्परेपि तथा । असिस्रवत् । असुस्रुवत् । अशिश्रवत् । अशुश्रवत् । अदिद्रवत् । अदुद्रुवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । लघुनीति किम् । अततक्षत् । अररक्षत् । जागरयतेः । अजजागरत् । अत्र केचिद्गुशब्दं लघुमाश्रित्य सन्वद्भावमिच्छन्ति सर्वत्रैव लघोरानन्तर्यमभ्यासेन नास्तीति व्यवधानेपि वचनप्रामाण्याद्भवितव्यं, तदसत् । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन व्यवधानमाश्रीयते न पुनरनेकेन । यद्येवं, कथमचिकथदिति, आचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामित्त्वमिति । यदयं तद्बाधनार्थं स्मरत्यादीनामत्त्वं विदधाति । चङ्परइति किम् । अहं पपच । परग्रहणं किम् । चङ्येव केवले मा भूत् । अचकमत । अनग्लोपइति किम् । अचकथत् । वृषदमाख्यातवान् अववृषत् । वादितवन्तं प्रयोजितवन्तं प्रयोजितवान् अवीवददित्यत्र योसौ णौ णेर्लोपो नासावग्लोप इत्याश्रीयते किं कारणं चङ्परइति णिजातेर्निमित्तत्वेनाश्रयणात्तेनान्यस्याको लोपः परिगृह्यते । मीमांदिनामत्रग्रहणात्सन्वद्भावेनाभ्यासलोपो न भवतीत्युक्तम् । किं च सन्वदिति सनाश्रयं कार्यमतिदिश्यते न च लोपः सनमेवापेक्षते किं तर्हि इस्भावात्र्यपि तदभावादमीमर्यदित्यादावभ्यासलोपो न भविष्यति ॥

दीर्घो लघोः ॥ ९४ ॥

दीर्घो भवति लघोरभ्यासस्य लघुनि णौ चङ्परे ऽनग्लोपे । अचीकरत् । अजीहरत् । अलीलवत् । अपीपचत् । लघोरिति किम् । अबिभजत् । लघुनीत्येव । अततक्षत् । अररक्षत् । चङीत्येव । अहं पपच । परइत्येव । अचकमत् । अनग्लोपइत्येव । अचकथत् ॥

अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ॥ ९५ ॥

स्मृ दृ त्वर प्रथ म्रद स्तृ स्पश इत्येतेषामभ्यासस्यात्त्वमादेशो भवति चङ्परे णौ परतः । स्मृ । असस्मरत् । दृ । अददरत् । त्वर ।

अतत्वरत् । प्रथ । अपप्रथत् । म्रद । अमम्रदत् । स्तॄ । अतस्तरत् । स्पश । अपस्पशत् । सन्वद्भावादित्त्वं प्राप्तमनेन बाध्यते । तपरकरणसामर्थ्यादत्ति कृते दीर्घो लघोरित्येतदपि न भवति । अदद्रत् ॥

विभाषा वेष्टिचेष्ट्योः ॥ ९६ ॥

वेष्टि चेष्टि इत्येतयोरभ्यासस्य विभाषा अदित्यमादेशो भवति चङ्परे णौ परतः । अववेष्टत् । अविवेष्टत् । अचचेष्टत् । अचिचेष्टत् । अभ्यासह्रस्वत्वे कृते अत्वं पक्षे भवति ॥

ई च गणः ॥ ९७ ॥

गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः । चकारादच्च । अजीगणत् । अजगणत् ॥

इति वामनाचार्यविरचितायां काशिकायां वृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः

समाप्तोऽध्यायश्च सप्तमः ॥

॥ काशिकायाः ॥

॥ अष्टमाध्यायस्य प्रथमः पादः ॥

सर्वस्य द्वे ॥ १ ॥

सर्वस्येति च द्वे इति चैतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः प्राक् पदस्येत्यतः सर्वस्य द्वे भवत इत्येवं तद्वेदितव्यम् । वक्ष्यति । नित्यवीप्सयोरिति तत्र सर्वस्य स्थाने द्वे भवतः । के द्वे भवतः । ये शब्दतश्चार्थतश्चोभयथान्तरतमे, एकस्य पचतिशब्दस्य द्वौ पचतिशब्दौ भवतः । पचति २ । ग्रामो २ रमणीयः । यदा तु द्विः प्रयोगो द्विर्वचनं तदा स एव पचतिशब्दो द्विरावर्त्तते तस्य द्वे आवृत्ती भवतः । सर्वस्येति विस्पष्टार्थम् । अथ पदस्येत्येव कस्मान्नोच्यते । नैवं शक्यमिह हि न स्यात् प्रपचति प्रपचतीति । इह द्रोग्धा द्रोढा इति घत्वढत्वयोरसिद्धत्वादकृतयोरेव

तयोर्द्विर्वचनं प्राप्नोति तच्च पश्चाद्विकल्पे सत्यनिष्टमपि स्यात् । द्रोग्धा द्रोढा । द्रोढा द्रोग्धेति । तस्माद्वक्तव्यमेतत् पूर्वत्रासिद्धीयमद्विर्वचनइति । सर्वस्येत्येतदेव वा कृतं सर्वकार्यप्रतिपत्त्यर्थं द्रष्टव्यम् ॥

तस्य परमाम्रेडितम् ॥ २ ॥

तस्य द्विरुक्तस्य यत्परं शब्दरूपं तदाम्रेडितसंज्ञं भवति । चौरचौर ३ । वृषलावृषल ३ । दस्योदस्यो ३ घातयिष्यामि त्वा बन्धयिष्यामि त्वा । आम्रेडित प्रदेशा आम्रेडितं भर्त्सने इत्येवमादयः ॥

अनुदात्तं च ॥ ३ ॥

अनुदात्तं च तद्भवति यदाम्रेडितसंज्ञम् । भुङ्क्ते २ । पशून् २ ॥

नित्यवीप्सयोः ॥ ४ ॥

नित्ये चार्थे वीप्सायां च यद्वर्त्तते तस्य द्वे भवतः । केषु नित्यता । तिङ्षु अव्यये कृत्सु च । कुत एतत् । आभीक्ष्ण्यमिह नित्यता । आभीक्ष्ण्यं च क्रियाधर्मः । यां क्रियां कर्ता प्राधान्येनानुपरमन्करोति तन्नित्यम् । पचति २ । जल्पति २ । भुक्त्वा २ व्रजति । भोजं २ व्रजति । लुनीहिलुनीहीत्येवायं लुनाति । तवाद्यमुलोर्लोटश्च द्विर्वचनापेक्षायामेव पौनःपुन्यप्रकाशने शक्तिः । यङ् तु तन्निरपेक्षः प्रकाशयति । पुनः २ पचति पापच्यतइति । यदा तु तत्र द्विर्वचनं तदा क्रियासमभिहारे पौनःपुन्यं द्रष्टव्यं पापच्यतेपापच्यतइति । अथ केषु वीप्सा । सुप्सु वीप्सा, का पुनः सा । व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा । का पुनरसौ । नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । नानाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत्प्रयोक्तुमिच्छा वीप्सा । ग्रामो २ रमणीयः । जनपदो २ रमणीयः । पुरुषःपुरुषो निधनमुपैति । यत्तिङन्तं नित्यतया प्रकर्षेण च युक्तं ततः कृनद्विर्वचनात्प्रकर्षप्रत्यय इष्यते पचति २ तरामिति । इह तु आढ्यतरमाढ्यतरमानयेति प्रकर्षयुक्तस्य वीप्सायोग इष्यते ॥

Digitized by Google

परेर्वर्जने ॥ ५ ॥

परीत्येतस्य वर्जनेऽर्थे द्वे भवतः । परि २ त्रिगर्तेभ्यो वृष्टो देवः । परि २ सौवीरेभ्यः । परि २ सर्वसेनेभ्यः । वर्जनं परिहारः । वर्जनइति किम् । ओदनं परिषिञ्चति ॥ परेर्वर्जने ऽसमासे वेति वक्तव्यम् ॥ * ॥ परि २ त्रिगर्तेभ्यो वृष्टो देवः । परि त्रिगर्तेभ्यः । समासे तु तेनैवोक्तत्वा-द्वर्जनस्य नैव भवति । परित्रिगर्त्तं वृष्टो देव इति ॥

प्रसमुपोदः पादपूरणे ॥ ६ ॥

प्र सम् उप उत् इत्येतेषां पादपूरणे द्वे भवतो द्विर्वचनेन चेत्पादः पूर्यते । प्रप्रायमग्निर्भरतस्य शृण्वे । संसमिद्युवसे वृषन् । उपोप मे परा-मृश । किं नोदुदुहर्षसे दातवाउ * । पादपूरणइति किम् । प्रदेवं देव्या धिया । सामर्थ्याच्छन्दस्येवैतद्विधानम् । भाषायामनर्थकं स्या-त्प्रयोगाभावात् ॥

उपर्यध्यधसः सामीप्ये ॥ ७ ॥

उपरि अधि अधस् इत्येतेषां द्वे भवतः सामीप्ये विवक्षिते । सामीप्यं प्रत्यासत्तिः कालकृता देशकृता च । उपर्युपरि दुःखम् । उपर्यु-परि ग्रामम् । अध्यधि ग्रामम् । अधोधो नगरम् । सामीप्यइति किम् । उपरि चन्द्रमाः । इह कस्मान्न भवति । उपरि शिरसो घटं धारयति । औत्तराधर्यमेव विवक्षितं न सामीप्यमिति द्विर्वचनं न भवति ॥

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ ॥

एकार्थः पदसमूहो वाक्यम् । वाक्यादेरामन्त्रितस्य द्वे भवतः असूया संमति कोप कुत्सन भर्त्सनइत्येतेषु यदि तद्वाक्यं भवति । तत्र परगुणा-नामसहनमसूया । पूजा संमतिः । कोपः क्रोधः । निन्दनं कुत्सनम् । अपकार-शब्दैर्भयोत्पादनं भर्त्सनम् । एते च प्रयोक्तृधर्मा नाभिधेयधर्माः । असूयायां तावत् । माणवक ३ माणवक अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम् ।

* पादपूरणे इति भावलक्षणे सप्तमीति पुस्तकान्तरे ऽधिकम् ।

संमतौ। माणवक ३ माणवक अभिरूपक ३ अभिरूपक शोभनः खल्वसि। कोपे। माणवक ३ माणवक अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने। शक्तिके ३ शक्तिके यष्टिके ३ यष्टिके रिक्ता ते शक्तिः। भर्त्सने। चौरचौर ३ वृषलवृषल ३ घातयिष्यामि त्वा बन्धयिष्यामि त्वा। असूयादिषु स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेष्विति पूर्वपदस्य प्लुतः। भर्त्सने त्वाम्रेडितं भर्त्सने इत्याम्रेडितस्यैव प्लुतः। वाक्यादेरिति किम्। अन्तस्य मध्यस्य च मा भूत्। शोभनः खल्वसि माणवक। आमन्त्रितस्येति किम्। उदारो देवदत्तः। असूयादिष्विति किम्। देवदत्त गामभ्याज शुक्लाम्॥

एकं बहुव्रीहिवत्॥ ९॥

एकमित्येतच्छब्दरूपं द्विरुक्तं बहुव्रीहिवद्भवति *। बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ। एकैकमक्षरं पठति। एकैकयाहुत्या जुहोति। सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ताः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते। तेनातिदेशिके बहुव्रीहौ न भवन्ति। एकैकस्मै। न बहुव्रीहाविति प्रतिषेधो न भवति। बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानात्। नन। सुसु। नञ्सुभ्यामित्यन्तोदात्तत्वं न भवति। ऋक्ऋक्। पूःपूः। ऋक्पूरिति समासान्तो न भवति॥

आबाधे च॥ १०॥

आबाधनमाबाधः। पीडाप्रयोक्तृधर्मः। तत्र वर्त्तमानस्य द्वे भवतः बहुव्रीहिवच्चास्य कार्यं भवति। गतगतः। नष्टनष्टः। पतितपतितः। गतगता। नष्टनष्टाः। पतितपतिता। प्रियस्य चिरगमनादिना पीड्यमानः कश्चिदेवं प्रयुङ्क्ते प्रयोक्ता॥

कर्म्मधारयवदुत्तरेषु॥ ११॥

इत उत्तरेषु द्विर्वचनेषु कर्म्मधारयवत्कार्यं भवतीत्येतद्वेदितव्यम्।

* द्विर्वचनमत्र पूर्वसूत्रेणैवेति पुस्तकान्तरे ऽधिकम्,

कर्म्मधारयत्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि । सुब्लोपः । पटुपटुः । मृदुमृदुः । पण्डितपण्डितः । पुंवद्भावः । पटुपट्वी । मृदुमृद्वी । कालककालिका । कोपधाया अपि हि कार्म्मधारयवद्भावात्पुंवत्कर्म्मधारयेति पुंवद्भावो भवति । अन्तोदात्तत्वम् । पटुपटुः । पटुपट्वी । समासान्तोदात्तत्वमनेनैव विधीयतइति परत्वादाम्रेडितानुदात्तत्वं बाध्यते । अधिकारेणैव सिद्धे बहुव्रीहिवदिति वचनं तद्विस्पष्टार्थम् ॥

प्रकारे गुणवचनस्य ॥ १२ ॥

प्रकारो भेदः सादृश्यं च । तदिह सादृश्यं प्रकारो गृह्यते । प्रकारे वर्त्तमानस्य गुणवचनस्य द्वे भवतः । पटु २ । मृदु २ । पण्डित २ । अपरिपूर्णगुण इत्यर्थः । परिपूर्णगुणेन न्यूनगुणस्योपमाने सत्येवं प्रयुज्यते ॥ जातीयरोनेन द्विर्वचनेन बाधनं नेष्यते ॥ पटुजातीयः । मृदुजातीयः । इत्यपि हि भवति । तत्कथं वक्ष्यमाणमन्यतरस्यांग्रहणमुभयोः शेषो विज्ञायते । प्रकारइति किम् । पटुर्देवदत्तः । गुणवचनस्येति किम् । अग्निर्माणवकः । गौर्वाहीकः । यद्यप्यत्राग्निशब्दो गोशब्दश्च मुख्यार्थसंबन्धादवधृतभेदं तैक्ष्ण्यजाड्यादिकमर्थान्तरं गुणविशेषमेव प्रतिपादयितुं प्रवृत्तस्तथापि सर्वदा गुणवचनो न भवतीति न द्विरुच्यते ॥ आनुपूर्व्ये द्वे भवत इति वक्तव्यम् ॥ * ॥ मूले २ स्थूलाः । अग्रे २ सूक्ष्माः । ज्येष्ठं २ प्रवेशय ॥ स्वार्थे अवधार्यमाणेऽनेकस्मिन्द्वे भवत इति वक्तव्यम् ॥ * ॥ अस्मात्कार्षापणादिह भवद्भ्यां माषं २ देहि । स्वार्थएतद् द्विर्वचनं न वीप्सायाम् । अत्र हि द्वावेव माषौ दीयेते न सर्वे कार्षापणसंबन्धिनो माषाः । तेन वीप्सा न विद्यते । अवधार्यमाणइति किम् । अस्मात्कार्षापणादिह भवद्भ्यां माषमेकं देहि । द्वौ माषौ देहि । त्रीन्वा माषान्देहि । अनेकस्मिन्निति किम् । अस्मात्कार्षापणादिह भवद्भ्यां माषमेकं देहि ॥ चापले द्वे भवत इति वक्तव्यम् ॥ * ॥ संभ्रमेण प्रवृत्तिश्चापलम् । अहिरहिः बुध्यस्व २ । नावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ किं तर्हि यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावन्तः प्रयोक्तव्याः । अहिः ३ । बुध्यस्व ३ इति ॥ क्रियासमभिहारे द्वे भवत इति वक्तव्यम् ॥ * ॥

स भवान् लुनीहिलुनीहीत्येवायं लुनाति ॥ आभीक्ष्ण्ये तु भवत इति वक्तव्यम् ॥ * ॥ भुक्त्वाभुक्त्वा व्रजति । भोजंभोजं व्रजति । नित्यइत्येव सिद्धमिति तत्रोक्तम् ॥ डाचि द्वे भवत इति वक्तव्यम् ॥ * ॥ पटपटा करोति । पटपटायते ॥ अव्यक्तानुकरणाड्डाजन्तस्य द्विर्वचनमिष्यते ॥ इह न भवति । द्वितीया करोति । तृतीया करोति । तदर्थं के चिड्डाचि बहुलमिति पठन्ति ॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् ॥ * ॥ पूर्वं २ पुष्यन्ति । प्रथमं २ पच्यन्ते । अतिशयिकोपि दृश्यते । पूर्वतरं पुष्यन्ति । प्रथमतरं पच्यन्तइति ॥ डतरडतमयोः समसंप्रधारणयोः स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम् ॥ * ॥ उभाविमावाढ्यौ । कतराकतरा अनयोराढ्यता । सर्वइमे आढ्याः । कतमाकतमा एषामाढ्यता । डतरडतमाभ्यामन्यत्रापि हि दृश्यते । उभाविमावाढ्यौ । कीदृशी २ । अनयोराढ्यता । तथा स्त्रीनिगदाद्भावादन्यत्रापि हि दृश्यते । उभाविमावाढ्यौ कतरःकतरोनयोर्विभव इति ॥ कर्म्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यम् ॥ * ॥ सामासवच्च बहुलम् । यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य । अन्यमन्यमिमे ब्राह्मणा भोजयन्ति । अन्योन्यमिमे ब्राह्मणा भोजयन्ति । अन्योन्यस्य ब्राह्मणा भोजयन्ति । इतरेतरान् भोजयन्ति ॥ स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावो वक्तव्यः ॥ * ॥ अन्योन्यामिमे ब्राह्मण्यौ भोजयतः । अन्योन्यं भोजयतः । इतरेतरां भोजयतः । इतरेतरं भोजयतः । अन्योन्यामिमे ब्राह्मणकुले भोजयतः । इतरेतरामिमे ब्राह्मणकुले भोजयतः । इतरेतरमिमे ब्राह्मणकुले भोजयतः ॥

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ १३ ॥

प्रिय सुख इत्येतयोरन्यतरस्यां द्वे भवतः अकृच्छ्रे द्योत्ये । कृच्छ्रं दुःखं, तदभावो ऽकृच्छ्रम् । प्रियप्रियेण ददाति । सुखसुखेन ददाति । प्रियेण ददाति । सुखेन ददाति । अखिद्यमानो ददातीत्यर्थः । अकृच्छ्रइति किम् । प्रियः पुत्रः । सुखो रथः ॥

यथास्वे यथायथम् ॥ १४ ॥

यो य आत्मा यच्चात्मीयं तत्तद्यथास्वं तस्मिन् यथायथमिति

निपात्यते । यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते । ज्ञाताः सर्वे पदार्था यथायथं, यथास्वभावमित्यर्थः । सर्वेषां तु यथायथं यथा-दायात्मीयमित्यर्थः ॥

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्र-प्रयोगाभिव्यक्तिषु ॥ १५ ॥

द्वन्द्वमिति द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावः अत्वं चोत्तरप-दस्य निपात्यते रहस्य मर्यादावचन व्युत्क्रमण यज्ञपात्र प्रयोग अभि-व्यक्ति एतेषु अर्थेषु । तत्र रहस्यं द्वन्द्वशब्दवाच्यमितरे विषयभूताः । द्वन्द्वं मन्त्रयन्ते । मर्यादावचने, मर्यादास्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण मिथुनं गच्छति पौत्रेण तत्पुत्रेणापीति मर्यादार्थः । व्युत्क्रमणे, द्वन्द्वं व्युत्क्रान्ताः । व्युत्क्रमणं भेदः । पृथगवस्थानम् । द्विवर्गसंबन्धेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यन्ते । यज्ञपात्रप्रयोगे । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति धीरः । अभिव्यक्तौ । द्वन्द्वं नारदपर्वतौ । द्वन्द्वं संकर्षणवासुदेवौ । द्वावप्यभिव्यक्तौ साहचर्येणेत्यर्थः । अन्यत्रापि द्वन्द्वमित्येतद्दृश्यते तदर्थं योगविभागः कर्त्तव्यः । द्वन्द्वं युद्धं वर्त्तते । द्वन्द्वानि सहते धीरः । चार्थे द्वन्द्व इति ॥

पदस्य ॥ १६ ॥

पदस्येत्ययमधिकारः प्रागपदान्ताधिकारात् । यदित ऊर्ध्वमनुक्र-मिष्यामः पदस्येत्येवं तद्वेदितव्यम् । वक्ष्यति संयोगान्तस्य लोपः । पचन् । यजन् । पदस्येति किम् । पचन्तौ । यजन्तौ । वक्ष्यमाणवाक्यापेक्षया पद-स्येत्यधिकृतस्य षष्ठ्यर्थव्यवस्था द्रष्टव्या । क्व चित्स्थानषष्ठी क्व चिदवय-वषष्ठी ॥

पदात् ॥ १७ ॥

पदादित्ययमधिकारः प्राक्कुत्सने च सुप्यगोत्रादावित्येतस्माद्यदित ऊर्ध्वमनुक्रमिष्यामः पदादित्येवं तद्वेदितव्यम् । वक्ष्यति । आमन्त्रितस्य ।

आमन्त्रितस्य पदात्परस्यानुदात्तादेशो भवतीति। पचति देवदत्त। पदादिति किम्। देवदत्त पचसि॥

अनुदात्तं सर्वमपादादौ॥ १८॥

अनुदात्तमिति च सर्वमिति च अपादादाविति च एतत्त्रयमधिकृतं वेदितव्यमापादपरिसमाप्तेरिति उत्तरं यद्वक्ष्यामः अनुदात्तं सर्वमपादादावित्येवं तद्वेदितव्यम्। वक्ष्यत्यामन्त्रितस्य चेति। पचसि देवदत्त। अपादादाविति किम्। यत्ते नियतं रजसं मृत्यो अनवधृष्यम्। बहुवचनस्य वस्नसौ। ग्रामो वः स्वं, जनपदो नः स्वम्। अपादादाविति किम्।

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं शत्रुमर्दनः॥

पादग्रहणेनात्र ऋक्पादः श्लोकपादश्च गृह्यते। सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादिति। तेन युष्मदादेशानामपि वाक्यभेदेनानुदात्तत्वं विधीयते। युष्मदस्मदादेशाश्च सर्वस्य सुबन्तस्य पदस्य यथा स्युः। यत्रापि स्वादिषु पदसंज्ञं भवति। ग्रामो वां दीयते। जनपदो नौ दीयते॥

आमन्त्रितस्य च॥ १९॥

आमन्त्रितस्य पदस्य पदात्परस्यापादादौ वर्त्तमानस्य सर्वस्यानुदात्तो भवति। पचसि देवदत्त। पचसि यज्ञदत्त। आमन्त्रिताद्युदात्तत्वे प्राप्ते वचनम्॥ समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः॥ *॥ इह मा भूवन्। अयं दण्डो हरानेन ओदनं पच तव भविष्यति। ओदनं पच मम भविष्यति *। इदं च यथा स्यात्। इह देवदत्त माता ते कथयति। नद्यास्तिष्ठति कूले। शालीनां ते ओदनं दास्यामि इति। आमन्त्रितान्तं तिङन्तं युष्मदस्मदादेशाश्च यस्मात्पराणि न तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः समर्थः पदविधिरिति वचनात्॥

* भवतीह विष्णुमित्रो देवदत्तागच्छेति पुस्तकान्तरे ऽधिकम्।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥ २० ॥

युष्मदस्मद् इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वान्नौ इत्येतावादेशौ भवतस्तौ चानुदात्तौ। पदस्य पदादनुदात्तं सर्वमपदादाविति सर्वमिह संबध्यते। ग्रामो वां स्वम्। जनपदो नौ स्वम्। ग्रामो वां दीयते। जनपदो नौ दीयते। ग्रामो वां पश्यति। जनपदो नौ पश्यति। एकवचनबहुवचनान्तयोरादेशान्तरविधानाद् द्विवचनान्तयोरेतावादेशौ विज्ञायेते। षष्ठीचतुर्थीद्वितीयास्थयोरिति किम्। ग्रामे युवाभ्यां कृतम्। स्थग्रहणं श्रूयमाणविभक्त्यर्थम्। इह मा भूत् इति युष्मत्पुत्र इति॥

बहुवचनस्य वस्नसौ ॥ २१ ॥

बहुवचनान्तयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वस् नस् इत्येतावादेशौ भवतः। ग्रामो वः स्वम्। जनपदो नः स्वम्। ग्रामो वो दीयते। जनपदो नो दीयते। ग्रामो वः पश्यति। जनपदो नः पश्यति॥

तेमयावेकवचनस्य ॥ २२ ॥

युष्मदस्मदोरेकवचनान्तयोः षष्ठीचतुर्थीस्थयोर्यथासंख्यं ते मे इत्येतावादेशौ भवतः। ग्रामस्ते स्वम्। ग्रामो मे स्वम्। ग्रामस्ते दीयते। ग्रामो मे दीयते। द्वितीयान्तस्यादेशान्तरविधानसामर्थ्यात्षष्ठीचतुर्थ्योरेवायं योगः॥

त्वामौ द्वितीयायाः ॥ २३ ॥

एकवचनस्येति वर्तते। द्वितीयाया यदेकवचनं तदन्तयोर्युष्मदस्मदोर्यथासंख्यं त्वा मा इत्येतावादेशौ भवतः। ग्रामस्त्वा पश्यति। ग्रामो मा पश्यति॥

न चवाहाहैवयुक्ते ॥ २४ ॥

च वा ह अह एव एभिर्योगे युष्मदस्मदोर्वान्नावादयो न भवन्ति। पूर्वेण प्रकरणेन प्राप्ताः प्रतिषिध्यन्ते। ग्रामस्तव च स्वम्। ग्रामो मम च

स्वम् । युवयोश्च स्वम् । आवयोश्च स्वम् । युष्माकं च स्वम् । अस्माकं च स्वम् । ग्रामस्तुभ्यं च दीयते । ग्रामो मह्यं च दीयते । युवाभ्यां च दीयते । आवाभ्यां च दीयते । युष्मभ्यं च दीयते । अस्मभ्यं च दीयते । ग्रामस्त्वां च पश्यति । ग्रामो मां च पश्यति । युवां च पश्यति । आवां च पश्यति । युष्मांश्च पश्यति । अस्मांश्च पश्यति । वा । ग्रामस्तव वा स्वम् । ग्रमो मम वा स्वम् । युवयोर्वा स्वम् । आवयोर्वा स्वम् । युष्माकं वा स्वम् । अस्माकं वा स्वम् । ग्रामस्तुभ्यं वा दीयते । ग्रामो मह्यं वा दीयते । युवाभ्यां वा दीयते । आवाभ्यां वा दीयते । युष्मभ्यं वा दीयते । अस्मभ्यं वा दीयते । ग्रामस्त्वां वा पश्यति । ग्रामो वा मां पश्यति । युवां वा पश्यति । आवां वा पश्यति । युष्मान् वा पश्यति । अस्मान्वा पश्यति । ह । ग्रामस्तव ह स्वम् । ग्रामो मम ह स्वम् । युवयोर्ह स्वम् । अस्माकं ह स्वम् । युष्माकं ह स्वम् । ग्रामस्तुभ्यं ह दीयते । ग्रामो मह्यं ह दीयते । युवाभ्यां ह दीयते । आवाभ्यां ह दीयते । युष्मभ्यं ह दीयते । अस्मभ्यं ह दीयते । ग्रामस्त्वां ह पश्यति । ग्रामो वां ह पश्यति । युवां ह पश्यति । आवां ह पश्यति । युष्मान्ह पश्यति । अस्मान्ह पश्यति । अह । ग्रामस्तवाह स्वम् । ग्रामो ममाह स्वम् । आवयोरह स्वम् । युष्माकमह स्वम् । अस्माकमह स्वम् । ग्रामस्तुभ्यमह दीयते । ग्रामोमह्यमह दीयते । युवाभ्यामह दीयते । आवाभ्यामह दीयते । अस्मभ्यमह दीयते । ग्रामस्त्वामह पश्यति । ग्रामो मामह पश्यति । युवामह पश्यति । आवामह पश्यति । युष्मानह पश्यति । अस्मानह पश्यति । एव । ग्रामस्तवैव स्वम् । ग्रामोममैव स्वम् । युवयोरेव स्वम् । आवयोरेव स्वम् । युष्माकमेव स्वम् । अस्माकमेव स्वम् । ग्रामस्तुभ्यमेव दीयते । ग्रामो मह्यमेव दीयते । युवाभ्यामेव दीयते । आवाभ्यामेव दीयते । युष्मभ्यमेव दीयते । अस्मभ्यमेव दीयते । ग्रामस्त्वामेव पश्यति । ग्रामो मामेव पश्यति । युवामेव पश्यति । आवामेव पश्यति । युष्मानेव पश्यति । अस्मानेव पश्यति । युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम् । युक्तयुक्ते प्रतिषेधो न भवति । ग्रामश्च ते स्वम् । नगरं च मे स्वम् ॥

Digitized by Google

पश्यार्थैश्चानालोचने ॥ २५ ॥

पश्यार्था दर्शनार्थाः। दर्शनं ज्ञानम्। आलोचनं चक्षुर्विज्ञानम्। तैः पश्यार्थैरनालोचने वर्त्तमानैर्युक्ते युष्मदस्मदोर्वांनावादयो न भवन्ति। ग्रामस्तव स्वं समीक्ष्यागतः। ग्रामो मम स्वं समीक्ष्यागतः। ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः। ग्रामो मह्यं दीयमानं समीक्ष्यागतः। ग्रामस्त्वां समीक्ष्यागतः। ग्रामो मां समीक्ष्यागतः। अनालोचनइति किम्। ग्रामस्त्वा पश्यति। ग्रामो मा पश्यति॥ पश्यार्थैर्युक्तयुक्तेपि च प्रतिषेध इष्यते॥ तथा चैवोदाहृतम्॥

सपूर्वायाः प्रथमाया विभाषा॥ २६ ॥

विद्यमानपूर्वात्प्रथमान्तात्पदादुत्तरयोर्युष्मदस्मदोर्विभाषा वांनावादयो न भवन्ति। ग्रामे कम्बलस्ते स्वम्। ग्रामे कम्बलस्तव स्वम्। ग्रामे कम्बलो मे स्वम्। ग्रामे कम्बलो मम स्वम्। ग्रामे कम्बलस्ते दीयते। ग्रामे कम्बलस्तुभ्यं दीयते। ग्रामे कम्बलो मे दीयते। ग्रामे कम्बलो मह्यं दीयते। ग्रामे छात्रास्त्वा पश्यन्ति। ग्रामे छात्रास्त्वां पश्यन्ति। ग्रामे छात्रा मां पश्यन्ति। ग्रामे छात्रा मा पश्यन्ति। सपूर्वाया इति किम्। कम्बलस्ते स्वम्। कम्बलो मे स्वम्। प्रथमाया इति किम्। कम्बलो ग्रामे ते स्वम्। कम्बलो ग्रामे मे स्वम्॥ युष्मदस्मदोर्विभाषा अनन्वादेशइति वक्तव्यम्॥ *॥ इह मा भूत्। अथो ग्रामे कम्बलस्ते स्वम्। अथो ग्रामे कम्बलो मे स्वम्। अपर आह॥ सर्वएव वांनावादयोऽनन्वादेशे विभाषा वक्तव्याः॥ *॥ कम्बलस्ते स्वम्। कम्बलस्तव स्वम्। कम्बलो मे स्वम्। कम्बलो मम स्वम्। अनन्वादेशइति किम्। अथो कम्बलस्ते स्वम्। अथो कम्बलो मे स्वम्। न तर्हीदानीमिदं वक्तव्यं सपूर्वायाः प्रथमाया विभाषेति। वक्तव्यं च। किं प्रयोजनम्। अन्वादेशार्थ,मन्वादेशे हि विभाषा यथा स्यात्। अथो ग्रामे कम्बलस्ते स्वम्। अथो ग्रामे कम्बलस्तव स्वम्। अथो ग्रामे कम्बलो मे स्वम्। अथो ग्रामे कम्बलो मम स्वम्॥

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥

तिङन्तात्पदात्पराणि गोत्रादीनि कुत्सने आभीक्ष्ण्ये चार्थे वर्त्तमानानि अनुदात्तानि भवन्ति । पचति गोत्रम् । जल्पति गोत्रम् । आभीक्ष्ण्ये । पचतिपचति गोत्रम् । जल्पति २ गोत्रम् । ब्रुव । पचति ब्रुवम् । जल्पति ब्रुवम् । जल्पति २ ब्रुवम् । पचति २ ब्रुवम् । ब्रुव इति ब्रुवः कचिपातननाद् वच्यादेशाभावश्च । गोत्र । ब्रुव । प्रवचन । प्रहसन । प्रकथन । प्रत्ययन । प्रचक्षण । प्राय । विचक्षण । अवचक्षण । स्वाध्याय । भूयिष्ठ । नाम वा * । नामेत्येतद्वा निहन्यते । पक्षे आद्युदात्तमेव भवति । पचति नाम । पठति नाम । तिङ इति किम् । कुत्सितं गोत्रम् । गोत्रादीनीति किम् । पचति पापम् । कुत्सनाभीक्ष्ण्ययोरिति किम् । खनति गोत्रं समेत्य कूपम् । कुत्सनाभीक्ष्ण्ययोरिति पाठविशेषणं द्रष्टव्यम् । तेनान्यत्रापि गोत्रादिग्रहणेन कुत्सनाभीक्ष्ण्ययोरेव कार्यं भवति ॥

तिङ्ङतिङः ॥ २८ ॥

तिङन्तं पदमतिङन्तात्पदात्परमनुदात्तं भवति । देवदत्तः पचति । यज्ञदत्तः पचति । तिङिति किम् । नीलमुत्पलम् । शुक्लं वस्त्रम् । अतिङ इति किम् । भवति पचति ॥

न लुट् ॥ २९ ॥

पूर्वेणातिप्रसक्ते प्रतिषेध आरभ्यते । लुडन्तं तिङन्तं नानुदात्तं भवति । श्वः कर्त्ता । श्वः कर्त्तारौ । मासेन कर्त्तारः । तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वतासिरेवोदात्तः । यत्र तु टिलोपस्तत्रोदात्तनिवृत्तिस्वरो भवति ॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ३० ॥

नेति वर्त्तते । यत् यदि हन्त कुवित् नेत् चेत् चण् कच्चित् यत्र इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति । यत्करोति । यत्पचति । यदि

---

* प्रदशन प्रयजन न्याय प्रपञ्च प्रचक्षण इत्येते पुस्तकान्तरे ऽत्र गणे ऽधिकाः ।

करोति । यदि पचति । हन्त करोति । हन्त पचति । कुवित्करोति । कुवित्पचति । नेत् । नेज्जिह्मायन्तो नरकं पताम । चेत् । स चेद्भुङ्क्ते । स चेदधीते । चण् णिद्विशिष्टोऽयं चेदर्थे वर्त्तते । अयं च मरिष्यति । अयं चेन्मरिष्यतीत्यर्थः । समुच्चयादिषु तु यश्चशब्दस्तेन योगेन विधिरयं न भवति । कच्चित् । कच्चिद्भुङ्क्ते । कच्चिदधीते । यत्र । यत्र भुङ्क्ते । यत्राधीते । निपातैरिति किम् । यत्कूजति शकटम् । गच्छत्कूजति शकटमित्यर्थः । इयाः शतरि रूपमेतत् । युक्तमिति किम् । यत्र क्व च ते मनो दक्षं दधस उत्तरम् ॥

नह प्रत्यारम्भे ॥ ३१ ॥

नह इत्येतेन युक्ते प्रत्यारम्भे तिङन्तं नानुदात्तं भवति । चोदितस्यावधीरणे उपालिप्सया प्रतिषेधयुक्तः प्रत्यारम्भः क्रियते । नह भोक्ष्यसे । नहाध्येष्यसे । प्रत्यारम्भ इति किम् । नह वै तस्मिंश्च लोके दक्षिणामिच्छन्ति ॥

सत्यं प्रश्ने ॥ ३२ ॥

सत्यमित्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने । सत्यं भोक्ष्यसे । सत्यमध्येष्यसे । प्रश्नइति किम् । सत्यं वक्ष्यामि नानृतम् ॥

अङ्गाप्रातिलोम्ये ॥ ३३ ॥

अङ्ग इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये गम्यमाने नानुदात्तं भवति । अङ्ग कुरु । अङ्ग पच । अङ्ग पठ । अप्रातिलोम्य इति किम् । अङ्ग कूज वृषल इदानीं ज्ञास्यसि जाल्म । कूजनमनभिमतमसौ कुर्वन्प्रातिलोमो भवति ॥

हि च ॥ ३४ ॥

हि इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति । स हि कुरु । स हि पच । स हि पठ । अप्रातिलोम्यइत्येव । स हि कूज वृषल इदानीं ज्ञास्यति जाल्म ॥

Digitized by Google

छन्दस्यनेकमपि साकाङ्क्षम् ॥ ३५ ॥

हि चेति वर्त्तते । छन्दसि विषये हियुक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति एकमपि । कदाचिदेकं कदाचिदनेकमित्यर्थः । तत्रानेकं तावत् । अनृतं हि मत्तो वदति । पाप्मा एनं विपुनाति । तिङन्तद्वयमप्येतच्च निहन्यते । एकं खल्वपि । अग्निर्हि अग्ने उदजयत् । तिङन्तद्वयमपि हिशब्दयुक्तमेतत् । तत्रैकमुदजयदित्याद्युदात्तम् । अजा ह्यग्नेरजनिष्ट गर्भम् । सा वा अपश्यज्जनितारमग्रे । अजनिष्टेत्याद्युदात्तमपश्यदित्यनुदात्तम् ॥

यावद्यथाभ्याम् ॥ ३६ ॥

यावद्यथा इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति । यावद्भुङ्क्ते । यथा भुङ्क्ते । यावदधीते । यथाधीते । देवदत्तः पचति यावत् । देवदत्तः पचति यथा । परेणापि योगे भवति प्रतिषेधः ॥

पूजायां नानन्तरम् ॥ ३७ ॥

यावद्यथा इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति । किं तर्हि अनुदात्तमेव । यावत्पचति शोभनम् । यथा पचति शोभनम् । यावत् करोति चारु । पूजायामिति किम् । यावद्भुङ्क्ते । यथा भुङ्क्ते । अनन्तरमिति किम् । यावद्देवदत्तः पचति शोभनम् । यथा देवदत्तः करोति चारु । पूर्वेणात्र निघातः प्रतिषिध्यते ॥

उपसर्गव्यपेतं च ॥ ३८ ॥

यावद्यथाभ्यां युक्तं उपसर्गव्यपेतं च पूजायां विषये नानुदात्तं न भवति किं तर्हि अनुदात्तमेव भवति । पूर्वमनन्तरमित्युक्तमुपसर्गव्यवधानार्थोयमारम्भः । यावत्प्रपचति शोभनम् । यथा प्रपचति शोभनम् । यावत्प्रकरोति चारु । यथा प्रकरोति चारु । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति । यथा विष्णुमित्रः प्रकरोति चारु ॥

तुपश्यपश्यताहैः पूजायाम् ॥ ३९ ॥

तु पश्य पश्यत अह इत्येतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायां

विषये । तु । माणवकस्तु भुङ्क्ते शोभनम् । पश्य । पश्य माणवको भुङ्क्ते शोभनम् । पश्यत । पश्यत माणवको भुङ्क्ते शोभनम् । अह । अह माणवको भुङ्क्ते शोभनम् । पूजायामिति किम् । पश्य मृगो धावति । पूजायामिति वर्तमाने पुनः पूजायामित्युच्यते निघातप्रतिषेधार्थम् । तद्धि प्रतिषेधस्य प्रतिषेधेन संबद्धमिति ॥

अहो च ॥ ४० ॥

अहो इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये । अहो देवदत्तः पचति शोभनम् । अहो विष्णुमित्रः करोति चारु । पृथग्योगकरणमुत्तरार्थम् ॥

शेषे विभाषा ॥ ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति । कश्च शेषः यदन्यत्पूजायाः । कटमहो करिष्यसि । मम गेहमेष्यसि । असूयावचनमेतत् । पूजायामित्यस्य पूर्वत्र चानुकृष्टत्वादनधिकारे सिद्धे शेषवचनं विस्पष्टार्थम् ॥

पुरा च परीप्सायाम् ॥ ४२ ॥

पुरा इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति । परीप्सा त्वरा । अधीष्व माणवक । पुरा विद्योतते विद्युत् । पुरा स्तनयति स्तनयित्नुः । पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति । परीप्सायामिति किम् । नडेन स्म पुराधीयते । अत्र भूतकालविवक्षायां पुराशब्दो द्योतयति । ऊर्णया स्म पुराधीयते ॥

नन्वित्यनुज्ञैषणायाम् ॥ ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये । अनुज्ञाया एषणा प्रार्थना, अनुज्ञैषणा । अनुज्ञाप्रार्थनेत्यर्थः । ननु करोमि भोः । अनुजानीष्व मां, गमनं प्रतीत्यर्थः । अनुज्ञैषणायामिति किम् । अकार्षीः कटं देवदत्त । ननु करोमि भोः । पृष्टप्रतिवचनमेतन्नानुज्ञैषणा ॥

किं क्रियाप्रश्नेनुपसर्गमप्रतिषिद्धम् ॥ ४४ ॥

किमित्येतत्क्रियाप्रश्ने यदा वर्त्तते तदानेन युक्तं तिङन्तमनुपसर्गमप्रतिषिद्धं नानुदात्तं भवति । किं देवदत्तः पचति आहोस्विद्भुङ्क्ते । किं देवदत्तः शेते आहोस्विदधीते । अत्र के चिदाहुः । पूर्वं किंयुक्तमिति तत्र निहन्यते । उत्तरं तु न किंयुक्तमिति तत्विहन्यतएवेति । अपरे त्वाहुः । यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते तथापि सर्वस्य संशयविषयस्य तेन योग इति उभयत्र प्रतिषेधेन भवितव्यमिति । क्रियाग्रहणं किम् । प्रश्ने मा भूत् । किं देवदत्त ओदनंपचति आहोस्वित्सक्तूनिति । प्रश्नइति किम् । किमधीते देवदत्तः । क्षेपे किंशब्दोयं न प्रश्ने । अनुपसर्गमिति किम् । किं देवदत्तः प्रपचति आहोस्वित्प्रकरोति । अप्रतिषिद्धमिति किम् । किं देवदत्तो न पठति आहो स्विच करोति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

सप्तदशस्तबकावशेषः ॥

किंच ।

अतनि तनूनां कम्पन-
मरचि मतीनामथोन्मादः ।
अवितः केवलमासां
स्वमार्गसंचारसंस्कारः ॥ ४८ ॥

मतीनां भद्राभद्रविचारोत्थनिश्चयरूपाणां बुद्धिवृत्तिविशेषाणाम् ॥ ४९ ॥

किंच ।

स हरिमुरलिकाया निःस्वनोऽभूद्धूनां
श्रवणसविधचारी मन्मथोन्माथकारी ।
अविकलकुलशीलाचारचर्याभिचारी
धृतिविघटनतन्त्रः कोऽपि मन्त्रः स्वतन्त्रः ॥ ५० ॥

मन्मथेन कामद्वारा· उन्मथनम्· उच्चाटनं कर्तुं शीलमस्य सः, यद्वा सुन्दरीजनमनोमीनग्रहणार्थे मन्मथ एव उन्माथः कूटयन्त्रं तत् किरतीति सः, "उन्माथः कूटयन्त्रं स्या"दित्यमरः । धृतिविघटनमेव तन्त्रम्· आगमशास्त्रं यस्य सः । स्वतन्त्र इति, व्यासपुरस्सरणादिनिरपेक्ष इत्यर्थः ॥ ५० ॥

किंच ।

अतिमृदु मधुरं च श्लक्ष्णसूक्ष्मं च तद्वै
निनदनपरिपाटीपाटवं श्रीमुरल्याः ।
समजनि कुलपालीपद्मिनीनां विलोली-
करणकुशललीलोन्मत्तमातङ्गशीलम् ॥ ५१ ॥

अतिमृद्वित्यादिगुणत्रत्त्वेऽपि· उन्मत्तमातङ्गानामिव शीलं यस्येत्यनेन कठोरत्वोग्रत्वप्राचुर्यस्थौल्यरूपास्तद्विरोधिनो धर्माः सिद्धा इति विरोधालंकारः ॥ ५१ ॥

तच सर्वतः साराधिकाया राधिकाया अपि तन्मुरलीरुतमपूर्ववदासीदासीददेव कर्णाभ्यर्णम् ॥ ५२ ॥

आ ईषदपि सीददेव प्राप्नुवदेव ॥ ५२ ॥

यतः ।

धैर्यभ्रंशविघूर्णनप्रलपनव्रीडान्तधीविभ्रमे-
माध्वीकाचमनोत्सवायितमभूच्छ्रोत्रेण पीतं यदि ।
एकं त्वत्र विशिष्यते भवति यत् तस्मिन् दृशोः शोणिमा
सोऽयं किंतु दृगम्बुनेव पतता निर्धौत एवाभवत् ॥ ५३ ॥

व्रीडान्तो लज्जानाशः । अत्रैकं विशिष्यते,किं तत्, तस्मिन् माध्वीकाचमने दृशोः शोणिमा भवति, अत्र स नास्तीति भावः, अथ तदपि विमृश्य नास्ति कोऽपि विशेष इत्यभिनयेनाह सोऽयमिति ॥ ५३ ॥

किंच ।

किं हर्षस्येव हर्षो रंहः इव रंहसः किं महो वा महस्य
श्रीकृष्णाग्रप्रयाणोत्सवरभसविधेः किं त्वरेव त्वरायाः ।
प्रत्येकं स्वस्वनामश्रुतिसरसहृदां तत्र कन्यागणानां
वंशीध्वानः स आसीदभिलषितपथस्यातिदूरोऽप्यदूरः ॥ ५४ ॥

एवं परोढानां प्रायो मध्याप्रगल्भानां मोहनमुक्त्वा कन्यानां तु मौग्ध्यादौत्सुक्याभिलाषहर्षादिसंचारिभिः सुखालोड्यामां मोहनमपि सुकरमेवेत्याह किं हर्षस्येति, "साक्षान्मन्मथमन्मथ" इतिवत् प्रथमं वंशीध्वानो हर्षस्येव हर्षः, हर्षद आसीदिति, हर्षमेव स प्रफुल्लीचकार हर्षस्तु ताः प्रफुल्लयामासेवेति, आज्ञामत्यवहित्यादिविरोधिसंचारिभिरपि दुर्वारो हर्षो जात इत्यर्थः । ततस्तथैव रंहसो रंहस्यस्यापि रंहस्य, सुरतौत्सुक्यं दुर्वारमभूदित्यर्थः । ततश्च महस्य मह एवेति, तदैव संपद्यमान इव दुरपह्नवः सुरतोत्सवोऽन्वभूयत इत्यर्थः । तदैवाकस्माद्बहिरनुसंधानोत्थे तदद्दर्शने सति तदर्थमेव श्रीकृष्णस्याग्रे यः प्रयाणोत्सवरभसविधिस्तस्मात्तेनौत्सुक्या इव । एवंच अभिलषितो यः पन्थाः कदा मधुरं मुरली स्वानं श्रोष्याम इति यो मनोरथस्तस्यातिदूरोऽपि यादृशे अभिलाषोऽपि प्रवेष्टुं न शक्नोतीत्यर्थः, सोऽप्यदूरो निष्टकाम्य एवाभूदित्यर्थः ॥ ५४ ॥

एवमेकसूत्रगुम्फनकृतप्रपञ्चाः पञ्चालिकावितनय इव समसमयसमानकृतयो मात्रकृतयोगरहिताः परस्परापराहतव्यासना अपि परस्परापराधितामनोद्यमा नोद्यमानोद्यमा नोद्यमाधारयितुं समास्ताः कृष्णाग्रहस्ता इव ॥ ५५ ॥

एवं ताः अखिलसुन्दर्यः कृष्णाग्रहस्ता इव व्रजपुरतो व्रजपुरात् पुरतः पुरतोऽग्रतोऽग्रतो निष्क्रान्ता इत्यन्वयः । एकेनैव सूत्रेण गुम्फनकृतो कल्पनकल्पितः प्रपञ्चो विस्तारो यासां तादृश्यः, पञ्चालिकावितनय इवेति गतिमत्त्वेऽपि आज्ञा व्यञ्जितम् । समे तुल्ये समय एव समानी

तुल्या· एव कृतिव्यापारो यासां ताः । किं परस्परद्वेष्या नहि नहीत्याह, ध्यानकृतो योगः संगमस्तद्रहिताः, अबुद्धिपूर्वकतयैवेत्यर्थः, अत एव परस्परं न पराहतो गमनोद्यमोऽपि याभिस्ताः । ननु तासां स्वप्रतिपक्षगतेष्टानिष्टबाधकसाधकस्वभावानामज्ञानमेव भद्रं, मैवं, तदानीं परमानन्दसंमर्देन तासां तादृशभावाच्छादनादित्याह, परस्परं न पराहता वासना याभिस्तादृशा अपि, यतः कृष्णायत्तेया यस्मा अतस्तेन नोद्यं शीघ्रमागच्छतेति मुरल्या प्रेर्यमेव· आ सम्यग्धारयितुं क्षमाः ॥ ५५ ॥

द्योतो द्योतोज्ज्वला निर्जलधरा धरामागत्य गत्यनवस्थे नवस्थेमनि प्रेमणि विशृङ्खलाश्चपला इव ॥ ५६ ॥

कुलाङ्गनानां पतिश्वश्र्वादितर्जनकलिलान्तराणां भयाभावे को हेतुरिति चेत् प्रेमैवेति सिद्धान्तयन् सौन्दर्यमपि वर्णयति द्योत इति, द्योतो गगनात् सकाशाद् धरामागत्य चपला विद्युत इव, द्योतेन प्रकाशेनोज्ज्वलाः, "प्रकाशो द्योत आतप" इत्यमरः, गत्या अनवस्थे· अवस्थितिर्मर्यादा तद्रहिते, दुष्पार इत्यर्थः, नवः स्थेमा स्थैर्यं यस्य तस्मिन् प्रेमणि विशृङ्खलाः शृङ्खलारहिताः, संपूर्णप्रवेशवत्य इत्यर्थः ॥ ५६ ॥

बलवताबतानुरागसमीरणेरणेन विभज्य चालिताः कनकलता इव ॥ ५७ ॥

बहुधा· अनुभूतचराङ्गसङ्गेऽपि श्रीकृष्णे तदैव कथमियांश्चित्तावेश इति चेत्, तत्र मदनशोद्वासकस्वलक्षणोऽनुराग एव कारणमिति वदन् वर्णितमपि सौन्दर्यं विभक्तावयवतया बोधयति बलवतेति, अनुराग एव समीरणः पवनस्तस्य· ईरणेन प्रेरणेन, क्षेपणेनेति यावत् ॥ ५७ ॥

उत्साहसोत्साहसोसूच्यमानेन संभ्रमभ्रमदनेकपेनोन्मथिताः स्थलकमलिन्य इव ॥ ५८ ॥

तासां तदानीमावेगाख्यः संचार्येव तत्सूचकः प्राभवदिति ब्रुवन् सौरभ्यसौकुमार्ये अपि ज्ञापयति संभ्रमेति, संभ्रम आवेगः स एव भ्रमन्

मदेनानवतिष्ठन्· अनेकपो हस्ती तेन, कथंभूतेन, उचतं साहसं यस्मात् तादृशो य उत्साहस्तेन सोऽसूच्यमानेन· अतिशयेन व्यज्यमानेन ॥ ५८ ॥

उत्कण्ठादेवता अवतारिता इव व्रजपुरत: पुरत: पुरतो निष्क्रान्ता: ॥ ५६ ॥

अनुरागव्यञ्जकमौत्सुक्यमपि दुर्वारमभूदित्याह, उत्कण्ठा एव देवताः, अवतारिता धृतावताराः, "तारकादित्वादितच्," "वष्टि भागुरी"-त्यकारलोपः, उत्कण्ठा मूर्ता इवेत्यर्थः ॥ ५९ ॥

कनकप्रभा इव मरुदाधूनिता नितान्तमहसो महसोऽसूयमाणोज्ज्वल्या: संचारिण्यो दीपकलिका इव ॥ ६० ॥

ततश्च पुरादिष्क्रान्तास्ता वर्त्मनि कान्तिसंकुलतया लब्धैकीभावा उत्प्रेक्षते, कनकप्रभा इति वर्णस्य पीतिमा, दीपकलिका इति वस्त्वन्तरप्रकाशकत्वमप्युक्तम् ॥ ६० ॥

अनुरागरागवेपमानापमानाशङ्कास्त्वरया रयालोलकुण्डलाकुण्डलावण्या युगपदेकपदे कमनीये कृताभियोगास्तस्मिन्नेव मुरलीध्वन्यध्वन्यनुसस्रु: ॥ ६१ ॥

अनुरागस्य रागस्तैव्ण्यं तस्माद्वेपमाने कम्पमाने इव· अपमानाशङ्के निन्दाभये यासां ताः, रयेण वेगेन· आलोलाभ्यां कुण्डलाभ्याम्· अकुण्डानि· अविक्लवानि लावण्यानि यासां ताः, "कुडि वैकल्ये", युगपदेकदेव· एकस्मिन् पदे श्रीकृष्णे कृतोऽभियोगोऽभिसंधिर्याभिस्ताः ॥ ६१ ॥

तत्र च तासामनेकप्रकारतया प्रसिद्धा सिद्धौषधिवत् काश्चिदनूढा नूढाश्चा: पिपासुं सदोहयन्त्यो दोहयन्त्यो गास्तद्दोहनं विहाय विहायसेव ययु: ॥ ६२ ॥

एवं सामान्यतोऽभिसारशोभामुपमाय पुनर्विशेषतोऽपि तासां त्रिविधभेदानां क्रमेण विविधक्रियाकलापपरिहारेणाभिसारमाह तत्रेत्यादि । अनूढाः कन्याः, सिद्धौषधिपक्षे न विद्यते· ऊढं प्रापणं यासां ताः, "वह

प्राप्य'' भावकान्तम्, नु निश्चितमेव पित्रोश्चाज्ञा गृहीतनिर्देशाः, अत एव पित्रोर्मुदं सदा· ऊहयन्त्यः, केन कर्मणा पित्रोः सुखं स्यादिति नित्यं वितर्कयन्त्यः, अत एव तदानीमपि गा दोहयन्त्यः, तद्दोहनं "ल्यन्ता-ल्ल्युट्", भाण्डप्रदानदुग्धग्रहणवत्सविमोचनादिकं कर्म त्यक्त्वेत्यर्थः, विहा-यसेव· आकाशमार्गेणेव ॥ ६२ ॥

काश्चित् तथैव ता वतालमधिश्रयणीमधि श्रयणीयं संपाव-कमारोपितमनवतार्य नवतार्यतमेनोत्कण्ठेन निर्ययुः ॥ ६३ ॥

ताः प्रसिद्धाः । वतेति विस्मये । अलमतिशयेन । अधिश्रयणीं चुल्लीमधि· आरोपितम् । कीदृशं, श्रयणीयं दर्वीचालनादिना श्रयितुं योग्यम् । नवतार्यतमेन नहि· अवतारयितुं शक्यतमेन, अवेत्यस्याकार-लोपः ॥ ६३ ॥

काश्चिदपराः कौतुकोपरि परिवेषयन्त्यो गवेषयन्त्यो गमनप-थमेव परिवेषणमपहाय हा यत्नेनैव निर्जग्मुः ॥ ६४ ॥

परिवेषयन्त्य एव कौतुकोपरि वेणुश्रवणकौतुकानन्तरं गमनपथं गवेषयन्त्योऽन्वेषयन्त्य इति तत्राश्नतां गुरुजनानां मण्डलीतस्तत्पथस्य दौर्लभ्यात्, अत एव हा इति पीडायाम् ॥ ६४ ॥

काश्चन ता इतरापत्यानि कौतुकेन केनचिद् गव्यं पयः पाय-यन्त्यो द्रुतमेव त्यान्यपत्यान्यपहाय भूमौ दुद्रुवुः ॥ ६५ ॥

त्यानि तानि, भूमौ· अपहायेति, पल्यङ्कादौ स्थापने विलम्बोऽपि सोढुमशक्य इति भावः ॥ ६५ ॥

काश्चन पूर्वमुनिरूपा रूपान्तरमासाद्य निराकुलगोकुलगोचरा गोपवधूतां धूर्तांहस्त्वेन प्राप्य पतिमत्यो मत्योढकृष्णानुरागाः प-तीन् शुश्रूषमाणास्तदपि पतिशुश्रूषणमपहाय हायनाधिकमेव तं क्षणं मन्यमाना निश्चक्रमुः ॥ ६६ ॥

रूपान्तरं स्त्रीस्वरूपं, धूर्ताहरत्वेन खण्डितभक्त्यन्तरायत्वेन, गो-पवधूतां गोपनारीत्वं प्राप्य, मत्या बुद्ध्या· ऊढः कृष्णानुरागो याभिस्ताः, पतिशुश्रूषणं कोष्णोदकप्रदानादिकम् ॥ ६६ ॥

काश्चन ता अभ्यवहरन्त्यो हरन्त्यो हृदयमन्योन्यमन्योन्य-परिहासेन झटिति तमभ्यवहारं हारं हारमेव निरगुः ॥ ६७ ॥

हारं हारं त्यक्त्वा त्यक्त्वा ॥ ६७ ॥

अथ यथाश्रुति श्रुतिरूपा अपि सखीभिरनुलिप्यमानैकस्तनाः स्तनान्तरानुलेपपक्षापक्षालनेनैव द्रुततरं बहिरीयुः ॥ ६८ ॥

श्रुतिरूपाः श्रुतिवर्यः, यथाश्रुति श्रुतिमनतिक्रम्य बहिरीयुः, यद्व-वश्यतया वंशीं शुश्रुवुस्तद्वश्यतयैव बहिर्ययुरित्यर्थः । स्तनान्तरस्यानु-लेपपक्षे· अपक्षालनेनैव प्रथमं यत् क्षालनं तेन विनैवेत्यर्थः, चित्रनिर्माणपक्षे विलम्बहेतोस्तासामसंमत्या· अनुलेपपक्षे संमत्यापि न तस्य संपूर्णत्वमि-त्यर्थः ॥ ६८ ॥

काश्चन ता एवाङ्गसंस्कारकारणमुद्घाटितकञ्चुलिकयालिकया मृज्यमानतनवो नवोत्तमवयसस्तथैव तदसंस्कारं कारं कारमेव निर्याताः ॥ ६६ ॥

अङ्गसंस्कारकारणम्· अङ्गोद्वर्तनादिनिमित्तम्, आलिकया सख्या, तत्· अङ्गम्· असंस्कारं स्नानादिसंस्काररहितं कारं कारं कृत्वा कृत्वा विनिर्य्येति वा ॥ ६९ ॥

नित्यसिद्धाः सिद्धानुरागास्तु वस्त्राभरणविपर्यासपर्यासत्तिसुशो-भव्यया भव्ययामरूपाः सुरूपाः सुतरामेवासन् ॥ ७० ॥

एवं साधनसिद्धानामुक्तलक्षणानामुत्तरोत्तरमुख्यानां तादृशप्रेम्णैव लौकिकवैदिकदैहिककृत्योपरमो नित्यसिद्धानां तु तत्र कैमुत्यमेवोपपाद-यतीति तमप्रोच्य तासामनुरागोत्थमावेगाख्यसंचारिणं विभ्रमालंकारलि-ङ्गेनाह नित्यसिद्धा इति, वस्त्राभरणानां विपर्यासस्य या पर्यासत्तिस्त-

यैव शोभना शोभा यासां ताश्च सा भव्याश्चेति तथा ताः, भव्यस्य मङ्गलस्य यामरूपाः ॥ ७० ॥

तथाहि ।

हारं श्रोणितटे मणीन्द्ररसना वक्षोजयोर्नूपुरे
दोष्णोरङ्गदमङ्घ्रिपद्मयुगले केशेषु नीवेर्मणिम् ।
नीवौ केशमणिं दधुर्मृगदृशो मन्ये प्रमोदोदया-
दङ्गान्येव परस्परं विदधिरे हर्षप्रसादोत्सवम् ॥ ७१ ।

हर्षप्रसादोत्सवं विदधिरे स्वेषां प्रेष्ठाङ्गसङ्गसंबन्धेन भाविनीं सुखसमृद्धिं मुरलीमुखादिव श्रुत्वेति भावः ॥ ७१ ॥

अक्ष्णोरेकमनञ्जितं चरणयोरेकोऽभवल्लाक्षया
रक्तः कुङ्कुमकर्दमेन कुचयोर्नैकः समालेपितः ।
स्वाभिः कान्तिभिरेव हन्त सुदृशामेतानि गाढं बभु-
र्लाभोऽयं तु विशेष एव यदियं रागोदयव्यञ्जना ॥ ७२ ॥

एतानि अङ्गानि, रागोदयव्यञ्जनेति, कृष्णेन स्वयमेवानुभविष्यमाणत्वात् ॥ ७२ ॥

कासांचन ।

उत्तरीयमपि चान्तरीयता-
मन्तरीयमपि चोत्तरीयताम् ।
यज्जगाम किमभूत् परस्परं
पूजनं तदिव नूनमङ्गयोः ॥ ७३ ॥

पूजनं सख्यमयसंमाननम् ॥ ७३ ॥

किंच ।

श्रोणीभरस्खलितकाञ्चनकाञ्चिदाम
मञ्जीरहीरशिखरानुषजद्गुणायम् ।

कर्षन्त्य एव कतमा विबभुर्व्रजन्त्यो
मातङ्गिका इव विशृङ्खलशृङ्खलायाः ॥ ७४ ॥

मञ्जीरस्य हीरशिखरे· अनुषजद् वेष्टनेन परिष्वजद् गुणाग्रं डोराग्रभागो यस्य तथाभूतं काञ्चिदाम कर्षन्त्य एव विबभुः क्षणमात्र-स्थित्याप्युद्ग्रन्थने विलम्बसहनाशक्तेः । मातङ्गिका अनुकम्पितहस्तिन्यः । विशृङ्खलं विगतबन्धं शृङ्खलाग्रम्· अन्दुकाग्रभागो यासां ताः ॥ ७४ ॥

किंच ।

प्रस्थानवेगशिथिलां करकुड्मलेन
धृत्वेव नीविमपरा चपलं चलन्ती ।
तत्कालनाभिविवरोदयदब्जकोषां
नारायणस्य वपुषः सुषमां विजिग्ये ॥ ७५ ॥

तस्मिन् काले नाभिविवरादुदयन्· अब्जकोशो यस्यां तां सुषमां शोभां स्वनाभेरुपरि धृतनीविडोरकस्य स्वकरकमलस्य शोभया विजिग्ये जितवतीत्यर्थः ॥ ७५ ॥

कृत्वैकपादकमलेऽनुचरीकृतार्द्र-
लाक्षारसैः सरणिमेकत एव शोणाम् ।
यान्त्या कयाचन हरार्धशरीररूपा
शैलाधिराजतनया नितरां विजिग्ये ॥ ७६ ॥

एकस्मिन् पादकमले वामे· अनुचर्या कृता ये· आर्द्रलाक्षारसास्तैः सरणिम्· एकतः· एकपार्श्वे· एव शोणां कृत्वा यान्त्या । हरार्धेति, हरस्यापि वामशरीरार्धं पार्वती, अत एव वामे पाद एव लाक्षारसो नतु दक्षिणे ॥ ७६ ॥

काचिद्व्यराजत वधूरनुकूलवात-
धूतोत्तरीयसिचयाञ्चलमाचलन्ती ।

संचारिणी स्वयमनङ्गरहःपताका-
लक्ष्मीरिवोत्तमशरीरपरिग्रहेण ॥ ७७ ॥

अनुकूलेति क्रियाविशेषणम् ॥ ७७

किंच । कस्याश्चन,

एकाङ्घ्रिपङ्कजतले विनिवेशितस्य
विच्छिन्न एव निनदोऽजनि नूपुरस्य ।
मूकेन साकमतिवादिनि वावदूके
वादः परं भवति हि प्रतिवादहीनः ॥ ७८ ॥

विच्छिन्न एवेति, द्वितीयनूपुरसद्भाव एव• उत्तरवद् ध्वन्यविच्छेदो भवतीत्यर्थः ॥ ७८ ॥

किंच ।

वामे दोष्णि दधेऽङ्गदं कतमया नान्यच यत् संभ्रमात्
सौभाग्यातिशयप्रकाशनकृते तद्वै जयश्रीरभूत् ।
तेनाङ्गान्यखिलानि संशुशुभिरे तस्या न दिव्यौषधेः
शाखाद्योततनतः समस्तवपुषः किं जायते द्योतनम् ॥ ७९ ॥

दोष्णि भुजे तद्धारणमेव जयश्रीरुत्कर्षसंपत्तिः, दृश्यते च लोके शौर्यवीर्याद्यहंकारवतामेकरत्नवलयादिमत्त्वं, यथा बलदेवस्यैककुण्डलित्वं, नच शोभाहानिरित्याह तेनेति, दिव्यौषधेः शाखामात्रस्य द्योततनतः किं समस्तवपुषो द्योतनं न जायते, अपितु जायत एवेत्यर्थः ॥ ७९ ॥

किंच ।

कर्णाभ्यां यदपि श्रुतः स मुरलीक्काणः कलानां निधे-
र्वामं काञ्चनकुण्डलेन तदपि प्रानर्चे कर्णं परा ।
दोषोऽस्या न स एव किंतु मुरलीक्काणस्य तस्यैव य-
च्चित्तस्य भ्रमणं चकार सुतनोर्गन्तुं च तेने त्वराम् ॥ ८० ॥

कर्णाभ्यां द्वाभ्यामेव श्रुतो न केवलमेकेन, वामेनेति पारितोषिकलाभो द्वयोरेवोचित इति भावः । प्रमादध्वाति, स एव दोषो नास्याः किंतु मुरलीक्वाणस्य तस्यैवेति, अस्याश्चित्तं भ्रामयता तेन यस्मै यस्मै यद्वापितम्· अनयापि तस्मै तद्दत्तमिति भावः ॥ ८० ॥

एवं विहाय निजनिजभवनं वनं जिगमिषूणामिषूणामानङ्गीनां पराक्रमेण क्रमेण वर्धमानमानसविकाराणां काराणां चिरसङ्गाद्विमुक्तानामिव पथि पथि मिलितानामितरेतरं तरङ्गितोत्कण्ठया कण्ठयातजीवनानामिव तदानीममूदृशाममू दृशामतिचपलताचकितते तते तासामेव निजनाथसंगममहामहारम्भे दरदलदिन्दीवरवरदलमयीं कुसुमवृष्टिमिव तेनाते ॥ ८१ ॥

अमूदृशां पथि पथि· इतरेतरं मिलितानां गोपीनां दृशां दृष्टीनां चपलताचकितते अमू कर्त्र्यौ कुसुमवृष्टिमिव तेनाते विस्तृतवत्यौ । कस्मिन् कर्मणि, तासामेव निजनाथसंगम एव महामहो महोत्सवस्तस्यारम्भे तते विस्तृते । इषूणामित्यस्य विशेषणम्· आनङ्गीनामिति, अनङ्गसंबन्धिनीनामित्यर्थः, "इषुर्द्वयो"रित्यमरः ॥ ८१ ॥

तेनातेमे च मङ्गलमङ्गलक्ष्मीणामिव निराबाधम् ॥ ८२ ॥

ततश्च तेन कुसुमवृष्टिविस्तारेण· मङ्गलक्ष्मीणां निराबाधं मङ्गलमेव· आतेने व्यस्तारि ॥ ८२ ॥

एवमितरेतरेहितविभागच्छं गच्छन्तीषु तासु पतिभिर्मुनिपूर्वाः पूर्वाह्ने न्यरोधिषत ॥ ८३ ॥

अथासां स्वजननिरोधविनिर्गमौ व्यवस्थया यथायोगमाह· एवमित्यादिना, इतरेतरम्· ईहिता· ईप्सिता विभागस्य विच्छेदस्य छा छेदो नाशो यत्र तच्छथा स्यात् तथा गच्छन्तीषु "छो छेदने" तासु मध्ये मुनिपूर्वाः पूर्वाह्णे पुर्या बाह्ये प्रदेशे ॥ ८३ ॥

पितृभिः कुलकन्याः कुलकन्यायेन भ्रातृबन्धुभिरन्धुभिरति-मोहामामिव श्रुतिपूर्वा अपि न्यवार्यन्त ॥ ८४ ॥

कुलकन्यायेन संबन्धन्यायेन, "कुलकं तु पटोले स्यात् संबन्धे श्लोकसंहता"विति मेदिनी । अन्धुभिः कूपैः, "पुंस्येवान्धुप्रही कूप" इत्यमरः ॥ ८४ ॥

पर्यन्तपथमनुरागस्य वहन्त्यो हन्त न काश्चिदपि निवर्तयितुं शेकिरे* चकाशिरे च कामं ता एव गोविन्दानुरागेण ॥ ८५ ॥

निवर्तयितुं न शेकिरे† न शक्या अभवन्, अतस्ता एव कामं स्वच्छन्दं चकाशिरे, "काशृ दीप्तौ," अनुरागस्य परिपाकाद्विघ्नैरशक्याभिभवा इत्यर्थः ॥ ८५ ॥

नित्यसिद्धास्तु तास्तु ता एव सर्वतोभावेन भावेन जनेन मोहिता नमो हि ताभ्यः ॥ ८६ ॥

नित्यसिद्धास्तु भावेन॰ उज्ज्वलनीलमण्युक्तदिशा॰ अनुरागादप्युपरिकक्षारूढेन महाभावेन हेतुना मोहिता लब्धमोहा, अनेन स्तुता एव ताः, केन वा निरोद्धुं शक्यन्त इति भावः । यद्यपि साधनसिद्धा अपि सर्वा महाभाववत्य एव तथापि तासां क्रमेण तत्तत्सङ्गवशादिव तथाभूतत्वं, नित्यसिद्धानां तु तत्स्वभावेनेति स्वष्टु एवोत्कर्ष इति भक्त्युद्रेकेण प्रणामचाह नम इति ॥ ८६ ॥

अथ मुनिरूपाणां द्विधभावतो भावतोऽपृथक्त्वेऽपि काश्चिदनुरागविजितविकषा विकषायास्तथाविधसुकृतकृतभगवद्रूपसङ्गसंभावनसुभगंभावुकभावुकतया निराबाधमेव विहाय भवनं वनं ययुः ॥ ८७ ॥

अथ काश्चिन्निर्गमाशक्ता निरुद्धा एव बभूवुरिति तासां स्वरूपं निरोधे कारणं च वक्तुं तत्सजातीया अन्या लब्धाभिसारास्ततो मुख्यतया

*—तुमीशिरे इति पा० ।

† न॰ ईशिरे इति पा० ।

विभजन् प्रथममाह, द्वैधभावतः मुख्यामुख्यतया द्विविधात्वेनेत्यर्थः, भावतो भावेन· चोपपत्यभावनामयेन· अपृथक्त्वेऽपि तुल्यत्वेऽपि कश्चिन्मुख्या विकषायाः पूर्वसाधनोद्रेकेण पक्ककषायाः, खण्डितप्राकृतत्वापादकविविधान्तराया इत्यर्थः, अत एवानुरागेण विजिता विकषा विघ्नाः पक्षे मञ्जिष्ठा च याभिस्ताः, "कष हिंसायां,""मञ्जिष्ठा विकषा जिङ्गी"त्यमरः, तथाविधेन सुकृतेन साधनभक्तियोगसुपरिपाकेण कृता भगवदङ्गसङ्गेन संभावना यस्मात् तादृशं सुभगंभावुकं सुभगीभवत्· भावुकं मङ्गलं यासां तासां भावसत्ता तया ॥ ८७ ॥

कासांचन दुष्पचे पचेलिमदशां गतवति कषाये चरमा चरमा भावदशासा भाग्यविशेषं विदुषी समासेदुषी समासेन फलोन्मुख्यं मुख्यं यद्यजनि जनिमन्तरेणैव तदा शरीरान्तरेणैव ताः कृष्णमासेदुः ॥ ८८ ॥

ततोऽवरासां तु तादृशसाधनोद्रेकस्याभूतचरत्वादखण्डितकषायत्वात् तादृशदेहेन भगवदङ्गसङ्गो दुर्लभ इत्याह कासांचनेति ।

न च चिन्मयभूमौ माथुरमण्डले· अपक्वकषायाणां जन्मैव न भवतीति वाच्यं, शुद्धसत्त्वमय्यां देवकीदेव्यामपि षड्गर्भसंज्ञकानां जन्मश्रुतेः, प्रपञ्चगोचरायामवतारलीलायां सिद्धसाधकयोः प्रापञ्चिकजीवानामपि प्रवेशो भवतीति सिद्धान्तस्य साधितत्वात् ।

किंच· आसां तु नित्यसिद्धाङ्गनागणसङ्गाद्भाग्यविशेष एवाभीष्टनिर्वाहको द्रुतमेवाभूदित्याह,कषाये दुष्पचे दुर्जरेऽपि वक्ष्यमाणप्रकारेण निरोधजनितोत्कण्ठध्यानोत्थाभ्यां दुःखसुखाभ्यां पचेलिमदशां गतवति सहसैव स्वयं जीर्णत्वं प्राप्ते सति तद्देहस्यासिद्धत्वात् तासां यदि चरमा दशमी भावस्य दशा· अजनि तदापि पुनर्जनिं विनापि ताः कृष्णमासेदुः । सा दशा कथंभूता· चरा चपला मा शोभा यस्यां सा, यद्वा भाविमङ्गलसूचनार्थमिव तदापि· अचला स्थिरैव शोभा यस्यां सा ।

ननु रासोत्सवारम्भे तस्या अमङ्गलमय्या इत्याद्यस्तत्र प्रवेशे का शक्तिरित्यत आह, भाग्यविशेषं विदुषी जानती, यतः समासेन संक्षेपेणैव मुख्यं फलोन्मुख्यं मे कृष्णाङ्गसङ्गरूपे फले उन्मुखत्वम् अविदुषी प्राप्तवती, अद्धा सौभाग्यविशेषं विदुषी ज्ञापयन्ती, ज्ञापयितुम् "अन्तर्भावितणिजर्थत्वात्," एताः स्वदेहमपि विहाय मां प्राप्ता इति भगवता सौभाग्यविशेषस्य दास्यमानत्वात् । अन्यत् समानम् ॥ ८८ ॥

यतो निष्कृपतयैषां बत पतयोऽपावृतरणतो भवननिष्क्रमक्रमतः प्रागेव द्वारमारुध्य स्थितास्तासां गमनरङ्गभङ्गभवत्प्रयत्ना भवन्ति स्म ॥ ८९ ॥

उक्तमेवार्थमुक्तप्रकारान्तरेण प्रपञ्चयति यत इति । निष्कृपत्वेन उग्राः पतयस्तासां भवनाद्विनिष्क्रमे यः क्रमस्तेन अपावृतरणतः अयस्सोपानावल्यवरोहणतः प्रागेव गमनरङ्गस्य भङ्गे भवन् वर्तमानः प्रयत्नो येषां ते ॥ ८९ ॥

ताश्च तदा तदारोधनं वीक्ष्य कृष्णमभिसर्तुमक्षमाः समासारास्तस्मिन्नेवान्तर्गृहेऽन्तर्गृहेश्वरस्य कृष्णस्यानुध्याविध्याविर्भूतस्यैव स्फुरणानन्दनन्दवशादुपभुक्तसुकृतपरःसहस्रा दुःसहसहवनगमनाभावतो विरहदुःखदुःखरतादुःखातजीवनज्वालया चोपमुक्तिलसत्तस्विकर्मोघाः ॥ ९० ॥

एवमेव सारो यासां ता इति, तदापि तान् उद्दिश्य दुर्वचनम् आत्महत्यां वा न चक्रुरित्यर्थः । अन्तर्गृहे गृहमध्ये अन्तरन्तःकरणमेव गृहं तस्येश्वरस्य अनुध्या अनुध्यानं तस्या विधिना आविर्भूतस्य स्फुरणे आनन्दस्य नन्दः समृद्धिस्तद्वशात्, विरहदुःखस्य या दुष्टा खरता तीक्ष्णता तया हेतुना दुःखाता दुरवस्था या जीवनज्वाला तया, "अनुभवदारणे" ॥ ९० ॥

नीवीबन्धनाः सत्यो जारतयारतया धियाधियातपारवश्येन जातनिर्वेदा वेदान्विष्यमाणं कृष्णमेकान्तकान्तभावेन सद्य एवात्मानमासादयितुं सादयितुं च पारवश्यदुःखं निर्मोकमिव भुजंगस्य गुणोपदेहं देहं विमुच्य कृष्णाङ्गसङ्गमङ्गलमङ्गलक्ष्मीसौभाग्यं गुणरहितं हितं समवाप्य सद्य एव ताभिः सह सहर्षमेव कृष्णमभिसरन्ति स्म ॥ ६१ ॥

नीवीबन्धना अत एव पक्वकषायाः, अत्र सुकृतसुकृतेतरशब्दाभ्यां पुण्यपापे नोच्येते किंतु भगवत्स्फूर्तितदुत्कण्ठे एवेति केचिद्व्याचक्षते, यावतीभ्यां च ताभ्यां वृताभ्यामेव प्रौढभावः साधकः सिध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि संप्रति युगपदेव भोगो जात इति,पुण्यपापयोस्तु स्वस्वप्रतिनियतफलदातृत्वात् पापस्य तु सुतरां भगवद्विरहमयप्रेमस्फोरकत्वाभावात्· "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते"इति पाद्मकार्तिकमाहात्म्यानुसारेण तासां सुतरां तत्प्रारब्धजन्मत्वाभावात्, यद्वा "गुरुपुत्रमिहानीत"मित्यादिन्यायेन प्रारब्धरक्षणारक्षणयोः स्वप्रेमवर्धनविदग्धश्रीभगवदिच्छैकमयत्वमेवानुमननीयमिति । अधियातम्· अधिगतम्· अनुभूतं यत् पारवश्यं तेन· आत्मानं प्रयोज्यकर्तारं कृष्णं कर्म· आसादयितुं प्रापयितुं खण्डयितुं च निर्मोकमिवेति देहत्यागस्य प्रातीतिकत्वमात्रं न तु वास्तवत्वं यथाज्वरितस्यैव भुजंगस्य कण्टकादिप्रतिबन्ध एव निर्मोकमोचनमेव ततो निष्क्रमणमेव· प्रौज्ज्वल्यतेजस्वित्वनैरुज्यलाभ एव तथैवासां कृष्णविच्छेदज्वरितानामेव पतिकृतप्रतिबन्ध एवेत्यादिकं योजनीयम् । गुणोपदेहं प्राकृतसत्त्वादिगुणोपलिप्तं, "दिह प्रलेपे" । गुणरहितमप्राकृतं, कल्याणगुणमयमित्यर्थः । समवाप्य प्रकटीकृत्य ॥ ६१ ॥

नैतच्चित्रं रतिमतामतादात्म्यं यदेतदहो रतिवासनासनाथानां वासनासनातनत्वेन गुणोपरमः परमस्तु भवन्नेव वासनानुरूपं रूपं निर्गुणमेव जनयति नर्मतिलकभूतायाः कृष्णरतेरयं हि प्रभावः प्रभावहुलः ॥ ६२ ॥

रतिमताम्· अत एव रतिवासनासनाथानां जनानां यदेतदता-दात्म्यं मोक्षाभावः· एतच्च चित्रमित्यन्वयः । वासनायाः सनातनत्वेन हेतुना, नतु प्राकृत्या वासनाया इव नश्वरत्वेनेत्यर्थः । परम आत्य-न्तिको गुणोपरमः प्राकृतगुणशान्तिर्भवत्नुत्पद्यमान एव निर्गुणमेव रूपं स्वरूपं जनयति । नयतिलकेति, अन्यथा· अनीतिरेव तस्याः स्यादिति भावः ॥ ९२ ॥

अथ तां प्रियः प्रियाणा-
मावलिमालोक्य समुपसन्नाम् ।
अविकलकलाकलाप-
च्छलादलाच्छीवलानुणोऽनृजुताम् ॥ ९३ ॥

एवं सिद्धान्तं समाप्य प्रकृतमनुसरति· अथेति । अनृजुताम्· असा-रल्यम्· अलात् स्वीचकार । छलात्, न तु वस्तुत इत्यर्थः । कलाकलाप इति । एषाप्येका वैदग्धी छचिमताटस्थ्यप्रकटनेन प्रेमतरङ्गोद्गुणवैदग्ध्य-प्रकाशनपाण्डित्यमयीति भावः । वलानुज इति अन्यकृतस्तासां पक्ष-पातेन मत्त इत्यसूयोक्तिः ॥ ९३ ॥

स तु नायकोऽनुकूलः
प्रतिकूलं बहिरथान्तरनुकूलम् ।
उपनतयमुनाकूलः
पीतदुकूलो विपक्षुतामगमत् ॥ ९४ ॥

अनुकूल इति, "अतिरक्ततया नार्या त्यक्तान्यललनास्पृहः । सीतायां रामवत् सोऽयमनुकूलः प्रकीर्तितः" । इति स्मृतेः, बह्वीषु तासु यद्यप्या-नुकूल्यं न संभवति तथाप्यत्र महारासोत्सवदिने तस्य तास्वेकैकश्येन प्रकाश्यभेदादभिमानभेदेन वा सर्वासामपि तासां ह्लादिनीसारत्वादैक्य-विवक्षया वा तत् संगमनीयम् । प्रतिकूलमनुकूलमित्येते वचनक्रियावि-शेषणे ॥ ९४ ॥

आगच्छत स्वागतमस्ति वः शिवं
किं नाम कार्यं करवाणि वः प्रियम् ।
यथास्थितं सद्मनि पद्मलोचना-
स्तथैव मन्ये भवतीभिरागतम् ॥ ६५ ॥

आगच्छतेत्यादिषु यद्यपि प्रकटोऽभिधेयोऽर्थे उपेक्षामयो वाक्यः• तासां सौन्दर्यादिभाववर्णनात्• अप्रकटो व्यञ्जनीयोऽर्थे एव विहारस्वीकारमय आन्तरस्तथापि क्वचित् क्वचिदभिधयाप्यसौ योजयितव्य इति । अथ तादृशवेशचेष्टादिभिरेवानुरागाख्यभावस्योदयोद्रेकमनुमाय तदनुभूतमपि स्वं कदाप्यननुभूतचरमिव प्रथममिलितमिव मानयन्तीस्ता आलक्ष्य परिहसन्निव• अनुरागरसमनुमोदयन्निव स्वयमपि तथैव ता अपरिचिन्वन्निव• औदास्यमवलम्बमानः सादरं ससंभ्रमप्रश्नमयमाह• तत्र प्रथममागच्छत स्वागतमित्युक्ते ताः प्रफुल्लमुखीर्वीक्ष्य पुनर्विवर्णमुखीः कर्तुमाह वः किं प्रियं करवाणि, किमर्थमागतं तत् किं न ब्रूतेति भावः । संशयवैमनस्यवतीर्वीक्ष्याह यथास्थितमिति, तेन कश्चिदुद्वेगो जात इत्यनुमीयते स च दुष्टजनकृतः प्रकटः साधारणो वा मर्मसिजकृतो गुप्ततरो वा• दृशीनामेव वेति• अवश्यमेव जिज्ञास्यमिति भावः । हे पद्मलोचना इति, मदुपरि नयनकमलदृष्टिरेव क्रियते न तु वचनसुधाभिषेक इति भावः । अत्र न जनकृतो नापि सर्वथा मर्मसिजकृतः किंतु त्वदनुरागकृत इति तत्सखीनां कासांचिन्मनसां मनसैव कृतं प्रत्युत्तरमपि ज्ञेयम् ॥ ६५ ॥

यतः कौतुकविहारक्रमे वेष एव एवं न भवति ।

तथाहि ।

अर्धार्धे परिलोच्यते वपुषि वः श्रीमण्डनं मण्डनं
युष्माभिः प्रियमण्डनाभिरपि च प्रारम्भि नाप्यादरः ।
तेनैवेदमशङ्कि पङ्कजदृशो जातं तदत्याहितं
येनाद्यापि ससंभ्रमागमनजा श्रान्तिर्न विश्राम्यति ॥ ६६ ॥

कुतश्चन कौतुकाद्वागतमिति चेदहि नहीत्याह कौतुकेति, श्रियं शोभामपि मण्डयतीति तत्.अत्याहितं महाभीतिः, अतस्तद्गोपयितुं नाहंच प्रकटमेव ब्रूत, तस्याशमेषोऽहमधुनैव करोमीति भावः ॥ ९६ ॥

क्लिन्नानि स्ववचोत्पलानि वलितैः स्वेदाम्भसो बिन्दुभि-
र्मुक्ताभिर्ग्रथितेव विषमलकस्रेणीयमेणीदृशः ।
द्राघीयः श्वसितं तदाहतिपरिम्लानायमानद्युतो
द्योतन्तेऽधरपल्लवाः स्तनपटस्तेनैव दोधूयते ॥ ९७ ॥

श्रान्तिचिह्नान्येव ब्रुवन् भङ्ग्या तासां सात्त्विकविकारोत्थमाधुर्यास्वादं स्वकृतं ता ज्ञापयन् वर्णयति क्लिन्नानीति,स्तनपटो दोधूयत इति, भाविमद्विलासशुभसूचकः स्तनकम्प एवायं भवतीनामिति भावः ॥ ९७ ॥

अथवा. अत्याहितं चेद्भविष्यदभविष्यद्वो पुंसामपि साम- पिधानेन तरलतालता फलवती तेनात्याहितं हितं वा कथं ब्रूमः ॥ ९८ ॥

अथवेति मौनेनैव तासां मनोगतं वाक्यमभिज्ञानन् प्रकटमाह. अत्याहितमिति, सामपिधानेन सुखराहित्येनेत्यर्थः। अत्याहितं हितं वेति, नात्यहितलक्षणं नापि हितलक्षणं किंचिदनुभूयत इति भावः ॥ ९८ ॥

इदं वः कौतुकबिलासितं बिलसितं वस्तु वस्तुतः स्वातन्त्र्येण बहिरेव हि रे भवितुं नेष्टे नेष्टेन वा जनसमूहेन समूहेन वा सम- भावि समभावि तेनेदं स्वातन्त्र्यमिति वा कथं ब्रूमः. विहारचंक्रम- क्रमसमयाभावात्. यदयं विप्रदोषः प्रदोषः ॥ ९९ ॥

खण्डितमेव कौतुकपदं पुनः संस्थाप्य पुनरपि खण्डयति, इदम- र्धार्धभूषणाविधारणमपि कौतुकस्यैव विलसितम्, चौत्सुक्यत्वराभ्यां तत्सं- पूर्णत्वाशक्तेः । किंच बिले गर्ते सितं बद्धं वस्तु बहिरेव भवितुं न. ईष्टे न शक्नोति,रे. इति संबोधने, बिलप्रायेऽन्तःपुरे पत्यादिनिरुद्धा यूयं कथं बहिर्निर्गता इत्यर्थः। नच तेषां संमतिर्युष्माकं स्वातन्त्र्यं वा हेतुरस्तु, नाद्यः, असंभवादेव, द्वितीयस्तु कथंचित् संभवतीत्याह नेष्टेनेति, इष्टेन

पत्यादिना जनसमूहेन समूहेन सम्यगूहवता॰ एता वनं गच्छन्तीति वितर्कवता न सम्यगभावि तेन हेतुना स्वातन्त्र्यं संभावितं, समभावि "ण्यन्तात् कर्मणि चिण्" । इति वा कथं ब्रूम इति, एतदपि वक्तुं न शक्यते, तत्र हेतुर्विहारचंक्रमेत्यादि, तेन किंचिद्रहस्यान्तरमेव भविष्यतीति, तस्य भवतीनां मौनादकथ्यत्वं मच्चिकटागतेश्च मदेकसंपादयिष्यमाणत्वं चानुमीयत इति भावः ॥ ९९ ॥

तथाहि ।

रजन्येषा घोरा भयदपशुवृन्दं वनमिदं
ममैकस्याभीते रसदमबलानामरसदम् ।
इदं वः प्राणानां मनसि न भयं हन्त तदितो
निवृत्तिर्निश्रेयस्कृदिति शृणुतैतन्मम वचः ॥ १०० ॥

मनसि न भयं प्राप्तानामपि वोऽबलानामितो निवृत्तिरेव नितरां श्रेयस्कृदिति बाह्योऽर्थः स्पष्टः, वास्तवस्तु॰ अघोरा॰ अभयदेति॰ अकारप्रश्लेषः । ममैकस्येति, पुरुषान्तरस्य प्रवेशासंभवोऽपि ज्ञापितः । अबलानां न विद्यते रसदं यस्मात् तत्, अबलानां तु नाममात्रेणैव रसदमित्येकं पदं वा । रदम्॰ इः कामस्तं ददातीति तं कामदम् । प्राप्तानां भवतीनाम्॰इतो न भयम्, अतो निवृत्तिः स्थितिरेव निश्रेयस्कृदिति ॥ १०० ॥

वनदिदृक्षयात्तयामोदमदिरामोदमदिरा मदिराक्ष्यो यदि वा-चाययुः शुभवत्यो भवत्यो वृत्तमेव तद् वनस्य दर्शनम् ॥ १०१ ॥

आत्तय आमोदो हर्ष एव मदिरा मदहेतुर्यासां ताः । वनस्य दर्शनं वृत्तमेवेति, एतत् समाप्य द्रुतमेव गृहं गच्छतेति भावः । आमोदेन सौरभ्येण मम॰ इं कन्दर्पं रान्ति ददतीति तथा ताः । हे मदिराक्ष्यः खञ्जनाक्ष्यः, निजाङ्गसौरभ्येणैव मत्काममुद्दीपयथ किमुतावलोकनेनेति भावः । वृत्तमेव वनस्य दर्शनं, किंतु तरुवल्ल्यादीनां दर्शनं विशेषतो न वृत्तमिति तत्तत्परिचायकं मां सङ्गिनं कृत्वा तदपि कुरुतेति भाव इति ॥ १०१ ॥

Digitized by Google

पश्यत पश्यत ।

इतः फुल्ला वल्ल्यो मदमधुपझङ्कारकलया
गिरा निन्दन्तीव प्रणयनयतः स्वालय इव ।
अतः स्थातुं वाञ्छां कुरुत न गृहं गच्छत तथा
तरूणामप्योघः कुसुमहसितैश्चालयति वः ॥ १०२ ॥

स्वालय इव स्वसख्य इव प्रणयनयतः सख्यरीत्या गिरा निन्दन्ति, कुलनानां वने तिष्ठासां गर्हन्तीत्यर्थः, अतः स्थातुं वाञ्छां न कुरुतेति भावः । वास्तवस्तु· इतो गृहं गच्छन्तीरेव युष्मान्निन्दन्ति, "इण् गता"-वित्यस्य क्विबन्तस्य शसि रूपम्" । गृहं न गच्छत । अहो रसिका अप्येता इतो यियासन्तीति कुसुमहसितैश्च वो युष्मान्· चालयति वारयति, "चल वारणभूषापर्याप्तिषु" । अन्यत् समानमिति ॥ १०२ ॥

किंच ।

छायाच्छदानां शशिनश्च दीधिती-
र्मूले तरूणां मिलिताः समन्ततः ।
विलोक्य भोक्तुं तिलतण्डुलभ्रमात्
तुणाति चञ्चूपुटकैर्वयोगणः ॥ १०३ ॥

छदानां पत्राणां, वयोगणः पक्षिसमूहः, पक्षद्वयेऽपि तुल्य एवार्थः ॥ १०३ ॥

इतश्च ।

उदञ्चत्कालिन्दीलहरिपरिरम्भव्यसनिना
प्रफुल्लत्कह्लारोत्पलवनविमर्दैः सुरभिणा ।
पिकोक्तीनां दीर्घीकरणपटुना चन्दनवनी-
समीरेण स्निग्धीकृततरुतलं पश्यत वनम् ॥ १०४ ॥

वनीत्यल्पविवक्षया स्त्रीत्वम् ॥ १०४ ॥

एवं च ।

अखण्डनानाद्रुमखण्डमण्डितं
विचित्रपक्षिव्रजचित्रितान्तरम् ।
आलोकितुं काननमत्र योषितां
योग्या स्थितिर्नो व्रजत व्रजं ततः ॥ १०५ ॥

न योग्या स्थितिरिति बाह्यः, न व्रजतेति वास्तवः ॥ १०५ ॥

अथ वचो मे शुश्रूषध्वं शुश्रूषध्वं सुहृत्पतिवपुरपुरस्कारयोग्यं न भवतीति पतिमतीर्निमन्त्र्य पुनः सुकुमारिकाः कुमारिकाः प्राह ॥ १०६ ॥

शुश्रूषध्वं श्रोतुमिच्छत, शुश्रूषध्वं परिचरत, "शुश्रूषा परिचर्याप्युपासन"मित्यमरः । सुहृदां श्वश्रूआदीनां पत्युश्च वपुः· अपुरस्कारयोग्यम्· अनादरार्हं न भवतीति बाह्यः, वास्तवस्तु न शुश्रूषध्वं यतोऽपुरस्कारयोग्यमिति संबन्धः । अन्यत् समानमिति ॥ १०६ ॥

भो भो बालाश्चारुदन्त्यो बालाश्चारुदन्त्योऽकसि वत्सास्तान् पाययत प्रसूपयः प्रसूपयत्य दोहयत च मोहयत च मोदारं चेतः ॥ १०७ ॥

भो भोश्चारुदन्त्यः सुन्दरदन्त्यः· बालाश्च बालकाश्च· ओकसि गृहे· आवदन्ति वत्सा गोवत्साश्च तान् प्रसूपयः· मातृदुग्धं पाययत, प्रसूपयत्य प्रकर्षेण सुष्ठु· उप निकटे पतित्वा दोहयत च, उदारं चेतश्चित्तं मा मोहयत मोहं मा प्रापयत, इति बाह्यः । वास्तवस्तु तान् मा पाययत मा दोहयत· इति संबन्धः । मा माम्· इतः कामतः· उदारं दातारम्· ऊहयत वितर्कयत, "उदारो दातृमहतो" रित्यमरः । अन्यत् समानमिति ॥ १०७ ॥

मातरश्च पितरश्च सपुत्रा
भ्रातरश्च पतयश्च समन्तात् ।

मार्गयन्ति बहुधेति न मोहं
गन्तुमर्हत न हन्तुमभीष्टम् ॥ १०८ ॥

इति हेतोर्गन्तुम्· अर्हत, मोहं वयं तु किमपि न जानीम इति मुग्धतां तु न· अर्हत, इति बाह्यः । वास्तवस्तु· इति यो मोहस्तं गन्तुं प्राप्तुं नार्हत, अभीष्टं निजेप्सितं च न हन्तुमर्हत· इति ॥ १०८ ॥

तस्माद्गच्छत माच तिष्ठत चिरं नो वेद्मि पद्मेक्षणाः
को हेतुर्न हि गम्यते विपिनतः को हेतुरत्रागतम् ।
उद्दृश्यं यदि मेऽवलोकनमहो संपन्नमेवाद्य तत्
संभाव्यं समयान्तरेऽपि रसदं नैतत् तथा त्वादृशाम् ॥ १०६ ॥

एतन्मेऽवलोकनं समयान्तरेऽपि संभाव्यम्, किंच त्वादृशां साध्वीनाम्· एतत् तथा रसदं न भवतीति बाह्योऽर्थः । वास्तवस्तु नोऽस्माकं विपिनतः सकाशान्मा गच्छत· अत्र चिरं तिष्ठत हे पद्मेक्षणाः, अत्र· आगतं को हेतुरिति चेत्, को हेतुर्न गम्यते, अपितु सर्व एवेत्यर्थः, त्वादृशां परमयुवतीनां तु मेऽवलोकनमेवैतत्· रसदं न भवति, किंत्वन्यदपि रहस्यं वर्तत इतिभावः । अन्यत् समानमिति ॥ १०९ ॥

ध्यानतः श्रवणतोऽवलोकतः
संगतिर्मम सुखावहा न तत् ।
यात पङ्कजदृशो न मादृशः
प्रेमहर्तुमुचिता भवादृशः ॥ ११० ॥

प्रीत्याकृष्टजनानायातान् प्रति याहि माहीति कथनमनुचितमिति चेदत आह ध्यानत इति, ध्यानादितः सकाशात् संगतिर्मम न सुखावहा तस्माद्यातेति बाह्यः । वास्तवस्तु ध्यानादितोऽपि संगतिरङ्गसङ्ग एव सुखावहा तस्माच यातेति । अन्यत् समानमिति ॥ ११० ॥

अयि मनोरमा मनोरमां भर्तृसेवां यामवत तां मर्यादाक्षविहा विहातुं नार्हत लोकेष्ववो हि नार्योऽनार्योपक्रमा न भवन्ति ॥१११॥

यां भर्तृसेवाम्॰ अवत रक्षत तां विद्वांस्तु नार्हत, नहि रक्षितस्य वस्तुनस्त्याग उचित इति भावः, मर्यादाछविद्दा हे मर्यादामार्गशोभा-हन्त्यः, अनार्ये उपक्रमो यासां तथाभूता न भवन्ति, इति बाह्योऽर्थः। वास्तवस्तु यां भर्तृसेवां रक्षतेति मल्लक्षणभर्तृसेवैव रक्ष्यते, अन्या तु प्रथमत एवोपेक्षितेत्यर्थः, लोकेप्सव इति, भवत्यस्तु मदीप्सवो न तु पतिलोकेप्सव इत्यर्थः, यद्वा सपरिहासमाह, लोकं पुरुषम्॰ ईप्सवः कामयमाना नार्ये आर्योपक्रमा न भवन्ति, भवत्यस्तु तथाभूता एवेति॥ १११॥

दुःशीलतादुःखलतादुःखलताकुसुमवर्षी यान् वर्षीयान् वा वधिरो वावधिरो वाखिलदोषस्य जडो वा रोगी वाधनो वा सुमतिभिरङ्गनाभिरङ्ग नाभित्यज्यते सुतरां त्वनीदृशः पतिरिति लौकिकी वैदिकी नीतिः॥ ११२॥

सुमतिभिरङ्गनाभिः पतिर्न॰ अभित्यज्यते। अङ्गेति संबोधने। दुःशीलता च दुष्टा खरता तैक्ष्ण्यं खलता वा सा च ताभ्यां या दुःखरूपा लता तस्याः कुसुमं वर्षतीति सः, यान् परलोकं गच्छन्, म्रियमाण इत्यर्थः, वर्षीयान् वृद्धः, अखिलदोषस्य॰ अवधिं सीमां रातीति सः। अनीदृशः॰ एतदादिदोषरहितस्तु सुतराम्॥ ११२॥

उभयनीतिविलक्षणनिराविलक्षणनिरातङ्का हि भवत्यः॥ ११३॥

उभयनीतिभ्यां विशिष्टं लक्षणं यत्र तथाभूता निराविलो यः क्षण उत्सवस्तत्रैव निरातङ्का इति बाह्यः। वास्तवस्तु॰ उभयनीतितोऽपि विलक्षणाश्च निराविले क्षणे रात्रिसमये निरातङ्काश्च, अत एवात्रैव स्थितिरुचितेति भावः॥ ११३॥

परे पुरुषेऽनुरागः सर्वतो भयद उभयलोके विरुद्धोऽयशस्करः परमजुगुप्सितश्च विशेषतस्त्वादृशीनाम्॥ ११४॥

परे पुरुष इति बाह्योऽर्थः स्पष्टः। वास्तवस्तु परे श्रेष्ठे मयि, भयं द्यतीति भयदः॰ अभयदो वा॰ अविरुद्धः, परम्॰ अजुगुप्सितः॰ अनिन्दित इति॥ ११४॥

पतिरेक एव यः परः स तु दृश्य एव न भवति भवतीभिरेव दृश्यते तत् परमहो महोन्नतोऽयं वो महिमा नहि मानमर्हति भुवने ॥ ११५ ॥

पतिरेक एव, यस्तु परः· अन्यः पुरुषः स दर्शनार्ह एव न भवति तथापि भवतीभिरेव दृश्यते न त्वन्याभिः साध्वीभिः, तत् परमहो· इत्यादिविरुद्धलक्षणया निन्दातात्पर्येति बाह्यः । वास्तवस्तु· एक एव योऽहं परः श्रेष्ठः सोऽन्यासां द्रष्टुमप्यशक्यः कुतः पुनः स्पर्शयोग्यता भवत्विति । अन्यत् स्पष्टम् ॥ ११५ ॥

अतः परमतः परमतः प्रियहितोपदेशतो देशतोऽस्माद् गृहान् यात मानयत मे वचनमिति ॥ ११६ ॥

अतः परमेतदनन्तरम्, अतोऽस्मादुपदेशाद्धेतोः, कथंभूतात् परमतः· उत्कृष्टात्,मानयत· आद्रियध्वम्, इति बाह्यः । वास्तवस्तु मा यात मे वचनं नयत· इति ॥ ११६ ॥

एवं प्रणयपरीक्षणक्षणतत्परतयारतया धियाधियाप्य बहिरुष्ण-मन्तरतिशीतलतलमम्भ इव शरत्कालीनलीनमध्याह्नार्ककिरणगभीरमहाह्रदस्य ॥ ११७ ॥

एवं स वनमाली बहिरुष्णमन्तरतिशीतलमित्यादिरीत्या·अधियाप्य गर्भितसुरसार्थतया· अधिगतं कारयित्वापि यदिदं व्याजहार तदेतद्वाक्यजातम्· अनुरागान्धतया तया प्रसिद्धयेव· आन्तरीयं वास्तवमर्थम्· अनवगाह्य बाह्यमर्थमेव निशम्य ताः संतापस्य कामपि कोटिं परां काष्ठां ययुः प्रापुरित्यन्वयः । बाह्यार्थोपन्यासे कारणमाह प्रणयेति, प्रणयस्य प्रेम्णः परीक्षणं निर्मोदासीन्यप्रकटनेन याथार्थ्यजिज्ञासा तदेव क्षण उत्सवः· तत्परतया· आरता या धीस्तया, यदुक्तं "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे । यद्भावबन्धनं यूनोः स प्रेमा परिकीर्तितः" ॥ इति, अत्राप्यये वक्ष्यते भजन्त्यभजतो ये वा· इत्यत्र सोहृदं च सुमध्यमा

इति । शरत्कालीनश्यामो मीनाः प्रविष्टा मध्याह्नार्कस्य किरणा यत्र तथाभूतश्च यो गभीरमहाह्रदस्तस्याम्भ इवेति बाह्यार्थस्यैव तापकत्वम्· आन्तरीयार्थस्य तापहारकत्वमेवेत्युक्तम् ॥ ११७ ॥

अन्तरतिमधुरास्वाद्यं बहिः कण्टकाकृति कण्टकिफलमिव ॥ ११८ ॥

नन्ववगाहनेनालोडने कृते तदम्भोऽप्यौष्ण्यशैत्यव्यतिषक्तं भवति· अतितलं तु दुष्प्रवेशमित्यतोऽन्यथोपमिमीते· अन्तरतीति, तेन बाह्यार्थे पृथगेव विभक्ततया परित्यज्य· आन्तरीयो वास्तव एवार्थोऽस्वा· उपादेय इति भावः ॥ ११८ ॥

अन्तःसरसं बहिःकठिनं लाङ्गलिगलितफलमिव ॥ ११९ ॥

किंच वास्तवार्थस्यातिदुष्प्रवेशत्वबुद्ध्यापि न त्यागार्हत्वं यतोऽयं बलिष्ठधियां गम्य एव स्यादित्याह· अन्तःसरसमिति, "नारिकेलं तु लाङ्गली"त्यमरः । तेन दृढमानमुद्गरेण बाह्यार्थं निस्फोट्य सुरसो वास्तवार्थ एव निष्काश्य· आस्वादनीय इति भावः ॥ ११९ ॥

अन्तर्मधुद्रवं बहिर्मक्षिकं क्षौद्रपटलमिव· अन्तः स्निग्धपूरं बहिरतिरूक्षं भर्जितशष्कुलीपिष्टकमिव ॥ १२० ॥

अथ च वास्तवार्थलुब्धानां बाह्यार्थकृतकष्टमपि सोढुमर्हमित्याह· अन्तर्मधुद्रवमिति, नहि मक्षिकोपद्रवशङ्कया मधु परित्यज्यत एवेति भावः । विचारतस्तु परीक्षकतया वा परीहासरसिकतया वा विदग्धशेखरस्य तस्य· एतादृशभावनामपि गुणत्वेनैवानुमोदनीयमित्याह· अन्तःस्निग्धेति, नहि शष्कुल्या वल्कलं द्विष्यत इति भावः ॥ १२० ॥

वाक्यीभूतपदकदम्बमिव· अन्तराकाङ्क्षायोग्यतासत्तियुक्तं बहिर्विजातीयं कलाकलापवान् परवान् परमकौतूहलस्य स वनमाली वनमालीभिरावृतमालोच्य यदिदं व्याजहार व्याजहारयितव्यसंतापम् ॥ १२१ ॥

विचारस्य पर्यवसाने तु वाक्यार्थस्य सपुष्यायमाणत्वमित्याह वाक्यीभूतेति, यदुक्तं, "वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चय" इति, नहि योजनकाले विज्ञायीयता श्रोतो क्वापि तिष्ठतीति भावः, श्लेषेण· आकाङ्क्षा· एव हन्त स्वागतेत्यादौ न त्वौदासीन्यं, योग्यता· औचित्यमेव परे पुरुषेऽनुरागो जुगुप्सित इत्यादौ न त्वयोग्यता, आसत्तिः सहावस्थानमेव तस्माद्गच्छतेत्यादौ नत्वपसारणं, तदुक्तम्· अभिधायकं तदुज्झकं वा· इति । कौतूहलस्य परवान्· अधीनः, इदमप्येकं तस्य कौतुकमिति भावः । व्याजेन छलेन हारयितव्यस्ताभिरेव दूरीकारयितव्यः संतापः स्वीयो यत्र तद्यथा स्यात् तथा । अत्र विधास्यमाने महावनविहारयुगपदनेकनायिकासंभोगरासादौ तासां परस्परसपत्नत्वविपत्नत्वादिमतीनां बह्वीनां सर्वसंमेलनं दुर्घटमिति युगपदेव सर्वास्वेव तासु· उपेत्य महाज्वरं प्रविश्य सर्वा एव विपत्ना एकमनाः कृत्वा पुनः स्वीकारपीयूषवर्षेण ताः संजीव्य नवोत्पन्ना इव विस्मृतविपत्नतादिभावा युगपदेकत्रैव देशे रमयिष्ये यदि पुनर्मदङ्गसङ्गेन मदं प्राप्य पुनरपि पूर्वरूपा भवेयुस्तदा तु स्वयमेवान्तर्धाय पुनर्विरहदवार्ताः स्वदर्शनामृतेनाप्लाव्य सर्वैकमत्येन महारासं विधास्ये सर्वमेतच्च मच्चेष्टितं मत्सुखतात्पर्यवतीनामासां सुखायैव फलिष्यतीति विमृश्य भगवानिदं वाक्यकूटं जगादेति वक्ष्यमाणास्मरसमरसमेति गम्भतात्पर्यं दृष्ट्वा सुधीभिरवधेयम् । सर्वैकमत्यसंपादनासामर्थ्यमेव महारासवासरे संतापः स एव व्याजेन हारयितव्य इति ॥ १२१ ॥

तदेतदनुरागान्धतया तयान्तरीणं रीणां मध्वासवमिवार्थमनवगाह्य वाह्यमर्थमेव निशम्य शम्यमानसारस्यतया शुष्का इव ता युगपदुपपादितदुःखकोटिं कोटिं कामसंतापस्य ययुः ॥ १२२ ॥

अनुरागान्धतयेति, अयमर्थः, अनुरागो नाम सदानुभूतस्यापि विषयस्य प्रतिक्षणमननुभूतत्वभानसमर्पकः प्रेम्णः कोऽपि परिणामविशेषः· तस्याभ्युद्गमाद्बहुधा कृताङ्गसङ्गमपि स्वप्रेयांसं तदानीं प्रथममिलितमिव

मत्वा स्वभावत एव तद्बोर्लभ्यभावनावत्यस्तास्तादृशतद्वचनश्रवणेन तु दैन्यसंचारिप्राबल्यादात्मनामयोग्यत्वदृष्ट्या बाह्यमेवार्थं वास्तवत्वेन निरचैषुः, व्यञ्जितस्यान्तरस्यार्थस्य तदैवावगतत्वेऽपि तत्सत्यतालिङ्गस्य स्मितादेरदर्शनादप्रामाण्यं चेति। शम्यमानं निर्वाप्यमाणम्। कोटिमुत्कर्षम् ॥१२२॥

तदा तस्य तेनैव वचसा च साधुशतकोटिकोटिनिपातेनेव दलितं विषवृश्चिकेनेव विद्धं कालभुजगेनेव दष्टं तुषानलेनेव दह्यमानं क्षुरेणेव क्षुण्णं महाज्वरेणेव पराभूतं शूलेनेव ग्रथितं विषकाण्डेनेव क्षतं सर्वमेवापघनं मन्यमानाः ॥ १२३ ॥

किमाकारा सा दुःखकोटिरित्यत आह तदेति । शतकोटीति, केनाप्यप्रतिकार्यत्वम्। विषवृश्चिकेति चिरतरं तीव्रवेदनाकारित्वम्। कालभुजगेति साक्षान्मारकत्वम् । तुषानलेति· असमाप्यमानदाहदायित्वम् । क्षुरेणेति सहसैव द्वैधीकरणपटुत्वम् । महाज्वरेणेति· उत्तरोत्तरपीडावर्धकत्वम् । शूलेनेति पारावारपर्यन्तवेधकत्वम् । विषकाण्डेनेति मर्मान्तःप्रविष्टज्वालाया निष्क्रमणासंभवः । अपघनम्· अङ्गम् । एतदादिधर्मवन्तं संतापं प्राप्ता इति भावः ॥ १२३ ॥

निरालोकमिव सकललोकं निःशरणमिव जगत्त्रितयं शून्यानन्दमिव विश्वं संतापमयमिव दिङ्मण्डलं नीरसमिव धरणितलं भस्मीभूतमिव भुवनतलं परलोकं गतमिवात्मानं च विज्ञाय ॥ १२४ ॥

निरालोकमिति तादृशदुःखस्य सहसैवान्ध्यप्रापकत्वात्, निःशरणमिति त्रायकानालोचनात्, शून्यानन्दमिति तद्दुःखस्य सर्वानन्दनिर्वापकत्वशक्तेः, संतापमयमिति तस्य सर्वव्यापकत्वधर्मोदयात्,नीरसमिति तस्य प्रथमं सर्वशोषकत्वशक्त्युदयात्, भस्मीभूतमिति· अन्ततस्तु सर्वदाहकत्वात्, परलोकं गतमिति तस्य दशम्या दशाया अपि प्रापकत्वादिति। एतादृशधर्मवान् स्वगत एव संतापस्तन्मयतया सर्वत्रैव संभावितः। “नारायणमयं धीराः पश्यन्ति परमार्थिनः। जगद्धनमयं लुब्धाः कामुकाः कामिनीमय”मितिवत् ॥ १२४ ॥

मुहूर्तं दारुपुत्रिका इवात्मशून्याः केवलं कठिनांशशंसिकाकृतयः ॥ १२५ ॥

देहे ये कठिना अंशास्त्रिककफोणिगुल्फादयस्तेषां शंसिका ज्ञापिका॰ आकृतिर्यासां ता इति, अधरप्रगण्डादीनां कोमलांशानां सद्यः शोषेण स्वरूपानुलब्धेः ॥ १२५ ॥

क्रमेण मूर्च्छोत्थिता इव संचरदन्तःकरणधर्मतयागतया संविद्देवीसहायतयायतया दुःखानुभूतिभूतिदशां यदि समासेदुः ॥ १२६ ॥

संवित्॰ चेतनैव देवी तस्याः सहायतया साहाय्येन॰ आयतया विस्तृतया हेतुना, मूर्च्छात उत्थिता इवेति तदानीमपि सम्यङ्मूर्च्छानपगमात् । संचरन्तोऽन्तःकरणधर्मा यासु तासां भावस्तत्ता तया॰ आगतया, नष्टयापि पुनः प्राप्तयेत्यर्थः । दुःखानुभूतेर्या भूतिः संपत्तिस्तद्दशां, "भूतिर्भस्मनि संपदी"त्यमरः, अयमर्थः, तादृशसंतापानुभव एव मूर्च्छायाः कारणं मूर्च्छामध्ये क्षणं तस्य श्लथीभावे मूर्च्छाया अपि श्लथीभाव इति ॥ १२६ ॥

तदा ।

स्फुरितमधरैः स्विन्नं गण्डैः परिस्रुतमक्षिभिः
क्षुभितमसुभिर्म्लानं वक्त्रैस्तनूयितमङ्गकैः ।
अहह सुदृशां लावण्यश्रीतनोरिव कीकशै-
र्भुजविसलताग्रेभ्यः स्रस्तं मणीमयकङ्कणैः ॥ १२७ ॥

सुदृशां या लावण्यशोभा तस्या देहादुत्थितैः कीकशैः, अस्थिभिरिवेत्यर्थः, तेन लावण्यशोभा नष्टेति व्यञ्जितम् ॥ १२७ ॥

किंच ।

दयितवचसामौदासीन्ये श्रुतेऽपि न यद्गतं
त्वरितमसुभिस्तेन प्रेम्णो ह्रियेव विविक्षवः ।

चरणकमलाङ्गुष्ठैर्दीर्घोल्लसन्नखचन्द्रमः-
किरणलहरीकाण्डैरेवालिखन्नवनीतलम् ॥ १२८ ॥

प्रेम्णो ह्रियैवेति, मम चाङ्गुष्ठैः संप्रति व्यक्तेति प्रेमैव ह्रीमान् जातः, चरणस्तदेकाश्रयाणां तासामपि लज्जया भूविवरप्रवेशेच्छा युक्तेति भावः । दीर्घमेव उल्लसन्ती नखचन्द्रमसः किरणलहर्यैव काण्डे। वेध-नखोदनसमर्था बाणा येषु तैः ॥ १२८ ॥

किंच ।

जात्यापि कोमलतराः प्रणयेन चोच्चै-
र्दुःखोदितेन दयितस्य विरज्यमानाः ।
प्राणाः प्रयान्तु नतरामिति जातमाचः
कण्ठं रुरोध सुदृशां स्वयमेव बाष्पः ॥ १२९ ॥

प्राणा न निःसृता यत् तत्र कारणं संभावयति, जात्यापि विशेषतः प्रणयेन च कोमलतराः प्राणाः ॥ १२९ ॥

किंच ।

यावद्घनत्वमपहाय विलोचनाभ्यां
निष्क्रामति द्रव इवैष स एव बाष्पः ।
तूष्णीं बभूवुरबलाः क्षणमेव ताव-
च्चित्रीकृता इव नभस्यनुरागलेखाः ॥ १३० ॥

घनत्वमपहायेति संतापेन द्रावणात्, निष्क्रामतीति तेनैवोत्फालनेन तत्रापि स्थातुमशक्तेरिति भावः ॥ १३० ॥

किंच ।

अन्तर्मातुमशक्त एष सुदृशां संतापहालाहलो
नेत्राञ्जनरञ्जिताम्बुलहरीव्याजेन रीणो बहिः ।
संतप्तस्तनमण्डलेषु निपतन्माचः स्म मा दृश्यते
भूयश्चाविशदेष किंनु हृदयं प्राणापहारोद्यतः ॥ १३१ ॥

अन्यथैवोत्प्रेक्षते — अन्तरिति, नेत्रैर्नेत्रद्वारैर्बहिरपि रोषाः, मा दृश्यत इति हृदयस्यातिनम्रतया सत्त्वः शोषणात् । प्राणापहारोद्यत इत्यत्रायं भावः, प्रथमं तासां प्राणनिःसारणार्थमिव संतापहालाहलो वृद्धिं गतः, ततो निजकार्यसिद्धि ज्ञानार्थमिव नेत्रैर्बहिर्निःसृत्य अधुनापि प्राणा न निर्गता इति ज्ञात्वा क्रोधादिव पुनर्हृदयं प्रविष्ट इति ॥ १३१ ॥

॥ शेषमग्रे ॥

SARVA-DARSANA-SANGRAHA.

PART I.

THE JAIMINI-DARŚANA.

An objector may here ask, "Are you not continually repeating that merit (dharma) comes from the practice of duty *(dharma)*;—but how is duty to be defined or proved?" Listen attentively to my answer. A reply to this question has been given in the elder* Mímámsá by the holy sage Jaimini. Now the Mímámsá consists of twelve books. In the first book is discussed the authoritativeness of those collections of words which are severally meant by the terms injunction *(vidhi)*, 'explanatory passage' *(arthaváda)*, hymn (*smriti*) and 'name' In the second, certain subsidiary discussions (as e. g. on *apúrva*) relating to the difference of various rites, refutation of (erroneously alleged) proofs, and difference of performance (as in 'constant' and 'voluntary' offerings.) In the third *Sruti*, 'meaning' *(linga)*, sentence, &c., and their respective weight when in apparent opposition to one another, the cere-

---

* Mádhava here calls it the *práchí Mímámsá*.

॥ सर्वदर्शनसङ्ग्रहे

जैमिनिदर्शनम् ॥

ननु धर्मानुष्ठानवशादभिमतधर्मसिद्धिरिति जेगीयते भवता । तत्र धर्मः किंलक्षणकः किंप्रमाणक इति चेत् उच्यते श्रूयतामवधानेन अस्य प्रश्नस्य प्रतिवचनं प्राच्यां मीमांसायां प्रादर्शि जैमिनिना मुनिना । सा हि मीमांसा द्वादशलक्षणी तत्र प्रथमेऽध्याये विध्यर्थवादमन्त्रस्मृतिनामधेयार्थकस्य शब्दराशेः प्रामाण्यम् । द्वितीये कर्म्मभेदोपोद्घातप्रमाणापवादप्रयोगभेदरूपोऽर्थः । तृतीये श्रुतिलिङ्गवाक्यादिविरोधप्रतिपत्तिकर्म्मानारभ्याधीतबहुप्रधानोपकारकप्रयाजादियाजमानचिन्तनम् । चतुर्थे प्रधा-

Digitized by Google

monies called *pratipatti-karmáni*, things mentioned incidentally (*anárabhyádhíta*), things accessory to several main objects, as *prayájas*, &c., and the duties of the sacrificer. In the fourth, the influence on other rites of the principal and subordinate rites, the fruit caused by the *juhú* being made of the butea frondosa, &c., and the dice-playing, &c. which form subordinate parts of the *rájasúya* sacrifice. In the fifth, the relative order of different passages of *Śruti*, &c., the order of different parts of a sacrifice, (as the seventeen animals at the *vájapeya*), the multiplication and non-multiplication of rites, and the respective force of the words of Śruti, order of mention, &c., in determining the order of performance. In the sixth, the persons qualified to offer sacrifices, their obligations, the substitutes for enjoined materials, supplies for lost or injured offerings, expiatory rites, the *sattra* offerings, things proper to be given, and the different sacrificial fires. In the seventh, transference of the ceremonies of one sacrifice to another by direct command in the Vaidic text, and then as inferred by 'name' or 'sign.' In the eighth, transference by virtue of the clearly expressed or obscurely expressed meaning, or by the predominant meaning, and cases where no transference takes place. In the ninth, the beginning of the discussion on the adaptation of hymns when quoted in a new connection (*úha*), the adaptation of *sámans* and *mantras*, and collateral questions connected therewith. In the tenth, the occasions of 'preclusion' (*bádha*), the non-performance of the primary rite (as involving the non-performance of the dependent rites), preclusion when the same effect is produced by other means, discussions connected with the *graha* offerings,

---

नप्रयोजकत्वाप्रधानप्रयोजकत्वजुहूपर्णतादिफलराजसूयगतजघन्याङ्गाक्षद्यू-तादिचिन्ता । पञ्चमे श्रुत्यादिक्रमतद्विशेषवृद्ध्यवर्द्धनप्राबल्यदौर्बल्यचिन्ता । षष्ठे अधिकारितद्धर्म्मद्रव्यप्रतिनिध्यर्थलोपनप्रायश्चित्तसत्त्रदेयवह्निविचारः । सप्तमे प्रत्यक्षवचनातिदेशेषु नामलिङ्गातिदेशविचारः । अष्टमे स्पष्टास्पष्टप्रबललिङ्गातिदेशापवादविचारः । नवमे ऊहविचारारम्भसामोहमन्त्रोहतत्प्रसङ्गागतविचारः । दशमे बाधहेतुद्वारलोपविस्तारबाधकारणकार्य्यैकत्वग्रहादिसामप्रकीर्णनञर्थविचारः । एकादशे तन्त्रोपोद्घाततन्त्रावापतन्त्रप्रपञ्चनावापप्रपञ्चनचिन्तनानि । द्वादशे प्रसङ्गतन्त्रनिर्णयसमुच्चयविकल्पविचारः ।

तत्राथातो धर्म्मजिज्ञासेति प्रथममधिकरणं पूर्व्वमीमांसारम्भोपपादनपरम् । अधिकरणञ्च पञ्चावयवमाचक्षते परीक्षकाः । ते च पञ्चावय-

certain *sámans*, and various other things, and a discussion on the different kinds of negation. In the eleventh, the incidental mention and subsequently the fuller discussion of *tantra* * (or the performing a rite once for all), and *ávápa* (or the performing it more than once). In the twelfth, a discussion on *prasanga*, (where the rite is performed once for all, but with separate references), *tantra*, cumulation of concurrent rites *(samuchchaya)*, and option.

Now the first topic which introduces the discussions of the Púrva Mímámsá, arises from the aphorism, "Now therefore a desire to know duty (is to be entertained by thee)." Now the learned describe a 'topic' as consisting of five members, and these are (*a*) the subject, (*b*) the doubt, (*c*) the primâ facie argument, (*d*) the demonstrated conclusion, (*e*) the connection (*sangati*). The topic is discussed according to the doctrines held by the great teachers of the system. The 'subject' to be discussed is the sentence "The Veda is to be read." Now the 'doubt' which arises is whether the study of Jaimini's *śástra* concerning duty, beginning with the aphorism "Duty is a thing which is to be recognised by an instigation," and ending with "and from seeing it in the *anváhárya*," is to be commenced or not. The primâ facie argument is that it is not to be commenced, whether the injunction to read the Veda be held to have a visible and present or an invisible and future fruit. If you say that this injunction must have a visible fruit,

* Thus it is said that he who desires to be a family priest should offer a black necked animal to Agni, a parti-coloured one to Soma, and a black-necked one to Agni. Should this be a case for *tantra* or not? By *tantra* one offering to Agni would do for both; but as the offering to Soma comes between, they cannot be united, and thus it cannot be a case of *ávápa*, &c., offering the two separately.

वाः विषयसंशयपूर्व्वपक्षसिद्धान्तसङ्गतिरूपाः । तच्चाचार्य्यमतानुसारेणाधि-
करणं निरूप्यते । स्वाध्यायोऽध्येतव्य इत्येतद्वाक्यं विषयः । चोदनालक्ष-
णोऽर्थो धर्म्म इत्यारभ्यान्वाहार्य्ये च दर्शनादित्येतदन्तं जैमिनीयं धर्म्म-
शास्त्रमनारभ्यमारभ्यं वेति सन्देहः । अध्ययनविधेर्दृष्टार्थदृष्टार्थत्वाभ्यां
तच्चानारभ्यमिति पूर्व्वः पक्षः । अध्ययनविधेरर्थावबोधलक्षणदृष्टफलक-
त्वानुपपत्तेरर्थावबोधार्थमध्ययनविधिरिति वदन् वादी प्रष्टव्यः किमत्य-
न्तमप्राप्तमध्ययनं विधीयते किं वा पाक्षिकमवघातवन्नियम्यत इति ।
न तावदाद्यः विवादपदं वेदाध्ययनमर्थावबोधहेतुः अध्ययनत्वाद्भारता-
ध्ययनवदित्यनुमानेन विध्यमपेक्षतया प्राप्तत्वात् । अस्तु तर्हि द्वितीयः
यथा नखविदलनादिना तण्डुलनिष्पत्तिसम्भवात् अवघातनियमश्चैव त-
ण्डुलैः पिष्टपुरोडाशाद्यधिकरणे अवान्तरापूर्व्वद्वारा दर्शपूर्णमासौ परमापू-

and this can be no other* than the knowledge of the meaning of what is read, we must next ask you whether this said reading is enjoined as something which otherwise would not have been thought of, or whether as something which otherwise would have been optional, as we see in the rule for shelling rice.† It cannot be the former, for the reading of the Veda is a means of knowing the sense thereof from its very nature as reading, just as in the parallel instance of reading the Mahábhárata; and we see by this argument that it would present itself as an obvious means, quite independently of the injunction. Well then, let it be the latter alternative; just as the baked flour cake called *puroḍása* is made only of rice prepared by being unhusked in a mortar, when but for the injunction it might have been unhusked by the fingers. There however the new moon and full moon sacrifices only produce their unseen effect which is the principal *apúrva*, by means of the various minor effects or subordinate *apúrvas*, produced by the various subordinate parts of the whole ceremony; and consequently the minor *apúrva* of the unhusking is the reason there for the restricting injunction. But in the case which we are discussing, there is no such reason for any such command, as the rites can be equally well performed by gaining the knowledge of the Veda's meaning by reading a written book or by studying under an authorised teacher. Hence we conclude that there is no

* In p. 123, l. 4 I read *vilakshana-drishtaphala.*

† In the former case it would be a *vidhi*, in the latter a *niyama.*
Cf. the lines विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्या विधीयते ॥

र्थ्वमुत्पादयतः नापरथा अतः अपूर्व्वमवघातस्य नियमहेतुः प्रकृते लिखि-तपाठमन्येनाध्ययनजन्येन वार्थावबोधेन क्रत्वनुष्ठानसिद्धेरध्ययनस्य नियमहेतुर्नास्त्येव तस्मादर्थावबोधहेतुविचारशास्त्रस्य वैधत्वं नास्तीति तर्हि श्रूयमाणस्य विधेः का गतिरिति चेत् स्वर्गफलकोऽक्षरग्रहणमात्रविधिरिति भवान् परितुष्यतु विश्वजिन्न्यायेनाश्रुतस्यापि स्वर्गस्य कल्पयितुं शक्यत्वात् यथा स स्वर्गः सर्व्वान् प्रत्यविशिष्टत्वादिति विश्वजित्यश्रुतमप्यधिकारिणं सम्पादयता तद्विशेषणं स्वर्गः फलं युक्त्या निरणायि तद्वदध्ययनेऽप्यस्तु । तदुक्तम् ।

विनापि विधिना दृष्टलाभान्न हि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवदिति ॥

एवञ्च सति वेदमधीत्य स्नायादिति स्मृतिरनुगृहीता भवति ।

Digitized by Google

injunction to study the Púrva Mímámsá as a means of knowing the sense of the Veda. "What then becomes of the injunction 'The Veda is to be read'?" Well, you must be content with the fact that the injunction will have heaven as its (future) fruit, even if it merely enjoins the making oneself master of the literal words of the Vedic text, (without any care to understand the meaning which they may convey),—since heaven, though not expressly mentioned, is to be assumed as the fruit, according to the analogy of the Viśwajit offering. Just as Jaimini, in his aphorism (iv. 3. 15) "Let that fruit be heaven, since it equally applies to all," establishes, that those who are not expressly mentioned are still qualified to offer the Viswajit sacrifice, and infers by induction that its characteristic fruit is heaven, so let us assume it to be in the present case also. As it has been said:—

"Since the visible fruit would be equally obtained without the injunction, this cannot be its sole object, we must rather suppose heaven to be the fruit from the injunction's significance, after the analogy of the Viswajit, &c." Thus too we shall keep the Smriti rule from being violated, "Having read the Veda let him bathe." For this rule clearly implies that no long interval is to take place between reading the Veda and the student's return to his home; while according to your opinion, after he had read the Veda, he would still have to remain in his preceptor's house to read the Mímámsá discussions, and thus the idea of no interval between would be contradicted. Therefore for these three reasons

---

अत्र हि वेदाध्ययनसमावर्त्तनयोरव्यवधानमवगम्यते । तावके मते त्वधीतेऽपि वेदे धर्म्मविचाराय गुरुकुले वस्तव्यं तथा सत्यव्यवधानं बाध्येत तस्माद्विचारशास्त्रस्य वैधत्वाभावात् पाठमात्रेण स्वर्गसिद्धेः समावर्त्तनशास्त्राच्च धर्म्मविचारशास्त्रमनारम्भणीयमिति पूर्व्वपक्षसङ्क्षेपः । सिद्धान्तस्त्वन्यतः प्राप्तत्वादप्राप्तविधित्वं मास्तु नियमविधित्वपक्षस्तु वज्रहस्तेनापि नापहस्तयितुं पार्य्यते । तथा हि स्वाध्यायोऽध्येतव्य इति तव्यप्रत्ययः प्रेरणापरपर्य्यायां पुरुषप्रवृत्तिरूपार्थभावनाभाव्यामभिधाभावनां प्रत्याययति साप्यर्थभावनासहितमनुबद्धुं भाव्यमाकाङ्क्षति न तावत्समानपदोपात्तमध्ययनभाव्यं परिरभते । अध्ययनशब्दार्थस्य स्वाधीनोच्चारणसमर्थस्य वाङ्मनसव्यापारस्य क्लेशार्थकस्य भाव्यत्वासम्भवात् । नापि समानवाक्योपात्तः स्वाध्यायः स्वाध्यायशब्दार्थस्य वर्णराशेर्नित्यत्वेन विभुत्वेन

(a) that the study of Mímámsá is not enjoined, (b) that heaven can be obtained by the simple reading of the text, and (c.) that the rule for the student's return to his home is thus fulfilled, we maintain that the study of the Mímámsá discussions on duty are not to be commenced."

The "authoritative conclusion" *(siddhánta)*, however, is as follows.

We grant that it cannot be a case of *vidhi*, for it might have been adopted on other grounds; but not even Indra with his thunderbolt could make us loose our hold of the other alternative that it is a case of *niyama*. In the sentence "The Veda is to be read," the affix *tavya* expresses an enforcing power in the word,* which is rendered visible by a corresponding action in man, bringing a certain effect into existence; and this enforcing power seeks some corresponding end which is connected with the man's creative effort. Now it cannot be the act itself of reading, as suggested by the word *adhyetavya,* which is thus sought as an end; for this act of reading, thus expressed by the word, could never be regarded as an end, since it is a laborious operation of

* The Mímámsá holds that the potential and similar affixes, which constitute a *vidhi*, have a twofold power; by the one they express an active volition of the agent, corresponding to the root-meaning, by the other an enforcing power in the word. Thus in *swargakámo yajeta*, the *ta* implies 'let him produce heaven by means of certain acts which together make up a sacrifice possessing a certain mystic influence;' next it implies an enforcing power residing in itself (as it is the word of the self-existent Veda and not of God) which sets the hearer upon this cause of action.

वोत्पत्त्यादीनां चतुर्णां क्रियाफलानामसम्भवात् तस्मात् सामर्थ्यप्राप्तोऽ-
वबोधो भाव्यत्वेनावतिष्ठते । अर्थात् समर्थो विद्वानधिक्रियत इति न्या-
येन दर्शपूर्णमासादिविषयावबोधमपेक्षमाणाः तदवबोधे स्वाध्यायं विनि-
युञ्जते । अध्ययनविधिश्च लिखितपाठादिव्यावृत्त्या अध्ययनसंस्कृतत्वं
स्वाध्यायस्यावगमयति तथा च यथा दर्शपूर्णमासादिजन्यं परमापूर्व्वम्
अवघातादिजन्यस्यावान्तरापूर्व्वस्य कल्पकं तथा समस्तक्रतुजन्यमपूर्व्व-
जातं क्रतुज्ञानसाधनाध्ययननियमजन्यमपूर्व्वं कल्पयिष्यति नियमादृष्टा-
निष्टौ विधिश्रवणावैफल्यमापद्येत न च विश्वजिन्न्यायेन फलकल्पनाव-
कल्प्यते अर्थावबोधे दृष्टे फले सति फलान्तरकल्पनायाः अयोगात् ।
तदुक्तम्

the voice and mind, consisting in the articulate utterance of the portion read. Nor could the portion read, as suggested by the whole sentence, be regarded as the end. For the mass of words called "Veda," which is what we really mean by the words 'portion read,' being eternal and omnipresent, could never fulfil the conditions of the four 'fruits of action,' production, &c. * Therefore the only true end which remains to us, is the knowledge of the meaning, as conveyed by the sense of the passage. According to the old rule, "He has the right who has the want, the power, and the wit,"—those who are aiming to understand certain things, as the new and full moon sacrifices, use their daily reading to learn the truth about them. And the injunction for reading, since it virtually excludes the reading of written books, &c., (from the well-known technical sense of the word 'read' when used in this connection,) conveys the idea that the reading the Veda enjoined has a consecrated character (as taught by a duly authorised teacher.) Therefore, as the principal *apúrva* produced by the great New and Full-moon sacrifices necessitates and establishes the subordinate *apúrvas* produced by the inferior sacrificial acts, as unhusking the rice, &c.,—so the mass

* These four 'fruits of action' are obscure, and I do not remember to have seen them alluded to elsewhere. I was told in India that they were a thing's coming into being, growing, declining, and perishing.—I do not see how there could be any reference to the four kinds of apúrva, sc. phala, samudáya, utpatti and anga, described in Nyáya M. V. ii. 1. 2.

लभ्यमाने फले दृष्टे नादृष्टफलकल्पना ।
विधेस्तु नियमार्थत्वाच्चानर्थक्यं भविष्यतीति ॥

ननु वेदमात्राध्यायिनोऽर्थावबोधानुदयेऽपि साङ्गवेदाध्यायिनः पुरुषस्यार्थावबोधसम्भवात् विचारशास्त्रस्य वैफल्यमिति चेत्तदसमञ्जसं बोधमात्रसम्भवेऽपि निर्णयस्य विचाराधीनत्वात् । तद्यथा अक्ताः शर्करा उपदधातीत्यत्र घृतेनैव न तैलादिनेत्यर्थनिर्णयो व्याकरणेन निगमेन निरुक्तेन वा न लभ्यते विचारशास्त्रेण तु तेजो वै घृतमिति वाक्यशेषवशादर्थनिर्णयो लभ्यते । तस्माद्विचारशास्त्रस्य वैधत्वं सिद्धम् ॥ न च वेदमधीत्य स्नायादिति शास्त्रं गुरुकुलनिवृत्तिपरं व्यवधानप्रतिबन्धकं स्यादिति मन्तव्यं स्नात्वा भुङ्क्ते इतिवत् पूर्वापरीभावसमानकर्तृकत्वमात्रप्रतिपत्त्या अध्ययनसमावर्त्तनयोर्नैरन्तर्य्याप्रतिपत्तेः । तस्माद्विधिसामर्थ्याद्वे-

of *apúrva* produced by all the sacrifices necessitates and establishes a previous *apúrva* produced by the defining injunction (*niyama*), which prescribes reading the Veda as the means to know how to perform these sacrifices. If you hesitate to concede that a *niyama* could have this future influence called *apúrva*, the same doubt might equally invalidate the efficacy of a *vidhi* (as the two stand on the same level as to their enjoining power). Nor is the supposition a valid one, that heaven is the fruit, according to the analogy of the *Viswajit* offering,—since, if there is a present and visible fruit in the form of a knowledge of the meaning of the sacred text, it is improper to suppose any other future and unseen fruit. Thus it has been said :—

"Where a seen fruit is obtained, you must not suppose an unseen one; but if a *vidhi* has the defining meaning of a *niyama*, it does not thereby become meaningless." *

But an objector may say, "Although a man who reads the simple text of the Veda may not attain to a knowledge of its meaning, still as he who reads the Veda with its *angas*, grammar, &c, may attain to this knowledge, the study of Mímámsá will be useless." But this is not true: for even though he may attain to a simple knowledge of the literal meaning, all deeper investigation must depend on this kind of discussion. For instance, when it is said, "He offers anointed gravel," neither

* Vedic quotations as in Yáska's Naigama?

वाधिकरणसहस्रात्मकपूर्व्वमीमांसाशास्त्रमारम्भनीयम् । इद चाधिकरणं शास्त्रोपोद्घातत्वेन सम्बध्यते । तदाह

चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षत इति ।

इदमेवाधिकरणं गुरुमतमनुसृत्योपन्यस्यते । अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यत्राध्यापनं नियोगविषयः प्रतिभासते नियोगश्च नियोज्यमपेक्षते कश्चात्र नियोज्य इति चेदाचार्य्यकाम एव सम्माननेत्यादिना पाणिन्यनुशासने नाचार्य्यसन्मानने नयतेर्धातोरात्मनेपदस्य विधानात् उपनयने यो नियोज्यः स एवाध्यापनेऽपि तयोरेकप्रयोगत्वात् । अतएवोक्तं मनुना मुनिना

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
साङ्गञ्च सरहस्यञ्च तमाचार्यं प्रचक्षत इति ॥

grammar nor *niyama* nor *nirukta* will determine the true meaning that it is to be anointed with ghee and not with oil, &c.; —it is only by a Mímáṃsá discussion that the true meaning is unravelled from the rest of the passage, "Verily ghee is brightness." * It is therefore established that the study of Mímáṃsá is enjoined. Nor need it be supposed that this contradicts the passage of Smṛiti, "Having read the Veda let him bathe," which implies that he should now leave his teacher's house and prohibits any further delay,—as the words do not necessarily imply that the return to the paternal roof is to follow immediately on his having read the Veda, but only that it is to follow it at some time, and that both actions are to be done by the same person, just as we see in the common phrase "Having bathed he eats." Therefore from the purport of the injunction we conclude that the study of the Púrva Mímáṃsá Śástra, consisting of a thousand 'topics'† is to be commenced. This topic is connected with the main discussion as being a subsidiary digression, as it is said. "They call that a subsidiary digression which helps to establish the main subject." ‡

I now proceed to give a sketch of the discussion of the same 'topic' in accordance with the teaching of the Guru Prabhákara.

* See Nyáya-málá-vistara i. 4. 19.

† The exact number is 915

‡ This is to explain the lost of the five 'members, the *sangati*.'

ततश्चाचार्यकर्तृकमध्यापनं माणवककर्तृकेणाध्ययनेन विना न सिध्यतीत्यध्यापनविधिः प्रयुक्त्यैवाध्ययनानुष्ठानं करिष्यति प्रयोज्यव्यापारमन्तरेण प्रयोजकव्यापारस्यानिर्वाहात् । तर्ह्यध्येतव्य इत्यस्य विधित्वं न सिद्ध्यतीति चेन्मा सैत्सीत् का नो हानिः पृथगध्ययनविधेरभ्युपगमे प्रयोजनाभावात् विधित्वस्य नित्यवादत्वेनाप्युपपत्तेः । तस्मादध्यापनविधिमुपजीव्य पूर्वमुक्तयस्तौ पूर्वोत्तरपक्षौ प्रकारान्तरेण प्रदर्शनीयौ विचारशास्त्रमवैधत्वेन नारब्धव्यमिति पूर्वपक्षः वैधत्वेनारब्धव्यमिति राद्धान्तः तच्च वैधत्वं वदता वेदितव्यं किमध्यापनविधिर्माणवकस्यार्थावबोधमपि प्रयुङ्क्ते किं वा पाठमात्रं नाद्यः विनाप्यर्थावबोधेनाध्यापनसिद्धेः न द्वितीयः पाठमात्रे विचारस्य विषयप्रयोजनयोरसम्भवादापाततः प्रतिभातः सन्दिग्धोऽर्थो विचारशास्त्रविषयो भवति । तथा सति यत्रार्थो-

Digitized by Google

In the Smṛiti rule* "Let him admit as a pupil the Brahman lad when eight years old (by investing him with the sacred cord)," the object of the direction appears to be the pupil's instruction. Now a direction must have reference to somebody to be directed; and if you ask who is here to be directed, I reply 'he who desires to be a teacher,' since, by Páṇini's rule 1, 3, 36 the root *ní* is used in the átmanepada when honour is implied i. e. the honour which a teacher receives from his pupils. He who is to be directed as to admitting a pupil is the same person who is to be directed as to teaching him, since both are the object of one and the same command. Hence the inspired sage Manu has said (ii. 140), "The Brahman who girds his pupil with the sacrificial cord and then instructs him in the Veda, with its subsidiary *angas* and mystic doctrines, they call a spiritual teacher *(ácháryа)*." Now the teaching which is the function of the teacher cannot be fulfilled without the learning which is the function of the pupil, and therefore the very injunction to teach implies and establishes a corresponding obligation to learn, since the teacher's efforts fail without those of the pupil. If you object that this view does not make reading the Veda the object of definite injunction, I reply, What matters it to us if it is not? For even if there is no reason for us to admit a separate injunction for reading the Veda, it will still remain perpetually enjoined as a duty, because the passage which mentions it is a perpetual *anuváda* or 'supplementary repetition.'† Therefore

* Cf. Áswaláyana's Gṛihya Sutras, i. 19. I.

† The *anuváda* of course implies a previous *vidhi*, which it thus repeats and supplements, and so carries with it an equal authority. The anuváda in the present case is the passage which mentions that the Veda is to be read, as it enforces the previous vidhi as to teaching

वगतिरेव नास्ति तत्र सन्देहस्य का कथा विचारफलस्य निर्णयस्य प्रत्याशा दूरत एव । तथा च यदसन्दिग्धं प्रयोजनं तत्प्रेक्षावत् प्रतिपित्सागोचरः यथा समनस्केन्द्रियसन्निकृष्टः स्पष्टालोकमध्यासीनो घट इति न्यायेन विषयप्रयोजनयोरसम्भवेन विचारशास्त्रमनारभ्यमिति पूर्व्वः पक्षः अध्यापनविधिनार्थावबोधो मा प्रयोजि तथापि साङ्गवेदाध्यायिनो गृहीतपदपदार्थसङ्गतिकस्य पुरुषस्य पौरुषेयेष्विव प्रबन्धेषु आम्नाये ऽप्यर्थावबोधः प्राप्नोत्येव । ननु यथा विषं भुंक्ष्वेत्यत्र प्रतीयमानोऽप्यर्थो न विवक्षते मास्य गृहे भुङ्क्था इति भोजनप्रतिषेधस्य मातृवाक्यविषयत्वात् तथाम्नायार्थस्याविवक्षायां विषयाद्यभावदोषः प्रचीनः प्रादुःष्यादिति चेन्मैवं वोचः दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यसम्भवात् विषभोजनवाक्यस्याप्तप्रणीतत्वेन मुख्यार्थपरिग्रहे बाधः स्यादिति विवक्षा नाश्रीयते अपौ-

Digitized by Google

the former primâ facie argument and its answer, which were given before under the idea that there was a definite injunction to read the Veda, must now be discussed in another way to suit this new view.

Now the primâ facie argument is that the study of Mímám-sá not being authoritatively enjoined, is not to be commenced; the 'conclusion' is that it is to be commenced as being thus authoritatively enjoined.

Now the upholders of the former or primâ facie view argue as follows. "We put to the advocates of the conclusion the following dilemma: does the injunction to teach imply that the pupil is to understand the meaning of what is read, or does it only refer to the bare reading? It cannot be the former, for obviously the act of teaching cannot depend on the pupil's understanding what is taught, (as this will depend on his ability as a recipient); and the latter will not help you, as, if the bare reading is sufficient, the Mímámsa discussions in question will have no subject or use. For their proper subject is a doubtful point in the Veda, which has been only looked at in a rough and impromptu way; now if there is no need of understanding the meaning at all, why should we talk of doubts and still less of any hope of ascertaining the true meaning by means of laborious discussion? And therefore in accordance with the well-known principle, "That which is a thing of use and not a matter of doubt is an object of attainment to an intelligent man, as for instance a jar which is in broad light and in contact with the external and internal senses,"—as there is in the present case no such thing as a subject to exercise it upon or a useful end to be attained by it, we maintain that the study of Mímámsá is not to be commenced."

रुषेये तु वेदे प्रतीयमानार्थः कुतो न विचार्यते विचारिते च वेदार्थे यत्र यत्र पुरुषस्य सन्देहः स सर्व्वोऽपि विचारशास्त्रस्य विषयो भविष्यति तन्निर्णयश्च प्रयोजनं तस्मादध्यापनविधिप्रयुक्तेनाध्ययनेनावगम्यमानस्यार्थस्य विचारार्हत्वाद्विचारशास्त्रस्य वैधत्वेन विचारशास्त्रमारम्भणीयमिति राद्धान्तसंग्रहः ।

स्यादेतत् वेदस्य कथमपौरुषेयत्वमभिधीयते तत्प्रतिपादकप्रमाणाभावात् कथं मन्यथाः अपौरुषेयाः वेदाः सम्प्रदायाविच्छेदे सत्यस्मर्य्यमाणकर्तृकत्वादात्मवदिति तदेतन्मन्दं विशेषणासिद्धेः पौरुषेयवेदवादिभिः प्रलयसम्प्रदायविच्छेदस्य कक्षीकरणात् । किञ्च किमिदमस्मर्य्य-

We grant in reply that the injunction to teach does not imply a corresponding necessity that the student must understand the meaning; still when a man has read the Veda with its subsidiary *angas*, and has comprehended the general connection of the words with their respective meanings, this will imply an understanding of the meaning of the Veda, just as it would in any ordinary human compositions. "But may we not say that, just as in the case of the mother who said to her son "Eat poison," the meaning literally expressed by the words was not what she wished to convey, but rather she intended to forbid his eating anything at all in such and such a house,—so, if the literal meaning of the Veda does not express its real purport, the old objection will recur with full force that the study of Mímámsá will have neither object nor use, (as there will be no use in understanding the literal meaning, since, as in the mother's case it may only lead astray, and so common sense must be the ultimate judge)." We reply that your supposed illustration and the case in question are not really parallel. In the supposed illustration the primary meaning of the words would be obviously precluded, because a direction to eat poison would be inconceivable in the mouth of an authoritative and trustworthy speaker like a mother, and you would know at once that this could not be what she wished to say; but in the case of the Veda, which is underived from any personal author, why should not the literal meaning be the one actually intended? And it is just the doubts that arise, as they will occasionally do, in reference to this intended meaning, which will be the proper subject of Mímámsá discussion; and the settlement of these doubts will be its proper 'use.' Therefore whenever the true meaning of the Veda is not obtained * by that reading which is virtually prescribed by the authoritative injunction to a Brahman to teach, it will be a proper subject for

* I read in p. 127, l. 12 *anavagamyamánasya*, and so the recension given in the Nyáya M. V. p. 14 *na budhyamánasya*.

माणस्य कर्तृकत्वं नाम अप्रतीयमानकर्तृकत्वमस्मरणगोचरकर्तृकत्वं वा न प्रथमः कल्पः परमेश्वरस्य कर्तुः प्रमितेरभ्युपगमात् न द्वितीयः विकल्पासहत्वात् तथाहि किमेकेनास्मरणमभिप्रेयते सर्व्वैर्वा नाद्यः मा धर्म्मयोनिर्जिनमानरोष इत्यादिषु मुक्तकोक्तिषु व्यभिचारात् न द्वितीयः सर्व्वास्मरणस्य असर्व्वज्ञदुर्ज्ञानत्वात् पौरुषेयत्वे प्रमाणसम्भवाच्च वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् कालिदासादिवाक्यवत् वेदवाक्यान्याप्तप्रणीतानि प्रमाणत्वे सति वाक्यत्वात् मन्वादिवाक्यवदिति । ननु

systematic discussion; and hence we hold that the study of Mímámsá *is* enjoined, and should be commenced.

"Well* be it so" (say the followers of the Nyáya), "but how can the Veda be said to be underived from any personal author, when there is an unbroken line of tradition, there is no remembrance of any author, just as is the case with the soul?† This argument is weak, because the alleged characteristics (unbroken tradition, &c.) are not proved; for those who hold the human origin of the Vedas, maintain that the line of tradition was interrupted at the time of the dissolution of the universe. But again, what is meant by this assertion that the author is not remembered? is it (1) that no author is believed or (2) that no author is remembered? The first alternative cannot be accepted since we hold that God is proved to have been the author. Nor can the second, because it cannot stand the test of the following dilemma, viz., is it meant (*a*) that no author of the Veda is remembered by some one person, or (*b*) by any person whatever? The former supposition breaks down, as it would prove too much, since it would apply to such an isolated stanza, as "He who is religious and has overcome pride and anger," &c.‡ And the latter supposition is inadmissible, since it would be impossible for any person who was not omniscient to know that no author of the Veda was recollected by any person whatever. Moreover

* In the next two or three pages I have frequently borrowed from Dr. Muir's translation in his *Sanskrit Texts*, vol. iii. p. 88.

† The soul may be traced back through successive transmigrations, but you never get back to its beginning.

‡ Mádhava means that the author of this stanza, though unknown to many people was not necessarily unknown to all, as his contemporaries, no doubt, knew who wrote it, and his descendants might perhaps still be aware of the fact. In this case, therefore, we have an instance of a composition of which some persons did not know the origin, but which nevertheless had a human author. The stanza in question is quoted in full in Böhtlingk's Indische Sprüche, No. 5598, from the MS. anthology called the *Subhashitárnava.*

वेदस्याध्ययनं सर्व्वं गुर्व्वध्ययनपूर्व्वकम् ।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा ॥
इत्यनुमानं प्रतिसाधनं प्रगल्भत इति चेत्तदपि न प्रमाणकोटिं प्रवेष्टुमीष्टे ॥
भारताध्ययनं सर्व्वं गुर्व्वध्ययनपूर्व्वकम् ।
भारताध्ययनत्वेन साम्प्रताध्ययनं यथेति ॥
इत्याभाससमानयोगक्षेमत्वात् । ननु तत्र व्यासः कर्त्तेति स्मर्य्यते
को ह्यन्यः पुण्डरीकाक्षात् महाभारतकृद्भवेत्
इत्यादाविति चेत्तदसारम्

there is actual proof that the Veda had a personal author; for we argue as follows, The sentences of the Veda must have originated from a personal author, since they have the character of sentences like those of Kálidása and other writers. And again, the sentences of the Veda have been composed by a competent person, since, while they possess authority, they have, at the same time, the character of sentences, like those of Manu and other sages.

But (ask the Mímámsákas) may it not be assumed that 'all study of the Veda was preceded by an earlier study of it by the pupil's preceptor, since the study of the Veda must always have had one common character which was the same in former times as now;' and therefore this uninterrupted succession has force to prove the eternity of the Veda. "This reasoning, however, (the Naiyáyikas answer) cannot rise to the height of proof, for it has no more validity than such obviously illusory reasoning as "All study of the Maháhbárata was preceded by an earlier study of it by the pupil's preceptor, since it is the study of the Mahábhárata, which must have been the same in former times as now." But (the Mímámsakas will ask, whether there is not a difference between these two cases, since the Smṛiti declares that Vishnu incarnate as Vyása was the author of the Mahábhárata, in accordance with the line, "Who else than the lotus-eyed Vishṇu could be the maker of the Mahábhárata?" (while nothing of this sort is recorded in any Smṛiti in regard to the Veda). This argument however, is pithless, since those words of the Purushasúkta, (Rig V. x. 90), "from him sprang the Rich and Sáman verses, from him sprang the Metres; from him the Yajus arose," prove that the Veda had a maker.

Further (proceed the Naiyáyikas) we hold that sound is non-eternal* because it has genus, and is also perceptible to the

* The eternity of the Veda depends on this tenet of the Mímámsá that sound is eternal.

ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति

पुरुषसूक्ते वेदस्य स कर्तृकत्वप्रतिपादनात् । किञ्चानित्यः शब्दः सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वाद्घटवत् । नन्विदमनुमानं स एवायं गकार इति प्रत्यभिज्ञाप्रमाणप्रतिहतमिति चेत् तदतिफल्गु लूनपुनर्जातकेशदलितकुन्दादाविव प्रत्यभिज्ञायाः सामान्यविषयत्वेन बाधकत्वाभावात् । नन्वशरीरस्य परमेश्वरस्य ताल्वादिस्थानाभावेन वर्णोच्चारणासम्भवात् कथं तत् प्रणीतत्वं वेदस्य स्यादिति चेन्न

external organs of beings such as ourselves, just as a jar is.* "But" you may object, "is not this argument refuted by the proof arising from the fact that we recognise the letter g. (for example) as the same we have heard before? "This objection however, is extremely weak, for the recognition in question is powerless to refute our argument, since it has reference only to identity of *species*, as in the case of a man whose hair has been cut and has grown again, or of a jasmine which has blossomed afresh. "But" (asks the Mímámsaka,) "how can the Veda have been uttered by the incorporeal Parameśwara, who has no palate or other organs of speech and therefore cannot have pronounced the letters?" This objection (answers the Naiyáyika) is not happy, because, though Parameśwara is by nature incorporeal, he can yet assume a body in sport, in order to shew kindness to his worshippers. Consequently the arguments in favour of the doctrine that the Veda had no personal author are inconclusive.

I shall now (says the Mímámsaka) clear up the whole question. What is meant by this *paurusheyatwa* ('derivation from a personal author') which it is sought to prove? Is it (1) mere procession (*utpannatwa*) from a person, like the procession of the Veda from persons such as ourselves, when we daily utter it? or (2) is it the arrangement—with a view to its manifestation—of knowledge acquired by other modes of proof, as in the case of treatises composed by persons like ourselves? If the first meaning be intended, there will be no dispute between us.† If the second sense be meant, I ask whether it is established (*a*) by inference,‡ or

* Eternal things (as the atoms of earth, fire, water and air,—minds—time, space, ether, and soul) have *viśesha*, not *sámánya* or genus, and they are all imperceptible to the senses. Genera are themselves eternal (though the individuals in which they reside are not), but they have not themselves genus. Both these arguments belong rather to the Nyáya-vaiśeshika school than to the Nyáya.

† The Mímámsaka allows that the *uchchárana* or utterance is non-eternal.

‡ The inference will be as follows, The Vedas were arranged after being acquired by other modes of proof, with a view to their manifestation, from the very fact of their having the nature of sentences, just like the compositions of Manu, &c.

तदुक्तं स्वभावतोऽशरीरस्यापि तस्य भक्तानुग्रहार्थं लीलाविग्रहग्रहणसम्भवात् । तस्माद्वेदस्यापौरुषेयत्ववाचो युक्तिर्न युक्तेति चेत् तत्र समाधानमभिधीयते किमिदं पौरुषेयत्वं सिसाधयिषितं पुरुषादुत्पन्नत्वमात्रं यथा अस्मदादिभिरहरहरुच्चार्यमाणस्य वेदस्य प्रमाणान्तरेणार्थमुपलभ्य तत्प्रकाशनाय रचितत्वं वा यथा अस्मदादिभिरेव निबध्यमानस्य प्रबन्धस्य प्रथमेन विप्रतिपत्तिः चरमे किमनुमानबलात् तत्साधनमागमबलाद्वा नाद्यः मालतीमाधवादिवाक्येषु सव्यभिचारत्वात् । अथ प्रमाणत्वे सतीति विशिष्यत इति चेत्तदपि न विपश्चितो मनसि वैशद्यमापद्यते

(*b*) by supernatural testimony? (*a*) The former alternative cannot be correct, because your argument would equally apply to the sentences in the drama, the Málatímádhava (which of course being a work of fiction, has no authoritative character.) If you qualify your argument by inserting the saving clause "while they possess authority" * [as suprá p. 12, l. 22.], even this explanation will fail to satisfy a philosopher. For the sentences of the Veda are universally defined to be sentences which prove things that are not provable by other evidence. But if you could establish that these Vedic sentences only prove what is provable by other evidence, this definition would be at once contradicted, just as if a man were to say that his mother was a barren woman. And even if we granted that Parameśwara might assume a body in sport, in order to shew kindness to his worshippers, it would not at all follow that he would perceive things beyond the reach of the senses, from the want of any means of apprehending objects removed from him in place, in time, and in nature. † Nor is it to be assumed that his eyes and other senses alone would have the power of producing such knowledge,—for we can only draw upon our imagination in accordance with our past experience. This has been declared by the Guru [Prabhákara], when he refutes this supposition of an omniscient author:—

"Wherever we find the power of an organ intensified, ‡ it is done without its going beyond its own proper objects; thus it may appear in the power of seeing the very distant or the very minute, but not in the ear's becoming cognizant of form." E. B. C.

(To be continued).

---

* The argument will now run. "The Vedas were arranged after being acquired by other modes of proof, because while they possess authority, they still have the nature of sentences, like the composition of Manu, &c."

† In assuming a material body, he would be subject to material limitations.

‡ The Jainas allow thirty-four such superhuman developments *(atiśayáh)* in their saints.

प्रमाणान्तरागोचरार्थप्रतिपादकं हि वाक्यं वेदवाक्यं तत्प्रमाणान्तरगोचरार्थप्रतिपादकमिति साध्यमाने मम माता बन्ध्येतिवद् व्याघातापातात् । किञ्च परमेश्वरस्य लीला विग्रहपरिग्रहाभ्युपगमेऽप्यतीन्द्रियार्थदर्शनं न सङ्घटते देशकालस्वभावविप्रकृष्टार्थदर्शनोपायाभावात् । न च तच्चक्षुरादिकमेव तादृक्प्रतीतिजननक्षममिति मन्तव्यं दृष्टानुसारेणैव कल्पनाया आश्रयणीयत्वात् । तदुक्तं गुरुभिः सर्वज्ञनिराकरणवेलायाम् ॥

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितेति ॥

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9. FEBRUARY 1st 1878. Vol. II.

C

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

॥ काशिकायाः ॥

॥ अष्टमाध्यायस्य प्रथमः पादः ॥

लोपे विभाषा ॥ ४५ ॥

किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गमप्रतिषिद्धं विभाषा नानुदात्तं भवति । क्व चास्य लोपः । यत्र गम्यते चार्थो न च प्रयुज्यते किंशब्दः । देवदत्तः पचति आहोस्वित्पठति । विनैव किमा प्रश्नोऽवगम्यते । प्राप्तविभाषेयं किमर्थेन योगात् । पूर्ववत प्रत्युदाहरणानि ॥

एहिमन्ये प्रहासे लृट् ॥ ४६ ॥

एहिमन्ये इत्यनेन युक्तं लृडन्तं नानुदात्तं भवति प्रहासे । प्रकृष्टो हासः प्रहासः, क्रीडा । एहि मन्ये ओदनं भोक्ष्यसे नहि भोक्ष्यसे भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्तेन पिता । प्रहासइति किम् । एहि मन्यसे ओदनं भोक्ष्ये इति । सुष्ठु च मन्यसे । साधु च मन्यसे । गत्यर्थलोटा लृडित्येव सिद्धे सत्यारम्भो नियमार्थः । एहिमन्येयुक्तं प्रहासएव यथा स्यात्, अन्यत्र मा भूदिति । एहि मन्यसे ओदनं भोक्ष्यइति । एहिमन्यइत्युत्तमोपादानमतन्त्रम् । प्रहासएव हि मन्यतेरुत्तमो विहितस्ततोऽन्यत्र मध्यम एव भवति । तत्रानेन नियमेन निवृत्तिः क्रियते । एहि मन्यसे ओदनं भोक्ष्यइति ॥

जात्वपूर्वम् ॥ ४७ ॥

जातु इत्येतदविद्यमानपूर्वं तेन युक्तं तिङन्तं नानुदात्तं भवति । जातु भोक्ष्यसे । जातु करिष्यामि । अपूर्वमिति किम् । कटं जातु करिष्यति ॥

किंवृत्तं च चिदुत्तरम् ॥ ४८ ॥

किमोवृत्तं किंवृत्तं, किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयाड्डतरडतमो च प्रत्ययो, तत्किंवृत्तं चिदुत्तरमविद्यमानपूर्वं यत्तेन युक्तं तिङन्तं नानुदात्तं

Digitized by Google

भवति । कश्चिद्भुङ्क्ते । कश्चिद्भोजयति । कश्चिदधीते । केन चित्करोति । कस्मै चिद्ददाति । कतरश्चित्करोति । कतमश्चिद्भुङ्क्ते । चिदुत्तरमिति किम् । को भुङ्क्ते । अपूर्वमित्येव । देवदत्तः किं चित्पठति ॥

आहोउताहो चानन्तरम् ॥ ४९ ॥

निघातप्रतिषेधोऽनुवर्त्तते । अपूर्वमिति च । आहो उताहो इत्येताभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानुदात्तं भवति । आहो भुङ्क्ते । उताहो भुङ्क्ते । आहो पठति । उताहो पठति * । अनन्तरमिति किम् । शेषे विभाषां वक्ष्यति । अपूर्वमित्येव । देवदत्त आहो भुङ्क्ते । देवदत्त उताहो भुङ्क्ते ॥

शेषे विभाषा ॥ ५० ॥

आहो उताहो इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं शेषे विभाषा भवति । कश्च शेषः यदन्यदनन्तरात् । आहो देवदत्तः पचति २ । उताहो देवदत्तः पचति २ । आहो देवदत्तः पठति २ । उताहो देवदत्तः पठति २ ॥

गत्यर्थलोटा लृण्नचेत्कारकं सर्वान्यत् ॥ ५१ ॥

गतिना समानार्था गत्यर्थाः गत्यर्थानां लोट् गत्यर्थलोट् तेन गत्यर्थलोटा युक्तं लृडन्तं तिङन्तं नानुदात्तं भवति न चेत्कारकं सर्वान्यद्भवति । यत्रैव कारके कर्त्तरि कर्म्मणि वा लोट् तत्रैव यदि लृडपि भवतीत्यर्थः । कर्तृकर्म्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते । न करणादि कारकान्तरम् । आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम् । आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे । उह्यन्तां देवदत्तेन शालयः तेनैव भोक्ष्यन्ते । उह्यन्तां देवदत्तेन शालयः यज्ञदत्तेन भोक्ष्यन्ते । गत्यर्थग्रहणं किम् । पच देवदत्तौदनं भोक्ष्यस एनम् । लोटेति किम् । आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्येनम् । लृडिति किम् । आगच्छ देवदत्त ग्रामं पश्यस्येनम् । न चेत्कारकं सर्वान्यदिति किम् । आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते । उह्यन्तां देवदत्तेन शालयः सक्तवस्तेन पास्यन्ते । सर्वग्रहणं

* आहो अधीते । इत्यधिकमेकस्मिन्पुस्तके ।

Digitized by Google

किम्। आगच्छ देवदत्त ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातप्रतिषेधो यथा स्यात्। लृडन्तवाच्ये हि सर्वस्मिन्कारके ऽन्यस्मिंश्च भवितव्यम्। इह तु यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते इति॥

लोट् च॥ ५२॥

लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति। न चेत्कारकं सर्वान्यद्भवति। लोडन्तयोरेकं कारकं यदि भवतीत्यर्थः। आगच्छ देवदत्त ग्रामं पश्य। आव्रज विष्णुमित्र ग्रामं शाधि। आगम्यतां देवदत्तेन ग्रामो दृश्यतां यज्ञदत्तेन। गत्यर्थानामित्येव। पच देवदत्तौदनं भुङ्क्ष्वैनम्। लोटेत्येव। आगच्छेर्देवदत्त ग्रामं पश्यैनम्। न चेत्कारकं सर्वान्यदित्येव। आगच्छ देवदत्त ग्रामं पश्यत्वेनं यज्ञदत्तः। सर्वग्रहणानुवृत्तेस्त्विह भवत्येव। आगच्छ देवदत्त ग्रामं त्वं चाहं च पश्याव। पृथग्योगकरणमुत्तरार्थम्॥

विभाषितं सोपसर्गमनुत्तमम्॥ ५३॥

सर्वं पूर्वमनुवर्तते। प्राप्तविभाषेयं, लोडन्तं सोपसर्गमुत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तं भवति न चेत्कारकं सर्वान्यद्भवति। आगच्छ देवदत्त ग्रामं प्रविश। २। आगच्छ देवदत्त ग्रामं प्रशाधि। २। सोपसर्गमिति किम्। आगच्छ देवदत्त ग्रामं पश्य। अनुत्तममिति किम्। आगच्छानि देवदत्त ग्रामं प्रविशानि॥

हन्त च॥ ५४॥

पूर्वं सर्वमनुवर्तते। गत्यर्थलोटं वर्जयित्वा। हन्तेत्यनेन युक्तं लोडन्तं सोपसर्गमुत्तमवर्जितं विभाषितं नानुदात्तं भवति। हन्त प्रविश २। हन्त प्रशाधि २। सोपसर्गमित्येव। हन्त कुरु। निपातैर्यद्यदिहन्तेति नित्यमत्र निघातप्रतिषेधो भवति। अनुत्तममित्येव। हन्त प्रभुनजावहै। हन्त प्रभुनजामहै॥

आम एकान्तरमामन्त्रितमनन्तिके॥ ५५॥

आम उत्तरमेकपदान्तरमामन्त्रितमनन्तिके नानुदात्तं भवति।

आम् पचसि देवदत्त३ । आम् भो देवदत्त३ । भो इत्यामन्त्रितान्तमपि नामन्त्रिते समानाधिकरणे सामान्यवचनमिति नाविद्यमानवद्भवति । आम इति किम् । शाकं पचसि देवदत्त३ । एकान्तरमिति किम् । आम् प्रपचसि देवदत्त३ । आमन्त्रितमिति किम् । आम्पचति देवदत्तः । अनन्तिकइति किम् । आम् देवदत्त ॥ आम एकान्तरमामन्त्रितं यत्तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते ॥ तदुभयमनेन क्रियतइति के चिदाहुः । प्लुतोदात्तः पुनरसिद्धत्वान्न प्रतिषिध्यते । अपरेषां दर्शनमनन्तिकइत्यनेन यन्न दूरं न संनिकृष्टं तत्परिगृह्यते । तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति । प्लुतोदात्तोपि नोदाहर्तव्य इति ॥

यद्धितुपरं छन्दसि ॥ ५६ ॥

आमन्त्रितमित्येतदस्वरितत्वान्नानुवर्तते । तिङ्ङिति वर्ततएव । यत्परं हिपरं तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति । यत्परं तावत् । गवां गोत्रमुदसृजो यदङ्गिरः । हिपरम् । इन्दवो वामुशन्ति हि । तुपरम् । आख्यास्यामि तु ते । निपातैर्यद्यदिहन्तेति हि चेति तुपश्यपश्यताहैरिति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थं, एभिरेव परैर्योगेप्रतिषेधो भवति नान्यैरिति । इह न भवति । जाये स्वारोहावेहि । एहीत्यनेन मत्यर्थेलोटा युक्तस्य रोहावेत्यस्य लोडन्तस्य निघातो भवत्येव ॥

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ५७ ॥

चन चित् इव गोत्रादि तद्धित आम्रेडित इत्येतेषु परतः अगतेःपरं तिङन्तं नानुदात्तं भवति । चन । देवदत्तः पचति चन । चित् । देवदत्तः पचति चित् । इव । देवदत्तः पचतीव । गोत्रादि । देवदत्तः पचति गोत्रम् । देवदत्तः पचति ब्रुवम् । देवदत्तः प्रपचति प्रवचनम् । इहापि गोत्रादयः कुत्सनाभीक्ष्ण्ययोरेव गृह्यन्ते । तद्धित । देवदत्तः पचतिकल्पम् । देवदत्तः पचतिरूपम् । अनुदात्तस्तद्धित इहोदाहरणमन्यत्र तद्धितस्वरेण तिङ्स्वरो बाध्यते । पचतिदेश्यः । आम्रेडित । देवदत्तः पचति २ । अगतेरिति किम् । देवदत्तः प्रपचति चन । अत्रागतिग्रहणे सग-

तिरपि तिङित्यत्र च उपसर्गग्रहणं द्रष्टव्यम् । इह मा भूत् । शुक्लीक-रोति वन । यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ॥

चादिषु च ॥ ५८ ॥

चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति । चादयो नचवाहाहैवयुक्ते इत्यत्र ये निर्दिष्टाः त इह परिगृह्यन्ते । चशब्दे तावत् । देवदत्तः पचति च खादति च । वा । देवदत्तः पचति वा खादति वा । ह । देवदत्तः पचति ह खादति ह । अह । देवदत्तः पचत्यह खादत्यह । एव । देवदत्तः पचत्येव खादत्येव । अगतेरित्येव । देवदत्तः प्रपचति च प्रखादति च । प्रथमस्यात्र तिङन्तस्य चवायोगे प्रथमेति निघातः प्रतिषिध्यते, एवपरं तु निहन्यते ॥

चवायोगे प्रथमा ॥ ५९ ॥

अगतेरिति पूर्वसूत्रे चानुकृष्टमित्यत्र नानुवर्त्तते । च वा इत्येता भ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । गर्दुभांश्च कालयति । वीणां च वादयति । गर्दुभान्वा कालयति । वीणां वा वादयति । योग-ग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति । प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूदिति । चवायोगो हि द्विसमुच्चये विकल्पे च सति भवति । स चानेकस्य धर्म इति ॥

हेति क्षियायाम् ॥ ६० ॥

ह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायां, क्षिया धर्मव्यतिक्रमः आचारभेदः । स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति । स्वयं ह्योदनं भुङ्क्ते ३ उपाध्यायं सक्तून्पा-ययति । प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते । क्षियाशीःप्रैषेषु तिङाकाङ्क्षमिति च प्लुतो भवति ॥

अहेति विनियोगे च ॥ ६१ ॥

अह इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने चशब्दात् क्षियायां च । नानाप्रयोजनो नियोगो विनियोगः ।

त्वमह ग्रामं गच्छ । त्वमहारण्यं गच्छ । क्रियायाम् । स्वयमह रथेन याति २ उपाध्यायं पदातिं गमयति । स्वयमहौदनं भुङ्क्ते २ उपाध्यायं सक्तून्पाययति । पूर्ववद्विघातप्रतिषेधः श्रुतश्च ॥

चाहलोप एवेत्यवधारणम् ॥ ६२ ॥

चलोपे अहलोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति । एवेत्येतच्चेदवधारणार्थे प्रयुज्यते । क्व चास्य लोपो यत्र गम्यते चार्थो न च प्रयुज्यते तत्र लोपः । तत्र चशब्दः समुच्चयार्थः अहशब्दः केवलार्थ इति समानकर्तृके चलोपः नानाकर्तृके अहलोपः । चलोपे । देवदत्त एव ग्रामं गच्छतु देवदत्त एवारण्यं गच्छतु । ग्रामं चारण्यं च गच्छत्वित्यर्थः । अहलोपे । देवदत्त एव ग्रामं गच्छतु यज्ञदत्त एवारण्यं गच्छतु । ग्रामं केवलमरण्यं केवलमित्यर्थः । अवधारणमिति किम् । देवदत्तः क्वेव भोक्ष्यते । देवदत्तः क्वेव वाध्येष्यते । अनवक्लृप्तावयमेवशब्दः न क्व चिद्भोक्ष्यत इत्यर्थः । एवे चानियोग इति पररूपम् ॥

चादिलोपे विभाषा ॥ ६३ ॥

चादयो नचवाहाहैवयुक्त इति सूत्रनिर्दिष्टा गृह्यन्ते तेषां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विभाषा । चलोपे । शुक्ला व्रीहयो भवन्ति २ । श्वेता गा आज्याय दुहन्ति २ । भवन्तीत्येतद्विकल्पेन न निहन्यते । वालोपे । व्रीहिभिर्यजेत २ । यवैर्यजेत । एवं शेषेष्वपि यथादर्शनमुदाहार्यम् ॥

वैवावेति च च्छन्दसि ॥ ६४ ॥

वै वाव इत्येताभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये । अहर्वै देवानामासीत् २ । रात्रिरसुराणामासीत् । बृहस्पतिर्वै देवानां पुरोहित आसीत् २ । शण्डामर्कावसुराणाम् । वाव । अयं वाव हस्त आसीत् २ । नेतर आसीत् ॥

एकान्याभ्यां समर्थाभ्याम् ॥ ६५ ॥

एक अन्य इत्येताभ्यां समर्थाभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। प्रजामेका जिन्वति २। ऊर्जमेका रक्षति २। जिन्वतीत्येतत्पदं न निहन्यते। तयोरन्यः पिप्पलं स्वाद्वत्ति। अनश्नन्नन्यो अभिचाकशीति। अत्तीत्येतत्पदं न निहन्यते। समर्थाभ्यामिति किम्। एको देवानुपातिष्ठत्। एक इति संख्यापदमेतद् अन्यार्थे न वर्त्तते। एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणं व्यभिचारित्वात्तस्य॥

यद्वृत्तान्नित्यम ॥ ६६ ॥

प्रथमा छन्दसीति निवृत्तं,निघातप्रतिषेध इत्येव। यदो वृत्तं तद्वृत्तं, यत्र पदे यद्वर्त्तते तत्सर्वं यद्वृत्तम्। इह वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्। डतरडतमौ च प्रत्ययौ इत्येतन्नाश्रीयते। तस्माद्यद्वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम्। यो भुङ्क्ते। यं भोजयति। येन भुङ्क्ते। यस्मै ददाति। यत्कामास्ते जुहुमः। यद्यङ् वायुर्वाति। यद्वायुः पवते॥ पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते॥ यथाकाम्ये वेति वक्तव्यम्॥ *॥ यत्र क्व चन यजन्ते *॥

पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥ ६७ ॥

पूजनेभ्यः काष्ठादिभ्य उत्तरपदं पूजितमनुदात्तं भवति। काष्ठ। काष्ठाध्यापकः। काष्ठाभिरूपकः। दारुण। दारुणाध्यापकः। दारुणाभिरूपकः। अमातापुत्र। अमातापुत्राध्यापकः। अयुत। अयुताभिरूपकः। अयुताध्यापकः। अद्भुत। अद्भुताध्यापकः। अनुक्त। अनुक्ताध्यापकः। भृश। भृशाध्यापकः। घोर। घोराध्यापकः। परम। परमाध्यापकः। सु। स्वध्यापकः। अति। अत्यध्यापकः॥ मलोपश्च॥ *॥ इति वार्त्तिककारमतम्॥† मयूरव्यंसकादित्वात्समासः। समासे चैतदनुदात्तत्वम्॥ समासान्तोदात्तत्वापवाद इष्यते॥ दारुणमध्यापक इत्येवमादिषु न भवति। मलोपश्चेत्यनेनाप्ययमेव विषय आख्यायते। यत्र विभद्विषु न भवति।

---

* एकस्मिन्पुस्तके यथाकाम्ये इत्यारभ्य यजन्ते इत्यन्तं नास्ति।

† अनुज्ञात। अनुज्ञाताध्यापकः। कल्याण। कल्याणाध्यापकः। वेश। वेशाध्यापकः। इत्यधिकं पुस्तकान्तरे।

Digitized by Google

त्कारभावान्मकारो न श्रूयते तथानुदात्तत्वमिति । असमासे हि मलोपो नैवेष्यते । दारुणमधीते दारुणमध्यापक इति । पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम् । एतदेव ज्ञापकमिह प्रकरणे पञ्चमीनिर्देशेऽपि नानन्तर्यमाश्रीयत इति । तथा च यद्वृत्तान्नित्यमित्यत्रोदाहृतम् । अनुदात्तमिति वर्त्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम् ॥

सगतिरपि तिङ् ॥ ६८ ॥

सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्यः परं पूजितं तिङन्तमनुदात्तं भवति । यत्काष्ठं पचति । यत्काष्ठं प्रपचति । यद्दारुणं पचति । यद्दारुणं प्रपचति । तिङ्ङतिङ इति निघातस्य निपातैर्यद्यदिहन्तेति प्रतिषेधे प्राप्ते पुनर्विधानम् । सगतिग्रहणाच्च गतिरपि निहन्यते ॥ गतिग्रहणे चात्र उपसर्गग्रहणमिष्यते ॥ इह न भवति । यत्काष्ठं शुक्लीकरोति । यत्काष्ठं कृष्णीकरोति ॥

कुत्सने च सुप्यगोत्रादौ ॥ ६९ ॥

पदादिति निवृत्तम् । सगतिरपि तिङिति वर्त्तते । कुत्सने च सुबन्ते गोत्रादिविवर्जिते परतः सगतिरपि तिङ् अगतिरप्यनुदात्तो भवति । पचति पूति । प्रपचति पूति । पचति मिथ्या । प्रपचति मिथ्या । कुत्सन इति किम् । पचति शोभनम् । सुपीति किम् । पचति क्लिश्नाति । अगोत्रादाविति किम् । पचति गोत्रम् । पचति ब्रुवम् । पचति प्रवचनम् ॥ क्रियाकुत्सन इति वक्तव्यम् ॥ * ॥ कर्त्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः । प्रपचति पूतिः ॥ पूतिश्च चानुबन्धो भवतीति वक्तव्यम् ॥ * ॥ तेनायं चकारानुबन्धकत्वादन्तोदात्तो भवति ॥ विभाषितं चापि बह्वर्थमनुदात्तं भवतीति वक्तव्यम् ॥ * ॥ पचन्ति पूति २ । प्रपचन्ति पूति २ ।

सुपि कुत्सने क्रियाया मलोप इष्टोऽनिडीति चोक्तार्थे ।
पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ॥

गतिर्गतौ ॥ ७० ॥

गतिर्गतौ परतोऽनुदात्तो भवति । अभ्युद्धरति । समुदानयति ।

अभिसंपर्याहरति । गतिरिति किम् । देवदत्तः प्रपचति । गताविति किम् । आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ॥ याहीत्येतत्प्रति क्रियायोगाद्वाहित्येव गतिः । तस्य गतावित्येतस्मिन्नसति गतिरित्यनाश्रितपरनिमित्तकमनुदात्तत्वं स्यात् ॥

तिङि चोदात्तवति ॥ ७१ ॥

गतिरिति वर्त्तते । तिङन्ते ऽनुदात्तवति परतो गतिरनुदात्तो भवति । यत्प्रपचति । यत्करोति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् । अन्यथा हि यं प्रति गतिस्तत्रानुदात्तो भवतीति धातावेवोदात्तवति स्यात् । प्रत्यये न स्यात् । यत्प्रकरोतीति । यत्क्रियायुक्ताः प्रादयस्तेषां तं प्रति गत्युपसर्गसंज्ञे भवत इति तिङन्ते धातुमेव प्रति गतिसंज्ञा । आमन्ते तर्हि न प्राप्नोति । प्रपचतितराम् । प्रपचतितमामिति । अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति । तेषामव्ययपूर्वपदप्रकृतिस्वरत्वे सत्यक्रियमाणेपि तिङ्ग्रहणे परमनुदात्तवद्भवतीति गतिनिघातो नैव सिद्ध्यति । अथ तरबन्तस्य गतिसमास एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेरनुदात्तं पदमेकवर्जमित्येवानुदात्तत्वं सिद्धम् । येषां गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेरित्यनेन वचनेन कृदन्तेनैव प्राक्सुबुत्पत्तेः समासो भवति नान्येनेति दर्शनम्, तेषामेवंविधे विषये समासेन नैव भवितव्यमिति । पृथक् स्वरप्रवृत्तौ सत्यामनेन निघातेन प्रयोजनमस्ति । तदर्थं यत्नः कर्त्तव्यः । उदात्तवतीति किम् । प्रपचति । प्रकरोति ॥

आमन्त्रितं पूर्वमविद्यमानवत् ॥ ७२ ॥

आमन्त्रितं पूर्वमविद्यमानवद्भवति, तस्मिन्सति यत्कार्यं तन्न भवति । असति यत्तद्भवति । कानि पुनरविद्यमानवत्त्वे प्रयोजनानि । आमन्त्रिततिङ्निघातयुष्मदस्मदादेशाभावाः । देवदत्त यज्ञदत्तेत्यत्रामन्त्रितस्य पदात्परस्येति निघातो न भवति । षाष्ठिकामन्त्रिताद्युदात्तत्वं भवति । देवदत्त पचसीत्यत्र तिङ्ङतिङ इति निघातो न भवति । देवदत्त तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वमित्येवमादिषु युष्मदस्मदादेशा न भवन्ति ।

पूजायामनन्तरप्रतिषेधः प्रयोजनम् । यावद्देवदत्त पचसीत्यत्रापि पूजायां नानन्तरमित्येव प्रतिषेधो भवति । जात्वपूर्वमित्येतद् देवदत्त जातु पचसीत्यत्रापि भवति । आहो उताहो चानन्तरमिति आहो देवदत्त पचसि उताहो देवदत्त पचसीत्यत्रापि भवति । आम एकान्तरमामन्त्रितमनन्तिक इति आम् भो पचसि देवदत्त इत्यत्रापि भवति । आमन्त्रितमिति किम् । देवदत्तः पचति । पूर्वमिति किम् । देवदत्त इत्येतस्यामन्त्रितानुदात्तत्वे कर्त्तव्ये नाविद्यमानवद्भवति । पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्ते ऽन्यनिमित्ते वा तदविद्यमानवद्भवति, न तु स्वकार्ये । देवदत्त पचसीत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव । इह इमं मे गङ्गे यमुने इति गङ्गे शब्दः पूर्वमामन्त्रितं ततः परस्य यमुनेशब्दस्यानुदात्तत्वे कर्त्तव्ये स्वयमविद्यमानवत्त्वान्निमित्तं न भवति । मेशब्दस्य निमित्तभावं न प्रतिबध्नाति ॥

नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥ ७३ ॥

अविद्यमानवत्त्वस्य प्रतिषेधः । आमन्त्रितान्ते समानाधिकरणे परतः पूर्वमामन्त्रितान्तं सामान्यवचनं नाविद्यमानवद्भवति । किं तर्हि विद्यमानवदेव । अग्ने गृहपते । माणवक जटिलकाध्यापक । पूर्वस्य विद्यमानवत्त्वात्परमनुदात्तमेव भवति । आमन्त्रितमिति किम् । देवदत्त पचसि । समानाधिकरण इति किम् । देवदत्त पण्डित यज्ञदत्त । अत्र यज्ञदत्त विशेषणं पण्डितशब्दः । न पूर्वेण समानाधिकरणः । सामान्यवचनमिति किम् । पर्यायेषु मा भूत् । अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये । पर्यायशब्दा एते । एवं ह्युक्तमेतानि ह्यघ्न्ये नामानीति ॥

विभाषितं विशेषवचने बहुवचनम् ॥ ७४ ॥

पूर्वेणाविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते । विशेषवचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितमविद्यमानवद्भवति । देवाः शरण्याः २ । ब्राह्मणा वैयाकरणाः २ । सामान्यवचनाधिकारादेव विशेषवचनइति सिद्धे विशेषवचनग्रहणं विस्प-

Digitized by Google

ष्ठार्थम् । बहुवचनमिति किम् । माषवक जटिलक । नित्यमेतद्विज्ञ-मानवद्देव ॥

इति श्रीकाशिकायां वृत्तावष्टमस्याध्यायस्य प्रथमः पादः ॥

काशिकायाः

अष्टमस्याध्यायस्य द्वितीयः पादः ।

पूर्वत्रासिद्धम् ॥ १ ॥

पूर्वत्रासिद्धमित्यधिकार आ अध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः पूर्वत्रासिद्धमित्येवं तद्वेदितव्यम्। तत्र येयं सपादसप्ताध्यायनुक्रान्ता एतस्यामयं पादोनो ऽध्यायो ऽसिद्धो भवति। इत उत्तरं चोत्तरोत्तरो योगः पूर्वत्रपूर्वत्रासिद्धो भवति। असिद्धवद्भवति *। सिद्धकार्यं न करोतीत्यर्थः। तदेतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थं उत्सर्गलक्षणभावार्थं च। अस्मा उद्धर। द्वा अत्र। द्वा आनय। असा आदित्यः। इत्यत्र य्वलोपस्यासिद्धत्वाद् आद्गुण इत्यकः सवर्णे दीर्घ इति च न भवति। अमुष्मै। अमुष्मात्। अमुष्मिन्। इति उत्वस्यासिद्धत्वात् स्मायादयो भवन्ति।

शुष्किका शुष्कजङ्घा च क्षामिमानोजठस्तथा।
मतोर्वत्वे फलं अत्वं गुडलिण्माचिदर्शनम् ॥

शुष्किकेत्यत्र शुषः क इत्यस्यासिद्धत्वाद् उदीचामातः स्थाने यकपूर्वाया इत्येतन्न भवति। शुष्कजङ्घा इति न कोपधाया इति पुंवद्भावप्रतिषेधो न भवति। क्षामिमानिति क्षामस्यापत्यं क्षामिः, क्षामो वा अस्यास्तीति क्षामी। क्षामिः क्षामी वा यस्यास्तीति क्षामिमान्। क्षायो म इत्यस्यासिद्धत्वान्मादुपधायाश्चेति वत्वं न भवति। औजढदिति वहेर्णिच्छायामूढस्तमाख्यदिति णिच् तदन्ताल्लुङ्। चङीति द्विर्वचने कर्त्तव्ये ढ

* असिद्धवद्भवतीति पुस्तकान्तरे नास्ति

त्वधत्वष्टुत्वढलोपानामसिद्धत्वाण्णो च यष्टिनोपस्तस्य स्थानिवद्भावाद् हतइत्येतद् द्विरुच्यते । अनाल्लोपइति प्रतिषेधात्सन्वदित्त्वं नास्ति । तेन ओजढदिति भवति । ओजिढदित्येतत्तु क्विबन्तस्य ऊढशब्दस्य भवति । गुडलिण्मानिति गुडलिहोऽस्य सन्ति इति मतुप् तत्र ढत्वजश्त्वयोरसिद्धत्वाद् झय इति वत्वं न भवति । येत्र षष्ठीनिर्द्दिष्टाः सप्तमीनिर्द्दिष्टाः पञ्चमीनिर्द्दिष्टाश्च तेषां षष्ठी स्थानेयोगा तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्येति च कर्त्तव्ये नासिद्धत्वं भवति । कार्यकालं हि संज्ञा परिभाषमिति पूर्वत्वमासां परिभाषाणां नास्तीति । विप्रतिषेधे परमित्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह स्पर्द्धते परं लक्षणं तत्प्रति तस्यासिद्धत्वाच्च प्रवर्त्तते । तथा च सति विस्फोर्यमवगोर्यमिति गुणः परेण र्हलिचेति दीर्घत्वेन न बाध्यते । अपवादस्य तु परस्यापि उत्सर्गे कर्त्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति । तेन दोग्धा दोग्धुमित्यत्र घत्वस्यासिद्धत्वाद् होढ इति न भवति ॥

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥ २ ॥

नलोपः पूर्वत्रासिद्धो भवति सुब्विधौ स्वरविधौ संज्ञाविधौ तुग्विधौ च कृति । विधिशब्दोयं प्रत्येकमभिसंबध्यमानः स्वरसंज्ञातुक्कां विधेयत्वात्तैः कर्मषष्ठीयुक्तैर्भावसाधनो ऽभिसंबध्यते । सुपा तु संबन्धसामान्यवचनषष्ठ्यन्तेन कर्मसाधनः । तेन सुपः स्थाने यो विधिः सुपि च परभूते सर्वोसौ सुब्विधिरिति सर्वत्रासिद्धत्वं भवति । सुब्विधौ तावत् । राजभिः, तक्षभिरित्यत्र नलोपस्यासिद्धत्वादतोभिस ऐसिति न भवति । राजभ्याम्, तक्षभ्याम्, राजसु, तक्षस्विति, सुपि चेति बहुवचने झल्येदिति दीर्घत्वमेत्वं च न भवति । स्वरविधौ । राजवतीत्यत्र नलोपस्यासिद्धत्वादन्तोवत्या इति न भवति । पञ्चार्मं, दशार्ममिति । अत्र नलोपस्यासिद्धत्वाद् अर्मे चावर्णं द्व्यच्त्र्यजिति पूर्वपदस्याद्युदात्तत्वं न भवति । पञ्चतक्षीत्यत्र नलोपस्यासिद्धत्वादिगन्ते द्विगाविति पूर्वपदप्रकृतिस्वरो न भवति । संज्ञाविधौ । पञ्च ब्राह्मण्यो दश ब्राह्मण्य इति नलोपस्यासिद्धत्वाद् ष्णान्ताषडिति षट्संज्ञा भवति । ततश्च न षट्स्वस्रा-

विभ्य इति डापः प्रतिषेधो भवति । तदेतत्कथं प्रयोजनं भवति । यदि प्रतिकार्यं संज्ञाप्रवृत्तिरित्येतद्दर्शनम् । या हि जश्शसोर्लुगर्थो षट्संज्ञा प्रवृत्ता तया स्त्रीप्रत्ययप्रतिषेधो न क्रियत इति सा पुनः प्रवर्त्तयितव्येति । तुग्विधौ । वृत्रहभ्यां, वृत्रहभिरिति नलोपस्यासिद्धत्वाद् ह्रस्वस्य पिति कृति तुगिति तुग्न भवति । अत्र के चित्संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति तुकं प्रति नलोपस्यानिमित्तत्वाद्बहिरङ्गलक्षणेन वा ऽसिद्धत्वात्तुग्विधिग्रहणमनर्थकमिति प्रतिपन्नाः, तत्तु क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुम् । कृतीति किम् । वृत्रहच्छत्रम् । वृत्रहच्छाया । छे चेति तुग्भवति । अत्र सिद्धे सत्यारम्भो नियमार्थः । एतेष्वेव नलोपो ऽसिद्धो भवति नान्यत्र । तेन राजीयति राजायते राजाश्व इति ईत्वं दीर्घत्वमेकादेशश्च सिद्धो भवति ॥

न मु ने ॥ ३ ॥

मुभावो नाभावे कर्त्तव्ये नासिद्धो भवति । किं तर्हि सिद्ध एव । अमुना । मुभावस्यासिद्धत्वात् घिलक्षणो नाभावो न स्यात् । कृते तु नाभावे मुभावस्यासिद्धत्वात्सुपि चेति दीर्घत्वं यत्प्राप्नोति तत्संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । अथ वा योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम् । अथ वा ने परतो यत्प्राप्नोति तस्मिन्कर्त्तव्ये मुभावो नासिद्ध इत्येष एवात्र सूत्रार्थः । ने तु कर्त्तव्ये मुभावस्य यत्सिद्धत्वं तदर्थतो गृहीतम् । तेनात्र मुभावस्य सिद्धत्वान्नाभावश्च भवति । दीर्घत्वं च न भवति ॥ एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः ॥ * ॥ किं प्रयोजनम् । अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् । वृक्षइदं, प्लक्षइदम् । अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः स एकादेश उदात्तेनोदात्त इत्युदात्तः तस्य सिद्धत्वं वक्तव्यम् । आन्तर्यतः अयादेश उदात्तो यथा स्यात् । आय् । कुमार्या इदम् । कथमिदमुदाहरणम् । यदि उदात्तयणो हल्पूर्वादित्युदात्तत्वे कृते विभक्तेराटश्चैकादेशस्तदा भवतीदमुदाहरणम् । इह कृते एकादेशे उदात्तयणो हल्पूर्वादिति स्वरस्तदा नैतदस्य प्रयोजनं भवति । आव् । वृक्षाविदं, प्लक्षा-

विदम् । एकादेशस्वरः । गाङ्गे ऽनूप इति गाङ्गे शब्दे एकार एकादेश उदात्तेनोदात्त इत्युदात्तः तस्य सिद्धत्वाद् यः पुनरेङः पदान्तादतीति एकादेशः स एकादेश उदात्तेनोदात्त इति, स्वरितो वाऽनुदात्ते पदादाविति, एतद्भवति । शतृस्वरः । तुदती । तुदते । अदुपदेशादिति लसार्वधातुकानुदात्तत्वे कृते एकादेशः तदुदात्तस्य सिद्धत्वात् शतुरनुमो नद्यजादी अन्तोदात्तादिति एष स्वरो भवति । अनुम इति प्रतिषेधो ज्ञापकम् । एकादेशस्वरः शतृस्वरे सिद्ध इति । नहि सनुकं शत्रन्तं किं चिदेकादेशस्वरमन्तरेणान्तोदात्तमस्ति । एकाननुदात्तः । तुदन्ति । लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद् अनुदात्तं पदमेकवर्जमिति वर्ज्यमानता भवति । सर्वानुदात्तः । ब्राह्मणास्तुदन्ति । ब्राह्मणा लिखन्ति । एकादेशस्वरस्य सिद्धत्वाद् कृते तस्मिंस्तिङ्ङतिङ इति निघातो भवति । अन्तरङ्ग इति वचनाद्बहिरङ्गस्यासिद्धत्वमेव । पचतीति । प्रपचतीति ॥ संयोगान्तस्य लोपो रोरुत्वे सिद्धो वक्तव्यः ॥ * ॥ किं प्रयोजनम् । हरिवो मेदिनं त्वा । हरिव इति मतुबन्तमेतत् । तत्र छन्दसीर इति वत्वे संयोगान्तस्य लोपे च कृते मतुवसो रु संबुद्धौ छन्दसीति रुत्वम् । तस्य संयोगान्तस्य लोपस्यासिद्धत्वाद्धशि चेत्युत्वं न प्राप्नोति ॥ सिज्लोप एकादेशे सिद्धो वक्तव्यः ॥ * ॥ अलावीत् । अपावीत् । इट ईटीति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घत्वं भवति ॥ निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः ॥ * ॥ वृक्णः । वृक्णवान् । निष्ठादेशस्य सिद्धत्वाद् झलीति षत्वं न भवति । कुत्वं प्रत्यसिद्ध एवेति तद्भवति । स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाह्रियते । तत्र च निपातनमनेकधा समाश्रीयते । यदा क्षीबेर्निष्ठायामिटि कृते इत्शब्दलोपो निपात्यते । तदा क्षीब इति संज्ञायामीत्शब्दलोपस्यासिद्धत्वान्निष्ठा च द्व्यजनादित्येष स्वरो न प्राप्नोति । क्षीबेन तरति क्षैबिक इति द्व्यज्लक्षणष्ठन् प्राप्नोति । यदा तु तकारलोपो निपात्यते तदा तस्यासिद्धत्वादिडागमः प्राप्नोति ॥ प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः ॥ * ॥ अग्ना३इच्छत्रम् । पटा३उच्छत्रम् । प्लुतविकारस्यासिद्धत्वाच्छे चेति ह्रस्वलक्षणस्तुङ्नित्यं न प्राप्नोति ॥ श्चुत्वं धुटि सिद्धं वक्तव्यम् ॥ * ॥ श्च्युतिर् [illegible]

धातुः सकारादिः पठ्यते तस्य श्चुत्वस्यासिद्धत्वात् अट्श्च्योतति रट्श्च्योतति इति ङः सि धुट् इति प्राप्नोति । अटतीत्यड् । रटतीति रड् । क्विबन्तोयम् । किमर्थं पुनः सकारादिः पठ्यते । इह मधु श्च्योततीति मधुश्च्युत् क्विबन्तः । मधुश्च्युतमाचष्टे इति णिच् । मधुश्च्ययति । मधुश्च्ययतेः पुनः क्विपि कृते संयोगादिलोपस्यात्सलोपः संयोगान्तलोपस्त्वात् यलोपः चकारस्य कुत्वं मधुगिति सिद्धम् । शकारादौ पुनरेतस्मिन्संयोगान्तलोपेन यकारचकारयोर्लुप्तयोः शकारस्य षत्वे सति मधुडिति स्यात् ॥ अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये ॥ * ॥ बभणतुः । बभणुः । अभ्यासजश्त्वस्यासिद्धत्वादनादेशादेरित्येत्वं प्राप्नोति । छिदेः, चिच्छित्सति, उच्छेः, उचिच्छिषतीति अभ्यासादेशस्यासिद्धत्वात् छे चेति तुक् प्राप्नोति । द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् ॥ * ॥ सय्य्यन्ता, सव्व्वत्सरः यल्ल्लोकम्, तल्ल्लोकमिति परसवर्णस्यासिद्धत्वादचर इति द्विर्वचनं न स्यात् ॥ पदाधिकारश्चेल्लत्वठत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि ॥ * ॥ लत्वम् । गलो गलः । गरो गरः । घत्वं, द्रोग्धा २ । ढत्वं, द्रोढा २ । नत्वं, नुन्नो नुत्तः । रुत्वम्, अभिनोभिनः । अभिनदभिनत् । षत्वम् । मातुष्ष्वसा २ । मातुःस्वसा २ । णत्वं माषवापाणि २ । माषवापानि २ । अनुनासिक । वाङ्नयनम् २ । वाग्नयनम् २ । छत्वं । वाक्छयनम् २ । वाक्शयनम् २ । लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद्विकल्पे सति गरोगलः गलोगरः इत्येवं रूपमपि द्विरुक्तं स्यात् । तदेतत्सर्वं न मु ने इति योगविभागेन साध्यते । न इत्येतावदनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थम् । ततो मु ने इति । नेत्येतदनुवर्त्तते ॥

उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य ॥ ४ ॥

उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशो भवति । उदात्तयणः । कुमार्यै । कुमार्यः । उदात्तनिवृत्तिस्वरेणायमीकार उदात्तः, तस्य स्थाने यणादेशः स उदात्तयण्, तस्मात्परस्यानुदात्तस्य

स्वरित आदेशो भवति । स्वरितयणः । सकल्ल्व्याशा । खलप्व्याशा । सकलूः, खलपूरिति कृत्स्वरेणान्तोदात्तौ, तयोरोः सुपीति यणादेशः स उदात्तयण् ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य यणादेशः स्वरितयण्, तस्मात्स्वरितयणः परस्याशाशब्दाकारस्यानुदात्तस्य स्वरितो भवति । ननु च सप्तम्येकवचनस्य यदुदात्तयण इति स्वरितत्वं तदसिद्धं यणादेशे । तत्कथमयं स्वरितयण् भवति । आश्रयात् सिद्धत्वं भविष्यति । यद्येवमुदात्तादनुदात्तस्य स्वरित इति एतस्याप्याश्रयात्सिद्धत्वं प्राप्नोति । ततश्च दध्याशेत्यत्रापि स्वरितः स्यात् । तस्माद्यमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः । केचित्तु ब्रुवते उदात्तात्स्वरितयणोऽपि परस्यानुदात्तस्य स्वरितत्वं दृश्यते । तथा च तैत्तिरीयके शाखान्तरे पठ्यते । यास्ते विश्वाः समिधः सन्त्यग्ने इति । अग्ने इत्ययमकारः स्वरितः पठ्यते । तथा ब्राह्मणेऽपि दध्याश्नयतीत्याकारः स्वरितः पठ्यते इति । यथा तु वार्त्तिकं भाष्यं च तथा उदात्तात्स्वरितयणः परस्यानुदात्तस्यानेन स्वरितत्वं न भवतीति स्थितम् । तथा च भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते । सकल्ल्व्याशेत्युदात्तयण इत्येवस्वरितस्य सिद्धत्वात् । स्वरितयण्व्यवधानमव्यवधानमेव । स्वरविधौ व्यञ्जनमविद्यमानवदिति । तत्तु क्रियते, पूर्वस्मादपि विधौ स्थानिवद्भावाद् व्यवधानमस्ति । स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिध्यते इति । उदात्तस्वरितयोरिति किम् । वेद्री आशा, वेद्र्याशा । शार्ङ्गरव्याशा । अनुदात्तयणादेशोऽयम् । अनुदात्तस्येति किम् । कुमार्यत्र । किशोर्यत्र । अत्रेत्ययमाद्युदात्तो लित्स्वरेण ॥

एकादेश उदात्तेनोदात्तः ॥ ५ ॥

उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति । अनुदात्तस्येति वर्त्तते । अग्नी । वायू । वृक्षैः । प्लक्षैः । उदात्तेनेति किम् । पचन्ति । यजन्ति । लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः । पररूपे कर्त्तव्ये स्वरितस्यासिद्धत्वात् ॥

स्वरितो वा ऽनुदात्ते पदादौ ॥ ६ ॥

अनुदात्ते पदादौ उदात्तेन सह य एकादेशः स स्वरितो वा भवत्युदात्तो वा । सुउत्थितः । सूत्थितः । वि ईक्षते । वीक्षते । वसुकः असि । वसुकोसि । सूत्थित इति सुशब्दः सुः पूजायामिति कर्म्मप्रवचनीयः, तस्य प्रादित्वात्समासे सति अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तः, शेषमनुदात्तमिति चानुदात्ते पदादावेकादेशो भवति । वीक्षते । वसुकोसीति । अत्रापि तिङ्ङतिङ इति निघाते कृते ऽनुदात्ते पदादावेकादेशः । स्वरितग्रहणं विस्पष्टार्थम् । उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यतीति । अनुदात्त इति किम् । देवद्र्यङ्च । पदादाविति किम् । वृक्षौ । वृक्षाः ॥

नलोपः प्रातिपदिकान्तस्य ॥ ७ ॥

पदस्येति वर्त्तते । प्रातिपदिकस्य पदस्य योन्त्यो नकारस्तस्य लोपो भवति । राजा । राजभ्याम् । राजभिः । राजता । राजतरः । राजतमः । प्रातिपदिकग्रहणं किम् । अहन्नहिम् । अन्तग्रहणं किम् । राजा । राजानौ । राजानः । प्रातिपदिकग्रहणमसमस्तमेव सुपां सुलुगिति षष्ठ्या लुका निर्दिष्टम् ॥ अह्नो नलोपप्रतिषेधो वक्तव्यः ॥ * ॥ अहः । अहोभ्याम् । अहोभिः । अहन् रोऽसुपीति रेफरुत्वयोरसिद्धत्वाद् नलोपः प्राप्नोति । सावकाशं तदुभयं संबुद्धौ । हे ऽहः । हे दीर्घाहो निदाघेति । तत्र समाधिमाहुः । अहन्निति रुविधौ यदुपादीयते प्रथमैकवचनान्तमकृतनलोपं तत्सम्भाव्यते, तत्रैकस्य ऽऽवृत्त्या तदेवं रूपं नलोपाभावार्थमन्वाख्यायते, द्वितीययापि तस्य रुर्विधीयते ॥

न ङिसंबुद्ध्योः ॥ ८ ॥

ङौ परतः संबुद्धौ च नकारलोपो न भवति । आर्द्रे चर्म्मन् । लोहिते चर्मन् । सुपां सुलुगिति ङेर्लुक् । संबुद्धौ । हे राजन् । हे तक्षन् । अस्मादेव नलोपप्रतिषेधवचनादप्रत्यय इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यते इति ज्ञाप्यते । भसंज्ञा च न भवतीति । तथा हि राज्ञः पुरुषो राजपुरुष इति । अत्र नलोपश्च भवति । अल्लोपश्च न भवति ॥ ङावुत्त-

रपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः ॥ * ॥ चर्मणि तिला यस्य चर्मतिलः । हे राजवृन्दारक इत्यत्र समुदायार्थे संबोधनं न पूर्वपदार्थसंबोधनं प्रतीयतइति संबुद्ध्यन्तं पूर्वपदं नैव समस्यते ॥ वा नपुंसकानामिति वक्तव्यम् ॥ * ॥ हे चर्मन् । हे चर्म ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तदशस्तबकावशेषः ॥

अथ सुदृशां निःश्वसनश्वसन एव मन्दोष्णो दोष्णोरन्तरतरलमपि हारं हा-रंहसा म्लापयन्नाप यन्नासाविवरतो वरतोदकत्वेनाधरदलदलनकारितां तन्नातिचित्रम् ॥ १३२ ॥

निःश्वसनश्वसनो निश्वासवातः, हा विषादे, रंहसा हारं म्लापयन्, अधरदलस्य दलनकारितां यत् आप प्राप्तः, नासाविवरतः सकाशात् ॥ १३२ ॥

चित्रं खल्विदमेव यदुपरतवदनानां सुवदनानां तासां सुखविगमधूसरसरसीरुहाकृतीनां वदनबिम्बानां गलितेष्विव नवलावण्यामृतरसेषु सविशेषं शेषं नासाग्रजाग्रदवस्थं तद्विन्दुविशेषमिव बीजत्वेन स्थिततयेव न निपतन्तं मौक्तिकमणिमनवरतं निपतन्तोऽपि कज्जलाविला बिन्दवो नयनवारां वारान्तरसंपत्तिप्रतिपादनाय न मलिनयांबभूवुः ॥ १३३ ॥

तासां वदनबिम्बानां नवलावण्यामृतरसेषु गलितेष्विव सत्सु अनवरतं निपतन्तोऽपि कज्जलाविला नयनवारां बिन्दवो नासाग्रजाग्रदवस्थं मौक्तिकमणिं न मलिनयांचक्रुरित्यन्वयः । उपरतवदनानां त्यक्तकथनानाम् । मौक्तिकं कीदृशमिव, तेषां लावण्यामृतरसानां बिन्दुविशेषमिव । शेषम् अद्वितीयम् । सविशेषमिति अल्पापि हानिस्तस्य न जातेति भावः । कथमिति चेत् तत्र उत्प्रेक्षमाणो विशिनष्टि बीजेति, श्रीकृष्णम-

न्वहासानन्तरं युगपदेवोत्पत्स्यमानानां लावण्यामृतरसानां बीजत्वेऽपि न स्थितया हेतुनैव न निपतन्तम्, यद्यसावपतिष्यत् तदा ते नोदपत्स्यन्तेति भावः, अत एवाह वारान्तरेति, अत्र निःश्वासपवनोऽधरदलं यन्मलिनयांचकार तत्रातिचित्रं, सकज्जलाश्रुबिन्दवो मौक्तिकमणिं यत्र मलिनयांबभूवुश्चित्रं खल्वेतदेवेति वाक्यार्थयोजना ॥ १३३ ॥

एवं सति निजनिजप्रकृतिकृतिवैचित्र्येण विविधविवक्षया पिपक्षयापि परमामर्षादेर्विविधहृद्विकारकारणं विविधश्रियः सर्वा एव बभूवुः ॥ १३४ ॥

प्रकृतिर्वाम्यदाक्षिण्यादिस्वभावः, कृतिस्तदनुरूपा चेष्टा । परमामर्षादेः प्रणयसंरम्भविषाददैन्यादेः पिपक्षया पक्तुमिच्छया, तान् परिणामविशेषं प्रापयितुमिच्छयेत्यर्थः, तण्डुलान् पिपक्षतीतिवत् । विविधहृद्विकारनिमित्तं विविधा एव श्रियः शोभा यासां ताः, "हेत्वर्थप्रयोगे सर्वविभक्तीनां प्रायदर्शन"मिति प्रथमा ॥ १३४ ॥

तथाहि काश्चन ।

मुखामोदोन्मत्तैर्मधुरकलझङ्कारकलया
स्वयं तानेवार्थानिव समनुकुर्वद्भिरलिभिः ।
दिशः श्यामाकारा नयनविगलत्कज्जलजल-
च्छटाभैः कुर्वत्यः सगदमगदन् गद्गदगिरः ॥ १३५ ॥

काश्चन मुखामोदेति, स्वसुहृत्सख्याः स्वयूथेश्वर्याश्च दुःखेन दुःखिन्यो दयितमृद्वी भद्राशैव्याप्रायाः, सगदं सामयं यथा स्यात् तथा ॥ १३५ ॥

काश्चन ।

स्तबकैरतिदन्तकान्तभासां
भ्रमरैश्चाननगन्धनिर्भरान्धैः ।

पुरतस्तिलकप्रसूनायमानं
विदधत्यो मधुनाङ्कुलं जजल्पुः ॥ १३६

काञ्चन स्तबकेति दन्तप्रकाशेन पूर्वतो वैशिष्ट्यात् स्पष्टभाषिण्यः, इमा दक्षिणाः प्रखराः पद्माप्रभृतयो ज्ञेयाः ॥ १३६ ॥

काश्चन ।

अनुरागरसेन रञ्जितं
स्वरशब्दार्थविशेषपूजितम् ।
मृदु मञ्जु गिरामधीश्वरी-
रसनागोचरमूचिरे वचः ॥ १३७ ॥

काश्चन० अनुरागेति, भावणे चातुर्योदयान्मध्यास्वव्यक्तया तस्मादेव स्ववाम्यस्याप्यवहित्थया वाममध्या विशाखादय इमाः, गिरामधीश्वरी सरस्वती तस्या एव जिह्वागोचरं वच इति, सैव तादृशं वक्तुं जानाति नान्या कापीति भावः ॥ १३७ ॥

काश्चन ।

अतिचञ्चललोचनाञ्चलाभि-
र्वियतीन्दीवरकाननं सृजन्त्यः ।
किरणैरपि पुण्डरीकखण्डं
दशनानां परुषा रुषा समूचुः ॥ १३८ ॥

काश्चन० अतिचञ्चलेति, रोषादस्याल्पकटाक्षाणामपीन्दीवरत्वं, स्वसखीभिर्यत्कटाक्षतर्जनमदृष्ट्या भद्रमुचितमेव क्रियत इत्यनुमोदनेनान्तःप्रसादोदयात्, बहिस्तु रुषा भाषणे पारुष्यमिति यथायोगं वाम्यप्राखर्याभ्यां युक्ताः, श्रीराधादिसख्य इमाः ॥ १३८ ॥

मदशोणकटाक्षवीक्षणैः
कुटिलभ्रूलतिकाविकाशिभिः ।

घनघर्मपय:कणानना:
कतमा माधवमाबभाषिरे ॥ १३८ ॥

मदंशेनेति, सौभाग्याधिक्येन मदीयतामयभावाहतिबाम्योद-यात् अतिरोषवत्य: श्रीराधाश्यामाललितादय आबभाषिरे। अत्राह ऐ-श्वर्यसम्पत्तत्त्वाभ्यामर्थाभ्यां मध्यात्वप्राखर्ये अपि यथायथमवसेये ॥ १३९ ॥

काश्चन ।

विनयानुनयानुरागलक्ष्मी-
परभागैः समभागभागधेया: ।
जगदुर्मृदुगद्गदस्वरेण
प्रथितोत्कण्ठमकुण्ठिता: सुकण्ठ्य: ॥ १४० ॥

काश्चन विनयेति, तदीयतामयभाववत्यो दक्षिणामृद्व्यश्चन्द्राव-ल्यादय:, विनयादीनां परभागैरुत्कर्षै: समभागं तुल्यमेव भागधेयं सौभाग्यं यासां ता:, यावन्त एव विनयाद्युत्कर्षास्तावन्त्येव सौभाग्यानीत्यर्थ: ॥ १४० ॥

केवलं नयनकज्जलाविलै-
रम्बुभि: स्नपितताम्रवक्षस: ।
स्वानुरागरभसानुसारिका
गद्गदं निजगदु: कुमारिका: ॥ १४१ ॥

केवलमिति, मुग्धात्वेन मृद्व्यो धन्यादय इमा अनूढा: ॥ १४१ ॥

एवं प्रतिप्रकृति विप्रकृतिविशेषतया या यथामनोऽभिमुक्तवत्यो-ऽसक्तवत्यो हृदयमथ कालकूटकुटिलेन दु:खेन तासां तथा तथावि-धेन क्रमेण प्रतिवचनरचनां निरूपयामहे ॥ १४२ ॥

प्रतिप्रकृति प्रकृत्या प्रकृत्या स्वस्वस्वभावेन या विशिष्टा: प्रकृतय: प्रकारास्ताभिरेव विशेषो यासां तत्तथा, मुक्तवत्यो सक्तवत्य: ॥ १४२ ॥

या महेन्द्रादिगुरुणाङ्गिरसेन गुरुणाङ्गिरसेन यथार्थतया कथयितुं न शक्यते ॥ १४३ ॥

आङ्गिरसेन बृहस्पतिना कथयितुं न शक्यते, किं पुनर्वर्णयितुमिति भावः। गुरुणा बृहता, अङ्गिरसेन अङ्गारेण, यथार्थतया औचित्येन ॥ १४३ ॥

अहो नः साहसं हसन्तु न सन्तो यदयमुपक्रमो रसज्ञा रसज्ञानमदकण्डूखण्डनाय नायमस्माकमपराधो यतः क्षुद्रोऽपि क्षुद्रोपितवैकल्योऽकल्योऽपि दुर्लभमिष्टमिष्टद्रव्यमभिलषति ॥ १४४ ॥

क्षुधा बुभुक्षया रोपितं वैकल्यं यस्य सः, अकल्योऽप्ययोग्योऽपि, यद्वा रोगयुक्तोऽपि, "कल्यो सज्जनिरामया" इत्यमरः ॥ १४४ ॥

तत्र तावत् प्रथमं प्रथमङ्गलावण्यं दधत्यः काश्चिदाहुः ॥ १४५ ॥

प्रथं ख्यातं, तादृशसंतापेऽपि कात्स्र्न्येनानपगमशीलत्वात् ॥ १४५ ॥

हा हन्त भो हृदहृणा परुषाक्षरेण
मेवं विषादयितुमर्हसि नो विशिष्य ।
संतर्पणाय भुवनस्य विधाय हर्षे
वर्षन्त्यहो घनरसं न विषं पयोदाः ॥ १४६ ॥

हृदहृणा हृदि· अहर्न्नणो यतस्तादृशेन परुषाक्षरेण ॥ १४६ ॥

किंच।

युक्तं न एतदधमुष्य समस्तबन्धू-
नन्धूपमान् यदममाम तवाङ्घ्रिमूलम् ।
वापीतडागसरिदादिपयो विहाय
वाञ्छा जले जलधरस्य हि चातकीनाम् ॥ १४७ ॥

एवं तस्यासमीक्ष्य कारित्वं प्रदर्श्य स्वेषां तु युक्तकारित्वमाहुः युः-

कर्मिति । अन्धूपमान् कूपतुल्यान् । चातकीनामित्यनेन स्वेषां भावस्य नैसर्गिकत्वस्तव्यत्वे एव न त्वौपाधिकत्वगर्हणीयत्वे इति व्यञ्जितम् ॥१४७॥

अपरा आहुः ।

सरोषहासपरिहासपेशलम् ।

पत्यपत्यसुहृदामनुवृत्ति-
धर्म इत्युपदिदेश भवान् यत् ।
अस्त्वसौ त्वयि गुरावुपदेशो
मादृशीषु पदमेष न धत्ताम् ॥ १४८ ॥

त्वयि गुरौ एष एव उपदेशोऽस्तु, रात्रौ निर्जनवने सुन्दरीजनानाकृष्य स्वयं गुरुः सन्नेवमेव धर्ममुपदिशन् सन् सदा वर्तस्वेत्यर्थः । ननु किं वक्रं परिहसथ, नहि नहीत्याहुः, मादृशीषु स्त्रीषु एष उपदेशः पदं न धत्तामिति, काकाः अपितु धत्तामेवेत्यर्थः । एतदर्थमेवागता वयम् इमं धर्मोपदेशं प्राप्य कृतार्था एवाभूमेति भावः । यद्वा स्पष्टमभिधयैवाहुः, त्वयि गुरौ सत्येव एष उपदेशोऽस्तु, नच तव गुरुत्वं नाप्यमस्माभिस्त्वं गुरुः क्रियसे, तव गोपजातित्वेन धर्मोपदेष्टृत्वानर्हत्वात्, अस्माकं च तत्र श्रद्धाराहित्यादिति भावः । ननु भो हठिन्यो मुनिवचनमेवानुवदामि, सत्यम्, मादृशीष्विति, मादृश्योऽनधिकारिण्य इति भावः । यद्वा त्वयि गुरौ एष उपदेशोऽस्तु, गुरुर्हि स्वयं धर्ममाचर्यैव अन्यांस्तत्र प्रवर्तयितुं शक्नोति, त्वया तु मोहिन्यवतारे कोऽपि पतिर्न कृतः, कृतादपि महेशात् पत्युरपत्यं न जनितं, नाप्यनुवृत्तिः कृतेति, अधुना तु तथैव तत् तत् क्रियतामिति भावः ॥ १४८ ॥

हन्त हन्तररातिसमूहस्य हस्यमानोऽयं तव व्याहारो ह्यारोपितो यदयमस्मासु कुतस्तरामपत्यमपत्यत्तपतिसङ्गागानां पतीनामपत्यमिति तत्पुरुषे पुरुषेश्वर न घटतेऽन्वयः. यतस्त्वदतिरिक्तोऽरिक्तोत्तमगुणरत्नाकर रत्नाकरतनयाराधितचरण नातः परः पतिरस्ति नारीणां नारीणां च हन्तान्यो मानवानाम् ॥ १४९ ॥

अरातिसमूहस्य हन्तरिति, केवलमसुरमारण एव तव रसिकत्वमिति भावः । हा. इति पीडायाम्, आरोपितः परिवाद एव दत्त इत्यर्थः । पत्नीनामपत्यमित्यन्यसपत्नीजातमित्यर्थः, अतो हेतोः परः पतिर्नास्तीति तत्त्वाप्रसक्तेः, मानसानां मनोजातानामाधिरूपाणामरीणामन्यो हन्ता न भवति । रत्नाकरतनया लक्ष्मीः सर्वनारीवर्गमुख्यापि नारायणस्य कान्तापि त्वामेव पतिं प्राप्तुं त्वच्चरणमाराधितवतीत्यर्थः, "यद्वाञ्छया श्रीर्ललनाचरत् तप" इत्यादेः । गोपराजनन्दनत्वेनैव कृष्णे प्राप्तनिष्ठानामपि तासामियं माहात्म्यस्फूर्तिः प्रेमकृतैव, प्रेमाद्यसदपि माहात्म्यं स्फोरयति किमुत सत्, ततश्च प्रेमातिशयस्तु माहात्म्यातिशयमेव, यथा आदिभरतचरित्रे "किंवा अरे आचरितं तपस्तपस्विन्या यदियमवनि"रित्यादिगद्ये स्वमृगपदस्पर्शेन पृथिव्या अपि भाग्यं वर्णितमिति, एष एव सिद्धान्तः सर्वत्राप्यनुवर्तयितव्य इति ॥ १४९ ॥

अन्या आहुः ।

कुर्वते त्वयि रतिं मतिभाजः
प्रेयसि त्रिभुवनात्मनि नित्ये ।
नार्तिदं त्वद्विनाशि भजन्ते
पत्यपत्यसुहृदादि कृतिन्यः ॥ १५० ॥

नित्ये इति जीवात्मा व्यावृत्तः ॥ १५० ॥

एषा हि साधुतमा धुतममया रीतिः सा मान्यानां सामान्यानां च विशेषतोऽशेषतो दहर मादृशां दृशां मनसामुद्भवो धवो भवानेव भवन्नमृतेऽमृतेऽपि नो जुगुप्सा ततः प्रसीद सीदतु नायममायमनुगतो गतोत्साहो जीवलोकनिकरः ॥ १५१ ॥

सा प्रसिद्धा एषा मान्यानाम् उत्तमानां सामान्यानां कनिष्ठानां च रीतिः धुतममया खण्डितमोहत्वा; उद्भव उत्सवरूपः, भवन्नमृते त्वां विना अमृते सुधायामपि नोऽस्माकं जुगुप्सा घृणा ॥ १५१ ॥

छिन्धि मा मामाशावकदशमुपचितां कमलिनीमिव हिमागमो मा-गमो म्लापयितुं नो जिजीविषाम् ॥ १५२ ॥

आशावकदशं बालदशामभिव्याप्य· उपचिताम्· आशां मा छिन्धि, कमलिनीं हिमागम इव नोऽस्माकं जिजीविषां म्लापयितुं मा गमः, मा प्राप्तो भवेत्यर्थः ॥ १५२ ॥

अपराश्चाहुः ।

चित्तमद्य भवतापहृतं नो
गम्यतां कथमहो बत घोषः ।
गच्छतो न च पदे पदमेकं
नाथ ते पदसरोरुहमूलात् ॥ १५३ ॥

भवता चित्तमपहृतमिति, अस्माकं को वा दोष इति भावः ॥ १५३ ॥

तेन ते न-वचो नवचोर वधूजनमानसस्य मानसस्यशोष-करावग्रहग्रहणायोग्यं भवितुमर्हति ॥ १५४ ॥

तेन हेतुना ते तव वचः· मान एव सस्यं तस्य शोषकरोऽवग्रहो वृष्टिप्रतिबन्धस्तद्ग्रहणायोग्यं न भवितुमर्हति, हे नवचोर ॥ १५४ ॥

इतरा अप्याहुः ।

मुच्यतां कपटकौतुकधूली
सिच्यतामधरबिम्बमधूली ।
क्रान्तिकारिपरुषोदितमूल:
शान्तिमेतु हृदि तापकुकूलः ॥ १५५ ॥

अधरबिम्बमधूली सिच्यतामिति, चैत्रे अलं सिच्यतामितिवत्, तापकुकूलः संतापतुषाग्निः ॥ १५५ ॥

अपरथा मनोरथा मनोजकृताः परितापकृशानुना कृशा-नु-नाशयित्वा न इमास्तनूरम्याः प्रापय्य प्रापयिष्यन्ति योऽखिद्यथानुतापमनुभवन्तं भवन्तम् ॥ १५६ ॥

मनोरथाः कर्त्तारः परिताप एव कृशानुरग्निस्तेन नोऽस्मान् कृशा नाशयित्वा नु निश्चितम्· अन्यास्तनूः प्रापय्य भवन्तं प्रापयिष्यन्ति, हन्त निर्व्याजसा· एता मां प्राप्ता एव· अहं तूपेक्षया स्त्रीवधभागी केवलमभूवमित्येवमनुतापमनुभविष्यसीत्यर्थः ॥ १५६ ॥

अस्माकं तूभयतो विरहभयतो विरह इति ॥ १५७ ॥

अस्माकमिति स्पष्टं, भङ्ग्या तु प्रेमप्रख्यापकोऽर्थः संभवति, स यथा, ननु स्वकृतं कष्टमहंकारिणः कष्टतया न मन्यन्ते,सत्यम्, अस्माकम्· उभयतः· अधुना स्वीकारे वा तदभावे वा पक्षे विरहरूपं यद्भयं तस्मात् तु विरहो विच्छेद एव, किंतु प्रेमहतकयस्तानामस्माकं हृदयं तत् त्वदीयं कष्टं सा त्वदीया दुष्कीर्तिर्वा बाधिष्यत एवेति तत्त्राणार्थमेव प्रार्थनेयमिति भावः ॥ १५७ ॥

अपराश्चाहुः ।

अस्तु धाम कमलोत्सवकन्दो
यर्हि बर्हदलभूष तवाङ्घ्री ।
तावदेव हि परस्य समक्षं
स्थातुमेव न वयं प्रभवामः ॥ १५८ ॥

कमले इव· उत्सवकन्दो· उत्सवसुखदातारौ ॥ १५८ ॥

तदिदं भवत्परपरभागमपरापरामृश्यं समानवयो नवयोषितां लवणिमाधुर्यं माधुर्यं स्वीक्रियताम् ॥ १५९ ॥

तत् तस्मात्· इदं नवयोषितां माधुर्यं स्वीक्रियतां, भवत्पर एव परभागः शोभा यस्य तत्, अपरैरन्यजनैरपरामृश्यं परामष्टुमशक्यं, समानं त्वत्तुल्यमेव वयो यत्र तत्, लवणिम्नाम्· आ सम्यग्धुर्यम्· आश्रयरूपम् ॥ १५९ ॥

लौकिकतापारमिता रमिता निजजनवृन्दावनप्रियेण वृन्दावनप्रियेण भवता वतान्तसंतापं नार्हन्ति ॥ १६० ॥

ननु लोकनिन्दा भविष्यतीति तत्राहुः । लौकिकतायाः पारम्-इताः प्राप्ताः, त्यक्तलोका इत्यर्थः । इयं प्रकटसंभोगप्रार्थना रसाभासत्वेन न पर्यापनीया[1] तस्याः प्रकृतिस्थनायिकामुखोत्थत्वेन तज्ज्ञैर्लक्षितत्वात्, अत एव मधुपानमत्ताया नायिकायाः प्रकृतिस्थत्वाभावे प्रत्युत सा गुण एवेत्युक्तम्, आसां पुनः प्रियतमोपेतावाग्वज्रविशीर्णसर्वमर्मणां महासंतापोन्मथितचित्ततया प्राप्तप्रकृतिविपर्ययाणां सेयमनुरागप्रख्यापनायैव उन्मादविवर्तरूपा, परमवाम्यव्रतीनामप्यासां मुखादेतच्छुश्रूषयेव रसिकेन्द्रेण तेन तथा व्यवसितमिति ॥ १६० ॥

अथ श्रुतिरूपा आहुः ।

वक्षसि स्थितवती च तुलस्याः
स्पर्धयेव कमला यमुपास्ते ।
अथ ते चरणपद्मपरागे
रागवान् निकर एष वधूनाम् ॥

अत एव प्रपन्नाः प्रपन्नार्तिहारक मास्मान् परिहार्षीः ॥ १६१ ॥

श्रुतिरूपा इत्यैश्वर्यज्ञानसंस्कारवत्यो दासिंमन्याः, सम्प्रति दैन्येन तु नितरामेवेति भावः । वक्षसीति, "तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणै"रिति प्रसिद्ध्या गोपनन्दनस्यास्य नारायणेनैक्यमेव परमैश्वर्यमिति मन्वानाः कमलापि ते यथा दासीभावमिच्छति तथा वयमपीत्याहुः, अप्यर्थे चकारः ॥ १६१ ॥

अथ तत्सवासना ऊचुः ।

तत् प्रसीद करुणाम्बुनिधे नः
संगताः स्म वसतीः परिहाय ।
त्वत्पदाम्बुजपलाशविलास-
स्वादमोदमदिराधुतबुद्धीः ॥ १६२ ॥

---

१ योर्विभाषेति वैकल्पिकं णत्वम् ।

तत्सवासना इति, मुनिरूपा इति भावः ॥ १६२ ॥

तदधुना धुनानो मोहं पुरुषभूषण भूषणाहर वरकरुणारुणापाङ्गनिरीक्षणक्षणवलवलमानमानसा मानसारस्येन प्रभविह विहसितसिततास्फुरितदशनवसनारुण्यतारुण्यतात्कालिकशोभाविशेषाशेषार्तिहारिणा वचनामृतेन विपणाय्य कुरुष्वोच्चैर्नो-दासीर्नोदासीनो भवेति ॥ १६३ ॥

भुवः पृथिव्या एव ऊषणं संतापस्तं हरतीति हे तादृश । वरकरुणापाङ्गेन निरीक्षणमेव क्षण उत्सवः स एव बलं तेन वलमानं मानसं यासां ता नोऽस्मान् वचनामृतेन विपणाय्य क्रीत्वा दासीः कुरुष्व । मान आदरस्तेन सह सारस्यं तेन, सादरसरसतयेत्यर्थः । विहसितस्य सिततया श्वेतिम्ना स्फुरितस्य दशनवसनस्य आरुण्यतारुण्येन तात्कालिको यः शोभाविशेषस्तेनाशेषार्तिहारिणा ॥ १६३ ॥

एवमन्या अपि तत्सवासना ऊचुः ।

खेललोलमणिकुण्डलभास्व-
द्गण्डमण्डलमखण्डितशोभम् ।
वीक्ष्य ते स्मितसुधामधुरोष्ठं
वक्त्रचन्द्रमभवाम हि दास्यः ॥ १६४ ॥

खेलेन लोलाभ्यां मणिकुण्डलाभ्यां भास्वद् दीप्यमानं गण्डमण्डलं यत्र तं, श्लेषेण कुण्डले एव भास्वन्तौ सूर्यौ यत्र तद्गण्डमण्डलं यत्र तं, तथाप्यखण्डितशोभम् ॥ १६४ ॥

मधुमधुरहसितामृतमृतसंजीवनजननकारिण्यो भयभयदमायतमायतमानसोभगमतिचारु पाद्मकरकमलासंकमलास्मन्थहरं भुजदण्डयुगं विलोक्य भवाम दास्यो दास्यैकचित्तप्रेमाणं मनसि नो धारय रयतः ॥ १६५ ॥

हसितामृतमेव मृतसंजीवनं तस्य वचनकारिण्यो याचिका वयं दास्यो भवाम "वनु याचने" । भुजदण्डयुगं विलोक्य, कथंभूतं, भयस्यापि भयदम् । आ सम्यक् यतमानं स्थातुं प्रयत्नपरं सौभगं यत्र तत् । कमलायाः शोभाया ग्रन्थिं ग्रन्थनं हरतीति तत्, ग्रथितसर्वशोभाकमित्यर्थः । दास्योचितं प्रेमाणं प्राप्ति पूरयतीति तथाभूते । नोऽस्मान् ॥ १६५ ॥

अथ नित्यसिद्धा ऊचुः ।

सकलसुभग भगवन् पुरुषरत्न गुणरत्नगुणनिकागार किं तावद्दासां दूषणम् ॥ १६६ ॥

भगवन् हे श्रीयुक्त गुणनिकागार नृत्यमन्दिर, "भवेद्गुणनिका नृत्य" इति मेदिनिः ॥ १६६ ॥

काः स्त्रियस्तव मनोहरवंशी-
कूजिताहृतहृदः परिहाय ।
साधुशील कुलशीलसुशीली-
मार्य नार्यचरिताद्विचलेयुः ॥ १६७ ॥

हे साधुशील हे आर्य इति, वैपरीत्यापादकं त्वच्चेष्टितं कथमिति पृच्छाम इति भावः ॥ १६७ ॥

यतस्त्रिलोकलोकलोचनचमत्कारकारणमखिलभुवनलक्ष्मीसौभगभगवत्तास्पदं पदं सौन्दर्यावधेः परममाधुर्यधुर्यमतिरमणीयरमणीयत्वसाध्यरूपं रूपं तवेदमालोक्य निर्भरमेदिनी मेदिनीगतखगमृगपशुततिरतिविपुलपुलककुलकलितां तनुं धत्ते ॥ १६८ ॥

अतिरमणीयाभिरपि रमणीभिर्यत्साध्यरूपं, न स्वभावात्तल्लभ्यमित्यर्थः । एतत्प्राप्त्यर्थं तास्तीव्रतपोव्रतादिकमपि कर्तुमर्हन्ति नतु कदाचिदप्यतो विन्दन्तीति भावः । यतो मेदिनीगतेत्यादि । निर्भरमेदिनी अतिशयस्नेहवती, "ञिमिदा स्नेहने" ॥ १६८ ॥

पुनः श्रुतिरूपा आहुः ।

आर्तिहा व्रजभुवां भवसीति
व्यक्तमेव हि विभो भुवनेषु ।
आदिपूरुष इवामरगोप्ता
तेन हातुमिह नार्हसि नस्त्वम् ॥

तेनार्तबन्धो निर्बन्धो निर्भरोऽयं मा क्रियतां करुणानिधे विधेहि संतप्ते न उरसि शिरसि शिशिरतरं रतरञ्जि करकमलममलमलमतिमतिसंतापमलनकृते किङ्करीणां रीणां हृदयाधारां धारां बाष्पविषवारां वारान्तरानावर्तिनीं विधेहि किमतिप्रसङ्गेन नो मनो रञ्जय जय जय विकलानां सकलानां सर्वदा समुत्तापतापहाराय ॥ १६६ ॥

रतरञ्जि रते रञ्जकम् । अतिशयो यो मतिसंतापस्तस्य मलनं मर्दनं दूरीकरणमिति यावत्, तत्कृते, ततश्च बाष्पविषवारां धारां वारान्तरे पुनर्न· आवर्तितुं शीलं यस्यास्तथाभूतां विधेहि । सम्यगुत्तापो यासां तद्भावस्तत्ता तस्या अपहाराय ॥ १६९ ॥

किंच ।

वंशीकलेन वडिशेन झषीरिवास्मा-
नाकृष्य सद्गुणजुषा सुरसामिषेण ।
शूलाकरोषि परुषोक्तिशलाकयैव-
माविध्य किं पुनरुपेक्षणशीलितेहो॰ ॥ १७० ॥

वंशीकलेनेत्यादयो राधासखीभिः सह श्रीकृष्णस्योक्तिप्रत्युक्तय इत्येवं रससाराधिका इत्यवेतनगद्येन व्यक्तीभविष्यन्ति । शोभनो रसो नादव्यज्यमानः शृङ्गार एवामिषं यत्र तेन, श्लेषेण सुरसम्· आमिषं मत्स्यलोभनीयं यत्र तेन वडिशेन । शूलाकरोषीति, "शूलात् पाके" इति डाच्, शिक इति ख्यातम् ॥ १७० ॥

अहमात्ममुदामुदारभावै-
र्मुरलीनादविनोदमातनोमि ।
यदितो विकलाः कुलाङ्गनाः स्युः
सकला एव तदत्र मे क्व दोषः ॥ १०१ ॥

सकला एव समस्ता एव, श्लेषेण कलाभिः सहिता एव नान्या इति, गानादिकलानभिज्ञत्वैव युष्मास्वनर्थकारिणीति भावः ॥ १०१ ॥

सदृंशभूरकुटिला सहजैकपर्वा
सारान्विता च मुरली नहि दुष्यतीयम् ।
अस्याः कलेबेत जनं जनमेव नाम-
ग्राहं यदाह्वयसि नः स तवैव दोषः ॥ १०२ ॥

सहजमेकं पर्व ग्रन्थिरुत्सवश्च यस्यां, यतश्च नामग्राहं नाम गृहीत्वा,"नाम्न्यादिशियहो"रिति णमुल् ॥ १०२ ॥

मुरली मदृदाभिमुख्यमाप्य
ध्वनतीयं न मयेव वाद्यमाना ।
स्वयमाह्वयतीयमिच्छया वः
सकलानामपि नाम नाम वेत्ति ॥ १०३ ॥

नाम प्राकाश्ये, नामसंज्ञाम् ॥ १०३ ॥

एवं चेत् तथापि तवैव दोषः, न हि तत्रभवतो भवतोऽसाधुसङ्गः समुचितः ।

तथाहि ।

छिद्रैर्युता बहुभिरेव कठोरगात्री
शून्यान्तरातिमुखरा महतो न वंशात् ।
जाता परस्य कुलपङ्ककलङ्ककर्त्री
वंशी तवेयमिह नार्हति साधुवादम् ॥ १०४ ॥

नन्वसाधुत्वं मुरल्याः कथमिति चेत् त्वद्वचनेनैव तदायातं प्रत्यचतोऽप्युपलभ्यते चेत्याहुः छिद्रैरिति, एवं च सद्वंशभूरित्यादिना वर्णितो गुणास्तु विषकुम्भपयोमुखन्यायेन दोषायैवेति द्योतितम् ॥ १७४ ॥

अहो नादब्रह्मोपनिषदमिवेनां भगवतीं
नवच्छिद्रां मूर्तिं स्वयमुपगतां मत्प्रणयतः ।
चिदानन्दाकारां मम करसरोजद्वयचरीं
यशोहंसीं वंशीं हरथ बहु वः साहसमिदम् ॥ १७५ ॥

इवशब्द एवार्थे, नवच्छिद्राकारां मूर्तिं तनूं, स्वयमेव कौतुकवशादुपगतां प्राप्ताम् ॥ १७५ ॥

इत्येवं रससाराधिका राधिका सहचरीभिः सह वचनप्रतिवचनचातुरीतुरीयदशायामपराश्च पराश्चर्यबोधेन विदग्धशेखरस्य खरस्यदोपेताहानिमवधार्य यदि विकसन्मुख्यो मुख्योत्कण्ठानुचरीभूतसरसतासतात्पर्यपर्यवसितसितस्मितलेशाश्च यदि बभूवुः ॥ १७६ ॥

तुरीयदशायाम् उत्तरकाष्ठायाम्, अपरा अपि रससारेणाधिका गोप्यः खरस्यदायास्तीव्रवेगाया उपेताया हानिम् अवधार्य यदि विकसन्मुख्यो बभूवुस्तदा सोऽपि स्वात्मारामः स्वात्मानं रमयन्नेव रामोत्तमास्ता रमयितुमारेभे । कीदृश्यः, मुख्या या उत्कण्ठा तस्या अनुचरीभूता तदनुगामिनी या सरसता वाक्चातुर्यनिष्ठा तयैव सतात्पर्यं यथा स्यात् तथा पर्यवसितो निर्धारितः सितो निर्मलः स्मितलेशो याभिस्ताः, अवहित्थादुरपह्नवस्य स्मितस्य लेशो निष्क्रान्त एव परिचितस्तस्य तात्पर्यमपि ताभिरवगतमित्यर्थः ॥ १७६ ॥

तदा मृदुहसितेन सितेन दशनमहसा महसारस्येन वचसा च साधु संमानयन् नयनानन्दस्य परां कोटिमतिकोटिमतिमदतर्क्यमदतर्क्यमाणरिंसोऽरं-सोऽपि कोटिकन्दर्पदर्पहारी स्वात्मारामो रामोत्तमा रमयितुमयितुमपि तासामनुरागपारावारपारावारयोर्मध्यमारेभे मारेभेणानुगतः ॥ ५७७ ॥

ततश्च व्यक्ताया अवहित्थाया लक्षणमनुचितमिति मत्वा हसितेनेत्यादि मद्वसारस्येन वचसा चेति मम वाक्कुटकौतुकविलसितं भङ्गीभिः सम्यगेवात्र निर्वाहितमित्यादिप्रकारेण । ननु तासां मध्ये कस्यापि तस्य रिरंसा प्रथमं किमिति न तर्कयितुमशक्यतेति तत्राह, अतिशयः कोटिरुत्कर्षो यस्यास्तथाभूतम्, अतिमतिमद्भिरप्यतर्क्यो यो मदो मत्तता तेनैव तर्क्यमाणा रिरंसा यस्य सः । यदि मदस्तर्कयितुं शक्येत तदा तत्कारणभूता रिरंसापि सुखेनेत्यर्थः । ताभिस्तु परमबुद्धिमतीभिरपि स्वानुरागोन्मत्ततयैव स न तर्कित इति भावः । अयितुं गन्तुम् । पारावारः समुद्रः । मारेभेण कामहस्तिना ॥ १८७ ॥

ततश्च ।

आनन्देन समन्ततो जय जयेत्युत्कीर्तितं पत्त्रिभि-
र्वल्लीभिः परितः स्मितं क्षितिरुहै रोमाञ्चितं सर्वतः ।
अन्योन्यप्रियसंकथाकुलतया संयुक्तमेणीगणैः
पुष्पाणां मकरन्दबिन्दुनिवहैः स्विन्नं धरण्यापि च ॥ १७८ ॥

पत्त्रिभिः पक्षिभिः ॥ १७८ ॥

एवं स्मरसमरसमरसचिन्तामणीरमणीरतिपरभागपरभागधेया-
धेया व्रजपुरपुरंदरनन्दनस्य विजिहीर्षा ह्रीर्ष्यादिदोषरहितैर्महिततरेतरे-
तरसौहृदहृदयालुतमाभिस्ताभिः समं यदि समजनि ॥ १७९ ॥

तस्य ताभिः सह विजिहीर्षा, कथंभूता, स्मरसमरे कामसंग्रामे समः तुल्य एव रसो यासां ताश्च ताश्चिन्तामणयः श्रीकृष्णाभीष्टसंपादयित्र्यश्च या रमण्यस्तासां रतिपरभागः प्रेमसौन्दर्यं परं श्रेष्ठं भाग्यं तदेव भागधेयं यस्याः सा । कीदृशीभिः, ईर्ष्यादिदोषरहिताश्च ताः प्रत्युत महिताश्च प्रत्युततराम् इतरेतरसौहृदेन हृदयालुतमाश्चेति ताभिः । तत्र कारणं तु व्याख्यातं पूर्वमेव ॥ १७९ ॥

तदा युगपदेव ता वनदेवता वनचरखगमृगतरुवल्लयश्च ता मूर्छोत्थिता इव तदैव समुत्पन्ना इव देहान्तरमासादिता इव स्नाता इवामृतरसेन समपद्यन्त ॥ १८० ॥

मूर्छोत्थिता इवेति, तासां शोकेन तास्तावत्कालं मोहपर्यन्तदशां प्राप्य स्थिता इवेति भावः । तदैव समुत्पन्ना इवेति, ततोऽप्यचेतनमृत्युदशां च । देहान्तरमिति, तदानींतनस्तादृश आनन्दश्च तस्मिन् जन्मनि कदापि ताभिर्न लब्ध इवेति भावः । तत्र हेतुरमृतेति ॥ १८० ॥

ततश्च ।

समेताभिस्ताभिः सह स-हरिरानन्दलहरी-
हरिद्वृन्दाम्नायी स्मितमधुरमुग्धास्यविधुभिः ।
अकम्पाभिः शम्पाततिभिरिव संपालिततनु-
र्धराधारो धाराधर इव नवीनो व्यहरत ॥ १८१ ॥

संपालित इति, ताभिः समन्तादावरणात् धरा । पृथ्वी· आधारो यस्य सः, भूमिष्ठ इत्यर्थः, धाराधरो मेघः ॥ १८१ ॥

ततश्च ।

सोत्कण्ठैरुपगीयमानचरितः प्रेम्णा सुकण्ठीगणैः
कण्ठेनापि च वेणुनापि च कलं गायन् क्रमेणैव सः ।
मालामालुलितामलीन्द्रगरुतां वातैः पदालम्बिनीं
बिभ्राणः प्रतिभूरुहं प्रतिलतं बभ्राम दामोदरः ॥ १८२ ॥

गरुतां पक्षिणाम् ॥ १८२ ॥

एवं सति समयसमयमानया प्रेमरसोचितयालचितया लसदघटनघटनसमर्थप्रभावया योगमाययागमायया यथावस्थितत्वरागमनविपर्यस्तसमस्तवेषभूषाणां स्मरसमरमणीनां रमणीनां तत्कालमासामासाद्यमानसारजनिरजनिवनविहारसमुचिता वेषभूषा महानुभावया भावयामासे न च ता अपि तद्विदुरहो रहोऽस्याः ॥ १८३ ॥

ऽगमो दुर्ज्ञेयः॰ ऽयः शुभावहविधिर्यस्यास्तया योगमायया॰ ऽऽसाम्॰ ऽऽसाद्यमाना साररजनित्वकष्टजन्म यया तस्यां रजनौ वनविहारे समुचिता वेषभूषा वेषेण षोडशाकल्पात्मकेन सह भूषा द्वादशाभरणात्मिका भावयामासे, चक्रे॰ इत्यर्थः ॥ १८३ ॥

तथाभूतासु तासु वसुधासुधायमानेन सुधाकरकरनिकरेण कलधौतजलधौत इव वनमध्ये सह ताभिर्वनविहरणरणपरपरमानन्दो मानन्दो[1]ऽहयन्निव ॥ १८४ ॥

करनिकरेण हेतुना कलधौतस्य रजतस्य जलेन धौत इव ॥ १८४ ॥

चित्रैः पत्रैर्नखविदलितैः कल्पयन् पत्रलेखां
नानापुष्पैः स्वकरविचितैः कञ्चुलीं निर्मिमाणः ।
वल्लीखण्डैः स्तबकचटुलैः साधयन्नङ्गदादी-
न्यासां तेनेऽलकललिततां धूलिभिः कौसुमीभिः ॥ १८५ ॥

स्तबकेन चटुलैः शोभनैः ॥ १८५ ॥

किंच ।

हारं मल्लीकुसुमनिकरैः पत्त्रपाश्यां कदम्बै-
रुत्तंसं च स्थलसरसिजैर्गण्डशोभां च लोध्रैः ।
कुन्दैः कण्ठाभरणरचनां केसरैः काञ्चिमासां
कुर्वन् स्वीयां युगपदनघां दर्शयामास शिक्षाम् १८६ ॥

पत्त्रपाश्यां ललाटालंकारम् ॥ १८६ ॥

एवं तासां च ।

काचित् केसरकुड्मलं श्रवणयोः काचित् करे केतकीं
काचिद् वक्षसि तस्य मल्लिकुसुमैराकल्प्य हारोत्तमम् ।
उष्णीषेऽकृत किङ्किरातमपरा यूथीस्रजः खण्डकैः
काचित् कङ्कणमङ्गदं च बकुलैः काचिच्च काञ्चीगुणम् ॥ १८७ ॥

१ मानं दो—इत्येवं मुद्रणीये संधिः प्राप्स्वत् ।

तासां च मध्ये, किंकिरातम् अशोकम्, अपरा श्रेष्ठा काचित्, सर्वेच प्रकृतत्वेनान्वयः ॥ १८७ ॥

एवं प्रारिप्सितेप्सितेतरविलक्षणलक्षणस्य रासविहारस्य रस्यतमानि वनविहाररतोत्सवनृत्यकलाजलविहाररूपाण्यङ्गानि चत्वारि ॥ १८८ ॥

प्रारिप्सितस्य प्रारब्धुमिष्टस्य, ईप्सितेतरतो लीलान्तराद् विलक्षणं लक्षणं यस्य तस्य ॥ १८८ ॥

तेषु चारब्धे वनविलासे निराविलासे निरावरणरणन्मदकलकलकण्ठरोलम्बलम्बमानकलझङ्कारमाधुरीधुरीणासु दिङ्मण्डलीषु मदनमदनमद्धियो धियोढकृष्णरतयो युवतयो

यूथश एव ।

पुंनागेभ्यः कनकरुचिभिश्चीयमानैः परागै-
र्भृङ्गासङ्गादपि सुविशदां चन्द्रिकां म्लापयद्भिः ।
तत्राकालस्मररणमहोद्भूतधूलीप्रपूरैः
झङ्झङ्कारप्रचुरमिलद्वक्त्रयोरप्यधुः प्रधानार्थम् ॥ १८९ ॥

निराविल आसः स्थितिर्यस्य तस्मिन् । निरावरणं यथा स्यात् तथा रणतां कूजतां मदकलानां मत्तानां कलकण्ठानां कोकिलानां रोलम्बानां भृङ्गाणां लम्बमाना या कलझङ्कारमाधुरी तस्या धुरीणासु । मदनमदेन काममत्ततया नमन्ती धीर्यासां ताः । अकालस्मररणे उद्भुतधूलीप्रपूरैरिव, तादृशैः परागैः पिधानार्थम् अप्यधुः स्मररणारम्भे प्रथममाच्छादयामासुः ॥ १८९ ॥

ततश्च ।

नानापुष्पैः स्वयमवचितैः कन्दुकान् कल्पयित्वा
तैस्तैर्निघ्नन् युगपदभितो हन्यमानश्च ताभिः ।

अक्षोभेण व्यजयत मधुयूथपानां स यूथं
तत्पक्षीयैर्जय जय जयेऽत्ययमजगे पक्षिसंघैः ॥ १९० ॥

तत्पक्षीयैः कृष्णपक्षीयैः शुकादिभिः ॥ १९० ॥

ततश्च ।

दर्पोत्सेकात् सहपरिजनां राधिकां जेतुकामे
कृष्णे पूर्वं जितवति समं कन्दुकैरालिवृन्दम् ।
तस्याः कोपभ्रुकुटिकुटिलैर्निर्जितेऽस्मिन् कटाक्षै-
रेणुर्हा ही जितमिति मुहुस्तद्गणाः पक्षिसंघाः ॥ १९१ ॥

पूर्वमालिवृन्दं जितवति कृष्णे पश्चाद्राधिकामपि जेतुकामे सति तदैव तस्याः कटाक्षैर्निर्जिते सति रेणुश्चुकूजुः, तद्गणाः सारिकादयः ॥ १९१ ॥

एवं नवनवानवनव एव तस्मिन् परमरमणीये कौतुके क्वचन स एव ।

आचिन्वानां सुरभिसुरसं केसरं भृङ्गबाधा-
विश्वास्ताक्षीं चकितचकितं पाणिपद्मं धुनानाम् ।
पुंनागं यद्वहसि तदहो योग्यमेतत् तवेति
स्मायं स्मायं नमितवदनां स्मापयामास राधाम् ॥ १९२ ॥

श्लेषेण पुंनागं कृष्णम् ॥ १९२ ॥

एवं सकलाः कलावत्यो दयिताकल्पकल्पनायोग्यानि कुसुमानि समं समन्तत आहरन्त्यः प्रहरन्त्यः प्रणयनिशितकटाक्षविशिखशिखरैः खरैर्यदि विजह्रुश्चिरे चिरेण तदा क्वचन ॥ १९३ ॥

दयितस्य कृष्णस्य आकल्पो भूषा । प्रहरन्त्य इति, कान्तस्य दिदृक्षोद्भूयमालक्ष्य साम्येनेति भावः । विशिखशिखरैः शराग्रैः ॥ १९३ ॥

पादाङ्गुष्ठ क्षितितलमवष्टभ्य दोर्वल्लिमुच्चै-
स्तन्वीयेकं कुसुममतुलं दूरगो हर्तुमिच्छुः ।

नीवीस्रंसे चकितचकिता पृष्ठमागत्य धृत्वा
दोर्भ्यामुत्थापयति दयिते तत्रपे तत्र राधा ॥ १९४ ॥

दयिते कृष्णे उत्थापयति सति, दुःस्पर्शकुसुमप्रापणप्रयोजनमिषेणेति भावः । तत्रपे लज्जते स्म ॥ १९४ ॥

एवमत्यामोदया मत्यामोदयाथार्थ्येनान्धितमधुपरागपरभागाणि कुसुमानि तानि मानितानि समाहरन्तीषु विशेषतोऽशेषतोऽपरीपाकेण समं समन्ततः प्राणनाथेन सहितासु तासु ॥ १९५ ॥

आमोदस्य सौगन्ध्यस्य याथार्थ्येन स्वाभाविकत्वेन, न तु दोहदसेकबलात् कल्पितत्वेनेत्यर्थः, अन्धितानामन्धीकृतानां मधुपानां रागपरभाग आसक्त्युत्कर्षो येषु तानि, अत एव मानितानि ॥ १९५ ॥

काचित् केतकतो रजः कुसुमजं लग्नं ममाक्ष्णोरिति
व्यस्ता पाणिसरोरुहेण वलयक्वाणेन हाहाकृता ।
मार्जन्ती त्वरितं समेत्य दयितेनालोकयामीत्यलं
निर्भाष्याननपद्ममाहृतमिषादक्ष्णोश्चिरं चुम्बिता ॥ १९६ ॥

हाहाकृता हाहेतिवादिना दयितेनेति संबन्धः ॥ १९६ ॥

एवं कुसुमसुमहोत्सवरसाकुलस्य कुलस्य कामहेलानां महेलानां समुपचीयमानमानलहरिणा हरिणा सह सहसा सहसावलोकलोकरमणीयेन रमणीयेन सर्वतोऽविरतो रतोत्सवसबहुमानः स समयो रसमयो रम्यतया समजायत ॥ १९७ ॥

महेलानां महिलानां, कामहेलानां कामभाववतीनां, समुपचीयमाना मानस्य आदरस्य लहरी येन तेन हरिणा सह, सहसेन हास्यसहितेन अवलोकनेन यो लोकरमणीयस्तेन, रमणीर्याति संभोगार्थं गच्छतीति तेन रमणीयेन, अविरतो न विद्यते विरतं विरामो यस्येति, समयस्यापि तदिच्छावशात् स्फारत्वमभूदित्यर्थः ॥ १९७ ॥

ततश्च ।

हस्ताप्राप्ये कुसुमनिकरे पाणिमुल्लास्य हर्तुं
यां यामेषा स्फुटविटपिनां हन्त नासीत् समर्था ।
तस्याः सातिप्रणयभयतो हन्त शाखेव तासा-
मालीभावादिव विनमिता पाणिलग्ना बभूव ॥ १९८ ॥

एषा राधा यां यां शाखां हर्तुं समर्था नासीत् तेषां स्फुटविटपिनां सा शाखेव तासां सर्वासामालीभावादिव तस्या राधायाः पुनः प्रणयस्येव भयतो भयेन हेतुना पाणिलग्ना बभूव ॥ १९८ ॥

एवं रुचिरसुचिरवनविहरणरणतो विरम्य रम्यतरतरलतरङ्गरङ्गपरभागभागधेयायास्तरणिभुवः पुलिनं विहारक्रमेण क्रणमे रमणीयूथयूथपः स ससार ॥ १९९ ॥

तरङ्गाणां रङ्गपरभागादेव भागधेयं भाग्यं यस्याः, क्रमेण पादक्रमणेन ॥ १९९ ॥

कह्लारोत्पलसौरभप्रणयिना वातेन संमार्जितं
कालिन्द्यैव समन्ततः स्वलहरीहस्तेन संस्कारितम् ।
लिप्तं पूर्णसुधाकरस्य किरणैः कर्पूरधूलिप्रभं
प्रेयः प्राप्य ससौरभं तत इतो बभ्राम दमोदरः ॥ २०० ॥

रतोपयोगिप्रदेशस्य मार्जनसंस्कारप्रलेपादिकमपेक्षितव्यं भवतीत्यत आह कह्लारेति, प्रेयः अतिप्रियम्, पुलिनमिति गम्यस्यं विशेष्यपदमनुषञ्जनीयम्, तत इतो बभ्रामेति, रिरंसया तदुचितस्थाननिर्धारणार्थमिति भावः ॥ २०० ॥

तत्र च घनसारसारधवलवलमानमहसि महसिद्धिकारणसितमयूखमयूखजाले च परस्परं सैकतदिवोरेकरूपभासोर्निजनिजच्छायाभिरेव सैकतमेवेदमिति निश्चयार्हे रमणीयूथयूथपागणसहितः ॥ २०१ ॥

तत्र पुलिने स सखामितस्ततो विलस्य वनमध्यम् अध्यवस्याय
ताभिः समम् चरमतेत्यन्वयः । तत्र कीदृशे, घनसारसारस्य उत्तमक-
र्पूरस्येव धवलं वलमानं महो यस्य तस्मिन्, महस्य स्निग्धकारणं यत् सि-
तमयूखस्य मयूखजालं तस्मिंश्च तादृशे सति, सैकतं सिकतामयतटं च
क्षौमश्च तयोः परस्परमेकरूपभासोः सतोः, किं वा सैकतं का वा क्षौमिरिति
संदेहे जाते सतीत्यर्थः ॥ २०१ ॥

॥ शेषमग्रे ॥

THE

NYÁYADARSÁNA.

WITH THE COMMENTARY BY VÁTSYÁYANA.

Continued from page 380.

Now the third kind of doubt or the wavering judgment arising from contradiction. By contradiction we mean the opposition of statements about an object. As for instance, one system asserts that there exists the soul; there is no soul existing, says another. But it is not possible that existence and non-existence should have the some substratum; nor do we find any reason to determine either alternative. So our knowledge regarding the soul being uncertain doubt is obvious.

न्यायदर्शनवात्स्यायनभाष्यम् ।

सू॰ यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ॥ २४ ॥

भा॰ यमर्थमाप्तव्यं हातव्यं वाऽध्यवसाय तदाप्तिहानोपाय-
मनुतिष्ठति प्रयोजनं तद्वेदितव्यम् । प्रवृत्तिहेतुत्वादिममर्थमाप्स्यामि
हास्यामि वेति व्यवसायोऽर्थस्याधिकारः । एवं व्यवसीयमानोऽर्थोऽधि-
क्रियत इति ॥

The fourth kind of doubt as arising from the indecision of perception is thus exemplified, Water being perceived both in those places, where there is no water, as in the case of mirage, and in those places where there is water, as in the case of the lakes and ponds, we, seeing water in a particular place, doubt whether it is real water or something else appearing like it; inasmuch as there is no proof to determine either alternative.

Now the fifth and last kind of doubt which arises from the indecision of non-perception is thus illustrated: Seeing that water in the roots and trunks of trees, though existing, does not appear any more than water unproduced or destroyed, we perceiving no water in a certain place doubt whether the water not appearing is existent or not existent. This kind of doubt is accompanied by the desire just the same as the preceding ones. In the cases of the first two kinds of doubt, the common qualities and special qualities belong to the objects to be known; whereas in the case of the last two kinds, perception and non-perception belong to the percipient; for which difference the latter kinds of doubt are stated separately from the former. The common definition of all the kinds of doubt would be that, it is the wavering judgment arising from the knowledge of the common quality of its object, being accompanied by a desire of knowing or recalling to mind the proper attribute of its object.

24. APHORISM.

That thing having set which before one's self, one proceeds to act—that [thing] is the Motive. (Prayojana).

सू॰ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥

भा॰ लोकसाम्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्तास्तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितु मर्हन्तीति । यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः । दृष्टान्तविरोधेन हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति । दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति । अवयवेषु चोदाहरणाय कल्पत इति ॥

COMMENTARY.

That thing, which having proposed to one's self, as something to be gained or avoided, one takes means to gain or avoid, is to be known as the Motive. The motive being the cause of one's activity, one resolves [to make efforts] to obtain or to shun an object; such a resolution of a man is what we mean by setting a thing before one's self; and the thing resolved upon is said to be set before one's self.

25. APHORISM.

That thing regarding which both ordinary men and acute investigators entertain a sameness of opinion, that [thing] is called a popular datum [Dṛishṭánta].

COMMENTARY,

'Ordinary men' means those not surpassing the people in general, that is, who have not attained the superiority of understanding, afforded either by nature or by education. Opposite to these are the acute investigators, these being able to investigate an object by means of reasoning [Tarka] or by the instruments of knowledge [Pramáṅa]. That object which acute investigators understand in the same way as the ordinary people do, is the popular datum, One's adversary's opinions are to be rejected from their disagreeing with the popular data; one's own opinion, on the other hand, are to be established by their agreeing with the popular data. Moreover, the popular data can be used as example, in the members of a syllogism.

Now about the established truth or dogma [Siddhánta].

In the compound Siddhánta the word Siddha means any truth generally avowed as being so and so; and the word 'Anta' indicates the establishment of the condition and nature of the truth. It is described as follows:—

भा० अथ सिद्धान्तः । इदमित्थंभूतंचेत्यभ्यनुज्ञायमानमर्थजातं सिद्धं । सिद्धस्य संस्थितिः सिद्धान्तः । संस्थितिरित्थंभावव्यवस्था धर्मनियमः । स खल्वयम्—

26. APHORISM.

Established truth or dogma [Siddhánta] is the establishment either of sciences or of hypotheses or of assumptions.

COMMENTARY.

'The establishment of sciences or systems' signifies the establishment of the truths of sciences. By science we mean the teaching of a body of truths connected with each other. 'The establishment of hypotheses' means the settlement of the truths founded on hypotheses. 'The establishment of assumption' indicates the [temporary] admission of a thing taken for granted. This kind of dogma is made use of in order to investigate the special properties of the thing taken for granted.

It is of four kinds on account of the variety of the dogma called the establishment of sciences or systems, which are thus given :—

27. APHORISM.

(1) 'A dogma of all the systems,' (2) a 'dogma peculiar to some system,' (3) a 'hypothetical dogma,' and (4) 'a dogmatic assumption,' these species of dogma differ from each other, and hence comes the division.

COMMENTARY.

These are the four species of dogma differing from each other, which are next defined in order.

सू॰ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २६ ॥

भा॰ तन्त्रार्थसंस्थितिस्तन्त्रसंस्थितिः । तन्त्रमितरेतराभिसंबद्धस्यार्थसमूहस्योपदेशः शास्त्रम् । अधिकरणानुषक्तार्था संस्थितिरधिकरणसंस्थितिः । अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः । तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः । तन्त्रभेदात्तु खलु स चतुर्विधः—

सू॰ सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

भा॰ तचैताश्चतस्रः संस्थितयो ऽर्थान्तरभूतास्तासाम्—

28. APHORISM.

The truth which is not in opposition to any of the systems, and which is claimed by some one system, is what we mean by a dogma of all the systems [Sarvatantasiddhánta.

COMMENTARY.

As for instance the truths are: 'Smell and so forth are the organs of sense.' 'Odour and the like are the sense-objects.' 'The earth and so on are the elements.' 'By means of the instruments of knowledge objects are perceived.'

29. APHORISM.

The truth which is established in a certain system, and which, in another system, is regarded as not held, is what we mean by a 'dogma peculiar to some system,' [Pratitantrasiddhánta].

COMMENTARY.

As for example: 'The non-existent never becomes existent The existent never ceases to exist.' 'The souls are without qualities. 'There is a peculiarity in each of the bodies, organs of sense, the mental sensories, objects, and in their proper causes. These are the peculiar dogmas of the followers of the Sánkhya' school. The following dogmas are peculiar to the Yoga system: 'The creation of the world is caused by the works of the souls.' 'The works of the souls are produced by activity and vices.' 'The souls are endowed with their proper attributes.' 'The non-existent becomes existent.' 'That which is produced can be annihilated.'

सू॰ सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥

भा॰ यथा घ्राणादीनीन्द्रियाणि गन्धादय इन्द्रियार्थाः पृथिव्यादीनि भूतानि प्रमाणैरर्थस्य ग्रहणमिति ॥

सू॰ समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥

भा॰ यथा नासत आत्मलाभः । न सत आत्महानं । निरतिशयाश्चेतनाः । देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति सांख्यानाम् । पुरुषकर्मनिमित्तो भूतसर्गः । कर्महेतवो दोषाः प्रवृत्तिश्च; स्वगुणविशिष्टाश्चेतनाः । असदुत्पद्यते । उत्पन्नं निरुध्यते इति योगानाम् ॥

30. APHORISM.

That which being established, there is the establishing of its proximate truths is a Hypothetical dogma [Adhikaraṇasiddánta].

COMMENTARY.

That truth, the establishment of which is closely followed by some other truths, and which could not be established without the other truths depending on itself, is said to be a Hypothetical dogma. As for example, "the knower, that is, soul, is different from the body and organs of sense, because the same object is taken in by sight and touch". This dogma being established many other truths follow which are: 'There is a variety of the organs of sense. The organs of sense are directed to some limited objects, and are characterised by their different abilities to receive their proper objects, and form the instruments of the knower's experience. The substance [Dravya] differs from the qualities [Guṇas] odour, &c. and forms the substratum of them. The objects experienced by the precipient beings are unlimited'. All these truths can be maintained when the aforsaid dogma is established; nor can that dogma be said to be possible in the absence of these truths.

31. APHORISM.

The investigation of the special properties of an object, which is taken for granted, is what we mean by a dogmatic assumption.

सू॰ यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ ३० ॥

भा॰ यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते न तैर्विना सोऽर्थः सिध्यति तेऽर्था यदधिष्ठानाः सोऽधिकरणसिद्धान्तः ॥ यथा देहेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति ॥ अत्रानुषङ्गिणोऽर्था इन्द्रियनानात्वं नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि । गंधादिगुणव्यतिरिक्तं द्रव्यं गुणाधिकरणम् अनियतविषयाश्चेतना इति पूर्वार्थसिद्धावेतेऽर्थाः सिध्यन्ति नैतैर्विना सोऽर्थः संभवतीति ॥

सू॰ अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

---

1. अनियत instead of नियत B. I.

COMMENTARY.

Dogmatic assumption is a sort of assumption in which something is assumed to try it further. As for instance.—Let sound be granted as a substance: but, is it eternal or non-eternal? Here some one, assuming sound as a substance examines its special property of being either eternal or non-eternal. This kind of dogma is used by one, showing the superiority of one's own understanding and at the same time, disregarding the opinion of one's opponent. Now about the members of syllogism. [Avayaváh].

32. APHORISM.

The members of syllogism are (1) the proposition, (2) the reason, (3) the example, (4) the application and (5) the conclusion.

COMMENTARY.

Some logicious assert ten members in the syllogistic form and add 'the desire of knowing, [Jijnásá], doubt [Sanśaya], the acquisition of the practical means [Sakyaprápti], motive [Prayojana], and the solution of doubt [Sanśayvyudása].'—Why are not these mentioned in the Aphorism? We answer that in the first place, the desire of knowing [Jijnásá] actuates a man to fix the use of his knowing the object not known to him. For, why does a man desire to know the object which is not known to him? Because having rightly known the object, he determines either to quit, or to take, or to overlook it. The use of the right notion

---

भा॰ यत्र किं चिदर्थजातमपरीक्षितमभ्युपगम्यते । अस्तु द्रव्यं शब्दः स तु नित्योऽथानित्य इति द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्तत इति ॥ अथावयवाः ॥

सू॰ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३२ ॥

भा॰ दशावयवानेके नैयायिका वाक्ये संचक्षते ॥ जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति ॥ ते कस्मान्नोच्यन्ते इति ॥ तत्राप्रतीयमानेऽर्थे प्रत्ययार्थप्रवर्तिका जिज्ञासा ॥ अप्रतीयमानमर्थं कस्माज्जि-

Digitized by Google

of a thing, therefore, is one's determination of quitting or taking, or overlooking it, for which use one desires to know it. But such a desire of knowing does not prove anything [and so cannot be said to belong to the demonstrative form of the syllogism].

In the second place, 'Doubt'[Sanśaya] which is the basis or source of the desire of knowing [Jijnásá], puts two contradictories together, and has a close connection with the truth on account of the truthfulness of either of the two contradictories, does not, after all, prove anything, though it [doubt] has been separately enunciated [by the logician as a member of the syllogistic form].

In the third place, 'the acquisition of the practical means [Śakyaprápti] or in other words, the acquisition of the instruments of knowledge whereby one takes the cognisance of objects, cannot, like the proposition [Pratijná] and so forth, be added to the syllogistic form which is used for proving an object.

In the fourth place, 'Motive' [Prayojana] which in regard to the syllogistic form, is nothing but the determination of the truth, should be the consequent proceeding from, and not a member of the demonstrative form.

ज्ञासते तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये उपेक्षिष्ये वेति। ता एता[1] हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते सा खल्वियमसाधनमर्थस्येति॥ जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसन्धाता[2] तत्त्वज्ञाने प्रत्यासन्नः व्याहतयोर्हि धर्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति स पृथगुपदिष्टोऽप्यसाधनमर्थस्येति॥ प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि सा शक्यप्राप्तिः न साधकस्य वाक्यस्य भागेन युज्यते प्रतिज्ञादिवदिति॥ प्रयोजनं तत्त्वावधारणम् अर्थसाधकस्य वाक्यस्य फलं नैकदेश इति॥ संशयव्युदासः प्रतिपक्षोपवर्णनं तत्प्रतिषेधं[3] तत्त्वाभ्यनुज्ञानार्थं न त्वयं साधकवाक्यैकदे-

---

1. ता एता instead of तावता B. I.
2. व्याहतधर्मोपसन्धाता instead of व्याहतधर्मोपसंघातात् B. I.
3. V. L. तत्प्रतिषेधेन. B. I.

Digitized by Google

In the fifth and last place, 'the solution of doubt' [Sanśayayudása] which is effected by declaring the impossibility of one of the two opposite sides of a question, and leaving the other side to be true, is not a portion of the proving form of syllogism. In regard to some given object, the desire of knowing [Jijnásá] and so on, are available, on account of their manifesting the object to be proved. While the proposition [Pratijná,] &c. which contribute to the proof of an object, are used as the members of the demonstrative form or syllogism.

They are defined in the following aphorisms in order of their separate enunciation.

33. APHORISM.

The proposition [Pratijná] is the declaration of what is to be established.

COMMENTARY.

The proposition is the declaration of an object's being possessed of such a character as to be established. As for instance, Sound is non-eternal. [Here sound is declared as possessing the character of being non-eternal, which is to be established].

34. APHORISM.

The reason [Hetu] is the means for the establishing of what is to be established [Sádhya], from its being of the same nature as the example [Udáharaṇa].

यइति ॥ प्रकरणे तु जिज्ञासादयः समर्थाः अवधारणीयार्थोपकारात्[1] । तत्त्वसाधकभावात्तु प्रतिज्ञादयः साधवाक्यस्य भागः[2] एकदेशा अवयवा इति तेषां तु यथा विभक्तानाम् ॥

सू॰ साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

भा॰ प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनम् प्रतिज्ञा-साध्यनिर्देशः अनित्यः शब्द इति ॥

सू॰ उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ ३४ ॥

---

1. V. L. अवधारणीयार्थोपकारा. B. I.

2. भागाः instead of भागः B. I.

COMMENTARY.

Through the similarity to the example, the establishing or proving of what is to be proved, that is, of some character of an object, is said to be the reason; or in other words, having perceived the same character in what is to be proved as in the example, we make the assertion of the character as the proof of what is to be proved, and that assertion is called the reason [Hetu]. As for instance, the assertion: 'Because it has the character of being produced,' is the reason for the statement, 'Sound is non-eternal; for whatever has the quality or character of being produced is seen to be non-eternal. Is thus much the definition of the reason? We answer: no. How then?

35 APHORISM.

So also, from its being of a nature quite opposite to that of the example.

COMMENTARY.

In like manner, the reason [Hetu] is the means for the establishing of what is to be established [Sádhya], from its being the reverse of the example's nature. How is it?—As for instance, Sound is non-eternal, because it has the quality of being produced; for whatever has not the quality of being produced is seen to be eternal, as the substances, soul and so forth.

KEŚAVA SÁSTRI.

To be continued.

भा० उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधनं प्रज्ञापनम् हेतुः। साध्ये प्रतिसन्धाय धर्ममुदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः। उत्पत्तिधर्मकत्वादिति· उत्पत्तिधर्मकमनित्यं दृष्टमिति। किमेतावद्धेतुलक्षणमिति नेत्युच्यते किं तर्हि—

सू० तथा वैधर्म्यात्॥ ३५॥

भा० उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः। कथम्। अनित्यः शब्दः उत्पत्तिधर्मकत्वात्। अनुत्पत्तिधर्मकं नित्यं यथा आत्मादिद्रव्यम् इति॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER XI.

THE JAIMINI DARSANA.

(Continued from page 512).

Hence (*b*) we also maintain that your position cannot be established by any supposed supernatural testimony (as that quoted above from the Rig Veda, "from him sprang the Rich and Sáman verses.") For the rule of Pánini (iv. 3. 101) will still remain inviolate, that the grammatical affixes with which such names as Káṭhaka, Kálápa and Taittiríya are formed, impart to those derivatives the sense of 'uttered by' Kaṭha, Kalápa, &c., while we maintain that these names have reference (not to those parts of the Veda as first composed by these sages, but) to the fact that these sages instituted certain schools of traditional study. And in the same way we hold (in reference to this verse from the Rig Veda) that it only refers to the institution of certain schools of traditional study of these Vedas.

Nor will any supposed inference establish the non-eternity of sound, because (as we said before,) it is opposed to the evidence of our consciousness, since we certainly recognise the letter now

---

॥ सर्वदर्शनसङ्ग्रहे

जैमिनिदर्शनम् ॥

अतएव नागमबलात्तत्साधनं तेन प्रोक्तमिति पाणिन्यनुशासने जाग्रत्यपि काठककालापतैत्तिरीयमित्यादिसमाख्या अध्ययनसम्प्रदायप्रवर्त्तकविषयत्वेनोपपद्यते तद्वदत्रापि सम्प्रदायप्रवर्त्तकविषयत्वेनाप्युपपद्यते न चानुमानबलाच्छब्दस्यानित्यत्वसिद्धिः प्रत्यभिज्ञाविरोधात् । न चासत्यप्येकत्वे सामान्यनिबन्धनं तदिति साम्प्रतं सामान्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपातादास्थीयते । क्वचिद्व्यभिचारदर्शनाद्वा तत्र क्वचिद्व्यभिचारदर्शने तदुत्प्रेक्षायामुक्तं स्वतः प्रामाण्यवादिभिः ।

उत्प्रेक्षेत हि यो मोहादज्ञातमपि बाधनम् ।
स सर्व्वव्यवहारेषु संशयात्मा विनश्यन्तीति ॥

नन्विदं प्रत्यभिज्ञानगत्वादिजातिविषयं न गादिव्यक्तिविषयं तासां प्रतिपुरुषं भेदोपलम्भादन्यथा सोमशर्म्माधीते इति विभागो न

heard as the one heard before. Nor is it reasonable to reply that, although the letters are not the same, they seem to be so on account of their identity of species. For here we must ask our opponents a question,—is this idea that 'the apparent sameness arises from identity of species' put forward from a wish to preclude entirely any idea of the letters being the same, or only (from an imagined fear of error) because experience shows that the recognition will sometimes be erroneous (as in the cases of the hair and jasmine mentioned above?)—(*a*) If it arises from the latter reason, we Mímámsakas, who hold that the Veda is its own evidence, have said in reference to this timid imagination :—

"He who foolishly imagines that something as yet unknown to him will come hereafter to stop his present conclusion,—his mind a mass of doubts, will go to utter ruin in every transaction of life."

'But' (the Naiyáyakas will ask) 'does not this recognition of *G*, and other letters (as the same which we heard before,) refer to the species which exists the same in each, and not to the several individual letters, since in fact we perceive that they are different as uttered by different persons,—otherwise we could not make such distinctions as we do when we say "Somaśarman is reading." This objection, however, has as little brilliancy as its predecessors,—for, as there is no proof of any distinction between the individual *G*'s, there is no proof that we ought to assume

---

स्यादिति चेत्तदपि शोभां न बिभर्त्ति गादिव्यक्तिभेदे प्रमाणाभावेन गत्वादिजातिविषयकल्पनायां प्रमाणाभावात् । यथा गत्वमज्ञानत एक-मेव भिन्नदेशपरिमाणसंस्थानयत्त्युपधानवशात् भिन्नदेशमिवाल्पमिव महद्-विव दीर्घमिव वामनमिव प्रथते तथा गव्यक्तिमज्ञानत एकापि व्यञ्जक-भेदात् तत्तद्धर्म्मानुबन्धिनी प्रतिभासते । एतेन विरुद्धधर्म्माध्यासात् भेदप्रतिभास इति प्रत्युक्तम् । तच्च किं स्वाभाविको विरुद्धधर्म्माध्यासो भेदसाधकत्वेनाभिमतः प्रातीतिको वा प्रथमे ऽसिद्धिः अपरथा स्वाभा-

any such thing as a species *G*; and we maintain that just as to the man who does not understand (the Naiyáyika doctrine of) the species *G*, the one species will (in the Naiyáyika view,) by the influence of distinction of place, magnitude, form and individual sounds, appear as if it were variously modified as itself distinct in place, as small, as great, as long, as short,—so to the man who does not understand our (Mímámsaka doctrine of) one individual *G*, the one *G*, will, (in our view,) by the diversity of 'manifesters,'* appear to him associated with their respective peculiarities; and as contrary characters are in this way ascribed (to the letter *G*,) there is a fallacious appearance of distinction (between different *G's*.) But does this ascription of contrary characters which is thus regarded as creating a difference (between the *G's*) result (1) from the nature of the thing, or (2) from our imagination? There is no proof of the former alternative; for, if it were true, as an inherent difference would have to be admitted between different *G's*, we should have to say "Chaitra has uttered ten *G's*", and not "Chaitra has uttered the same G. ten times." On the latter supposition, there is no proof of any inherent distinction between *G's*; for inherent oneness is not destroyed by a difference of external disguises. Thus we must not conceive, from the apparent distinction caused by such external disguises as jars, &c., that there is any inherent distinction, as of parts, in the

* Jaimini maintains that the vibrations of the air 'manifest' the always existing sound.

विभेदाभ्युपगमे दश गकारानुच्चारयच्चैत्र इति प्रतिपत्तिः स्यात् न तु दशकृत्वो गकार इति। द्वितीये तु न स्वाभाविकभेदसिद्धिः न हि परोपाधिभेदेन स्वाभाविकमैक्यं विहन्यते। माभूत् नभसोऽपि कुम्भा-द्युपाधिभेदात् स्वाभाविको भेदस्तस्य व्याकृतव्यवहारात् वादिनिराकः। तदुक्तमाचार्यैः।

प्रयोजनं तु यज्जातेस्तद्वर्णादेव लप्स्यते।
व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिधीर्वृथेति॥

one indivisible ether. The current use of the rejected phrase (*i.e.* 'different' as applied to the *G's*,) is really caused by the *noise*, which in each case is different. This has been said by the great teacher;—

"The object which the Naiyáyikas seek by supposing a species, is in fact gained from the letter itself; and the object which they aim at by supposing an individuality in letters, is attained from audible noises;* so that the assumption of species is useless."

And again:—

"Since in regard to sounds such an irresistible instinct of recognition is always awake within us, it precludes by its superior evidence all the inferences to prove sound's non-eternity."

This at once refutes the argument given in the [Naiyáyika] treatise by Vágíśwara, entitled the *Mána-manohara*,—"sound is non-eternal from the fact of its being a special quality belonging to an organ of sense† (sc. the ear), just as form is to the eye."

We can also refute it in the following ways; (*a.*) if we follow the (Sánkhya and Vedánta) view that sound is a substance, it is evidently overthrown‡ (as in that case sound cannot be a quali-

* "What is meant by 'noise' (*náda*) is these 'conjunctions' and 'disjunctions,' occasioned by the vibrations of the air." Ballantyne, *Mímámsá Aphorisms*, i. 17.

† The Nyáya holds that form and sound are respectively special qualities of the elements light and ether; and as the organs of seeing and hearing are composed of light and ether, each will of course have its corresponding special quality.

‡ In p. 131, l. 7 I read प्रत्यक्षासिद्धेः

प्रत्यभिज्ञा यदा शब्दे जागर्त्ति निरवग्रहा ।
अनित्यत्वानुमानानि सैव सर्वाणि बाधते ॥

एतेनेदमपास्तम् । यद्वादि वागीश्वरेण मानमनोहरे अनित्यः शब्दः इन्द्रियविशेषगुणत्वाच्चक्षूरूपवदिति । शब्दद्रव्यत्ववादिनां पक्षे स्वरूपासिद्धेः ध्वन्यंशे सिद्धसाधनत्वाच्च [illegible] । तद्यथा [illegible] प्रत्यक्षतां महता [illegible] परिपक्वम् निवृत्तः कोलाहलः उत्पन्नः शब्द इति [illegible]

ty); (*b.*) if we take it as referring to the *noise,* not the *sound,* we have no dispute, as it only establishes what we ourselves allow; and (*c*) the inference is overthrown by the 'limiting condition' [*upádhi*] of *aśrávaṇatwa,* or 'the not causing audition.'* So Udayana tries at great length to establish that, although ether, the site of sound, is imperceptible, the non-existence of that which abides in this site is perceptible; and he then brings forward as an evidence for the non-eternity of sound, that sense-perception which causes the use of such common expressions as 'The tumult is stopped,' 'The sound has arisen.'† But he is sufficiently answered‡ by our old reply that the fallacious appearance of distinction arises from contrary characters being erroneously ascribed,—just as, in the story, the demon Tála went away (as

* Cf. my note suprá (on the Chárváka-darśana) for the *upádhi.* The *upádhi* or 'condition' limits a too general middle term; it is defined as "that which always accompanies the major term but does not always accompany the middle" Thus if the condition 'produced from wet fuel' is added to 'fire,' the argument 'the mountain has smoke because it has fire' is no longer a false one.—Here in answer to the Nyáya argument in the text, our author objects that its middle term ('from the fact of its being a special quality belonging to an organ of sense,') is too wide, i. e. it is sometimes found where the major term 'non-eternal' is not found, as e. g. in *sound* itself according to the Mímámsá doctrine. To obviate this he proposes to add the 'condition,' 'not causing audition,' as he will readily concede that all those things are non-eternal, which, *while not causing audition,* are special qualities belonging to an organ of sense. But I need scarcely add that this addition would make the whole argument nugatory. In fact the Púrva Mímámsá and the Nyáya can never argue together on this question of the eternity of sound, as their points of view are so totally different.

† In the former case we have the *dhwamśa* of sound, in the latter its *prág-abháva.*

‡ In p. 131, l. 12. I read *samapauhi* for *samāpohi,* i. e. the passive aorist of *sam + apa + úh.*

शब्दानित्यत्वे प्रमाणयति स्म । सोऽपि विरुद्धधर्म्मसंसर्गस्य सोपाधिक-त्वोपपादनन्यायेन दत्तरक्तबलिनेव तालः समापोहि । नित्यत्वे सर्व्व-दोपलब्ध्यनुपलब्धिप्रसङ्गो यो न्यायभूषणकारोक्तः सोऽपि ध्वनिसंस्कृत-स्योपलम्भाभ्युपगमात् प्रतिक्षिप्तः । यत्तु युगपदिन्द्रियसम्बन्धित्वेन प्रति-नियतसंस्कारकसंस्कार्य्यभावानुमानं तदात्मन्यनैकान्तिकमस्ति कलकले ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तशङ्काकलङ्काङ्कुरत्वेन स्वतः सिद्धं धर्म्मे प्रामाण्यमिति सुस्थितम् ।

well as Betála) when the offering of blood was given to the latter.* And as for the objection raised by the author of the *Nyáyabhúshaṇa* †,—that, if sound were eternal, the conclusion must follow that it would be either always perceptible or always imperceptible, this also is obviated by our allowing that we only perceive that sound which is manifested by our articulate noise.‡ And as for the (Naiyáyika) argument against the existence § of such a constant relation as this which is supposed between the manifested 'sound' and the manifesting 'noise,' since they both come simultaneously in contact with the sense of hearing,—this is invalid, as it will indisputably apply with equal force in the case if the soul. ||

Therefore as the Veda is thus proved to have not originated from any personal author, and as the minutest germ of suspicion

* I do not know this legend. Tála and Betála are the two demons who carry Vikramáditya on their shoulders in the Siṁhásan-battísí. It appears to be referred to here as illustrating how one answer can suffice for two opponents.

† This is probably a work by Bhásarvajna, see Dr. Hall's *Bibl. Index*, p. 26.

‡ *Dhwani* or our 'articulate noise,' produces the vibrations of air which render manifest the ever-existing sound. There is always an eternal but inaudible hum going on, which we modify into a definite speech by our various articulations. I take *saṁskṛita* here as equivalent to *abhivyakta*.

§ I read in p. 131, l. 15 संस्कारकसंस्कार्यभावाभावानुमानं.

|| It would be a case of *vyabhichāra*. The Naiyáyika argument would seem to be something as follows. Sound is not thus manifested by noise, since both are simultaneously perceived by the senses, just as we see in the parallel case individual and its species; these are both perceived together, but the individual is not manifested by the species. But the Mímáṁsá rejoins that this would equally apply to the soul and knowledge; as the internal sense perceives both simultaneously, and therefore knowledge ought not to be manifested by the soul, which is contrary to experience. But I am not sure that I rightly understand the argument.

स्यादेतत्

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः ।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः ॥
प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः ।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणतामिति ॥

वादिविवादर्शनात् कथंकारं स्वतः सिद्धं धर्म्मप्रामाण्यमिति सिद्धवत्कृत्य स्वीक्रियते । किञ्च किमिदं स्वतः प्रामाण्यं नाम? किं

against it is thus absolutely destroyed, we hold it as satisfactorily demonstrated that it has a self-established authority in all matters relating to duty.

"Well,"* [say our opponents,] "let this question rest; but how about another well-known controversy? It is said :—

'The Sánkhyas hold that both authoritativeness and non-authoritativeness are self-proved; the followers of the Nyáya hold that both are proved by something else (as inference, &c.;) the Buddhists hold that the latter is self-proved and the former proved by something else; the partizans of the Veda maintain that authoritativeness is self-proved, and non-authoritativeness proved by something else." Now we ask amidst all this discussion, how do the Mímámsakas accept as established their tenet that the authoritativeness of duty is self-proved? And what is the meaning of this so-called self-proved authoritativeness? Is it (*a*) that authoritativeness springs from itself? or (*b*) that it springs from the right knowledge in which it resides, or (*c*) that it springs from the instrumental causes (as the eye, &c.,) which produced the right knowledge in which it resides? or (*d*) that it resides in a particular knowledge produced by the instrumental causes which produced the right knowledge? † or (*e*) that it resides in a parti-

* Here begins a long *púrvapaksha* from p. 131, l. 18, down to p. 133, l. 9.

† This is Prabhákaras view, see Siddh. Muktáv. p. 118. The first knowledge is in the form 'this is a jar;' the second knowledge is the cognition of this perception in the form 'I perceive the jar;' and this latter produces authoritativness (*prámáṇya*) which resides in it as its characteristic.

स्वत एव प्रामाण्यस्य जन्म? आहोस्वित् स्वाश्रयज्ञानजन्यत्वं? किमु-
तस्वाश्रयज्ञानसामग्रीजन्यत्वम्? उताहो ज्ञानसामग्रीजन्यज्ञानविशेषाश्रि-
तत्वं? किंवा ज्ञप्तिसामग्रीमात्रजन्यज्ञानविशेषाश्रितत्वम्? तत्राद्यः स-
सावद्यः कार्य्यकारणभावस्य भेदसमानाधिकरणत्वेनैकस्मिन्नसम्भवात्,
नापि द्वितीयः गुणस्य सतो ज्ञानस्य प्रामाण्यं प्रति समवायिकारणतया
द्रव्यत्वापत्तात् नापि तृतीयः प्रामाण्यस्योपाधित्वे जातित्वे वा जन्मा-
योगात्, स्मृतित्वानधिकरणस्य ज्ञानस्य कार्य्यत्वन्नाभावः प्रमात्वस्यो-

cular knowledge produced by the instrumental causes *only* which produced the right knowledge?

(*a*) It cannot be the *first*, because wherever the relation of cause and effect is found, there must be difference, and therefore these two cannot reside in the same subject, (i. e. authoritativeness cannot cause itself.) (*b*) It cannot be the *second*, because, if knowledge, which is a quality, were the cause of authoritativeness, it would have to be a substance, as being an intimate cause.* (*c*) It cannot be the *third*, because 'authoritativeness' cannot properly be 'produced' at all,† whether we call it a general characteristic' (*upádhi*) or a species (*játi*);‡ for if we call it an *upádhi*, it is defined as the absolute non-existence of any contradiction to such a knowledge as does not possess the nature of recollection;§ and this cannot be produced, for we all allow that absolute non-existence is eternal; and still less can we speak of its being produced, if we regard it as a species. (*d*) Nor can it be the *fourth*; for wrong knowledge (as well as right knowledge,) is a particular kind of knowledge, and the instrumental causes

* Substances are 'intimate causes' to their qualities, and only substances have qualities, and if authoritativeness, which is a characteristic of right knowledge, were caused by it, it would be a quality of it, and therefore right knowledge would be a substance.

† The eye, &c. would be its instrumental causes.

‡ The first three categories 'substance,' 'quality,' and 'action' are called *jatis* or species; the last four, 'genus' '*viśesha*,' 'intimate relation' and 'non-existence' are called *upádhis* or 'general characteristics.'

§ The Púrva Mímámsá denies that recollection is right knowledge.

पाधिः न च तस्योत्पत्तिसम्भवः अत्यन्ताभावस्य नित्यत्वाभ्युपगमात् तदेव न जातेरपि तन्निर्वक्ष्यते नापि चतुर्थः ज्ञानविशेषो ह्यप्रमा विशेषसाम-ग्र्याश्च सामान्यं सामग्री अनुप्रविशति विशेषसामग्र्यामिव दृष्टसामग्रो अन्यथा तस्याकस्मिकत्वप्रसङ्गात् तस्मात् परतस्त्वेन स्वीकृतं प्रामाण्यं विज्ञानसामग्रीजन्याश्रितमित्यतिव्याप्तिरापद्येत । पञ्चविकल्पं विकल्प-यामः किं दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेव ज्ञानसामग्रीमात्रज-न्यत्वं, किं दोषाभावासहकृतज्ञानसामग्रीजन्यत्वं, नाद्यः दोषाभावसह-

which produce the general, are included in those which produce the particular *, just as the general idea 'seed' as applied to 'tree,' is included in the particular seed of any special tree, as e. g. the Dalbergia Sisu; otherwise we might suppose that the particular had no instrumental cause at all. Your definition would therefore extend too far (and include erroneous as well as true knowledge,)—for non-authoritativeness, which Vedantists and most Mímámsakas allow to be produced by something external, must also be considered as residing in a particular knowledge (i. e. a wrong knowledge) produced (in part) by the instrumental causes which produced the right knowledge. (*e*) As for your *fifth* view, we ask whether by being produced by the instrumental causes *only* which produced right knowledge, you mean to include or exclude the absence of 'fault?' It cannot be the former alternative, because the followers of the Nyáya who hold that authoritativeness is proved by something external (as inference, &c.,) would at once grant that authoritativeness is produced by the instrumental causes of knowledge combined with the absence of 'fault.' Neither can it be the latter alternative; for, inasmuch as it is certain that the absence of 'fault' is found combined with the various instrumental causes, this absence of 'fault' is fixed as by adamantine glue to be a cause of right knowledge, since right knowledge will always accompany its

* Wrong knowledge is produced by the same instrumental causes (as the eye, &c,) which produced right knowledge, but by these *together with a 'fault.'*

कृतज्ञानसामग्री जन्यत्वमेव परतः प्रामाण्यमिति परतः प्रामाण्यवादि-
भिरङ्गीकरणात् नापि द्वितीयः; दोषाभावसहकृतत्वेन सामग्र्यां सह-
कृतत्वे सिद्धे अनन्यथासिद्धान्वयव्यतिरेकसिद्धतया दोषाभावस्य कारण-
तायाः वज्रलेपायमानत्वात् अभावः कारणमेव न भवतीति चेत्तदा वक्त-
व्यम् अभावस्य कार्य्यत्वमस्ति न वा यदि नास्ति तदा पटप्रध्वंसानुप-
पत्त्या नित्यताप्रसङ्गः अथास्ति किमपराद्धं कारणत्वेनेति सेयमुभयतः पाशा-
रज्जुः। तदुक्तमुदयनेन।

presence and be absent if it is absent.* If you object that non-existence (or absence) cannot be a cause, we reply by asking you whether non-existence can be an effect or not. If it cannot, then we should have to allow that cloth is eternal, as its 'emergent non-existence' or destruction would be impossible. If it can be an effect, then why should it not be a cause also? So this rope binds you at both ends. This has also been said by Udayana (in his Kusumáñjali, i. 10.

"As existence, so too non-existence, is held to be a cause as well as an effect."

The argument in my opinion runs as follows; right knowledge depends on some cause† other than the common causes of knowledge, from the very fact that, while it is an effect, it is also knowledge, just as wrong knowledge does‡ Authoritativeness is known through something external to itself (as inference), because doubt arises in regard to it in an unfamiliar case, as we also see in non-authoritativeness.

Therefore, as we can prove that authoritativeness is both produced and recognized by means of something external, the Mímáṁśa tenet that 'authoritativeness is self-proved,' is like a gourd over-ripe and rotten."—

* *Scil.* if there be *doshábháva* there is *pramá* if not, not. In p. 132, l. 20. I read *doshábhávatwena* for *doshábhávasahakritatwena.*

† *Scil.* or the absence of 'fault' *doshábháva.*

‡ Wrong knowledge has *doshabháva* or the presence 'of fault' as its cause in addition to the common causes.

भावो यथा तथाभावः कारणं कार्य्यवन्मत इति ।

तथा च प्रयोगः विमता प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्य्यत्वे सति तद्विशेषत्वात् अप्रमावत् प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् तस्मादुत्पत्तौ ज्ञप्तौ च परतस्त्वे प्रमाण-सम्भवात् स्वतः सिद्धं प्रामाण्यमित्येतत् पूतिकूष्माण्डायत इति चेत् तदेतदाकाशमुष्टिहननायते । विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्त-

This long harangue of our opponent, however, is but a vain attempt to strike the sky with his fist; for (*a*) we mean by our phrase 'self-proved' that while right knowledge is produced by the instrumental causes of knowledge, it is not produced by any other cause (as 'fault,' &c). The following is our argument as drawn out in full. Right knowledge is not produced by any other instrumental causes than those of knowledge, while at the same time it is produced by these, because it is not the site of wrongness of knowledge, just like a jar. * Nor can Udayana's † argument be brought forward as establishing the dependence of authoritativeness on something external, for it is swallowed up by the dragon of the equally potent contradictory argument. "Right knowledge is not produced by any cause which is other than the causes of knowledge, except fault,' ‡ from the very fact of its being knowledge,—like wrong knowledge. Again since right knowledge can arise from the causes of knowledge *per se*, it would

* Wrongness of knowledge (*apramátwa*) can only reside in knowledge as a characteristic or quality thereof; it cannot reside in a jar. The jar is of course produced by other instrumental causes than those of knowledge (as e. g. the potter's stick, &c.), but it is not produced by these other causes *in combination* with being also produced by the instrumental causes of knowledge (with which it has nothing to do), and so by a quibble, which is less obvious in Sanskrit than in English, this wretched sophism is allowed to pass muster. The 'not' in 'not produced' is emphatic in the case of right knowledge, but not in that of the jar.

† I suppose this is the argument given at the close of the previous long púrvapaksha.

‡ These words 'except fault' (*dosha-vyatirikta*) are of course meaningless as far as 'right knowledge' is concerned; they are simply added to enable the author to bring in 'wrong knowledge' as an example. Wrong knowledge is caused by the causes of knowledge *plus* 'fault'; right knowledge by the former alone.

हेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति निरुक्तिसम्भवात् अस्ति चात्रानुमानं विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तजन्या न भवति अप्रमात्वानधिकरणत्वात् घटादिवत्. न चोदयनस्यानुमानं परतस्त्वसाधकमिति शङ्कनीयं प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रस्तत्वात् ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गाच्च । ननु दोषस्याप्रमाहेतुत्वेन [illegible]

be a needless complexity to suppose that anything else is a cause, whether you call it a *guṇa* or the absence of a 'fault' (*dosha*).*

"But surely if the presence of a fault is the cause of wrong knowledge, it is difficult to deny that its absence must be a cause of right knowledge?" We meet this, however, by maintaining that the absence of fault is only an indirect and remote cause, as it only acts negatively by preventing wrong knowledge. As it has been said:

"Therefore we reasonably conclude from the presence of *guṇas* the absence of 'faults' †, from their absence the non-existence of the two kinds of non-authoritativeness, ‡ and from this the general conclusion.§"

(*b.*) We maintain that the recognition of right knowledge is produced by the same causes only which make us perceive the first knowledge‖ (sc. the eye, mind, &c.) Nor can you object that this view is precluded, because it would imply that these could be no such thing as doubt; for we answer that doubt arises in cases

* The Nyáya holds that wrong knowledge is produced by a 'fault,' as jaundice, &c. in the eye; and right knowledge by a *guṇa* or 'virtue' (as the direct contact of the healthy organ with a true object), or by the absence of a 'fault.'

† The *guṇa* (or βελτίστη ἕξις) of an organ is not properly a cause of *pramá* but rather *doshábháva-bodhaka*.

‡ *Scil.* 'doubtful' (*sandigdha*) and 'ascertained non-authoritativeness' (*nischitáprámáṇya*).

§ *Utsarga* is a general conclusion which is not necessarily true in every particular case; here it means the conclusion that 'right knowledge has no special causes but the common causes of knowledge, the eye, &c.'

‖ The first knowledge is 'this is a jar,' the second knowledge is the cognition of this perception in the form 'I perceive the jar;' and simultaneously with it arises the cognition of the truth of the perception, i. e. its authoritativeness or *prámáṇya*.

प्रमां प्रति हेतुत्वं दुर्निवारमिति चेत् न दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्यथासिद्धत्वात् ।

तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः ।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोनपोदित इति ॥

तथा प्रमाज्ञप्तिरपि ज्ञानज्ञापकसामग्रीत एव जायते । न च संशयानुदयप्रसङ्गो बाधक इति युक्तं वक्तुं सत्यपि प्रतिभासपुष्कलकारके प्रतिबन्धकदोषादिसमवधानात् तदुपपत्तेः । किञ्च तावकमनुमानं स्वतः

where, although all the causes which produce knowledge are present, there is also the simultaneous presence of some opposing cause as a 'fault,' &c.

As for your argument (O Naiyáyika, given suprá, in p. 24, 25,) I ask, is your own argument an authoritative proof by itself or not? If it is, it proves too much (for it would properly apply to itself and lead us to infer its own dependence on external proof, whereas you hold it to be independent of such); and if it is not, we should have a case of regressus in infinitum for it will want some other proof to confirm its authoritativeness, and this too in its turn will want some fresh proof, and so on for ever.

As for the argument urged by Udayana * in the Kusumánjali, when he tries to establish that immediate and vehement action does not depend on the agent's certainty as to the authoritativeness of the speech which sets him acting,—"Action depends on wish, its vehemence on that of the wish †, wish on the knowledge that the thing wished-for is a means to attain some wished-for end, and this is only ascertained by an inference based on some 'sign' which proves that the thing is closely connected with the wished-for end, and this again depends on the things being in direct contact with the agent's senses; but

* This seems to be a quotation of Udayana's own words, and no doubt is taken from his very rare prose commentary on the Kusumánjali, a specimen of which I printed in the preface to my edition. This passage must come from the fifth book.

† I read tat-práchuryam for tatpráchurye in p. 134, l. 7.

प्रमाणं न वा आद्ये अनैकान्तिकता द्वितीये तस्यापि परतः प्रामाण्यमेवं तस्या तस्यापीत्यनवस्था दुरवस्था स्यात् । यद्त्र कुसुमाञ्जलावुदयनेन झटिति प्रचुरप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वाभावमापादयता प्रत्यगादि प्रवृत्तिर्हीच्छामपेक्षते तत्प्राचुर्य्ये चच्छाप्राचुर्य्यम् इच्छा चेष्टसाधनताज्ञानं तच्चेष्टजातीयत्वलिङ्गानुभवं सो ऽपीन्द्रियार्थसन्निकर्षं प्रामाण्यग्रहन्तु न क्वचिदुपयुज्यत इति तदपि तस्करस्य पुरस्तात्कक्षे सुवर्णमुपेत्य सर्व्वाङ्गोद्घाटनमिव प्रतिभाति अतः समीहितसाधनज्ञानमेव प्रमाणतयावगम्य-

throughout the whole series of antecedent steps the Mímámsá idea of the perception of authoritativeness is never once found as a cause of action,"—all this appears to us simple bluster like that of the thief who ostentatiously throws open all his limbs, when I actually saw him put the gold under his armpit. It is only the knowledge that the thing is a means to attain the desired end, and this knowledge recognized as authoritative and right knowledge, which causes the definite volition to arise at all; and in this we can distinctly trace the influence of that very perception of authoritativeness (whose existence he so vehemently pretended to deny.) If unhesitating action ever arose in any case from doubt, then as it might always arise so in every given case, all ascertainment of authoritativeness would be useless; and as the very existence of what is unascertained is rendered uncertain, poor authoritativeness would have to be considered as dead and buried!—But enough of this prolix controversy.

Since it has been said:—

"Therefore the authoritativeness of a cognition, which (authoritativeness) presented itself as representing a real fact, may be overthrown by the perception of a 'fault,' which perception is produced by some sign that proves the discrepancy between the cognition and the fact."*

---

* This stanza affirms that according to the Mímámsá school, while authoritativeness is self-proved, non-authoritativeness is proved from something else (as inference, &c.).

मानमिच्छां जनयतीत्यत्रैव स्फुट एव प्रामाण्यग्रहणस्योपयोगः । किञ्च क्वचिदपि चेन्निर्विचिकित्सा प्रवृत्तिः संशयादुपपद्येत तर्हि सर्व्वत्र तथाभावसम्भवात् प्रामाण्यनिश्चयो निरर्थकः स्यात् अनिश्चितस्य सत्त्वमेव दुर्लभमिति प्रामाण्यं दत्तजलाञ्जलिकं भवेत् इत्यलमतिप्रपञ्चेन । यस्मादुक्तं

तस्मात् सद्बोधकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोह्यत इति ॥

Therefore (applying the doctrine in this stanza) to the Veda, which is the self-proved and authoritative criterion in regard to duty, (we have the following divergency between the two great Mímámsá schools.). The Veda is composed of three portions, respectively called 'hymns' (*mantra*), 'explanatory passages, (*arthaváda*), and 'injunctions' (*vidhi*); and by 'injunction' we mean such sentences as "let him who desires heaven sacrifice with the jyotishṭoma." Here *ta*, the affix of the third person singular, implies an enjoining power, which is 'coloured' (or rendered definite) by the meaning of the root, according to the opinion of the followers of Bhaṭṭa Kumárila, who maintain that words signify* something definite by themselves (apart from the sentence). The followers of Guru Prabhákara, on the contrary, hold that the whole sentence is a command relating to the sacrifice, as they maintain that words only signify an action or something to be done.† Thus all has been made plain.

E. B. C.

* I take *vyutpatti* here as used for *śakti*; *siddhe* means *ghaṭádau*.

† These are the two great Mímámsá schools. The former called *abhihitánvaya-vádinah* hold (like the older Naiyáyika school) that words by themselves can express their separate meaning by the function *abhidhá* or 'denotation'; these are subsequently combined into a sentence expressing one connected idea. The latter, called *anvitábhidhána-vádinah*, hold that words only express a meaning as parts of a sentence and grammatically connected with each other; they only mean an action or something connected with an action. In *gám ánaya*, *gám* does not properly mean *gotwa*, but *ánayanánvita-gotwa*. We cannot have a case of a noun without some governing verb, and *vice versá*. Cf. Mr. Sayce (*Comparative Philology*, p. 136.) "Language is based upon the sentence, not upon the isolated word; for the latter can mean nothing except interjectional vagueness."

तस्माद्धर्मे स्वतःसिद्धप्रमाणभावे ज्योतिष्टोमेन स्वर्गकामो यजे-
तेत्यादिविध्यर्थवादमन्त्रनामधेयात्मके वेदे यजेतेत्यत्र तप्रत्ययः प्रकृत्यर्थो-
परक्तां भावनामभिधत्त इति सिद्धे व्युत्पत्तिमभ्युपगच्छतामभिहितान्वय-
वादिनां भट्टाचार्याणां सिद्धान्तो यागविषयो नियोग इति कार्ये व्यु-
त्पत्तिमनुसरतामन्विताभिधानवादिनां प्रभाकरगुरूणां सिद्धान्त इति
सर्वमवदातम् ॥

इति सर्वदर्शनसङ्ग्रहे जैमिनिदर्शनम् ॥

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10. MARCH 1st 1878. Vol. II.

C'

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
म्लङ्कररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

॥ अष्टमाध्यायस्य द्वितीयः पादः ॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ९ ॥

मतोरिह कार्यित्वेनोपादानात् सामर्थ्यलब्धं प्रातिपदिकं तन्मादिति मकारावर्णाभ्यां विशेष्यते । मकारावर्णविशिष्टया चोपधया इत्ययमर्थो भवति । मकारान्ताद् मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतोर्व इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति । मकारान्तात् । किंवान् । शंवान् । मकारोपधात् । शमीवान् । दाडिमीवान् । अवर्णान्तात् । वृक्षवान् । प्लक्षवान् । खट्वावान् । मालावान् । अवर्णोपधात् । पयस्वान् । यशस्वान् । भास्वान् । मादुपधायाश्चेति किम् । अग्निमान् । वायुमान् । अयवादिभ्य इति किम् । यवमान् । दल्मिमान् । ऊर्म्मिमान् । यव । दल्मि । ऊर्म्मि । भूमि कृमि । कुञ्चा । वशा । द्राक्षा * एतेषां मादुपधायाश्चेति प्राप्नोति । ध्रजि । ध्वजि । सञ्जि † इत्येतेषां छन्दसीर इति । हरित् । ककुत् । गरुत् । इत्येतेषां झय इति । इक्षु मधु द्रुम मण्ड धूम इत्येतेषां संज्ञायामिति । आकृतिगणश्च यवादिः । अक्षतमत्वो मतुब् यवादिषु द्रष्टव्यः । यस्य सति निमित्ते मतुपो वत्वं न दृश्यते स यवादिषु द्रष्टव्यः ‡ । इह नृमत इदं नार्मतमिति बहिरङ्गलक्षणत्वादवर्णोपधस्य मतुपो वत्वं न भवति ।

झयः ॥ १० ॥

झयन्तादुत्तरस्य मतोर्व इत्ययमादेशो भवति । अग्निचित्वान्

---

* ध्राक्षा । ध्वाक्षा । इत्यधिकं पुस्तकान्तरे ।

† ध्वजि । व्रजि । सञ्जि । निञ्जि । इत्यधिकमन्यस्मिन्पुस्तके ।

‡ यस्य सति निमित्ते मतुपो वत्वं न दृश्यते स यवादिषु द्रष्टव्य इति नास्त्येतस्मिन्पुस्तके ।

ग्रामः । उदश्वित्वान्घोषः । विद्युत्वान्बलाहकः । इन्द्रो मरुत्वान् । दृ-षद्वान्देशः ॥

संज्ञायाम् ॥ ११ ॥

संज्ञायां विषये मतोर्व इत्ययमादेशो भवति । अहीवती । कपीवती । ऋषीवती । मुनीवती ।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ १२ ॥

आसन्दीवद् अष्ठीवत् चक्रीवत् कक्षीवद् रुमण्वत् चर्म्मण्वती इत्येतानि संज्ञायां निपात्यन्ते । वत्वं पूर्वेणैव सिद्धमादेशार्थानि निपातनानि । आसन्दीवदिति । आसनशब्दस्यासन्दीभावो निपात्यते । आसन्दीवान् ग्रामः । आसन्दीवदहिस्थलम् । आसनवानित्येवान्यत्र । अपरे त्वाहुः । आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति । तथा चोक्तमौदुम्बरी राजासन्दी भवतीति । तस्य संज्ञायामिति वत्वेन सिद्धं आसन्दीवदित्येतत्प्रपञ्चार्थमिह पठ्यते । अष्ठीवदिति । अस्थ्नोऽष्ठीभावः । अष्ठीवानिति शरीरैकदेशसंज्ञा । अस्थिमानित्येवान्यत्र । चक्रीवदिति । चक्रशब्दस्य चक्रीभावो निपात्यते । चक्रीवान् राजा । चक्रवानित्येवान्यत्र । चक्रीवन्ति सदोहविर्द्धानानि भवन्तीत्येतत्तु छान्दसत्वाद् अनुगन्तव्यम् । कक्षीवदिति । कक्ष्यायाः संप्रसारणं निपात्यते । कक्षीवान्नाम ऋषिः । कक्ष्यावानित्येवान्यत्र । रुमण्वदिति लवणशब्दस्य रुमण्भावो निपात्यते । लवणवानित्येवान्यत्र । अपरे त्वाहुः । रुमेति प्रकृत्यन्तरमस्ति तस्यैतन्निपातनं नकारलोपाभावार्थं णत्वार्थं च । मतोर्वा नुडर्थमिति । चर्मण्वतीति । चर्मणो नलोपाभावो णत्वं च निपात्यते । मतोर्वा नुडागमः । चर्मण्वती नाम नदी । चर्म्मवतीत्येवान्यत्र ॥

उदन्वानुदधौ च ॥ १३ ॥

उदन्वानित्युदकशब्दस्य मतावुदन्भावो निपात्यते उदधावर्थे संज्ञायां विषये । उदन्वान्नाम ऋषिर्यस्यौदन्वतः पुत्रः । उदधौ उदन्वान् । यस्मिन्नुदकं धीयते स एवमुच्यते । उदधाविति किम् । उदक-

Digitized by Google

वान् घट इत्यत्र तु दधात्यर्थो न विवक्ष्यते किं तर्हि उदकसत्तासंबन्धसामान्यम्॥

राजन्वान्सौराज्ये॥ १४॥

राजन्वानिति निपात्यते सौराज्ये गम्यमाने। शोभनो राजा यस्मिन्निति स राजन्वान् देशः। राजन्वती पृथ्वी। राजवानित्येवान्यत्र॥

छन्दसीरः॥ १५॥

छन्दसि विषये इवर्णान्ताद्रेफान्ताच्चोत्तरस्य मतोर्वत्वं भवति। इवर्णान्तात्तावत्। त्रिवती याज्यानुवाक्या भवति। हरिवो मेदिनं त्वा। अधिपतिवती जुहोति। वह्निरग्निवानिव। आरेवानेतुमाविशत्। रयेर्मताविति संप्रसारणम्। सरस्वतीवान्। भारतीवान्। दधीवांश्चरुः। छन्दसि सर्वे विधयो विकल्प्यन्त इतीह न भवति। सप्तर्षिमन्तम्। ऋषिमान्। ऋतीमान्। सूये ते द्यावापृथिवीमन्तमिति। रेफान्तात्। गीर्वान्। धूर्वान्। आशीर्वान्॥

अनो नुट्॥ १६॥

छन्दसीति वर्तते ऽनन्तादुत्तरस्य मतोर्नुडागमो भवति छन्दसि विषये। अक्षण्वन्तः कर्णवन्तः सखायः। अस्थन्वन्तं यदनस्था बिभर्ति। अक्षण्वता लाङ्गलेन। शीर्षण्वती। मूर्द्धन्वती। नुटोसिद्धत्वात्तस्य च वत्वं न भवति। ततः परस्य च भवति॥

नाद्घस्य॥ १७॥

नकारान्तादुत्तरस्य घसंज्ञकस्य नुडागमो भवति छन्दसि विषये। सुपथिन्तरः। दस्युहन्तमः॥ भूरिदाव्नस्तुड्वक्तव्यः॥ * ॥ भूरिदावत्तरः॥ ईद्रथिनः॥ * ॥ रथिन ईकारान्तादेशो घे परतः। रथीतरः। रथशब्दादेव वा मत्वर्थीयमीकारः। छन्दसीवनिपाविति॥

कृपो रो लः॥ १८॥

कृपेर्धातो रेफस्य लकारादेशो भवति। र इति श्रुतिसामान्यमुपादीयते। तेन यः केवलो रेफो यश्च ऋकारस्थस्तयोर्द्वयोरपि ग्रहणम्।

Digitized by Google

ल इत्यपि सामान्यमेवोपादीयते । ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते ऋकारस्याप्येकदेशविकारद्वारेण लृकारस्तथा लृटि च कृप इत्येवमादयो निर्दुष्टा उपपद्यन्ते । कल्प्ता । कल्प्तारौ । कल्प्तारः । क्लृप्तः । क्लृप्तवान् । कृपा इत्येतत्कृपेः संप्रसारणं चेति भिदादिषु पाठाद्भवति तस्य हि कृतसंप्रसारणस्य लाक्षणिकत्वात् इह कृप इति ग्रहणं नास्ति । कृपणकृपाणकृपीटकर्पूरादयोऽपि कृपेरेव द्रष्टव्याः । उणादयो बहुलमिति वा कृपेरेव लत्वाभावः ॥ बालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यतइति वक्तव्यम् ॥ * ॥ बालः । बारः । मूलम् । मूरम् । लघु । रघु । असुरः । असुलः । अलम् । अरम् । अङ्गुलिः । अङ्गुरिः ॥ कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यतइति वक्तव्यम् ॥ * ॥ कपिरकः । कपिलकः । तिल्पिलीकम् । तिर्पिरीकम् । लोमानि । रोमाणि । पांशुरम् । पांशुलम् । कर्म । कल्म । रलयोरेकत्वस्मरणमिति केचित् । किमिदमेकत्वस्मरणमिति । समानविषयत्वमेव तयोः स्मर्यतइत्यर्थः ॥

उपसर्गस्यायतौ ॥ १९ ॥

अयतौ परत उपसर्गस्य यो रेफस्तस्य लकार आदेशो भवति । प्लायते । पलायते । अत्र च योऽयमेकादेशस्तस्य स्थानिवद्भावादयतेरुपसर्गस्य च विभागे सति यद्ययतिग्रहणं रेफस्य विशेषणं तदा येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति एकेन व्यवधानेऽपि सति लत्वं भवति । तथा च पल्ययते इत्यत्रापि भवति । उपसर्गस्य विशेषणे त्वयतिग्रहणे सिद्धमेवैतत्सर्वं प्रतेरपि तु व्यवहितेऽपि प्राप्नोति । तत्र केषां चिद्दर्शनं भवितव्यमेव प्लत्ययतइति । प्रथमपक्षदर्शनाभिनिविष्टास्तु प्रत्ययतइत्येव भवतीति मन्यन्ते । अपरे तु प्रतिशब्दोपसृष्टस्यायतेः प्रयोगमेव नेच्छन्ति । दुस् निस् इत्येतयोस्तु रुत्वस्यासिद्धत्वाल्लत्वेन नैव भवितव्यम् । निरयणम् । दुरयणम् ।

ग्रो यङि ॥ २० ॥

गृ इत्येतस्य धातो रेफस्य लकार आदेशो भवति यङि परतः ।

निजेगिल्यते । निजेगिल्येते । निजेगिल्यन्ते । भावगर्हायां यो यङ्विहितः * । केचित् य इति गिरतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति । अपरे तु गिरतेरेव न गृणातेः । गृणातेर्हि यङेव नास्ति अनभिधानादिति । यङीति किम् । निगीर्यते ।

अचि विभाषा ॥ २१ ॥

अजादौ प्रत्यये परतो यो रेफस्य विभाषा लकारादेशो भवति । निगिरति । निगिलति । निगरणम् । निगलनम् । निगारकः । निगालकः । इयं तु व्यवस्थितविभाषा । तेन गल इति प्राण्यङ्गे नित्यं लत्वं भवति । गर इति विषे नित्यं न भवति । निगार्यते । निगाल्यत इति णिलोपस्य स्थानिवद्भावादचि विभाषेति लत्वविकल्पः । पूर्वत्रासिद्धे न स्थानिवदिति एतदपि सापवादमेव तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति । अन्तरङ्गत्वाद्वा कृते लत्वविकल्पे णिलोपो भविष्यति । गिरो गिर इत्यस्य धातोः स्वरूपग्रहणे तत्प्रत्यये विधानमिति लत्वं न भवति । गिरतिर्वा लत्वविधावधिकृतो गृणातेरसद्रूपम् ॥

॥ परेश्च घाङ्कयोः ॥ २२ ॥

परि इत्येतस्य यो रेफस्तस्य घशब्देऽङ्कशब्दे च परतो विभाषा लकार आदेशो भवति । परिघः । पलिघः । पर्यङ्कः । पल्यङ्कः ॥ घ इति स्वरूपग्रहणमत्रेष्यते, न तरप्तमपौ इति ॥ योगे चेति वक्तव्यम् ॥ * ॥ परियोगः । पलियोगः ॥

॥ संयोगान्तस्य लोपः ॥ २३ ॥

संयोगान्तस्य पदस्य लोपो भवति । गोमान् । यवमान् । कृतवान् । हतवान् । इह श्रेयान् भूयानिति रुत्वं परमप्यसिद्धत्वात् संयोगान्तस्य लोपं न बाधते । जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति । यशः पय इति । दध्यत्र मध्वत्रेत्यत्र तु यणादेशस्य बहिरङ्गलक्षणस्या-

---

* रुत्वे कृते रपरत्वे च दीर्घस्यासिद्धत्वाचित्यत्वाच्च लत्वे कृते तन्निमित्तत्वाभावाद्दीर्घत्वं न भवति । इत्यधिकमेकस्मिन्पुस्तके ।

सिद्धत्वात्संयोगान्तलोपो न भवति । पदस्येति किम् । गोमन्तौ गोमन्त इति ॥

रात्सस्य ॥ २४ ॥

संयोगान्तपदस्य यो रेफस्तस्मादुत्तरस्यान्त्यस्य सकारस्य लोपो भवति । गोभिरक्षाः । प्रत्यञ्चमत्साः । क्षरतेः त्सरतेश्च लुङि सिचश्छान्दसत्वादीडभावो बहुलं छन्दसीति वचनाद्वृद्धौ सति रूपमेतत् । मातुः पितुरिति । ऋत उदिति उत्वे कृते रपरत्वे च सति रात्सस्येति सलोपः । सिद्धे सत्यारम्भो नियमार्थः । रात्सस्यैव लोपो भवति नान्यस्येति । ऊर्जेः क्विप् । ऊर्क् । मृजेर्लङि अमार्ट् ॥

धि च ॥ २५ ॥

धकारादौ प्रत्यये परतः सकारस्य लोपो भवति । अलविध्वम् । अलविढ्वम् । अपविध्वम् । अपविढ्वम् । यद्यत्र सकारलोपो न स्यात् । सिचः षत्वे जश्त्वे च विभाषेट इति मूर्द्धन्याभावपक्षेऽपि न धकारः श्रूयेत ॥ इतः प्रभृति सिचः सकारस्य लोप इष्यते ॥ इह न भवति । चकाद्धी पलितं शिर इति । तथा पयो धावतीत्येवमादीनामपि न भवति । सग्धिर्वब्धामिति छान्दसो वर्णलोपः । भाष्यकारस्त्वाह । चकाधीत्येव भवितव्यमिति । तेन पयो धावतीत्येवमादौ यत्नान्तरमास्थेयम् ।

धिसकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।
आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति ॥
सर्वमेवं प्रसिद्धं स्याच्छ्रुतिश्चापि न विद्यते ।
लुङश्चापि न मूर्द्धन्ये ग्रहणं सेटि दुष्यति ॥
घसिभसोर्न सिध्येत तस्मात्सिज्ग्रहणं न तत् ।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे ॥
निष्कर्तारमध्वरस्येत्येवं प्राप्ते ॥

झलो झलि ॥ २६ ॥

झल उत्तरस्य सकारस्य झलि परतो लोपो भवति । अभित्त ।

अभित्थाः । अच्छित्त । अच्छित्थाः । अवात्ताम् । अवात्तेत्यत्र वा सिचः सकारलोपस्यासिद्धत्वात्सस्यार्द्धधातुकइति सकारस्य तकारः । झल इति किम् । अमंस्त । अमंस्थाः । झलीति किम् । अभित्साताम् । अभित्सत । अयमपि सिच एव लोपस्तेनेह न भवति, सोमसुत् स्तोता । दृषत् स्थानमिति ॥

ह्रस्वादङ्गात् ॥ २७ ॥

ह्रस्वान्तादङ्गादुत्तरस्य लोपो भवति झलि परतः । अकृत । अकृथाः । अहृत । अहृथाः । ह्रस्वादिति किम् । अच्योष्ट । अप्लोष्ट । अङ्गादिति किम् । अलाविष्टाम् । अलाविषुः । झलीत्येव । अकृषाताम् । अकृषत । अयमपि सिच एव लोपस्तेनेह न भवति । द्विष्टरां द्विष्टमामिति । सुजन्ताद् द्विशब्दात्तरप्तमपो अद्रव्यप्रकर्षे आतिशायिकः आम् प्रत्ययः ॥

इट ईटि ॥ २८ ॥

इट उत्तरस्य सकारस्य लोपो भवति ईटि परतः । अदावीत् । असेवीत् । अकोषीत् । अमोषीत् । इट इति किम् । अकार्षीत् । अहार्षीत् । ईटीति किम् । अलाविष्टाम् । अलाविषुः ॥

स्कोः संयोगाद्योरन्ते च ॥ २९ ॥

पदस्यान्ते यः संयोगः झलि परतो वा संयोगस्तदाद्योः सकारककारयोर्लोपो भवति । लग्नेः । लग्नः । लग्नवान् । साधुलक् । ककारस्य । तक्षेः, तट् । तष्टवान् । काष्टतट् ॥ झलि सङीति वक्तव्यम् ॥ * ॥ किमिदं सङीति । सनः सप्रभृति महिङो ङकारेण प्रत्याहारः । इह मा भूत् । काष्ठशक्स्यातेति थकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति । तदत्र शकेः क्विबन्तस्य प्रयोग एव नास्तीत्याह । काष्ठशगेव नास्ति कुतोऽयं काष्ठशकि तिष्ठेदिति । वास्यर्थे, काक्यर्थमिति । अत्रापि बहिरङ्गलक्षणस्य यणादेशस्यासिद्धत्वात् संयोगादिलोपो न भवति । स्कोरिति किम् । नर्नर्त्ति । वर्वर्त्ति । संयोगाद्योरिति किम् । पयःशक् । अन्ते चेति किम् । तक्षिता । तक्षकः ॥

चोः कुः ॥ ३० ॥

चवर्गस्य कवर्गादेशो भवति । झलि परतः पदान्ते च । पक्ता । पक्तुम् । पक्तव्यम् । ओदनपक् । वक्ता । वक्तुम् । वक्तव्यम् । वाक् । क्रुञ्चेस्त्वत्र सहीति वचनाद् अकारस्य चकारे झलि कुत्वं न भवति । युजिक्रुञ्चां चेति निपातनाद्वा । नकारोपधो वा धातुरयं रेफरहितश्च कुञ्च कौटिल्याल्पीभावयोरिति पठ्यते । नकारलोपे हि निकुचितिरिति दृश्यते । युजिक्रुञ्चां चेति तस्यैव रेफोपधिको नकारस्य लोपाभावश्चेति निपात्यते । तथानुस्वारस्य परसवर्णस्य चासिद्धत्वात् अकार एव नास्तीति कुत्वं न भविष्यति ॥

हो ढः ॥ ३१ ॥

हकारस्य ढकारादेशो भवति झलि परतः पदान्ते च । सोढा । सोढुम् । सोढव्यम् । तुराषाट् । वोढा । वोढुम् । वोढव्यम् । प्रष्ठवाट् । दित्यवाट् ॥

दादेर्धातोर्घः ॥ ३२ ॥

दकारादेर्धातोर्हकारस्य घकारादेशो भवति झलि परतः पदान्ते च । दग्धा । दग्धुम् । दग्धव्यम् । काष्ठधक् । दोग्धा । दोग्धुम् । दोग्धव्यम् । गोधुक् । दादेरिति किम् । लेढा । लेढुम् । लेढव्यम् । गुडलिट् । धातोरिति दादिसमानाधिकरणमेतत्, किं तर्हि तद्विशेषणमवयवषष्ठ्यन्तं धातोरवयवो यो दादिः शब्दस्तदवयवस्य हकारस्येति किमेवं कृतं भवति । अधोगित्यत्रापि घकारः सिद्धो भवति । कथं द्रोग्धा । दोग्धुमिति व्यपदेशिवद्भावात् । अथ वा धातूपदेशे यो दादिरित्येवं विज्ञायते । तथा च दामलिहमिच्छति दामलिह्यति । दामलिह्यतेः क्विप्प्रत्ययः । दामलिडित्यत्रापि न भवति ॥

वा द्रुहमुहष्णुहष्णिहाम् ॥ ३३ ॥

द्रुह मुह ष्णुह ष्णिह इत्येतेषां धातूनां हकारस्य वा घकारादेशो भवति झलि परतः पदान्ते च । द्रुह् । द्रोग्धा । द्रोढा । मित्रध्रुक् । मि-

ध्रुट् । मुह । उन्मोग्धा । उन्मोढा । उन्मुक् । उन्मुट् । स्नुह । उत्स्नोग्धा । उत्स्नोढा । उत्स्नुक् । उत्स्नुट् । स्निह । स्नेग्धा । स्नेढा । स्निक् । स्निट् । द्रुहादित्वाद् घत्वं नित्यं प्राप्तमितरेषामप्राप्तमेव घत्वं विकल्प्यते ॥

नहो धः ॥ ३४ ॥

नहो हकारस्य धकारादेशो भवति झलि परे पदान्ते च । नद्धम् । नद्धुम् । नद्धव्यम् । उपानत् । परीणत् ॥

आहस्थः ॥ ३५ ॥

आहो हकारस्य थकारादेशो भवति झलि परतः । इदमात्थ । किमात्थ । आदेशान्तरकरणं झषस्तथोर्धोऽधः इत्यस्य निवृत्त्यर्थम् । झलीत्येव । आह । आहतुः । आहुः ॥ हृग्रहोर्भश्छन्दसि हस्येति वक्तव्यम् ॥ * ॥ गर्दभेन संभरति । सभीता जभिरे । उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ॥

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥ ३६ ॥

व्रश्च भ्रस्ज सृज मृज यज राज भ्राज इत्येतेषां छकारान्तानां शकारान्तानां च षकार आदेशो भवति झलि परतः पदान्ते च । व्रश्च । व्रष्टा । व्रष्टुम् । व्रष्टव्यम् । मूलवृट् । भ्रस्ज । भ्रष्टा । भ्रष्टुम् । भ्रष्टव्यम् । धानाभृट् । सृज । स्रष्टा । स्रष्टुम् । स्रष्टव्यम् । रज्जुसृट् । मृज । मार्ष्टा । मार्ष्टुम् । मार्ष्टव्यम् । कंसपरिमृट् । यज । यष्टा । यष्टुम् । यष्टव्यम् । उपयट् । राज । सम्राट् । स्वराट् । विराट् । राजभ्राजोः पदान्तार्थं ग्रहणं झलादिराभ्यामिटा पर्यवपद्यते । केचित्तु राष्ट्रिरिति क्तिचन्तमिच्छन्ति । छकारान्तानाम् । प्रच्छ । प्रष्टा । प्रष्टुम् । प्रष्टव्यम् । शब्दप्राट् । च्छ्वोः शूडनुनासिके चेत्यत्र क्ङितीत्यनुवर्त्तते इति छग्रहणमिह क्रियते । शकारान्तानाम् । लिश । लेष्टा । लेष्टुम् । लेष्टव्यम् । लिट् । विश । वेष्टा । वेष्टुम् । वेष्टव्यम् । विट् ॥

एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥ ३७ ॥

धातोरवयवो य एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः पदान्ते च। बुध्। भोत्स्यन्ते। अभुध्वम्। अर्थभुत्। गुह। निघोक्ष्यते। न्यघुढ्वम्। पर्णघुट्। दुह। धोक्ष्यते। अधुग्ध्वम्। गोधुक्। अजर्घाः। गृधेर्यङ्लुगन्तस्य लङि सिपि लघूपधगुणे कृते सिपो हल्ङ्यादिलोपे च धातोरवयवस्यैकाचो बशः स्थाने भष्भावस्ततो धकारस्य जश्त्वं दश्चेति रुत्वं रो रीति पूर्वरेफस्य लोपः ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घत्वम्। गर्द्धभयतेरप्रत्ययः। गर्द्धप्। एकाच इति किम्। दामलिहमिच्छति दामलिह्यति, दामलिह्यतेरप्रत्ययः। दामलिट्। असति ह्येकाज्ग्रहणे धातोरित्येतद्बशो विशेषणं स्यात्। बश इति किम्। क्रुध। क्रोत्स्यति। झलन्तस्येति किम्। दास्यति। स्ध्वोरिति किम्। बोद्धा। बोद्धुम्। बोद्धव्यम्। धकारस्य वकारोपसृष्टस्य ग्रहणं किम्। दादद्धि। दध धारण इत्येतस्य यङ्लुकि लोटि हुझल्भ्यो हेर्धिरिति धिभावे सत्येतद्भवति। अत्र चत्वारो बशः स्थानिनो भषादेशाश्चत्वार एव। तत्र संख्यातानुदेशे प्राप्ते डकारस्य स्थानिनोऽभावाद् ढकारादेशो न भवति। आन्तर्यतो व्यवस्था विज्ञास्यते॥

दधस्तथोश्च ॥ ३८ ॥

दध इति दधातिः कृतद्विर्वचनो निर्दिश्यते। तस्य झलन्तस्य बशः स्थाने भष् आदेशो भवति तकारथकारयोः परतश्चकारात् स्ध्वोश्च परतः। धत्तः। धत्थः। धत्से। धध्वम्। धद्ध्वम्। वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति। अभ्यासजश्त्वस्य चासिद्धत्वम्। तथोरिति किम्। आनन्तर्यात्स्ध्वोरेव विज्ञायेत। चकारस्तयोरनुवृत्त्यर्थः। झषन्तस्येत्येव। दधाति॥

झलां जशोऽन्ते ॥ ३९ ॥

झलां जश आदेशा भवन्ति पदस्यान्ते वर्तमानानाम्। वाग्व।

ष्वलिड्च । अग्निर्चिदच । त्रिष्टुबच । अन्तग्रहणं झलीत्येतस्य निवृत्त्यर्थम् । वस्ता । वस्तव्यम् ॥

झषस्तथोर्धोऽधः ॥ ४० ॥

झष उत्तरयोस्तकारथकारयोः स्थाने धकार आदेशो भवति । दधातिं वर्जयित्वा । लब्धा । लब्धुम् । लब्धव्यम् । अलब्ध । अलब्धाः । दुह । दोग्धा । दोग्धुम् । दोग्धव्यम् । अदुग्ध । अदुग्धाः । लिह । लेढा । लेढुम् । लेढव्यम् । अलीढ । अलीढाः । बुध् । बोद्धा । बोद्धुम् । बोद्धव्यम् । अबुद्ध । अबुद्धाः । अध इति किम् । धत्तः । धत्थः ॥

षढोः कः सि ॥ ४१ ॥

षकारढकारयोः ककारादेशो भवति सकारे परतः । षकारस्य । विष । विवेक्ष्यति । अवेक्ष्यत् । विविक्षति । ढकारस्य । लिह । लेक्ष्यति । अलेक्ष्यत् । लिलिक्षति । सीति किम् । पिनष्टि । लेढि ॥

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ४२ ॥

रेफदकाराभ्यामुत्तरस्य निष्ठातकारस्य नकार आदेशो भवति पूर्वस्य च दकारस्य । रेफान्तात्तावत् । आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । निगीर्णम् । अवगूर्णम् । दकारात् । भिन्नः । भिन्नवान् । छिन्नः । छिन्नवान् । रदाभ्यामिति किम् । कृतः । कृतवान् । र इत्यत्र रश्रुतिसामान्यं नोपादीयते किं तर्हि व्यञ्जनमात्रम् । रेफसामान्यनिर्देशेपि सति रेफात्परा याऽभक्तिस्तद्व्यवधानान्नत्वं न भवति । निष्ठेति किम् । कर्ता । हर्ता । त इति किम् । चरितम् । मुदितम् । पूर्वस्येति किम् । परस्य मा भूत् । भिन्नवद्भ्याम् । भिन्नवद्भिः । इह कृतस्यापत्यं कार्तिरिति वृद्धेर्बहिरङ्गलक्षणाया असिद्धत्वान्नत्वे कर्तव्ये रेफस्यासिद्धत्वम् ॥

संयोगादेरातो धातोर्यण्वतः ॥ ४३ ॥

संयोगादिर्यो धातुराकारान्तो यण्वान् तस्मादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । प्रद्राणः । प्रद्राणवान् । ग्लानः । ग्लान-

वान् । संयोगादेरिति किम् । यातः । यातवान् । आत इति किम् । च्युतः । च्युतवान् । प्लुतः । प्लुतवान् । धातोरिति किम् । निर्यातः । निर्वातः । यण्वत इति किम् । स्नातः । स्नातवान् ॥

ल्वादिभ्यः ॥ ४४ ॥

लूञ् छेदने इत्येतत्प्रभृति वृ वरणे इति यावत् वृत्करणेन समापिता ल्वादयो गृह्यन्ते । तेभ्य उत्तरस्य निष्ठातकारस्य नकारादेशो भवति । लूनः । लूनवान् । धूनः । धूनवान् । जीनः । जीनवान् ॥ ऋकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् ॥ * ॥ कीर्णिः । गीर्णिः । शीर्णिः । लूनिः । पूनिः ॥ दुग्वोर्दीर्घश्चेति वक्तव्यम् ॥ * ॥ दु, आदूनः । गु, विगूनः ॥ पूञो विनाशइति वक्तव्यम् ॥ * ॥ पूना यवाः । विनष्टा इत्यर्थः । विनाशइति किम् । पूतं धान्यम् ॥ सिनोतेर्ग्रासकर्म्मकर्तृकस्येति वक्तव्यम् ॥ * ॥ सिनो ग्रासः स्वयमेव । ग्रासकर्मकर्तृकस्येति किम् । सिता पाशेन सूकरी । ग्रासोपि यदा कर्मैव भवति न कर्म्मकर्ता तदा न भवति । सितो ग्रासो देवदत्तेनेति ॥

ओदितश्च ॥ ४५ ॥

ओकारेतो धातोरुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । ओलस्जी । लग्नः । लग्नवान् । ओविजी । उद्विग्नः । उद्विग्नवान् । ओप्यायी वृद्धौ । आपीनः । आपीनवान् । स्वादय ओदितः । षूङ् । सूनः । सूनवान् । दूङ् । दूनः । दूनवान् । दीङ् । दीनः । दीनवान् । डीङ् । डीनः । डीनवान् । धीङ् । धीनः । धीनवान् । मीङ् । मीनः । मीनवान् । रीङ् । रीणः । रीणवान् । लीङ् । लीनः । लीनवान् । व्रीङ् । व्रीणः । व्रीणवान् ॥

क्षियो दीर्घात् ॥ ४६ ॥

क्षियो धातोर्दीर्घादुत्तरस्य निष्ठातकारस्य नकारादेशो भवति । क्षीणाः क्लेशाः । क्षीणो जाल्मः । क्षीणस्तपस्वी । क्षियो निष्ठायामण्यदर्थे वा आक्रोशदैन्ययोरिति दीर्घत्वं भवति । दीर्घादिति किम् । अक्षि-

तमसि मामेवेष्ठाः । अवितनमिति क्तप्रत्ययो भावे । भावश्च ग्रयदर्थे इति दीर्घाभावः । ह्रस्वान्तस्यापि धात्वनुकरणस्य इष्टु इयङा निर्देशः । त्रियो निष्ठायामण्यदर्थेइत्यत्र दीर्घग्रहणं क्रियते विपराभ्यां जेरित्येवमादै तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वाद् जिरूपसामान्यानुकरणं द्रष्टव्यम् ॥

श्यो ऽस्पर्शे ॥ ४७ ॥

श्यायतेरुत्तरस्य निष्ठातकारस्यास्पर्शे नकार आदेशो भवति । शीनं घृतम् । शीनं मेदः । शीना वसा । अस्पर्शइति किम् । शीतं वर्त्तते । शीतो वायुः । शीतमुदकमित्यत्र गुणभूतोपि स्पर्शो नत्वप्रतिषेधस्य संप्रसारणस्य च निमित्तं भवति । गुणे च स्पर्शे प्रतिषेधोयं न रोगे, तेन प्रतिशीन इत्यत्र नत्वं भवत्येव ॥

अञ्चो ऽनपादाने ॥ ४८ ॥

अञ्चतेरुत्तरपदस्य निष्ठातकारस्य नकारादेशो भवति न चेदपादानं तत्र भवति । समक्नौ शकुनेः पादौ । तस्मात्पशवो न्यक्नाः । अनपादानइति किम् । उदक्तमुदकं कूपात् । व्यक्तमित्येतदञ्जे रूपम् ॥

दिवो ऽविजिगीषायाम् ॥ ४९ ॥

दिव उत्तरस्य निष्ठातकारस्य नकारादेशो भवति अविजिगीषायामर्थे । आद्यूनः । परिद्यूनः । अविजिगीषायामिति किम् । द्यूतं वर्त्तते । विजिगीषया हि तत्राक्षपातनादि क्रियते ॥

निर्वाणो ऽवाते ॥ ५० ॥

निर्वाण इति निस्पूर्वाद्वातेरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते । न चेद्वाताधिकरणो वात्यर्थो भवति । निर्वाणोऽग्निः । निर्वाणः प्रदीपः । निर्वाणो भिक्षुः । अवातइति किम् । निर्वातो वातः । निर्वातं वातेन । निर्वाणः प्रदीपो वातेनेत्यत्र तु प्रदीपाधिकरणो वात्यर्थो वातस्तु तस्य करणमिति भवत्येव नत्वम् ॥

Digitized by Google

शुषः कः ॥ ५१ ॥

शुषेर्द्धातोरुत्तरस्य निष्ठातकारस्य ककारादेशो भवति । शुष्कः । शुष्कवान् ॥

पचो वः ॥ ५२ ॥

पचेर्द्धातोरुत्तरस्य निष्ठातकारस्य वकारादेशो भवति । पक्वः । पक्ववान् ॥

क्षायो मः ॥ ५३ ॥

क्षैधातोरुत्तरस्य निष्ठातकारस्य मकारादेशो भवति । क्षामः । क्षामवान् ॥

प्रस्त्योऽन्यतरस्याम् ॥ ५४ ॥

प्रपूर्वात् स्त्यायतेरुत्तरस्य निष्ठातकारस्यान्यतरस्यां मकारादेशो भवति । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीतः । प्रस्तीतवान् । यदा मत्वं नास्ति तदा संयोगादेरातो धातोर्यण्वत इत्यस्य पूर्वत्रासिद्धत्वात् संप्रसारणं प्रथमं क्रियते । तत्र कृते निमित्तव्याघातान्नत्वं न भवति ॥

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥ ५५ ॥

फुल्ल क्षीब कृश उल्लाघ इत्येते निपात्यन्ते न चेदुपसर्गादुत्तरा भवन्ति । फुल्ल इति ञिफला विशरणे इत्येतस्माद्धातोरुत्तरस्य निष्ठातकारस्य लकारो निपात्यते । उत्वमिड्भावश्च सिद्ध एव ॥ क्तवत्वन्तस्याप्येतल्लत्वमिष्यते ॥ फुल्लः । फुल्लवान् इति । क्षीबकृशोल्लाघा इति क्षीबकृशिभ्यामुत्पूर्वाच्च लाघेः क्तप्रत्ययस्य तलोप इडागमाभावश्च निपात्यते । कृते वा इटि इडन्त्यलोपः । क्षीबः कृशः उल्लाघः । अनुपसर्गादिति किम् । प्रफुल्लाः सुमनसः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । लाघेरुदोऽन्य उपसर्गः प्रतिषिध्यते ॥ उत्फुल्लसंफुल्लयोरिति वक्तव्यम् । उत्फुल्लः । संफुल्लः । परिकृश इत्यत्र यः परिशब्दः स क्रियान्तरयोगात्कृशं प्रत्यनुपसर्ग एव । परिगतः कृशः । परिकृश इति ॥

नुदविदोन्दत्राघ्राह्रीभ्यो ऽन्यतरस्याम् ॥ ५६ ॥

नुद विद उन्द त्रा घ्रा ह्री इत्येतेभ्य उत्तरस्य निष्ठातकारस्य नकार आदेशो भवति अन्यतरस्याम्। नुद। नुन्नः। नुत्तः। विद। विन्नः। वित्तः। उन्द। समुन्नः। समुत्तः। त्रा। त्राणः। त्रातः। घ्रा। घ्राणः। घ्रातः। ह्री। ह्रीणः। ह्रीतः। ह्री इत्येतस्मादप्राप्तं नत्वमितरेषां नित्यं प्राप्तं विकल्प्यते॥ विदविचारणइत्यस्य विदेरिह ग्रहणमिष्यते॥ एवमुक्तम्॥

वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते।
विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः॥ इति॥

न ध्याख्यापॄमूर्छिमदाम् ॥ ५७ ॥

ध्या ख्या पॄ मूर्छि मद इत्येतेषां निष्ठातकारस्य नकारादेशो न भवति। ध्यातः। ध्यातवान्। ख्यातः। ख्यातवान्। पूर्तः। पूर्तवान्। मूर्तः। मूर्तवान्। मत्तः। मत्तवान्। रदाभ्यां संयोगादिरिति च प्राप्तः प्रतिषिध्यते॥

वित्तो भोगप्रत्यययोः ॥ ५८ ॥

वित्त इति विदेर्लाभार्थादुत्तरस्य क्तस्य नत्वाभावो निपात्यते भोगे प्रत्यये चाभिधेये। वित्तमस्य बहु। धनमस्य बह्वित्यर्थः। धनं हि भुज्यतइति भोगोभिधीयते। प्रत्यये। वित्तोयं मनुष्यः। प्रतीत इत्यर्थः। प्रतीयतइति प्रत्ययः। भोगप्रत्यययोरिति किम्। विन्नः॥

भित्तं शकलम् ॥ ५९ ॥

भित्तमिति निपात्यते शकलं चेत्तद्भवति। भित्तं तिष्ठति। भित्तं प्रपतति। शकलपर्यायोयम्। अत्र भिदिः क्रिया शब्दव्युत्पत्तेरेव निमित्तम्। भिदिक्रियाविवक्षायां हि शकलविषये भिन्नमित्येव भवति॥

ऋणमाधमर्ण्ये ॥ ६० ॥

ऋणमिति ऋइत्येतस्माद्गतावुत्तरस्य निष्ठातकारस्य नकारो निपात्यते आधमर्ण्यविषये। अधमऋणे अधमर्णः। एतस्मादेव निपातनात्स-

प्तम्यन्तेनोत्तरपदेन समासः । तद्भाव आधमर्ण्यम् । यद्येवमुत्तमर्ण इति न सिध्यति । नैष दोषः । कालान्तरदेयविनिमयोपलक्षणार्थं चेदमुपात्तम् । तेन उत्तमर्ण इत्यपि हि भवति । ऋणं ददाति । ऋणं धारयति । आधमर्ण्य इति किम् । ऋतं वक्ष्यामि नानृतम् ॥

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ॥ ६१ ॥

नसत्त निषत्त अनुत्त प्रतूर्त सूर्त गूर्त इत्येतानि छन्दसि विषये निपात्यन्ते । नसत्तनिषत्तेति सदेर्नञ्पूर्वान्निपूर्वाच्च नत्वाभावो निपात्यते । नसत्तमञ्जसा । नसन्नमिति भाषायाम् । निषत्तः । निषण्ण इति भाषायाम् । अनुत्तमित्युन्देर्नञ्पूर्वस्य निपातनम् । अनुत्तमा ते मघवन् । अनुन्नमिति भाषायाम् । प्रतूर्तमिति त्वरतेः तूर्वि इत्येतस्य वा निपातनम् । प्रतूर्तं वाजिनम् । प्रतूर्णमिति भाषायाम् । सूर्तमिति सृ इत्येतस्य उत्वं निपात्यते । सूर्ता गावः । सृता गाव इति भाषायाम् । गूर्तमिति गूरी इत्येतस्य नत्वाभावो निपात्यते । गूर्ता अमृतस्य । गूर्णमिति भाषायाम् ।

क्विन्प्रत्ययस्य कुः ॥ ६२ ॥

पदस्येति वर्त्तते । क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते । क्विन्प्रत्ययो यस्माद्धातोः स क्विन्प्रत्ययः । तस्य पदस्यालोन्त्यस्य कवर्गादेशो भवति । स्पृशोऽनुदके क्विन् । घृतस्पृक् । हलस्पृक् । मन्त्रस्पृक् । क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं कृतं बहुव्रीहिविज्ञानार्थं, क्विन्प्रत्ययो यस्माद्विहितस्तस्मादन्यस्मिन्नपि प्रत्यये कुत्वं यथा स्यात् । मा नो अस्राक् । मा नो अद्राक् । सृजिदृशिभ्यां हि क्विन्विहितः तयोर्लुङि कुत्वमेतत् । सृजिदृशोरपि छान्दसत्वादडागमः ईडपि न भवति । बहुलं छन्दसीति । तथा दृग्भ्यां दृग्भिरिति क्विबन्तस्यापि दृशेः कुत्वं भवति । एवं च सति रज्जुसृड्भ्यामित्यत्रापि कुत्वं प्राप्नोति । तत्तु नेष्यते । ततस्तत्प्रतिविधातव्यमिति ॥

नशेर्वा ॥ ६३ ॥

पदस्येति वर्तते । नशेः पदस्य वा कवर्गादेशो भवति । सा वै जीवनगाहुतिः । सा वै जीवनडाहुतिः । नशेरयं संपदादित्वाद् भावे क्विप् । जीवस्य नाशो जीवनक् । जीवनट् । षत्वे प्राप्ते कुत्वविकल्पः ॥

मो नो धातोः ॥ ६४ ॥

मकारान्तस्य धातोः पदस्य नकारादेशो भवति । प्रशान् । प्रतान् । प्रदान् । शमितमिदमादीनां क्विप् । अनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वम् * । नत्वस्यासिद्धत्वान्नलोपो न भवति । म इति किम् । भित् । छित् । धातोरिति किम् । इदम् । किम् । पदस्येत्येव । प्रतामौ । प्रतामः ॥

म्वोश्च ॥ ६५ ॥

मकारवकारयोश्च परतः मकारान्तस्य धातोर्नकारादेशो भवति । अगन्म तमसः पारम् । अगन्व । गमेर्लेङि बहुलं छन्दसीति शपो लुक् । जगन्वान् । विभाषा गमहनजनविदविशामिति क्वसाविडागमस्याभावः । अपदान्तार्थ आरम्भः ॥

ससजुषो रुः ॥ ६६ ॥

सकारान्तस्य पदस्य सजुष इत्येतस्य च रुर्भवति । सकारान्तस्य । अग्निरत्र । वायुरत्र । सजुषः । सजूर्ऋषिभिः । सजूर्देवेभिः । जुषेः क्विपि सपूर्वस्य रूपमेतत् ॥

अवयाः श्वेतवाः पुरोडाश्च ॥ ६७ ॥

अवयाः श्वेतवाः पुरोडाः इत्येते निपात्यन्ते । अवपूर्वस्य यजेः श्वेतपूर्वस्य वहेः पुरस्पूर्वस्य दाशतेः मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । अवे यजः इति ण्विनि कृते श्वेतवहादीनां डस्पदस्येति डस्प्रत्यये निपातनान्येतानि । किमर्थं तर्हि निपातनं यावता पूर्वेणैव रुः सिद्धः । दीर्घ-

* शमितमादीनामित्यारभ्य दीर्घत्वमित्यन्तः पाठः पुस्तकान्तरे नास्ति ।

त्वमप्यत्वसन्तस्य चाधातोरिति । संबुद्धौ दीर्घार्थमेते निपात्यन्ते । अत्वसन्तस्य चाधातोरित्यत्र हि असंबुद्धाविति वर्त्तते । हे अवयाः । हे श्वेतवाः । हे पुरोडाः । चकारोऽनुक्तसमुच्चयार्थः । हे उक्थशाः ॥

अहन् ॥ ६८ ॥

अहन्नित्येतस्य पदस्य रुर्भवति । अहोभ्याम् । अहोभिः । नलोपमकृत्वा निर्द्देशो ज्ञापकः नलोपाभावो यथा स्यादिति । दीर्घाहा निदाघः । हे दीर्घाहोऽत्रेति । अहन्नित्यत्र तु लाक्षणिकत्वादहन्शब्दस्य हनं भवति ॥ अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसंख्यानं कर्त्तव्यम् ॥ * ॥ अहो रूपम् । अहोरात्रः । अहोरथन्तरम् । रोऽसुपीत्यस्यापवादो रुत्वमुपसंख्यायते । अपर आह । सामान्येन रेफादौ रुत्वं भवति । अहो रम्यम् । अहोरत्नानीति ॥

रोऽसुपि ॥ ६९ ॥

अहन्नित्येतस्य रेफादेशो भवत्यसुपि परतः । अहर्द्ददाति । अहर्भुङ्क्ते । असुपीति किम् । अहोभ्याम् । अहोभिः । ननु चात्रापि प्रत्ययलक्षणेन सुबस्ति । अहर्द्ददाति । अहर्भुङ्क्त इति । नैतदस्ति । उक्तमेतत् । अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति नायमहःशब्दः सुप्परो भवति । यत्र तु लोपशब्देन लुप्यते तत्र प्रत्ययलक्षणं भवत्येव । यथा हे दीर्घाहोऽत्र दीर्घाह निदाघ इति । अत्र हि हल्ङ्याबिति लोपेन प्रत्ययस्य निवृत्तिः ॥

अम्नरूधरवरित्युभयथा छन्दसि ॥ ७० ॥

अम्नस् ऊधस् अवस् इत्येतेषां छन्दसि विषये उभयथा भवति । रुर्वा रेफो वा । अम्नस् । अम्न एव । अम्नरेव । ऊधस् । ऊधरेव । ऊध एव । अवस् । अवरेव । अव एव । यदा रुत्वं तदा भोभगोअघोअपूर्वस्य योऽशीति यकारः ॥ छन्दसि भाषायां च विभाषा प्रचेतसो राजन्युपसंख्यानं कर्त्तव्यम् ॥ * ॥ प्रचेतो प्रचेता राजन् राजन् ॥ अहरादीनां पत्यादिषूपसंख्यानं कर्त्तव्यम् ॥ * ॥ अहर्पतिः । अहःपतिः । गीर्प्पतिः ।

गीर्पतिः । धूर्पतिः । धूःपतिः । विसर्जनीयबाधनार्थमत्र पक्षे रेफस्यैव रेफो विधीयते ॥

भुवश्च महाव्याहृतेः ॥ ७१ ॥

भुवस् इत्येतस्य महाव्याहृतेश्छन्दसि विषये उभयथा भवति । रुर्वा रेफो वा । भुवरित्यन्तरिक्षम् । भुव इत्यन्तरिक्षम् । महाव्याहृतेरिति किम् । भुवो विश्वेषु भुवनेषु यज्ञियः * । भुवरित्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः ॥

वसुस्रंसुध्वंस्वनडुहां दः ॥ ७२ ॥

ससजुषोरित्यतः स इति वर्त्तते । तेन संभवाद्व्यभिचाराच्च वसुरेव विशेष्यते । न स्रंसुध्वंसू व्यभिचाराभावाद,संभवाच्चानडुह्शब्दः । वस्वन्तस्य पदस्य सकारान्तस्य स्रंसु ध्वंसु अनडुह् इत्येतेषां च दकारादेशो भवति । वसु । विद्वद्भ्याम् । विद्वद्भिः । पपिवद्भ्याम् । पपिवद्भिः । स्रंसु । उखास्रद्भ्याम् । उखास्रद्भिः । ध्वंसु । पर्णध्वद्भ्याम् । पर्णध्वद्भिः । अनडुह् । अनडुद्भ्याम् । अनडुद्भिः । स इत्येव । विद्वान् । पपिवान् । नकारस्य न भवति । रुत्वे नाप्राप्ते इदमारभ्यतइति तद्बाध्यते । संयोगान्तलोपस्तु नैवमिति तेनैतदेव दत्वं बाध्यते । अनडुहोपि ढत्वमनेन बाध्यते । नुमस्तु विधानसामर्थ्याच्च भवति । अनड्वान् । हे अनड्वन्निति । पदस्येत्येव । विद्वांसौ । विद्वांसः ॥

तिप्यनस्तेः ॥ ७३ ॥

तिपि परतः सकारान्तस्य पदस्य न अस्तेर्दकार आदेशो भवति । अचकाद्भवान् । अन्वशाद् भवान् । तिपीति किम् । चकास्तेः क्विप् । चकाः । अनस्तेरिति किम् । आप एवेदं सलिलं सर्वमाः । आ इत्यस्तेर्लङि तिपि बहुलं छन्दसीति ईड्न कृतः ॥

* भुवो मध्यम् । भुव इदम् । पुस्तकान्तरे एतदधिकम् ।

सिपि धातो रुर्वा ॥ ७४ ॥

सिपि परतः सकारान्तस्य पदस्य धातो रुः इत्ययमादेशो भवति दकारो वा । अचकास्त्वम् । अचकात्वम् । अन्वशास्त्वम् । अन्वशात्त्वम् । धातुग्रहणं चोत्तरार्थं रुग्रहणं च ॥

दश्च ॥ ७५ ॥

दकारान्तस्य धातोः पदस्य सिपि परतो रुर्भवति दकारो वा । अभिनस्त्वम् । अभिनत्त्वम् । अच्छिनस्त्वम् । अच्छिनत्त्वम् ॥

र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥

रेफवकारान्तस्य धातोः पदस्य उपधाया इको दीर्घो भवति । गीः । धूः । पूः । आशीः । वाग्रहणमुत्तरार्थम् । उपधाग्रहणं किम् । अबिभर्भवान् । अभ्यासेकारस्य मा भूत् । इक इति किम् । अत्रैव प्रत्युदाहरणे भशब्दाकारस्य मा भूत् । धातोरित्येव । अग्निः । वायुः । पदस्येत्येव । गिरौ । गिरः ॥

हलि च ॥ ७७ ॥

हलि च परतः रेफवकारान्तस्य धातोरुपधाया इको दीर्घो भवति । आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । अवगूर्णम् । वकारान्तस्य । दीव्यति । सीव्यति । धातोरित्येव । दिवमिच्छति दिव्यति । चतुर इच्छति चतुर्यति । इक इत्येव । स्मर्यते । भव्यम् । अपदान्तार्थोयमारम्भः ॥

उपधायां च ॥ ७८ ॥

हलीत्यनुवर्त्तते । धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दीर्घो भवति । हूर्च्छा । हूर्च्छिता । मूर्च्छा । मूर्च्छिता । ऊर्वी । ऊर्विता । धूर्वी । धूर्विता । हलीत्येव । चिरि,जिरि । चिरिणोति । जिरिणोति । इह कस्मान्न भवति । री गतौ । रियतुः । रियुः । वी गत्यादिषु । विव्यतुः । विव्युरिति । यणादेशस्य स्थानिवत्त्वाद् असिद्धत्वाच्च बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारौ न भवतः । चतुर्थ्यर्थेत्यत्रापि बहिरङ्ग-

Digitized by Google

लक्षणत्वाद्‌वतो लोपस्य धातोरुपधाभूतो रेफो न भवति । प्रतिदीव्नेत्यत्र तु हलि चेति दीर्घत्वम् । दीर्घविधौ लोपाजादेशस्य स्थानिवद्भावप्रतिषेधात् । असिद्धं बहिरङ्गमन्तरङ्गे इत्येतत्तु नाश्रयितव्यम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति स्थितिः किर्योर्गिर्योरित्येवमादिषु दीर्घो न भवति ॥

न भकुर्छुराम् ॥ ७९ ॥

रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न भवति । धुरं वहति धुर्यः । धुरि साधुर्धुर्यः । कुर् । कुर्यात् । छुर् । छुर्यात् । दिव्यम् । रेफवकाराभ्यां भविशेषणं किम् । प्रतिदीव्ना । प्रतिदीव्ने ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

सप्तदशस्तबकावशेषः ॥

सर्वासामेव तासां कलगानगानवरतवरतरमाधुर्यधुर्यः सम्भ्रमितस्ततो विलस्य लस्यमानमानसः पुनरपि तटनिकटविकस्वरविविधविविधकुञ्जमञ्जुलं वनमध्यमध्यवस्थाय ॥ २०२ ॥

तासां कलगानगम् अनवरतमेव वरतरं यन्माधुर्यं तस्य धुर्यः । विविधं बहुविधं च वीन् पक्षिणो विशेषेण धत्त इति विविधं च यत् कुञ्जं तेन मञ्जुलम् ॥ २०२ ॥

मदनमदमोदमदिरानिरातङ्कः पङ्कजपलाशलोचनो निजानन्दरतो रतोत्सवारम्भमङ्गलतामङ्गलताभिः प्रापयितुमुत्तमसमर्थाभिस्ताभिरेव रमणीमणीन्द्रमौलिमणिमालाभिः सममरमत ॥ २०३ ॥

मदनहेतुको मदमोदो मत्तताहर्षावेव मदिरा तत्र निरातङ्कः । निजानन्दरत इति, न तु तासामनुरोधवशादिति भावः । ताभिरेव निजानन्दस्तस्य सिध्येदिति कुब्जापट्टमहिष्यधिकरणे साधारणीसमञ्जसे रती व्यावृत्ते । कथंभूताभिः, रतोत्सवारम्भस्य मङ्गलतां माङ्गल्यम् अङ्गलता-

र्भिर्निजगात्रैः प्रापयितुम्· अतिशयसमर्थाभिः, श्लेषेण समर्थाश्चरतिमतीभिः, अत एव रमणीमण्योः लक्ष्म्याद्यास्ततोऽपीन्द्रतुल्या रुक्मिण्याद्यास्तासामपि मौलिमणिमालाभिः ॥ २०३ ॥

प्रेमातिशुद्धमपि केवलमेष तासा-

मारञ्जयन्मदनरागरसैरशेषम् ।

संप्रार्थितानि निविडस्तनपीडनानि

लब्धुं सदन्तनखलेखनकौशलानि ॥ २०४ ॥

तासां प्रेमोपादानक एव कामो नत्वन्यासामिव कामोपादानकः प्रेमा नापि द्वयोपादनकं द्वितयमिति वर्णनाभङ्ग्यैव बोधयन्नाह प्रेमेति । एष श्रीकृष्णस्तासां केवलम्· अत एव शुद्धमपि प्रेम मदनरागरसैरारञ्जयत् । किमर्थं, संप्रार्थितानि निजवाञ्छितानि निविडैः स्तनैः पीडनानि लब्धुं प्राप्तुम्, लोके हि परतः किंचिल्लिप्सुः प्रथमं तमनुरञ्जयतीति नीतिः ॥ २०४ ॥

एवं नानाप्रकारकारवः प्रकृतिभेदेन वयोभेदेन च वैदग्धीभेदः सच सचमत्कारं कारं कारमेवामोदं दामोदरं मोदरं करोति स्म ॥ २०५ ॥

आमोदम्·अर्थात् तस्य हर्षं, कृत्वा कृत्वा, मोदरं हर्षदायिनम् ॥ २०५

यथा ।

मानवेऽतिसुमहानभिलाषो

ना न नेति वचसि प्रतिषेधः ।

सुभ्रुवां रतिविधिप्रतिषेधौ

नात्मबुद्धिविषयौ बभूवाते ॥ २०६ ॥

मानवेति, मनसि विधिर्वचसि प्रतिषेध इत्येतौ न बुद्धिपूर्वको बभूवतुः, किंतु स्वाभाविकोत्कण्ठप्रवाम्यकार्यभूतावित्यर्थः ॥ १०६ ॥

किंच ।

ह्रीप्रबोधनकरः कररोधः
कोपकल्पनमपाङ्गकटाक्षम् ।
रोदनं च विगताश्रु वधूनां
तत् परं प्रियममन्यत कृष्णः ॥ २०७ ॥

ह्रीप्रबोधनकरो लज्जावतीत्वमात्रज्ञापकः ॥ २०७ ॥

किंच ।

भर्त्सनं स्मितसुधाप्लुतवर्णं
पाणिधूननमलक्ष्यनिषेधम् ।
भ्रूलतासु भृ[1]कुटिः कृतकोपा
सर्वमन्तरनुरागमवादीत् ॥ २०८ ॥

कृतः कृतको न तु स्वाभाविकः कोपो यस्यां सा ॥ २०८ ॥

चुम्बने विमुखताधरपाने
पाणिनाधरदलस्य पिधानम् ।
श्लेषणेऽपहृतिरित्यबलानां
वामतैव दयितस्य मतासीत् ॥
द्राघीयसा सुवलितेन सुकोमलेन
प्रत्येकमेव तरसा भुजमण्डलेन ।
अन्तः प्रवेशयितुकाम इव क्रमेण
लीलानिधिः स रमणीगणमालिलिङ्ग ॥ २०९ ॥

तत् तदेव व्यस्यचाह, द्राघीयसेति वेष्टनसम्यक्त्वम्, सुवलितेनेति तत्र नैविघ्नम्, सुकोमलेनेति तत्रातिसुखदत्वम् ॥ २०९ ॥

---

1 भ्रू इत्यस्य स्थाने भ्र इत्यपि प्रयुञ्जते कोशकाराः ।

किंच ।

वामेन पाणिकमलेन विधृत्य वेणी-
मभ्युन्नमय्य चिबुकाग्रमथापरेण ।
आलोकयन् मुकुलितेक्षणमास्यमासां
माध्वीकमुग्धमधरं धयति स्म कृष्णः ॥ २१० ॥

मुकुलितेक्षणं सलज्जम् ॥ २१० ॥

एवमेक एव राजीविनीराजीविनीतो भ्रमर इव निरपायं पायं पायमासवं स बंहिष्ठमदो मदनमोदामोदायत्तो निरन्तरायनिरन्तरा-यमानमानसोत्सवः स रसिकशेखरः परिरम्भाधरपानानन्तरम् ॥ २११ ॥

राजिविनीराजी पद्मिनीश्रेणी तस्यां विनीतो दक्षिणः, मदनमोद एव आमोदः सौरभं तदधीनः, निरन्तरायं निर्विघ्नं यथा स्यात् तथा· आयमानः प्राप्नुवन् मानसोत्सवो यं सः ॥ २११ ॥

वक्षोरुहाम्बुरुहकोरकयुग्ममासा-
मासादयन् स नखलेखनलक्ष्मलक्ष्मीम् ।
अन्तः समुद्यदनुरागविकारकण्डूं
कण्डूयनादिव पुनः प्रथयांचकार ॥ २१२ ॥

नखानां लेखनलक्ष्मैव लक्ष्मीः शोभा पक्षे पद्मालया तामासादयन् प्रापयन्नेव सन् स कृष्णः अन्तः सम्यगुद्यन्ती यानुरागकण्डूस्तां पुनरपि कण्डूयनादिव प्रथयांचकार प्रकटयामास, अनुरागमयः कन्दर्पस्तासां कृष्णनखरक्षतैरधिकमवर्धतेवेति काव्यार्थः ॥ २१२ ॥

ततश्च ।

आताम्रकम्रमहसः नखलेखलक्ष्मी-
लक्ष्मश्रियः शुशुभिरे सुदृशामुरांसि ।
अन्तर्गतैरिव चिरादनुरागबीजै-
रासादिताङ्कुरदशैर्बहिरावृतानि ॥ २१३ ॥

उरांसि वक्षःस्थलानि शुशुभिरे नखलेखा एव लक्ष्मीलक्ष्माणि संप-त्तिचिह्नानि तेषां श्रिया शोभया ॥ २१३ ॥

एवमङ्गमङ्गमतिमङ्गलस्पर्शरसेन करकमलेन संतापहारिणा हारिणा सिद्धौषधिपल्लवेनेव तासामखिलसौभाग्यगौरवपूंषि वपूंषि सरसीकुर्वतस्तस्य ॥ २१४ ॥

सौभाग्यस्य गौरवं पुष्णन्तीति तथा तानि, "क्विबन्तं पदम्" ॥ २१४ ॥

स्फीतं पाणिसरोरुहेण सुदृशां वक्षोजयोर्मण्डले
केशेष्वायतकुञ्चितेष्वतिघनेषूर्ध्वादधो लम्बितम् ।
श्रान्तं श्रोणिभराङ्कणे तत इतो विश्रान्तिखेदादहो
लब्ध्वा नाभिह्रदं सुखेन तिमितं मध्ये समाकुञ्चितम् ॥ २१५ ॥

स्फीतं प्राप्तविस्तारम्, ऊर्ध्वाच्छिरःप्रदेशादारभ्याधो नितम्बपर्यन्तं लम्बितम्. उत्तीर्णम्, ततश्च श्रोणिभर एवाङ्कणं तत्रेतस्ततो विश्रान्तिखेदाक्रान्तमिति तस्यातिविस्तीर्णत्वात्, मध्ये संकुचितमिति तस्यातिकार्श्यात्, नाभिह्रदे सुखेन तिमितमिति. अन्तरीयनिष्काशनापाधिलाभात् ॥ २१५ ॥

एवं मदनमदनश्यद्दपत्रपापत्रपालिभिरतिरुचिरचिरमनोरागतारल्यपरवशाभिरुद्दयितदयितमनोरथानुकूलकूलरहितलावण्यतरङ्गिणीरङ्गिणीभिरेकैकशोऽधिकशोऽधिकमनीयवैदग्धीधुरामधुरामस्तृणोर्भुजवल्लीवलयैः सवलयैः सरसमालिङ्गितोऽङ्गितोपपन्नप्रेमरसाङ्गसाङ्गशुचिशुचिसामग्रीसमरससमरसमाहितैः स्मितमधुमधुरैर्वदनारविन्दैराचुम्बितोऽधरकिसलयैः सलयैरिव स्फुरद्भिरद्भिरिव दशनकान्तिलहरिभिः क्षालितैराचीयमानाधरो धरोपसन्नः पीयूषमयूख इव चकोरदयिताभिराभिः ॥ २१६ ॥

एवमाभिरपि भुजवल्लीवलयैः सोऽप्यालिङ्गितः । मदनमदेन न-श्यन्ती· अपत्रपालतायाः पत्रपालिः पत्रश्रेणी यासां तथा ताभिः, उद-यिता प्राप्तोदया दयितस्य मनोरथानुकूला कूलरहिता· अपारा या लावण्यतरङ्गिणी तयैव रङ्गिणीभिः· रागवतीभिः, एकैकशः· एकैकाभि-स्ताभिर्भुजवल्लीवलयैरालिङ्गितः । कथंभूतैः, अधिकशोधिनः कृष्णभुजङ्ग-तालिङ्गनस्य· अधिकपरिशोधकाश्च ते कमनीयया वैदग्धीधुरया मधु-राश्च· असमृणा अम्लानाश्च ते तथा तैः । अङ्गितयाङ्गित्वेनोपपन्नस्य प्रेम-रसस्याङ्गं साङ्कर्शुर्यानिजाङ्गसहितशृङ्गाररसस्तस्य शुचिभिर्विभावादिवैरू-प्याभावाच्छुद्धाभिः सामग्रीभिः समरसं नायकनायिकागणयोस्तुल्यरसमेव यत् समरं केलियुद्धं तत्र समाहितैः सम्मर्पितैर्वदनारविन्दैराचुम्बितः, कामपुष्पास्त्रैर्विद्ध इवेति भावः, वलयैः, रलयोरैक्यात् रवैर्गैरिव ॥ २१६ ॥

एवं सति ।

दोःशाखावलयैर्दृढं वलयितो निस्तोदितः पीवरै-
र्वक्षोजस्तबकैः खरैरथ नखाकारैः क्षतः कण्टकैः ।
क्रीडायां रमणीमणीमयलतोद्यानेषु माद्यन्मनाः
श्रीमानेकक एष कृष्णमधुपः संमोदमभ्याययौ ॥ २१७ ॥

वलयितो वेष्टितः, निस्तोदितः संमर्दितः ॥ २१७ ॥

सा वधूततिरनङ्गसङ्गरे
गाढसौभगरसप्रसङ्गरे ।
आचिलोकरमणीमणिश्रिये
हेलनामतिमदेन शिश्रिये ॥ २१८ ॥

प्रसङ्गरे प्रकृष्टसङ्गदायिनि । आचिलोकेति, ततश्च तासां परस्प-रस्वपक्षविपक्षभावे समुद्भूय प्रबलिते सति· ऐकमत्ये नष्टे प्रारिप्सितो रासो न सिध्येदित्यन्तर्धानबीजं ज्ञेयम् ।

Digitized by Google

किंच ।

राधामथान्याश्च विहारसाम्यात्
सेर्ष्यां सगर्वा अवगम्य सम्यक् ।
प्रसादयंस्तामवसादयंस्ता-
स्तदन्तरैवान्तरधात् स कान्तः ॥ २१८ ॥

एवं सौभगमदनदे मदनदेवयादसि महास्रोतसि न सुतरे तरे-भङ्ग इव मग्नानां तासामन्तर्गतमदजलपूरं दूरीकरिष्यन्निव ॥ २१६ ॥

तदेवोत्प्रेक्षादिभिः स्पष्टयन्नाह, महास्रोतसि प्रेममयप्रवाहे तरेः-ऐकमत्यरूपाया नौकाया भङ्गे सति । स्रोतसि कथंभूते, सौभगं च मदनः कामभोगश्च तौ ददातीति तथाभूते, मदनदेव एव यादो यत्र तस्मिन्, न सुतरे, अनवच्छेदाद्दुस्तर इत्यर्थः । मदजलपूरं दूरीकरिष्यन्निति, पुन-रैकमत्यकामनयेति भावः ॥ २१९ ॥

निजदुर्लीलतालताचक्रमारोप्य ता भ्रामयितुमुपक्रान्त इव ॥ २२० ॥

ननु धीरललितशेखरस्य तस्य प्रेयसीगर्वखण्डनमसमञ्जसमेवेति चेत्, सत्यमेवैतदित्यभ्युपगच्छन्नेवाह निजदुर्लीलेति, तासां पक्षपातेन तत्र प्रणयकोप एव व्यञ्जितः ॥ २२० ॥

दुर्जरसौभगमदमदिरातिशयसेवनलसदलसदशापूर्वरूपमपूर्वरू-पमदात्ययाभिधविषमगदमगदंकार इव चिकित्संस्तदुपद्रवहारि ल-लितमगदं संपादयिष्यन्निव ॥ २२१ ॥

वस्तुतस्तु तासामेवातिसंमाननसूचकस्य कामकलाविलासविशे-षस्य महारासस्य सिद्ध्यर्थमापाततः प्रतीयमानमपि प्रातिकूल्यं धीरल-लितस्येऽपि न विरुध्येतेत्याह दुर्जरेति, दुर्जरा प्रकारान्तरेण जरयितुमश-क्या सौभगमदरूपा या मदिरा तस्या अतिशयसेवनेन लसन्ती- अलस-दशा पूर्वरूपा प्रथमा यस्मिंस्तम्, अपूर्वेण रूपमदेन स्वरूपगर्वेण- अत्यये-

ऽतिक्रम एव· अभिधा यस्य स चासौ विषमो गदो व्याधिश्चेति तम्, पक्षे महात्ययनामा रोगविशेषः, चिकित्सन् चिकित्सितुम्, अगदंकारो वैद्यः, ललितं पुष्टिकरमगदमौषधं, "रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके" इत्यमरः। रोगिजनसुखोदर्कमेव सद्वैद्यचेष्टितं भवतीति भावः ॥ २२१ ॥

सहजधवलतालताबलतादवस्थ्ये रागान्तरस्य रस्यता न भवतीति निष्कपटस्य पटस्य तदुपशमयितुं रूपान्तरमापादयितुं च लोध्रादिकषायेण कषायितकरणाय प्रवृत्तो रङ्गाजीव इव ॥ २२२ ॥

किंच "न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान् रागो हि वर्धते" ॥ इति रसशास्त्रानुमतिमनुरुन्धानैरभिज्ञैर्नैतदवधीरणीयमित्याह सहजेति, धवलतायाः श्वैत्यस्य बलस्य तादवस्थ्ये साहजिकत्वे सतीत्यर्थः, निष्कपटस्य पटस्य· अकृत्रिमवस्त्रस्य तत् तादवस्थ्यम्, सकपटत्वे तु दृष्टान्तस्य पटस्य दार्ष्टान्तस्यालम्बनविभावस्य च कषायेण विप्रलम्भेन च प्रत्युत मूलक्षतिरेव स्यादिति भावः ॥ २२२ ॥

मदनमदनमितानन्दतुन्दिलताविद्रावकं द्रावकं रसमिव विप्रलम्भलम्भनदोरवस्थ्यं सद्य एवाङ्कुरयन्निव ॥ २२३ ॥

एतदेवोक्तपोषन्यायेनाह मदनेति, मदनमदेन नमिता विपरिणमिता या· आनन्दस्य तुन्दिलता पुष्टिस्तस्या विद्रावकं निवर्तकं द्रावकं चित्तद्रावित्यकारिणम्। अन्योऽपि वैद्यप्रयुक्तो द्रावको रसस्तुन्दपुष्टिहारी भवतीत्येकदेशश्लेषः ॥ २२३ ॥

परिपूर्ण एवानन्दचन्द्रिकापटले दुस्तरदुःखतमःस्तोममवतारयन्निव ॥ २२४ ॥

एवं सिद्धान्तरीत्या वर्णनपरिपाटीमिदानीं विहाय तासां पक्षपातमाश्रित्य कवे सदोषोद्गारमेवाह परिपूर्णेति, तमोऽन्धकारो राहुर्वा ॥२२४॥

प्रवाहे च पेयूषे पेयूषे च सरसि कालकूटकूटमुत्पादयन्निव ॥२२५॥

पेयूषे पीयूषममृतं तन्मये प्रवाहे पेयूषे "पीयूषोऽभिनवं पयः" इत्यमरः। तन्मये च सरसि कालकूटकूटं विषसमूहम्, चन्द्रिकातमसोर्नेत्राणामेव सुखदुःखविधायित्वे, तादृशसंभोगतादृशविप्रलम्भयोस्तु प्राणानामेव दायकत्वघातकत्वे पर्यालोच्य। अमृतकालकूटाभ्यामेव तावुत्प्रेक्षितौ ॥ २२५ ॥

परिमलसौभाग्यभाजि नवाग्निशिखावलावग्निशिखावला[1]वक्षेपमिव ॥ २२६ ॥

किंच, अतितरामन्यायप्रवृत्त्या पर्यवसाने तस्यावैदग्ध्यदुष्कीर्ती एव फलिष्येते इति सकरुणमाह परिमलेति, नवानामग्निशिखानामावलौ श्रेण्याम्। अग्निशिखावलस्य वह्निशिखसमूहस्य। अवक्षेपं प्रक्षेपमिव, "काश्मीरजन्माग्निशिख"मित्यमरः, कुङ्कुमावलिस्थानीया अत्र तत्प्रेयस्यो ज्ञेयाः ॥ २२६ ॥

निर्जलधरं कुलिशपातमिव निराशीविषमाशीविषविसर्पमिव ॥ २२७ ॥

निर्जलधरमित्यन्तर्धाने कारणाभाव उक्तः, निराशीविषमिति संभावनाया अभावश्च । आशीविषः सर्पः, आशी सर्पदंष्ट्रा ॥ २२७ ॥

सर्वासामसंभावनाविषयो भावनाविषयश्च यन्न भवति तदकस्मादेव निरीक्षमाण एव प्रस्तुते स्तुते विलासरसे सरसे हृदि तत्रैव तिरोधानं स निखिलकलाकलापवेधा विदधाति स्म ॥ २२८ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे रासविलासे तिरोधानविधानो नाम सप्तदशः स्तबकः ॥ १७ ॥ :: :: ॥

कलाकलापस्य वेधा स्रष्टा ॥ २२८ ॥

इत्यानन्दवृन्दावनटीकायां सप्तदशः स्तबकः ॥ १७ ॥ :: :: ॥

---

१ अग्निशिखानाम्। आ समन्तात् वलं समूहस्तस्येत्यर्थः ।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टादशस्तवकारम्भः ॥

अथैवमन्तर्हितमन्तर्हितमपि तथानुपपद्यमानया संभावनया भावनयासादितपरिहासहासपेशलं शलन्त्यो दृश्यमानमिवापि न पश्यन्त्यः श्यन्त्यश्च नयनप्रीतिं परस्परपरवितर्कं ताः पृच्छन्ति स्म ॥ १ ॥

विरहविधुरतासां तस्य पृच्छा द्रुमालो
तदनुकृतिरथ श्रीपादलक्ष्मावलोकः ।
प्रियविरहितराधाचेष्टितं सर्वरामा-
वलिवलितविलापोऽष्टादशे वर्णनीयम्[1] ॥

अन्तर्हितम्· अन्तःकरणाहितं, यद्वा· अन्तर्हृदये धृतमपि कृष्णम्, अन्तर्हितं कृतान्तर्धानम् । भावः सौहार्दादिस्तस्य नयेन नीत्या· आसादिताभ्यां प्राप्ताभ्यां परिहासहासाभ्यां पेशलं सुन्दरं यथा स्यात् तथा शलन्त्यो गच्छन्त्यः, श्यन्त्यः· अल्पयन्त्यः ॥ १ ॥

निभालय भालयमेतं प्रापयति स्म का-कुञ्जं काकुञ्जङ्घालां[2] प्रकटयन्ती या किल पश्यतोहरेव सर्वासां नयनमाच्छिद्य वक्षोमणिं नो जहार ॥ २ ॥

भालयं शोभानिकेतम्, जङ्घालाम्· अतिवेगवतीं काकुं प्रकटयन्ती प्रकटयितुमिति तटस्थपक्षविपक्षाणामुक्तिर्ज्ञेया ॥ २ ॥

तदधुना विचारयामो रयामोदितमनसा कया क्व नीत इति ॥ ३ ॥

रयेण वेगेन निभृतविहारार्थमामोदितं मनो यस्यास्तया ॥ ३ ॥

---

१ नपुंसकमनपुंसकेनेति नपुंसकशेषः ।

२ काकुं जङ्घालामित्येवं मुद्रणीये परसवर्णः प्राप्नवत् ।

कुञ्जात् कुञ्जान्तरं विचारयन्त्यः कालभुजंगमेऽजंगमे निद्रागततया समुद्गामदामनकमालाधियो जनता इव विहिततिरोभावे भावेन समुत्कया कयाचन समं कृतकुञ्जलील इति सहजार्जवेन जवेन जातप्रतीतयः ॥ ४ ॥

निद्रागततया· अजंगमे स्थिरे कालसर्पे· उद्गामा बन्धनरहिता दामनकी दमनकसंबन्धिनी माला· इति धीर्यासां तथाभूता जनता जनसमूहा इव, विहिततिरोभावेऽपि तस्मिन् महादुःखं दातुमुपक्रान्तेऽपीत्यर्थः, कयापि सह कृतकुञ्जलीलोऽसाविति जाता प्रतीतिर्यासां ताः, ततश्चैवमेव प्रत्येकमस्मास्वपि तस्य लीला भविष्यतीति विनोदमयो भावश्च द्योतितः ॥ ४ ॥

विचार्याहमानेष्येऽहमानेष्ये· इति सकौतुकमहमहमिकया प्रतिकुञ्जमन्विष्यन्त्यो हन्त हन्तरात्मजनापदां पदाम्बुजस्पर्शेन सरसीभूतभूतल विहसितुमस्मानात्मानमपवार्य कुञ्जोदरे स्थितवन्तं भवन्तं मद्रेण विद्गा विद्गोहन किमपरं भ्रमयसीति निगदं गदन्त्यश्च ॥ ५ ॥

अहमानेष्ये यूयं तिष्ठतेत्येकाकितया जिगमिषा सुहृत्स्वत्रस्वपक्षाणां भावविशेषमयी ज्ञेया । विदां विदुषामपि मोहन हे बुद्धिभ्रमिदायिन्निति वा । वयं तु विद्गा जानीम एव । निर्गदं निरामयं यथा स्यात् तथा बहिः स्थित्वैव गदन्त्यः ॥ ५ ॥

विचारितेषु कुञ्जकुहरेषु तमनालोक्य क्रमेण जायमानसंदेहा देहादावपि तेनैव क्रमेण जायमाननिरपेक्षभावा भावाम्लायमानमुखतामरसा रसाभावेनाविचारितकुञ्जान् न विचारयन्ति स्म ॥ ६ ॥

जायमानसंदेहा इति, परिहास एवायं न वस्तुतोऽन्तर्धानमिति प्राक्तनो निश्चयो गलित इत्यर्थः । भा कान्तिस्तयैव· अवम्लायमानं हर्षशून्यं मुखपद्मं यासां ताः, चानशन्तपदम् ॥ ६ ॥

संभावनैवास्तां नैवास्तां तावदनाश्वास इति यदि कुम्भविघा- रतो वातविरामो रामास्ततिरस्तो बभूव ॥ ७ ॥

तत्र हेतुः संभावनेति ॥ ७ ॥

भूवलयं तदा शून्यमिव मन्यमाना तमथ दृश्यमानमिवापि न पश्यन्ती स्पृश्यमानमिवापि न स्पृशन्ती कथयन्तमिवापि जानती न तत्कथां शृण्वती बहिर्वर्तमानमिव हृदयेऽनुभवन्ती न बहिरुप- लभमाना ॥ ८ ॥

दृश्यमानमिवेत्यादि विरहे ध्यानोद्रेकोदयात्, न पश्यन्तीत्यादि बहिरननुसंधानवशात् ॥ ८ ॥

श्रवणयोः कुवलयमिव श्रवणबहिर्भूतं नयनकज्जलमिव नयन- दूरगामिनं वक्षसो नीलमणिमिव वक्षसोऽन्तरितम् ॥ ६ ॥

श्रवणयोरित्यादिना श्रवणदर्शनाङ्गसङ्गानामुत्तरोत्तरकालवर्तित्वस्य भूतपरत्वं ध्वनितम् ॥ ९ ॥

एकमपि दिशि दिशि स्फुरन्तं दिशि विदिशि सन्तमपि हृदये प्रविशन्तं करकमलेन स्पृशन्तमपि प्रतिस्पर्शनदुष्प्रापं वक्षसाश्लिष्य- न्तमपि प्रत्याश्लेषानर्हं मुखचन्द्रमसा चुम्बन्तमपि प्रतिचुम्बनेऽक्षमा- मवगच्छन्ती ॥ १० ॥

ततश्च भावनोद्रेकस्य परिपाकेणैव बहिरनुसंधानेऽपि निरस्तप्राये मोहदशापूर्वरङ्गं विस्फूर्तिमयमुन्मादं व्यञ्जयति· एकमपीत्यादिना, अत एव दिशि विदिशि सन्तमित्यादिषु पूर्ववदिवशब्दाप्रयोगः। प्रतिस्पर्श- नदुष्प्रापमित्यादिना बाह्यानुसंधानशेषोऽपि पीडामयो व्यञ्जितः। प्रति- चुम्बने· अक्षमम्· अवसररहितम् ॥ १० ॥

वयं भित्तिपुत्तलिकेव नभसि चित्रितेव ॥ ११ ॥

ततश्च मोह एवाभूदित्याह वयं भित्तीति, तत्रापि निरालम्ब- तया नभसीत्यभूतोपमा ॥ ११ ॥

Digitized by Google

उन्मूलितजीवनेव ज्वलदङ्गारालिङ्गितहृदयेव कालकूटकूटलिप्तशरीरेव करपत्त्रेण विदीर्यमाणवक्षःस्थलेव यदि समजनिष्ट ॥ १२ ॥

मूर्च्छाप्येषा विरहपीडोपादानकतया महादुःखानुभवमयोपान्त्यभागैवाभूदित्याह· उन्मूलितेति, अस्माद्देहाज्जीवनं निःसृतमित्यनुभवन्तीत्यर्थः, तत्कारणभूतं पीडानुभवमुत्प्रेक्षाभिर्व्यञ्जयति, ज्वलदित्यन्तर्देहोत्था पीडा, कालकूटेति बहिर्देहोत्था, तत्रापि वक्षसि स्तनमध्ये· अस्ति कोऽपि विशेष इत्याह करपत्त्रेणेति ॥ १२ ॥

तदास्या रामाक्लेर्मनसि घृते जम्बीररस इव शुष्के दारुणि दहन इव ॥ १३ ॥

अथ तत्र तत्रान्तर्बाह्ययोस्तादृशयोरपि कुत्र कुत्र प्रदेशे कीदृशी कीदृशी विशेषपीडेत्यपेक्षायामाह मनसीति, जम्बीररस इति चिटपिटायितीकारित्वं दहन इत्यन्ततो ज्वालया भस्मीभावविधायित्वं चोक्तम् ॥ १३ ॥

मर्मणि क्षुरिकेव· उरसि घोरगर्तमिव शरीरे महाज्वर इव जठरे महाशूलमिव नयनयोरान्ध्यमिव श्रवणयोर्बाधिर्यमिव त्वचि सुप्ततेव संविदि महोन्माद इव कश्चन दारुणो दुःखपरिपाकः परिभवकारी बभूव ॥ १४ ॥

सुप्तता स्पर्शज्ञानराहित्यम् ॥ १४ ॥

ततश्च । अशरणमेव त्रिभुवनं निरालोक इव सर्वलोकः· विदीर्यन्त्य इव गिरिद्रोणयः· रोरुद्यन्त इव तरवः· शीर्यन्त्य इव लतिकाः· म्लायन्त्य इव चन्द्रिकाः· मूर्छन्त इव शकुन्तयः दवदग्धा इव हरिण्यश्च बभूवुः ॥ १५ ॥

ततश्च महाभाववतीनां तासां दुःखेन जगदपि व्याप्तमित्याह· अशरणमेवेति, यदुक्तमुज्ज्वलनीलमणौ,"अनुरागः स्वसंवेद्यदशां प्राप्य प्रकाशितः । यावदाश्रयवृत्तिः स्याद्भाव इत्यभिधीयते" ॥ इति, तत्रापि विदीर्यन्त्य इत्यादिना गिरिद्रोण्यादीनां विशेषतो विदारणादिको

महाभावस्य तस्यानुभावविशेषः, यदुक्तम् "भावत्यगता हृद्विलोडन"मिति ॥ १५ ॥

ततश्च । कस्यापि योगिनो योगबलाच्चित्रपुत्तलिकानां व्याहार इव भुजगदंशमूर्छितानां मन्त्रकृतनर्तनावर्तितवाक्प्रयोग इव परस्परमालाप आसीत् ॥ १६ ॥

एवं च तादृश्यामपि दशायां स्थितानामाशयैव रक्षितप्राणमात्राणां तासां परस्परालापसामर्थ्ये युक्तिमाह कस्यापीति, चित्रपुत्तलिका हि प्रथमत एवाचेतना इति द्वितीयो दृष्टान्त एव पूर्णसाधर्म्यः, मन्त्रेण कृतेषु नर्तनेष्वावर्तितः, बलात्कारेण पुनः प्रवर्तित इत्यर्थः ॥ १६ ॥

अहो किमेतत् ।

विलासिन्यो नीलाम्बुजमिति कवयो परिदधुः
कलावत्यः किंवा हृदयमनयन्नेव पिशुनाः ।
न चेत् पश्यन्तीनां हरिणनयनानां चलयतः
कुतोऽकस्मात् कस्मादपसरतु नो जीवितमणिः ॥ १७ ॥

कवरीभूषणमात्र एव तस्यापर्याप्तिमामृश्याहुः कलावत्य इति, कलावत्यः अस्मन्मोहनादिकलायोगवत्यः, पिशुनाः परदुःखदाच्यः ॥ १७ ॥

इति परस्परपरमसंदेहे वितर्कपरंपरापराहतधियः पुनरपि मीमांसन्ते स्म ॥ १८ ॥

तादृशशक्तिमतीनां किमस्मत्तो भयमिति चोरयित्वा असौ नेतव्य इत्यपरासां वितर्कान्तरमाह, इतीति, मीमांसन्ते स्म विचारयामासुः ॥ १८ ॥

यदायातं गेहादिह यदपि दृष्टः स परुषं
श्रुतं यत् तस्योक्तं यदपि करुणोक्तिर्विरचिता ।
प्रसन्नेन प्रेम्णा यदपि रमितं तेन सकलं
तदेतत् स्वप्नो नः किमुत परमो मोहमहिमा ॥ १६ ॥

अन्तर्धानस्य कारणानुपलम्भात् तद्विनाभूतस्य चाप्रामाण्यात् अन्तर्धानं तत्प्रतियोगिप्राकट्यं च इत्युभे अस्मदनुभवसमर्पिते अपि अलीके एवेत्याहुः यदायातमित्यादि, ननु शयनं विना कुतः स्वप्न इत्यत आहुर्मोहमहिमेति ॥ १९ ॥

इति चर्यं विमृश्य पुनरूचिरे चिरेण कण्ठरोधमुद्घाट्य ।

अहो ।

ता एव किं नहि वयं किमसौ प्रयातः
क्वापीति यत् तदपि चेदमलीकमेव ।
तेनैव नीतमखिलं मनआदिकं नः
कः पामरो निरमिमीत बतान्यदेतत् ॥ २० ॥

सर्वविलक्षणतादृशतदङ्गसङ्गविलासस्यात्रदृष्टाश्रुतचरत्वेन स्वप्नमोहनिदुत्वमसंभावयन्त्योऽन्या अन्यथैव वितर्कयन्त्य आहुः ता एवेति । तत् तत् सर्वं सत्यमेव नतु स्वप्नादिसिद्धं किंतु तद्वन्त्योऽन्या एव गोप्यस्ताः संप्रत्यपि तेन सह विहरन्त्येव केवलं तद्धर्ममात्मसु वयमध्यारोप्य क्लिश्यामहे इति भावः । ननु तर्हि तदन्तर्धानजनितविरहबाधेयं कुत्रत्यो धर्मस्तत्राहुः किमसौ क्वापीति, प्रयात इति यत् तत् तु अलीकमेव तत्र हेतुः तेनैवेति, अयमर्थः, यदस्माकं मनइन्द्रियादिकं सर्वं स्वमङ्गे नीत्वैव तेन गतं नत्वेकाकितया तर्हि अस्मान् विहायान्तरधादिति कथमसावुपालम्भनीय इति । ननु यद्येवं तदा संप्रति येन पीडा अनुभूयते तन्मनआदिकं कतमत् तत्र साक्षेपमाहुः कः पामर इति, अस्मान् दुःखयितुं ततोऽन्यदेव एतन्मनआदिकं यो निरमिमीत असौ क्रूरः कः, न तं ज्ञातुं वयं शक्नुम इति भावः ॥ २० ॥

एवं नानाविकल्पकल्पनानन्तरं निश्चिते श्रीकृष्णतिरोभावेऽभावे चात्मनो जीवनादेरुत्पद्यमाने सति श्रीकृष्णोन्माद एव तन्निवर्तकतया तासामन्तरमन्तरयांचकार ॥ २१ ॥

आत्मनो जीवनादेरभावे नाशे उत्पद्यमाने सति तन्निवर्तकतया जीवनाद्यभावनिवर्तकत्वेन अन्तरम् अन्तःकरणम् अन्तरयांचकार व्यवहितं चकार, विरहपीडातो व्यवधानं मनसोऽभूदित्यर्थः, मध्ये कृष्णतादात्म्यप्रवेशेन तस्या अपलापादिति भावः ॥ २१ ॥

तथान्तर्वृत्तिनिवृत्तिनिरते तरलतरङ्गनिकरे तस्मिन्नुन्मादोर्मिमालिनि हृदयमाविश्य हृदयस्य कृष्णाकारकारणतां प्राप्तवति ॥ २२ ॥

उन्माद एव ऊर्मिमाली समुद्रः तस्मिन् हृदयम् आविश्य हृदयस्य कृष्णाकारे कृष्णात्मकत्वे कार्ये कारणतां हेतुत्वं प्राप्तवति सति काचिदवस्था कृष्णस्य गत्यनुगत्याद्यनुकारिणी निर्यतो निर्गच्छतः प्राणान् अवस्थापयामास । कथंभूते, तरलश्चपलस्तरङ्गनिकरः कृष्णोन्मादोत्थहर्षादिविविधसंचारिभावसमूहो यत्र तस्मिन्, अत एवान्तःकरणस्य वृत्तीनां विरहपीडामयीनां निवृत्तौ विषये निरते ॥ २२ ॥

नव्यापारा व्यापारान्तरहारिणी हारिणी कृष्णस्य गत्यनुगत्यनुरागविहसितसितमयूखमयूखसविभ्रमभ्रमदलितदलितशतपत्रपत्रतिरस्कारिहारिनयनान्तकान्तनिरीक्षणक्षणमधुमधुरालापमनोरमेहितहितमधुरिमगरिमगभीरभीरहितानेकविलासान्तरानुकारिणी काचिदवस्थावस्थापयामास निर्यतः प्राणान् ॥ २३ ॥

अत एव नव्या नवीना अपारा बुद्धेरप्यगम्येत्यर्थः गतिर्गमनं च अनुगतिस्तत्कर्तृका स्वभक्तजनानुगतिश्च अनुरागश्च विहसितमेव सितमयूखस्य चन्द्रस्य मयूखः स च सविभ्रमं भ्रमच्चलियंत्र तथाभूतं दलितं प्रस्फुटं शतपत्रं कमलं तस्य पत्रतिरस्कारि हारि यन्नयनं तस्यान्तेन अपाङ्गेन निरीक्षणे यः क्षण उत्सवोऽवसरो वा स च मधुनोऽपि मधुर आलापश्च मनोरममीहितं च तथा हितानि च तानि मधुरिम्णा गरिम्णा गभीराणि भीरहितानि च यानि अनेकविलासान्तराणि तेषामनुकारिणी ॥ २३ ॥

स्थितेषु तेषु प्राणेषु प्राणेश्वरमनुसंदधत्यो वार्तेनेतस्ततोऽस्ततोषाश्चाल्यमानाः कमलिन्य इव वनाद्वनं संचरन्त्यः संहता हता विरहवेदनयानया तमुरुगायं गायन्त्यः पन्थानमपन्थानमपि वा यदि न विदुस्तदा ताभिरलक्ष्यमाणेव योगमायागता या भगवती छायेव तासामन्वनुयान्ती यान्तीं[1]व्रतां प्रातिकूल्यकृतां हरति सा ताभिरपि नाज्ञायत ॥ २४ ॥

अस्ततोषा गतहर्षाः, प्राप्तोद्वेगा इत्यर्थः । उरुगायं कृष्णम्, उरु अधिकं गायतीति निरुक्त्या गीतरसिकस्य गानेनाकर्षणसंभवादिति भावः । तीव्रतां शर्कराकण्टकाद्याघातसंबन्धिनीम् । न अज्ञायत नान्वभूयत ॥ २४ ॥

एवमितस्ततोऽनुसंदधत्योऽनुद्रुममनुलतं

पप्रच्छुरपि ।

हन्ताश्वत्थकपित्थकिंशुकवटप्लक्षाः शिवं वोऽस्त्वयं
किं दृष्टो नु भवद्भिरत्र विचरन् गोपेन्द्रजः कथ्यताम् ।
तूष्णीं तिष्ठथ किं न वक्ष्यथ नः सत्यं स वो गोचरः
स्तम्भोऽयं कथमन्यथा बलवतानन्देन यः कल्पितः ॥ २५ ॥

स्तम्भः सात्त्विकभेदः ॥ २५ ॥

इत्याभाष्य,

अहो तदनुध्यानेकतानतया नतया मनोवृत्त्या बहिर्व्यापारपारवश्येनास्माकं विज्ञप्तिममी नाकलयन्ति तदन्यतो गत्वा पृच्छाम इति कियद्दूरं गत्वा ॥ २६ ॥

तस्यानुध्याने या एकतानता तया, नतया नम्रीकृतया, "एकतानोऽनन्यवृत्ति"रित्यमरः । बहिर्व्यापाररूपं यत् पारवश्यं तेन ॥ २६ ॥

---

[1] यां तीव्रतामित्येवं मुद्रणीये परसवर्णः प्राप्तः ।

हे चाम्पेयरसालशालसरला: पुंनाग हे चम्पक
श्यामोऽनेन पथा भवद्भिरनघैर्गच्छन् समालोकित: ।
चित्तं योऽपजहार नो ननननेत्याधूयमानैर्दले-
र्मा मिथ्या गदथान्यथा कथमयं रोमोद्गमो व: स्थिर: ॥ २७ ॥

अनघैरिति, वयमेव कृतागा इति भाव: ॥ २७ ॥

इत्यालप्य तदुत्तरमनालभ्य पुनरूचिरे । अहो अमी तद्गुणा एव तेनेव दारुणतया न प्रतिवचनं रचयन्ति भवतु पुनरन्यतो गत्वा प्रष्टव्यमिति तथा कृत्वा पुरतस्तमालमालोक्य तथा पप्रच्छु: ।

हंहो तमाल तव वर्णसुहृत् स कृष्ण:
सत्यं बभूव विषयस्तव मान्यथैतत् ।
श्लिष्टोऽसि तेन यदयं त्वचि ते विसर्पी
लीढो मधुव्रतगणेन तदीयगन्ध: ॥ २८ ॥

तेन, सख्येन हेतुनेत्यर्थ:, श्लेषेण लिङ्गमाहु:· तदीयगन्धस्त्वचि ते विसर्पीति, नन्वनृतमात्थ तदनुपलम्भादित्यत आहुर्लीढ इति, अत एव संप्रति स नानुभूयत इति भाव: ॥ २८ ॥ ॥ शेषमग्रे ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER XIII.

THE PÁṆINI DARŚANA. *

(Continued from page 376).

If any one asks, " Where are we to learn how to separate a root and an affix, so as to be able to say 'this part is the original

* Mádhava uses this peculiar term, because the grammarians adopted and fully developed the idea of the Púrva-mímámsá school that sound is eternal. He therefore treats here of *sphoṭa*, and not in his Jaimini chapter.

॥ सर्वदर्शनसङ्ग्रहे
पाणिनिदर्शनम् ॥

नन्वयं प्रकृतिभाग: अयं प्रत्ययभाग इति प्रकृतिप्रत्ययविभाग: कथमवगम्यत इति चेत् पीतपातञ्जलजलानामेतच्चोद्यं चमत्कारं न

root and this is an affix'," may we not reply that to those who have drunk the waters of Patanjali, this question produces no confusion, since it is notorious that the rules of grammar have reference to this very point of the separation of the original roots and affixes? Thus the very first sentence of the venerable Patanjali, the author of the 'Great Commentary' is '*atha śabdánuśásanam*,' 'Now comes the exposition of words.' The particle *atha* ('now') is used here as implying a new topic or a commencement; and by the phrase 'exposition of words' is meant the system of grammar put forth by Páṇini. Now a doubt might here arise as to whether this phrase implies that the exposition of words is to be the main topic or not; and it is to obviate any such doubt that he employed the particle *atha*, since this particle implies that what follows is to be treated as the main topic to the exclusion of everything else.

The word 'exposition' (*anuśásana*) as here used, implies that thereby Vaidic words, such as those in the line *śam no devír abhishṭaye*,* &c., and secular words as ancillary to these, as the common words for 'cow,' 'horse,' 'man,' 'elephant,' 'bird,' &c., are made the subject of the exposition, i. e., are deduced from

* Rig Veda X. 9. 4.

करोति व्याकरणशास्त्रस्य प्रकृतिप्रत्ययविभागपरतायाः प्रसिद्धत्वात् तथाहि पतञ्जलेर्भगवतो महाभाष्यकारस्य इदमादिमं वाक्यम् अथ शब्दानुशासनमिति । अस्यार्थः अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते अधिकारः प्रस्तावः प्रारम्भ इति यावत् शब्दानुशासनशब्देन च पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्ष्यते शब्दानुशासनमित्येतावत्यभिधीयमाने सन्देहः स्यात् किं शब्दानुशासनं प्रस्तूयते न वेति तथा मा प्रसाङ्क्षीदित्यथशब्दं प्रायुङ्क्त अथशब्दप्रयोगबलेनार्थान्तरव्युदासेन प्रस्तूयते इत्यस्यार्थस्याभिधीयमानत्वात् अनेन हि वैदिकाः शब्दाः शन्नोदेवीरभीष्टय इत्यादयः तदुपकारिणो लौकिकाः शब्दाः गौरश्वः पुरुषो हस्ती शकुनि-

their original roots and properly formed, or, in other words, are explained as separated into root and affix. We must consider that the compound in this phrase represents a genitive of the object (*śabdánuśásanam* standing for *śabdasyánuśásanam*,) and as there is a rule of *Páṇini* (*karmaṇi cha*, ii. 2. 14,) which prohibits composition in such a construction, we are forced to concede that the phrase *śabdánuśásanam* does not come before us as a duly authorised compound.

Here however arises a discussion (as to the true application of the alleged rule of Páṇini;) for we hold that, by ii, 3. 66, wherever an object and an agent are both expressed in one and the same sentence in connection with a word ending with a kṛit affix, there the object alone can be put in the genitive and not the agent; * this limitation arising from our taking *ubhayaprápti* in the sútra

* *Śabdánuśásana*, if judged by the apparent sense of Páṇini, ii. 2. 14 would be a wrong compound; but it is not so, because ii. 2. 14 must be interpreted in the sense of ii. 3. 66, whence it follows that the compound would only be wrong *if* there were an agent expressed *as well as* an object, i. e., if such a word as *ácháryeṇa*, followed. In the example given, we cannot say *áścharyo godoho śikshitena gopálena* (as it would violate ii. 2. 14.)' neither can we say *áścharyo gavám doho' śikshitasya gopálasya*, (as it would violate ii. 3. 66.)

रित्यादयश्चानुशिष्यन्ते व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्ययविभागवत्तया बोध्यन्त इत्यनुशासनशब्दशासनबलात् कर्म्मण्येषा षष्ठी विधातव्या तथा च कर्म्मणि चेति समासप्रतिषेधसम्भवात् शब्दानुशासनशब्दो न प्रमाणपथमवतरतीति । अत्रायं समाधिरभिधीयते यस्मिन् कृत्प्रत्यये कर्तृकर्म्मणोरुभयोः प्राप्तिरस्ति तत्र कर्म्मण्येव षष्ठीविभक्तिर्भवति न कर्त्तरीति बहुव्रीहिविज्ञानबलाल्लभ्यते । तद्यथा आश्चर्य्यो गवां दोहो शिक्षितेन गोपालकेनेति कर्त्तर्य्यपि षष्ठी भवतीति केचिद् ब्रुवते अतएवोक्तं काशिकावृत्तौ केचिदविशेषेणैव विभाषामिच्छन्ति शब्दानामनुशासनमाचार्य्येणाचार्य्यस्य वेति शब्दानामनुशासनमित्यत्र तु शब्दानामनुशासनं नार्थानामित्येतावता विवक्षितस्यार्थस्याचार्य्यस्य कर्तुरुपादानेन विनापि

as a bahuvríhí compound.* Thus we must say 'wonderful is the milking of cows by an unpractised cowherd.' We may, however, remark in passing that some authors do maintain that the agent may in such cases be put in the genitive (as well as the object;) hence we find it stated in the Kásiká Commentary Some authors maintain that there should be an option in such cases without any distinction, and thus they would equally allow such a construction as 'the word-exposition *of* the teacher' or '*by* the teacher.' Inasmuch, however, as the words of the phrase in question really mean that the 'exposition' intended relates to *words* and not to *things*, and since this can be at once understood without any mention of the agent, i. e. the teacher, any such mention would be plainly superfluous; and therefore, as the object and the agent are *not* both expressed in one and the same sentence, this is not an instance of the genitive of the object, (coming under ii. 3. 66, and ii. 2. 14,) but rather an instance of quite another rule, viz. ii. 3. 45, which directs that an agent or an object, in connection with a word ending with a kṛit affix, is to be put in the genitive, (which in this instance is expressed by the bahuvríhi compound;) and the compound in question will be strictly analogous to such recognized forms as *idhma-pravrás-*

* That is, the *ubhayaprápti* of ii. 3. 66, is a bahuvríhi agreeing with *kṛiti* in ii. 3. 65. These points are all discussed at some length in the commentaries an Páṇini.

सुप्रतिपादत्वादाचार्य्योपादानमकिञ्चित्करं तस्मादुभयप्राप्तेरभावादुभयप्राप्तौ कर्म्मणीत्येषा षष्ठी न भवति किन्तु कर्तृकर्म्मणोः कृतीति कृद्योगे कर्त्तरि कर्म्मणि च षष्ठी विभक्तिर्भवतीति कृद्योगलक्षणा षष्ठी भविष्यति तथा चेध्मप्रव्रश्चनपलाशशातनादिवत् समासो भविष्यति अथवा शेषलक्षणेयं षष्ठी तत्र किमपि चोद्यं नावतरत्येव। यद्येव तर्हि शेषलक्षणायाः षष्ठ्याः सर्व्वत्र सुलभत्वात् षष्ठीसमासप्रतिषेधसूत्राणामानर्थक्यं प्राप्नुयादिति चेत् सत्यं तेषां स्वरचिन्तायामुपयोगो वाक्यपदीये प्रादर्शि। तदाह महोपाध्यायवर्द्धमानः

Digitized by Google

chana, *paláśa-śátana*, &c.,* Or we might argue that the genitive case implied in this *shashṭhítatpurusha* is one of the class called "residual," in accordance with Páṇini's rule (ii. 3. 50) "Let the genitive be used in the residuum," (i. e. in the other constructions not provided for by special rules †;) and in this way we might defend the phrase against the opponent's attack. "But," it might be replied, "your alleged 'residual genitive' could be assumed every where, and we should thus find all the prohibitions of composition in constructions with a genitive case, rendered utterly nugatory." Thus we readily grant, and hence Bhartṛihari in his *Vákyapadíya* has shewn that these rules are mainly useful where the question relates to the *accent*.‡ To this effect are the words of the great doctor Vardhamána:

'In secular utterances men may proceed as they will,
But in Vaidic paths let minute accuracy of speech be employed.

Thus have they explained the meaning of Páṇini's Sútras, since

* These actually occur in the Commentaries to Páṇini ii. 2. 8 ; iii. 3. 117, &c.
† This takes in all cases of relation, *sambandha* (i. e. *shashṭhi-sambandha*.)
‡ As in such, rules as 6, 2. 139.

लौकिकव्यवहारेषु यथेष्टं चेष्टतां जनः ।
वैदिकेषु तु मार्गेषु विशेषोक्तिः प्रवर्त्तताम् ॥
इति पाणिनिसूत्राणामर्थमत्राभ्यधाद् यतः ।
जनिकर्त्तुरिति ब्रूते तत्प्रयोजक इत्यपीति ॥

अथात्र शब्दानुशासनापरनामधेयं व्याकरणशास्त्रमारब्धं वेदितव्यमिति वाक्यार्थः सम्पद्यते । तस्यार्थस्य झटिति प्रतिपत्तये अथ व्याकरणमित्येवाभिधीयताम् अथ शब्दानुशासनमित्यधिकाक्षरं मुधाभिधीयत इति नैवं शब्दानुशासनमित्यन्वर्थं समाख्योपादाने तदीयवेदाङ्गत्वप्रतिपादकप्रयोजनाख्यानसिद्धेः अन्यथा प्रयोजनानभिधाने व्याकरणाध्ययने

He himself uses such phrases as *janikartuh* and *tat-prayajakah.**

Hence it follows that the full meaning of the sentence in question (of the *Mahábháshya*) is that "it is to be understood that the rules of grammar which may be taken as a synonym for 'the exposition concerning words,' are now commenced."

"Well, then, for the sake of directly understanding this intended meaning it would have been better to have said, now comes grammar;—as the words 'now comes the exposition of words' involves a useless excess of letters." This objection cannot, however be allowed, since the employment of such a phrase as '*atha śabdánuśásanam*' the sense of which can be so readily inferred from its etymology, proves that the author intends to imply an end which shall establish that grammar is a subordinate study *(anga)* to the Veda.† Otherwise, if there were no such end set forth, there would be no consequent application of the readers to the study of grammar. Nor may you say that this application will be sufficiently enforced by the injunction for study, 'the Veda with its six subordinate parts must be read as a duty without any

* These compound occur in Páninis' own Sutras (i. 4. 30 and i. 4. 55.) and would violate his own rule in 2, 2, 15. if we were to interpret the latter without some such saving modification as *shashthí sheshe.*

† The very word *śabda* in *śabdánuśásanam* implies the Veda, since this is pre-eminently *śabda.*

अध्येतॄणां प्रवृत्तिरेव न प्रसजेत् । ननु निष्कारणो धर्म्मः षडङ्गो वेदोऽध्येतव्य इति अध्येतव्यविधानादेव प्रवृत्तिः सेत्स्यतीति चेन्मैवं तथाविधानेऽपि तदीयवेदाङ्गत्वप्रतिपादकप्रयोजनानभिधाने तेषां प्रवृत्तेरनुपपत्तेः । तथाहि पुरा किल वेदमधीत्याध्येतारस्त्वरन्ति वक्तारो भवन्ति ।

वेदान्न वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः ।

तस्मादनर्थकं व्याकरणमिति तस्माद्वेदाङ्गत्वं मन्यमानास्तदध्ययने प्रवृत्तिमकार्षुः ततश्चेदानीन्तनानामपि तत्र प्रवृत्तिर्न सिद्ध्येत् सा मा प्रसाङ्क्षीदिति तदीयवेदाङ्गत्वप्रतिपादकं प्रयोजनमन्वाख्येयमेव । यद्यप्यनुव्य-

(special) end*,' because, even though there be such an injunction, it will not follow that they will apply to the study, if no end is mentioned, such as the establishing that it is an *anga* of the Veda. Thus in old times the students, after reading the Veda, used to be in haste to say:—

'Are not Vaidik words established by the Veda and secular
by common life,

'And therefore grammar is useless?' Therefore it was only when they understood it to be an *anga* of the Veda, that they applied themselves to its study. So in the same way the students of the present day would not be likely to apply themselves either. It is to obviate this danger that it becomes necessary to set forth some end which shall at the same time establish that grammar is an *anga* of the Veda. If, when the end is explained, they should still not apply themselves, then, being destitute of all knowledge of the true formation of secular words, they would become involved in sin in the course of sacrificial acts, and would consequently lose their merit. Hence the followers of sacrifice read, "One who keeps up a sacrificial fire on using a wrong word, should offer an expiatory offering to Saraswatí." Now it is to declare this end which establishes that it is an *anga* of the Veda, that he uses the words *atha śabdánuśásanam* and not *atha vyákaraṇam*. And the rules of grammar must have an end, from men's application to their study with a view thereto. Now just

* Compare Max Müller's *Sansk. Liter.* p. 118.

ख्यातेऽपि प्रयोजनेन प्रवर्त्तेरन् तर्हि लौकिकशब्दसंस्कारज्ञानरहितास्ते यज्ञे कर्म्मणि प्रत्यवायभाजो भवेयुः धर्म्माद्धीयेरन् अत एव याज्ञिकाः पठन्ति "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति" अतस्तदीयवेदाङ्गत्वप्रतिपादकप्रयोजनान्वाख्यानार्थमथशब्दानुशासनमित्येव कथ्यते नाथ व्याकरणमिति । भवति च व्याकरणशास्त्रस्य प्रयोजनं (तस्य तदुद्देशेन प्रवृत्तेः तस्य प्रयोजनं) यथा स्वर्गोद्देशेन प्रवृत्तस्य यागस्य स्वर्गः प्रयोजनं तस्मात् शब्दानुशिष्टिः संस्कारपदपदनीया शब्दानुशासनस्य प्रयोजनम् । नन्वेवमप्यभिमतं प्रयोजनं न लभ्यते

as in a sacrifice undertaken with a view to heaven, heaven is the end,—in the same way the end of the exposition of words is instruction concerning words, i. e., propriety of speech. "But," an objector may say, "will not the desired end be still unattained, for want of the true means to it? Nor can it be said that reading the Veda word by word is the true means; for this cannot be a means for the understanding of words, since their number is infinite, as divided into proper and improper words.* Thus there s a tradition, that Bṛihaspati for a thousand divine years taught to Indra the study of words as used in their individual forms when the Veda is read word by word,† and still he came not to the end. Here the teacher was Bṛihaspati, the pupil was Indra, and the time of study a thousand years of the gods; and yet the termination was not reached,—how much less, then, in our day, let a man live ever so long? Learning is rendered efficient by four appropriate means,—reading, understanding, practising, and handing it on to others; but in the proposed way life would only suffice for the bare time of reading,—therefore the reading word by word is not a means for the knowledge of words, and consequently, as we said first, the desired end is not established." We reply, however, that it was never conceded that the knowledge of words was to be attained by this reading word by word,—and again, since

* In the Calcutta text, p. 188, dele *daṇḍa* in line 3 after *bhavet* and insert it in line 4 after *śabdánám*.

† As in the so-called *pada* text.

तदुपायाभावात् अथ प्रतिपदपाठ एवाभ्युपाय इति मन्येथाः तर्हि स ह्यनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठो भवेत् । शब्दापशब्दभेदेनानन्त्याच्छब्दानाम् एवं हि "समाम्नायते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदपाठविहितानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता इन्द्रोऽध्येता दिव्यं वर्षसहस्रमध्ययनकालः न च पारावाप्तिरभूत् किमुताद्य यश्चिरं जीवति अधीतिस् बोधाचरणप्रचारैश्चतुर्भिरुपायैर्विद्योपयुक्ता भवति" तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात्तस्मादनभ्युपायः शब्दानां प्रतिपदपाठ इति प्रयोजनं न

general and special rules apply at once to many examples, when these are divided into the artificial parts called roots, &c., (just as one cloud rains over many spots of ground,) in this way we can easily comprehend an exposition of many words. Thus for instance, by the general rule 3,2,1, *karmaṇi*, the affix *aṇ* is enjoined after a root when the object is in composition with it; and by this rule we learn many words as *kumbhakára* 'a potter,' *káṇḍa-láva*, 'a cutter of stems,' &c., but the supplimentary special rule 3, 2, 2 *áto nupasarge kah*, directing that the affix *ka* is to be used after a root that ends in long *á* when there is no *upasarga*, shews how impracticable this reading word by word would be, (since it would never teach us how to distinguish an upasarga.) "But since there are other *angas*, why do you single out grammar as the one object of honour?" We reply that among the six angas the principal one is grammar, and labour devoted to what is the principal, is sure to bear fruit. Thus it has been said:—

> Nigh unto Brahmá himself,—the highest of all religious austerities,—
>
> The wise have called grammar the first anga of the Vedas.

Hence we conclude that the exposition of words is the direct end of the rules of grammar, but its indirect end is the preservation, &c., of the Veda. Hence it has been said by the worshipful author of the great Commentary (quoting a Várttika,) "the end (or motive) is preservation, inference, scripture, facility, and assur-

---

सिद्धुर्विदिति चन्मैवं शब्दप्रतिपत्तेः प्रतिपदपाठसाध्यत्वानङ्गीकारात् प्रकृत्यादिविभागकल्पनावत्सु लक्ष्येषु सामान्यविशेषरूपाणां लक्षणानां पर्जन्यवत् सकृदेव प्रवृत्तौ बहूनां शब्दानामनुशासनोपलम्भाच्च तथाहि कर्म्मण्यणित्येकेन सामान्यरूपेण लक्षणेन कर्म्मोपपदाद्धातुमात्रादण्प्रत्यये कृते कुम्भकारः काण्डलाव इत्यादीनां बहूनां शब्दानामनुशासनमुपलभ्यते एवमातोऽनुपसर्गे क इति पदपाठस्याशक्यत्वप्रतिपादनपरोऽर्थवादः नन्वन्येष्वप्यङ्गेषु सत्सु किमित्येतदेवाद्रियते। उच्यते प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। तदुक्तम्।

ance." *—Moreover prosperity arises from the employment of a correct word,—thus Katyáyana has said, "there is prosperity in the employment of a word according to the *śástra*,—it is equal to the words of the Veda itself." Others also have said that "a single word thoroughly understood and rightly used becomes in Swarga the desire-milking cow." Thus (they say) :—

They proceed in heaven, with every desired happiness, in
well-yoked chariots of harnessed speech ;
But those who use such false forms as *achíkramata* must
trudge thither on foot.†

Nor need you ask "how can an irrational word possess such power?" since we have revelation declaring that it is like to the great god. For the Śruti says, "four are its horns, three its feet, two its heads, and seven its hands,—roars loudly the three-fold bound bull, the great god enters mortals" (Ṛig Veda, iv. 58. 3.) The great Commentator thus explains it,—the 'four horns' are the four kinds of the words, nouns, verbs, prepositions and particles, its 'three feet' mean the tenses *laṭ*, &c., i. e., the three times, past, present, and future ; the 'two heads,' the eternal and temporary (or produced) words, distinguished as the 'manifested' and the 'manifester;' its 'seven hands' are the

* See Ballantyne's *Mahábháshya*, pp. 12. 161.

† *Achíkramata* seems put here as a purposely false form of the frequentation of *kram*, for *achamkramata*

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधा इति ॥

तस्मात् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनं पारम्पर्य्येण तु वेदरक्षादीनि । अतएवोक्तं भगवता भाष्यकारेण रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति साधुशब्दप्रयोगवशादभ्युदयोऽपि भवति तथाच कथितं कात्यायनेन शास्त्रपूर्व्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देनेति । अन्यैरप्युक्तम् एकः शब्दः सम्यक् ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति । तथा

seven case affixes (including the conjugational terminations),—'three-fold bound,' as enclosed in the three organs, the breast, the throat and the head. The metaphor 'bull' (*vṛishabha*) is applied from its pouring forth (*varshaṇa*). i. e. from its giving fruit when used with knowledge. 'Loudly roars,' i. e., utters sound, for the root *ru* means 'sound;'—here by the word 'sound' developed speech (or language)* implied; 'the great god enters mortals,'—the 'great god,' i. e., speech,—enters mortals, i. e. men endowed with the attribute of mortality. Thus is declared the likeness (of us †) to the supreme Brahma.

The eternal word, called *sphoṭa*, without parts, and the cause of the world, is verily Brahma—thus it has been declared by Bhartṛihari, in the part of his book called the Brahmakáṇḍa:—

> "Brahma without beginning or end, the indestructible essence of speech,
> Which is developed in the form of things, and whence springs the creation of the world."

"But since there is a well-known two-fold division of words into nouns and verbs, how comes this four-fold division?" We reply, because this too is well known. Thus it has been said in the Prakírṇaka:—

* Or it may mean 'the developed universe,' compare the lines of Bhartṛihari which immediately follow.

† One would naturally supply *śabdasya* after *sámyam*, but the Mahábháshya has *naḥ śamyam*, see Ballantyne's ed. p. 27.

नाकमिष्टसुखं यान्ति सुयुक्तैर्वाग्रथैः ।
अथ पत्काषिणो यान्ति ये चीक्कमवभाषिणः ॥

नन्वचेतनस्य शब्दस्य कथमीदृशं सामर्थ्यमुपपद्यत इति चेन्मैवं मन्येथाः । महता देवेन साम्यश्रवणात् तदाह श्रुतिः "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" । व्याचक्रे च भाष्यकारः चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपातास्त्रयो अस्य पादाः लडादिविषयाः त्रिधा भूतभविष्यद्वर्तमानकालाः द्वे शीर्षे द्वौ नित्यानित्या-

"Some make a two-fold division of words, some a four-fold
or a five-fold,
"Drawing them up from the sentences as root, affix and
the like."

Helárája interprets the five-fold division as including *karmapravachaníyas.* * But the four-fold division, mentioned by the great commentator, is proper,—since *karmapravachaníyas* distinguish a connection produced by a particular kind of verb, and thus, as marking out a particular kind of connection and so marking out a particular kind of verb, they are really included in compounded prepositions (*upasargas*). †

"But," say some, why do you talk so much of an eternal sound called *sphoṭa*? This we do not concede, since there is no proof that there is such a thing." We reply that our own perception is the proof. Thus there is one word 'cow,' since all men have the cognition of a word distinct from the various letters

* I. e., prepositions used separately as governing cases of their own, and not (as usually in Sanskrit) in composition.

† The karmapravachaníyas imply a verb other than the one expressed, and they are said to determine the relation which is produced by this understood verb. Thus in the example *Śákalyasamhitám anu právarshat,* "he rained after the Śákalya hymns," *anu* implies an understood verb *niśamya,* "having heard," and this verb shews that there is a relation of cause and effect between the hymns and the rain. Thus *anu* is said to determine this relation.

स्थाने। नित्यः कार्य्यश्च व्यङ्ग्यव्यञ्जकभेदात् सप्तहस्तासो अस्य तिङः सह सप्त सुब्विभक्तयः त्रिधा बद्धः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः वृषभः इति प्रसिद्धवृषभत्वेन रूपणं क्रियते वर्षणात्तुर्य्यपक्षे ज्ञानपूर्व्वकानुष्ठानेन फलप्रदत्वं रोरवीति शब्दं करोति रौतिः शब्दकर्म्मा इह शब्दशब्देन प्रपञ्चो विवक्षितः महो देवो मर्त्यां आविवेशेत्यस्य देवः शब्दः मर्त्या मरणधर्म्माणो मनुष्यास्तानाविवेशेति महता देवेन परेण ब्रह्मणा साम्यमुक्तं स्यादिति व्यवचिन्तानं स्फोटात्मा निरवयवो नित्यः शब्दः ब्रह्मेति। हरिणाप्युक्तं ब्रह्मकाण्डे

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यत इति॥

composing it. You cannot say, in the absence of any manifest contradiction, that this perception of the word is a false perception. Hence you must concede that there is such a thing as *sphoṭa*, as otherwise you cannot account for the cognition of the meaning of the word. For the answer that its cognition arises from the letters, cannot bear examination, since it breaks down before either horn of the following dilemma,—Are the letters supposed to produce this cognition of the meaning in their united or their individual capacity? Not the first, for the letters singly exist only for a moment, and therefore cannot form a united whole at all; and not the second, since the single letters have no power to produce the cognition of the meaning (which the word is to convey.) There is no conceivable alternative other than their single or united capacity; and therefore it follows (say the wise in these matters) that as the letters cannot cause the cognition of the meaning; there must be a *sphoṭa* by means of which arises the knowledge of words; and this *sphoṭa* is an eternal sound, distinct from the letters and suggested by them, which causes the cognition of the meaning. 'It is disclosed (*sphuṭyate*) or suggested by the letters,'—hence it is called *sphoṭa*, as suggested by the letters; or 'from it is disclosed the meaning,' hence it is called *sphoṭa* as causing the knowledge of the meaning,—these are the two etymologies to explain the meaning, of the word. And thus it hath been said

---

ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीतेः कथं चातुर्व्विध्यमुक्तमिति चेन्मैवं प्रकारान्तरस्य प्रसिद्धत्वात् तदुक्तं प्रकीर्णके ॥

द्विधा कैश्चित् पदं भिन्नं चतुर्द्धा पञ्चधापि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवदिति ॥

कर्म्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति हेलाराजो व्याख्यातवान् । कर्म्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतव इति सम्बन्धविशेषद्योतनद्वारेण क्रियाविशेषद्योतनादुपसर्गेष्वेवान्तर्भवतीत्यभिसन्धाय पदचातुर्व्विध्यं भाष्यकारेणोक्तं युक्तमिति विवेक्तव्यम् ।

by the worshipful Patanjali in the great Commentary, "Now what is the word '*cow*' *gauh*? It is that word, by which, when pronounced, there is produced the simultaneous cognition of dewlap, tail, hump, hoofs, and horns." This is expounded by Kaiyaṭa, in the passage commencing "Grammarians maintain that it is the word, as distinct from the letters, which expresses the meaning; since, if the letters expressed it, there would be no use in pronouncing the second and following ones, (as the first would have already conveyed all we wished,")—and ending, "the *Vákyapadíya* has established at length that it is the sphoṭa, which, distinct from the letters and revealed by the sound, expresses the meaning." *

Here however an objector may urge, "But should we not rather say that the sphoṭa has no power to convey the meaning, as it fails under either of the following alternatives,—for is it supposed to convey the meaning, when itself manifested or unmanifested? Not the latter; because it would then follow that we should find the effect of conveying the meaning always produced,—since, as sphoṭa is supposed to be eternal and there would thus be an ever-present cause independent of all subsidiary

* See Ballantyne's ed. p. 10.

ननु भवता स्फोटात्मा नित्यः शब्द इति निजागद्यत तच्च मृष्यामहे तत्र प्रमाणाभावादिति केचित् अत्रोच्यते प्रत्यक्षमेवात्र प्रमाणं गौरित्येकं पदमिति नानावर्णातिरिक्तैकपदावगतेः सर्व्वजनीनत्वाद्यसति बाधके पदानुभवः शक्यो मिथ्येति वक्तुं पदार्थप्रतीत्यन्यथानुपपत्त्यापि स्फोटोऽभ्युपगन्तव्यः न च वर्णेभ्य एव तत्प्रत्ययः प्रादुर्भवतीति परीक्षाक्षमं विकल्पासहत्वात् किं समस्ता व्यस्ता वा अर्थप्रत्ययं जनयन्ति नाद्यः वर्णानां क्षणिकानां समूहासम्भवात् नान्त्यः व्यस्तवर्णेभ्योऽर्थप्रत्ययासम्भवात् न च व्याससमासाभ्यामन्यः प्रकारः समस्तीति तस्माद्वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतिपत्तिः स स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोट इति तद्विदो वदन्ति । अत

aids, the effect could not possibly fail to appear. Therefore to avoid this fault, we must allow the other alternative, viz. that sphoṭa conveys the meaning, when it is itself manifested. Well then,—do the manifesting letters exercise this manifesting power separately or combined? Whichever alternative you adopt, the very same faults which you alleged against the hypothesis of the letters expressing the meaning, will meet you in your hypothesis that they have this power to manifest sphoṭa. This has been said by Bhaṭṭa in his Mímámsá-śloka-várttika:

> "The grammarian who holds that sphoṭa is manifested by the letters as severally apprehended, though itself one and indivisible, does not thereby escape from a single difficulty."

The truth is that, as Páṇini (1, 4, 14) and Gotama (Sút. ii. 123) both lay it down that letters only then form a word when they have an affix at the end, it is the letters which convey the word's meaning through the apprehension of the conventional association of ideas which they help.* If you object that as there are the same letters in *rasa*, as in *sara*, in *nava* as in *vana*, in *díná* as *nadí*, in *mára* as in *ráma*, in *rája* as in *jára*, &c. these

* This is not very clear the *anu* in *anugraha* might mean *kramena* and so imply the successive order of the letters.

एव स्फुट्यते व्यज्यते वर्णैरिति स्फोटो वर्णाभिव्यङ्ग्यः स्फुटो भवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायक इति स्फोटशब्दार्थमुभयथा निराहुः । तथाचोक्तं भगवता पतञ्जलिना महाभाष्ये अथ गौरित्यत्र कः शब्दो येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणानां सम्प्रत्ययो भवति स शब्द इत्युच्यते इति । विवृतञ्च कैयटेन वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाचकत्वमिच्छन्ति वर्णानां वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गादित्यादिना तद्व्यतिरिक्तो स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापित इत्यन्तेन प्रबन्धेन ।

ननु स्फोटस्याप्यर्थप्रत्यायकत्वं न घटते विकल्पासहत्वात् किमभिव्यक्तः स्फोटोऽर्थं प्रत्याययति अनभिव्यक्तो वा न चरमः सर्व्वदार्थ-

Digitized by Google

several pairs of words would not convey a different meaning,—we reply that the difference in the order of the letters will produce a difference in the meaning. This has been said by Tautátita, "As are the letters in number and kind, whose power is perceived in conveying any given meaning of a word, so will be the meaning which they convey.

Therefore, as there is a well-known rule that when the same fault attaches to both sides of an argument it cannot be urged against one alone, we maintain that the hypothesis of the existence of a separate thing called *sphota* is unnecessary, as we have proved that it is the letters which express the word's meaning, (your arguments against our view having been shewn to be irrelevant.")

All this long oration is really only like a drowning man's catching at a straw,* for either of the alternatives is impossible,—whether you hold that it is the single letters or their aggregation which conveys the meaning of the word. It cannot be the former; because a collection of separate letters, without any one pervading cause,† could never produce the idea of a word

* In the Calcutta p. 142, line 11, I read कल्पं for कल्पनम्;
† In p. 142, l. 13 I add *vina* after *nimittam*.

प्रत्ययलक्षणकार्य्योत्पादप्रसङ्गात् स्फोटस्य नित्यत्वाभ्युपगमेन निरपेक्षस्य हेतोः सदा सत्त्वेन कार्य्यस्य विलम्बायोगात् । यथैतद्दोषपरिजिहीर्षया अभिव्यक्तः स्फोटोऽर्थं प्रत्याययतीति कक्षीक्रियते तथाभिव्यञ्जयन्तो वर्णाः किं प्रत्येकमभिव्यञ्जयन्ति सम्भूय वा पक्षद्वयेऽपि वर्णानां वाचकत्वपक्षे भवता ये दोषा भाषितास्तएव स्फोटाभिव्यञ्जकत्वपक्षे व्यावर्त्तनीयाः । तदुक्तं भट्टाचार्य्यैर्मीमांसाश्लोकवार्त्तिके ॥

यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः ।
सोऽपि पर्य्यनुयोगेन नैकेनापि विमुच्यते इति ॥

विभक्त्यन्तेष्वेव वर्णेषु पाणिनिना ते विभक्त्यन्ताः पदमिति गोतमेन च पदसंज्ञाया विहितत्वात् सङ्केतग्रहणेनानुग्रहवशाद्वर्णेष्वेव

any more than a collection of separate flowers would form a garland without a string. Nor can it be the latter; because the letters, being separately pronounced and done with, cannot combine into an aggregate. For we use the term 'aggregate,' where a number of objects are perceived to be united together in one place; thus we apply it to a Grisha tomentosa, an Acacia catechu, a Butea frondosa, &c. or to an elephant, a man, a horse, &c, seen together in one place; but these letters are not perceived thus united together, as they are severally produced and pass away; and even on the hypothesis of their having a 'manifesting' power, they can have no power to from an aggregate, as they can only manifest a meaning successively and not simultaneously. Nor can you imagine an artificial aggregate in the letters, because this would involve a 'mutual dependence' (or reasoning in a circle;) for on the one hand the letters would only become a word, when their power to convey one meaning had been established; and on the other hand, their power to convey one meaning would only follow, when their being a word was settled. Therefore, since it is impossible that letters should express a meaning, we must accept the hypothesis of *sphoṭa*. "But even on your own hypothesis that there is a certain thing called sphoṭa which expresses the meaning, the

---

पदबुद्धिर्भविष्यति तर्हि सर इत्येतस्मिन् पदे यावन्तो वर्णास्तावन्त एव रस इत्यत्रापि एवं वनं नवं नदं दीना रामो मारो राजा जारेत्यादिष्वर्थभेदप्रतीतिर्न स्यादिति चेन्न क्रमभेदेन भेदसम्भवात् तदुक्तं तौताततैः ।

यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधका इति ॥

तस्माद्यश्चोभयोः समो दोषो न तेनैकश्चोद्यो भवतीति न्यायात् वर्णानामेव वाचकत्वोपपत्तौ नातिरिक्तस्फोटकल्पनाऽवकल्पते इति चेत् तदेतत् काशकुशावलम्बनकल्पनं विकल्पानुपपत्तेः किं वर्णमात्रे पदप्रत्ययावलम्बनं वर्णसमूहे वा—नाद्यः परस्परविलक्षणवर्णमालायामभिन्नं नि-

same untenable alternative will recur which we discussed before; and therefore it will only be a case of the proverb that 'the dawn finds the thief near the ghát with the officer's house close by."'* This however is only the inflation of the world of fancy, from the wide difference between the two cases. For the first letter, in its manifesting power, reveals the invisible sphoṭa, and each successive letter makes this sphoṭa more and more manifest, just as the Veda, after one reading is not retained, but is made sure by repetition; or as the real nature of a jewel is not clearly seen at the first glance, but is definitely manifested at the final examination. This is in accordance with the authoritative saying (of the teacher): "The seed is implanted by the sounds; and, when the idea is ripened by the successive repetition, the word is finally ascertained simultaneously with the last uttered letter." Therefore, since Bhartṛihari has shewn in his first book that the *letters* of a word, (being many and successive) cannot manifest the meaning of the word, as is implied by the very phrase "We gain such and such a meaning from such and such a *word*,"—we are

* The ghaṭṭa is the place where dues and taxes are collected. Some one anxious to evade payment is going by a private way by night, but he arrives at the tax-collector's house just as day dawns and is thus caught. Hence the proverb means *uddeśyásiddhi.*

मित्तं पुष्पेषु विना सूत्रं मालाप्रत्ययवदित्येकं पदमिति प्रतिपत्तेरनुपपत्तेः नापि द्वितीयः उच्चरितप्रध्वस्तानां वर्णानां समूहभावासम्भवात् । तत्र हि समूहव्यपदेशो ये पदार्था एकस्मिन् प्रदेशे सहावस्थिततया बहवोऽनुभूयन्ते यथा एकस्मिन् प्रदेशे सहावस्थिततयानुभूयमानेषु धवखदिरपलाशादिषु समूहव्यपदेशः यथा वा गजनरतुरगादिषु न च ते वर्णास्तथानुभूयन्ते उत्पन्नध्वस्तत्वात् अभिव्यक्तिपक्षेऽपि क्रमेणैवाभिव्यक्तौ समूहासम्भवात् नापि वर्णेषु काल्पनिकः समूहः कल्पनीयः परस्पराश्रयप्रसङ्गात् । एकार्थप्रत्यायकत्वसिद्धौ तदुपाधिना वर्णेषु पदत्वप्रतीतिः तत्सिद्धावेकार्थप्रत्यायकत्वसिद्धिरिति । तस्माद्वर्णानां वाचकत्वासम्भवात् स्फोटोऽभ्युपगन्तव्यः । ननु स्फोटवाचकतापक्षेऽपि प्रागुक्तविकल्पप्रसरेण

forced to assume the existence* of an indivisible sphoṭa as a distinct category, which has the power to manifest the word's meaning. All this has been established in the discussion (in the Mahâbhâshya) on 'genus' *(játi)*, which aims at proving that the meaning of all words is ultimately that summum genus, i. e. that existence whose characteristic is perfect knowledge of the supreme reality † (Brahma).

But if all words mean only that supreme existence, then all words will be synonyms, having all the same meaning; and your grand logical ingenuity would produce an astonishing result in demonstrating the uselessness of human language as laboriously using several words to no purpose at the same time! Thus it has been said,

> "The employment of synonymous terms at the same time is to be condemned; for they only express their meaning by repetition and not by combination."
>
> "Therefore this opinion of yours is really hardly worth the trouble of refuting."

All this is only the ruminating of empty ether; since just as the colourless crystal is affected by different objects which colour it as blue, red, yellow, &c, so, since the summum genus,

* In p. 243, l. 13 I read स्फोटकभावं for स्फोटाभावं.

† Cf. Ballantyne's travel, of the Mahâbhâshya, p. 9, p. 32.

यद्स्फुटोऽप्रभासायितमिति चेत्तदेतन्मनोराज्यविजृम्भितं वैषम्यसम्भवात् । तथाहि अभिव्यञ्जकोऽपि प्रथमो ध्वनिः स्फोटमस्फुटमभिव्यनक्ति उत्तरोत्तराभिव्यञ्जकक्रमेण स्फुटं स्फुटतरं स्फुटतमं यथा स्वाध्यायः सकृत्पठ्यमानो नावधार्य्यते अभ्यासेन तु स्फुटावसायः यथा वा रत्नतत्त्वं प्रथमप्रतीतौ स्फुटं न चकास्ति चरमे चेतसि यथावदभिव्यज्यते नादैराहितबीजायामन्त्येन ध्वनिना सह आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवधार्य्यत इति भामतीयोक्तेः । तस्मादस्माच्छब्दादर्थं प्रतिपद्यामह इति व्यवहारवशाद्वर्णानां प्रत्येकवाचकत्वानुपपत्तेः प्रथमे काण्डे तत्र भवद्भिर्भर्तृहरिभिरभिहितत्वात् निरवयवमर्थप्रत्यायकं शब्दतत्त्वं स्फोटाभावमभ्यु-

Brahma, is variously cognized, through its connection with different things, as severally identified with each, we thus account for the use of the various conventional words, which arise from the different genera,* as cow, &c, these being, 'existence' (the summum genus) as modified by the inferior notions, cow, &c. To this purport we have the following authoritative testimony;

> "Just as crystal, that colourless substance, when severally joined with blue, red, or yellow objects, is seen as possessing that colour;" and so it has been said by Hari,

"Existence (pure and simple), being divided into the species, cow, &c. by reason of its connection with different subjects, is called this or that species, and on it all words depend. This they call the meaning of the stem and of the root; This is existence, this the great soul; and it is this which the affixed *twa, tal,* &c. express" (Páṇini, v. i. 119.)

'Existence' is that great summum genus which is found in cows, horses, &c. differentiated by the various subjects in which it resides; and the inferior species 'cow,' 'horse,' &c. are not

* The Mímáṁsá holds that a word means the genus *(játi)* and not the individual *(vyakti)*; the Nyáya holds that a word means an individual as distinguished by such and such a genus (or species).

पगन्तव्यमित्येतत् सर्व्वं । परमार्थसंविल्लक्षणा सत्ता जातिरेव सर्व्वेषां शब्दानामर्थ इति प्रतिपादनपरे जातिसमुद्देशे प्रतिपादितम् । यदि सत्तैव सर्व्वेषां शब्दानामर्थस्तर्हि सर्व्वेषां शब्दानां पर्य्यायता स्यात् तथाच क्वचिदपि युगपदनेकपदप्रयोगायोग इति महच्चातुर्य्यमायुष्मतः । तदुक्तम्

> पर्य्यायाणां प्रयोगो हि यौगपद्येन नेष्यते ।
> पर्य्यायेणैव ते यस्माद्वदन्त्यर्थं न संहता इति ॥

तस्मादयं पक्षो न क्षोदक्षम इति चेत् तदेतद्गगनरोमन्थकल्पं नीललोहितपीताद्युपरञ्जकद्रव्यभेदेन स्फटिकमणेरिव सम्बन्धिभेदात् सत्तायास्तत्तदात्मना भेदेन प्रतिपत्तिसिद्धौ गोसत्तादिरूपगोत्वादिभेदनिबन्धनव्यवहारवैलक्षण्योपपत्तेः तथाचाप्तवाक्यम्

really different from it; for the species, 'cow' and 'horse' *(gotwa* and *aśwatwa)*, are not really new subjects, but each it 'existence' as residing in the subject 'cow' and 'horse.' There fore all words, as expressing definite meanings, ultimately rest-on that one summum genus, existence, which is differentiated by the various subjects, cows, &c. in which it resides; and hence 'existence' is the meaning of the stem-word *(prátipadika)*.—A 'root' is sometimes defined as that which expresses *bháva*,*— now, as *bháva* is 'existence,' the meaning of a root is really existence †. Others say that a root should be defined as that which expresses 'action' *(kriyá)*; but here again the meaning of a root will really be 'existence,' since this 'action' will be a genus, as it is declared to reside in many subjects,—in accordance with the definition which expressly describes it as a genus.

> "Others say that action *(kriyá)* is a genus, residing in many individuals."

"So too if we accept Páṇini's definition (v. i. 119), "let the affixes *twa* and *tal* come after a word devoting anything, when we speak of the nature *(bháva)* thereof," it is clear from the very

* Cf. Rig Veda Prátiś. xii. 5.

† He here is trying to shew that his view is confirmed by the commonly received definitions of some grammatical terms.

स्फटिकं विमलं द्रव्यं यथा युक्तं पृथक् पृथक् ।
नीललोहितपीताद्यैस्तद्वर्णमुपलभ्यत इति ॥

तथा हरिणाप्युक्तम्

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्व्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते ।
सा सत्ता सा महानात्मा तामाहुस्त्वतलादय इति ॥

आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महासामान्यमेव जातिः गोत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं

term *bháva*, that abstract terms ending, in *twa* or *tá* [as aśwatwa and *aśwatá*] do express 'existence.'—"This is pure existence,"— from its being free from all coming into being or ceasing to be; it is eternal, since all phænomena are developments thereof, and it is devoid of any limit in space, time, or substance; this existence is "the great soul." Such is the meaning of Hari's two *kárikás* quoted above. So too it is laid down in the discussion on *sambandha* [in Hari's verses,] that the ultimate meaning of all words is that something whose characteristic is perfect knowledge of the supreme substance.

"The true Reality is ascertained by its illusory forms; forms the true substance is declared by those illusory disguises, words; as the object, 'Devadatta's house,' is apprehended by a transitory cause of discrimination,* but by the word 'house' itself, the pure Brahma is expressed."† So too the author of the Mahábháshya, when explaining the Várttika ‡ "the connection of a word and its meaning being fixed," in the passage beginning "substance is eternal," has shewn that the meaning of all words is Brahma,

* Since Devadatta is only its transient owner.

† So ultimately by the abstract words, 'horse' 'cow.' &c., as expressing the genus Brahma is really meant, the one abiding existence.

‡ Cf. Ballantyne's Mahábháshya pp. 44, 50.

न भवति गोसत्तैव गोत्वं नापरमन्वयि प्रतिभासते एवमश्वसत्ता अश्वत्वमित्यादि वाच्यम् । एवञ्च तस्यामेव गवादिभिन्नायां सत्तायां जातौ सर्व्वे गोशब्दादयो वाचकत्वेन व्यवस्थिता प्रातिपदिकार्थश्च सत्तेति प्रसिद्धम् । भाववचनो धातुरितिपक्षे भावः सत्तैवेति धात्वर्थः सत्ता भवत्येव क्रियावचनो धातुरिति पक्षेऽपि जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीमिति जातिपदार्थनयानुसारेणानेकव्यक्तिक्रियासमुद्देशे क्रियाया जातिरूपत्वप्रतिपादनात् धात्वर्थः सत्ता भवत्येव तस्य भावस्त्वतलाविति भावार्थे त्वतलादीनां विधानात् सत्तावाचित्वं युक्तं सा च सत्ता उदयव्ययवैधुर्य्यान्नित्या सर्व्वस्य प्रपञ्चस्य तद्विवर्त्ततया देशतः कालतो वस्तुनश्च परिच्छेदराहित्यात् सा सत्ता महानात्मेति व्यपदिश्यत इति

expressed by the word 'substance' and determined by various conditions as 'the nature of horse,' &c., (*aśwatwa*) * according to the opinion of Vájapyáyana, who maintains that all words mean a genus, words like 'cow,' &c.,† denote a genus which resides by intimate relation in different substances; and when this genus is apprehended, through its connection with it we apprehend the particular substance in which it resides. Words like 'white,' &c., denote a genus which similarly resides in qualities; through the connection with genus, we apprehend the quality, and through the connection with the quality we apprehend the individual substance. So in the case of words expressing particular names, —in consequence of the recognition that 'this is the same person from his first coming into existence to his final destruction, in spite of the difference produced by the various states of childhood, youth, adolescence, &c.,' we must accept a fixed genus as Devadatta-hood, &c., (as directly denoted by them.) So too in words expressing 'action,' a genus is denoted,—this is the root-meaning, as in *paṭhati* 'he reads,' &c., since we find here a meaning common to all who read.

* In p. 145. l. 8. read *aśwatwa* for *aśwattha*.

† We have here the well-known four grammatical categories, *játi*, *guṇa*, *dravya* or *sañjná* and *kriyá*.

कारिकाद्वयार्थः । द्रव्यपदार्थसंविल्लक्षणं तत्त्वमेव सर्व्वशब्दार्थ इति सम्बन्धसमुद्देशे समर्थितम्

सत्यं वस्तु तदाकारैरसत्यैरवधार्य्यते
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥
अध्रुवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते इति ॥

भाष्यकारेणापि सिद्धे शब्दार्थसम्बन्ध इत्येतद्वार्त्तिकव्याख्यानावसरे द्रव्यं हि नित्यमित्यनेन ग्रन्थेन असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यं सर्व्वशब्दार्थ इति निरूपितम् । जातिशब्दार्थवादिनो वाजप्यायनस्य मते गवादयः शब्दाः भिन्नद्रव्यसमवेत जातिमभिदधति तस्या-

In the doctrine of Vyáḍi who maintained that words meant individual things (and not classes or genera), the individual thing is put forward as that which is primarily denoted, while the genus is implied as a characteristic mark; and he thus avoids the alleged faults of indefiniteness" and 'wandering away from its proper subject.' *

Both views are allowed by the great teacher Páṇini, since in i. 2. 58., he accepts the theory that a word means the genus, where he says that 'when the singular is used to express the class the plural may be optionally used,' (as in the sentence "a bráhman is to be honoured," which may equally run "bráhmans are to be honoured);" while in i. 2. 64., he accepts the theory that a word means the individual thing, where he says 'in any individual case there is but one retained of things similar in form,' (i. e., the dual means Ráma and Ráma, and the plural means Ráma, and Ráma and Ráma; but we retain only one,

* Thus we read in the Siddhánta Muktávali, p. 82., that the Mímámsá holds that a word means the genus and not the individual, since otherwise there would be *vyabhichára* and *ánanty*a, cf also Maheśachandra Nyáyaratna's note, Kávya-prakáśa, p. 10. If a word is held to mean only *one* individual, there will be the first fault, as it will 'wander away' and equally express others which it should not include; if it is held to mean *many* individuals, it will have an endless variety of meanings and be 'indefinite.'

प्रवगाह्यमानायां तत्सम्बन्धात् द्रव्यमवगम्यते शुक्लादयः शब्दा गुणसम-
वेतां जातिमाचक्षते गुणे तत्सम्बन्धात् प्रत्ययः द्रव्यसम्बन्धिसम्बन्धात्
संज्ञाशब्दानामुत्पत्तिप्रभृत्याविनाशात् शैशवकौमारयौवनाद्यवस्थाविभे-
देऽपि स एवायमित्यभिप्रत्ययबलात् सिद्धा देवदत्तत्वादिजातिरभ्युपग-
न्तव्या क्रियास्वपि जातिरलक्ष्यते सैव धातुवाच्या पठतीत्यादावनुवृत्त-
प्रत्ययस्य प्रादुर्भावात् । द्रव्यपदार्थवादिव्याडिनये शब्दस्य व्यक्तिरेवाभि-
धेयतया प्रतिभासते जातिस्तूपलक्षणतयेति नानन्त्यविदोषावकाशः ।
पाणिन्याचार्यस्योभौ सम्मतं यतो जातिपदार्थमभ्युपगम्य जात्याख्यायाम-
कस्मिन् बहुवचनमन्यतरस्यामित्यादिव्यवहारः द्रव्यपदार्थमङ्गीकृत्य सरू-
पाणामेकशेष एकविभक्तावित्यादिः व्याकरणस्य सर्व्वपार्षदत्वान्मतद्वया-

adding a dual or plural affix). Grammar in fact, being adapted to all assemblies, can accept both theories without being compromised. Therefore both theories are in a sense true: * but the real fact is that all words ultimately mean the Supreme Brahma.

As it has been said;

"Therefore under the divisions of the meanings of words one true universal meaning, identical with the one existent, shines out as the thing denoted."

Hari also, in his chapter discussing *sambandha*, thus discribes the nature of this true meaning;

> "That meaning in which the subject, the object, and the perception (which unites them) are insusceptible of alternative, †—*that* only is called the truth by those who know the end of the three Vedas."

So too in his description of substance, he says, "*That* which remains as the Real during the presence of modification, as the gold remains under the form of the ear-ring,—*that* wherein change comes and goes,—*that* they call the Supreme Nature."

* This seems the meaning of the text as printed तस्मात् द्वयं सत्यं; but I hould prefer to read conjecturally तस्माद्दद्वयं सत्यं, "therefore non-duality is the truth."

† Sc. they can only be the absolute Brahma who alone exists.

भ्युपगमे न कश्चिद्विरोधः। तस्मात् द्वयं सत्यं परं ब्रह्मतत्त्वं सर्व्वशब्दार्थे इति स्थितम्। तदुक्तम्

तस्माच्छक्तिविभागेन सत्यः सर्व्वः सदात्मकः।
एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशतः इति ॥

सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे

यत्र द्रष्टा च दृश्यञ्च दर्शनञ्चाविकल्पितम्।
तस्यैवार्थस्य सत्यत्वमाहुस्त्रय्यन्तवेदिन इति ॥

द्रव्यसमुद्देशेऽपि।

विकारापगमे सत्यं सुवर्णं कुण्डले यथा।
विकारापगमो यत्र तामाहुः प्रकृतिं परामिति ॥

The essential unity of the word and its meaning is maintained in order to preserve inviolate that non-duality of all things which is a cardinal doctrine of our philosophy.

"This (Supreme Nature) is the thing denoted by all words, and it is identical with the word; but the relation of the two, while they are thus ultimately identical, varies as does the relation of the two souls.*

The meaning of this Káriká is that Brahma is the one object denoted by all words; and this one object has various differences imposed upon it according to each particular form; but the conventional variety of the differences produced by these illusory conditions is only the result of ignorance. Non-duality is the true state; but through the power of 'concealment' † (exercised by illusion) at the time of the conventional use of words a manifold expansion takes place; just as is the case during sleep. Thus those skilled on Vedánta lore tell us:

> "As all the extended world of dreams is only the development of illusion in me, so all this extended waking world is a development of illusion likewise."

* *Scil.* the individual soul *(jíva)* and Brahma.

† The *Samvṛiti* of the text seems to correspond to the *ávaraṇa* so frequent in Vedanta books.

अभ्युपगताद्वितीयत्वनिर्व्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः

वाच्या सा सर्व्वशब्दानां शब्दाच्च न पृथक् ततः ।

अपृथक्त्वेऽपि सम्बन्धस्तयोर्नानात्मनोरिवेति ॥

सत्तद्रुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्याविद्यामात्रकल्पितत्वेन प्रतिनियताकारोपधीयमानरूपभेदं ब्रह्मतत्त्वं सर्व्वशब्दविषयः अभेदे च पारमार्थिके संवृतिवशाद्व्यवहारदशायां स्वप्नावस्थावदुच्चावचः प्रपञ्चो विवर्त्तत इति कारिकार्थः । तदाहुर्वेदान्तवादनिपुणाः ।

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।

एवं जाग्रत्प्रपञ्चोऽपि मयि मायाविजृम्भित इति ॥

Digitized by Google

When the unchangeable Supreme Brahma is thus known as the existent joy-thought and identical with the individual soul, and when primeval ignorance is abolished, final bliss is accomplished which is best defined as the abiding in identity with this Brahma, according to the text, " He who is well-versed in the word—Brahma-attains to the Supreme Brahma."* And thus we establish the fact that the 'exposition of words' is the means to final bliss.

Thus it has been said,

"They call it the door of emancipation, the medicine of the diseases of speech, the purifier of all sciences, the science of sciences."†

And so again,

"This is the first foot-round of the stages of the ladder of final bliss, this is the straight royal road of the travellers to emancipation."

Therefore our final conclusion is that the Śástra of grammar should be studied as being the means for attaining the chief end of man. E. B. C.

---

* This passage is quoted in the Maitrí Upanishad, vi. 22.

† Adhividyam occurs in Taitt Upanishad, i. 3. 1, where it is explained by Śankara as *vidyáswadhi yad darśanam tad adhividyam.*

तदित्थं कूटस्थे परस्मिन् ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगते ऽनाद्यविद्यानिवृत्तौ तादृग्ब्रह्मात्मनावस्थानलक्षणं निःश्रेयसं सेत्स्यति शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीत्यभियुक्तोक्तेः । यथा च शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वं सिद्धम् । तदुक्तम् ।

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षत इति ॥

तथा । इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिरिति ॥

ततस्मात्पाव्याकरणशास्त्रं परमपुरुषार्थसाधनतयाध्येतव्यमिति सिद्धम् ।

इति सर्वदर्शनसंग्रहे पाणिनिदर्शनम् ।

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11. APRIL 1st, 1878. Vol. II.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कैरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ काशिकायाः ॥

॥ अष्टमाध्यायस्य द्वितीयः पादः ॥

अदसो ऽसेर्दादु दो मः ॥ ८० ॥

अदसो ऽसकारान्तस्य वर्णस्य दात्परस्य उवर्णादेशो भवति दकारस्य च मकारः । अमुम् । अमू । अमून् । अमुना । अमूभ्याम् । भाव्यमानेनाप्युकारेण सवर्णानां ग्रहणमिष्यतइत्येकमात्रिकस्य मात्रिको द्विमात्रिकस्य द्विमात्रिक आदेशो भवति । असेरिति किम् । अद इच्छति, अदस्यति ॥ अदसो ऽनोस्र इति वक्तव्यम् ॥ * ॥ ओकाररेफयोरपि प्रतिषेधो यथा स्यादिति । अदोत्र । अदः । तदर्थं केचित्सूत्रं वर्णयन्ति । अः सेर्यस्य सोऽयमसिः यत्र सकारस्य अकारः क्रियतइति तेन त्यदाद्यत्वविधाने एतद् अन्यत्र न भवितव्यमेवेति । अद्र्यादेशे कथम् ।

अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते ॥

येऽसेरिति सकारस्य प्रतिषेधः क्रियते अनन्त्यविकारेन्त्यसदेशस्येति च परिभाषा नाश्रीयते तेषामुभयोरपि मुत्वेन भवितव्यम् । अमुमुयङ् । अमुमुयञ्चौ । अमुमुयञ्च इति । यथा चलीक्लृप्यतइति लत्वम् । ये तु परिभाषामाश्रयन्ति । तेषामन्त्यसदेशस्यैव भवितव्यम् । अदमुयङ् । अदमुयञ्चौ । अदमुयञ्च इति । येषां तु त्यदाद्यत्वविषयएव मुत्वेन भवितव्यमिति दर्शनं तेषामत्र न भवितव्यम् । अदद्र्यङ् । अदद्र्यञ्चौ । अदद्र्यञ्च इति । दादिति किम् । अलोन्त्यस्य मा भूत् । अमुया । अमुयोः ॥

एत ईद्बहुवचने ॥ ८१ ॥

अदसो दकारादुत्तरस्य एकारस्य ईकारादेशो भवति दकारस्य च मकारः बहुवचने बहूनामर्थानामुक्तौ । अमी । अमीभिः । अमीभ्यः ।

Digitized by Google

अमीषाम्। अमीषु। बहुवचनमित्यर्थनिर्देशोऽयं, पारिभाषिकस्य हि बहुवचनस्य ग्रहणे ऽमी इत्यत्र न स्यात्॥

वाक्यस्य टेः प्लुत उदात्तः॥ ८२॥

अधिकारोऽयम्। वाक्यस्य टेरिति प्लुत इति च उदात्त इति च एतत्त्रयमप्यधिकृतं वेदितव्यमापादपरिसमाप्तेः, यदित ऊर्ध्वमनुक्रमिष्यामो वाक्यस्य टेः प्लुत उदात्त इत्येवं तद्वेदितव्यम्। वक्ष्यति। प्रत्यभिवादे ऽशूद्रे। अभिवादये देवदत्तोऽहं, भो आयुष्मानेधि देवदत्त ३। पदाधिकारेऽनुवर्त्तमान एव वाक्यग्रहणमनन्त्यस्य पदस्य प्लुतनिवृत्त्यर्थम्। टिग्रहणं व्यञ्जनान्तस्यापि टेरचः प्लुतो यथा स्यात्। अग्निचि ३ दिति॥

प्रत्यभिवादे ऽशूद्रे॥ ८३॥

प्रत्यभिवादो नाम यदभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते तत्राशूद्रविषये यद्वाक्यं वर्त्तते तस्य टेः प्लुत उदात्तो भवति। अभिवादये देवदत्तोऽहं, भो आयुष्मानेधि देवदत्त ३। अशूद्र इति किम्। अभिवादये तुषजकोऽहं, भो आयुष्मानेधि तुषजक॥ स्त्रियामपि प्रतिषेधो वक्तव्यः॥ * ॥ अभिवादये गार्ग्यहं, भो आयुष्मती भव गार्गि। असूयकेऽपि के चित् प्रतिषेधमिच्छन्ति। अभिवादये स्थाल्यहं भोः। आयुष्मानेधि स्थालिन्। यावच्च तस्यासूयकत्वं न ज्ञायते। तावदेव प्रत्यभिवादवाक्यम्। तस्मिंस्त्वसूयकत्वेन निर्ज्ञाते प्रत्यभिवाद एव नास्ति कुतः प्लुतः। तथा ह्युक्तम्, असूयकस्त्वं जाल्म न त्वं प्रत्यभिवादनमर्हसि। भिद्यस्व वृषल स्थालिन्निति॥ अभिवाक्ये यत् संकीर्त्तितं नाम गोत्रं वा यच्च प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र प्लुत इष्यते॥ इह न भवति। देवदत्त कुशल्यसि। देवदत्त आयुष्मानेधीति॥ भोराजन्यविशां वेति वक्तव्यम्॥ * ॥ भो अभिवादये देवदत्तोऽहम्, आयुष्मानेधि देवदत्त भोः ३। आयुष्मानेधि देवदत्त भोः। राजन्य। अभिवादये इन्द्रवर्म्माहं भोः। आयुष्मानेधीन्द्रवर्म्म ३ न्। आयुष्मानेधीन्द्रवर्म्मन्। विश्। अभिवादये इन्द्रपालितोऽहं भोः। आयुष्मानेधीन्द्रपालित ३। आयुष्मानेधीन्द्रपालित॥

दूराहूते च ॥ ८४ ॥

दूराहूते यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति स चोदात्तः । आह्वानं हूतं शब्देन सम्बोधनम् । आगच्छ भो माणवक देवदत्त ३ । आगच्छ भो माणवक यज्ञदत्त ३ । दूरं यद्यप्यपेक्षाभेदादनवस्थितं तथापि हूतापेक्षं यत्नराश्रीयते इति । यत्र प्राकृतात्प्रयत्नाद्यत्नविशेषे आश्रीयमाणे शब्दः श्रूयते तद्दूरम् । हूतग्रहणं च सम्बोधनमात्रोपलक्षणार्थं द्रष्टव्यम् । तेन यत्राप्याहूानं नास्ति तत्रापि प्लुतिर्भवति । सक्तून्पिब देवदत्त ३ । पलायस्व देवदत्त ३ इति ॥ अस्याश्च प्लुतेरेकश्रुत्या समावेश इष्यते ॥ दूरादिति किम् । आगच्छ भो माणवक देवदत्त ॥ दूराद्धाहूाने वाक्यस्यान्ते यत्र सम्बोधनपदं भवति तत्रायं प्लुत इष्यते ॥ तेनेह न भवति । देवदत्त आगच्छ * ॥

हैहेप्रयोगे हैहयोः ॥ ८५ ॥

हैहेप्रयोगे दूराहूते यद्वाक्यं वर्त्तते तत्र हैहयोरेव प्लुतो भवति । है ३ देवदत्त । देवदत्त है ३ । हे ३ देवदत्त । देवदत्त हे ३ । पुनर्हैहयोर्ग्रहणमनन्त्ययोरपि यथा स्यात् ॥

गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८६ ॥

प्रत्यभिवादे ऽशूद्र इत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यते । ऋकारवर्जितस्य गुरोरनन्त्यस्यापिशब्दादन्त्यस्यापि टेरेकैकस्य सम्बोधने वर्त्तमानस्य प्लुतो भवति प्राचामाचार्याणां मतेन । दे३वदत्त । देवद३त्त । देवदत्त३ । य३ज्ञदत्त । यज्ञद३त्त । यज्ञदत्त३ । गुरोरिति किम् । वकारात्परस्य मा भूत् । अनृत इति किम् । कृष्णमि३त्र । कृष्णमित्र३ । एकैकग्रहणं पर्यायार्थम् । प्राचामिति ग्रहणं विकल्पार्थम् । आयुष्मानेधि देवदत्त । तदनेन यदेतदुच्यते सर्व एव प्लुतः साहसमनिच्छता विभाषा कर्त्तव्य इति तदुपपन्नं भवति ॥

---

* दूराद्धाहूाने वाक्यस्यान्ते यत्रेत्यारभ्य देवदत्त आगच्छेत्यन्तं पुस्तकान्तरे नास्ति ।

Digitized by Google

ओमभ्यादाने ॥ ८७ ॥

अभ्यादानं प्रारम्भः । तत्र य ओम्शब्दः तस्य प्लुतो भवति । ओ३म् अग्निमीळे पुरोहितम् । अभ्यादानइति किम् । ओमित्येतदक्षरमुद्गीथमुपासीत ॥

ये यज्ञकर्म्मणि ॥ ८८ ॥

ये इत्येतस्य यज्ञकर्म्मणि प्लुतो भवति । ये ३ यजामहे । यज्ञकर्म्मणीति किम् । ये यजामह इति पञ्चाक्षरमिति स्वाध्यायकाले मा भूत् ॥ ये यजामहइत्यत्रैवायं प्लुत इष्यते ॥ इह हि न भवति । ये देवासो दिव्येकादशस्थइति ॥

प्रणवष्टेः ॥ ८९ ॥

यज्ञकर्म्मणीति वर्त्तते । यज्ञकर्म्मणि टेः प्रणव आदेशो भवति । क एष प्रणवो नाम पादस्य वार्द्धर्चस्य वान्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारमोङ्कारं वा विदधति तं प्रणवमित्याचक्षते । अपां रेतांसि जिन्वतो३म् । देवान् जिगाति सुम्नयो३म् । टिग्रहणं सर्वादेशार्थम् * । ओकारः सर्वादेशो यथा स्यात् । व्यञ्जनान्ते अन्त्यस्य मा भूदिति । यज्ञकर्म्मणीत्येव । अपां रेतांसि जिन्वति ॥

याज्यान्तः ॥ ९० ॥

याज्या नाम ये याज्याकाण्डे पठ्यन्ते मन्त्रास्तेषामन्त्यो यष्टिः स प्लवते यज्ञकर्मणि । स्तोमैर्विधेमाग्नये३ । जिह्वामग्ने चकृषे हव्यवाहाम्३ । अन्तग्रहणं किम् । याज्या नाम ऋचः काश्चिद्वाक्यसमुदायरूपास्तत्र यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति । सर्वान्त्यस्यैवेष्यते तदर्थमन्तग्रहणम् ॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ९१ ॥

ब्रूहि प्रेष्य श्रौषड्वौषट् आवह इत्येतेषामादेः प्लुतो भवति यज्ञकर्म्मणि । अग्नये ऽनुब्रू३हि । प्रेष्य । अग्नये गोमयान्प्रे३ष्य । श्रौषट् ।

---

* टेरिति वर्त्तमाने इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

अस्तु श्रौ३षट्। वौषट्। सोमस्याग्ने वीही३वौ३षट्। आवह। अग्निमा३वह। आवह देवान्यजमानायेत्येवमादावयं प्लुतो न भवति। सर्वे विधयश्छन्दसि विकल्प्यन्तइति॥

अग्नीत्प्रेषणे परस्य च ॥ ९२ ॥

आग्नीध्रः प्रेषणमग्नीत्प्रेषणम्। तत्रादेः प्लुतो भवति परस्य च। आ३श्रावय। ओ३श्रावय॥ अत्रैवायं प्लुत इष्यते॥ तेनेह न भवति। अग्नीदग्नीन्विहर बर्हिःस्तृणीहीति। तदर्थं केचिद्वक्ष्यमाणां विभाषेत्यभिसंबध्नन्ति। सा च व्यवस्थितविभाषेति। अपर आह। सर्व एव प्लुतः साहसमनिच्छता विभाषा विज्ञेय इति। इह तु उवुर३उवुर। अभिहर३। अभिहरेति। छान्दसः प्लुतव्यत्ययः। यज्ञकर्म्मणीत्येव। ओ श्रावय॥

विभाषा पृष्टप्रतिवचने हेः ॥ ९३ ॥

पृष्टप्रतिवचने विभाषा हेः प्लुतो भवति। अकार्षीः कटं देवदत्त। अकार्षं हि३। अकार्षं हि। अलावीः केदारं देवदत्त। अलाविषं हि३। अलाविषं हि। पृष्टप्रतिवचनइति किम्। कटं करिष्यति हि। हेरिति किम्। करोमि ननु॥

निगृह्यानुयोगे च ॥ ९४ ॥

स्वमतात्प्रच्यावनं निग्रहः। अनुयोगस्तस्य मतस्याविष्करणम्। तत्र निगृह्यानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति विभाषा। अनित्यः शब्द इति केन चित्प्रतिज्ञातं तमुपालिप्सुरुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते। अनित्यः शब्द इत्यात्थ३। अनित्यः शब्द इत्यात्थ। अद्य श्राद्धमित्यात्थ३। अद्य श्राद्धमित्यात्थ। अद्यामावास्येत्यात्थ३। अद्यामावास्येत्यात्थ। अद्य अमावास्येत्येवं वादी युक्त्या प्रच्याव्य स्वमतादेवमनुयुज्यते॥

आम्रेडितं भर्त्सने ॥ ९५ ॥

वाक्यादेरामन्त्रितस्येति भर्त्सने द्विर्वचनमुक्तं तस्याम्रेडितं प्लवते।

चौरचौर ३, वृषलवृषल ३, दस्योदस्यो ३, घातयिष्यामि त्वा बन्धयिष्यामि त्वा ॥ भर्त्सने पर्यायेणेति वक्तव्यम् ॥ * ॥ चौर ३ चौर । चौर चौर ३ । तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति ॥

अङ्गयुक्तं तिङाकाङ्क्षम् ॥ ९६ ॥

अङ्गेत्यनेन युक्तं तिङन्तमाकाङ्क्षं भर्त्सने प्लवते । अङ्ग कूज ३ । अङ्ग व्याहर ३ । इदानीं ज्ञास्यसि जाल्म । तिङिति किम् । अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षमिति किम् । अङ्ग पच । नैतदपरमाकाङ्क्षति । भर्त्सनइत्येव । अङ्गाधीष्व ओदनं ते दास्यामि ॥

विचार्यमाणानाम् ॥ ९७ ॥

प्रमाणेन वस्तुपरीक्षणं विचारः । तस्य विषये विचार्यमाणानां वाक्यानां टेः प्लुतो भवति । होतव्यं दीक्षितस्य गृहा ३ इ । होतव्यं न होतव्यमिति विचार्यते । तिष्ठेद्यूप ३ इ । अनुप्रहरेद्यूप ३ इ । यूपे तिष्ठेद्यूपे अनुप्रहरेदिति विचार्यते ॥

पूर्वं तु भाषायाम् ॥ ९८ ॥

भाषायां विषये विचार्यमाणानां पूर्वमेव प्लवते । अहिर्नु ३ । रज्जुर्नु ३ । लोष्टे नु ३ । कपोतो नु * । प्रयोगापेक्षं पूर्वत्वम् । इह भाषाग्रहणात्पूर्वयोगश्छन्दसि विज्ञायते ॥

प्रतिश्रवणे च ॥ ९९ ॥

प्रतिश्रवणमभ्युपगमः प्रतिज्ञानम् । श्रवणाभिमुख्यं च तत्राविशेषात्सर्वस्य ग्रहणम् । प्रतिश्रवणे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो भवति । गां देहि भोः, अहं ते ददामि ३ । नित्यः शब्दो भवितुमर्हति । देवदत्त भोः किमात्थ ३ ॥

अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ १०० ॥

---

* स्थाणुर्नु ३ । पुरुषो नु ३ । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

अनुदात्तः प्लुतो भवति प्रश्नान्ते अभिपूजिते च *। अगम ३ः पूर्वा३न् ग्रामा३न् अग्निभूत ३ इ। पटा ३ उ। अग्निभूते पटो इत्येतयोः प्रश्नान्ते वर्त्तमानयोरनुदात्तः प्लुतो भवति। अगम इत्येवमादीनां तु अनन्त्यस्यापि प्रश्नाख्यानयोरिति स्वरितः प्लुतो भवति। अभिपूजिते। शोभनः खल्वसि माणवक ३॥

चिदिति चोपमार्थे प्रयुज्यमाने॥ १०१॥

अनुदात्तमिति वर्त्तते। चिदित्येतस्मिन्निपाते उपमार्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवति। प्लुतोऽप्यत्र विधीयते न गुणमात्रम्। अग्निचिद्भाया ३ त्। राजचिद्भायात् ३। अग्निरिव भायात्। राजेव भायादित्यर्थः। उपमार्थ इति किम् कथं चिदाहुः। प्रयुज्यमान इति किम्। अग्निर्माणवको भायात्॥

उपरि स्विदासीदिति च॥ १०२॥

अनुदात्तमिति वर्त्तते। उपरिस्विदासीत्येतस्य टेरनुदात्तः प्लुतो भवति। अधः स्विदासी ३ त्। उपरि स्विदासी ३ त्। अधः स्विदासीदित्यत्र विचार्यमाणानामित्युदात्तः प्लुतः। उपरिस्विदासीदित्यत्र तु अनेनानुदात्तः॥

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु॥ १०३॥

स्वरितः प्लुतो भवति आम्रेडिते परतः असूयायां संमतौ कोपे कुत्सने च गम्यमाने। वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेष्विति द्विर्वचनमुक्तं तत्रायं प्लुतविधिः। असूयायां तावत्। माणवक ३ माणवक। अभिरूपक ३ अभिरूपक रिक्तं तेऽआभिरूप्यम्। संमतौ। माणवक ३ माणवक अभिरूपक ३ अभिरूपक शोभनः खल्वसि। कोपे। माणवक ३ माणवक अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने। शाक्तीक ३ शाक्तीक याष्टीक ३ याष्टीक रिक्ता ते शक्तिः॥ असूयादिषु वावचनं कर्त्तव्यम्॥ *॥ माणवक माणवकेत्येवमाद्यपि यथा स्यात्॥

* अनेन प्लुतो विधीयते किं तु दूराद्धूतादिषु विहितस्यानन्त्यस्यापि प्रश्नाख्यानयोरिति स्वरितप्लुतस्यानुदात्तत्वं गुणमात्रं विधीयते इत्यधिकं पुस्तकान्तरे।

Digitized by Google

क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् ॥ १०४ ॥

स्वरित इति वर्त्तते । क्षिया आचारभेदः । आशीः प्रार्थनाविशेषः । शब्देन व्यापारणं प्रैषः । एतेषु गम्यमानेषु तिङन्तमाकाङ्क्षं यत्तस्य स्वरितः प्लुतो भवति । आकाङ्क्षतीत्याकाङ्क्षं तिङन्तमुत्तरपदमाकाङ्क्षतीत्यर्थः । क्षियायां तावत् । स्वयं रथेन याति३ उपाध्यायं पदातिं गमयतीति । स्वयं ओदनं ह भुङ्क्ते उपाध्यायं सक्तून्पाययति । पूर्वमत्र तिङन्तमुत्तरमाकाङ्क्षतीति साकाङ्क्षं भवति । आशिषि । सुतांश्च लप्सीष्ट३ । धनं च तात । छन्दोध्येषीष्ट३ व्याकरणं च, भद्र । प्रैषे । कटं कुरु३ ग्रामं च गच्छ यवान् लुनीहि३ सक्तूंश्च पिब । आकाङ्क्षमिति किम् । दीर्घं ते आयुरस्तु । अग्नीन्विहर ॥

अनन्त्यस्यापि प्रश्नाख्यानयोः ॥ १०५ ॥

पदस्येति वर्त्तते स्वरितमिति च । अनन्त्यस्यापि अन्त्यस्यापि पदस्य टेः प्लुतो भवति प्रश्ने आख्याने च । अगम३ः पूर्वा३ न्ग्रामा३ न् । अग्निभूत३ इ । पट३ उ । सर्वेषामेव पदानामेष स्वरितः प्लुतः । अन्त्यस्य अनुदात्तं प्रश्नान्ताभिपूजितयोरिति । अनुदात्तोपि पक्षे भवति । आख्याने । अगम३ः पूर्वा३ न्ग्रामा३ न्भोः३ ॥

प्लुतावैच इदुतौ ॥ १०६ ॥

दूराद्धूतादिषु प्लुतो विहितः तत्र ऐचः प्लुतप्रसङ्गे तदवयवभूताविदुतौ प्लुतौ । ऐ३तिकायन । औ३पगव । अत्र यदेवर्णावर्णयोरवर्णस्य च समविभागस्तदा इदुतौ द्विमात्रावनेन प्लुतौ क्रियेते । प्लुताविति हि क्रियानिमित्तोयं व्यपदेशः इदुतौ प्लवेते वृद्धिं गच्छत इत्यर्थः । तावतो च स प्लुतिर्भवति । यथा तावैचौ त्रिमात्रौ संपद्येते । यदा त्वर्द्धमात्रावर्णस्याध्यर्द्धमात्रा इवर्णावर्णयोस्तदा इतावदर्द्धतृतीयमात्रौ क्रियेते इति । भाष्ये तूक्तमिष्यते चतुर्मात्रः प्लुत इति । तत्कथं, समप्रविभागपक्षे इदुतोरनेन त्रिमात्रः प्लुतो विधीयते ॥

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ १०७ ॥

एचो ऽप्रगृह्यस्यादूराद्धूते प्लुतविषयस्यार्धस्याकार आदेशो भवति स च प्लुतः उत्तरस्येकारोकारावादेशौ भवतः। विषयपरिगणनं कर्त्तव्यम् ॥ प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् ॥ * ॥ प्रश्नान्ते। अगम३ः पूर्वा३न् ग्रामा३न्। अग्निभूता३इ। पटा३उ। अभिपूजिते। भद्रं करोषि माणवका३। अग्निभूत३इ। पट३उ। विचार्यमाणे। होतव्यं दीक्षितस्य गृह३इ। प्रत्यभिवादे। आयुष्मानेधि अग्निभूत३इ। पट३उ। याज्यान्ते। उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाग्नय३इ। सोयमाकारः प्लुतो यथाविषयमुदात्तो ऽनुदात्तः स्वरितो वेदितव्यः। इदुतौ पुनरुदात्तावेव भवतः। परिगणनं किम्। विष्णुभूते विष्णुभूते३ घातयिष्यामि त्वा। आगच्छ भो माणवक विष्णुभूते। परिगणने च सत्यदूराद्धूतइति न वक्तव्यम्। पदान्तग्रहणं तु कर्त्तव्यम्। इह मा भूत्। भद्रं करोषि गौरिति। अप्रगृह्यस्येति किम्। शोभने खलु स्थःखट्वे३ ॥ आमन्त्रिते छन्दसि प्लुतविकारोयं वक्तव्यः ॥ * ॥ अग्न३,इ पत्नीवन् ॥

तयोर्य्वावचि संहितायाम् ॥ १०८ ॥

तयोरिदुतोर्यकारवकारादेशौ भवतो ऽचि संहितायां विषये। संहितायामित्येतच्चाधिकृतमित उत्तरमाध्यायपरिसमाप्तेर्यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम्। अग्ना३वाशा। पटा३वाशा। अग्ना३विन्द्र। पटा३वुदकम्। अचीति किम्। अग्ना३इ। पटा३उ। संहितायामिति किम्। अग्ना३इ इन्द्रम्। पटा३उ उदकम्। इदुतोरसिद्धत्वादिको यणचीति न प्राप्नोतीत्ययमारम्भः। अथापि कथं चित्तयोः सिद्धत्वं स्यादेवमपि सवर्णदीर्घत्वनिवृत्त्यर्थं शाकलनिवृत्त्यर्थं च वक्तव्यमेतत्। अथापि तन्निवृत्त्यर्थं यत्नान्तरमस्ति तथापि यणस्वरनिवृत्त्यर्थमिदमारभ्यते। यणादेशस्यासिद्धत्वाद् उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्येष स्वरो न भवति ॥

किं तु यथा भवतीह न सिद्धं प्लुतविद्युतोर्यदयं विदधाति ।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ॥
इक्तु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् ।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥

॥ इति काशिकायां वृत्तौ अष्टमाध्यायस्य द्वितीयः पादः ॥

॥ अष्टमाध्यायस्य तृतीयः पादः ॥

मतुवसो रु संबुद्धौ छन्दसि ॥ १ ॥

संहितायामिति वर्त्तते । मत्वन्तस्य वस्वन्तस्य च पदस्य रुरित्ययमादेशो भवति सम्बुद्धौ परतः छन्दसि विषये । मत्वन्तस्य तावत् । इन्द्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । मरुतोस्य सन्ति, हरयोस्य सन्ति, इति मतुप् । सुप्रमोर्हल्ङ्यादिलोपे संयोगान्तस्य लोपे च कृते नकारस्य रुर्भवति । वस्वन्तस्य खल्वपि । मीढ्वस्तोकाय तनयाय । इन्द्र साह्वः । क्वसोर्निपातनं दाश्वान् साह्वानिति । मतुवसोरिति किम् । ब्रह्मन्स्तोष्यामः । संबुद्धाविति किम् । य एवं विद्वानग्निमाधत्ते । छन्दसीति किम् । हे गोमन् । हे पपिवन् ॥ वन उपसंख्यानं कर्त्तव्यम् ॥ * ॥ यस्त्वायन्तं वसुना प्रातरित्वः । इणः प्रातः पूर्वस्य छन्दसि क्वनिप् ॥ विभाषा भवद्भगवदघवतामोच्चावस्य ॥ * ॥ छन्दसि भाषायां च भवद् भगवद् अघवद् इत्येतेषां विभाषा रुर्वक्तव्यो ऽवशब्दस्य च ओकारादेशः । सामान्येन छन्दसि भाषायां चेदं वचनम् । भवत् । हे भोः । हे भवन् । भगवद् । हे भगोः । हे भगवन् । अघवत् । हे अघोः । हे अघवन् । निपातनविज्ञानाद्वा सिद्धम् । अथ वा भोइत्येवमादयो निपाता द्रष्टव्याः । असंबुद्धावपि द्विवचनबहुवचनयोरपि दृश्यन्ते । भो देवदत्तयज्ञदत्तौ । भो देवदत्तयज्ञदत्तविष्णुमित्राः । तथा स्त्रियामपि च दृश्यन्ते । भो ब्राह्मणि । संहिताधिकार उत्तरत्रोपयुज्यते यत्र भिन्नपदस्थौ निमित्तनिमित्तिनौ । नश्छव्यप्रशानिति * ॥

* संहिताधिकार उत्तरत्रेत्यत आरभ्य नश्छव्यप्रशानित्यन्तः पाठः पुस्तकान्तरे नास्ति ।

अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥

अधिकारोऽयम्। इत उत्तरं यस्य स्थाने रुर्विधीयते ततः पूर्वस्य तु वर्णस्य वाऽनुनासिको भवतीत्येतदधिकृतं वेदितव्यम्। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र वक्ष्यति। समः सुटि। सँस्कर्ता। सँस्कर्तुम्। सँस्कर्तव्यम्। अत्रग्रहणं रुणा सह संनियोगप्रतिपत्त्यर्थम्। अधिकारपरिमाणापरिग्रहे हि सति ढो ढे लोप इत्यत्रापि पूर्वस्यानुनासिक आशङ्क्येत ॥

आतोऽटि नित्यम् ॥ ३ ॥

अटि परतो रोः पूर्वस्याकारस्य स्थाने नित्यमनुनासिकादेशो भवति। दीर्घादटि समानपाद इति रुत्वं वक्ष्यति। ततः पूर्वस्यातोऽनुनासिकविकल्पे प्राप्ते नित्यार्थं वचनम्। महाँ असि। महाँ इन्द्रो य ओजसा। देवाँ अच्छादीध्यत्। केचिदनुस्वारमधीयते। स च्छान्दसो व्यत्ययो द्रष्टव्यः। आत इति किम्। ये वा वनस्पतीँरनु। अटीति किम्। भवांश्चरति। भवांश्छादयति। नित्यग्रहणं विस्पष्टार्थम् * ॥

अनुनासिकात्परोऽनुस्वारः ॥ ४ ॥

अन्यशब्दोऽत्राध्याहर्तव्यः। तदपेक्षया चेयमनुनासिकादिति पञ्चमी। अनुनासिकादन्यो यो वर्णः रोः पूर्वः यस्यानुनासिको न विहितस्ततः परोऽनुस्वार आगमो भवति। वक्ष्यति। समः सुटि। संस्कर्ता। संस्कर्तव्यम्। पुमः खय्यम्परे। पुंस्कामा। नश्छव्यप्रशान्। भवांश्चरति। केचित्तु परशब्दमेवान्यार्थं वर्णयन्ति। अनुनासिकात्परोऽनुनासिकादन्योऽनुस्वारो भवति। यस्मिन्पक्षेऽनुनासिको नास्ति तत्रानुस्वारागमो भवति। स तु कस्यागमो भवति रोः पूर्वस्यैवेति वर्तते व्याख्यानादादेशो न भवति ॥

समः सुटि ॥ ५ ॥

रुर्वर्तते। सम इत्येतस्य रुर्भवति सुटि परतः संहितायां विषये। संस्कर्ता। संस्कर्तुम्। संस्कर्तव्यम्। संसुस्कर्ता। संसुस्कर्तुम्। संसुस्क-

* नित्यग्रहणं नियमाशङ्कापरिहारार्थमिति पाठः पुस्तकान्तरे।

Digitized by Google

सेत्यम् । अत्र रोर्विसर्जनीये कृते वा शरीति पक्षे विसर्जनीय एव प्राप्नोति । व्यवस्थितविभाषा द्रष्टव्या । तेनात्र नित्यं सकार एव भवति । अस्मिंश्चेत्र सूत्रे सकारादेशो वा निर्दिश्यते । समः सुटीति द्विसकारको निर्देशः । सम इति किम् । उपस्कर्त्ता । सुटीति किम् । संकृतिः । कश्चिदाह ॥ संपुंकानां सो वक्तव्यः ॥ * ॥ रुविधौ ह्यनिष्टप्रसङ्गः । संस्स्कर्त्ता । पुंस्स्कामा । कांस्स्कानिति ॥

पुमः खय्यम्परे ॥ ६ ॥

पुमित्येतस्य रुर्भवति अम्परे खयि परतः । पुँस्कामा । पुंस्कामा । पुँस्पुत्रः । पुंस्पुत्रः । पुँस्फलम् । पुंस्फलम् । पुँश्चली । पुंश्चली । पुंस्कामेत्यत्र विसर्जनीयस्य कुप्वोः ≍क≍पौ चेति प्राप्नोति । तस्मादत्र सकार एवादेशो वक्तव्यः । द्विसकारक निर्देशपक्षे तु पूर्वस्मादेव सूत्रात्स इत्यनुवर्त्तते । रुत्वं त्वनुवर्त्तमानमपि नात्राभिसंबध्यते । संबन्धानुवृत्तिस्तस्येति । खयीति किम् । पुंदासः । पुंगवः । अम्परइति किम् । पुंक्षीरः । पुंक्षुरः । परग्रहणं किम् । पुमाख्यः । पुमाचारः ॥

नश्छव्यप्रशान् ॥ ७ ॥

अम्परइति वर्त्तते । नकारान्तस्य पदस्य प्रशान्वर्जितस्य रुर्भवत्यम्परे छवि परतः । भवांश्छादयति २ । भवांश्चिनोति २ । भवांष्टीकते २ । भवांस्तरति २ । छवीति किम् । भवान्करोति । अप्रशानिति किम् । प्रशाञ्छादयति । प्रशान् श्चिनोति । अम्परइत्येव । भवान्त्सरुकः ॥

उभयथर्क्षु ॥ ८ ॥

पूर्वेण नित्ये प्राप्ते विकल्पः क्रियते । नकारान्तस्य पदस्य छवि परतः अम्परे उभयथा ऋक्षु भवति । रुर्वा नकारो वा । तस्मिंस्त्वा दधाति । तस्मिन्त्वा दधाति । ऋक्ष्विति किम् । तांस्त्वं खाद सुखादितान् ॥

दीर्घादटि समानपादे ॥ ९ ॥

न इत्यनुवर्त्तते । दीर्घादुत्तरस्य पदान्तस्य नकारस्य रुर्भवत्यटि

Digitized by Google

परतस्तौ चेन्निमित्तनिमित्तिनौ समानपदे भवतः । छन्दसीति प्रकृतत्वाद् ऋक्पाद इह गृह्यते । परिधींरति । देवां अच्छादीध्यत् । महां इन्द्रो य ओजसा । दीर्घादिति किम् । अहन्नहिम् । अटीति किम् । इभ्यान्त्स्त्रियान् । समानपादइति किम् । यातुधानानुपस्पृशः । उभयथेत्येव । आदित्यान् हवामहे ॥

नॄन्पे ॥ १० ॥

नॄनित्येतस्य नकारस्य रुर्भवति पशब्दे परतः । अकारउच्चारणार्थः । नॄँपाहि । नॄंपाहि । नॄँःप्रीणीहि । नॄंःप्रीणीहि । पइति किम् । नॄन्भोजयति । उभयथेत्यपि केचिदनुवर्त्तयन्ति । नॄन्पाहीत्यपि यथा-स्यात् ॥

स्वतवान्पायौ ॥ ११ ॥

स्वतवानित्येतस्य नकारस्य रुर्भवति पायुशब्दे परतः । स्वतवाः पायुरग्ने ॥

कानाम्रेडिते ॥ १२ ॥

कानित्येतस्य नकारस्य रुर्भवति आम्रेडिते परतः । कांस्कानामन्त्रयते । कांस्कान्भोजयति । अस्य कस्कादिषु पाठो द्रष्टव्यः । तेन कुप्वोः ᳲकᳲपौ चेति न भवति । समः सुटीत्यतो वा सकारो ऽनुवर्त्तते स एवात्र विधीयते । पूर्वेषु योगेषु संबन्धानुवृत्ता गतस्य रोरत्रानभिसंबन्धः । आम्रेडितइति किम् । कान् कान्पश्यति । एकोत्र कुत्सायाम् ॥

ढो ढे लोपः ॥ १३ ॥

ढकारस्य ढकारे लोपो भवति । सत्यपि पदाधिकारे तस्यासंभवादपदान्तस्य ढकारस्यायं लोपो विज्ञायते । लीढम् । उपगूढम् । ष्टुत्वस्यात्र सिद्धत्वमाश्रयाद् द्रष्टव्यम् । श्वलिड्ढौकतइत्यत्र तु जश्त्वे कृते कार्यं नास्तीति लोपाभावः । न च ढलोपो जश्त्वापवादो विज्ञातुं शक्यते । तस्य हि लीढादिर्विषयः संभवति । तत्र हि श्रुतिकृतमानन्तर्यमस्ति शास्त्रकृतं तु यदा नानन्तर्यं ष्टुत्वस्यासिद्धत्वेन प्राप्तं तत्तु सूत्र-

कारणसामर्थ्याद्बाध्यते । श्वलिड्ढोऽश्नतरित्यत्र तु न गुणितमानन्तर्ये न सा-स्वाहतमिति अविषयोऽयं ढलोपस्य ॥

रो रि ॥ १४ ॥

रेफस्य रेफे परतो लोपो भवति । नीरक्तम् । दूरक्तम् । अग्नी रथः । इन्दू रथः । पुना रक्तं वासः । प्राता राजक्रयः । पदस्येत्यत्र विशेषणे षष्ठी तेन पदान्तस्यापि रेफस्य लोपो भवति । जर्घृधेरजर्घाः । पास्पर्द्धेरपास्पाः इति ॥

खरवसानयोर्विसर्जनीयः ॥ १५ ॥

र इति वर्त्तते । रेफान्तस्य पदस्य खरि परतोऽवसाने च विसर्जनीयादेशो भवति । वृक्षश्छादयति । प्लक्षश्छादयति । वृक्षस्तरति । प्लक्षस्तरति * । अवसाने । वृक्षः । प्लक्षः । खरवसानयोरिति किम् । अग्निर्नयति । वायुर्नयति । इह नृकुट्यां भवः, नार्कुटः । नृपतेरपत्यं नार्पत्य इति । वृद्धेर्बहिरङ्गलक्षणत्वात्तदाश्रयस्य रेफस्यासिद्धं बहिरङ्गमित्यसिद्धत्वाद्विसर्जनीयो न भवति ॥

रोः सुपि ॥ १६ ॥

रु इत्येतस्य रेफस्य सुपि परतो विसर्जनीयादेशो भवति । पयःसु । सर्पिःषु । यशःसु । सुपीति सप्तमीबहुवचनं गृह्यते । सिद्धे सत्यारम्भो नियमार्थः । रोरेव सुपि विसर्जनीयादेशो नान्यस्य । गीर्षु । धूर्षु ॥

भोभगोअघोअपूर्वस्य योऽशि ॥ १७ ॥

भो भगो अघो इत्येवंपूर्वस्य अवर्णपूर्वस्य च रो रेफस्य यकारादेशो भवति अशि परतः । भो अत्र । भगो अत्र । अघो अत्र । भो ददाति । भगो ददाति । अघो ददाति । अवर्णपूर्वस्य । क आस्ते । कय् आस्ते । ब्राह्मणा ददति । पुरुषा ददति । भोभगोअघोअपूर्वस्येति किम् । अग्निरत्र । वायुरत्र । अश्ग्रहणं किम् । वृक्षः । प्लक्षः । नैतदस्ति । संहिता

---

* वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षष्टीकते । प्लक्षष्टीकते । इत्यधिकं पुस्तकान्तरे ।

यामित्यनुवर्त्तते। तर्हि अश्ग्रहणमुत्तरार्थम्। हलि सर्वेषामित्ययं लोपोऽशि हलि यथा स्यात्। इह मा भूत्। वृक्षं वृश्चतीति वृक्षवृट्, तमाचष्टे यः स वृक्षवयति। वृक्षवयतेरप्रत्ययः, वृक्षव् करोति। अथ तत्रैव अश्ग्रहणं कस्मान्न कृतम्। उत्तरार्थम्। मोनुस्वार इति हल्मात्रे यथा स्यात्। व्योर्लघुप्रयत्नतरः शाकटायनस्य लोपः शाकल्यस्येत्येतच्च वृक्षव् करोतीत्यत्र मा भूदित्यश्ग्रहणम्। रोरित्येव। प्रातरत्र। पुनरत्र॥

व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥

वकारयकारयोर्भोभगोअघोअवर्णपूर्वयोः पदान्तयोर्लघुप्रयत्नतर आदेशो भवति अशि परतः शाकटायनस्याचार्यस्य मतेन। भगोयत्र। अघोयत्र। क आस्ते। कयास्ते। अस्मायुद्धर। अस्मा उद्धर। असावादित्यः। असा आदित्यः। द्वावत्र। द्वा अत्र। द्वावानय। द्वा आनय। लघुप्रयत्नतरत्वमुच्चारणे स्थानकरणशैथिल्यम्। स्थानं ताल्वादि। करणं जिह्वामूलादि। तयोरुच्चारणे शैथिल्यं मन्दप्रयत्नता॥

लोपः शाकल्यस्य ॥ १९ ॥

वकारयकारयोः पदान्तयोरवर्णपूर्वयोर्लोपो भवति शाकल्यस्याचार्यस्य मतेनाशि परतः। क आस्ते। कयास्ते। काक आस्ते। काकयास्ते। अस्मा उद्धर। अस्मायुद्धर। द्वावत्र। द्वा अत्र। असावादित्यः। असा आदित्यः। शाकल्यग्रहणं विभाषार्थम्। तेन यदापि लघुप्रयत्नतरो न भवत्यादेशस्तदापि व्योः पक्षे श्रवणं भवति॥

ओतो गार्ग्यस्य ॥ २० ॥

ओकारादुत्तरस्य यकारस्य लोपो भवति गार्ग्यस्याचार्यस्य मतेन अशि परतः। भो अत्र। भगो अत्र। भो इदम्। भगो इदम्। नित्यार्थोऽयमारम्भः। गार्ग्यग्रहणं पूजार्थम्। योऽयमलघुप्रयत्नस्य विकल्पेन लोपः क्रियते सोऽनेन निवर्त्यते। लघुप्रयत्नतरस्तु भवत्येव यकारः। भो अत्र। भोयत्र। भगो अत्र। भगोयत्र। अघो अत्र। अघोयत्र। केचित्तु सर्वमेव यकारमत्र नेच्छन्ति॥

उञि च पदे ॥ २१ ॥

अवर्णपूर्वयोः य्वोः पदान्तयोर्लोपो भवति उञि च पदे परतः । स उ एकविंशतिः । स उ एकाग्निः । पदइति किम् । तन्त्र उतं, तन्त्र युतम् । वेञः संप्रसारणे कृते उञिति भूतपूर्वेण अकारेण शक्यते प्रतिपत्तुमिति । अथ उञित्येवंरूपो निपातः प्रतिपदोक्तो ऽस्ति तदा लाक्षणिकत्वादुञादेशस्य ग्रहणमिह नास्ति उत्तरार्थं पदग्रहणं क्रियते ॥

हलि सर्वेषाम् ॥ २२ ॥

हलि परतो भोभगोअघोअपूर्वस्य यकारस्य पदान्तस्य लोपो भवति सर्वेषामाचार्याणां मतेन । भो हसति । भगो हसति । अघो हसति । भो याति । भगो याति । अघो याति । वृक्षा हसन्ति । सर्वेषांग्रहणं शाकटायनस्यापि लोपो यथा स्यात्, लघुप्रयत्नतरो मा भूदिति ॥

मो ऽनुस्वारः ॥ २३ ॥

मकारस्य पदान्तस्यानुस्वार आदेशो भवति हलि परतः । कुण्डं हसति । वनं हसति । कुण्डं याति । हलीत्येव । त्वमत्र । किमत्र । पदान्तस्येत्येव । गम्यते । रम्यते ॥

नश्चापदान्तस्य झलि ॥ २४ ॥

नकारस्य मकारस्य चापदान्तस्यानुस्वारादेशो भवति झलि परतः । पयांसि । यशांसि । सर्पींषि । धनूंषि । मकारस्य । आक्रंस्यते । आचिक्रंस्यते । अधिजिगांसते । अपदान्तस्येति किम् । राजन्भुङ्क्ष्व । झलीति किम् । रम्यते । गम्यते ॥

मो राजि समः क्वौ ॥ २५ ॥

समो मकारस्य मकार आदेशो भवति राजतौ क्विप्प्रत्ययान्ते परतः । सम्राट् । साम्राज्यम् । मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थम् । राजीति किम् । संयत् । सम इति किम् । किं राट् । क्वाविति किम् । संराजिता । संराजितुम् । संराजितव्यम् ॥

हे मपरे वा ॥ २६ ॥

हकारे मकारपरे परतो मकारस्य वा मकार आदेशो भवति । किं ह्मलयति । किम् ह्मलयति । कथं ह्मलयति । कथम् ह्मलयति ॥ यवलपरे यवला वा ॥ * ॥ यवलपरे हकारे मकारस्य यवला यथासंख्यं वा भवन्तीति वक्तव्यम् । कियँ ह्यः । किं ह्यः । किवँ ह्वलयति । किं ह्वलयति । किलँ ह्लादयति । किं ह्लादयति ॥

नपरे नः ॥ २७ ॥

नकारपरे हे परतः मकारस्य वा नकारादेशो भवति । किन् ह्नुते । किं ह्नुते । कथं ह्नुते । कथन् ह्नुते ॥

ङ्णोः कुक्टुक् शरि ॥ २८ ॥

ङकारणकारयोः पदान्तयोः कुक् टुक् इत्येतावागमौ वा भवतः शरि परतः । प्राङ्क् शेते । प्राङ् शेते । प्राङ्क् षष्ठः । प्राङ् षष्ठः । प्राङ्क् साये । प्राङ् साये । णकारस्य । वण्ट् शेते । वण् शेते । पूर्वान्तकरणं प्राङ्क् छेते इत्यत्र छत्वार्थम् । शः छोटीति हि पदान्ताज्झय इति तद्विज्ञायते । इह मा भूत् । पुरा क्रूरस्य विसृपो विरप्शिन् । प्राङ्क् साय- इत्यत्रापि सात्पदाद्योरिति षत्वप्रतिषेधार्थं च । वण्ट् साय इत्यत्र च न पदान्ताट्टोरनामिति ष्टुत्वप्रतिषेधार्थम् ॥

डः सि धुट् ॥ २९ ॥

डकारान्तात्पदादुत्तरस्य सकारादेः पदस्य वा धुडागमो भवति । श्वलिट्त्साये । मधुलिट्त्साये । श्वलिट् साये । मधुलिट् साये । परा-दिकरणं न पदान्ताट्टोरनामिति ष्टुत्वप्रतिषेधार्थम् ॥

नश्च ॥ ३० ॥

नकारान्तात्पदादुत्तरस्य सकारस्य वा धुडागमो भवति । भवा-न्त्साये । महान्त्साये । भवान्साये । महान्साये । धुटश्चर्त्वस्य चासिद्ध-त्वाचरछत्वप्रशानिति दत्वं न भवति ॥

शि तुक् ॥ ३१ ॥

नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति । भवाञ्च्छेते । पूर्वान्तकरणं छत्वार्थम् । यद्येवं कुर्वञ्छेते इत्यत्र नकारस्यापदान्तत्वाच्छत्वं प्राप्नोति । तत्र समाधिमाहुः । स्तोः श्चुना श्चुरित्यत्र योगविभागः क्रियते छत्वप्रतिषेधार्थं, स्तोः श्चुना छकारो न भवतीति । ततः श्चुरिति ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ३२ ॥

ह्रस्वात्परो यो ङम् तदन्तात्पदादुत्तरस्याचो ङमुडागमो भवति नित्यम् । ङणनेभ्यो यथासंख्यं ङणना भवन्ति । ङकारान्तात् ङुट् । प्रत्यङ्ङास्ते । णकारान्ताण्णुट् । वण्णास्ते । वण्णवोचत् । नकारान्तान्नुट् । कुर्वन्नास्ते । कुर्वन्नवोचत् । कृषन्नास्ते । कृषन्नवोचत् । ङम इति किम् । त्वमास्से । ह्रस्वादिति किम् । प्राङास्ते । भवानास्ते । अचीति किम् । प्रत्यङ्करोति । इह परमदण्डिनौ परमदण्डिनेति उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्तीति ङमुण्न भवति । अथ वा उञि च पद इत्यतः सप्तम्यन्तं पद इत्यनुवर्त्तते । तेन अजादौ पदे ङमुड् भवति ॥

मय उञो वो वा ॥ ३३ ॥

मय उत्तरस्य उञो वा वकारादेशो भवति अचि परतः । शमु अस्तु वेदिः । शम्वस्तु वेदिः । तदु अस्य परेतः । तद्वस्य परेतः । किमु आवपनम् । किम्वावपनम् । प्रगृह्यत्वादुञः प्रकृतिभावे प्राप्ते वकारो विधीयते । तस्यासिद्धत्वाद्धलीति मो ऽनुस्वारो न भवति ॥

विसर्जनीयस्य सः ॥ ३४ ॥

खरीत्यनुवर्त्तते । विसर्जनीयस्य सकार आदेशो भवति खरि परतः । वृक्षश्छादयति । प्लक्षश्छादयति । वृक्षष्ठकारः । प्लक्षष्ठकारः । वृक्षस्थकारः । प्लक्षस्थकारः । वृक्षश्चिनोति । प्लक्षश्चिनोति । वृक्षष्टीकते । प्लक्षष्टीकते । वृक्षस्तरति । प्लक्षस्तरति ॥

Digitized by Google

शर्परे विसर्जनीयः ॥ ३५ ॥

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति । शशाः क्षुरम् । पुरुषः क्षुरम् । अद्भिः प्सातम् । वासः क्षौमम् । पुरुषः त्सरुः । घनाघनः क्षोभणश्चर्षणीनाम् । नेति वक्तव्ये विसर्जनीयस्य विसर्जनीयादेशविधानं विकारनिवृत्त्यर्थम् । तेन जिह्वामूलीयोपध्मानीयो न भवतः ॥

वा शरि ॥ ३६ ॥

विसर्जनीयस्य विसर्जनीयादेशो वा भवति शरि परे । वृक्षः शेते । प्लक्षः शेते । प्लक्षश्शेते । वृक्षः षण्डे । वृक्षष्षण्डे । वृक्षः साये । वृक्षस्साये ॥ खर्परे शरि वा लोपो वक्तव्यः ॥ * ॥ वृक्षा स्थातारः । वृक्षाः स्थातारः । वृक्षास्स्थातारः ॥

कुप्वोः ᳵकᳶपौ च ॥ ३७ ॥

कवर्गपवर्गयोः परतो विसर्जनीयस्य यथासंख्यं ᳵकᳶप इत्येतावादेशौ भवतः, चकाराद्विसर्जनीयश्च । वृक्षᳵ करोति । वृक्षः करोति । वृक्षᳵ खनति । वृक्षः खनति । वृक्षᳶ पचति । वृक्षः पचति । वृक्षᳶ फलति । वृक्षः फलति । कपावुच्चारणार्थौ । जिह्वामूलीयोपध्मानीयावेतावादेशौ । विसर्जनीयस्य स इत्येतस्मिन्प्राप्ते इदमारभ्यते इत्येतस्य बाधकं, शर्परे विसर्जनीय इत्येतत्तु न बाध्यते । वासः क्षौमम् । अद्भिः प्सातम् । पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति शर्परे विसर्जनीय इत्येतदेव भवति । के चित्तु एतदर्थं योगविभागं कुर्वन्ति । कुप्वोः । शर्परयोः विसर्जनीयस्य विसर्जनीय आदेशो भवति । किमर्थमिदम् । ᳵकᳶपौ चेति वक्ष्यति तद्बाधनार्थमिति ॥

सोऽपदादौ ॥ ३८ ॥

सकार आदेशो भवति विसर्जनीयस्य कुप्वोरपदाद्योः परतः । पाशकल्पककाम्येषु । याप्ये पाशप् । पयस्पाशम् * । ईषदपरिसमाप्तौ । कल्पप् । पयस्कल्पम् । यशस्कल्पम् । प्रागिवात्कः । पयस्कम् । यशस्कम् ।

* यशस्पाशमित्यधिकं पुस्तकान्तरे ।

Digitized by Google

काम्यच्च । पयस्काम्यति । यशस्काम्यति । अपदादाविति किम् । पयः कामयते । पयः पिबति ॥ सोऽपदादावित्यनव्ययस्येति वक्तव्यम् ॥ * ॥ इह मा भूत् । प्रातःकल्पम् । पुनःकल्पमिति । रोः काम्ये नियमार्थम् ॥ * ॥ रोरेव काम्ये नान्यस्येति नियमार्थं वक्तव्यम् । पयस्काम्यति । यशस्काम्यति । इह मा भूत् । गीःकाम्यति । धूःकाम्यति । उपध्मानीयस्य कवर्गे परतः सकार आदेशो भवतीति वक्तव्यम् ॥ * ॥ किं प्रयोजनमुब्जिरुपध्मानीयोपधः पठ्यत इति दर्शने अभ्युद्गः समुद्ग इति यथा स्यात् ॥

इणः षः ॥ ३९ ॥

अपदादाविति वर्त्तते । इण उत्तरस्य विसर्जनीयस्य षकारादेशो भवति कुप्वोरपदाद्योः परतः । पाशकल्पककाम्येषु । पाश । सर्पिष्पाशम् । यजुष्पाशम् । कल्प । सर्पिष्कल्पम् । यजुष्कल्पम् । क । सर्पिष्कम् । यजुष्कम् । काम्य । सर्पिष्काम्यति । यजुष्काम्यति । अपदादावित्येव । अग्निः करोति । वायुः करोति । अग्निः पचति । वायुः पचति । कुप्वोरित्येव । सर्पिस्ते । यजुस्ते । इत उत्तरं स इति इणः ष इति च वर्त्तते तत्र य इणः परो यो विसर्जनीयस्तस्य षकारो भवत्यन्यस्य सकारो भवति ॥

नमस्पुरसोर्गत्योः ॥ ४० ॥

नमस्पुरस् इत्येतयोर्गतिसंज्ञकयोर्विसर्जनीयस्य सकारादेशो भवति कुप्वोः परतः । नमस्कर्त्ता । नमस्कर्तुम् । नमस्कर्त्तव्यम् । गत्योरिति किम् । पूः पुरौ पुरः करोति ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ ४१ ॥

इकारोपधस्य उकारोपधस्य चाप्रत्ययस्य विसर्जनीयस्य षकार आदेशो भवति कुप्वोः परतः । निर्दुर्बहिराविश्चतुष्प्रादुस् । निस् । निष्कृतम् । निष्पीतम् । दुस् । दुष्कृतम् । दुष्पीतम् । बहिस् । बहिष्कृतम् । बहिष्पीतम् । आविस् । आविष्कृतम् । आविष्पीतम् । चतुष्कृतम् । चतुष्कपालम् । चतुष्कण्टकम् । चतुष्करम् । प्रादुष्कृतम् । प्रादुष्पीतम् । अप्रत्ययस्येति किम् । अग्निः करोति । वायुः करोति । मातुः करोति ।

पितुः करोति । अत्र रात्सस्येति सकारलोपे कृते रेफस्य यो विसर्जनीयस्तस्याप्रत्ययविसर्जनीयत्वात् षत्वं प्राप्नोति । कस्कादिषु तु भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तत्वात्षत्वप्रतिषेधस्य ॥ पुम्मुहुसोः प्रतिषेधो वक्तव्यः ॥ * ॥ पुंस्कामा । मुहुस् कामा । * नैष्कुल्यम् । दौष्कुल्यम् । नि ३ ष्कुलम् । दु३ष्कुलम् । दु३ष्पुरुषः । बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात्षत्वं प्रवर्तते ॥

तिरसोऽन्यतरस्याम् ॥ ४२ ॥

तिरसो विसर्जनीयस्यान्यतरस्यां सकारादेशो भवति कुप्वोः परतः । तिरस्कर्ता । तिरस्कर्तव्यम् । तिरःकर्ता । तिरःकर्तुम् । तिरःकर्तव्यम् । गतेरित्येव । तिरः कृत्वा काष्ठं गतः ॥

* पुस्तकान्तरे मुहुःकामेति पाठः, स एव च युक्तः, यत एव पदमञ्जर्यां मुहुः कामेति प्रतीकमुपादाय कुप्वोः ᳲकᳲपौ चेत्येष एव विधिर्भवति क्व चित्तु मुहुस्कामेति पठ्यते, सोऽपपाठः, नह्यत्र सत्वसंभवः सूत्रवार्तिकयोरनिबद्धत्वादित्युक्तम् ।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टादशस्तवकावशेषः ॥

तदालिङ्गनेनापह्नुतवेणुना वेणुना नायं निवेदितं, तत् किमयमनुयोज्यः, तदन्यतो गत्वा पृच्छाम इति पुरतस्तुलसीमालोक्य ॥ २८ ॥

नोऽस्माकम्, अयं न वेद न जानाति ॥ २९ ॥

कल्याणि पाणिकमलं कमलेक्षणेन
न्यस्तं त्वयि प्रणयनीतिरसाद्वयस्यम् ।
धन्यासि हे तुलसि ते तुलना क्व लोके
तन्नः समादिश स ते दयितः क्व लभ्यः ॥ ३० ॥

कमलेक्षणेनेति, कमलेव लक्ष्मीरभिविभागवाञ्छया कमलेऽक्षणेन, निरुत्सवेनेत्यर्थः । तुलना उपमा ॥ ३० ॥

निवेदयितः कथं वो विज्ञापनीय इति सापत्न्यविदोषो विदोषो नास्ति भवत्याः ॥ ३१ ॥

सापत्न्यरूपो विशिष्टो दोषः, विदोषो विगतभुजायाः, "भुज-बाहू प्रवेष्टो दोः"रित्यमरः । अन्यसुभगेव भुजाभ्यामावृत्य न तिष्ठसीत्यर्थः ॥ ३१ ॥

यतः ।

आकण्ठमाचरणसीम विलम्बमाना
मालामयेन वपुषा वनमालिवक्षः ।
त्वं भूषयन्त्यपि विहारि तवेव मध्ये
मालान्तरं न परिपालयसे रसेन ॥ ३२ ॥

न परिपालयसे, अपितु पालयसे एव, सौभाग्येन क्वापि स्वतुल्यताया अनुपलम्भादसूयानुदयादिति भावः ॥ ३२ ॥

तस्मादस्मद्विधजनमनःप्राणबुद्ध्यादिसारं
हारं हारं स तव दयितो वर्त्मनानेन यातः ।
ईर्ष्याहानेः सहजकरुणा त्वं तमाख्यातुमर्हा
स्वप्राणैर्यत् सुहृदिह सुहृत्प्राणरक्षां विधत्ते ॥ ३३ ॥

यद्यस्मात् सुहृत् स्वप्राणैरपि, किं पुनर्वाचेति भावः ॥ ३३ ॥

तथैव तस्या अप्युत्तरमनाकर्ण्य,

अहो एषापि तद्गतमानसा गतमानसारेव स्पर्शानन्तरतद्विरहे, तत् किमस्याः पृच्छया, नहि स्वयमुत्तप्ताः परं शीतलयितुमर्हन्ति, तदन्यतो गच्छाम इति तथा कृत्वा पुरो मालतीमालोक्य पप्रच्छुः ॥३४॥

स्पर्शानन्तरं तस्य विरहे सति गतमानसारा, नष्टबुद्धिबलेत्यर्थः ॥ ३४ ॥

आलि मालति स किं वनमाली
नालिलिङ्ग भवतीं नयनेन ।
अन्यथा कुसुमहासविलासैः
किं प्रकाशयसि मानसगर्वम् ॥ ३५ ॥

किं नालिलिङ्ग, अपित्वालिलिङ्गेव । वनमालीति, वनमालारचनार्थमपीति भावः ॥ ३५ ॥

मल्लिके सखि न गोपय दृष्टो
गोपराजतनयः स भवत्या ।
चञ्चरीकनिकरच्छलतो यत्
तत्तनूरुचिमचूचुरदुच्चैः ॥ ३६ ॥

तदुत्तरमप्राप्य तरलेयं गर्ववती नास्मान् गणयतीति तत्सहवासिनीर्मल्लिकाद्या अपि तत्रैव स्थित्वा पृच्छन्ति मल्लिके॰ इति, भवती॰ अचूचुरत्, अस्मन्मनश्चोरस्यापि तनुकान्तिं चोरितवती ॥ ३६ ॥

जाति जातिसरलासि सखि त्वं
नातिवञ्चय स चञ्चलचेताः ।
त्वां नखैरलिखदेव यतस्ते
लोहितत्वमगमन् मुकुलानि ॥ ३७ ॥

चोरस्यापि चोरी शठोपर्यपि शाठ्यविधायिनीयं क्रूरचित्ततयैव नास्मान् वक्तीति सरलां पृच्छामेत्याहुर्जातीति, चञ्चलचेता इति, भवत्याः स्तनगतं नखक्षतचिह्नमात्रं लक्ष्यते नतु संप्रयोगादिकमिति भावः ॥ ३७ ॥

यूथिके किमपि रोदिषि यूथी-
भूतभृङ्गनिनदेन निकामम् ।
पश्यतोहर इवैष मनस्ते
मादृशामिव दृशैव जहार ॥ ३८ ॥

इयमप्राप्तसंपूर्णसंभोगा कामपीडितैवास्ते किमुत्तरं दास्यतीत्यन्यतोऽवलोक्याहुर्यूथिके· इति, दृशैव दृष्टिमात्रेणैवेति, अहो त्वमस्मत्तुल्यव्यसनेव हारितमानसा कथं प्रतिवक्ष्यसीति भावः ॥ ३८ ॥

इत्येवमेता अपि पृच्छन्त्यो यदि नोत्तरं लेभिरे तदान्यतो मत्वागत्वाशङ्कां दूरीकृत्य कृत्यमात्रानभिज्ञाः पुनरन्यानवनिरुहानूचुः ॥ ३९ ॥

अगत्वाशङ्कामिति, अमाः स्थावरा अमी प्रष्टुमयोग्या इति तथाभूतत्वस्याशङ्काम्, तत्र हेतुः कृत्यमात्रेति ॥ ३९ ॥

कुरु कुरुवक रक्ताशोक शोकक्षयं नः
कथय कथय कृष्णो वर्त्मना केन यातः ।
अहह स इह दृष्टो नेति मा जल्पतोऽस्य
प्रखरनखरलूनः पल्लवोऽमुं व्यनक्ति ॥ ४० ॥

कुरुवकः, शोणाम्लानः ॥ ४० ॥

अन्यतोऽवलोक्य कथयामासुः ।

हे कोविदार ननु कोविद एव कृष्ण-
संदर्शनस्य स भवान् कथय क्व यातः ।
यद्दर्शनेन हृदयाद्द्रवतः स रागो
निष्क्रम्य शोणकुसुमच्छलतो विभाति ॥ ४१ ॥

तयोरप्युत्तरमप्राप्य· एतौ राजसतामसस्वभावतया स्तब्धावतीत्योः मूढौ च, तदेतौ विहाय सात्त्विकं कोविदं सौम्यं चान्वेषयाम इत्यन्यत इत्यादि । कोविदारः काञ्चनारभेदः कोइला च· इति प्रसिद्धः, श्लेषेण कोविदश्चासावरोऽतीत्यश्चेति हे तथाभूत, "रः स्मृतः पावके तीक्ष्णे" इति मेदिनी, स प्रसिद्धो रागोऽनुरागः ॥ ४१ ॥

पुनरन्यतो गत्वा पप्रच्छुः ।

अयि पनस न संभ्रमो विधेयः
कथय हरिः क्व गतोऽस्मदात्मचोरः ।
अहह यदवलोकहर्षितस्त्वं
पृथुतरकण्टकितैः फलैर्विभासि ॥ ४२ ॥

अहो महत्तमोऽसौ समाधिलग्नो न विक्षेपयितुं योग्य इत्यलब्धोत्तरा एव ततो निश्चक्रमुरित्याह पुनरित्यादि, हे पनस कण्टकिफल ॥ ४२ ॥

अयि सुभग महानुभाव जम्बू-
तरुवर नूनमदर्शि स त्वयैव ।
यदवयवरुचां सुचारुचारै-
रलिमलिनानि फलानि ते बभूवुः ॥ ४३ ॥

निजसुफलपरिपाकेण कृतार्थस्याप्तकामस्यास्य किमस्मदपेक्षयेति ततोऽप्यलब्धोत्तरा निर्गत्य पप्रच्छुरयि सुभगेति, सुचारु यथा स्यात् तथा चारैः संक्रमैरलिमपि मलिनयन्ति, अतिश्यामानीत्यर्थः ॥ ४३ ॥

पुनः कियद्दूरं गत्वा पप्रच्छुः ।

धन्यासि हे सखि विलासिनि बिल्वशाखे
श्लाघ्यं वपुः किमपि कण्टकितं बिभर्षि ।
कान्तापयोधरधिया तव सत्फलेऽस्मिन्
यत्पाणिपङ्कजमधाद्गतशङ्कमेषः ॥ ४४ ॥

असौ फलेषु तद्गुणधारी हृदयेऽपि नूनं तद्वाच्यताधर्माक्रान्तो भवति यदस्मान् न प्रतिवक्तीति ततोऽपि निरगुरत आह पुनरिति ॥ ४४ ॥

अयि बकुल निराकुलस्त्वमेको
हरिवदनेन्दुविलोकनेन जातः ।

अपि तलपतितैस्तव प्रसूनै-
रतिकुतुकी स विनिर्मिमाय[1] मालाम् ॥ ४५ ॥

इयमुन्नतवृत्तफलवृन्दा समुन्नतस्तनीरस्मान् स्पर्धमानेव न प्रतिवक्ति तदलमेतयेति ततोऽपि निर्जग्मुरित्याह· अयि बकुलेति ॥ ४५ ॥

पुनरन्यतो गत्वा,

अभिनवमुकुलायमङ्कुरं
परिचितवन्नखराविमर्षहर्षात् ।
तव सखि सहकारशाखिशाखे
मधुमिषतोऽश्रुनिपात एष योग्यः ॥ ४६ ॥

अयमतिकठिनो रतिशून्यस्तद्दर्शनेऽपि निर्विकारो न प्रतिवक्ति तदलमनेनेति ततोऽपि निर्जग्मुरित्याह पुनरिति, अभिनवेति, कुचाये नखाघातो व्यपदिष्टः ॥ ४६ ॥

पुनरन्यतो गत्वा,

अयि नीप हरिर्वनेन गच्छ-
न्ननुकूलं तव मूलमाललम्बे ।
कुसुमं तव कन्दुकाय चिन्व-
न्नपि शाखामनुमीयतेऽधिरूढः ॥ ४७ ॥

इयमस्मत्तुल्यव्यसना रोदित्येव न प्रतिवचने सावकाशा· इति तामप्युल्लङ्घ्य जग्मुः । अयीति, चिन्वन्· अवचेतुं तव शाखामधिरूढ इत्यनुमीयते ॥ ४७ ॥

अपिच,

यदितः पतितानि पल्लवानि
प्रलुठन्तीह कियन्ति कोरकाणि ।

१ गतौ पठितस्याधृषीयस्य णिजभावे रूपम् ।

भ्रमराश्च तमन्वयुर्भवन्तं
बत संत्यज्य तदीयगन्धलुब्धाः ॥ ४८ ॥

भवन्तं संत्यज्य तमेवान्वयुरनुजग्मुः ॥ ४८ ॥

तत्त्वमेव तत्त्व[1]मेवमुद्विश क्व गत्वाग त्वादृशबन्धुरसो बन्धुरसो रभ्य इति ॥ ४६ ॥

एवं तत्त्वं तत् तस्मात् त्वमेव· उद्विश, किं तत्, क्व गत्वासो बन्धुर्लभ्य इति । हे· अगेति, गमनं विनैव· इत एव तद्विशं कथयेति भावः । त्वादृशानां बन्धुः ॥ ४९ ॥

पुनः कियद्दूरमुपसृत्य,

अपि बत यमुनातटीनिवासा-
स्तप इव कृष्णपरं परं चरन्तः ।
निरुपधि परदुःखदह्यमानाः
कथयत भूमिरुहो हरिः क्व यातः ॥ ५० ॥

त्रुटितपल्लवपुष्पचिह्नवन्तं यमुनातीरस्य पन्थानमयं दर्शयत्येव केवलं तच्छङ्कयेव स्पष्टं मुखेन न वक्तीति तेनैव पथा ययुरित्याह पुनः कियदिति ॥ ५० ॥

पुनः कियद्दूरं गत्वा,

अयि विपिनलताः क्व तावदेवं
सुकृतमभूदिह वो यदित्थमेनम् ।
मदयथ फलभारभग्नदेहा
इव नवयोवनभारमर्पयन्त्यः ॥ ५१ ॥

ततोऽलब्धोत्तरास्तीर्थवासिनस्तपस्विनः पुरुषाः प्रायः कठोरा एव भवन्तीति स्वभावकोमलाः स्त्रियस्तु तथाभूता न नूनं भविष्यन्तीत्यभिप्रायेणाहुरयि विपिनेति, एवं श्रीकृष्णम् ॥ ५१ ॥

[1] पदविभागमपहाय तदैक्यं पूर्ववत् ।

Digitized by Google

पुनरन्यतो गत्वा,

अयि सहचरि कृष्णसारनारि
प्रकटमकारि यशो दृशोर्भवत्या ।
कृतसुकृतजनानुसारि हारि
प्रसभमहारि हरेर्मनो यदाभ्याम् ॥ ५२ ॥

एताः किल तत्सधर्माणमेव स्वेत्यत्रमेताभिरिति स्थिरत्वात्तयो न विस्रम्भणीया इति चरन्तीतीन् प्रष्टुमुपचक्रमुरित्याह पुनरिति, कृतं सुकृतं यैस्ताननुसर्तुं शीलं यस्य तत् · हारि मनोहरं हरेर्मनोऽहारि हृतम् ॥ ५२ ॥

अपिच,

तदतनुतनुरूपमाधुरीभि-
र्नयनमपूरि न पूरितं मनस्ते ।
अयि धृतिमधुनापि संधुनाना
तदनुविचिन्तनचिन्तया न शेषे ॥ ५३ ॥

संधुनाना, धृतिं त्यजन्तीत्यर्थः ॥ ५३ ॥

तत् पृच्छामः सखि दत्तशपथाः पथा केन गतो नगतोषकारी करस्पर्शेन मद्विधचित्तहारी हा·रीत्या दारुणया तव दर्शनं करुणयारुणया च दृगन्तलक्ष्म्या कुर्वन् सह्वयोहृदया हृदयालुतया तमाख्याहि मा वञ्चय ॥ ५४ ॥

करस्पर्शेन नगानां वृक्षाणां तोषकारी तव दर्शनं च करुणया दृगन्तलक्ष्म्या कुर्वन्, एवं स्थावरजंगमानां सुखदायकोऽपि केवलमस्माकमेव दुःखदायीत्याहुः, हा· इति खेदे, दारुणया रीत्या चित्तहारी, सहृदं सोहृदं याति प्राप्नोतीति सा तथा ॥ ५४ ॥

इत्युक्ते दैवतस्तस्यामशक्तुं मन्दमन्दमपतोऽयतो गच्छन्त्यां पुनरन्योन्यमूचुः ।

हंहो सहचर्यः, इयमेव दयावती यावतीनां मल्लतामृगजातीनां जातीनां वने यान्ती दर्शयन्तीव कृष्णवर्त्मे कृष्णवर्त्मनोऽपि दाहकरं संज्वरं नः शमयतीवेति तदनुपदं गच्छन्त्यो देवतः पुनरपि कियद्दूरे गत्वा क्वचन स्थितवत्यां तस्यां पुनराशङ्कमानाः ॥ ५५ ॥

जातीनां मालतीनां, वने यान्ती, कृष्णवर्त्मनोऽपि वह्नितोऽपि ॥ ५५ ॥

अये, इहैव तेन सुभगंभावुकेन भावुकेन स्थीयते यदियमत्रैव स्थिता तदिहैव विचारयामः ॥ ५६ ॥

भावुकेन क्षेमेण, निःशङ्कतयैवेत्यर्थः ॥ ५६ ॥

यदिदं निविडतरानोकहगहनं गहनं तन्वि पुनरवधातव्यम् ॥ ५७ ॥

निविडतरैरनोकहैर्वृक्षैर्गहनं दुर्गं, "गहनं दुर्गकाननयोरपी"ति मेदिनी ॥ ५७ ॥

इति समन्ततो विचारयन्त्यः कोकिलमेकमालोक्य किंचिदूचुः ।

अभवदवकलय्य काकलीं ते
त्वयि किल कोकिल तस्य दृष्टिपातः ।
निखिलजनमनोहरः स्वरस्ते
भवति तदीयकलस्वरानुकारी ॥ ५८ ॥

अवकलय्य, अनुभूय ॥ ५८ ॥

अपिच,

श्यामोऽसि शोभनमनोऽसि वनप्रियोऽसि
सुस्निग्धवागसि रसालसलालसोऽसि ।

एकान्ततो विरहिणीजनदुःखदोऽपि
जात्येव तेन सह ते निविडेव मैत्री ॥ ५८ ॥

रसाले· आम्रे सलालसो लालसावान्, पक्षे रसे· अलसा व्यापाररहिता लालसा यस्य सः, अरसिको इव इत्यर्थः, सासूयोक्तिरियम् । यद्वा रसे विषये· अलसा निष्पन्दा, मग्नेत्यर्थः ॥ ५९ ॥

तेन जानन्नपि भवान्· न तं कथयिष्यतीति संविहायान्यतो गच्छन्त्यः पुरतो मरालीमरालीभूतगमनां कांचिदालोक्य सहर्षमाहुः ॥ ६० ॥

मरालीभूतं कुटिलीभूतम् ॥ ६० ॥

एह्येहि हंसि सखि शंस पतङ्गपुच्या
किं प्रेषितासि पुरुवत्सलया त्वमत्र ।
यां तत्तटीमनु स वर्तत एव तस्मा-
दस्मान् निनाययिषुराशु दिदेश सा त्वाम् ॥ ६१ ॥

शंस कथय । तटीमनु, तट्यामित्यर्थः । सा हंसपुत्री । त्वामिति, तत्प्रारोहणार्थमित्यर्थः ॥ ६१ ॥

तदादिश दिशमालि वनमालिवननकारिणीभिरस्माभिर्यया गन्तव्यम्· इति पुनर्निवृत्य गच्छन्तीं तामनुगच्छन्त्यः कियद्दूरे वामतश्चक्रवाकीमवलोक्य ॥ ६२ ॥

वननं याच्ञा । यया दिशा निवृत्य गच्छन्तीमिति, स्वगमनेन· इयं दिशं दर्शयत्येवेत्यभिप्रेतवत्य इति भावः ॥ ६२ ॥

हे चक्रवाकि दयितस्य वियोगदुःखं
यं वीक्ष्य वीक्ष्य भवती मनसो निरास ।
तं नो दिदर्शयिषुरेति जवादुपेत्य
निर्हेतुसौहृदजुषामयमेव मार्गः ॥ ६३ ॥

मनसो दुःखं निरास दूरीचकार, उपेत्य निकटं प्राप्य ॥ ६३ ॥

इति तदभिमुखं गच्छन्त्यः पुरतः पवनामोदमाघ्राय, अये चक्रवाकवध्वागमनकारणसंवादो जात एव, अभ्यर्णो एवासो भविष्यति नः प्राणापहारी ॥ ६४ ॥

अभ्यर्णो निकटे ॥ ६४ ॥

अभ्यस्य सौरभरहस्यममुष्य कण्ठ-
खेलाकुतूहलजुषो वनमालिकायाः ।
श्रीगाधगन्धसुरभे रचयन्निवान्धान्
पुष्पंधयान् वहति चन्दनगन्धवाहः ॥ ६५ ॥

वनमालिकायाः सकाशात् सौरभरूपं रहस्यं स्वगुरवाचं शास्त्रमिवाभ्यस्य स्ववशीकृत्य पुष्पंधयान् पुष्पाजीवानपि भ्रमरानन्धान् रचयन् स्वगन्धोन्मत्तान् कुर्वन् वहति । वनमालिकायाः कथंभूतायाः, श्रीगाधस्य गन्धेन सुरभेः ॥ ६५ ॥

अहो तथापि निःसंदेहं भ्रमरानेव पृच्छाम इति तानाभाष्य पप्रच्छुः ।

विहाय परितः स्फुटाः सुरभिगन्धपुष्पावली-
विहायसि समीरणान्वितधिया त्वया भ्रम्यते ।
अयि भ्रमरमण्डलि प्रथय हेतुमस्येति ता-
स्तदीयकलगुञ्जितैः स्वगतमर्थमेवाविदन् ॥ ६६ ॥

विहायसि· आकाशे । स्वगतमर्थम्,अत्रैव कृष्णो वर्तते तदङ्गसौरभोत्सुक्यमेव हेतुरिति ॥ ६६ ॥

अथैवं निकटस्थमेव तमवगत्य गत्यनुसारेण नवयवसाङ्कुरशिखरशिवस्पर्शेन मह्या मह्यामुत्पुलकतामाकलय्य पुनस्तमेवार्थं द्रढयन्त्यो महीमेवाहुः ॥ ६७ ॥

नवाङ्कुराण्यपि यवसानामङ्कुराणि कोमलत्वाद्रोमाणि शिखराग्र-पर्याया तेषां शिवस्पर्शेन सुखस्पर्शेन मह्याः पृथिव्या उत्पुलकतामाशङ्क्य । कथंभूताम्, मह्यां महनीयाम्, आदरणीयामित्यर्थः ॥ ६७ ॥

अयि महि महिमा ते हन्त नातो महीयान्
यदसि पुलकिताङ्गी कृष्णपादाब्जसङ्गात् ।
कथय क इह हेतुर्वामनाङ्घ्रिप्रसङ्गः
किमु किमुत वराहस्याङ्गसंश्लेषरङ्गः ॥ ६८ ॥

कथय क इत्यादिना तौ हेतू नह्यत्र संभवत इति द्योतितम् । तत्र वामने स्वस्वामिसंबन्धाद्दास्यभावः, वराहे कान्तभावः, तथाप्यधुना ततोर्महिमैव महीयानित्यर्थः ॥ ६८ ॥

किंच ।

अयि धरणि धिनोति धन्यता ते
चरमचरं च यदस्य पादपद्मे ।
प्रतिपदमभिचुम्बसि प्रकामं
गतिरपि तेन बतास्य मन्थरैव ॥ ६६ ॥

ते तव धन्यता चरम्· अचरं जङ्गमं स्थावरं च धिनोति, तयोरिव पार्थिवत्वाद्धन्यताभिमानप्रसक्तेरिति भावः । अस्य कृष्णस्य ॥ ६९ ॥

इत्येवं धरणिमाभाष्य गच्छन्त्यः पुरतश्चकोराकारान् कांश्चन धरणितलगतान् विहगान् पथि निरूप्य सहर्षमाहुः ।

एतेनैव पथा जगाम स मनोमाणिक्यहारी हि नः
सत्यं यच्चरणारविन्दनखरग्लावां सुधाधोरणीः ।
पङ्क्तीभूय पिबन्ति हन्त परितो ये पुंश्चकोरा अमी
तैरेव प्रतिपाद्यते प्रियतमः सोऽभ्यर्णवर्तीति नः ॥ ७० ॥

अनया धरण्या सहैव स वर्तते· इति जानीम एवेत्यलं प्रत्युत्तरा-पेक्षयेति परामृशुरित्यत आह· इत्येवमिति । चरणारविन्दयोर्नखरा

एव ग्लावश्चन्द्रास्तेषां सुधाधोरणीः अमृतप्रवाहान्। अरविन्दीयाश्चन्द्रा इति न ते तस्यातिकूल्यं कुर्वन्ति तदुपासका इवेत्याश्चर्यम् ॥ ७० ॥

एवं प्रश्नसंशयनिश्चयादिकायामुन्मादस्य मध्यमावस्थायां चिरंतायां पाकावस्थोपक्रमे क्रमेण सदा सद्भावभावबलेऽवलेपरहिते परहिते चेतसि चेतसिद्धे सततस्फुरणकारणकान्तकृष्णविभूतिभूतिवशात् कृष्णोऽहमिति मितिगम्येतरतादात्म्यतरङ्गो रङ्गोत्करकारी यदि बभूव ॥ ७१ ॥

'यदायातं गेहा'दित्यादिभिरुक्ता तदीयसंभोगविरहयोरवास्तवत्ववास्तवत्वपरामर्शमयी उन्मादस्य प्रथमावस्था, मध्यमावस्था त्वेवं प्रश्नेत्यनेनोक्तलक्षणा, पाकावस्था च तादात्म्यमयी वक्ष्यमाणा तथान्तर्वर्तीति गद्येन प्रथमावस्थानन्तरं निर्दिष्टा च ज्ञेया। पाकावस्थाया उपक्रमे आरम्भे सति कृष्णोऽहमिति तादात्म्यतरङ्गो यदि रङ्गोत्करकारी तत्तल्लीलासाक्षात्कारात् तद्विरहदुःखापलापाच्च सुखदो यदि बभूव तदा तदावेशादेव लीलानुकारे का नतरां रेजुः, अपितु सर्वा एवेत्यन्वयः। चेतसिद्धे ज्ञानसिद्धे चेतसि सततस्फुरणमेव कारणं यस्यास्तथाभूता या कान्तस्य कृष्णस्याविर्भूतिः सैव भूतिः संपत्तिस्तद्वशात् कृष्णोऽहमिति। अतिधनतृष्णान्धस्य यथा धनतादात्म्यं भवति तथा मितिगम्यः परिमेयस्तदितरोऽपरिमेयस्तादात्म्यतरङ्गः। सद्भावः सती भावना तस्य भावः सत्ता बलं यस्य तस्मिन्, अवलेपरहिते प्रसङ्गान्तरालिप्ते अत एव परहिते ॥ ७१ ॥

तदा तदावेशाच्छ्रुतावलोकितचकितचमत्कारकारणे भगवतो लीलानुकारे का·रेजुर्नतराम् ॥ ७२ ॥

श्रुतं पूतनावधादेः, अवलोकितं गोवर्धनधारणादेः, ताभ्यां चकितचमत्कारौ त्रस्तत्वाद्भुतत्वे तयोः कारणे ॥ ७२ ॥

तत्र च कृष्णलीलातादात्म्यं सजातीयजातीयसकलसामग्रीकं सजातीयविजातीयविशेषसामग्र्युद्भवद्रसं च भवति ॥ ७३ ॥

सजातीयजातीया सजातीयजातौ भवा सकला सामग्री यत्र तत्· यथा वस्त्रहरणाद्यनुकरणे, पूतनावधाद्यनुकारे तु सजातीयविजातीयविशेषरूपं सामग्रीद्वयं प्रमाणं यस्य तत्, "प्रमाणार्थे द्वयसच्" ॥ ७३ ॥

तत्र सजातीया मनोऽनुकूला कूलावघातिनी नदी कूलमिव घनरसा द्रुतं द्रुतं करोति मनः, विजातीया विरसतादा तादात्म्याय न घटते तत्र मनसोऽनिवेशावेशाभावात् ॥ ७४ ॥

सजातीया सामग्री घनरसा सान्द्रास्वादा द्रुतं शीघ्रमेव मनो द्रुतं द्रवीभूतं करोति, पक्षे घनरसैर्जलैरा सम्यक्· द्रुतं गलितम् । विजातीया पूतनादिका विरसतां वैरस्यं ददातीति सा, मनसोऽनिवेशेन· अरोचकत्वादप्रवेशेन हेतुना· आवेशाभावात् ॥ ७४ ॥

इति प्रागूढगूढभावया सहैव वर्तमानयानया विरोधेनासामानुकूल्याय लीलाकैवल्यावल्याशङ्कया योगमाययैव विजातीयसामग्रीपरिग्रहग्रहिलतया कृते स्वीकारे कृतां विजातीयजातीयसामग्रीमयीं पूतनाकृतिं कृतिं दृष्ट्वा काचन बाला बालाकारकृष्णायमानायमानावेगजवेन तदङ्कमारुह्य स्तनपयस्तदपादपारपारवश्यं गतवती ॥ ७५ ॥

प्रागेव· आसां गोपीनाम्· आनुकूल्याय· ऊढो गूढभावो यया तया, अत एवेदानीं लीलाकैवल्यस्य· आवल्यं दौर्बल्यं, पूतनाद्यसद्भावादङ्गवैकल्यमित्यर्थः, तदाशङ्कया । विजातीयेति,तर्ह्यहमेव पूतनाद्याकृतिधारिणी स्यामिति स्वीकारे कृते सति । कृतिं कृत्रिमाम् । अयमाना रिङ्गन्तीत्यर्थः । अपात्· अपिवत् । अपारं यत् पारवश्यं तत्, अतिबाल्यादिति भावः ॥ ७५ ॥

कृष्णाभावनाया नायासोऽत्र लघुतरोऽपि रोपित आसीत्, मन्ये स एव तासां तथातथालील: सन्नन्तरं प्रविवेश, नेततादात्म्यमिति ॥ ७६ ॥

कृष्णाभावनाया आयासो यत्नो लघुतरोऽपि स्वल्पोऽपि रोपितो नासीत्, किंतु स साहजिक एवेत्यर्थः ॥ ७६ ॥

एवं तस्यामेव शकटाकृतिं कृतिं कुर्वाणायामन्या कापि बालकृष्णायमाना चारुदती रुदती तद्बाधयेव सलयकिसलयकिशोरसमधुरेण मधुरेण चरणतलेन तामेव शकटाकारां पातयामास ॥ ७० ॥

तस्यां योगमायायाम् । सलयेन सनाट्येन किसलयकिशोरेण पल्लवोत्तमेन समा धूरुत्कर्षभावो यस्य तेन ॥ ७१ ॥

एवं च ।

अन्तः कृष्णतया बहिर्निजनिजाकारेषु तद्धीहृतेः
कृष्णः संविदि संविवेश सुदृशां संविञ्च कृष्णोऽविशत् ।
कृष्णोऽस्मीति निराकुलस्मृतिजुषां तासामथो श्रेणयः
स्वान्तर्वर्तिघना इव स्थिरतरा बभ्राजिरे विद्युतः ॥ ७८ ॥

सुदृशां संविदि बुद्धौ कृष्णः सम्यक्॰ विवेश संविदपि कृष्णे॰ प्रविशत्, कुत एतदवसीयत इत्यत आह, अन्तः॰ अन्तःकरणस्य कृष्णतया कृष्णात्मकत्वेन हेतुना बहिर्निजनिजाकारेषु या तद्धीहृतिः स्त्रीलक्षणनिजनिजाकारबुद्धिनाशस्ततो हेतोः कृष्णोऽस्मीति धीप्राप्तिरित्यर्थः, स्वस्यान्तर्वर्ती घनो मेघो यासां ताः॰ विद्युत इव ॥ ७८ ॥

किंच ।

घनज्योत्स्नाजालं मुदिरपरिपूर्णान्तरमिव
प्रमीलद्भ्रोलम्बं कनकनलिनीमण्डलमिव ।
अभूत् तासामन्तर्विहितहरितादात्म्यरभसाच्छरीराणां वृन्दं दलितनवकश्मीरजमहः ॥ ७९ ॥

घनज्योत्स्नेति मेघस्योपरि निबिडाश्चन्द्रिका इति तासां बुद्धेः कृष्णाधिकरणकत्वं प्रमीलदिति कमलिनीवृन्दोपरि निश्चला भृङ्गा इति तस्याः कृष्णाधेयकत्वं चोक्तम् । एवमन्तरस्यैव वैलक्षण्यमभूच्चतु शरीराणामित्याह शरीराणामिति । दलितेति, पूर्ववदेवेति भावः ॥ ७९ ॥

एवमन्तरस्थेन हरिप्रतिबिम्बेन तदनुगतसकलेन्द्रियवृत्तितया कृष्णोऽहमिति भावप्रभावप्रहृतेन्द्रिया स्वकौतुकजनयितृत्वा तृणावर्तहननेन पूर्ववृत्तेनापि प्रथममिव करिष्यमाणेनेव समुल्लसितहृदया हृदयाभिज्ञया तयैव योगमायया कृततदाकारकल्पनया नयापिहितौचित्येन तस्यै तद्भावमाबोधयन्त्येव सा चक्रे इव ॥ ८० ॥

करिष्यमाणेनेव तृणावर्तहननेन सम्यगुल्लसितं हृदयं यस्याः सा गोपी तयैव योगमायया चक्रे इव, कथंभूतया, न कृता तस्य तृणावर्तस्यैवाकारकल्पना यया तथाभूतयापि, तस्यै तामुत्साहयितुम् औचित्येन योग्यतया तद्भावं तृणावर्तत्वम् आ सम्यक् बोधयन्त्येव, तृणावर्तोऽहं कंसप्रेरितस्त्वामितो हरामीति ज्ञापयन्त्येवेत्यर्थः, महावात्यारूपस्य तृणावर्ताकारस्य कल्पनं तदानीं न रसावहमिति तत्र कृतमिति ज्ञेयम्, सा कथंभूता, नयेन तदुचितकृष्णभावेन अपिहिता आच्छन्ना, यतोऽहं कृष्णस्त्वामपि संहरामीति दर्शितस्वभावेत्यर्थः ॥ ८० ॥

सापि तामसुरोऽयं तृणावर्तो मया नाशित इति प्रतिपद्यते स्म ॥ ८१ ॥

अत एवाह सापीति ॥ ८१ ॥

काचिज्जानुकरोपसर्पविधिना कूजन्मणीमेखला
रिङ्गन्ती स्तनकैर्विवृत्तवदना तन्नादभीतानना ।
शङ्कापङ्किललोचनं क्षणमथ स्थित्वा पुनर्निर्भयं
गच्छन्ती शिशुकृष्णकेलिगमनं मूर्तं तथैवाकरोत् ॥ ८२ ॥

निर्भयं गच्छन्तीति, सोऽयं ममैव मेखलारव इति प्रत्यभिज्ञानवतीत्यर्थः ॥ ८२ ॥

काप्यन्या नवनीतचौर्यकलुषक्रान्तेव भीतानना
स्वाभिप्रायविदा तयैव जननीभावं समायातया ।

देव्या श्रोणितटे गुणैः पृथुतरैर्बद्धेव साश्रुदृशोः

कृष्णोऽहं कुपितप्रसूनियमितोऽस्मीति स्म संचस्यति ॥ ८३ ॥

कलुषमपराधः, तयैव देव्या योगमायया ॥ ८३ ॥

सैव जानुकरचंक्रमणेन

श्रोणिमूलमवलम्ब्य चलन्ती ।

अर्जुनाविव तया भ्रमकृष्टे

आकृती भ्रमत एव बभञ्ज ॥ ८४ ॥

अर्जुनाविव कृते आकृती बभञ्ज ॥ ८४ ॥

एवं क्वापि कृष्णवत्सवत्सपालबलबलभद्रः स्वयं वने विहरामीति प्रीतिपरा वत्सकासुरहननं करिष्य इति प्रतीतिप्रतीतिसमुत्सुका तयैव वत्सवत्स[1]पालबलबलभद्रवत्सकासुरान् स्फोरयित्वा कृततथाप्रत्यया वत्सकासुरहननमनुचकार ॥ ८५ ॥

वत्सपालानां बलं च बलभद्रश्च ताभ्यां सह वर्तमानः कृष्णवत् कृष्ण इव प्रीतिपरा ज्ञानपरा "प्रीतिर्गत्यां मतम्" मिति कल्पद्रुमे, इति या प्रतीतिस्तया प्रतीतिर्हर्षस्तत्र समुत्सुका, "प्रतीतः सादरे ज्ञाते हृष्टप्रज्ञातयोस्त्रि" ष्विति मेदिनी, तयैव योगमाययैव, वत्सवत् वत्सानिव ॥ ८५ ॥

काचिद्वेणुं करकिशलये संनिधायेव लीला-

लोलाताम्राङ्गुलिदलकुलं वादयन्तीव मन्दम् ।

तारस्निग्धं शबलि धवले धूमले कालि नीले

हो एहीति श्रवणसुखदं नैचिकीराजुहाव ॥ ८६ ॥

लीलया आलोलम् आताम्रम् अङ्गुलिदलकुलं यत्र तद्यथा स्यात् तथा ॥ ८६ ॥

---

१ वत्सवत् स-इत्येवं मुद्रणीये तत्रयोः संयोगेन मुद्रणं लिपितोऽपि यमकशोभावैकल्याय चैवम् ।

किंच ।

काचित् कस्याश्चन भुजशिरस्याद्दधाना सलीलं
पीनाभोगां भुजविसलतां काश्चिदाभाषमाणा ।
कृष्णोऽहं पश्यत मम गतिं मञ्जुलां मन्दमन्दा-
मित्यानन्दोल्लसितललितप्रौढगर्वं चचाल ॥ ८७ ॥

भुजशिरसि स्कन्धे ॥ ८७ ॥

तास्ता लीलाः स्वयमनुकरोत्येवमास्वादहेतो-
र्मन्ये तासां हृदयकुहरं संनिविष्टः स एव ।
नो चेदन्तःकरणविरतौ संविदः संनिरोधे
तासां चेष्टा वचनवपुषोर्जायते कस्य हेतोः ॥ ८८ ॥

संविदश्चेतनायाः संनिरोधे वृत्ते चान्तःकरणानां विरतौ सत्यां व्यापारराहित्ये सति ॥ ८८ ॥

एवमपरा पराहतात्मसहजभावा भावारूढकृष्णा कृष्णातटनिकटस्थितमात्मानं कृष्णत्वेन जानती कृष्णाहितकृष्णाहितर्दनचिकीर्षयेव कण्डूलहृदया हृदयाभावेऽपि तत्कालकालिकालियमर्दनलीलालीला सती किंचिदवादीत् ॥ ८९ ॥

कृष्णस्य कृष्णाया यमुनाया वा· अहितः कृष्णाहिः कालियस्तस्य तर्दनं पराभवः, हृदयाभावेऽपि हृदोऽयः शुभावहविधिस्तदभावेऽपि, तत्कालं कलयितुं ज्ञापयितुं शीलं यस्यास्तथाभूता कालियमर्दनलीला तस्यां लीः संश्लेषस्तां लातीति सा ॥ ८९ ॥

मत्खेलाकुतुकास्पदं तरणिजां दुष्टां वृथा मा कृथा
याहीतो भुजगाधमेति परुषं रोषाद्वदन्ती मुहुः ।
नृत्यन्तीमिव जानती फणिमणिव्राते तनूमात्मनो
देव्या योगबलात् प्रतीतिविषयं कालीयमभ्यालपत् ॥ ९० ॥

आत्मनस्तनूं नृत्यन्तीमिव जानती कालीयम्· अभ्यालपत्, देव्या योगबलाद्धेतोरेव प्रतीतेर्विषयम् ॥ ९० ॥

अथापरा परामात्मनाथेन सममेकात्मतामासाद्य कृष्णोऽह-मिति मितिरहितं भावमावहन्ती हन्तीव स्म यदि निजस्वभावं तदा विलोक्येव तस्मिन्नेव कालेऽकालेरितं दावकृष्णवर्त्मानं कृष्णवर्त्मान-न्दवशतया तदुपशमाय माययेव शक्तिविशेषमवतारयन्ती तारय-न्तीव ततो बन्धुजनानपि किंचिदूचे ॥ ६१ ॥

अकालेरितम्· अकालेऽपि प्रेरितं दावकृष्णवर्त्मानं दावाग्निं विलो-क्य·इव कृष्णस्य वर्त्मनि पथि·आनन्दवशतया शक्तिविशेषम्· अवतार-यन्तीव प्रकटयन्तीव ॥ ९१ ॥

मा भैष्ट भो दवहुताशनतः समिद्धात्
जातास्मि सर्वविपदां भवथापशङ्काः ।
आलोकयध्वमधुनैव पिबामि भीता
यूयं भविष्यथ ततो नयने पिधद्ध्वम् ॥ ६२ ॥

समिद्धात् प्रज्वलिताद् यदि भीता भविष्यथ ततः ॥ ९२ ॥

एवमन्यतमात्मनाथमात्मनाथ वहन्ती तादात्म्यवता बता-तिरहस्यहस्यमानतास्वीकारा स्वीकारानभिज्ञा वस्त्राहरणकारिहारि-तच्चरितानुकारेण वस्त्राण्यादाय कदम्बारोहरोहत्प्रहर्षामिवात्मानं विदती चारुदती चारुतरमाबभाषे ॥ ६३ ॥

अन्यतमा गोपी तादात्म्यवता·आत्मना बुद्ध्या·आत्मनाथं श्रीकृष्णं वहन्ती, श्रीकृष्णोऽहमिति जानतीत्यर्थः, बत·आश्चर्यं, अतिरहस्येन हस्य-मानतायां सत्यामेव स्वीकारो यस्याः सा·आबभाषे । स्वीकारानभिज्ञा इति कर्म पदं द्वितीयाबहुवचनान्तम् । वस्त्राहरणकारिणो हारि तच्च-रितं तस्यानुकारेण । चारुदतीति मन्दहास्यव्यञ्जकम् । “दच्छब्दोऽप्यस्ति

सर्वोत्वे"इत्यमरटीका, "यशान्ते"त्यत्र प्रकारप्रश्लेषादिवत् सिद्धिः ॥ ९३ ॥

> एकेकशः समुपसीदथ किं मिलित्वा
> किं वा निजं निजमितो वसनं क्रमेण ।
> आदातुमर्हथ न चेन्नतरां प्रदास्ये
> क्रोधेन किं मम करिष्यति हन्त भूपः ॥

एवमन्या सन्यायमिव कृष्णकैवल्यप्राबल्यप्राप्तस्वभाववैधुर्या द्विजवनितानितान्तसौभाग्यप्रदलीलावतारे वतारेरीयमाणानन्दासारे सारे वचनविलासे कृतमतिः पुरतः पुरतः समागता इव ता मत्वा समधुरस्मितमवादीत् ॥ ९४ ॥

सन्यायमिवावादीदिति संबन्धः । लीलावतारे प्रकाशे सति । वत· अद्भुते । आरेरीयमाणः सम्यगतिशयं स्वचानन्दस्यासारो धारासंपातो यस्मिंस्तादृशे सारे वचनविलासे विषये । पुरतोऽग्रतः । पुरतः पुरात् ॥ ९४ ॥

> कल्याण्यः स्वागतं वो ननु निरवकरं गार्हमेध्यं तपो वः
> प्रीतिः श्रद्धा सभक्तिर्मयि च सुविदिता हन्त युष्माकमेषा ।
> दृष्टोऽहं यात नातः परमपि सुभगाः स्थातुमर्होचितं वो
> मद्भावः स्यात् सुरस्यः श्रवणगुणकथाचिन्तनैर्नोद्भवद्भिः ॥ ९५ ॥

सभक्तिः भक्त्या सहिता ॥ ९५ ॥

अथापरा पराभूतान्तःकरणा प्रियतादा प्रियतादात्म्येन रसदमूर्धन्यधन्यगोवर्धनधरणिधरधरणलीलानुकारे तत्कालसमुपसन्नसुघनघनघटाघटाननगलज्जलधाराधारायमाणमवनितलमालोक्येव कातरतरवदनान् गोगोपवनितादीनप्यालोक्येव साश्वासमाह ॥ ९६ ॥

प्रियेण सह यत् तादात्म्यं तेन प्रियतां प्रेमाणम्· आदत्ते धारयतीति सा, यद्वा दयते रक्षति, व्यनक्तीत्यर्थः, "देङ् रक्षणे" इत्यस्मात् ।

सुघना सुनिबिडा या मेघघटा तस्याः सकाशाद् घटावनादिव घटमुखा-दिव प्रलम्बां जलधाराणाम् आधारायमाणाम् ॥ ९६ ॥

मा भैष्ट भो प्रबलदारुणवातहर्षे-
प्रोत्कर्षतो भजत चेतसि धैर्यमार्याः ।
एकातपत्रमिव भूवलयं करोमि
गोवर्धनेन करपद्मदलोद्धृतेन ॥ ९७ ॥

एकम् आतपत्रं यत्र तथाभूतं, श्लेषेण एकच्छत्रां पृथ्वीं कुर्वता मया साम्राज्यं प्राप्य यूयं प्रतिपाल्यध्वे, का चिन्तेति भावः ॥ ९७ ॥

किंच ।

संदेहं मा कुरुत करतो मामकीनाद्गिरीन्द्रः
स्रस्तो भावीत्यहह गिरि मेऽप्रत्ययं मा स्म कृढ्वम् ।
साब्धिद्वीपक्षितिधरकुलं भूतलं नागराजो
धत्ते नैकाचलमुदसितुं नागराजोऽयमीशः ॥ ९८ ॥

मम गिरि वाचि अप्रतीतिं मा कृढ्वम् । नागराजोऽनन्तः । एक-मचलं गोवर्धनमपि उदसितुमुत्क्षेप्तुम् अयं नागराजो न ईशः, अपि-त्वीश एव । नागराणाम् अजो राजा, महाविनोदीत्यर्थः, "अज-श्छागे हरिब्रह्मविधुस्मरनृपे हरे" इति मेदिनी ॥ ९८ ॥

इति निगदन्ती गदन्तीव्र[1]मिव स्वजनानां दूरयन्ती रयन्ती[2]क्ष्ण-मासाद्य सौरभरभसपरिभूतीभवदमृणालमृणाललतिकयेव समुन्नीतया मुन्नीतया वामया वामया भुजया जयारम्भपताकादण्डनिभया भया-पहरणाय निजोत्तरीयमुल्लास्य दक्षिणकरतलाग्रेण दक्षिणश्रोणितल-मालम्ब्य तस्थुषी पुनराह ॥ ९९ ॥

१ गदं तीव्र–इत्येवं मुद्रणीये संधिः प्राग्वत् ।।
२ रयं तीक्ष्ण–इत्यपि तथा ।

गदं पीडाम् । तीव्रां रयं वेगम् । सौरभस्य रभसेन वेगेन परिभूतीभवत्· अमृणालम्· उशीरं यतस्तथाभूतया मृणाललतिकयेव बामया भुजया बामया मनोहरया ॥ ९९ ॥

प्रविशत शतगव्यूतिव्यूतिललितं शतपत्रच्छपस्येवास्य तलमिति ॥ १०० ॥

शतगव्यूतीनां व्यूत्या सर्वतः समसंनिवेशसंतत्या ललितम्, "गव्यूतिः स्त्री क्रोशयुग"मित्यमरः, व्यूतिरिति "वेञ् तन्तुसंताने" ॥ १०० ॥

अथ कापि स्वयं स्वयन्त्रितमहिम्ना स्वमुरलीनादेनाकृष्य समानीता नीतावात्मकुलस्य कृतावहेला हेलावतीर्गोकुलरमणीमणीरागता रागतात्पर्यपर्यवसानभूताः प्रभूताः प्रणयनयस्पृहापुरःसरमालोकयन्तीरिवालोक्य रासरससरसकृष्णतादात्म्याष्टमग्रहग्रहणातिरोभूतस्वभावा चन्द्रमण्डलीव कृष्णा इव सहासपरिहासपरिपेशलं किंचिदवादीत् ॥ १०१ ॥

आत्मकुलस्य नीतौ स्वीयकुलधर्ममर्यादायां हेला शृङ्गारसूचकभावविशेषस्तद्वतीः, रागस्य तात्पर्यमङ्गसङ्गस्तत्रैव पर्यवसानभूताः, धर्मप्राधान्येन निर्देशस्तदाधिक्यद्योतकः, प्रभूता बह्वीः । अष्टमग्रहो राहुः । परिपेशलमतिचतुरम् ॥ १०१ ॥

साध्व्यः स्वागतमास्यतां किमयि वः क्षेमं समादिश्यतां
प्रेयो वः करवाम किं कथमहो सर्वाः सहैवागताः ।
हन्त व्यस्तसमस्तवेशवसनालंकारविन्यासतो
येयं काप्यनुमीयते सुमहती सा वा त्वरा वः कथम् ॥ १०२ ॥

प्रेयोऽतिप्रियम् ॥ १०२ ॥

घोरेयं रजनी वनं च सुमहद् घोरं वनस्था अमी
घोरा एव हि जन्तवः कथमिह स्थेयं गणैस्त्वादृशाम् ।

तस्माद्गच्छत मन्दिरं कुसुमिता धौताः सुधांशोः करै-
र्दृष्टाः काननभूमयः सुरभिणा वातेन शीतीकृताः ॥ १०३ ॥

मन्दिरं वनं, वस्तुतस्तु लतामन्दिरम् । कुसुमिता भूमयो दृष्टा एव, किं पुनरतिविदूरतयेति भावः ॥ १०३ ॥

न स्थेयमत्र निशि पङ्कजपत्रनेत्राः
स्त्रीभिः समं परमधर्मविदा जनेन ।
ध्यानाद् गुणश्रवणतो गुणकीर्तनाद्वा
रम्या यथा मम रतिर्न तथाङ्गसङ्गैः ॥ १०४ ॥

परमतिशयेन· अधर्मविदा· अतिकामिना मया जनेन सह न स्थेयमिति प्रकटः, परमं धर्मं वेत्तीति तादृशेन मया सह न स्थेयम्, अपितु स्थेयमेवेत्यान्तरोऽर्थः, अङ्गसङ्गैर्यथा रतिर्मम रम्या तथा ध्यानादिना नेत्यान्तरोऽर्थः, प्रकटार्थः स्पष्ट एव ॥ १०४ ॥

इत्येवं कृष्णानुकृतिकृतिकौशलशलत्तादात्म्यतया तया कलमधुरं मधुरञ्जि·निगद्याहमन्तर्दधामीति मनसि प्रतीतिमती कृष्णवदन्तर्धा-नलीलां यदि तदानुचकार ॥ १०५ ॥

कृष्णस्यानुकृतिरनुकरणं तत्र कृतिकौशलं क्रियानैपुण्यं तस्मादेव शलत् प्राप्नुवत् तादात्म्यं यास्तासां भावस्तत्ता तया मधुरम्, मधुरञ्जि· मधुरतोऽपि रञ्जकम् ॥ १०५ ॥

तदा तस्याश्चेतरासामपि सद्य एव सहैव तादात्म्यनिद्रा-भङ्गः समपद्यत ॥ १०६ ॥

तादात्म्यनिद्राभङ्ग इति, इतरासां तद्विरहे·अनुक्रियमाणे मूलवि-रहस्यैवोदयात्, अन्तर्हितत्वस्यास्तस्यास्तु·अनुकरिष्यमाणस्य ततः परस्य कृष्णलीलान्तरस्यानुपलम्भात् तासां विरहवैकल्येन स्ववैकल्यस्याप्युत्था-पितत्वाच्च, इति विवेचनीयम् ॥ १०६ ॥

ततश्च प्रकृतायां आपद्दशायाम् ।

आयातं मनआदिभिर्विकसितं नेत्रादिभिर्जीवितं
संतापेन समुत्थितं धृत विदा संमूर्छितं चिन्तया ।
भूयः प्रागिव कृष्णमार्गणविधौ कामं कुरङ्गीदृशः
सर्वा दिक्षु विदिक्षु दत्तनयना कान्तर्यममभ्यायमुः ॥ १०७ ॥

प्रकृतायामिति, पूर्वव्याख्यानुसृत्या पाकावस्थां परित्यज्य पुनर्मध्यमावस्थां प्राप्ते सत्युन्माद इत्यर्थः, विदा ज्ञानेन, चिन्तया संमूर्छितम्-अभिव्याप्तम्, "संमूर्छनमभिव्याप्ति"रित्यमरः ॥ १०७ ॥

एवं विस्मृततन्मयीभावा भावाधविरसा धैर्यवत्योऽपि स्वयमेव गच्छताच्छतारहितेन धैर्येण पर्याकुलेक्षणाः ॥ १०८ ॥

एवं विस्मृततन्मयीभावास्ताः क्षणादेव श्रीकृष्णचरणकमललक्ष्माणि लक्षयांचक्रुरित्यन्वयः । भा तन्मयीभावदशायां कान्तिविशेषस्तस्या बाधे अपगमे सति विरसाः, तादृशसारस्येनापि रहिता इत्यर्थः । धैर्यवत्योऽपि परमावहेण धैर्यं दधत्योऽपि । अच्छता याथार्थ्येन नैर्मल्यं तद्रहितेन, कृत्रिमेणेत्यर्थः ॥ १०८ ॥

क्षणादेव महद्वेगेन निर्वासयीव रसोरसोऽन्तरे व्यक्तानीव पत्राङ्कुराणि किंवा तासामेव हृदयस्थानि यानि तान्येव नयनविवरेभ्यो निर्गत्य भुवि निपतितानि किंवा विपिनलक्ष्म्येव स्वकरकमलेन लिखितानि किंवा कमलजादिभिरुपासनार्थं विलिख्य रचितानि यानि तान्येव सपदि दिवो विच्युतानि किंवा सरणिलतायाः पार्श्वद्वयवर्तीनि विचित्राणि नवीनपत्राणि श्रीकृष्णचरणकमललक्ष्माणि लक्षयांचक्रुः ॥ १०९ ॥

रसा पृथ्वी तस्या उरसोऽन्तरे वक्षोमध्ये महद्वेगेनेव निर्वासयि गलितवसने, पत्राङ्कुराणीति पृथ्व्यास्तादृशसौभाग्योदयेन श्लाघाविक-

तया, तावत्प्रेक्षेति तदानीं यत्र यत्र नेत्राणि पतितानि तत्रैव चित्रा-णीति तेषां वैभवविवक्षया, त्रिपिनलक्ष्म्येति तेषां सुवलितत्वसौन्दर्ययो-र्विवक्षया, कमलजादीति तेषां माहात्म्यविवक्षया, विच्युतानीति, तासां वैकल्यदर्शनव्याकुलानां तेषां तच्चासावधानत्वादिति भावः, सरणीति तेषामन्यसौन्दर्यसंपादकत्वविवक्षया, उत्प्रेक्षा ॥ १०९ ॥

लक्षयित्वा च त्वाचमुद्धर्षमुद्धर्षयन्त्यो झटिति घटितानन्द-चमत्काराः परस्परमूचुरिदमहो महोदयोऽयमस्माकमतिसौभा-ग्यस्य ॥ ११० ॥

त्वाचं त्वक्संबन्धिनम्, उद्धर्षं रोमाञ्चमित्यर्थः, उद्धर्षयन्त्यः उच्चैः प्रगल्भयन्त्यः, "ञिधृषा प्रागल्भ्ये" धयन्तः ॥ ११० ॥

यतः ।

इतो व्यातन्वन्ति ध्वजकमलवज्राङ्कुशमयी-
र्लसल्लेखालक्ष्मीः पुरु पुरुषरत्नप्रणयिनीः ।
करैरामृष्टानि प्रकृतिमधुरैः शीतमहसा
पदानि व्यक्तान्याकलयत हरेः पङ्कजदृशः ॥ १११ ॥

शीतमहसा चन्द्रेण कर्त्रा करैः किरणैः प्रदीपैरिव आमृष्टानि, सम्यगुज्ज्वलीकृतानीत्यर्थः । कीदृशानि, ध्वजादिमयीर्लसद्रेखासंपत्तीर्व्या-तन्वन्ति विख्यापयन्ति । पुरु यथा स्यात् तथा कलयत ॥ १११ ॥

किंच ।

निम्ना पार्ष्ण्योः कियदिव शिखास्वङ्गुलीनां च किंचि-
न्मध्योत्ताना ललितसिकताकोमलायां धरण्याम् ।
विष्कम्भोच्चादिभिरिह हरेर्भाति पादाङ्कलेखा
सीमन्तस्य क्षितिमृगदृशो बालपाश्या लतेव ॥ ११२ ॥

पार्ष्ण्योरङ्गुलीनां शिखासु च कियदिव निम्ना । किंचिन्मध्यप्रदेशे उत्ताना । ननु तर्हि तत्कालमङ्कानां कथं व्यक्तिरत आह सिकता इति,

तथापि सिकतासु प्रायेऽवगाढतया तद्व्यक्तिरिति भावः । पादाङ्कलेखा चरणचिह्नश्रेणी ॥ ११२ ॥

अपि हि ।

ध्वजः सर्वोत्कर्षं कमलमवनीं शीतलयितुं
पविर्नोहत्यर्थं हृदयखननायाङ्कुशमिदम् ।
अथैषामन्योन्यं विसदृशगुणानामपि सह-
स्थितिः शोभां धत्ते हरति च मनो लोचनवताम् ॥ ११३ ॥

ध्वज इति महागर्वत्वम्, कमलमिति कृपालुत्वम् । पविरिति निर्दयत्वम् । अङ्कुशमिति तत्राप्यतिक्रौर्यम् । तस्य पात्रभेदे कयाचिद्ग्रामप्रखरया समर्थितम् । किंचैतदत्याश्चर्यमिति द्वितीयप्रखरा आहुः॰ अथैषामिति ॥ ११३ ॥

किंच ।

अहो माधुर्याणामहह महिमा तच्चरणयो-
र्यदङ्केऽपि क्षोण्यामपतदिह मुग्धो मधुकरः ।
प्रसूनानां धूलौ भवति विमुखो नास्य तदयं
महाभागो मन्ये जयति परमो भागवतवत् ॥ ११४ ॥

तदुपविष्टं कमपि भ्रमरमालक्ष्याहुः॰अहो इति ॥ ११४ ॥

धन्या धूलिरियं धुनोति धरणेर्दुःखं धुनीतेतरां
धीराणां धुरमंहसो धृतिमतां धैर्याध्वरध्वंसिनी ।
श्रीगोविन्दपदारविन्दतलयोर्यामिन्दिरा सुन्दरी
नन्दीशोऽप्यरविन्दजोऽपि दिविषद्वृन्दैः समं वन्दते ॥ ११५ ॥

धीराणाम्॰अंहसो दुःखस्य धुरं भारं धुनीते खण्डयति, धृतिमतां, धृतिं विधीर्षतामित्यर्थः ॥ ११५ ॥

तद्वयमपि चोरसि रसिकशेखरस्य रस्यतमामिमामिदानीमति-

दुरन्तसंततसंतापतापहारकृते विदधामो धूलिमिति कयाचिदुक्ते काचिदपरा परामर्शवती निजगाद ॥ ११६ ॥

रस्यतमाम् इमां धूलीम् उरसि विदधामः । अतिदुरन्तः संततः संतापो यासां तासां भावस्तत्ता तस्या अपहारकृते दूरीकरणार्थम् ॥ ११६ ॥

धूलिग्रहणतो विरम्यतां रम्यतां मास्याः पदपद्धत्या विलोपयन्तु भवत्य एकैकशः परामर्शेन विलोचनतो लोचनतोषकारीण्येव सन्त्वमानि मा निलोडयत कराभिघातेनेति तान्येव निभालयन्त्यः ॥ ११७ ॥

पदपद्धत्याश्चरणचिह्नपथस्य रम्यतां मा विलोपयन्तु । एकैकशः भवतीनां सर्वासां मध्ये एकैकशः प्रत्येकमेव, परामर्शेन विलोचनतः, ध्वजोऽयमङ्कुशः खल्वयमिति विचारेणावलोकादित्यर्थः । निलोडनं विलापनम् ॥ ११७ ॥

सह नीताया नीतायामिसौभाग्यरसाया रसाया दिवोऽपि दुरापायाः कस्याश्चित् प्रियतमाया मायारहितहितसौहृदाया हृदायातवल्लभप्रणयसौलभ्यलभ्यमानमानायाः सहजप्रणयसुधाराधाया राधायाश्चरणलाञ्छनानि लाञ्छनानि सौभाग्यविशेषस्येव विलोक्याहुः ॥ ११८ ॥

नीतः प्राप्त आयामो सौभाग्यरसो यया तस्याः, हृदि स्ववक्षसि आयातः सम्यक् प्राप्तो यो वल्लभस्तस्य प्रणयसौलभ्येन लभ्यमानः प्राप्यमाणो मानो गर्वो यया तस्याः ॥ ११८ ॥

अहो किमिदम् ।

एकस्यामिव लतिकामतल्लिकायां
वैजात्यं किसलयसंततेर्यदेतत् ।
भाविन्याः प्रियपदलाञ्छनानि यद्वै
दृश्यन्ते प्रियपदलाञ्छनाङ्कितानि ॥ ११९ ॥

लतिकामतल्लिकायां प्रशस्तलतायां, सरव्यामित्यर्थः। किसलयसंततेः पल्लवकुलस्य वैजात्यं वामदक्षिणतो विजातीयाकारत्वम् ॥ ११९ ॥

किंच।

यथास्याः पादाब्जप्रतिकृतिततिः कृष्णपदयोः
पदैः सार्धं श्रेणीभवनरुचिरेयं विलसति।
तथा मन्ये प्रेयोभुजशिरसि दत्त्वा भुजलतां
कृतालम्बायासीदिव मदगजेनोन्मदगजी ॥ १२० ॥

श्रेणीभवनरुचिरा श्रेणीभावेन रुचिरा भुजलतां दक्षिणभुजाम् ॥ १२० ॥

तदियमेव केवलं बलं वहति सौभाग्यस्य यदयमदयमतिरपहाय हा यतमाना मानापहारेणापि तदनुगतये नस्तामेकामेव कामे बद्धमतिरपहृत्य रमते ॥ १२१ ॥

तदनुगतये तस्या एवानुगतिं प्राप्तुं नोऽस्मान् मानापहारेण निरादरेणापि अपहाय परित्यज्य यतमानास्तत्प्राप्त्यर्थं यत्नवतीरप्यस्मानित्यनेन तामयतमानामपीति व्यञ्जितम्, यद्वा मानापहारेणापि तदनुगतये, निजादरालाभेनापि तदनुगत्यर्थमित्यर्थः, तामपहृत्य चोरयित्वा ॥ १२१ ॥

तथा विचिन्त्य पुनरूचिरे चिरेण।

धन्येयं जगतीगतोन्नतवधूरत्नेषु रत्नोत्तमं
सौभाग्योत्सवभूः प्रभूतसुकृता राधैव निर्धारितम्।
ज्योत्स्ना चन्द्रमसं विना पिकगिरां लक्ष्मीर्वसन्तं विना
विद्युद्वारिधरं विना न भवितुं संभावनामर्हति ॥ १२२ ॥

प्रभूतसुकृता प्रचुरपुण्या। ज्योत्स्नेति, तेन वयं कदाचित् तत्सङ्गवत्योऽपि ज्योत्स्नाद्युपमानयोग्या न भवितुं प्रभवाम इति भावः, ज्योत्स्नादिभिर्विना चन्द्रादीनामपि न साफल्यमिति तया विना नैव तस्य शोभेति च भावः। तत्र ज्योत्स्नाचन्द्राभ्यां तयोर्माधुर्यं पिकगीर्वसन्ताभ्यां सानुरूप्यं विद्युद्वारिधराभ्यां सौरूप्यं च वर्णितम् ॥ १२२ ॥

इति निश्चिते चन्द्रवली सखी मुखविजितपद्मा पद्मा गुण-श्यामां श्यामां प्राह ॥ १२३ ॥

इति निश्चिते सुहृत्पक्षे सौभाग्यातिशये निर्धारिते सतीत्यर्थः ॥१२३॥

अयि श्यामे सपक्षपक्षपातिता पातिता खलु तया यतस्तदे-कमात्रजीवनां वनान्तरे भवतीं निर्माल्यमिव विहाय हा.ययौ सर्व-दयितं दयितं तमपहृत्य स्वयमेकैव रन्तुमहो त्वयि तत्सौहृदं हृ-दन्तरगामि न भवति ॥ १२४ ॥

सपक्षस्य पक्षपातिता· आनुकूल्यं पातिता खण्डिता तया त्वत्सु-हृदा राधया । सर्वा एव दयिता वल्लभा यस्य तम् । दयितमिति पर-मदक्षिणनायकस्य तस्यानभिप्रेताचरणाद् विप्रियैव सेत्यपि सूचितम् । एकैव रन्तुमेवेत्यनेन तस्यास्तस्मिन् काम एव ननु प्रेमेत्यपि ध्वनितम् । अहो आश्चर्यमेतत् काममाहात्म्यं यतस्तस्याः सौहृदं त्वयि हृदन्तर-गामि मनोऽन्तरवर्ति न भवति, किंतु बाह्यमेवेत्यर्थः ॥ १२४ ॥

श्यामाह, पद्मे सहजमत्सरमते स· रमतेरकौशल्यात् ॥ १२५ ॥

सहजैव मत्सरमतिर्यस्या हे तथाभूते सर मत्संमुख्यादपसर, तत्र हेतुर्मतेरकौशल्यादिति, तव मतिरमङ्गला दुष्टैवेत्यर्थः ॥ १२५ ॥

शृणु तावत् ।

सा कृष्णप्रणयोत्सवामृतरसस्रोतस्वतीस्रोतसि
क्षिप्राङ्गी शिशुतावधि स्ववपुषि स्वाच्छन्द्यहीना वपुः ।
यत्र क्वापि महारयेण महता तत्स्रोतसा नीयते
तस्मादुद्धारयितुं न पारयति सा शैवालवद्भासते ॥ १२६ ॥

शृणुतावदिति,अयमर्थः, तस्याः स्वचेष्टितस्य सर्वस्य स्वबुद्धिपूर्व-कत्वे सति त्वदुक्तं संभवेदपि, तस्यास्तु स्वप्रेमाधीनप्रियतमपरतन्त्राया-स्तथा किमपि नैवेत्यत आह सा· इति, स्वाच्छन्द्यहीनेति, कृष्णवशमेव तद्वपुरिति भावः ॥ १२६ ॥

तदियं नापेक्षणीया पक्षणीया हि सर्वतोभावेन ।

जातं सहैव वपुषा सह वर्धमान-
मैक्येन नो पृथगिति प्रतिपद्यमानम् ।
आसाद्य कालमुपकोषमसौ त्यजन्ती
नैवापराध्यति हि गन्धफली कदापि ॥ १२७ ॥

पक्षणीया रक्षणीया । गन्धफली चम्पकः । उपकोषं कोषबहिर्वर्ति पुटकम्, तत्पुष्टिप्रापणाय उपकोष एव ततो निष्पतति, तस्याः को दोष इति भावः । ततश्चास्माकमेव सुखसंपत्तिरियमिति सूचितम् ॥ १२७ ॥

तेन समये प्राणतुल्या अपि सखीस्त्यजन्त्या न खलु रसवत्या सौहार्दतो हीयते ॥ १२८ ॥

समये, सुरतसंबन्धिनीति भावः ॥ १२८ ॥

अन्या आहुः ।

श्यामे सपत्ना हि सपत्नाहितं कदापि नेच्छन्ते तेन त्वया त्वयातयामप्रणयेदमुक्तं युक्तम्, वस्तुतस्तु तस्याः प्रधानतया नेदमध्यवसितं सितम् ॥ १२९ ॥

अन्या इति चन्द्रावलीसपत्नाः, तेन हेतुना त्वया तु अयातयामः अजीर्णः प्रणयो यस्यास्तया सितं बद्धम् ॥ १२९ ॥

यतो निष्कृपेयं पेयं सर्वगोपरमणीमणीनां कृष्णस्य तमधरमधरयन्ती चकोरीं स्वयमेकैव पिबति ॥ १३० ॥

अधरयन्ती पानपरिपाट्या न्यक्कुर्वती ॥ १३० ॥

तदिमानि मा नितान्तसंतोषकारीणि तस्याः पदचिह्नानि, इति तानि नयनसुखास्पदानि पदानि विलोकयन्त्यो यन्त्यो भावशाबल्यं भावशाबल्यं तदनुसारेण ललितं चलन्त्यः कियद्दूरेऽदूरेणुषु दृष्टिम् ॥ १३१ ॥

Digitized by Google

इति तानीति, राधासपत्ना एवेति ज्ञेयम् । भावशाबल्यं हर्षगर्वप्रणयकोपदैन्यादिभावसंमर्दे यन्त्यः प्राप्नुवत्यः, अत एव तादृशसंचारिभावानां भावशेन प्रकाशवशेन·आवल्यं यत्र तद्यथा स्यात् तथा तेषां चरणचिह्नानाम्·अनुसारेण वलन्त्यो रेणुषु दृष्टिम्·अदुः ॥ १३१ ॥

दत्तदृष्टयस्तत्र ता वधूपदानि धूपदानि नालोक्य वितर्कयामासुः ॥ १३१ ॥

धूपदानि संतापप्रदायकानि, "तप धूप संतापे" ॥ १३२ ॥

॥ शेषमग्रे ॥

THE

SARVA-DARS'ANA-SANGRAHA.

CHAPTER XIV.

THE SÁNKHYA-DARŚANA.

"But how can we accept the doctrine of illusory emanation (thus held by the grammarians, following the guidance of the *púrva* and *uttara* Mímámsá schools); when the system of development propounded by the Sánkhyas is still alive to oppose it?" Such is their loud vaunt.—Now the Śástra of this school may be concisely said to maintain four several kinds of existences, viz. that which is evolvent only,—that which is evolute only,—that which is both evolute and evolvent,—and that which is neither. *(a.)*—Of these the first is that which is only evolvent, called

॥ सर्वदर्शनसङ्ग्रहे

सांख्यदर्शनम् ॥

अथ सांख्यैराख्याते परिणामवादे परिपन्थिनि जागरूके कथंकारं विवर्तवाद आदरणीयो भवेदेष हि तेषामाघोषः । सङ्क्षेपेण हि साङ्ख्यशास्त्रे चतस्रो विधाः सम्भाव्यन्ते कश्चिदर्थः प्रकृतिरेव कश्चिद्विकृतिः प्रकृतिश्च कश्चिदुभय इति । तत्र केवला प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः

Nature or the Original; it is not itself the evolute of anything else. It evolves,—hence it is called the evolvent, *(prakṛiti)*; since it denotes in itself the equilibrium of the three qualities, goodness, activity, and darkness. This is expressed (in the Sánkhya Káriká)—"the root-evolvent is no evolute." It is called the root-evolvent, as being both root and evolvent,—it is the root of all the various effects, as the so-called 'great one,' &c.; but of it, as the original, there is no root, as otherwise we should have a regressus ad infinitum. Nor can you reply that such a regressus ad infinitum is no objection, if, like the continued series of seed and shoot, it can be proved by the evidence of our senses,* —because here there is no evidence to establish the hypothesis. (*b.*)—The 'evolutes and evolvents' are the great one, egoism, and the subtile elements,—thus the Sánkhya Káriká (§ 3.), "the seven, the great one, &c., are evolute-evolvents,"—the seven are the seven principles, called the great one, &c. Among these the great principle, called also the intellect,† &c., is itself the evolute of nature and the evolvent of egoism; in the same manner the

* Compare Kusumánjali i. 4.

† One great defect in the Sánkhya nomenclature is the ambiguity between the terms for intellect *(buddhi)* and those for mind *(manas)*. Mádhava here applies to the former the term *antahkarana* or 'internal organ,' the proper term for the latter. I have ventured to alter it in the translation.

नासाववन्यस्य कस्यचिद्विकृतिः । प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरज-स्तमोगुणानां साम्यावस्थाया अभिधानात् तदुक्तं मूलप्रकृतिरविकृतिरिति । मूलञ्चासौ प्रकृतिश्च मूलप्रकृतिः महदादेः कार्य्यकलापस्यासौ मूलं नत्वस्य प्रधानस्य मूलान्तरमस्ति अनवस्थापातात् । न च बीजाङ्कुरवदनवस्थादोषो न भवतीति वाच्यं प्रमाणाभावादपि भावः । विकृतयश्च प्रकृतयश्च मह-दहङ्कारतन्मात्राणि । तदप्युक्तं महदाद्याः प्रकृतिविकृतयः सप्तेति अस्यार्थः प्रकृतयश्च ताः विकृतयश्चेति प्रकृतिविकृतयः सप्त महदादीनि तत्त्वानि तत्रान्तःकरणादिपदवेदनीयं महत्तत्त्वमहङ्कारस्य प्रकृतिः मूलप्रकृतेस्तु वि-कृतिः एवमहङ्कारतत्त्वमभिमाननामधेयं महतो विकृतिः प्रकृतिश्च तदेवा-हङ्कारतत्त्वं तामसं सत् पञ्चतन्मात्राणां सूक्ष्माभिधानां तदेव सात्त्विकं सत्प-

principle egoism, called also 'self-consciousness' *(abhimána)* is the evolute of the great one, intellect; but—this same principle, as affected by the quality of darkness, is the evolvent of the five rudiments, called subtile elements; and, as affected by the quality of goodness, it is the evolvent of the eleven organs, viz. the five organs of perception, the eye, ear, nose, tongue and skin, the five organs of action, the voice, hands, feet, anus and generative organ, and the mind, partaking of the character of both; nor can you object that in our arrangement the third quality, activity, is idle, as it acts as a cause by producing action in the others. This has been thus declared by Íśwara Kṛishna in his Kárikás,* (§. 24-27.) "Self-consciousness is egoism. Thence proceeds a two-fold creation,—the eleven-fold set and the five elemental rudiments. From modified egoism originates the class of eleven consisting of goodness; from egoism as the source of the elements, and this as affected by darkness, originate the rudimentary elements; but it is only from egoism as affected by activity that the one and the other rise.† The intellectual

* It is singular that this is Mádhava's principal Sánkhya authority, and not the Sánkhya Sútras.

† *Vaikṛita* is here a technical term meaning that goodness predominates over darkness and activity. On this Káriká, comp. Dr. Hall's preface to the Sánkhya-pravach. pp 46—48.

कृतिरेकादशेन्द्रियाणां बुद्धीन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानां कर्मेन्द्रियाणां वाक्पाणिपादपायूपस्थानामुभयात्मकस्य मनसश्च रजसस्तूभयत्र क्रियोत्पादनद्वारेण कारणत्वमस्तीति न वैयर्थ्यम् । तदुक्तमीश्वरकृष्णेन ॥

अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥
सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥
बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पादपाणिपायूपस्थानि कर्म्मेन्द्रियाण्याहुः ॥

organs are the eyes, the ears, the nose, the tongue and the skin; those of action are the voice, feet, hands, anus and organ of generation. In this set is mind which has the character of each; it determines, and it is an organ (like the other ten) from having a common property with them. *"—All this has been explained at length by the teacher Váchaspati Miśra in the Sánkhya-tattwa-kaumudí.

(*c.*)—The 'evolute only' means the five gross elements, ether, &c., and the eleven organs, as said in the Káriká, 'The evolute consists of sixteen.'—That is, the set of sixteen is evolute only, and not evolvent. Although it may be said that earth, &c., are the evolvents of such productions as cows, jars, &c., yet these are not a different 'principle' *(tattwa)* from earth, &c., and therefore earth, &c., are not what we term 'evolvents;' as the accepted idea of an evolvent is that which is the material cause of a separate principle; and in cows, jars, &c., there is the absence of being any such first principle, in consequence of their being all alike gross (i. e. possessed of dimensions,) and perceptible to the senses. The five gross elements, ether, &c., are respectively produced from sound, touch, form, taste and smell, each subtile element being accompanied by all those which precede it, and thus the gross elements will have respectively one, two, three, four and five

* As produced, like them, from modified egoism. The reading ***sankalpavikalpátmakam*** must be corrected by the Sánkhya Káriká.

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यादिति । विवृतञ्च तत्त्वकौमुद्यामाचार्य्यवाचस्पतिभिः । केवला विकृतिस्तु वियदादीनि पञ्चभूतानि एकादशेन्द्रियाणि च तदुक्तं षोडशकस्तु विकार इति षोडशसङ्ख्यावच्छिन्नो गणः षोडशको विकार एव न प्रकृतिरित्यर्थः यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः तत्त्वान्तरोपादानत्वं चेह प्रकृतित्वमभिमतं गोघटादीनां स्थूलत्वेन्द्रियग्राह्यत्वयोः समानत्वेन तत्त्वान्तरत्वाभावः तत्र शब्दस्पर्शरूपरसगन्धतन्मात्रेभ्यः पूर्व्वपूर्व्वसूक्ष्मभूतसहितेभ्यः पञ्च

qualities.* The creation of the senses has been previously described. This is thus propounded in the Sánkhya Káriká (§. 22,).

> "From nature springs the great one, from this egoism, from this the set of sixteen, and from five among the sixteen proceed the five elements."

(*d.*)—The soul is neither, — as is said in the Káriká, "the soul is neither evolvent nor evolute." That is, the soul, being absolute, eternal and subject to no development, is itself neither the evolvent nor the evolute of aught beside.—The three proofs are accepted as establishing these twenty-five principles; and thus the Káriká (§. 4.).

"Perception, inference, and the testimony of worthy persons are acknowledged to be the three-fold proof, for they comprise every mode of demonstration. It is from proof that there results belief of that which is to be proven."

Here a four-fold discussion arises as to the true nature of cause and effect. The Saugatas † maintain that the existent is produced from the non-existent; the Naiyáyikas, &c., that the (as yet) non-existent is produced from the existent; the Vedántins that all

* Cf. Colebrooke Essays, vol. i. p. 256. The tanmátrás will reproduce themselves as the respective qualities of the gross elements.

† A name of the Buddhists.

भूतानि वियदादीनि क्रमेणैकद्वित्रिचतुष्पञ्चगुणानि जायन्ते । इन्द्रियसृष्टिस्तु प्रागेवोक्ता । तदुक्तम् ।

> प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
> तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानीति ॥

अनुभयात्मकः पुरुषः तदुक्तं न प्रकृतिर्न विकृतिः पुरुष इति । पुरुषस्तु कूटस्थोनित्योऽपरिणामी न कस्यचित् प्रकृतिर्नापि विकृतिः कस्यचिदित्यर्थः । एतत्पञ्चविंशतितत्त्वसाधकत्वेन प्रमाणत्रयमभिमतं तदप्युक्तं ।

> दृष्टमनुमानमाप्तवचनञ्च सर्व्वप्रमाणसिद्धत्वात् ।
> त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धीति ।

effects are an illusory emanation from the existent and not themselves really existent; while the Sánkhyas hold that the existent is produced from the existent.

a.—Now the first opinion is clearly untenable, since that which is itself non-existent and insubstantial can never be a cause any more than the hare's horn, and, again, the real and unreal can never be identical.

b.—Nor can the non-existent be produced from the existent, since it is impossible that that which, previous to the operation of the originating cause, was as non-existent, as a hare's horn, should ever be produced, i. e. become connected with existence; for not even the cleverest man living can make blue yellow.* If you say, "but are not existence and non-existence attributes of the same jar?"—this is impossible, since we cannot use such an expression as 'such a quality resides in a non-existent subject,' for it would certainly imply that the subject itself did exist. Hence we conclude that the effect is existent even previously to the operation of the cause, which only produces the manifestation of this already existent thing, just like the manifestation of the oil in sesame seed by pressing, or of the milk in cows by milking.

* I. e. The nature of a thing *(Swabháva)* cannot be altered—a man cannot be made a cow, nor a woman a man.

इह कार्य्यकारणभावे चतुर्द्धा विप्रतिपत्तिः प्रसरति । असतः सज्जायत इति सौगताः सङ्गिरन्ते । नैयायिकादयः सतोऽसज्जायत इति । वेदान्तिनः सतो विवर्त्तः कार्य्यजातं न वस्तुसदिति । सांख्याः पुनः सतः सज्जायत इति । तत्रासतः सज्जायत इति न प्रामाणिकः पक्षः असतो निरुपाख्यस्य शशविषाणवत्कारणत्वानुपपत्तेः तुच्छातुच्छयोस्तादात्म्यानुपपत्तेश्च । नापि सतोऽसज्जायते कारकव्यापारात् प्रागसतः शशविषाणवत्सत्तासम्बन्धलक्षणोत्पत्त्यनुपपत्तेः नहि नीलं निपुणतमेनापि पीतं कर्त्तुं पार्य्यते । ननु सत्त्वासत्त्वे घटस्य धर्म्माविति चेत्तदचारु असति धर्म्मिणि तद्धर्म्म इति व्यपदेशानुपपत्त्या धर्म्मिणः सत्त्वापत्तेः । तस्मात् कारकव्यापारात् प्रागपि कार्य्यं सदेव सतश्चाभिव्यक्तिरुपपद्यते यथा पीड-

Again, there is no example whatever to prove the production of a thing previously non-existent.

Moreover, the cause must produce its effect, as being either connected with it or not connected; in the former alternative the effect's existence is settled, by the rule that connection can only be between two existent things; in the latter, any and every effect might arise from any and every cause, as there is nothing to determine the action of an unconnected thing. This has been thus put by the Sánkhya teacher. "From the supposed non-existence of the effect, it can have no connection with causes which always accompany existence; and to him who holds the production of a non-connected thing there is an utter want of determinateness." If you rejoin that "the cause, though not connected with its effect, can yet produce it, where it has a capacity of so doing, and this capacity of producing is to be inferred from seeing the effect actually produced,"—still this cannot be allowed, since in such a case as "there is a capacity for producing oil in sesame seeds," you cannot determine, while the oil is non-existent, that there is this capacity in the sesame seeds, whichever alternative you may accept as to their being connected or not with the oil, (since our before mentioned dilemma will equally apply here.)

नेन तिलेषु तैलस्य दोहेन च सौरभेयीषु पयसः। असतः करणे किमपि निदर्शनं न दृश्यते। किञ्च कार्य्येण कारणं सम्बद्धं तज्जनकम् असम्बद्धं वा प्रथमे कार्यस्य सत्त्वमायातं सतोरेव सम्बन्ध इति नियमात् चरमे सर्व्वं कार्य्यजातं सर्व्वस्माज्जायेत असम्बद्धत्वाविशेषात्। तदाख्यायि साङ्ख्याचार्य्यैः

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति।

अथैवमनुष्ठेयासम्बद्धमपि तत् तदेव जनयति यत्र यच्छक्तं शक्तिश्च कार्य्यदर्शनोन्नेयेति तत्र सङ्गच्छते तिलेषु तैलजननशक्तिरित्यत्र तैलस्यासत्त्वे सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छक्तिरिति निरूपणायोगात्। कार्य्य-

From our tenet that the cause and effect are identical, it follows that the effect does not exist distinct from the cause; thus the cloth is not something distinct from the threads, as it abides in the latter (as its material cause); but where this identity is not found, there we do not find the relation of cause and effect; thus a horse and a cow are distinct from each other, (for one is not produced from the other, and therefore their qualities are not the same); but the cloth is an acknowledged effect, and therefore nothing different from its cause.* If you object that if this were true, the separate threads ought to fulfil the office of clothing,—we reply that the office of clothing *is* fulfilled by the threads manifesting the nature of cloth when they are placed in a particular arrangement. As the limbs of a tortoise, when they retire within its shell, are concealed, and, when they come forth, are revealed, so the particular effects, as cloth, &c., of a cause, as threads, &c., when they come forth and are revealed, are said to be produced; and when they retire and are concealed, they are said to be destroyed; but there is no such thing as the production of the non-existent or the destruction of the existent. As has been said in the Bhagavad Gítá (ii. 16).

> "There is no existence for the non-existent nor non-existence for the existent."

* I take *arthántaram* here as simply *bhinnam*, Cf. Táránátha Tarkaváchaspati's note, *Tattwa Kaumudí*, p. 47.

कारणयोरभेदाश्च कार्य्यस्य सत्त्वं कारणात् पृथक् न भवति पटस्तन्तुभ्यो न भिद्यते तद्धर्म्मत्वाच्च यदेवं न तदेवं यथा गैारश्वः तद्धर्म्मश्च पटस्तस्माचार्थान्तरम् । तर्हि प्रत्येकं त एव प्रावरणकार्य्यं कुर्य्युरिति चेत् संस्थानभेदेनाविर्भूतपटभावानां प्रावरणार्थक्रियाकारित्वोपपत्तेः यथा हि कूर्म्मस्याङ्गानि कूर्म्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति एवं कारणस्य तन्त्वादेः पटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तिः सतां वा विनाशः । यथोक्तं भगवद्गीतायाम् ।

And in fact it is by inference from its effects that we establish the existence of the great evolvent, Nature. This has been said [in the Káriká, §. 9].

> "Effect exists, for what exists not can by no operation of caused be brought into existence; materials too are selected which are fit for the purpose; every thing is not by every means possible; what is capable does that to which it is competent; and like is produced from like."*

Nor can we say [with the Vedántin] that the world is an illusory emanation from the one existent Brahma, because we have no contradictory evidence to preclude by its superior validity the prima facie belief that the external world is real (as we have in the case of mistaking a rope for a snake, where a closer inspection will discover the error); and again, where the subject and the attributed nature are so dissimilar as the pure intelligence Brahma and the unintelligent creation, we can no more allow the supposed attribution to be possible than in the case of gold and silver (which no one mistakes for each other). Hence we conclude that an effect which is composed of happiness, misery and stupidity, must imply a cause similarly composed; and our argument is as

* Colebrooke's translation.

नासतो विद्यते भावो नाभावो विद्यते सत इति ।

सतश्च कार्य्यानुमानात् तत्प्रधानसिद्धिः । तदुक्तम्,

असदकरणादुपादानग्रहणात् सर्व्वसम्भवाभावात् ।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यमिति ।

नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात् अधिष्ठानारोप्ययोश्चिज्जडयोः कलधौतरूप्यादिवत् सारूप्याभावेनारोपसम्भवाच्च तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयं तथा च प्रयोगः विमतं भावजातं सुखदुःखमोहात्मककारणकं तदन्वितत्वात् यद्येनान्वीयते तत्तत्कारणकं यथा रुचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथाचेदं तस्मात्तथेति । तत्र जगत्कारणे येयं सुखात्मकता तत्

follows. The subject of the argument, viz., the external world, must have a material cause composed of happiness, misery, and stupidity, because it is itself endued therewith; whatever is endued with certain attributes must have a cause endued with the same,—thus a ring has gold for its material cause, because it has the attributes of gold; our subject is a similar case, therefore we may draw a similar conclusion. What we call 'being composed of happiness' in the external world is the quality of goodness; the 'being composed of misery' is the quality of activity;* the being composed of 'stupidity' is the quality of darkness; hence we establish our cause composed of the three qualities (i.e., *prakṛiti*, Nature). And we see that individual objects are found by experience to have these three qualities, thus among Maitra's wives, Maitra's happiness is found in Satyavatí, because the quality of 'goodness' in her is manifested towards him; but she is the misery of her fellow-wives, because the quality of 'activity' is manifested towards them; while she causes indifference to Chaitra who does not possess her, because towards him the quality of 'darkness' is manifested. So too in other cases also; thus a jar, when obtained, causes us pleasure; when seized by others, it causes us pain; but it is viewed with indifference by one who has no interest in it. Now

* Or 'passion' *rajas*.

सत्त्वं या दुःखात्मकता तद्रजः या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः तथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते यथा मैत्रदारेषु सत्यवत्यां मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्रादुर्भावात्तत्सपत्नीनां दुःखम् ताः प्रति रजोगुणप्रादुर्भावात्। तामलभमानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसमुद्भवात्। एवमन्यदपि घटादिकं लभ्यमानं सुखाकरोति परैरपि ह्रियमाणं दुःखाकरोति उदासीनस्योपेक्षाविषयत्वेनोपतिष्ठते उपेक्षाविषयत्वं नाम मोहः मुह वैचित्त्ये इत्यस्माद्धातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयेषु चित्तवृत्त्यनुदयात्। तस्मात् सर्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते। तथा च श्वेताश्वतरोपनिषदि श्रूयते।

this being regarded with no interest is what we mean by 'stupidity,' since the word *moha* is derived from the root *muh* 'to be confused,' since no direct action of the mind arises towards those objects to which it is indifferent. Therefore we hold that all things, being composed of pleasure pain and stupidity, must bear as their cause nature which consists of the three qualities. And so it is declared in the Śwetáśwatara Upanishad, (iv. 5).

"The one unborn, for his enjoyment, approaches the one unborn (nature) which is red, white and black, and produces a manifold and similar offspring; the other unborn abandons her, when once she has been enjoyed."

Here the words 'red,' 'white,' and 'black' express the qualities 'activity,' 'goodness,' and 'darkness,' from their severally possessing the same attributes of colouring, manifesting, and concealing.

Here however it may be objected: "But will not your unintelligent nature, without the superintendence of something intelligent, fail to produce these effects, intellect, &c.? and therefore there must be some intelligent superintendent; and hence we must assume an all-seeing, supreme Lord." We reply that this does not follow, since even unintelligent nature will act under the force of an impulse; and experience shews us that

---

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः ।
अजोह्येकोजुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति ॥

अत्र लोहितशुक्लकृष्णशब्दा रञ्जकत्वप्रकाशकत्वावरकत्वसाधर्म्यात्, रजस्सत्वतमोगुणत्वप्रतिपादनपराः ।

नन्वचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्यं न व्याप्रियते अतः केनचिच्चेतनेनाधिष्ठात्रा भवितव्यं तथाच सर्व्वार्थदर्शी परमेश्वरः स्वीकर्त्तव्यः स्यादिति चेत् तदसङ्गतम् अचेतनस्यापि प्रधानस्य प्रयोजनवशेन प्रवृत्त्युपपत्तेः दृष्टञ्च अचेतनं चेतनानधिष्ठितं पुरुषार्थाय प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते यथा जलमचेतनं लोकोपकाराय प्रवर्त्तते तथाच प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यति । तदुक्तम् ।

an unintelligent thing, without any intelligent superintendent, does act for the good of the soul, just as the unintelligent milk acts for the growth of the calf, or just as the unintelligent rain acts for the welfare of living creatures; and so unintelligent nature will act for the liberation of the soul. As it has been said in the Káriká (§ 57):

"As the unintelligent milk acts for the nourishment of the calf, so nature acts for the liberation of soul."

But as for the doctrine of "a supreme Being who acts from compassion," which has been proclaimed by beat of drum by the advocates of his existence, this has well-nigh passed away out of hearing, since the hypothesis fails to meet either of the two alternatives. For does he act *before* or *after* creation? If you say "before,"—we reply that as pain cannot arise in the absence of bodies, &c., there will be no need as long as there is no creation for his desire to free living beings from pain (which is the main characteristic of compassion); and if you adopt the second alternative, you will be reasoning in a circle, as on the one hand you will hold that God created the world through compassion, (as this is his motive in acting at all); and on the other hand* that he compassionated after he had created.

* In other words—on the one hand the existing misery of beings induced God to create a world in order to relieve their misery, and on the other hand it was the existence of a created world which caused their misery at all.

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति ॥

यस्तु परमेश्वरः करुणया प्रवर्तक इति परमेश्वरास्तित्ववादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः स किं सृष्टेः प्राक् प्रवर्तते सृष्ट्युत्तरकालं वा आद्ये शरीराद्यभावेन दुःखानुत्पत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः द्वितीये परस्पराश्रयप्रसङ्गः करुणया सृष्टिः सृष्ट्या च कारुण्यमिति । तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तः प्रधानपुरुषसंयोगनिमित्तः । यथा निर्व्यापारस्याप्ययस्कान्तस्य सन्निधानेन लोहस्य व्यापारः तथा निर्व्यापा-

Therefore we hold that the development of unintelligent nature (even without any intelligent superintendent)—in the order of the series intellect, self-consciousness, &c.—is caused by the union of nature and soul, and the moving impulse is the good of soul. Just as there takes place a movement in the iron in the proximity of the unmoved magnet, so there takes place a movement in nature in the proximity of the unmoved soul; and this union of nature and soul is caused by mutual dependence like the union of the lame man and the blind man. Nature, as the thing to be experienced, depends on soul the experiencer, and soul looks to final bliss, as it seeks to throw off the three kinds of pain, which, though really apart from it, have fallen upon it by its coming under the shadow of intellect through not recognising its own distinction therefrom.* This final bliss [or absolute isolation], is produced by the discrimination of nature and soul, nor is it possible without it; therefore soul depends on nature for its final bliss. Just as a lame man and a blind man† travelling along with a caravan, by some accident having become separated from their companions, wandered slowly about in great dismay, till by

* Bondage, &c., reside in the intellect and are only *reflected* upon soul through its proximity, Cf. *Sánkhya pravachbháshya*, 1. 58.

† This apologue is a widely spread piece of folk-lore. It is found in the Babylonian Talmud, *Sanhedrim*, fol. 91, *b*, and in the Gesta Romanorum.

रस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत्परस्परापेक्षानिबन्धनः । प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छायापत्त्या तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते । तत्प्रकृतिपुरुषविवेकनिबन्धनं न च तदन्तरेण युक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते । यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ दैवकृतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैववशात् संयोगमुपगच्छेतां तत्र चान्धेन पङ्गुः स्कन्धमारोपितः ततः पङ्गुदर्शितेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति पङ्गुरपि स्कन्धाधिरूढः तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सर्गः ।

यथोक्तम्,

good luck they met each other, and then the lame man mounted on the blind man's back; and the blind man, following the path indicated by the lame man, reached his desired goal, as did the lame man also, mounted on the other's shoulders; so too creation is effected by the similar mutual dependence of nature and the soul. This has been said in the Káriká (§. 21):

"For the soul's contemplation of nature and for its final separation, the union of both takes place, as of the lame man and the blind man; By that union a creation is formed."

"Well, I grant that nature's activity may take place for the good of the soul, but how do you account for its ceasing to act?" I reply, that as a wilful woman whose faults have once been seen by her husband does not return to him, or as an actress, having performed her part, retires from the stage, so too does nature desist. Thus it is said in the Káriká (§. 59).

> "As an actress, having exhibited herself to the spectators, desists, from the dance, so does nature desist, having manifested herself to soul."

For this end has the doctrine of those who follow Kapila, the founder of the atheistic Sánkhya School, been propounded.

E. B. C.

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि सम्बन्धस्तत्कृतः सर्गे इति ॥

ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यत इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्वैरिणी भर्तारं पुनर्नोपैति यथा वा कृतप्रयोजना नर्त्तकी निवर्त्तते तथा प्रकृतिरपि । यथोक्तम् ।

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिरिति ॥

एतदर्थं निरीश्वरसांख्यशास्त्रप्रवर्त्तककपिलानुसारिणां मतमुपन्यस्तम् ।

इति सर्व्वदर्शनसंग्रहे सांख्यदर्शनम् ।

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12. MAY 1st, 1878. Vol. II.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1878.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अर्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

॥ काशिकायाः ॥

। अष्टमाध्यायस्य तृतीयः पादः ।

द्विस्त्रिश्चतुरिति कृत्वोर्थे ॥ ४३ ॥

ष इति संबध्यते । द्विस् त्रिस् चतुर् इत्येतेषां कृत्वोर्थे वर्त्तमानानां विसर्जनीयस्य षकार आदेशो भवति अन्यतरस्यां कुप्वोः परतः । द्विःकरोति । द्विष्करोति । त्रिःकरोति । त्रिष्करोति । चतुष्करोति । चतुःकरोति । द्विःपचति । द्विष्पचति । त्रिःपचति । त्रिष्पचति । चतुःपचति । चतुष्पचति । कृत्वोर्थ इति किम् । चतुष्कपालम् । चतुष्कण्टकम् । पूर्वेण नित्यं षत्वं भवति । इदुदुपधस्येत्यस्यानुवृत्तौ सत्यां कृत्वोर्थविषयेण च पदेन विसर्जनीये विशेष्यमाणे द्विस्त्रिश्चतुरिति शक्यमकर्त्तुम् ।

कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा ।
षत्वं विभाषया भूदनु सिद्धं तत्र पूर्वेण ॥
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोर्थे ।
लुप्ते कृत्वोर्थीये रेफस्य विसर्जनीयो हि ॥
एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम् ।
अन्यो हि नेदुदुपधः कृत्वोर्थः कश्चिदप्यस्ति ॥
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।
चतुरो न सिध्यति तथा रेफस्य विसर्जनीयो हि ॥
तस्मिंस्तु क्रियमाणे युक्तं चतुरो विशेषणं भवति ।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ।

एवं च क्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे चतुःशब्दस्य कृत्वोर्थे ऽपि वर्त्तमानस्य पूर्वेणैव नित्यं षत्वं स्यात् । पूर्वत्रासिद्धे नास्ति प्रतिषेधो ऽभावादुत्तरस्य ॥

Digitized by Google

इसुसोः सामर्थ्ये ॥ ४४ ॥

वा इति संबध्यते । इस् उस् इत्येतयोर्विसर्जनीयस्यान्यतरस्यां षकारादेशो भवति । सामर्थ्ये कुप्वोः परतः । सर्पिष्करोति । सर्पिः करोति । यजुः करोति । यजुष्करोति । सामर्थ्य इति किम् । तिष्ठतु सर्पिः पिब त्वमुदकम् । सामर्थ्यमिह व्यपेक्षा । न पुनरेकार्थीभावः उभयं वा ॥

नित्यं समासेऽनुत्तरपदस्थस्य ॥ ४५ ॥

इसुसोरिति वर्त्तते । समासविषये इसुसोर्विसर्जनीयस्यानुत्तरपदस्थस्य नित्यं षत्वं भवति कुप्वोः परतः । सर्पिष्कुण्डिका । धनुष्कपालम् । सर्पिष्पानम् । धनुष्फलम् । अनुत्तरपदस्थस्येति किम् । परमसर्पिःकुण्डिका । परमधनुःकपालम् । पूर्वसूत्रेण विकल्पोऽप्यत्र न भवति । एतदेवानुत्तरपदस्थस्येति वचनं ज्ञापकमिसुसोः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरित्ययं नियमो न भवति । तेन वाक्येऽपि । परमसर्पिष्करोति । परमसर्पिः करोति । इसुसोः सामर्थ्य इत्येतद्भवति । व्यपेक्षा च तत्र सामर्थ्यमाश्रितमिति समासे न भवति ॥

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ ४६ ॥

अकारादुत्तरस्य अनव्ययविसर्जनीयस्य समासेऽनुत्तरपदस्थस्य नित्यं सकारादेशो भवति कृ कमि कंस कुम्भ पात्र कुशा कर्णी इत्येतेषु परतः । कृ । अयस्कारः । पयस्कारः । कमि । अयस्कामः । पयस्कामः । कंस । अयस्कंसः । पयस्कंसः । कुम्भ । अयस्कुम्भः । पयस्कुम्भः । अयस्कुम्भी पयस्कुम्भीत्यत्रापि भवति प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति । पात्र । अयस्पात्रम् । पयस्पात्रम् । अयस्पात्री । पयस्पात्री । कुशा । अयस्कुशा । पयस्कुशा । कर्णी । अयस्कर्णी । पयस्कर्णी । शुनस्कर्ण इत्ययं तु कस्कादिषु द्रष्टव्यः । अत इति किम् । गीः कारः । धूःकारः । तपरकरणं किम् । भाःकरणम् । भास्कर इत्ययं तु कस्कादिषु द्रष्टव्यः । अनव्ययस्येति किम् । स्वःकारः । पुनःकारः । समास इत्येव । यशः करोति । पयः करोति । यशः कामयते । अनुत्तरपदस्थस्येत्येव । परमपयःकारः । परमपयःकामः ॥

Digitized by Google

अधःशिरसी पदे ॥ ४७ ॥

अधस् शिरस् इत्येतयोर्विसर्जनीयस्य समासेऽनुत्तरपदस्थस्य सकारादेशो भवति पदशब्दे परतः । अधस्पदम् । शिरस्पदम् । अधस्पदी । शिरस्पदी । समास इत्येव । अधः पदम् । अनुत्तरपदस्थस्येत्येव । परमशिरःपदम् । अधस्पदमिति मयूरव्यंसकादित्वात्समासः ॥

कस्कादिषु च ॥ ४८ ॥

कस्क इत्येवमादिषु च विसर्जनीयस्य सकारः षकारो वा यथायोगमादेशो भवति कुप्वोः परतः । कस्कः । कौतस्कुतः । कुत आगत इत्यण् । भ्रातुष्पुत्रः । शुनस्कर्णः । सद्यस्कालः । सद्यस्क्रीः । क्रीणातेरयं संपदादित्वात्क्विप्प्रत्ययः । तत्र भवः क्रतुः । साद्यस्क्रः । कांस्कान् । कानाम्रेडित इति रुत्वमत्र । सर्पिष्कुण्डिका । धनुष्कपालम् । बर्हिष्पूलम् । यजुष्पात्रमित्येषां पाठ उत्तरपदस्थस्यापि षत्वं यथा स्यादिति । परमसर्पिः फलमित्येवमादिप्रत्युदाहरणादिति पारायणिका आहुः । भाष्ये वृत्तौ च नित्यं समासेऽनुत्तरपदस्थेत्यत्र परमसर्पिःकुण्डिकेत्येतदेव प्रत्युदाहरणम् । अयस्काण्डः । मेदस्पिण्डः । अविहितलक्षण उपचारः कस्कादिषु द्रष्टव्यः ॥

छन्दसि वाऽप्राम्रेडितयोः ॥ ४९ ॥

छन्दसि विषये विसर्जनीयस्य वा सकारादेशो भवति कुप्वोः परतः प्रशब्दं आम्रेडितं वर्जयित्वा । अयःपात्रम् । अयस्पात्रम् । विवस्वतः पात्रम् । विवस्वतस्पात्रम् । उरुणःकारः । उरुणस्कारः । अप्राम्रेडितयोरिति किम् । अग्निः प्र विद्वान् । परुषः परुषः परि ॥ सूर्यरश्मिर्हरिकेशः पुरस्तात् । स नः पावक इत्येवमादिषु सर्वे विधयश्छन्दसि विकल्प्यन्त इति सत्वं न भवति ॥

कःकरत्करतिकृधिकृतेष्वनदितेः ॥ ५० ॥

कः करत् करति कृधि कृत इत्येतेषु परतः अनदितेर्विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये । कः । विश्वतस्कः । करत् । विश्व-

Digitized by Google

तस्करत् । करति । वयस्करति । कृधि । उरुणस्कृधि । कृत । सदस्कृतम् । अनदितेरिति किम् । यथा नो अदितिः करत् ॥

पञ्चम्याः परावध्यर्थे ॥ ५१ ॥

छन्दसीत्येव । पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतः अध्यर्थे । दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवतस्परि । दिवस्परि । महस्परि । पञ्चम्या इति किम् । अहिरिव भोगैः पर्येति बाहुम् । पराविति किम् । एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत् । अध्यर्थ इति किम् । दिवः पृथिव्याः पर्योज उद्भृतम् । अत्र परिः सर्वतोभावे अध्यर्थः उपरिभावः ॥

पातौ च बहुलम् ॥ ५२ ॥

पातौ च धातौ परतः पञ्चमीविसर्जनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये । दिवस्पातु । राज्ञस्पातु । न च भवति । परिषदः पातु ॥

॥ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५३ ॥

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति पुत्र पृष्ठ पार पद पयस् पोष इत्येतेषु परतः छन्दसि विषये । वाचस्पतिं विश्वकर्माणमूतये । पुत्र । दिवस्पुत्राय सूर्याय । पृष्ठ । दिवस्पृष्ठे धावमानम् सुवर्णम् । पार । अगन्म तमसस्पारम् । पद । इडस्पदे समिध्यसे । पयस् । सूर्ये चक्षुर्दिवस्पयः । पोष । रायस्पोषं यजमानेषु धत्तम् । षष्ठ्या इति किम् । मनुः पुत्रेभ्यो दायं व्यभजत् ॥

इडाया वा ॥ ५४ ॥

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतश्छन्दसि विषये । इडायास्पतिः । इडायाः पतिः । इडायास्पुत्रः । इडायाः पुत्रः । इडायास्पृष्ठम् । इडायाः पृष्ठम् । इडायास्पारम् । इडायाः पारम् । इडायास्पदम् । इडायाः पदम् । इडायास्पयः । इडायाः पयः । इडायाः पोषम् । इडायास्पोषम् ॥

Digitized by Google

अपदान्तस्य मूर्द्धन्यः ॥ ५५ ॥

पदाधिकारो निवृत्तः । अपदान्तस्येति मूर्द्धन्य इति चैतदधिकृतं वेदितव्यम् । आपादपरिसमाप्तेः । वक्ष्यति । आदेशप्रत्यययोः । सिषेव । सुष्वाप । अग्निषु । वायुषु । अपदान्तस्येति किम् । अग्निस्तत्र । वायुस्तत्र । ष इत्येवं सिद्धे मूर्द्धन्यग्रहणं ढकारार्थम् । अकृढ्वम् । चकृढ्वे ॥

सहेः साडः सः ॥ ५६ ॥

सहेर्द्धातोः साड्रूपस्य यः सकारस्तस्य मूर्द्धन्य आदेशो भवति । जलाषाट् । तुराषाट् । पृतनाषाट् । सहेरिति किम् । सह डेन वर्त्तते सडः तस्यापत्यं साडिः । साड्ग्रहणं किम् । यत्रास्यैतद्रूपं तत्र यथा स्यात् । इह मा भूत् । जलासाहम् । तुरासाहम् । स इति किम् । आकारस्य मा भूत् ॥

इण्कोः ॥ ५७ ॥

इण्कोरित्येतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः इणः कवर्गाच्चेत्येवं तद्वेदितव्यम् । वक्ष्यति । आदेशप्रत्यययोः । सिषेव । सुष्वाप । अग्निषु । वायुषु । कर्तृषु । हर्तृषु । गीर्षु । धूर्षु । वाक्षु । त्वक्षु । इण्कोरिति किम् । दास्यति । असौ ॥

नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ५८ ॥

नुम्व्यवायेऽपि विसर्जनीयव्यवायेऽपि शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति । व्यवायशब्दः प्रत्येकमभिसंबध्यते । नुम्व्यवाये तावत् । सर्पींषि । यजूंषि । हवींषि । विसर्जनीयव्यवाये । सर्पिःषु । यजुःषु । हविःषु । शर्व्यवाये । सर्पिष्षु । यजुष्षु । हविष्षु । नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते न समस्तैः ॥ तेनेह न भवति । निंस्से । निंस्स्व इति । णिसि चुम्बन इत्येतस्यैतद्रूपम् । अत्र हि नुमा सकारेण च शरा व्यवधानम् ॥

आदेशप्रत्यययोः ॥ ५९ ॥

मूर्द्धन्य इति वर्त्तते स इति च । आदेशप्रत्यययोरिति षष्ठी भेदेन

संबध्यते । आदेशो यः सकारः प्रत्ययस्य च यः सकार इणकोरुत्तरस्तस्य मूर्द्धन्यो भवति आदेशः । आदेशस्य तावत् । सिषेव । सुष्वाप । प्रत्ययस्य । अग्निषु । वायुषु । कर्तृषु । हर्तृषु । इन्द्रो मा वक्षत् । स देवान्यक्षदिति व्यपदेशिवद्भावात्प्रत्ययस्येति षत्वं भवति । यजतेर्वहतेश्च पञ्चमलकारे परस्मैपदप्रथमैकवचनइकारलोपः लेटोऽडाटावित्यट् सिब्बहुलं लेटीति सिप्, ततः सिद्धं यक्षत्, वक्षत्, इति ॥

॥ शासिवसिघसीनां च ॥ ६० ॥

शासि वसि घसि इत्येतेषां च इणकोरुत्तरस्य सकारस्य मूर्द्धन्यो भवति । अन्वशिषत् । अन्वशिषताम् । अन्वशिषन् । शिष्टः । शिष्टवान् । वसि । उषितः । उषितवान् । उषित्वा । घसि । जक्षतुः । जक्षुः । घसिभसोरित्युपधालोपः । अक्षन्नमीमदन्त पितरः । अनादेशार्थं वचनम् । घसिर्यद्यप्यादेशः सकारस्त्वादेशो न भवति । इणकोरित्येव । शास्ति । वसति । जघास ॥

स्तौतिण्योरेव षण्यभ्यासात् ॥ ६१ ॥

स्तौतेर्ण्यन्तानां च षणभूते सनि परतः अभ्यासादिण उत्तरस्य आदेशसकारस्य मूर्द्धन्यादेशो भवति । तुष्टूषति । ण्यन्तानाम् । सिषेवयिषति । सिषञ्जयिषति । सुष्वापयिषति । सिद्धे सत्यारम्भो नियमार्थः स्तौतिण्योरेव षण्यभ्यासाद्यथा स्यादन्यस्य मा भूत् । सिसिक्षति । सुसूषति । एवकारकरणमिष्टतोऽवधारणार्थम् । स्तौतिण्योः षण्येवेति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात् । इह च स्यादेव । सिसिक्षतीति । षणीति किम् । अन्यत्र नियमो मा भूत् । सिषेव । को विनतेनुरोधः । अविनते नियमो मा भूत् । सुषुप्सति । तिष्ठासति । कः सानुबन्धेऽनुरोधः । षशब्दमात्रे नियमो मा भूत् । सुषुपिषदिन्द्रम् । * अभ्यासादिति किम् । अभ्यासस्य या प्राप्तिस्तस्या नियमो यथा स्याद्धातोर्या प्राप्तिस्तस्या नियमो मा भूत् † । प्रतीषिषति । अधीषिषति ॥

* स्वपेर्लिटि थासः सहति रूपमित्यधिकं पुस्तकान्तरे ।

† धातोरित्यत्र द्वितीयेति पाठान्तरम् ।

सः स्विदिस्वदिसहीनां च ॥ ६२ ॥

स्विदि स्वदि सहि इत्येतेषां ण्यन्तानां सनि षभूते परतो ऽभ्यासादुत्तरस्य सकारस्य षकारादेशो भवति । स्विदि । सिष्वेदयिषति । स्वदि । सिष्वादयिषति । सहि । सिषाहयिषति । सकारस्य सकारवचनं मूर्द्धन्यनिवृत्त्यर्थम् ॥

प्राक्सितादड्व्यवाये ऽपि ॥ ६३ ॥

सेवसितेति वक्ष्यति प्राक्सितसंशब्दनात्प्रदित ऊर्ध्वमनुक्रमिष्यामस्तत्राड्व्यवायेपि मूर्द्धन्यो भवतीत्येवं तद्वेदितव्यमपिशब्दादनड्व्यवायेपि । वक्ष्यति । उपसर्गात्सुनोतिसुवतीति षत्वम् । अभिषुणोति । परिषुणोति । विषुणोति । निषुणोति । अभ्यषुणोत् । पर्यषुणोत् । व्यषुणोत् । न्यषुणोत् ॥

स्थादिष्वभ्यासेन चाभ्यासस्य ॥ ६४ ॥

प्राक् सितादिति वर्त्तते उपसर्गात्सुनोतीत्यत्र स्थासेनयसेधेति स्थादयस्तेषु स्थादिषु प्राक् सितसंशब्दनात् अभ्यासेन व्यवाये मूर्द्धन्यो भवत्यभ्याससकारस्य च भवतीत्येवं वेदितव्यम् । अभ्यासेन व्यवाये परितष्ठौ । षोपदेशार्थं च । अभिषिषेणयिषति । परिषिषेणयिषति । अवर्णान्ताभ्यासार्थं च । अभितष्ठौ । षणि प्रतिषेधार्थं च । अभिषिषिक्षति । परिषिषिक्षति । अभ्यासस्येति वचनं नियमार्थं स्थादिष्वेवाभ्याससकारस्य मूर्द्धन्यो भवति नान्यत्र । अभिसुसूषति । अभिसिषासति ॥

॥ उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥ ६५ ॥

मूर्द्धन्य इति वर्त्तते स इति च । उपसर्गस्थान्निमित्तादुत्तरस्य सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्ज इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति । सुनोति । अभिषुणोति । परिषुणोति । अभ्यषुणोत् । पर्यषुणोत् । सुवति । अभिषुवति । परिषुवति । अभ्यषुवत् । पर्यषुवत् । स्यति । अभिष्यति । परिष्यति । अभ्यष्यत् ।

पर्य्यष्यत् । स्तौति । अभिष्टौति । परिष्टौति । अभ्यष्टौत् । स्तोभति । अभिष्टोभते । परिष्टोभते । अभ्यष्टोभत । पर्य्यष्टोभत । स्था । अभिष्ठास्यति । परिष्ठास्यति । अभ्यष्ठात् । पर्य्यष्ठात् । अभितष्ठौ । परितष्ठौ । सेनय । अभिषेणयति । परिषेणयति । अभ्यषेणयत् । पर्य्यषेणयत् । अभिषिषेणयिषति । परिषिषेणयिषति । सेध । अभिषेधति । परिषेधति । अभ्यषेधत् । पर्य्यषेधत् । सिच । अभिषिञ्चति । परिषिञ्चति । अभ्यषिञ्चत् । पर्य्यषिञ्चत् । अभिषिषिक्षति । परिषिषिक्षति । सञ्ज । अभिषजति । परिषजति । अभ्यषजत् । पर्य्यषजत् । अभिषिषङ्क्षति । परिषिषङ्क्षति । स्वञ्ज । अभिष्वजते । परिष्वजते । अभ्यष्वजत । पर्य्यष्वजत । अभिषिष्वङ्क्षते । परिषिष्वङ्क्षते । सेधइति शब्विकरणनिर्द्देशः सिध्यतिनिवृत्त्यर्थः । उपसर्गादिति किम् । दधि सिञ्चति । मधु सिञ्चति । निर्गताः सेचका अस्माद्देशान्निःसेचको देश इति । नायं सिचेरुपसर्गः अभिसावकीयतीत्यत्रापि न सुनोतिं प्रति क्रियायोगः किं तर्हि सावकीयं प्रति । अभिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगो न सावयतिमिति षत्वं भवति ॥

सदिरप्रतेः ॥ ६६ ॥

सदेः सकारस्य उपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य मूर्द्धन्य आदेशो भवति । निषीदति । विषीदति । न्यषीदत् । व्यषीदत् । निषसाद । विषसाद । अप्रतेरिति किम् । प्रतिसीदति ॥

स्तन्भेः ॥ ६७ ॥

उपसर्गादिति वर्त्तते । स्तन्भेः सकारस्य उपसर्गस्थान्निमित्तादुत्तरस्य मूर्द्धन्य आदेशो भवति । अभिष्टभ्नाति । परिष्टभ्नाति । अभ्यष्टभ्नात् । पर्य्यष्टभ्नात् । अभितष्टम्भ । परितष्टम्भ । अप्रतेरित्येतदिह नानुवर्त्तते तेनेतदपि भवति । प्रतिष्टभ्नाति । प्रत्यष्टभ्नात् । प्रत्यतिष्टम्भ ॥

अवाच्चालम्बनाविदूर्य्ययोः ॥ ६८ ॥

अवशब्दादुपसर्गादुत्तरस्य स्तन्भेः सकारस्य मूर्द्धन्यादेशो भवति ।

आलम्बनेऽर्थे आविदूर्ये च । आलम्बनमाश्रयणम् । अविदूरस्य भाव आविदूर्यम् । आलम्बने तावत् । अवष्टभ्यास्ते । अवष्टभ्य तिष्ठति । आविदूर्ये । अवष्टब्धा सेना । अवष्टब्धा शरत् । आलम्बनाविदूर्ययोरिति किम् । अवस्तब्धो वृषलः शीतेन । अनिपात्यर्थ आरम्भः ॥

वेश्च स्वनो भोजने ॥ ६९ ॥

वेरुपसर्गादवाच्चोत्तरस्य भोजनार्थे स्वनतेः सकारस्य मूर्द्धन्यादेशो भवति । विष्वणति । व्यष्वणत् । विषष्वाण । अवष्वणति । अवाष्वणत् । अवषष्वाण । अभ्यवहारक्रियाविशेषोऽभिधीयते । यत्र स्वननमस्ति । भोजनइति किम् । विस्वनति मृदङ्गः * ॥

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥ ७० ॥

परि नि वि इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव सित सय सिवु सह सुट् स्तु स्वञ्ज इत्येतेषां सकारस्य मूर्द्धन्य आदेशो भवति । परिषेवते । निषेवते । विषेवते । पर्यषेवत । व्यषेवत । न्यषेवत । परिषिषेविषते । विषिषेविषते । निषिषेविषते । सित । परिषितो, विषितो, निषितः । सय । परिषयो, निषयो, विषयः । सिव् । परिषीव्यति । निषीव्यति । विषीव्यति । पर्यषीव्यत् । न्यषीव्यत् । व्यषीव्यत् । पर्यसीव्यत् । न्यसीव्यत् । व्यसीव्यत् । सह । परिषहते । निषहते । विषहते । पर्यषहत । न्यषहत । व्यषहत । पर्यसहत । न्यसहत । व्यसहत । सुट् । परिष्करोति । पर्यष्करोत् । स्तु । परिष्टौति । निष्टौति । विष्टौति । पर्यष्टौत् । न्यष्टौत् । व्यष्टौत् । पर्यस्तौत् । न्यस्तौत् । व्यस्तौत् । ष्वञ्ज । दंशसञ्जस्वञ्जामिति नलोपः । परिष्वजते । विष्वजते । निष्वजते । पर्यष्वजत । पर्यस्वजत । पूर्वेणैव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम् । अड्व्यवाये । विभाषा यथा स्यात् ॥

सिवादीनां वाड्व्यवायेऽपि ॥ ७१ ॥

अनन्तरसूत्रे सिवुसहसुट्स्तुस्वञ्जामिति सिवादयः । सिवादी-

* अवस्वनति वीणेत्यधिकं पुस्तकान्तरे ।

नामड्व्यवायेऽपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्द्धन्यो भवति । तथा चैवोदाहृतम् * ॥

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ७२ ॥

अनु वि परि अभि नि इत्येतेभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य वा मूर्द्धन्यादेशो भवति । अनुष्यन्दते । विष्यन्दते । परिष्यन्दते । अभिष्यन्दते तैलम् । निष्यन्दते । अनुस्यन्दते । विस्यन्दते । परिस्यन्दते । अभिस्यन्दते । निस्यन्दते । अप्राणिष्विति किम् । अनुस्यन्दते मत्स्य उदके । प्राण्यप्राणिविषयस्यापि स्यन्दतेरयं विकल्पो भवति । अनुष्यन्देते मत्स्योदके । अनुस्यन्देते । अप्राणिष्विति पर्युदासोऽयं न प्रसज्य प्रतिषेधः ॥

वेः स्कन्देरनिष्ठायाम् ॥ ७३ ॥

वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्द्धन्यो वा भवति अनिष्ठायाम् । विष्कन्ता । विस्कन्ता । विष्कन्तुम् । विस्कन्तुम् । विष्कन्तव्यम् । विस्कन्तव्यम् । अनिष्ठायामिति किम् । विस्कन्नः ॥

परेश्च ॥ ७४ ॥

परिशब्दाच्चोत्तरस्य स्कन्देः सकारस्य वा मूर्द्धन्यो भवति । परिष्कन्ता । परिष्कन्तुम् । परिष्कन्तव्यम् । परिस्कन्ता । परिस्कन्तुम् । परिस्कन्तव्यम् । पृथग्योगकरणसामर्थ्यादनिष्ठायामित्येतन्नानुवर्त्तते । परिष्कण्णः । परिस्कन्नः ॥

परिस्कन्दः प्राच्यभरतेषु ॥ ७५ ॥

परिस्कन्द इति मूर्द्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु । पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते । परिस्कन्दः । अन्यत्र परिष्कन्दः । अचि निपातनम् । अथ वा निष्ठातकारस्य लोपः भरतग्रहणं प्राच्यविशेषणम् ॥

---

* क्वचित्पुस्तके पूर्वसूत्रोदाहृतान्यदर्घटितानि कथापयन्त्रैवोदाहृतानि ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥ ७६ ॥

स्फुरतिस्फुलत्योः सकारस्य निस् नि वि इत्येतेभ्य उत्तरस्य वा मूर्द्धन्यादेशो भवति । स्फुरति । निष्ष्फुरति । निःस्स्फुरति । निस्फुरति । निष्फुरति । विस्फुरति । विष्फुरति । स्फुलति । निष्ष्फुलति । निःस्फुलति । निस्फुलति । निष्फुलति । विस्फुलति । विष्फुलति ॥

वेः स्कभ्नातेर्नित्यम् ॥ ७७ ॥

वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्द्धन्यादेशो भवति । विष्कभ्नाति । विष्कम्भिता । विष्कम्भितुम् । विष्कम्भितव्यम् ॥

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥ ७८ ॥

मूर्द्धन्य इति वर्त्तते । इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्द्धन्यादेशो भवति । च्योषीढ्वम् । प्लोषीढ्वम् । लुङ् । अच्योढ्वम् । अप्लोढ्वम् । लिट् । चकृढ्वे । इणकोरिति वर्त्तमाने पुनरिणग्रहणं कवर्गनिवृत्त्यर्थम् । पक्षीध्वं । यक्षीध्वं । षीध्वंलुङ्लिटामिति किम् । स्तुध्वे । अस्तुध्वम् । अङ्गादिति किम् । परिवेविषीध्वम् । अर्थवद्ग्रहणादपि सिद्धं तत्तु नाश्रितम् ॥

विभाषेटः ॥ ७९ ॥

इणः परस्मादिट उत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्द्धन्यादेशो भवति विभाषा । लविषीढ्वम् । लविषीध्वम् । पविषीढ्वम् । पविषीध्वम् । लुङ् । अलविढ्वम् । अलविध्वम् । लिट् । लुलुविध्वे । लुलुविढ्वे । इण इत्येव । आसिषीध्वम् । अथेह कथं भवितव्यम् उपदिदीयिढ्वे । के चिदाहुः । इणन्ताद्ङ्गादुत्तरस्य इट आनन्तर्यं युटा व्यवहितमिति न भवितव्यं ढत्वेनेति । अपरेषां दर्शनमङ्गादिति निवृत्तमिण इत्यनुवर्त्तते ततश्च यकारादेव इणः परोऽनन्तर इडिति पक्षे भवितव्यं मूर्द्धन्येनेति ॥

समासेऽङ्गुलेः सङ्गः ॥ ८० ॥

अङ्गुलेः सकारस्याङ्गुलेरुत्तरस्य मूर्द्धन्य आदेशो भवति समासे । अङ्गुलेः

सङ्गः अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । अङ्गुलिषङ्गो गाः सादयति । समासइति किम् । अङ्गुले सङ्गं पश्य ॥

भीरोः स्थानम् ॥ ८१ ॥

स्थानसकारस्य भीरोरुत्तरस्य मूर्द्धन्यादेशो भवति । भीरुष्ठानम् । समासइत्येव । भीरो स्थानं पश्य ॥

अग्नेः स्तुत्स्तोमसोमाः ॥ ८२ ॥

अग्नेरुत्तरस्य स्तुत् स्तोम सोम इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ ॥ अग्नेर्दीर्घात्सोमस्येष्यते ॥ तेनेह न भवति । अग्निसोमौ माणवकौ । तथा च ज्योतिरग्निः सोमो लताविशेषः । अग्निसोमौ तिष्ठतः । समासइत्येव । अग्ने सोमः ॥

ज्योतिरायुषः स्तोमः ॥ ८३ ॥

ज्योतिस् आयुस् इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्द्धन्यादेशो भवति समासे । ज्योतिष्टोमः । आयुष्टोमः । समासइत्येव । ज्योतिः स्तोमं दर्शयति ॥

मातृपितृभ्यां स्वसा ॥ ८४ ॥

मातृ पितृ इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्द्धन्यादेशो भवति । मातृष्वसा । पितृष्वसा ॥

मातुःपितुर्भ्यामन्यतरस्याम् ॥ ८५ ॥

मातुर् पितुर् इत्येताभ्यामुत्तरस्य स्वसृशब्दस्यान्यतरस्यां मूर्द्धन्यादेशो भवति समासे । मातुः ष्वसा । मातुःस्वसा । पितुःस्वसा । पितुः ष्वसा । मातुःपितुरिति रेफान्तयोरेतद्ग्रहणम् । एकदेशविकृतस्यानन्यत्वाद्विसर्जनीयान्तात्सकारान्ताच्च षत्वं भवति । समासइत्येव । वाक्ये मा भूत् । मातुःस्वसेत्येव नित्यं भवति ॥

अभिनिसस्तनः शब्दसंज्ञायाम् ॥ ८६ ॥

अभि निस् इत्येतस्मादुत्तरस्य स्तनतिसकारस्य मूर्द्धन्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम् । अभिनिष्टानो वर्णः । अभिनिष्टानो विसर्जनीयः । अभिनिस्तानो वर्णः । अभिनिस्तानो विसर्जनीयः * । शब्दसंज्ञायामिति किम् । अभिनिस्तनति मृदङ्गः † । समास इत्यतः प्रभृति निवृत्तम् ॥

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८७ ॥

उपसर्गस्थान्निमित्तात्प्रादुस्शब्दाच्चोत्तरस्य यकारपरस्याच्परस्य चास्तिसकारस्य मूर्द्धन्यो भवति । अभिषन्ति । निषन्ति । विषन्ति । प्रादुःषन्ति । अभिष्यात् । निष्यात् । विष्यात् । प्रादुःष्यात् । उपसर्गादिति किम् । दधि स्यात् । मधु स्यात् । अस्तीति किम् । अनुसृतम् । विसृतम् । अथासत्यपि अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते । प्रादुः शब्दस्य च कृभ्वस्तिष्वेव प्रयोग इत्यन्यत्राप्रसङ्गः । तथाप्येतत्प्रत्युदाहर्त्तव्यम् । अनुसूते अनुसूः । अनुस्वोऽपत्यं आनुसेयः शुभ्रादित्वात् ढक् । ढे लोपे कद्र्वा इत्युवर्णलोपः । यच्पर इति किम् । निस्तः । विस्ता । प्रादुस्तः ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥ ८८ ॥

सु वि निर् दुर् इत्येतेभ्य उत्तरस्य सुपि सूति सम इत्येतेषां सकारस्य मूर्द्धन्यादेशो भवति । सुपीति स्वपिः कृतसंप्रसारणो गृह्यते । सुषुप्तः । निःषुप्तः । दुःषुप्तः । सूतिरिति स्वरूपग्रहणम् । सुषूतिः । विषूतिः । निःषूतिः । दुःषूतिः । सम । सुषमम् । विषमम् । निःषमम् । दुःषमम् ।

स्वपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥
स्यादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थको विसुषुपुः सुपिभूतो द्विरुच्यते ॥

पूर्वत्रासिद्धीयमद्विर्वचने इति कृते षत्वे ततो द्विर्वचनम् ॥

* विसर्जनीयस्यैषा संज्ञेत्यधिकं पुस्तकान्तरे ।

† क्वचिदिदं नास्ति ।

निनदीभ्यां स्नातेः कौशले ॥ ८९ ॥

नि नदी इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्द्धन्यादेशो भवति कौशले गम्यमाने । निष्णातः कटकरणे । निष्णातो रज्जुवर्त्तने । नद्यां स्नातीति नदीष्णः । सुपि स्थ इत्यत्र सुपीति योगविभागात्कप्रत्ययः । कौशलइति किम् । निस्नातः । नद्यां स्नातो नदीस्नातः इति ॥

सूत्रं प्रतिष्णातम् ॥ ९० ॥

प्रतिष्णातमिति निपात्यते । सूत्रं चेद्भवति । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । प्रतिस्नातमित्येवान्यत्र ॥

कपिष्ठलो गोत्रे ॥ ९१ ॥

कपिष्ठल इति निपात्यते गोत्रविषये । कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः । गोत्रइति किम् । कपेः स्थलं कपिस्थलम् ॥

प्रष्ठो ऽग्रगामिनि ॥ ९२ ॥

प्रष्ठ इति निपात्यते ऽग्रगामिन्यभिधेये । प्रतिष्ठतइति प्रष्ठो ऽश्वः । अग्रतो गच्छतीत्यर्थः । अग्रगामिनीति किम् । प्रस्थे हिमवतः पुण्ये । प्रस्थो व्रीहीणाम् ॥

वृक्षासनयोर्विष्टरः ॥ ९३ ॥

विष्टर इति निपात्यते वृक्षे आसने च वाच्ये । विपूर्वस्य स्तृणातेः षत्वं निपात्यते । विष्टरो वृक्षः । विष्टरमासनम् । वृक्षासनयोरिति किम् । श्रोलपिवाक्यस्य विस्तरः * ॥

छन्दोनाम्नि च ॥ ९४ ॥

विष्टर इति निपात्यते । विपूर्वात्स्तृ इत्येतस्माद्धातोः छन्दोनाम्नि चेत्येवं विहित इति विष्टर इत्यपि प्रकृते विष्टार इत्यत्र विज्ञायते । विष्टारपङ्क्तिः छन्दः । विष्टारो बृहतीछन्दः । छन्दोनाम्नीति किम् । पटस्य विस्तारः ॥

---

* एतदुत्तरं विस्तरं वाक्यमाहेत्यधिकं पुस्तकान्तरे ।

गवियुधिभ्यां स्थिरः ॥ ९५ ॥

गवियुधिभ्यामुत्तरस्य स्थिरसकारस्य मूर्द्धन्यादेशो भवति । गविष्ठिरः । युधिष्ठिरः । गोशब्दादहलन्तादपि एतस्मादेव निपातनात्सप्तम्या अलुग्भवति ॥

विकुशमिपरिभ्यः स्थलम् ॥ ९६ ॥

वि कु शमि परि इत्येतेभ्य उत्तरस्य स्थलसकारस्य मूर्द्धन्यादेशो भवति । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ॥

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥ ९७ ॥

अम्ब आम्ब गो भूमि सव्य अप द्वि त्रि कु शेकु शङ्कु अङ्गु मञ्जि पुञ्जि परमे बर्हिस् दिवि अग्नि इत्येतेभ्य उत्तरस्य स्थशब्दसकारस्य मूर्द्धन्यादेशो भवति । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्येष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः ॥ स्थास्थिन्स्थॄणामिति वक्तव्यम् ॥ * ॥ सव्येष्ठाः । परमेष्ठी । सव्येष्ठा सारथिः ॥

सुषामादिषु च ॥ ९८ ॥

सुषामादिषु शब्देषु सकारस्य मूर्द्धन्यादेशो भवति । शोभनं साम यस्यासौ सुषामा ब्राह्मणः । निष्षामः । दुष्षेधः । सुशब्दस्य कर्म्मप्रवचनीयसंज्ञकत्वान्निर्दुर्शब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोयम् । सेधतेर्गताविति वा प्रतिषेधबाधनार्थः । सुषन्धिः । दुःषन्धिः । निष्षन्धिः । सुष्टु । दुष्टु । तिष्ठतेरुणादिष्वेतौ व्युत्पाद्येते । गौरिषक्थः संज्ञायाम् । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति पूर्वपदस्य ह्रस्वत्वम् । प्रतिष्णिका । प्रतिष्णाशब्दादयं कन्प्रत्ययः । जलाषाहम् । नौषेचनम् । दुन्दुभिषेवनम् ॥

एति संज्ञायामगात् ॥ ९९ ॥

एकारपरस्य सकारस्य मूर्द्धन्यादेशो भवति इणकोरुत्तरस्यागकारान्तस्य संज्ञायां विषये। हरिषेणः। वारिषेणः। जानुषेणी। एतीति किम्। हरिसक्थम्। संज्ञायामिति किम्। पृथ्वी सेना यस्य स पृथुसेनो राजा। अगादिति किम्। विष्वक्सेनः। इण्कोरित्येव। सर्वसेनः॥

नक्षत्राद्वा॥ १००॥

नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा इति संज्ञायामगकारात् मूर्द्धन्यो भवति। रोहिणिषेणः। रोहिणिसेनः। भरणिषेणः। भरणिसेनः। अगकारादित्येव। शतभिषक्सेनः। अविहितलक्षणो मूर्द्धन्यः सुषामादिषु द्रष्टव्यः॥

ह्रस्वात्तादौ तद्धिते॥ १०१॥

ह्रस्वादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति तादौ तद्धिते परतः तर तम तय त्व तल् तस् त्यप् एतानि प्रयोजयन्ति। तर। सर्पिष्टरम्। यजुष्टरम्। तम। सर्पिष्टमम्। यजुष्टमम्। तय। चतुष्टये ब्राह्मणानां निकेताः। त्व। सर्पिष्ट्वम्। यजुष्ट्वम्। तल्। सर्पिष्टा। यजुष्टा। तस्। सर्पिष्टो यजुष्टः। त्यप्। आविष्ट्यो वर्त्तते। ह्रस्वादिति किम्। गीस्तरा। धूस्तरा। तादाविति किम्। सर्पिस्सात् भवति। प्रत्ययसकारस्य स्यात्पदाद्योरिति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात्। तद्धितइति किम्। सर्पिस्तरति॥ तिङन्तस्य प्रतिषेधो वक्तव्यः॥ * ॥ भिन्द्युस्तराम्। छिन्द्युस्तराम्॥

निसस्तपतावनासेवने॥ १०२॥

निसः सकारस्य मूर्द्धन्यादेशो भवति तपतौ परतोऽनासेवनेर्थे। आसेवनं पुनःपुनःकरणम्। निष्टपति सुवर्णम्। सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवनइति किम्। निस्तपति सुवर्णं सुवर्णकारः। पुनःपुनरग्निं स्पर्शयतीत्यर्थः। निष्टप्तं रक्षो निष्टप्ता अरातय इत्यत्र सकृदप्यासेवनं न विवक्ष्यते। छान्दसो वा वर्णविकारः॥

युष्मत्ततततुःष्वन्तःपादम् ॥ १०३ ॥

युष्मत् तत् ततक्षुस् इत्येतेषु तकारादिषु परतः सकारस्य मूर्द्धन्यादेशो भवति स चेत्सकारोऽन्तःपादं भवति । युष्मदादेशास्त्वं त्वां ते तव । अग्निष्ट्वं नामासीत् । त्वा । अग्निष्ट्वा वर्द्धयामसि । ते अग्निष्टे विश्वमानय । तव । अप्स्वग्ने सधिष्टव । तत् । अग्निष्टद्विश्वमापृणाति । ततक्षुस् । द्यावापृथिवी निष्टतक्षुः । अन्तःपादमिति किम् । नित्यमात्मनो विदाभूदग्निस्तत्पुनराह जातवेदो विचर्षणिः ॥

यजुष्येकेषाम् ॥ १०४ ॥

यजुषि विषये युष्मत्ततततक्षुषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्द्धन्यादेशो भवति। अर्चिर्भिष्ट्वम् । अर्चिर्भिस्त्वम् । अग्निष्टेयम् । अग्निस्तेयम् । अग्निष्टत्। अग्निस्तत्। अर्चिर्भिष्टतक्षुः। अर्चिर्भिस्ततक्षुः ॥

स्तुतस्तोमयोश्छन्दसि ॥ १०५ ॥

एकेषामिति वर्त्तते । स्तुत स्तोम इत्येतयोः सकारस्य छन्दसि विषये मूर्द्धन्यादेशो भवति एकेषामाचार्याणां मतेन । त्रिभिष्टुतस्य । त्रिभिस्तुतस्य । गोष्टोमं षोडशिनम् । गोस्तोमं षोडशिनम् । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् ॥

पूर्वपदात् ॥ १०६ ॥

छन्दसीति वर्त्तते एकेषामिति च। पूर्वपदस्थान्निमित्तादुत्तरस्य सकारस्य मूर्द्धन्यादेशो भवति छन्दसि विषये एकेषामाचार्याणां मतेन । द्विषन्धिः । त्रिषन्धिः । द्विसन्धिः । त्रिसन्धिः । मधुष्ठानम् । मधुस्थानम् । द्विषाहस्रं चिन्वीत । द्विसाहस्रं चिन्वीत। असमासेपि यत्पूर्वपदं तदपीह गृह्यते । त्रिःषमृद्धत्वाय । त्रिःसमृद्धत्वाय ॥

सुञः ॥ १०७ ॥

सुञिति निपात इह गृह्यते तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य मूर्द्धन्यादेशो भवति छन्दसि विषये । अभी षु णः सखीनाम् । ऊर्द्ध ऊषुणः

इकः सुञीति दीर्घः । नश्च धातुस्थोरुषुभ्य इति णत्वम् ॥ * ॥

सनोतेरनः ॥ १०८ ॥

सनोतेरनकारान्तस्य सकारस्य मूर्द्धन्यादेशो भवति । गोषाः । नृषाः । अन इति किम् । गोसनिं वाचमुदीरयन् । पूर्वपदादित्येव सिद्धे नियमार्थमिदम् । तच्च के चित्सवनादिपाठाद्गोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रत्युदाहरन्ति । सिसनिषतेरप्रत्ययः । सिसनीरित्यपरे ॥

सहेः पृतनर्त्ताभ्यां च ॥ १०९ ॥

पृतना ऋत इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्द्धन्यादेशो भवति । पृतनाषाहम् । ऋताषाहम् । के चिद्योगविभागं सहेरिति कुर्वन्ति । ऋतीषहमित्यत्रापि यथा स्यात् । ऋतिशब्दस्य पूर्वपदस्य संहितायामेतद्दीर्घत्वम् । अवग्रहे तु ऋतिसहमित्येव भवति । चकारोनुक्तसमुच्चयार्थः । तेन ऋतीषहमिति सिद्धम् ॥

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥ ११० ॥

रेफपरस्य सकारस्य सृपि सृजि स्पृशि स्पृहि सवनादीनां च मूर्द्धन्यो न भवति । रपर । विस्रंसिकायाः काण्डं जुहोति । विस्रब्धः कथयति । सृपि । पुरा क्रूरस्य विसृपः । सृजि । वाचो विसर्जनात् । स्पृशि । दिविस्पृशम् । स्पृहि । निस्पृहं कथयति । सवनादीनाम् । सवने २ । सूते २ । सामे २ । सवनमुखे २ । किं स्यतीति किंसः । अनुसवनम् २ । गोसनिम् । अश्वसनिम् । पूर्वपदादितिप्राप्तेः प्रतिषेधः । अश्वसनिग्रहणमनिणोपि षत्वमस्तीति ज्ञापनार्थम् । तेन जलाषाहमश्वषाहमित्येतत्सिद्धं भवति । क्वचिदेवं गणपाठः । सवनेसवने । अनुसवने २ । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे २ । सूते २ । संवत्सरे २ । किंसम् २ । मुसलम् २ । गोसनिमश्वसनिम् ॥

---

* इकः सुञीति दीर्घः । नश्च धातुस्थोरुषुभ्य इति णत्वमिति पुस्तकान्तरे नास्ति ।

Digitized by Google

सात्पदाद्योः ॥ १११ ॥

सादिति चैतस्य पदादेश्च मूर्द्धन्यादेशो न भवति *। विभाषा साति कार्त्स्न्ये । प्रत्ययसकारत्वात्प्राप्तिः । पदादेश्चादेशसकारात् । सात् । अग्निसात् । दधिसात् । मधुसात् । पदादेः । दधि सिञ्चति । मधु सिञ्चति ॥

सिचो यङि ॥ ११२ ॥

सिचः सकारस्य यङि परतो मूर्द्धन्यादेशो न भवति । सेसिच्यते । अभिसेसिच्यते । उपसर्गादिति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते न सिचो यङीति । तस्मादयं प्रतिषेधः सर्वत्र भवति । यङीति किम् । अभिषिषिक्षति ॥

सेधतेर्गतौ ॥ ११३ ॥

गतौ वर्त्तमानस्य सेधतेः सकारस्य मूर्द्धन्यादेशो न भवति । अभिसेधयति गाः । परिसेधयति गाः । गताविति किम् । शिष्यमकार्यात्प्रतिषेधयति ॥

प्रतिस्तब्धनिस्तब्धौ च ॥ ११४ ॥

प्रतिस्तब्ध निस्तब्ध इत्येतौ मूर्द्धन्यप्रतिषेधाय निपात्येते । स्तम्भेरिति प्राप्तं षत्वं प्रतिषिध्यते । प्रतिस्तब्धः । निस्तब्धः ॥

सोढः ॥ ११५ ॥

सहिरयं सोढ्भूतो गृह्यते तस्य सकारस्य मूर्द्धन्यादेशो न भवति । परिसोढः । परिसोढुम् । परिसोढव्यम् । सोढ्भूतग्रहणं किम् । परिषहते ॥

स्तम्भुसिवुसहां चङि ॥ ११६ ॥

स्तम्भु सिवु सह इत्येतेषां चङि परतः सकारस्य मूर्द्धन्यादेशो न भवति । स्तम्भेरिति प्राप्तः परिनिविभ्य इति च मूर्द्धन्यः प्रतिषिध्यते । स्तम्भु । पर्यतस्तम्भत् । अभ्यतस्तम्भत् । सिवु । पर्यसीषिवत् । न्यसीषि-

* इत आरभ्यादेशसकारादित्यन्तं पुस्तकान्तरे नास्ति ।

वत् । सह । पर्यसीषहत् । व्यसीषहत् ॥ स्तम्भुसिवुसहां चङि उपसर्गादिति वक्तव्यम् ॥ * ॥ उपसर्गाद्या प्राप्तिस्तस्याः प्रतिषेधो यथा स्यात् । अभ्यासाद्या प्राप्तिस्तस्या मा भूदिति । तथा चैवोदाहृतम् ॥

सुनोतेः स्यसनोः ॥ ११७ ॥

सुनोतेः सकारस्य मूर्द्धन्यादेशो न भवति स्ये सनि च परतः । अभिसोष्यति । परिसोष्यति । अभ्यसोष्यत् । पर्यसोष्यत् । सनि किमुदाहरणम् । सुसूषति । नैतदस्ति प्रयोजनं तत्रस्तौतिण्योरेव षण्यभ्यासादिति नियमाद् न भविष्यति । इदं तर्हि । अभिसुसूषते । एतदपि नास्ति । स्थादिष्वभ्यासेन चाभ्यासस्येति नियमात् । इदंतर्ह्यभिसुसूषतेरप्रत्ययः अभिसुसूरित्युदाहरणमिति । अत्र हि सन्भूतो न भवतीत्यभ्यासात्प्राप्तिरस्ति । स्यसनोरिति किम् । सुषाव ॥

सदिष्वञ्जोः परस्य लिटि ॥ ११८ ॥

सदि ष्वञ्ज इत्येतयोर्धात्वोर्लिटि परतः सकारस्य परस्य मूर्द्धन्यो न भवति । अभिषसाद । परिषसाद । निषसाद । विषसाद । परिषस्वजे । परिषस्वजाते । परिषस्वजिरे । अभिषस्वजे । स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वमिच्छन्तीति पक्षे ऽनुषङ्गलोपः ॥

निव्यभिभ्योऽड्व्यवाये वा छन्दसि ॥ ११९ ॥

नि वि अभि इत्येतेभ्य उपसर्गेभ्य उत्तरस्य सकारस्याड्व्यवाये छन्दसि विषये मूर्द्धन्यादेशो न भवति वा । न्यषीदत्पिता नः । व्यषीदत्पिता नः । न्यषीदत् । व्यसीदत् । अभ्यषीदत् । अभ्यसीदत् । सदिस्वञ्जोरिति तदिह नानुवर्त्तते । सामान्येनैव तद्वचनम् । व्यस्तौत् । न्यष्टौत् । अभ्यष्टौत् । अभ्यस्तौत् इत्येतदपि सिद्धं भवति ॥

॥ इति काशिकायां वृत्तावष्टमाध्यायस्य तृतीयः पादः ॥

Digitized by Google

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

अष्टादशस्तवकावशेषः ॥

अहो किमिदम् ।

आलोक्यते न रमणीपदलक्ष्मलक्ष्मी
रम्याणि भान्ति परमत्र हरेः पदानि ।
आं ज्ञातमां खरतृणाङ्कुरखिन्नपादा-
मुन्नीय वक्षसि वधूमयमत्र यातः ॥ १३३ ॥

रमणीपदलक्ष्मलक्ष्मीर्नालोक्यते ॥ १३३ ॥

निश्चितमेवैतत् ।

उरसा सरसायितेन रामां
वहतस्तद्गुरतो बतेश्वरस्य ।
पदपङ्कजलक्षणानि निम्ना-
न्यवनौ कोमलवालुकाचितायाम् ॥ १३४ ॥

ईश्वरस्य वोढुं समर्थस्य ॥ १३४ ॥

तदयि दयिते कृष्णस्य, अनुभवानुभवार्जितसुकृतकृतसौभाग्यगरिमाणं मधुरिमाणं मधुकरीव मदकरिवराढ्ढा ढाढानुरागतोऽगतोत्सवासि, सर्वदा सर्वदातरि प्रिये पिप्रियेऽपि सौभगवती भवती ॥ १३५ ॥

अयि कृष्णस्य दयिते·अनुभवं प्रतिजन्म·अर्जितैः सुकृतैः कृतं निष्पादितं सौभाग्यगरिमाणम्·अनुभव·उपलभस्व, ढाढादनुरागतो हेतोः·अगतोत्सवा त्वमसि, प्रिये विषये भवती पिप्रिये·अपि,इत्येतदेव संभाव्यत इत्यर्थः ॥ १३५ ॥

Digitized by Google

सहायातं दृष्टः सह स. हरिराशि च समं
तदालापो हृष्टस्तदनु सह लब्धो रतिरसः ।
इदानीं कृष्णस्त्वां वहति तृणकल्पास्त्यजति नः
फलेनैव व्यक्तं भवति सुकृतं दुष्कृतमपि ॥

तदहो तव पदानामवलोकतोऽनवलोकनमेव नो दुःखाकरमभूत् ॥ १३६ ॥

अवलोकतः सकाशादनवलोकनमिति, तत्र ततोऽपि सौभाग्यप्राकट्योपलब्धेरिति भावः । दुःखाकरमिति, चन्द्रावल्यादिमुखव्याजिमालक्ष्य स्वेषां तदैक्यमारोपयितुं तटस्थानामुक्तिः ॥ १३६ ॥

इति पुनः कियद्दूरं गत्वा पुनर्निर्वर्ण्य, अहो तद्गुरवहनासहनासन्नपरिश्रमेणेव वक्षःस्थलस्थलक्ष्मीपरिभाविनी सेह समुत्तारिता ॥ १३७ ॥

इवेत्युत्प्रेक्षायाम्, वस्तुतः श्रमाभाव एवेत्यर्थः । वक्षःस्थलस्थां लक्ष्मीं परिभवितुं शीलं यस्याः सा ॥ १३७ ॥

उत्तार्य च श्रान्त इव तामभिमुखीकृत्य तस्थौ, पश्यत पश्यत ।
अन्योन्याभिमुखस्थिते सुभगयोर्द्वे द्वे पदोर्लक्ष्मणी
दृश्येते यदहो रहस्यकथनासक्ते इवेत्यूहितम् ।
अन्योन्यांसविषक्तबाहुगमनक्षोभादिव श्रान्तयो-
र्लीलालस्यवयस्यभावपिशुनं निर्व्यूढमालिङ्गनम् ॥ १३८ ॥

श्रान्तयोरिवेत्युत्प्रेक्षैव, अत एव लीलयैव यदालस्यं तस्मिन् सति सख्यसूचकमालिङ्गनं निर्व्यूढम् ॥ १३८ ॥

इति तर्कयन्त्यो विपक्षपक्षपातिन्यः प्रसूयासूयामिव निर्हेतुवरतुवरभावकठोरतापन्नमनसो बभूवुः ॥ १३९ ॥

तुवरभावो वैरस्यं, "तुवरस्तु कषायोऽस्त्री"त्यमरः ॥ १३९ ॥

सपत्नपत्नपातिन्यस्तु सहजसौहृदहृदयालुतया तस्याः सौभाग्यविशेषविलोकनतः कनतः सपत्न्याः सद्यादेव निर्वाणशाणवेधसदृशविरहानला न लाघवमात्मनो विदुः प्रत्युत निविडमोदमेदुरतारता एव बभूवुः ॥ १४० ॥

हृदयालुतया सहृदयतया । कनतः प्रदीप्तात्, सुस्पष्टादिति यावत् । निर्वाणः शान्तो बाणवेधसदृशो विरहानलो यासां ताः ॥ १४० ॥

इत्येवं पुनः संभूय भूय एव तानि तानि चरणलक्ष्माणि लक्षीकृत्य चलन्त्यो नातिदूरे निरूप्य रूप्यसलिलसेचनकासेचनकायमाने शशधरकरनिकरनितान्तकान्ते भूरसि रसिकशेखरस्य खरस्यदरहितं गमनमनन्तरं वितर्कयामासुः ॥ १४१ ॥

अनन्तरमतिदूरे रसिकशेखरस्य भूरसि भुवो वक्षःस्थलरूपे पुलिने गमनं निरूप्य वितर्कयामासुरित्यन्वयः । कथंभूते, रूप्यसलिलेनेव यत् सेचनं तेन यत् कं सुखं तेन आसेचनकायमाने, "तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शना"दित्यमरः ॥ १४१ ॥

नेच्यन्तेऽङ्कुशकेतुवज्रकमलाकाराणि लक्ष्माण्यहो
व्यक्तं केवलमङ्गुलीदलशिखालक्ष्मेव तन्मन्महे ।
उद्यत्पार्ष्णि पदाग्रजाग्रदवनि प्रोन्नीय दोर्मण्डलीं
शाखाग्रं नमयन् प्रसूनमचिनोदस्मिन् प्रियार्थे प्रियः ॥ १४२ ॥

पदाग्रमेव जाग्रत् सावधानतया संलग्नम् अवनौ यत्र तद्यथा स्यात् तथा प्रोन्नीय ॥ १४२ ॥

इति पुनश्चरणचिह्नानि तान्यनुसरन्त्यो विगतविघ्नमुपघ्नमुपसन्नं लक्ष्मान्तरं विलोक्य वितर्कयांचक्रिरे ॥ १४३ ॥

उपघ्नम् आश्रयम् उपसन्नं प्राप्तवत् ॥ १४३ ॥

अहो पश्यत पश्यत ।

कर्पूरोपमवालुके पथि पदोर्यन्न्यस्तयोः पार्श्वयो-
रेखाङ्कोऽयमभीक्ष्यते सुललितः सूक्ष्मान्तरीयस्य च ।
नो तस्याः किमपीति तां गमयता स्वाङ्कं निरातङ्कत-
स्तेनास्मिन्नुपविश्य तत्कबरिकाबन्धः प्रसूनैः कृतः ॥ १४४ ॥

यद्यस्मात् पार्श्वयोः पार्श्वद्वये न्यस्तयोः पदोः कृष्णापदयोरेखाङ्को-ऽभीक्ष्यते तथा तस्यैव सूक्ष्मं यदन्तरीयं तस्य च ॥ १४४ ॥

तत्रैव क्वचन दृष्टिं निक्षिप्य-अहो चित्रम् ।

पादाघातेन तस्या रसकुतुकहठात् किंकिरातं पुरस्तात्
तत्कालादप्यकाले कुसुमभरभृतं केसरं चास्यमद्यैः ।
दृष्टुं जातेऽभिलाषेऽनुनयविनयतः कारिते तत्प्रयोगे
सद्यस्तत्तत्प्रसूनावचयनरभसात् तं च तं चारुरोह ॥ १४५ ॥

तस्याः पादाघातेन किंकिरातम्-अशोकं तथा तस्या एव-आस्य-मद्यैर्मुखमद्यजलैः केसरं वकुलं च कुसुमभरभृतं दृष्टुं रसकौतुके यो हठस्त-स्मादेव-अभिलाषे जाते सति, ततश्च-अनुनयविनयाभ्यां तत्प्रयोगे कारिते सति, तं च तं च किंकिरातं च-अशोकं च ॥ १४५ ॥

पश्यत किंकिरातस्य मूले नवपल्लवोद्गम इव तत्पादयाव-काङ्कः केसरस्य च रस्यचमत्कारकारीणि कुसुमान्यपि परिहरतामलीनां संनिपातः, मूल एव यत्र तस्या मुखमदिरागण्डूषनिक्षेपः, अनयोरशोषेणैव लक्ष्यते तयोः सविधवर्तिता, तेनैवात्र तौ विचिन्म इति तथा विचिक्युः ॥ १४६ ॥

अनयोर्यावकरसमुखमदगण्डूषयोरशोषेण-अविलम्बभवत्वादशुष्क-त्वेन सविधवर्तिता-एतन्निकट एव स्थितिः ॥ १४६ ॥

अथ यामादाय दायलब्धं धनमिव तिरोबभूव तया सह स हरिरतिरतिरागपरभागोऽपरभागोत्तमाय, कामी दीनः स्त्री च दुरात्मा, नहि कामित्वेऽपि दीनो लीलाकामित्वात्,नेता अपि सामान्यस्त्रीवत्·मदङ्गसङ्गमङ्गलवत्त्वात्, तेन मद्व्यतिरिक्तः कामी दीन एव तद्व्यतिरिक्ताः स्त्रियो दुरात्मान इति कामिनां दैन्यं स्त्रीणां च दुरात्मतां दर्शयन्·आत्मतुल्यास्वारमते, इत्यात्मारामोऽखण्डप्रणयः सन् रेमे ॥ १४० ॥

तिरोबभूव, पक्षे निरपेक्षो बभूवेत्यर्थः,दायलब्धधनत्वेनोपमानात् सर्वाकर्षणानुरञ्जनसंभोगादिकमप्येतल्लाभापेक्षयेति द्योतितम्,अतिशयो रतौ रागस्तेनैव परभाग उत्कर्षो यस्य सः, अपरभागोत्तमाय·अपरमपि भागोत्तममुत्कृष्टं रतिभागं लब्धुं रेमे,एतत्प्रसङ्ग एव, "रेमे तया स्वात्मरत आत्मारामोऽप्यखण्डितः । कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मता"-मित्येतत् पद्यं विरुद्धव्याख्यानान्तरवारणाय व्याचष्टे, कामी· इत्यादि लीलयैव नतु जीववत् कर्मपारतन्त्र्येण यत् कामित्वं तस्मात् ॥ १४१ ॥

अथ सा परमकोमलहृदया हृदयालुतमानामग्रणीः शुभगानां सुभगानां सुचिरदुरापताका पताकेव केवलमात्मनिष्ठया रतनिष्ठयारतमानसा विचारयामास ॥ १४८ ॥

सा राधा शुभं मङ्गलं गच्छन्ति प्राप्नुवन्तीति तासां सुभगानां सौभाग्यवतीनामपि सुचिरा दुरापता दुर्लभता यस्याः सा, "कप् समासान्तः," पताका वैजयन्तीरूपा, आत्मनिष्ठयात्मवर्तिन्या रतनिष्ठया सुरतनिष्ठया, अरतं न सम्यक्· मुदितं मानसं यस्याः सा, स्वप्राणतुल्यासु सखीषु तादृशविलासालाभभावनयेत्यर्थः ॥ १४८ ॥

मय्येकस्यामतिशयरतिः प्राणनाथो मदाल्य-
स्ता विच्छेदादहह दधते हा कथं प्राणयोगम् ।

तस्माद्ब्राम्यं किमपि करवै येन नेता विदूरं
गच्छेदेष क्रमत इह तास्ताश्च सर्वा मिलन्ति ॥ १४९ ॥

मय्येकस्यामित्यत्रायमाशयः, यदिदं मत्सौभाग्यसुखं चेत् ताभिः स्वनयनविषयीक्रियते तदेव सफलम्, तासां सुखं च तास्वप्येतादृशविलासः सिध्यति चेत्, मम सुखं प्रत्युत विच्छेददुःखमेव समजनीति । मदाल्यो ललिताविशाखाद्याः ॥ १४९ ॥

इति विचार्य चार्यचरिता निजगाद,हन्त निरुपमप्रणयरसाकूपार पारये नाहं गन्तुमपरं परं हि मे श्रमवैकल्यं जातं चलनसामग्री न दृश्यते कथमहं यामि यामिनीयमायामिनी भवति रचिक सिकतास्वमूषु चणमिहोपविश्यताम् ॥ १५० ॥

अकूपारः समुद्रः ॥ १५० ॥

इत्युक्तः स च सचमत्कारमिव तस्यास्तदिदमुदितं दितं कुर्वाणो वाणोपममिव बहिर्मत्वा तस्याः सहजमप्यमदं तु दन्तुरं समदमिव बहिर्जानन् ॥ १५१ ॥

इदमुदितं वाक्यं दितं कुर्वाणः खण्डितं कर्तुम् । वाणोपममिवेति, इदमपि भवत्या निदेशं प्रतिपालयितुमर्हामीति नर्मणैव कृत्रिमासहिष्णुतां प्रकाशयेत्यर्थः । अत एव·इवबहिःशब्दौ । तथैव सहजम्·अमदं गर्वरहितम्·अपि तस्या उदितं समदम्,अत एव दन्तुरमिव बहिर्जानन् । तुकारोऽप्यर्थे ॥ १५१ ॥

अन्तस्तु स्वायत्तकान्तायाः कान्तायाः समुचितमेव मदं मदन्तरं प्रमदयन्तमेतमेतस्यामपि तिरोधाने तीर्थे करोमीति विचारयन् बहिर्मदापनोदविशेषदारुणभावोऽरुणभाबोधितकमलनयनो नयनोदकं किमपि जगाद ॥ १५२ ॥

स्वाधीनभर्तृकाया नायिकाया मदन्तरं मम धीरललितस्यानुकूलनायकस्य मनः कर्म प्रमदयन्तं सुखयन्तमपि· एतं मदम्,एतस्यामपि

विषये तीर्थं हेतुम्,मदापनोदो गर्वखण्डनमेव विनोदविशेषस्तेनैव दाक्ष्यो भावोऽमर्षाख्यो यस्य सः,कृत्रिमस्तु तदभावोऽपि प्रकटित इत्याह,भयाभया शोभाकान्त्या बोधिते ज्ञापिततत्त्वे कमलनयने यस्य सः, नयनोदकं नीतिखण्डकम् ॥ १५२ ॥

चलनसामग्री यदि न दृश्यते तदा मदीयमिममंसमंसललावण्यलक्ष्मीकं कृतार्थीकुरुष्वारोहेत्येति वदन् दृश्यमान एव तत्रैव वर्तमान एव तदक्षिगोचरतां विजहौ ॥ १५३ ॥

अंसला प्रबला लावण्यलक्ष्मीर्यत्र तम् । अत्रेदं चतुरशिरोमणिना विचारितम्,यद्यस्या मतमनुरुन्धता मया• अनया सह सिकतासूपवेष्टव्यं तदास्याः सखीभिः संभूयैव चन्द्रावल्यादिष्वपि मिलितासु हर्षगर्वरोषेर्ष्यासूयामानादिदुर्वारभावसैन्यपराक्रमः सहसा समाधातुमशक्यः, मास्तु समाधानमेतस्याः, सौभाग्यगर्वपर्वत एव पिनष्टु सर्वमिति चेत्,प्रारिप्सिता महारासलीला सर्वैकमत्या विना न सिध्येत्,यदि पुनरनया सह विहरता पर्यटितव्यं तदाप्युद्भूतसखीविच्छेदवेदनातुरायामस्यां संप्रति न तत्र सारस्यम्, तासां विच्छेदानलज्वालापि न चिरं रक्षितुमर्हा दशम्या अपि दशायाः समुद्गमसंभवात् । तस्मादितोऽप्यन्तर्धायास्याः संभोगरसचमत्कारमिव विप्रलम्भरसचमत्कारमपि मिलितवतीस्ताः सर्वाः सर्वतो विलक्षणानुभावसाक्षात्कारेणानुभाव्य तासामपि मुखैरेतत्प्रेमाणमसमोर्ध्वतया स्तावयित्वा ताभिर्मिलितायाः पुनरस्या विचित्रविलापं स्वकर्णगोचरीकृत्य तेनैव कृपाविक्लिन्नदन्तरीभूय स्वकठोरतां धर्तुमसमर्थः सहसैव स्वदर्शनामृतवृष्ट्या सर्वा एव संजीव्य स्वयमपि•अस्यास्तासां च तदा समुच्छलितविविधभावामृतसिन्धौ संमज्ज्य कृतार्थीभूय विरहमहाविषकुक्षीर्णतया लब्धपुनर्जनुषामिव सर्वासामासां त्यक्तमिथःप्रातिलोम्यानां प्राप्तैकमत्यानां वृन्देन महारासं संपादयिष्य इति । अत्र यद्यपि “तदालोके कदाप्यस्य नान्यासङ्गः स्मृतं व्रजे”इत्युज्ज्वलनीलमण्युक्तेः श्रीराधासङ्गिनोऽस्य मनसि नैतादृशविचारः संभावनीयः,तदपि रासलीलाभि-

द्वार्थे तदीयलीलाशक्त्यैव विचारितमिदं तस्मिन्नुपचरितम् । तस्य तु तादृशोऽयं विचारः,इयं कृत्रिममेव मदमुपन्यस्यति चेत्ऽहमपि कृत्रिममेव सनर्मैवान्तर्धास्ये, कौतुकं द्रक्ष्यामि किं भवेदिति,ततश्च सर्वसंमेलनरूपेऽन्तराये ऽापतिते सति ॥ १५३ ॥

तस्यास्तु तदा तदन्तर्धाने सति सा वाग्वैदग्धी सुखावगाहकृते वसुधासुधातरङ्गिणी विषतरङ्गिणीत्वमागतेवऽनुलेपनार्थमानीतं सुगन्धसारगन्धसारपङ्कं ज्वलदङ्गारतामिव समुपगतं नयनभूषणार्थमाहृतं स्निग्धकज्जलं कज्जलं विषदूषितमिव संपन्नम् ॥ १५४ ॥

सा वाग्वैदग्धी “सिचयमुदस्यच हृदयादल्पं विलिखाम्यद्भुतमकराङ्कम्”मित्यादिस्वाधीनकान्तोचिता सुखावगाहार्थं वसुधायां पृथिव्यामपि सुधातरङ्गिणी तदन्तर्धाने सति सास्मर्यमाणा विषतरङ्गिणीत्वमागतेव, स्वकुचयोरनुलेपनार्थमानीतम्, स्वाधीनेन तेन कान्तेनैवेत्यर्थः । कज्जलं कुत्सितं जलम् ॥ १५४ ॥

कण्ठाभरणीकर्तुमुपहृतो मुक्ताहारो भोगीव लेलिहानतामाससाद मुखसारस्यकारणमास्वादितं नागवल्लीदलं नागवल्लीदलं बभूवऽङ्गभूषणाय भूषणायतनता तत्कालकालकूटकूटकौटिल्यायितेव यदि समजनि ॥ १५५ ॥

भूषणेषु हारमेखलादिषुऽा सम्यक्ऽ यतते यन्त्रनादियत्नपरो भवतीति भूषणायतनस्तस्य भावस्तत्ता ॥ १५५ ॥

तदा सगद्गदगदनरोचिषा गलदुष्मसकज्जलजलधारया मसीमलीमसीभूतसूचनिपातकलेखयेव खरतरसंतापकरपत्त्रकरणकविदारणविदा रणरणकसूत्रधारेण टङ्किता तदुरःस्थली समजनि ॥ १५६ ॥

रणरणकं कान्तवियोगचिन्ताविशेषस्तदेव सूत्रधारस्तक्षा तेन । कथंभूतेन, खरतरः संताप एव करपत्त्रं क्रकचास्त्रं तत्करणकं विदारणं वेत्ति जानातीति स तथा तेन ॥ १५६ ॥

ततश्च ।

मुक्तकण्ठं सा विललाप ।

हा नाथ हा रमण हा प्रणयैकसिन्धो
क्वासि प्रिय प्रकटय स्वविलोकनं मे ।
त्वां वेद्मि यद्यपि भवन्तमिहैव सन्तं
दूरे दृशोरिति तथाप्यसुभिर्दुनोमि ॥ १५७ ॥

त्वां विना गत्यन्तरं मे नास्तीत्याह नाथेति । तथात्वमपि न संबन्धसामान्येनेत्याह रमणेति । तथाभूतत्वमपि न कामेनेत्याह प्रणयेति । तादृशत्वमपि नास्मदनुरोधवशादित्याह प्रियेति । प्रीणासि, प्रीतिं प्राप्नोष्येव करोष्येव वा· इत्यर्थः । नन्वहं नर्मणैवान्तर्धाय त्वत्समीप एवास्मि तत्राह· त्वामिति । तथापि दृशोर्दूरे भवसीति हेतोरसुभिर्दुनोमि, प्राणहेतुकैव मम पीडेत्यर्थः,त्वत्प्राप्त्याशया प्राणान् हातुं त्वद्विच्छेदेन च धर्तुं च न शक्नोमीति भावः ॥ १५७ ॥

यावन्न जीवितमिदं बहिरेति लोलं
तावद्विमुच्य रुषमक्षिपथं प्रयाहि ।
नो चेदजीवितमिदं वपुरस्मदीयं
वोढासि सत्यमहहांसतटेन सत्यम् ॥ १५८ ॥

तदपि तयोर्द्वयोर्मध्ये त्वद्विच्छेदस्यैव प्राबल्यात् तेनैव छिन्नाशाशृङ्खलाः प्राणा निष्क्रमिष्यन्त्येवेत्याह यावदिति । तदपि मदपेक्षया धृतिमालम्ब्य चणं स्थास्यतीति मम जीवितं मा विश्वसीरित्याह लोलमिति । ननु निष्क्राम्यतु जीवितं मम का क्षतिरिति चेन्मैवं ब्रवीः, त्वमपि मयि विषये परमप्रेमवानेवानुभूतो मद्वियोगदुःखं प्राप्स्यस्येवेत्याह नो चेदिति । अहह खेदे,अजीवितं गतप्राणं वपुः·अंसतटेन वोढासि, सत्यं सत्यम्, अवश्यमेवेत्यर्थः । हन्त हन्त प्रियतमामहं किमिति नावहं, याणिकयापि मदुपेक्षया यया प्राणा एव त्यक्ता इति शोकेन मद्देहं वहन् वने वने पर्य-

टिष्यसीति या ते भाविनी पीडा सैव ममासह्यं कष्टम् । त्वद्विच्छेदः प्राणत्यागश्चेति द्वयं त्वकिंचित्करमेवेति भावः ॥ १५८ ॥

नैवापराद्धुमिह किंचन गर्वहेतो-
र्नैवोदितं वच इदं रुषितोऽसि येन ।
तासां समागमनमूलविलम्बहेतो-
र्नो पारये चलितुमित्यवदं न गर्वात् ॥ १५६ ॥

ननु मदन्तर्धानकारणं भवत्येव न पारये गन्तुमित्यात्तमर्वया॰ उपस्थापितं मम को दोषस्तत्राह नैवापराद्धुमित्यादि । रुषितोऽसि येनेति, फलतो रोष एवायं तेन नर्मेति तदनौचित्यं सूचितम् ॥ १५९ ॥

आगत्य ताभिरिह हन्त विपद्वशेयं
नो दृश्यते सुभग यावदहो प्रियायाः ।
तावद्विभावय विभो वदनेन्दुबिम्बं
नो गर्ह्यते प्रणयिता तव यावदाभिः ॥ १६० ॥

किंच प्रेमपरिपाटीविदो महारसिकेन्द्रस्य तवेयमप्यविमृश्य कारिता दैवाद्यद्यभूत् तदपि सा लोके मा प्रकटीभवतु तत्प्राकट्ये च सति तद्वद्यश एव ममासह्यं कष्टमतोऽधुनैव प्रत्यक्षीभूय तत्समाधत्स्वेत्याह॰ आगत्येति । हे सुभग तव प्रियायाः,त्वद्गतसौभाग्याया अपीत्यर्थः । किंच नो दृश्यते यावदिति, मत्प्राणसख्यस्ता ईदृशमद्दशादर्शनमात्रादेव शोकात् प्राणांस्त्यक्ष्यन्ति, ता अपि मा घातयेति भावः । तव प्रणयिता नो गर्ह्यते यावदिति, त्वत्प्रेम्णि गर्हिते सति तत्समाधानाय न मे वागवसरोऽप्यस्तीति भावः ॥ १६० ॥

एकाकिनीमिह वने किमहो विहातुं
हा हन्त साहसमिदं भवता व्यधायि ।
अन्योन्यसङ्गसुखतः किल ता न तादृक्
खिद्यन्ति याति विरतिं कथितो हि बाध्यः ॥ १६१ ॥

ननु ता अपि यथा त्यक्तास्तथा त्वमपि त्यक्ता· ऐक्यधर्म्योपादना-र्थमिति चेन्मैवं वादीरित्याह·एकाकिनीमिति । साहसमिति, तासां दुःखदानमात्रार्थमेव, मम तु वधार्थमेव, फलतो व्यवसायावगतेरिति-भावः । तत्र हेतुं स्वस्य महानुरागवत्त्वं दैन्यादपलप्य बाह्यमेव हेत्वन्तर-माह·अन्योन्येति,"न दुःखं पञ्चभिः सहे"ति न्यायात् । कथितो हि बाध्य इति, परस्परकथने परस्परसान्त्वनमपि स्यादिति भावः ॥ १६१ ॥

धिग्यामिनीं न रमते यदि यामिनीशो
धिक् पद्मिनीं यदि न पश्यति पद्मिनीशः ।
धिग्जीवितं यदवहेलति जीवितेशो
भुक्तः प्रियेण हि गुणो गुणतामुपैति ॥ १६२ ॥

ननु सौन्दर्यमाधुर्यगाम्भीर्याद्यखिलगुणनिकायं कायं किमिति सहसैव जिहाससीत्यत आह धिगिति । यामिनीशं विना धिक्कृताया अपि यामिन्याः स्वगुणोद्गारोऽतिधिक्कार इति, ततः किंचिदुत्तमां पद्मिनीं निजेशं विना स्वगुणमनुद्गारयन्तीमालक्ष्य स्वमते तद्द्वयस्य सत्त्वेव धिक्का-रास्पदमित्याह धिग्जीवितमिति । भुक्तः प्रियेणेति, तद्भोगं विना गुणानां वैफल्यात्, तथा सति कायस्यापि वैयर्थ्यमिति भावः ॥ १६२ ॥

इति मनसि सरसमसृणतानाविले विलेशयमिव प्रविष्टं तत्का-लोदयितदयितवियोगखेदं खे·दंदह्यमाननिदाघनिदाघधामानमिव समुत्पन्नं तमसहमाना सह·मानाभियोगेन नश्यदवस्थावस्थानम्ला-नचेतना तनावुपचितयातना तत्क्षणमसमयसुहृदेव गुरुतरमूर्छया मूर्छया व्यानशे ॥ १६३ ॥

सरसमसृणतानाविले, सारस्यमार्दवाभ्यां निर्दूषणेऽपीत्यर्थः । निदा-घस्य ग्रीष्मर्तोर्निदाघधामानं सूर्यम् । माने तदभिप्रायज्ञाने·अभियोग उद्यमस्तेन सह नश्यन्ती·उपरमन्ती या·अवस्था,दशमी दशेत्यर्थः, तस्या अवस्थानेन·आसन्नतया म्लाना चेतना यस्याः सा । गुरुतरा मूर्छा विस्तारो यस्यास्तया व्यानशे·आव्रियत, "मूर्छा मोहसमुच्छ्राययोः" ॥ १६३ ॥

ततश्च ।

प्रेमप्रवाहभयतो जनलज्जया च
श्वासोऽपि नो बहिरियाय सरोरुहाक्ष्याः ।
म्लाना मृणाललतिकेव तनूरमुष्या
हा हन्त हन्त सिकतापतिता बभूव ॥ १६४ ॥

श्वासो न बहिरियाय, किंतु अन्तरेव किंचिज्ज्वलति स्मेत्यर्थः । तत्र हेतुद्वयं प्रेमेत्यादि, अयमर्थः, श्वासो यदि बहिः प्रसरेदेव तदा अहो प्रियतमेनोपेक्षिताया अप्यस्या जीवनमस्तीति लोकनिन्दातो लज्जा स्यात्, यदि च अन्तरपि न प्रसरेत् तदा मयि शान्तायां मत्प्रियतमो मद्वियोगशोकपीडां प्राप्स्यतीति तद्दुःखमगणयित्वैव स्वदुःखासहिष्णुतया प्राणानहमत्यजमिति स्वस्य प्रेमवत्वीत्वभावनया प्रेम्णः प्रवाहतः प्रसिद्धेर्भयं स्यादिति ॥ १६४ ॥

ततश्च ।

वल्ल्यः पुष्परसैः सहैव सिषिचुर्भृङ्ग्यो भृशं वीजयां-
चक्रुः पक्षविधूननैः खगघटा हाहेति नादं व्यधुः ।
सारङ्ग्यो गलदश्रुकातरदृशः साशङ्कमावव्रिरे
वन्यैरेव समादधे परिजनैः कालोचितं सेवनम् ॥ १६५ ॥

तत्कालोचितोपचारश्च स्वयमेव प्रावर्ततेत्याह वल्ल्य इति । तत्र वल्ल्यादीनां त्रयाणां तत्तदुत्प्रेक्षयापि भवेत् सारङ्गीणां तु साहजिकमेवेति भेदः ॥ १६५ ॥

किंच ।

स्वच्छायैव सरोजिनी दलमयी शय्येव तस्या अभूत्-
ज्योत्स्नैवाजनि गन्धसारसलिलासेकः शरीरोपरि ।
बाहू एव मृणालवल्लिवलयस्तस्या वियोगज्वरे
मूर्छेवाभवदुत्तमा प्रियसखी दुःखानुभूतिच्छिदे ॥ १६६ ॥

गन्धसारसलिलं चन्दनद्रवः ॥ १६६ ॥

Digitized by Google

ततश्च ।

किशलयकुलैर्लोलैर्वेल्लैः करैरिव ताडयन्
विहगविरुतैस्तारैरार्तस्वरैरिव विक्रुशन् ।
कुसुममधुनः स्यन्दैः कुर्वन्निवाश्रुविमोक्षणं
प्रियपरिजनव्रातप्रायो बभूव लतागणः ॥ १६७ ॥

तत्परिजनेषु भाविनं तच्छोकानुभावं तदानीं तत्रत्या लता एव प्रथममभ्यनैषुरित्याह किशलयेति ॥ १६७ ॥

एवं तथा स्थितायामेतस्यां चरणलक्षणानुसारसारसारस्येन तत इतो विचिन्वत्यस्ता एव मृगनयना नयनान्तैरकस्मादेव नातिदूरे तत्क्षणादेव नभसः पतितां निर्जलदां सौदामिनीमिव गुरुतया भुवि निपतितां कौमुदीनां सारपटलीमिव त्रैलोक्यलक्ष्म्या मुकुटकोटितो विच्युतां कनकरत्नमालामिव ॥ १६८ ॥

ततश्च ता मृगनयना अकस्मादेव नातिदूरे नयनान्तैस्तामेकाकिनीं गोचरीकृत्य पुनरपि संशेरते स्मेत्यन्वयः । सौदामिनीति सौन्दर्यं वर्णितम् । कौमुदीति माधुर्यम् । त्रैलोक्येति ताभ्यामसमोर्ध्वत्वम् ॥ १६८ ॥

धरयेव समुद्गीर्णां निजसौभाग्यकनकसंपतिमिव स्वयमुद्भिन्नां कुङ्कुमवाटिकामिव ॥ १६९ ॥

धरयेत्यनर्घमहारत्नभूतत्वेन सौभाग्यम् । कुङ्कुमेति सौरभ्यसौरभ्ये ॥ १६९ ॥

विपिनलक्ष्म्येवाङ्कपालीकृतां कामपि हिरण्मयीं स्थलकमलिनीमिव ॥ १७० ॥

स्थलकमलिनीमिति स्वभावतः शैत्यसौगन्ध्यमार्दवानि । एवमुपर्यधो मध्यत चागमनसंभावना विकल्पिता ॥ १७० ॥

कुसुमधनुषश्च्युतां चम्पकमालामिव भुव एव गोरोचनातिलकलेखामिव ॥ १७१ ॥

कुसुमधनुष इति कान्तवशीकारिकेलिकलावैदग्ध्यम् । गोरोचनातिलकेति परमादरार्हत्वम् ॥ १७१ ॥

काननलक्ष्मीगृहस्य किमतैलपूरितां दीपकलिकामिव कृतशयनां ज्वलन्तीं दिव्यौषधिलतिकामिव तामेकाकिनीं गोचरीकृत्य ॥ १७२ ॥

दीपकलिकेति वस्त्वन्तरस्यापि प्रकाशकस्वरूपत्वम् । तत्रातैलपूरितामिति विरहवैकल्यवशात् क्षणक्षणतस्तेजोह्रासः । काननलक्ष्मीगृहस्येति तां विना तस्य वैफल्यं च । तथात्वे तैरयं प्रसक्तमिति तद्वारणार्थं दिव्यौषधिलतामिति ॥ १७२ ॥

अहो किमिदं सैवेयं यामस्मान् विहाय विद्युतमिव जलदश्चन्द्रिकामिव चन्द्रः प्रभामिव मणिवरो गृहीत्वान्तरधाद् गोकुलराजतनयोऽनयोदयेन दारुणो दारुणोऽपि ॥ १७३ ॥

अहो किमित्यादि श्यामलादीनां वाक्यम् । विद्युतं विनापि जलदो नातिनिःशोभो भवतीत्यत आहुश्चन्द्रिकामिति, चन्द्रिकां विना तु चन्द्रो दिने भ्रष्टशोभ एव भवतीति भावः, तथापि तत्तद्विनाभूतयोस्तयोः सत्तामालक्ष्याविनाभावेनोपमिमते प्रभामिवेति, दारुणः काष्ठादपि ॥ १७३ ॥

भवति चेत् सैव कथमेका खरमञ्जरी मञ्जरीकर्कशचेतसा तेनैव किमेषापि निःसहाया हा·यापिता विरहवेदनाम् ॥ १७४ ॥

भवति चेदिति ललिताद्याः सगद्गदमाहुः, खरमञ्जरी·अपामार्गः ॥ १७४ ॥

किं वा चिरसुरतविहरणरणपरिश्रमेण निद्रायामस्याः स चात्रैव कुत्रापि वर्त्तते नास्माकं स्माकम्प्यमानमानसानां विरहरहस्यातङ्केन दुर्भगानां नयनविषयीभवति·अस्याः पुनः समीप एव वर्त्तते ॥ १७५ ॥

अतिसुभगायास्त्यागो न संभवतीत्यत आहुर्मङ्गलाख्याः किं वेति । निद्रायां वृत्तायामित्यर्थः । विरहरहसि विच्छेदतत्त्वे आतङ्केन आ सम्यक् कम्पमानमानसानाम्, "रहस्तत्त्वे रतौ गुह्ये" इति मेदिनी ॥ १७५ ॥

अथवास्माकमेव संसरणध्वनिमध्वनि मन्दमपि समाकर्ण्यापससार सारस्यहीनतया, तथा सति स तिलको रसिकानां पुरेव रे बहुमतामिमां सह सहजश्रियं किमिव नानैषीत्, आहोस्विदस्या एव कमपि मदमदक्षिणतां काञ्चिदालोक्य सहजमानी मानीनवानिमामपि सङ्ग, नाप्येवं यतो न तस्य तथेयमवेदग्धी, दग्धीकृत्य विरहदवदहनेनेनामतर्हामेकामेकान्तकठोरतया स्वयमन्तर्धास्यति ॥ १७६ ॥

समीपे चेद्वर्तते तर्हि गात्रसौरभ्यादिनाप्युपलभ्येतासावित्यत आहुर्भद्राख्या अथवेति । ताः प्रति पुनः श्यामाख्या आहुस्तथा सतीति । तत्र दोषदर्शिन्यश्चन्द्रावल्याख्या आहुराहोस्विदिति । ताः प्रति पुनः श्यामाख्या आहुर्नाप्येवमिति ॥ १८६ ॥

सैवेयं वा न भवति यतो दृश्यते नात्र कृष्णः
सैवैषेति प्रतिफलति यत् तद्धि नो भ्रान्तिरेव ।
सर्वासां नो मदविहृतये माधुरी नाम देवी
काचिन्मूर्ता जयति जगतीमोहमुत्पादयन्ती ॥ १७७ ॥

इति तस्यास्तादृगवस्थत्वे सर्वानेव वितर्कान् खण्डितवत्यो वितर्कान्तरमसंभावयन्त्यस्तस्यामेव संशयाना एव सर्वत उत्कर्षमानयन्त्यः श्यामाख्या आहुः सैवेयमिति । तर्हि केयमित्यत आहुः सर्वासामिति ॥ १७७ ॥

इति निकटमुपसर्पन्त्यः पुनरपि संशेरते स्म । नाप्येवं यतः ।

म्लाना मृणालीव निपत्य वर्तते
स्पन्दो न मन्दोऽपि च लक्ष्यते ततः ।

इयं हि मूर्तिः कह्लारस्य किं न वा
मूर्छैव किंवा प्रियविप्रयोगजा ॥

इति निकटतरमुपसर्पन्ति स्म ॥ १७८ ॥

ललिताख्याः सखेदमाहुर्ध्यानेनेति । कह्लारस्य कह्लारसस्य किं वा मूर्छैवेति, मूर्तिधारिणीत्यर्थः ॥ १७८ ॥

ततश्च तासामागमनमाकलय्य प्रसूयासूयामिव सा तस्या मूर्छा सखी तां तत्याज ॥ १७९ ॥

असूयां प्रसूय उत्पाद्य, कृत्वेत्यर्थः, संप्रत्येता एव सख्य आसतां किं मया विपत्कालमात्रसहाययेति विभाव्येति भावः ॥ १७९ ॥

गतायां तस्यां सा सुप्तप्रबुद्धेव हा नाथ क्वासीति कलकोमल-गद्गदगदनपरा न परापरविवेकवती विवर्तमानावर्तमानास्ताः प्रति नातिदूरे यदि नयने व्यापारयामास ॥ १८० ॥

विवर्तमाना पार्श्वे परिवर्तयन्ती । आवर्तमाना आवृत्य तिष्ठन्तीः प्रति । नयने नेत्रयुगम् ॥ १८० ॥

तदा अपि सैवेयमिति सहर्षविषादविस्मयसंभ्रमोत्कण्ठमुपकण्ठमुपसर्पन्त्यः कनककमलिनीमूलं निष्कलहं कलहंसवध्व इव सुरसरितं सरिदन्तराणीव ॥ १८१ ॥

सहर्षेति तत्प्रेमवैयग्र्यदर्शनेन चन्द्रावस्यादीनामपि साहजिकसौहार्दोदयात् तत्परिचये हर्षः, तादृगवस्थादर्शने विषादः, महासुभगाया अपि तथाभूतत्वे विस्मयः, संवादेन तद्वार्ताज्ञानार्थमौत्कण्ठ्यं, तत एव संभ्रमः, कमलिनीत्वकलहंसीत्वाभ्यां तस्यां तासां सर्वासामपि साहजिक इव सौहार्दोदय उक्तः, अत एव सुरनदीत्वनद्यन्तरत्वाभ्यां तदानीं बाह्याभ्यन्तरमेलममाश्रयाभयिमव्यक्त ॥ १८१ ॥

स्थायितां प्राप्तवतीं रतिं सर्वभावानां श्रेण्य इव स्वरसप्रकर्षसंपदं सर्वाः श्रुतय इव ॥ १८२ ॥

तत्र हेतुप्रदर्शनार्थं सर्वभावत्वस्थायिरतित्वाभ्यामंशांशिभावः, सर्वभावानां विभावानुभावसात्त्विकसंचारिणां स्वरत्वश्रुतित्वाभ्यां सर्वसंपूर्णगुणवत्त्वतनुगुणैकदेशवत्त्वे ॥ १८२ ॥

सुकविकविता रसभावगुणालंकारसंपद इव, उपमालंकृतिं रूपकाद्यलंकृतय इव ॥ १८३ ॥

रसादित्वकवितात्वाभ्यां प्रकाश्यप्रकाशकभावो नित्यसंयोगश्च । रूपकादित्वोपमात्वाभ्यां व्याप्यव्यापकभावः ॥ १८३ ॥

अमृतकरकिरणकन्दलीं चकोरललना इव नवोद्यानलक्ष्मीं नानाविधविहगवध्व इव कमलाकरसंपदं कमलिनीविततय इव सकलाः परितः परिवव्रुः ॥ १८४ ॥

चकोरत्वसुधाकरत्वाभ्यां पोष्यपोषकभावः, दृष्टान्तोऽयं तस्याः सखीरालक्ष्येत्यवसीयते । विहगत्वोद्यानत्वाभ्यामाकृष्याकर्षकभावः, तटस्थपक्षप्रतिपक्षानन्यालक्ष्यायमुपन्यस्तः । नलिनीत्वकमलाकरत्वाभ्यामाधाराधारकभावः, सुहृत्पक्षानालक्ष्यायं परस्परविरुद्धतया ॥ १८४ ॥

परिवृत्य च ।

काचिद्वीजयति स्म पल्लवकुलैः काचित् कचानां ततिं
बध्नाति स्म चकार काचन करेणास्याम्बुजोन्मार्जनम् ।
ऊचे काचन मद्विधेव भवती हा हन्त कष्टां दशामेतां प्राप्तवती कथं क्व स तव प्राणाधिनाथः शठः ॥ १८५ ॥

काचिदित्यत्र वीजनादिकर्त्र्यो बाष्पकुण्ठ्यो नित्यसख्य एव ज्ञेयाः । ऊचे काचनेतीयं चन्द्रावली ॥ १८५ ॥

अस्मान् विहाय भवतीं यदसावहार्षीत्
तेनैव हि प्रशमितो विरहज्वरो नः ।

सोऽयं पुनर्द्विगुण एव बभूव धिङ्ना
यद्वीक्ष्यते तव दशेयमभूतपूर्वा ॥ १८६ ॥

तस्मान् विहायेत्यपि वाक्यं प्रायः प्रतिपन्नतटस्थपक्षाणामेव गुरु-
सौहार्दप्रकाशनमयम् ॥ १८६ ॥

न कश्चित् ते दोषः सुमुखि मनसो वाथ वचसो
जगत्येव ख्याता त्वमसि गुणरत्नावलिखनिः ।
त्वयि प्रेमा तस्य प्रथित इति सर्वस्य विषयः
कुतो जाता तस्य व्यवसितिरियं हन्त कठिना ॥ १८७ ॥

न कश्चिदिति विपन्नसखीवितर्क्यमाणतद्दोषवारणपराणां सुहृत्स-
खाणां वाक्यम् ॥ १८७ ॥

एतेन ते सुमुखि कष्टतरेण दुःखे-
नास्माकमन्तरितमन्तरगामि दुःखम् ।
भैषज्यमात्रपरिभूतिकृतो विषस्य
वीर्यं हि नश्यति महाविषसंगमेन ॥ १८८ ॥

एतेनेति वयसा न्यूनानां प्रायो धन्यादिकन्यानामुक्तिः ॥ १८८ ॥

तत् कथय भाविनि किंबीजमिदं ते वैशसम्, तत्रैव काचि-
दन्याह, किं पृच्छत भोः सख्यः, तस्यैव प्रेम्णा एवायं स्वभावः ।

तत्प्रेम को बत विभावयितुं समर्थ-
स्तुल्यं विषेण सुधयाप्यनुरागिणीषु ।
संतापयन्ति रसयन्ति विमूर्छयन्ति
संजीवयन्ति युगपद्बत यस्य भावाः ॥ १८९ ॥

वैशसं कष्टम् । काचिदन्येति, तज्जातीयप्रेमानुभाविनी प्रसरेयं
श्यामेत्र । संतापयन्तीत्यादिना तापनह्लादनयोर्मारणजीवनयोश्च विरुद्ध-
धर्मत्वं, तत्रापि यौगपद्यमित्यविचिन्त्यत्वम् ॥ १८९ ॥

इति तस्या वचनावसाने सानेकप्रयत्नेनामूषां मूषां प्रेमहेमावर्तिनीमिव हृदयवृत्तिमुद्घाट्य सत्राप्योष्यां सकलं कलं समुज्जगार यदि ॥ १६० ॥

सा राधा·ऽमूषामनेकप्रयत्नेन प्रेमैव हेम तदावर्तयितुं शीलं यस्यास्तां मूषां पुटपाकं "मूस" इति ख्यातामुद्घाट्य, तास्तथात्वेन प्रत्याय्येत्यर्थः । सकलं समस्तवृत्तम् ॥ १९० ॥

तदा तदाकर्णनेन विस्मितविस्मितमुख्यस्तामयत: कृत्वा समवेतीभूय भूय एव तमितस्ततो गवेषयितुं वेषयितुं च निजनिजमनो ज्वरं दिशि विदिशि विहितसंचारा घनतरविटपवितानच्छादितहिमकरकरनिकरतया तमोबहुलं वनप्रदेशं समासाद्य भग्नप्रक्रमास्ततो निववृतिरे ॥ १६१ ॥

विस्मितं विस्मययुक्तं विस्मितं विगतस्मितं च मुखं यासां ताः । गवेषयितुम्·ऽन्वेष्टुम् । निजमनः कर्म ज्वरं वेषयितुं व्यापयितुम् । गवेषणेन प्रत्युत ज्वरवृद्धिरेव भविष्यतीति ता न जानन्तीति भावः ॥ १९१ ॥

निवृत्य च तरणिदुहितुः कूलमनुकूलमनुसृत्य मसृणतरघनसारधूलिधवलवलमानसौभाग्यपरभागपुलिनोपरि समुपविश्य तन्मनस्का मनस्कारारोपिततद्गुणा वचसा च साधिततद्गानास्तदवेक्षणसंकल्पाकल्पा: कलकोमलगद्गदगदनमुत्कण्ठमत्युत्कण्ठं रुदन्मुखा मुखामोदमिलिताभि:कलझङ्कारकलयानुरुदतीभिरिव मधुकरवधूभि: प्रतिपाल्यमाना: क्षणं गमयामासु: ॥ १६२ ॥

मनस्कारेण चिन्तया· ऽऽरोपितास्तस्य गुणा एव न तु दोषा याभिस्ताः । कलकोमलेत्यादित्रयं रोदनक्रियाविशेषणम् ॥ १९२ ॥

तद्गानमाधुर्यं विप्रलम्भरसस्य हृदयमिव दम्भोलेरपि द्रावयद् गिरितरुलतानामन्तःकरणमिवाकर्षद् यदभूत् तदनुवर्णने कः क्षमतां मतान्तरे बाष्परुद्धकण्ठतया गिरां देवी च नानुकथयितुमीष्टे ॥ १६३ ॥

हृदयमिव, सारभाग इवेत्यर्थः । मतान्तरे च·अनुवर्णनसामर्थ्ये च, पक्षे·अस्य वर्णयितुः ॥ १९३ ॥

तथापि श्रीशुककथितानुसारेण शुककथितानुसारेण कथ्यते ॥ १९४ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे रासक्रीडायां कृष्णान्तर्धानं नामाष्टादशः स्तवकः ॥ १८ ॥

श्रीशुको वैयासकिस्तस्य कथितं "जयति तेऽधिक"मित्यादि तदनुसारेण । शुको यथा स्वपाठयितृवचनमनुकथयति·अर्थादिकं किमपि न वेत्ति तथैव मयेत्यर्थः ॥ १९४ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यामष्टादशस्तवकसंगमनम् ॥ १८ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ एकोनविंशस्तवकारम्भः ॥

अथ कोमलमञ्जुलस्वरं

यदरोदीदबलागणस्तदा ।

तदभून्मृगपक्षिसंसदां

श्रुतिरम्यं हृदयस्य दाहकम् ॥ १ ॥

एकोनविंशे गोपीनां विलापः कृष्णादर्शनम् ।

नानाभावप्रकटनं सप्रश्नोत्तरकौतुकम् ॥

स्वान्तः स्वान्तप्रान्तरे कान्तकान्तासंतापोक्तीः पान्थतां संचय्य ।

धर्मास्पृष्टो धन्वधर्मा स मेने ताः संदश्यात्मानमानन्दसिन्धुम् ॥

प्रथमं तासां विलापस्य स्वरूपं निरूपयति त्रिभिः । तद् रोदनं श्रुतिरम्यं कर्णसुखदं सौस्वर्यात् । हृदयदाहकं संतापमयत्वात् ॥ १ ॥

सुदृशां प्रियकीर्तिकीर्तनैः
करुणक्रन्दनकण्ठनिस्वनः ।
स्थिरजंगमचित्तकर्षणो
ललितं गानमिव व्यराजत ॥ २ ॥

गानमिवेति, तास्तु न गानत्वेनानुसंदधुरित्यर्थः ॥ २ ॥

विरहो रस एव मूर्तिमान्
यदभूत् कोमलरोदनस्वनः ।
तमथ स्वरतालमूर्छना-
श्रुतयस्तुल्यशुचोऽनुभेजिरे ॥ ३ ॥

तर्हि कथं तस्य गानायमानत्वमत आह विरह इत्यादि । स्वराद्या एव तदनुवर्तित्वात् तुल्यदुःखाः सत्यस्तं स्वनम्· अनुभेजिरे, तदन्तः प्रविश्यानुवदन्त्यस्तं गानाकारं चक्रुरित्यर्थः ॥ ३ ॥

जयति प्रिय तेऽवतारतो
व्रज एवाश्रयते यमिन्दिरा ।
बत तत्र वसन्नयं जनः
कथमेवं लभते पराभवम् ॥ ४ ॥

यं व्रजम् । इन्दिरा लक्ष्मीः । तत्रेति, व्रजवासिजनमात्र एव तदारभ्य सुखपूर्णे वृत्ते सत्यपि· अयमस्मल्लक्षणो जन एव कथं दुःखीति भावः ॥ ४ ॥

अनुरागिणमङ्गनागणं
वनभूमावपहाय तावकम् ।
क्व नु मन्मथ धाः कृपानिधे
प्रिय दृश्यो भव तस्य चक्षुषाम् ॥ ५ ॥

उक्तन्यायेन जये प्राप्तव्ये प्रत्युत पराभवप्राप्तिरेवास्माकमभूत्। ननु मत्प्रातिकूल्याचरणहेतुकैव साध्वीस्तामिति चेत्, सत्यम्, तत् तु न स्वेषु वयं लक्षयाम इत्याहुरनुरागिणामिति। तव निर्दयत्वे च संभवेत् तदपि न लक्षितपूर्वमित्याहुः कृपानिधे इति। न केवलमन्यजनेष्विवा-स्मास्वपि कृपानिधित्वमात्रं यतो हे प्रियेति। ननु तर्हि केन प्रकारेणैत-दुःखं शमयेयमत आहुर्दृश्यो भवेति। ननु भावनाभरतः सदा सर्वत्र पश्यथैवमामत आहुश्चक्षुषामिति ॥ ५ ॥

अनुकाननकुञ्जमन्दिरं
प्रतिवर्त्म प्रतिवृक्षवीरुधम्।
तव मार्गणखिन्नचेतसः
स्वजनान् नन्दय दृश्यतां गतः ॥ ६ ॥

नन्वत्र वन एवास्मि भवत्य एव मामन्विष्य बलात् किमिति न पश्यन्तीत्यत आहुरनुकाननमिति। दृश्यतां दृश्यत्वं प्राप्तः सन्। अनेन जयति प्रियेति पद्यत्रयेण "जयति तेऽधिकं जन्मना व्रज" इति मूलप-द्यमनुसृतम् ॥ ६ ॥

निशितेन दृगञ्चलेन हे
सविषेणेव शरेण नो मनः।
विनिकृन्तसि हन्त योषितां
तदयं किं बत नैव नो वधः ॥ ७ ॥

ननु किं मया पूर्वं विप्रकृतं यतो भवतीनामेतत् कष्टं समजनी-त्यत आहुर्निशितेनेति। विनिकृन्तसीति, तव सार्वदिकं शीलमेवैतदिति वर्तमानकालत्वम्। योषितामिति, नहि योषित्सु शरक्षेप उचित इति भावः। ननु भो नीतितन्त्रोपदेष्ट्र्यो योषित्स्वेव कटाक्षशरो निक्षेप्तुमुचितो विदग्धस्य नान्येषु, सत्यम्, त्वं कौतुकेनोपहससि, अस्माकं तु प्राणत्याग इत्याहुस्तदयमिति। नोऽस्माकमयं किं नैव वधः, अपितु वध एव, अयं

भावः, कटाक्षशरं प्रहृत्य यथा योषितो न म्रियन्ते तथा तदुत्तरं तत्समुचितसंधुक्षणमपि विदग्धजनः करोति, त्वं तु न तथा करोषीति । त्वयि स्त्रीवध एव फलिष्यतीति भावः ॥ ७ ॥

अथ नो वध एव ते मतो
यदि हा हन्त वृथा स्म रक्षिताः ।
विषवारिदवानलादितो
घनवर्षाकरकादिपाततः ॥ ८ ॥

ओमिति ब्रुवन्तं तमाहुरथेति । मतोऽभिप्रेतः । करका वर्षोपलः । वृथा रक्षिता वयमिति, "नोपेक्ष्यते वध्यजनो न पुष्यते" इति नीतेः । प्रतिपालितजनवधे च हत्यावैशिष्ट्यमिति भावः ॥ ८ ॥

अथवा सकलावनेऽत्रिता
बत यूयं च तथेति भाषसे ।
परुषैरुदितैर्विनाश्य किं
पुनरस्माकमसूनपालयः ॥ ६ ॥

सकलानां सर्वव्रजवासिनामवने पालने कर्तव्ये यूयं च तदन्तःपातिन्योऽविता दैवाद्रक्षिता अभूत, अन्यजनासंपृक्ततया यदि प्राप्ता अभविष्यत तदा त्वहनिष्यमेवेति भावः, इति भाषसे चेत्, तदा परुषैरुदितैर्वाक्यैः "तद्यात मा चिरं घोष"मित्यादिभिरस्माकमेकत्रैव पृथक् प्राप्तानामसून् प्राणान् विनाश्य पुनर्मन्दहसितप्रदर्शनौषधेन किं किमर्थमपालयः रक्षितवानसि ॥ ९ ॥

न तवेहितहेतुरीक्ष्यते
परमस्वेच्छ कुतूहलात् परः ।
न बत व्यतिरिक्तमिष्यते
मृतसंजीवनतः कुतूहलम् ॥ १० ॥

तत्र तूष्णीं स्थितमित्रालस्य स्वयमेव तत्कारणमाहुः- न तवेति । ईहितस्य तादृशचेष्टितस्य हेतुः कुतूहलात् परोऽन्यो न लक्ष्यते, यतः परमा स्वेच्छैव यस्य हे तादृश । कुतूहलस्यापि वैविध्ये मृतसंजीवनतो व्यतिरिक्तम्- अन्यत् कुतूहलं न- दृश्यते, युक्त्या न लभ्यते- आदौ जन्तुर्मृतः म्रियते पश्चात् संजीव्यते पुनरपि मार्यते पुनश्च संजीव्यते- इत्येवंलक्षणमेव कुतूहलं तथैवोपलम्भात् ॥ १० ॥

नहि जीवयितुं परिश्रम-
स्तव दूरस्थितजीविता हि नः ।
तव दर्शन एव तद्भवेत्
त्वदृते नो न हि जीवितं परम् ॥ ११ ॥

ननु मारणं सुकरमेव मृतस्य संजीवनं दुष्करमित्यत आहुः- नहीति । दूरे स्थितं जीवितं यासां ता अस्मान् । तद्-जीवनं भवेत्, यतस्त्वदृते त्वां विना परमन्यद्-जीवितं नहि,अतः त्वस्य दर्शनादर्शने एव दत्त्वास्माकं जीवनमरणे करोषीत्यर्थः ॥ ११ ॥

नहि वल्लववंशजो भवान्
गतभीर्वल्लवयोषितां वधे ।
सहवाससगोत्रसंपदे
ब्रत यः कोऽपि भवेदनुग्रही ॥ १२ ॥

इंद्रो तत् कौतूहलं च महामदलुलीजराजपुत्राणां जात्यन्तर एव श्रुतं न तु स्वजातिमात्र एव तव तु स्वप्रियबन्धुवर्गेऽपि तदित्याहुर्नहीति । नहि गतभीः, अपितु गतभीरेवेत्यर्थः । यः कोऽपि सर्वोऽपीत्यर्थः । सत्तमस्तु परेषामपि संपदे- अनुग्रही भवेत्, भवांस्तु स्वेषां विपदे निग्रही भवेरित्यनुपमोऽसीति भावः । अनेन "निशिते"त्यादिना पद्यषट्केन "शरदुदाशय" इति "त्रिजलाख्यया" द्विति मूलपद्यद्वयमनुसृतम् ॥ १२ ॥

द्रुहिणेन न विश्वगुप्तये
त्वमभिष्टुत्य भुवि प्रकाशितः ।
अथ विश्वगता हि मादृशी-
र्वत गोपायसि किं न मुह्यतीः ॥ १३ ॥

ननु ब्रह्मप्रार्थनया परमेश्वर एवावतीर्णोऽस्मि नाहं कस्यापि वंशज इति चेत्. मास्मासु मृषा स्वमाहात्म्यं प्रकाशयेत्याहुर्द्रुहिणेति । द्रुहिणेन ब्रह्मणा त्वं न प्रकाशितः, यतोऽथेत्यादि । अनेन "न खलु गोपिकानन्दन"इति[1] ॥ १३ ॥

भवभीतिजुषां कृताभयं
रतिभाजामभिलाषवर्षुकम् ।
कमलाकरलालितं प्रभो
कुरु नः शीर्षणि पाणिपल्लवम् ॥ १४ ॥

तन्माहात्म्यं चेत् सत्यं तर्ह्येवं त्वां ब्रूम इत्याहुर्भवेति । अनेन "विरचिताभयं वृष्णिधुर्य"ति ॥ १४ ॥

स्वजनस्मयखण्डनप्रिय
व्रजदुःखक्षयवीर धीर नः ।
भज निर्गतशङ्क किङ्करी-
र्मुखचन्द्रं द्रुतमेव दर्शय ॥ १५ ॥

अथ तथैव दैन्योदयेन तत्र दोषमनारोपयन्त्यः. अस्माकं गर्वखण्डनार्थमेवमाचरितं त्वयेत्याहुः स्वजनस्मयेति । स्मयो गर्वः । व्रजदुःखक्षये वीर समर्थ, हे दयावीरेत्यर्थः । निर्गता शङ्का यस्येति, अधुनाप्यस्मद्गर्वशेषोऽस्तीति मा शङ्किष्ठा इति भावः । अत एव हे धीर परमविचारनिपुण । अनेन"व्रजजनार्तिहन् वीर योषिता"मिति ॥ १५ ॥

---

१ सर्वत्र· अनुसृतमित्यनुसंधेयम् ।

भजतामघखण्डनं गत्वा-
मनुगं श्रीभरभूरिलाञ्छनम् ।
फणिमौलिमणिप्रभाञ्चितं
स्तनयोरर्पय नः पदाम्बुजम् ॥ १६ ॥

एवं च नयनसंतापं निर्वाप्य हृदयसंतापमपि निर्वापयेत्याहुः। भजतामिति कृतज्ञत्वं गत्वामिति निरुपधि कृपालुत्वं श्रीभरेति स्वसौन्दर्येण स्वत एव सर्वाकर्षकत्वं फणिमौलीति महाप्रभाववत्त्वेन सदैवाह्लानत्वं चोक्तम्। तेनास्माकं भजनमभजनं वा भवतु तथापि परमकृपामयं सर्वाकर्षकं त्वच्चरणाब्जं स्वप्रभावेणैव तप्तकुचावपि शीतलीकृत्य तत्र स्थातुमर्हत्येवेति द्योतितम्। अनेन "प्रणतदेहिनां पापकर्षण"-मिति ॥ १६ ॥

वचसा मधुनोऽपि मञ्जुना
मधुरार्थेन सुकोमलेन नः ।
चिरकालमुपोषिते इव
श्रवणे जीवितनाथ तर्पय ॥ १७ ॥

ततश्च संतप्तौ कर्णावपि कृतार्थौकुर्वित्याहुर्वचसा· इति। मधुनोऽपीत्यादिविशेषणत्रयेण स्वरार्थशब्दानां सुखदत्वं व्यञ्जितम् ॥ १७ ॥

दरहाससुधानुधाविना
मधुरेणाधरबिम्बशीधुना ।
त्वदृदर्शनशोकशोषिता
दयिताप्याययितुं त्वमर्हसि ॥ ॥ १८ ॥

अथ क्रमप्राप्तं रसनेन्द्रियसुखमप्याशासानास्तत्रैव स्वेषामसाधारण्यं व्यञ्जयन्ति दरहासेति। सुधयापि· अनुधावनं प्रक्षालनं तद्वता· इति मधुनोऽप्यत्र वैलक्षण्यमुक्तम्। हे दयितेति निजभावव्यञ्जना। पद्यद्वयेनानेन "मधुरया गिरे"ति ॥ १८ ॥

अघहन्तृ नुतं कवीश्वरै-
रतिकान्तं बत तप्तजीवनम् ।
कथयन्ति भवत्कथामृतं
मृतसंजीवनमन्वहं बुधाः ॥ १६ ॥

किंच त्वद्वियोगमहाव्याधेः प्रसिद्धं यदौषधं सद्भिः सेव्यते तत् प्रत्युत सेवितमस्माकं तं द्विगुणीचकारैवेत्याहुस्त्रिभिः । अघहन्त्विति उत्तरपद्यार्थमनुसृत्य । वयं तु दुःखवर्धकमपि कथयामः । तथा नुतं च निन्दितं च अतिकान्तं च अतितापकं च तप्तजीवनं च जीवनसंतापकं च मृतसंजीवनं च जीवितमारकं च ॥ १९ ॥

अनुरागवतां तु चेतसा-
ममृतं वा किमु वा हलाहलः ।
सुखदं च सुदुःखदं च त-
न्नहि विद्मस्तव कीदृशं वचः ॥ २० ॥

अमृतं वा हलाहलो वेति, आस्वादनतृष्णयोर्युगपदेवातिवर्धना-दिति भावः । विरहे तु तदतिस्मारकत्वेनाप्राप्त्या तृष्णाधिक्येन सुतरा-मेव दुःखदत्वम् ॥ २० ॥

अमृतेन निषेवितं बहिः
सुरसारोद्धृतधारमन्तरे ।
चरितं च वचश्च ते समं
रतिमन्तो हि विदन्ति तत्त्वतः ॥ २१ ॥

ननु निन्दामि च पिबामि चेति न्यायेन तर्हि किं तदेव मुहुरनु-शील्यते तत्राहुः अमृतेनेति । उक्तार्थमेव चरितं च वचश्चेति । यथा तव चरित्रमध्ये वयं पतितास्तथा वचस्यपीति भावः । अघहन्त्विति पद्य-द्वयेन "तव कथामृत"मिति ॥ २१ ॥

हसितं प्रणयार्द्रमीक्षितं
किमपि ध्येयमपीहितं तव ।
निभृताश्च हृदिस्पृशः कथाः
कितव क्षोभयतेऽखिलं हि नः ॥ २२ ॥

किंच त्वच्चेष्टितं सर्वमपि पूर्वं सुखदमपि दुःखोदर्कमेवेत्यधुनैवा-
वगतमित्याहुर्हसितमिति । अनेन "प्रहसित"मिति ॥ २२ ॥

अणुमात्रमपीह वर्तते
नतरां प्रेम हि मादृशीषु वः ।
तिलमात्रमपीह तु क्षमं
न समर्था वयमीक्षितुं तव ॥ २३ ॥

किंच प्रेमशून्यो भवानेव सुखी, प्रेमवत्यो वयं त्वत्कृते सदैव
दुःखिन्य इत्याहुः अणुमात्रमपीति ॥ २३ ॥

व्रजति व्रजतो गवां व्रजं
विपिने चारयितुं यदा भवान् ।
चरणौ तव खिद्यतस्तृणै-
रिति नः खिद्यति मानसं तदा ॥ २४ ॥

तदेव प्रपञ्चयन्ति व्रजतीति ॥ २४ ॥

नवपद्मपलाशकोमलं
क्व तव श्रीमदमङ्घ्रियुग्मकम् ।
क्व स तीक्ष्णतरस्तृणाङ्कुरः
स्मरणं तन्मरणाय नो भवेत् ॥ २५ ॥

ननु पर्यटतां जगज्जनानां मध्ये ममैव चरणौ तृणैः खिद्यत इति
कथमवगतं कथं वा तयोः खेदो युष्मन्मानसे एव संक्रान्तस्तत्राहुर्नव-
पद्मेति । युग्मकमित्यनुकम्पायां कन् । स्मरणमित्यनुमानादेवेति भावः ।
ततश्च तथा भवत्पादर्शनयोरत्यन्तवैषम्यमानीतम् । अनेन श्लोकत्रयेण
"चलसि यद्व्रजा"दिति ॥ २५ ॥

सकलं दिनमेवमेव हे
रमया त्वद्गुनखेदचिन्तया ।
अथ मर्मणि मर्मणि भ्रमन्
व्यथयत्येव स कोऽपि हृद्रुगः ॥ २६ ॥

नच तत् स्मरणं क्षणिकं नापि सा मनोव्यथा·एकदेशवर्तिनी नाप्युपशमवतीत्याहुः सकलमिति । अथेत्यत एवार्थं श्लोकादौ योज्यम् ॥ २६ ॥

अथ तद्दिवसावसानतो विपिनान्ताद्व्रजमध्यमाविशन्
घनगोखुरधूलिधूसरैरलकैश्चारु मुखं च दर्शयन् ।
हृदये मनसोऽप्यगोचरं कुसुमेषुं सहसा प्रवेशयन्
विविधैरभिलाषकल्पनैः कलिलं नाथ करोषि नो मनः ॥ २७ ॥

अथ तदनन्तरम् । सहसा, दर्शनसमकालमेवेत्यर्थः । कलिलं व्यामिश्रम् ॥ २७ ॥

अयमेष्यति नोऽद्य मन्दिरं
रजनावित्यभिलाषरंहसा ।
सकलां रजनिं प्रजागरै-
रतिखेदाद्गमयामहे वयम् ॥ २८ ॥

कीदृशमभिलाषकल्पनमत आहुः· अयमेष्यतीति ॥ २८ ॥

इति नैव कदापि नो भवान्
सुखदोऽभूदनुभूतसौहृदः ।
अकरोत् प्रियमद्य यत् क्षणं
बत तस्मिन् परिणाम ईदृशः ॥ २९ ॥

अनुभूतं सौहृदं यस्य सः । श्लोकपञ्चकेन "दिनपरिचय" इति ॥ २९ ॥

प्रणताभिमतप्रदं विधे-
रपि वन्द्यं धरणीविभूषणम् ।
स्मृतिमात्रविपद्विशोषणं
पदपद्मं स्तनयोर्विधेहि नः ॥ ३० ॥

अथेत्थं दोषारोपेण विमुखीभूयापगतं दूष्यन्तमिव कान्तं मत्वा कृतानुतापाः पुनरनुरञ्जयन्त्य आहुः प्रणतेति ॥ ३० ॥

दरघर्मपयोमधुद्रवं
नखचन्द्रद्युतिवृन्दकेशरम् ।
लसताम्रलदङ्गुलीदलं
पदपद्मं स्तनपूर्णकुम्भयोः ॥ ३१ ॥

चरणस्य पद्मत्वमुपपादयन्ति दरघर्मेति । श्लोकद्वयेन "प्रणतका-मद"मिति ॥ ३१ ॥

रतिवर्धनमर्दनं शुचां
मुरलीचुम्बनलब्धसौभगम् ।
विषयान्तररागनाशनं
मधुरं पायय नोऽधरामृतम् ॥ ३२ ॥

अथ तथैव दत्ताङ्गसङ्गमिव तं मत्वा जातस्मरोन्मादाः सुरतधा-र्ष्ट्यमर्थयन्ते रतिवर्धनमिति ॥ ३२ ॥

मुरलीकृतपानमाननं
नहि वः पेयमिति स्म माभिधाः ।
न मधु ज्वरदाहनाशनं
सरघोच्छिष्टमितीह हीयते ॥ ३३ ॥

तस्यौषधत्वव्याजेन निजातिलोभ्यत्वमेव व्यञ्जयन्त्य आहुः, मुर-लीति निष्प्राणाया अपि मुरल्या लोभधार्ष्ट्यमुत्पादयन्ति, किमुतास्माक-

मित्यपि द्योतितम् । सद्यो मधुमक्षिका न क्षीयते न त्यज्यते । श्लोक-द्वयेन "सुरतवर्धनं शोकनाशन"मिति ॥ ३३ ॥

अटतो विपिने दिने तव
स्मितपीयूषसुपेशलं मुखम् ।
न दृशां विषयो यदा भवेत्
त्रुटिरेकापि तदा युगायते ॥
विषयोऽपि दृशां यदा भवे-
द्वदनं ते कमलेन्दुनिन्दकम् ।
नयनस्य निमेष एव नो
व्यथयत्येव मनो युगान्तवत् ॥ ३४ ॥

व्यतिरेकेण तु दुःखस्य दुःसहत्वमाहुः· अटत इति । युगान्तवत् प्रलय इव निमेषो मनः कर्म व्यथयति । क्षणस्य कल्पता निमेषासहतेति महाभावानुभावौ । श्लोकद्वयेन "अटति यद्भवानह्नि कानन"मिति ॥ ३४ ॥

अथ पतिभिर्निरुध्यमाना मानापगमे या गुणदेहं देहं विहाय कृष्णाङ्गसङ्गसमुचितं देहमासादितास्ता एव साभिमानमाक्रोशन्त्य ऊचुः ॥ ३५ ॥

मानस्य ज्ञानस्यापगमे, मूर्छायां सत्यामित्यर्थः । गुणदेहं सत्त्वा-दिगुणालिप्तम् ॥ ३५ ॥

पतिपुत्रसुहृत्सहोदरान्
तृणकल्पानतिमुच्य तेऽन्तिकम् ।
कितवोपगताः पुनः कथं
विपिने नो निशि कष्टमत्यजः ॥ ३६ ॥

पतिपुत्रेति, जनिष्यमाणपुत्रशोकत्याग एव पुत्रत्यागः । कितवेति, पुनरपि देहं त्याजयितुं प्रयतसे· इति भावः । अनेन "पतिसुतान्वये"ति ।

तत्र च "गतिविद"इति पदस्यास्मद्गृहत्यागरूपां गतिं जानत एव तवा-न्तिकमिति व्याख्यानवशात् तद्दुर्गमात्रगामित्वं पद्मस्योचीतम् ॥ ३६ ॥

पुनः सकला एव सकला एवमूचुः ।

हसितं मृदु चारु वीक्षितं
रहसि प्रेमवचः स्मरोदयम् ।
भुजयोरुरसश्च रम्यतां
विमृशन्नो हृदयं विमुह्यति ॥ ३७ ॥

एवमूचुरिति, अहो त्वन्मोहनतया सर्वा एव वयमतिचतुरा अपि निर्गीर्णा नैकस्या अपि रचेति । मोहनवस्तून्येव गणयन्ति हसितमिति । एवं व्यस्ततया चहैव समस्ततया तु निजभुजवक्षःसमीक्षणपूर्वकहसितपुरः-सरास्मदवलोकनसहितं सप्रेम कामकलामयं वचनम्,एवमेव महामोहन-मिति विमृशत्, विचारेणास्वादयत् सदित्यर्थः । अनेन "रहसि संवि-द"मिति ॥ ३७ ॥

व्रजकाननवासिनां मुदे
भवतो व्यक्तिरितीयतीं प्रथाम् ।
व्यभिचारवतीं स्म मा कृथाः
प्रथयास्मन्मनसो रुजां चयम् ॥ ३८ ॥

कृतमस्मदपेक्षया, स्वयशोनैर्मल्यरक्षणानुरोधेनाप्यस्मांस्त्रायस्वेत्या-हुर्व्रजेति । अनेन "व्रजवनौकसा"मिति ॥ ३८ ॥

तव तच्चरणाम्बुजं विभो
कठिनेषु स्तनमण्डलेषु यत् ।
सभयं बिभृमो वनेऽमुना
विचरन् नो दुनुषे तृणाङ्कुरैः ॥ ३९ ॥

अहो चित्रमस्मान् विहाय स्वकष्टमप्युररीकुरुषे तेनाप्यस्मान् पुनर्दुःखयितुमित्याहुस्तवेति । सभयं बिभृम इति, स्तनस्पर्शेन तस्य सुख-

मस्तीत्यनुसंधायैव बिभ्यत्योऽपि काठिन्यं विमृश्य सभयमेव बिभृम इत्यर्थः। अमुना चरणाम्बुजेन नोऽस्मानेव तुनुषे, अदो तुन्वन् सखितिभावः॥ ३९॥

कठिनाः कुचमण्डला हि वो
मृदवः स्युर्न ममाङ्घ्रिसङ्गतः।
इतरे तृणशर्करादयो
ऽपि मेद्यन्ति न तैर्मम व्यथा॥ ४०॥

मेद्यन्ति अङ्घ्रिसङ्गतो द्रवन्ति, कोमलायन्त इत्यर्थः, "ञिमिदा स्नेहने"॥ ४०॥

इति चेदृतमेव नो मृषा
कुलिशं यद् द्रवति त्वदीयपात्।
कुलिशादपि निष्ठुरात्मनां
किमुरोजाः कठिना न सन्तु नः॥
युग्मकम्॥ ४१॥

ऋतमेव सत्यमेव, नैतन्मृषा वदसीत्यर्थः। निष्ठुरात्मनामिति, त्वद्विच्छेदेऽप्यात्मनामनिष्क्रमणादिति भावः॥ ४१॥

कुसुमादपि कोमलं मन-
स्तव यत् प्रति महाकठोरताम्।
तदपि ह्यतिदारुणात्मनां
बत यादृच्छिकसङ्गतो हि नः॥ ४२॥

हन्त किं वक्तव्यमस्मत्काठिन्यगौरवं येन त्वमपि कठिनीकृतोऽभूरित्याहुः कुसुमादपीति। यद्वा वचनभङ्ग्या तस्य स्वाभाविकमेव नैष्ठुर्यं स्वेषां तु नैसर्गिकमेव सारल्यं व्याजस्तुत्या दृढयन्त्य आहुः कठिनाः कुचमण्डला इत्यादि। एतत्पद्यचतुष्टयेन "यत् ते सुजातचरणाम्बुरुहे" ति॥ ४२॥

असमञ्जसमेतदुच्चकै-
र्युगपद्दूरिवधूवधस्तव ।
इति नो वितथा मतिर्वृथा
व्रजतोऽसून् प्रसभं हरस्य नः ॥ ४३ ॥

तथैव व्याजस्तुत्या तस्य निष्कृपत्वमाहुरसमञ्जसमिति । व्रजतोऽपि प्राणान् बलादेव हरसि,अहो कृपालुत्वमिति भावः, वस्तुतस्तु निर्यान्तोऽपि प्राणास्त्वदाशयैव पीडोद्रेकलिप्ता येव न निर्यान्ति, अतो मारणादप्यधिकदुःखदोऽसीति भावः ॥ ४३ ॥

अथवा कुहकैककौतुकी
हृदये नः प्रकटं परिस्फुरन् ।
निरुणत्सि बहिर्विनिर्यतो
बत नोऽसूनिति तेऽतिकौतुकम् ॥ ४४ ॥

किंच, आशाबन्धतोऽप्यपर्याप्ताः प्राणास्त्वत्स्फूर्त्यैव रक्ष्यन्ते॰इत्याहुः॰ अथवेति । बहिरन्तर्धाय॰ असून् यापयसि पुनर्हृदये परिस्फुरन् निरुणत्सि॰ इति निष्कामणनिरोधनमयं तवैतदतिकौतुकमिति ॥ ४४ ॥

न वयं बहुभिर्गवेषणै-
रहह त्वामवलोकितुं क्षमाः ।
इति नाथ भवद्गवेषणे
स्वयमेव प्रसरन्ति नोऽसवः ॥ ४५ ॥

किंच तदप्यतः परं निरोद्धुमसून् न पारयिष्यसीत्युत्प्रेक्षणेनाहुर्न वयमिति । स्वयमेवेति, यदि यूयं श्रान्तास्तर्हि वयमेवान्वेष्टुमितो निःसराम इत्यस्मभ्यं प्रकुप्येवेत्यर्थः ॥ ४५ ॥

भम लब्धिरहो मदिच्छया
न विना तेन कृतं समुद्यमैः ।

इति चेन्मनसि स्फुरद्रुषां

त्यज गच्छन्तु बहिर्वताखव: ॥ ४६ ॥

इति चेदिति । तवेच्छा तु नैव भविष्यतीति वयं जानीम एवेति भाव: ॥ ४६ ॥

अयि जीवितनाथ जीवितै-

र्भवदन्वेषकृते बहिर्गतै: ।

त्वमवश्यमवेत्यसेऽचिरा-

न्न हि भृत्येषु पराङ्मुख: प्रभु: ॥ ४७ ॥

विलापगीतमुपसंहरन्त्य: सन्यायमाहु:· अयि जीवितेति ॥ ४७ ॥

इति रोदनरीतिकोमल:

कलकण्ठीकुलकण्ठनिस्वन: ।

मृगपक्षिवधूररोदयत्

तरुवल्लीहृदयान्यदारयत् ॥ ४८ ॥

मृगेति, अधिरूढभावस्यानुभावोऽयं, यदुक्तं "तिरश्चामपि रोदन" मिति ॥ ४८ ॥

निकटस्थित एव तत्र स

प्रणयी गोकुलराजनन्दन: ।

कृतकं कठिनत्वमावह-

न्नपि सोढुं प्रबभूव नापरम् ॥ ४९ ॥

कृतकं कृत्रिमम् ॥ ४९ ॥

पुनरपि विलपन्त्यो मुक्तकण्ठं रुदत्य:

प्रियगुणगणमुच्चै: कोमलं कीर्तयन्त्य: ।

तमथ समयमीयु: प्राणनिर्याणतो वा

सुखदमवधिभूतं प्राणनाथागमाद्वा ॥ ५० ॥

तं समयम् अवधिभूतं सन्तं सुखदम् ईषुः इष्टवत्यः। तस्यावधिभूतत्वेन सुखदत्वे हेतुद्वयं प्राणनिर्याणतो वा प्राणनाथागमाद्वा इति। अयमर्थः, सर्वाभिः संमत्या संभूयायं प्राणात्मकः समय एवावधित्वेन व्यवस्थापितः, यद्यत्र स नायाति तदा प्राणांस्त्यक्त्वा सुखिन्यः स्याम, यद्यायाति तदा प्राणवत्य एव सुखिन्यः स्याम, इत्युभयथाप्ययं समयः सुखदोऽस्त्विति ता निरणैषुरिति ॥ ५० ॥

एवं सति स तिरोभावतो भावतोषेणोपरतो रतोत्सव इव मूर्तः सकरुणारुणापाङ्गेषुणा तासामन्तःक्रान्तिलतां समूलमुन्मूलयन्निव स्मितचन्द्रिकया कयाचन मनोऽगन्धकारं विद्रावयन्निव ॥ ५१ ॥

एवं सति स कृष्णस्तिरोभावत उपरतः प्रादुरासीदित्यन्वयः। अन्तःक्रान्तीति, मनःपीडाया एव कृपाकटाक्षेषुणा निवर्त्यत्वे लतात्वं ततोऽप्यतिशयेन स्मितचन्द्रिकया च अन्धकारत्वं चोत्प्रेक्षितं नतु वस्तुभेदस्य ॥ ५१ ॥

मधुरिमगरिमगभीरतया मुहुरुदितरुदितक्रमादिकं कदापि नानुभूतमिति मितिरहितां संविदं प्रतिफलयन्निव ॥ ५२ ॥

मधुरिम्णो गरिमा गौरवं तस्य गभीरतया गाम्भीर्येण मितिरहिताम् अपरिमितां, संविदं ज्ञानम् ॥ ५२ ॥

तदेव प्रथमं प्रथमङ्गलमङ्गलक्ष्मीसौभाग्यं दर्शितमिव प्रतिबोधयन् विरहरंहसा यदितस्ततो गवेषितं तदपि स्वप्नविलसितमिवानुभावयन् ॥ ५३ ॥

प्रथं ख्यातं मङ्गलं यत्र तत् अङ्गलक्ष्मीसौभाग्यं, प्रथममेव दर्शितमिति, अभिसारान्तमारभ्यैतावन्तं कालमभिव्याप्यैव दर्शितमिति ज्ञापयन्, न तु विलापान्ते इदानीमित्यर्थः। ततश्च विरहेति स्वप्नेति तत्सङ्गविच्छेदस्यानुभवलोपादिति भावः ॥ ५३ ॥

प्रमदमदनानन्दरसेन तासां हृदयं सुहृयं सुक्षालयन्निव वपुरपि

विरहकृशानुकृशानुतप्तं तत्कालमेव तृप्तिशीतलतया स्तवपुरं वपुर-न्तरतां प्रापयन्निव निष्क्रम्य गतं जीवितं पुनरपि स्थानस्थितं कार-यन्निव ॥ ५४ ॥

अयं सुहृद्, विरहकृशानुना कृशं च· अनुतप्तं च तथाभूतं वपुः स्तवपुरं स्तवस्य प्रशंसायाः पुरं वासस्थानम्, यद्वा वपुरन्ततामित्यस्य विशेषणमेतत्, स्तवं पिपर्तीति स्तवपूस्ताम् ॥ ५४ ॥

विरह इति नामधेयं कदापि श्रवणयोर्न जातमिति भावं भा-वन्दितं कुर्वन्निव ॥ ५५ ॥

भा कान्तिस्तया वन्दितं प्रदीप्तम्,भावान्तराल्लुप्तमित्यर्थः ॥ ५५ ॥

एक एव युगपदेव सर्वा एव समालिङ्गन्निव गरिमधुरामधुरा-धरसंयोगं विनापि युगपदेव सकलानामेव विलसत्कपोलचुम्बनचा-तुरीमुरीकुर्वन्निव तत्रैव स्थितोऽपि कुतश्चिदिवागतः साक्षान्मन्मथ-मन्मथ इव पीतांशुकांशुकान्तो विलोलवनमालस्तासां हृदयाकाशा-दिवावनितलादिव वनान्तरादिव न कुतोऽपीवागतस्तथैव स्थित इव प्रादुरासीत् ॥ ५६ ॥

समालिङ्गन्निवेति, तद्दर्शनमप्यालिङ्गनजन्यसुखदायकमित्यर्थः । गरिमधुरया गैारवातिशयेन मधुरस्याधरस्य संयोगं विनापीति, चुम्बनसु-खमपि दर्शनादेवोपलब्धमित्यर्थः ॥ ५६ ॥

अकस्मात् कस्मात् कारणादिव समुद्गतं पूर्णसुधाकरमिव कु-मुदिन्यः, दुरवग्रहावसाने तत्कालोदितं नवधाराधरमिव चातकयु-वतयः, अभितो वनं समुज्ज्वलज्ज्वलनसंतापदह्यमाना निर्मेघमा-सारं सारङ्गरमण्य इव,परपुरप्रवेशमारचय्य चिरान्निवर्तमानमात्मानं सद्यस्तनवस्तनव इव, तमालोक्य युगपदेव समुल्लसिता बभूवुरचि-तापाङ्गाः, तत्समकालमेव प्रमोदेन सह समुत्तस्थुः, वपुषा सह स-कलसंतापं विसस्मरुः, उत्कण्ठया सह समीपमभिसस्रुः ॥ ५७ ॥

कुमुदिन्य इति, तं विना वस्त्वन्तरेण प्रफुल्लतानवाप्तेः । चातक्य इति, तं विना तृष्णोत्थविलापानपगमात् । सारङ्गरमण्य इति, तं विना बाह्याभ्यन्तरसंतापाशान्तेः । तनव इति, तं विना स्वसत्ताया अप्यनवाप्तेः । तत्र दुरवग्रहः स्वदर्शनादानप्रौढिः स एवावग्रहो वृष्टिप्रतिबन्धस्तदन्ते । परपुरप्रवेशं परलोकगमनं कृत्वा सद्यस्तत्क्षणादेव तनवो देहाः, तनवोऽतिकृशाः ॥ ५७ ॥

ततश्च ।

काचित् कराम्बुरुहमञ्जलिना स्म धत्ते
काप्यंससीमनि भुजं मदघूर्णितायाम् ।
ताम्बूलचर्वितममुष्य दधार काचित्
पाणौ हिरण्मयपतद्ग्रहकान्तिकान्ते ॥ ५८ ॥

अञ्जलिना स्म धत्त इति, विनयवती दक्षिणामृद्वीयम् । अंससीमनीति, दक्षिणप्रखरेयम् । ताम्बूलचर्वितेति, दक्षिणमृद्वी सेवापरेयम् । पतद्ग्रह आलवाटीति पीकदानी इति वा ख्यातः ॥ ५८ ॥

काचित् तप्तस्तनमुकुलयोस्तत्पदाब्जं निधाय
प्रत्यग्रोद्यन्नवकिसलयाच्छाद्यमानाननस्य ।
भाविक्रीडोत्सवरससमारम्भसंसूचकस्य
स्वाङ्के शोभामधित सुतनुः स्वर्णकुम्भद्वयस्य ॥ ५६ ॥

काचित् तप्तेति, प्रखरेयम् । प्रत्यग्रेणाभिनवेन उद्यता नवकिसलयेन आच्छाद्यमानमाननं यस्य तत् तथा तस्य स्वर्णकुम्भद्वयस्य शोभां स्वाङ्के अधित ॥ ५९ ॥

काचिद्भाले भ्रुकुटिकुटिले तन्वती भ्रूतरङ्गान्
वञ्चत्कोणैररुणतरुणैरञ्जनाक्तैरपाङ्गैः ।
कन्दर्पस्य प्रमदगरलेनेव दिग्धैः पृषत्कै-
र्निघ्नत्यालोकत कुतुकिनी दन्तदष्टाधरश्रीः ॥ ६० ॥

काचिद्वाल इति, रोषावेशेनेव कुटिलभावोद्गारप्राखर्येऽपि मध्येवेयम्, पूर्ववद्वाहुधारणादिप्रागल्भ्याप्रकाशनाद् वामा च । प्रकृष्टो मद एव गरलं तेन । पृषत्कैर्बाणैः । निघ्नतीति, कराम्बुरुहधारिण्यादिकान्तिभिः संपृक्तमपि तं दूरस्थितैव सतीयं क्षोभयतीति सौभाग्योद्रेकः सूचितः, कुतुकिनी विलासवतीत्यन्तरुल्लासेन वस्तुतः कोपाभावश्च ॥ ६० ॥

अनिशमनिमिषाभ्यां लोचनाभ्यामथैका
मुखकमलमधूलीमापिवत् प्राणबन्धोः ।
अलभत न पिपासापारमेषा तथासी-
दियमपि च नितान्तं पीयमानापि पूर्णा ॥ ६१ ॥

एषा गोपी, इयमपि मुखकमलमधूलीमिति तदङ्गस्पर्शनाद्यकरणाद्वामा, इयं पूर्वस्यास्तादृशकटाक्षशराघातजातक्षोभस्य तस्य संत्रस्तमुखकमलमधूल्याः पानजनितहर्षेण विस्मृतस्वप्राखर्या तदानीं मध्यायमानेव, तत्सखीयं वामा ॥ ६१ ॥

तं कापि लोचनपथेन निवेश्य चित्ते
तेनैव निर्गमनशङ्कनतो नताक्षी ।
तत्कालमेव विनिमीलितलोचनेव
रोमाञ्चिता विधुमुखी चिरमालिलिङ्ग ॥ ६२ ॥

तेनैव लोचनपथेनैव पुनर्निर्गमनं ततः शङ्कनत एव हेतोस्तत्कालमेव विशेषेण निमीलिते लोचने यया सा । नताक्षी कुटिलाक्षीति, एषापि वामा मध्या च ज्ञेया । वैष्णवतोषणीव्याख्यानुसारेण कराम्बुरुहधारिण्याद्या एताः क्रमेण चन्द्रावलीश्यामलाशैव्यापद्माराधाललिताविशाखाः सप्त व्याख्याताः । व्याख्यास्यमानास्तदितरास्ता अपि स्वाभियोगवत्यस्तत्तद्गुणयोगादभ्यस्ता ज्ञेयाः, तत्र तत्र वाम्यप्राखर्यादि स्वयमूह्यम् ॥ ६२ ॥

ततश्च ।

काचित् काञ्चनमञ्जरीव विनमद्गात्री मनोरागवेरावेगैः पृथुवेपथुर्विरुरुचे कृष्णं विलोक्यायतः ।

संग्रामोत्सवकौतुकोत्सुकतया सद्यः प्रसूनायुधो
गर्वेणेव चकार चम्पकधनुःकम्पस्य संपादकम् ॥ ६३ ॥

विनमद्द्गाचीति, लज्जया हस्तयुगोद्गमनं विनैव गात्रं मोटयन्तीत्यर्थः ॥ ६३ ॥

ततश्च ।

अभ्युन्नीय परस्पराङ्गुलिदलव्यासङ्गि पाणिद्वयं
लीलालस्यविलुप्तये तनुलतामुल्लासयन्ती तिरः ।
मूर्ध्नः सीमनि मण्डलीकृतमतिस्मेरस्य हर्षोदया-
द्वक्त्रेन्दोः परिधीचकार भुजयोर्युग्मं चकोरेक्षणा ॥ ६४ ॥

अभ्युन्नीयेति, प्राग्वर्यात् कान्तं मोहयितुमिव । हस्तयुगोद्गमनमस्याः पूर्वतो विशेषः । परिधिर्मण्डलम् ॥ ६४ ॥

ततश्च ।

वामा वामकराङ्गुलीदलयुगेनातन्वती छोटिकां
निर्याहीति ह्रियोऽपसारणविधेः संकेतमुद्रामिव ।
ईषन्निःसरतेव दन्तमहसा सार्धं बहिर्निःसृतो
तस्या एव हि वर्त्मकल्पनकृतारम्भेव जृम्भां व्यधात् ॥ ६५ ॥

वामा वाम्यभावविशेषवती नायिका । वामकराङ्गुलीदलयुगेन, वामाङ्गुष्ठमध्यमाभ्यामित्यर्थः । छोटिकां तदुत्थध्वनिम् । तस्या ह्रियः सार्धं बहिर्निःसृतो बहिर्निःसरणनिमित्तं दन्तमहसा रत्नदीपकेनेव वर्त्मकल्पनार्थं कृत आरम्भो यया सा ॥ ६५ ॥

आनीय काप्युरसि पाणिदलेन वेणी-
मेणीदृगुन्नतपयोधरयोर्निवेश्य ।
दोर्भ्यां निपीड्य निबिडं विनिमीलिताक्षी ।
रोमाञ्चकञ्चुकतनूश्चिरमालिलिङ्ग ॥ ६६ ॥

उरसि वेणीमानीयेति संभोगप्रार्थनाभियोगः ॥ ६६ ॥

किंच ।

आघ्राय धूनितशिरः सरसं च वीक्ष्य
व्याधुन्वती मधुकरीं पुरतः पतन्तीम् ।
स्विद्यत्कपोलफलका पुलकाङ्कुरेण
लीलारविन्दमरविन्दमुखी चुचुम्ब ॥ ६७ ॥

धूनितशिरो यथा स्यात् तथा• आघ्राय, शिरोधूननमतिमाधुर्यानुभवोत्थविस्मयाभिनयः । सरसं सोल्लासं भावविशेषसहितं च । व्याधुन्वती तिरस्कुर्वती, दक्षिणपाणिनेत्यर्थः । अयं स्वविपक्षपक्षाक्षेपाभिनयः । अरविन्दमुखीति "योग्यं योग्येन युज्यत" इति मुखचुम्बनाभियोगे न्यायो व्यञ्जितः ॥ ६७ ॥

काचिच्चकोरनयना नयनाञ्चलेन
लीलालसेन दयिताननमीक्षमाणा ।
आलीजनांसतटवेल्लितबाहुवल्लि-
र्मूर्तेव सौभगमहाधनमत्तताभूत् ॥ ६८ ॥

दयिताननमीक्षमाणेति तद्व्यापारे लज्जासंकोचयोरभिनयेच्छा प्रकटा, तदवधानेच्छा तु वास्तवी । आलीजनेत्यालिङ्गनाभियोगः ॥ ६८ ॥

दोर्भ्यां लसत्कनककङ्कणकङ्कृताभ्या-
मामोच्य कापि कबरीं पुनराबबन्ध ।
ध्वान्तभ्रमादिह निलीय किमस्ति मानो
नो वेति तं निरसितुं तमिवान्वियेष ॥ ६९ ॥

आमोच्य पुनराबबन्धेति• अनुभावज्ञापितसुरतान्ताभियोगः, ध्वान्तेत्युत्प्रेक्षया वाम्यापगमात् तत्रातिधार्ष्ट्यमपि द्योतितम् ॥ ६९ ॥

भुजाया वामायाः कलमधुरझङ्कारिवलयं
सलीलं धूतायाः करदलकनीयोऽङ्गुलिकया ।
वितन्वाना वामश्रुतिकुहरकण्डूमथ परा
व्यधात् कामक्रीडासमरजयघण्टाध्वनिमिव ॥ ७० ॥

करस्य दलभूता कनीयसी या॰ अङ्गुलिस्तया ॥ ७० ॥

करेणासव्येन प्रचलवलयालिध्वनिभृता
व्यधूनात् तन्वङ्गी ललितमथ लीलासरसिजम् ।
तदासीदेतस्याः कुसुमशरसंग्रामविजयी
महानेवावर्तो नभसि नवलावण्यसरितः ॥ ७१ ॥

तद् विधूननमेव॰ आवर्त आसीत्॰ अभवदित्यन्वयः । कुसुमशर-संग्रामे विजयः सूच्यत्वेन वर्तते यस्य सः ॥ ७१ ॥

मुदितमदनमोदामर्षघर्माम्बुसिक्तं
निजवपुरथ काचित् स्वोत्तरीयाञ्चलेन ।
व्यजयत कृतहेलं लीलया वीजयन्ती
स्मरसमरपताका मारुतेनाधुनेव ॥ ७२ ॥

मुदितादुल्लसितान्मदनाद्धेतोर्मोदः कान्तदर्शनजानन्दः॰ अमर्ष-स्तदीयकैतवानुसंधानजो रोषस्तदनुभावरूपं यद्धर्माम्बु तेन सिक्तम् ॥ ७२ ॥

अन्तःप्रफुल्लदभिलाषलताततीना-
मौत्सुक्यमारुतजवेन बहिर्विधूतैः ।
पुष्पैरिव स्मितभरैर्विदधे विदग्धा
कृष्णावलोकनमहोत्सवपुष्पवर्षम् ॥ ७३ ॥

कृष्णावलोकनरूपो यो महोत्सवस्तत्र करणीयं पुष्पवर्षं स्मितभरैरेव विदधे । कैरिव॰ अन्तः प्रफुल्लन्तीनामभिलाषलताततीनां पुष्पैरिव, तेन

तासामङ्कुरितत्वपल्लवितत्वपुष्पितत्वेषु जातेषु फलितत्वमपि नेदिष्ठमेवेति द्योतितम् ॥ ७३ ॥

किंच ।

आनन्दजैर्नवकुरङ्गविलोचनाया
बाष्पाम्बुभिर्नयनयुग्मकमापुपूरे ।
कृष्णं विलोकयसि धन्यमसीति गाढं
प्रेम्णा द्रुतेन मनसेव तदालिलिङ्गे ॥ ७४ ॥

कृष्णं विलोकयसीति, अयमर्थः, कर्णेन्द्रियादिद्वारा कृष्णमनुभवतोऽपि मम न तादृशं सुखं यथा त्वद्द्वारेति त्वमेव धन्यमसीत्युक्त्वा प्रेम्णा द्रुतेन प्रेमहेतुकद्रववता मनसा कर्त्रा तन्नयनयुग्मकम् आलिलिङ्गे इव, अत एव तद्द्रव एव नयनयुग्माच्चिःसृतोऽयमित्युत्प्रेक्षा व्यञ्जितेति । तदानीं नयनतादात्म्यं मनसा प्राप्तमिति पर्यवसितो भावः ॥ ७४ ॥

किंच ।

एकाङ्ग्र[१] काञ्चनमयप्रतिमायमानां
स्तम्भः प्रियेक्षणकृतः सहसा व्यधत्त ।
तामेव किं त्रिजगतीललनाललामं
सौभाग्यभारगरिमैव पराबभूव ॥ ७५ ॥

व्यधत्त कृतवान् । ललामं तिलकम् । भारगरिमैवेति, अत एवास्याः स्पन्दनसामर्थ्यं नास्तीवेति ॥ ७५ ॥

आमूलतो मुकुलितेव कदम्बशाखा
काचिद् बभूव विपुलैः पुलकैः किमस्याः ।
बाणान् स्मरस्य विरहे हृदि संप्रविष्टान्
श्रीकृष्णचुम्बकमणिर्बहिराचकर्ष ॥ ७६ ॥

विपुलैः पुलकैः कदम्बशाखा तद्रूपैव बभूव । विरहे कृष्णविच्छेदकाले ॥ ७६ ॥

१ संधिः प्राग्वत् ।

किंच ।

अम्भःकणाकुलितकाञ्चनपद्मिनीव
सिष्वेद काचन चिराय चमूहनेषा ।
प्राणाधिनाथमुखचन्द्रविलोकनेऽस्या
यत् स्यन्दते स्म बत मानसचन्द्रकान्तः ॥ ७७ ॥

स्यन्दते स्म सुस्राव ॥ ७७ ॥

किंच ।

कृष्णं विलोक्य चलचारुचकोरनेत्रा
संचारिचम्पकलतेव चिरं चकम्पे ।
अस्याः प्रविश्य वपुषि स्मरसिन्धुरेन्द्रो
हृद्भूमिकम्पमिव मत्ततया व्यधत्त ॥
काचिद्विकस्वरपिकस्वरसारतोऽपि
चारुस्वरा विधुमुखी स्वरभङ्गमाप ।
वीणास्वभावकलकोमलनिक्वणापि
स्निग्धा घनाम्बुभिरपस्वरमेव धत्ते ॥ ७८ ॥

विकस्वरो यः पिकानां स्वरसारस्ततोऽपि । घनाम्बुभिरिति, दार्ष्टान्तिकपक्षे कृष्णदर्शनामृतैः ॥ ७८ ॥

वेणीं विमुच्य कुटिलां निजबाहुमूले
काचित् कुरङ्गनयना भुजगीभ्रमेण ।
त्रिासविजृम्भितनेत्रमरालितभ्रूः
क्षिप्त्वोत्तरीयसहितामपसर्पमीये ॥ ७९ ॥

उत्तरीयसहितामेव वेणीं क्षिप्त्वा· अपसर्पं पलायनमीये प्राप, स्वीचकारेत्यर्थः । निजस्कन्धे कृष्णबाहुस्पर्शाभियोगोऽयम् ॥ ७९ ॥

॥ शेषमग्रे ॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

OCT 15 1934

JAN 20 '55 H

Digitized by Google

3 2044 107 353 013

Digitized by Google